Almira 1
shelf 3
3

ढ नं. १६८६६

क्र.सं. १६८७७

मू २४५।-

शिवार्चन - चन्द्रिका

Śivārcana candrikā

अ.नं क रा ज १९६९

श्रीगणेशायनमः॥ ॥श्रीसुंदर्यैनमः॥श्रीगुरुभ्योनमः॥ ॥श्रीमंतंक्षिंध्रुत्स्मंशशिशकलधरंबंधुजीवाभिरामं·दानाद्रक्लिन्नगंडं(
स्खलदलिकलभान्लीलयाखेलयंतं॥प्रत्यूहध्वांतभानुंपृथुतरजठरंब्रह्मविष्ण्वीशवंद्यं·वंदेसिंदूरपूरैर्गिरिवरसुतयाचर्चितोत्तुंग
कुंभं॥वंदेशंकरमेकरूढगिरिजावक्त्रारविंदंमुदापश्यंतेनयनांचलेनविलसद्भृंगवरीकांचितं॥मंदस्मेरंदमिडसकलछायाछलेनो
र्मिभिः·प्रेंखालमरालखेलनवलन्मंदाकिनीशेखरम्॥ईषच्छ्याकोशनीलोत्पलहृदयरुचागंडपालींवितन्वन्व्याम्नायपूरकंठश्रुतिमसृतरु
चेमंडलाभांभवान्याः॥कर्णाद्वंद्वेविराजन्नवकलसडलताटंकनेमिं॥भ्राजन्मुक्ताफलेभत्रिदशपतिमणिभ्रांतिकृद्यःकृपाक्षः॥ ॥श्रीमत्सुं
दरदेशिकेंद्रचरणांबुजारविंदंमुहुर्वंदेवंदकमंदभाग्यतिमिरप्रध्वंसभानूदयं॥यद्दृष्टेवबुधाश्वराचरमिदंजानंतिमायामयंयन्नवा
त्रसदाकरामलकवत्पश्यंतिवाद्यंमहः॥देशोस्तिदक्षिणादिशिद्रविडाभिधानःकांचीतियत्रवसतिःस्मरशासनस्य॥ ॥पुराणपुरी
षरनिसूदनभागधेयसौभाग्यदंतुरितकीर्तिरखंचलश्री॥ ॥आविर्बभूवहयमेधमखेविरिंचेर्यत्रस्वयंसभगवान्मयारमेशः
अद्यापिहस्तिगिरिनाथइतिप्रसिद्धःसंदृश्यतेसकललोकसमर्चितांघ्रिः॥तस्माद्दक्षिणदिग्गतःक्षितिसुरैःषट्शास्त्रविद्भिश्चतुर्वेदैःसो
पनिषद्भिरंगसहितैराद्यैःसदाधिष्ठितः॥योनंत्यहृतिविश्रुतःक्षितितलेप्येणानदीतीरभूदेशोयागगृहाकुलसकलदिक्ष्वाख्यग्रहारो
महान्॥आत्रेयगोत्रशतपत्रविकाशमित्रस्तत्रातिरात्रकृत्महाव्रतसत्रकर्ता॥भर्तानदीनकृपराधकृदृत्त्विजानां·षट्शास्त्रवित्तम

1

राम
१

रपुंगवदीक्षितोभूत्॥ तस्यात्मजफणिपतिर्वरपाणिनीयेमीमांसकेष्वपिगुरुः श्रुतिषुस्वयंभूः॥ सद्वादशाहचयनान्वितवाजपेयसोमाध
रीभुवितिनुम्मलदीक्षितोभूत्॥ तन्नंदनसकलवेदविदांवरिष्ठः श्रौतक्रियासुनिपुणःप्रथितसोमदीक्षः॥ आसीदशेषगुणरत्ननिधिःपृ
थिव्यां श्रीनीतिकेनइतिप्रथितोध्वरीन्द्रः॥ तत्सूनुश्रीनिवासःसकलनिगमवित्सर्वशास्त्रार्थवेत्ताश्रौतस्मार्त्तेषुकर्मस्वतिशयनिपुणः
सत्कविःस्वीयदेशात्॥ पीठंजालंधराख्यंप्रकटितविभवंप्राप्ययात्राप्रसंगात्तत्रश्रीसुंदराख्यंसकलगुणनिधिंप्राप्यसद्देशिकेंद्रः॥ त
त्पादपंकजयुगंपरिचर्यतस्मात्प्राप्याभिषेकमखिलागममप्यधीत्य॥ तस्माज्जयासमधिगम्यपुरींसकाशींतत्राकरोद्वसतिमात्मविदांव
रिष्ठः॥ तत्रस्थितःसकलतंत्ररहस्यवेत्ताशिष्यैःशिवार्चनपरैःप्रथितसएवदीक्षे॥ अभ्यर्थितोविनतुतेसकलागमार्थसारोदयांभुविशिवा
र्चनचंद्रिकांसः॥ ॥ तत्रदीक्षाविधिंवक्ष्येमादौश्रीगुरुलक्षणम्॥ सच्छिष्यलक्षणंपश्चादसच्छिष्यस्यलक्षणं॥ ततोधिकारिज्ञानार्थंपरी
क्षागुरुशिष्ययोः॥ दीक्षायांयोग्यताकालंवर्णानांगुरुसेविनाम्॥ अधिकारविचारंचदीक्षायांशूद्रजन्मनां॥ ब्रह्मक्षेत्रादिकंभेदंमं
त्राणांतेषनन्तरम्॥ वर्णानांशंकराणांचाप्यधिकारविचारणम्॥ पुंस्त्रीनपुंसकत्वंचमंत्राणांस्वापबोधनम्॥ मंत्रविद्यास्वरूपंचा
प्यग्नीषोमस्वरूपिताम्॥ मंत्रदोषांचसंस्कारान्नक्षत्रादिप्रभेदतः॥ मंत्रमेलनचक्राणिप्राचीसाधनपूर्वकं॥ समीकरणकंभूमेर्मंडपस्या
थलक्षणम्॥ वेद्याश्चैवचकुंडानांवास्तुपूजांकुरार्पणे॥ मासर्तुपक्षर्क्षतिथिवारयोगान्शुभाशुभान्॥ करणानिचदीक्षायाःकालभेदा

स्तथापरान्॥वरणंश्रीगुरोश्चैवगुरोःकृत्यानिसर्वशः॥सर्वतोभद्रनिर्माणप्रकारंस्थापनंतथा॥कुंभस्यकुंडसंस्कारानग्निस्थापनमेवच
च॥लक्षणानितथावह्नेर्जिह्वाभेदांस्तथैवच॥स्रुक्स्रुवाहुतिद्रव्यस्यमानानिसंनिधांतथा॥लक्षणानितदादीक्षांतद्भेदांश्चाथसप्रधा॥अ
थैवंदीक्षितानांचनित्यार्चनविधौक्रमात्॥प्रातःकृत्यंततःस्नानंविभूतेर्धारणस्यच॥विधिंसंध्यांतर्पणंचपापोत्सादनमेवच॥सू
र्यार्घदानंविधिवन्मेराउपद्वारपूजनम्॥मंडपस्यप्रवेशश्चस्वासनस्यप्रकल्पने॥पूजाद्रव्यासाधनंचभूतशुद्धिमतःपरम्॥प्राणप्रति
ष्ठांविधिवन्मातृकान्यसनंतथा॥दशधातस्यभेदाश्चप्राणायामविधिंततः॥न्यसनंयोगपीठस्यऋब्यादिन्यासपूर्वकम्॥ततस्तुमूल
मंत्रांगवर्णादिन्यसनंतथा॥मुद्राविरचनंध्यानमानसार्चनमेवच॥ततोंतवैंश्वदेवस्यविधिंबाह्यार्चनायच॥पूजाचक्रस्यरचनाप्र
कारंचततःपरम्॥अर्घादीनांतुपात्राणांस्थापनंवात्मपूजनम्॥ततोंतर्हवनंचैवपीठपूजाविधिस्ततः॥आवाहनंचदेवस्यउपचा
रांस्तथैवच॥ततोंगावृत्तिदेवानामर्चनेधूपदीपयोः॥नैवेद्यस्यविधिंचैवनित्यहोमविधिंतथा॥बलिदानविधिंचैवतांबूलंतदनंतर
म्॥प्रसन्नावाविधिंचैवनीराजनविधिस्तथा॥ततोनित्यजपस्यापिविधिस्तस्यसमर्पणम्॥ततःस्तोत्रस्यपठनंप्रदक्षिणानमस्क्रियम्॥विसर्ज
नंचदेवस्यपूजाशेषसमापनम्॥पुरश्चर्यास्वरूपंतत्स्थानंभूमिपरिग्रहम्॥तत्क्षेत्रकीलनंकूर्मचक्रंक्षेत्रेशपूजनम्॥वर्ज्यस्थानान्यक्षमालां
तस्याःसत्वादिभेदतः॥त्रैविध्यंचैवसंस्कारकालसूत्रविनीर्णयम्॥तत्प्रतिष्ठांपुरश्चर्यादिनेषुविहितानिच॥जपस्वरूपंतत्कालनिषिद्धान्यास

2

राम
२

नानि च ॥ विहितानि निषिद्धानि तत्पूर्वदिनकर्म च ॥ पुरश्चर्यारंभदिनकृत्यं सकल्पमेव च ॥ मालायाः पूजनं स्वेष्टदेवतायाश्च भावनाम् ॥ जपकालीनकृत्यं च तज्जपस्य समर्पणम् ॥ दिनशेषस्य कृत्यं च होमाद्यंगतिरूपणम् ॥ भोज्याभोज्यविभेदं च प्रकारं भोजनस्य च ॥ शयनस्य विधिं चैव ततः स्वप्ननिरूपणम् ॥ निवेदनं च स्वप्नस्य तत्र दुःस्वप्नदर्शने ॥ प्रायश्चित्तविधिं चैव सिद्धिचिह्नान्यनन्तरम् ॥ अन्यानपि पुरश्चर्याभेदांश्च समयान्यपि ॥ नैमित्तिकार्चनं कास्य पूजनं तदनन्तरम् ॥ गणेशानां च शाक्तानां वैष्णवानां तथैव च ॥ आकर्णां चैव मंत्राणां तत्तल्लिप्यार्चनं क्रमात् ॥ काम्यकर्माणि सर्वेषां होमयंत्रादिभेदतः ॥ साधारणानां मुद्राणां गणेशीनां तथैव च ॥ शाक्तवैष्णवशौरीणां शैवानां लक्षणानि च ॥ अत्रोचितमथान्यच्च दृष्टं तन्त्रान्तरं समासतः ॥ चंडिकायां प्रवक्षेहं यथाज्ञानं यथागमम् ॥ सतां सन्तुष्टये सम्यक् साधकानां हिताय च ॥ ॥ इह खलु द्विजानामनुपेतानां स्वकर्माध्ययनादिषु ॥ यथाधिकारो नास्तीह स्यात्तथोपनयनादिषु ॥ तथा चादीक्षितानां च मंत्रदेवार्चनादिषु ॥ नाधिकारोस्य ततः कुर्यादात्मानं शिवसंस्कृतमिति ॥ कालोत्तरवचनाददीक्षितानां देवतार्चनानधिकारश्रवणात् ॥ दीयते ज्ञानविज्ञानं क्षीयन्ते पापराशयः ॥ तेन दीक्षा इति प्रोक्ता सा सा तत्वविचारकैः ॥ ॥ इति कुलमूलावतारवचना ॥ ॥ दीक्षया निरस्तसमस्तकलुषाणां श्रीगुरुकटाक्षणसामर्थ्यतः ॥ प्राप्तविज्ञानवतामेव देवतार्चनादिष्वधिकारात् विना दीक्षां न मोक्षः स्यान्नराणां शिवशासने ॥ साधनस्याद्धि नाचार्यमित्याचार्यपरंपरेति कुलार्णववचनात् दीक्षाया आचार्याधीनत्वादादौ श्रीगुरुस्वरूपं निरूप्यते ॥ ॥ तत्र श्रीकुलार्णवे ॥ ॥ श्रीगु

सुंपरमेशानिशुद्धवेशोमनोहरः॥ सर्वलक्षणसंयुक्तः सर्वावयवशोभितः॥ सर्वागमार्थतत्वज्ञः सर्वमंत्रविधानवित्॥ लोकसंमोहनाकारोद
ववत्प्रियदर्शनः॥ सुमुखः सुलभः स्वस्थः प्रशान्तः छिन्नसंशयः॥ इंगिताकारचेष्टाविहूरनः कृतदुर्जय॥ अन्तर्मुखोवहिर्दृष्टिः सर्वज्ञोदेशकाल
वित्॥ आज्ञासिद्धस्त्रिकालज्ञोनिग्रहानुग्रहक्षमः॥ वेदवेदांगविद्वान्तः सर्वजीवदयापरः॥ स्वाधीनेंद्रियसंचारः षड्वर्गविजयक्षमः॥ अ
ग्रगण्येतिगंभीरः पात्रापात्रविशेषवित्॥ निर्ममोनित्यसन्तुष्टोनिर्द्वन्द्वोनन्तशक्तिमान्॥ सद्भक्तवत्सलोधीरः कृपालुः स्मितपूर्ववाक्॥
भक्तप्रियः सर्वसमोदयालुः शिष्यशासिता॥ श्रेष्ठनिष्ठोगुरुः प्राज्ञोवनितापूजनोत्सक॥ नित्यनैमित्यकेकाम्येरतः कर्मण्यनिंदिते॥ अलो
लुपोहिंसकश्चापक्षपातीविचक्षणः॥ चित्तविद्यादिभिः पूर्णोमंत्रयंत्रादिपारगः॥ निःसंकल्पविकल्पश्चनिर्णीतार्थाभिधायकः॥ तुल्य
निन्दास्तुतिर्मौनीनिरपेक्षोनियामकः॥ इत्यादिलक्षणोपेतः श्रीगुरुः कथितः प्रिये॥ ॥इतिगुरुलक्षणानि॥ सच्छिष्यैरेवंविधोगुरुर्मृग
सेव्यश्च॥ ॥नारदपंचरात्रे॥ ब्राह्मणः सर्वकालज्ञः कुर्यात्सर्वेष्वनुग्रहम्॥ तदभावाद्द्विजश्रेष्ठशान्तात्माभगवन्मयः॥ भावितात्माचसर्व
ज्ञः शास्त्रज्ञः सत्क्रियापरः॥ सिद्धित्रयसमायुक्तः आचार्यत्वेभिषेवितः॥ क्षत्रविट्शूद्रजातीनांक्षत्रियोनुग्रहक्षमः॥ क्षत्रियस्यापिचगुरोर
भावादीदृशोयदि॥ वैश्यस्यात्तेनकार्यः स्याद्वयेनित्यमनुग्रहः॥ सजातीयेनशूद्रेणतादृशोनमहामते॥ अनुग्रहाभिषेकौचकार्यौशूद्रस्यसर्व
दा॥ वर्णोत्तमेथवगुरौसतिवाविश्रुतेथवा॥ स्वदेशतोथवान्यत्रनेदंकार्यंशुभार्थिना॥ विद्यमानेतुयः कुर्याद्यत्रतत्रविनीर्णयम्॥ तस्येहा

मंत्रनाशः स्यात्तस्माच्छास्त्रोक्तमाचरेत् ॥ षड्विट्शूद्रजातीयः प्रातिलोम्यं न दीक्षयेत् ॥ तत्वसारे ॥ बह्वाशी दीर्घसूत्री च विषयादिषु लोलुप
हेतुवादरतो दुष्टो वाग्वादी गुणनिंदकः ॥ अरोमा बहुरोमा च निंदिताश्रमसेवक ॥ कालदंतो सितोष्ठश्च दुर्गंधीश्वासवाहकः ॥ दुष्टलक्षणास
म्पन्नो यद्यपि स्वयमीश्वरः ॥ बहुप्रतिग्रहासक्त आचार्यः श्रीक्षयावहः ॥ ॥ ज्ञानोत्तयने ॥ ॥ निर्वीर्यन्तु पितुर्मंत्रं तथा मातामहस्य च ॥ सोदर
स्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥ कनिष्ठस्य स्वापेक्षया न्यूनवयस्कस्य यस्य कस्यापि नैतत्सोदरविषयम् ॥ ॥ शैवागमे ॥ ॥ भिक्षुष्वश्च व
नस्थेभ्यो वर्णिभ्यश्च महेश्वरि ॥ गृहस्थो भोगमोक्षार्थी मंत्रदीक्षां न वाचरेत् ॥ त्यक्ताश्च यः क्रियाहीना यतयो निःपरिग्रहाः ॥ वनस्थास्ता
दृशास्तु वर्णिन्नूनाश्रमीयतः ॥ अतस्तेषां नाधिकारो दीक्षादाने महेश्वरि ॥ न्यूनाश्रमी गृहस्थापेक्षया गार्हस्थ्यस्य द्वितीयाश्रमत्वात्
अतस्त्वसारसंग्रहे ॥ ॥ तपस्वी सत्यवादी च गृहस्थः स्वस्थमानसः ॥ ॥ इति गुरुलक्षणमुक्तम् ॥ ॥ तेन यतिनापि गृहस्थस्य सका
शान्मंत्रदीक्षा न ग्राह्येत्यवगम्यते ॥ ॥ शिवशास्त्रे ॥ दीक्षायां तु गुरुत्वेन यतीन्वैखानसांस्त्रिये ॥ त्यजेद्याद्भोगमोक्षार्थी गृह
स्थो वर्णिनं तथेति ॥ वैखानसान्वानप्रस्थान् वर्णिनं ब्रह्मचारिणाम् ॥ ॥ अथ शिष्यलक्षणानि ॥ ॥ तत्रकुला० ॥ सच्छिष्यल्लेक
लेशानि सर्वलक्षणसंयुतम् ॥ समाधिसाधनोपेतं गुणशीलसमन्वितम् ॥ शुद्धदेहात्तुगंधांगं धार्मिकं शुद्धमानसम् ॥ दृढव्रतं सदा(
चारं श्रद्धाभक्तिसमन्वितम् ॥ कृतज्ञं पापभीतं च साधुसज्जनसंमतम् ॥ आस्तिकं दानशीलं च सर्वभूतहिते रतम् ॥ विश्वासविनयो

शि॰ वं
४

पेतंवित्तशाविवर्जितम् ॥ असाध्यसाधकंशूरंबलकान्तिसमन्वितम् ॥ अनुकूलप्रियायुक्तमप्रमत्तंविचक्षणम् ॥ हितसत्यमि
तस्निग्धभाषणांयुक्तदूषणाम् ॥ सकृदुक्तगृहीतार्थचतुरंबुद्धिविस्तरम् ॥ गृहतल्पासनोत्संगनिर्विकारप्रसेवकम् ॥ विमृष्यका
रिणांवीरंमनोदारिद्र्यवर्जितम् ॥ सर्वकार्यातिकुशलंधीरंसर्वोपकारकम् ॥ स्वस्वार्थेपरनिद्रायांविमुखेसुमुखंप्रिये ॥ जितेन्द्रि
यंसुसन्तुष्टंधीमन्तंब्रह्मचारिणम् ॥ त्यक्ताधिव्याधिचापल्यंदुःशंकातंकवर्जितम् ॥ गुरुध्यानस्तुतिकथासेवनाभजनोत्सुकम्
गुरुदैवतभक्तंचकामिनीपूजनोत्सुकम् ॥ नित्यंगुरुसमीपस्थंगुरुसंतोषकारिणम् ॥ वाङ्मनःकर्मभिर्नित्यंगुरुकार्यसमुत्सु
कम् ॥ गुर्वाज्ञापालकंदेविगुरुकीर्त्तिप्रकाशकम् ॥ गुरुवाक्यप्रमाणाग्र्यंगुरुशुश्रूषणोरतम् ॥ विनातुवर्जितंप्रेक्ष्यकारिणां
कुलनायकम् ॥ लज्जाभिमानगर्वादिवर्जितंगुरुसंनिधौ ॥ निरपेक्षंगुरुद्रव्येतत्प्रसादाभिकांक्षिणम् ॥ जपध्यानादिनिरतंमोक्ष
मार्गाभिगामिनम् ॥ इत्यादिलक्षणोपेतंगुरुःशिष्यंपरीक्षयेत् ॥ ॥ इतिसच्छिष्यलक्षणानि ॥ ॥ अथासच्छिष्यलक्षणानि
तत्रैव ॥ दुष्टान्ववायजंदुष्टंगुणहीनंविरूपिणम् ॥ परशिष्यंचपाखण्डंधूर्त्तंपंडितमानिनम् ॥ हीनाधिकविकारांगविकलाव
यवान्वितं ॥ पंगुमेधंचबधिरंमलिनंव्याधिपीडितम् ॥ उच्छिष्टंदुर्मुखंवापिस्वेच्छावेषधरंविटं ॥ दुर्विदग्धंकुवेषंचकुटिलंभीम
वीक्षणं ॥ निद्रालस्ययुतंतन्द्राद्यूतादिव्यसनान्वितम् ॥ कपाटकुपस्तंभादौतिरोहिततनुंसदा ॥ भूम्युक्तिकरंक्रूरंश्रद्धाभक्तिविवर्जितम् ॥

4

राम
४

किमेकवादितं लब्धं प्रेषकं चपलं शठम् ॥ धनस्त्रीगृद्धिरहितं निषेधविधिवर्जितम् ॥ रहस्यभेदकं चापि देवकार्यार्थघातकम् ॥ मार्जारध
कवृत्तिं वरंध्रान्वेषणतत्परम् ॥ मायान्वितं कृतघ्नं च प्रच्छन्नान्तरदायकम् ॥ विश्वासघातकं देवद्रोहिणां पापकारिणाम् ॥ अविश्वासम
विद्यां गमनर्थं सिद्धिकाङ्क्षिणाम् ॥ आततायिनमाद्दिन्नसं कुन्त्रासिनं कूटमाक्षिकम् ॥ सर्वत्रयाचकं देवि सर्वाकृष्णभिगामिनं ॥ असत्यनि
ष्ठं वा सक्तं ग्राम्यादिवक्रभाषिणाम् ॥ दुर्विचारकृतर्कादिकारकं कलहप्रियम् ॥ वृथाक्षेपकरं भ्रान्तं भ्रामकं वाग्विडंबकम् ॥ परोक्षे दूष
णाकरं प्रत्यक्षे प्रियवादिनम् ॥ वागुक्षवादिनं विद्याचोरमात्मप्रशंसकम् ॥ गुणासहिष्णुं मलीनमार्त्तिक्रोधसमन्वितम् ॥ चार्वाकं दुर्जन
संरवं सर्वलोकविगर्हितम् ॥ पिशुनं परसंतापं सर्वप्राणिभयंकरम् ॥ स्वक्लेशवादिनं मित्रद्रोहकं भ्रान्तवंचकम् ॥ जिह्वोपस्थेपरं दे
वितस्करं पशुचेष्टितम् ॥ अकारणाद्वेषहास्यक्लेशक्रोधादिकारणाम् ॥ अतिहासस्य कर्त्तारं मर्मातः परिहासकम् ॥ कामकं चातिनिर्ल
ज्जं मिथ्यादुश्चेष्टसूचकम् ॥ असूयामदमात्सर्यदंभाहंकारसंयुतम् ॥ ईर्षापैशून्यपारुष्यकार्पण्यक्रोधमानिनम् ॥ अधीरःदुःखितं द्वेष्यम
शङ्कं तत्त्ववर्जितं ॥ अप्रसन्नमतिं मूढं चिन्ताकुलितमानसम् ॥ तृष्णालोभयुतं दीनमदुष्टं सर्वयाचकम् ॥ बह्वाशिनं कपटिनं भ्रामकं कुटि
लं प्रिये ॥ भक्तिश्रद्धादयाशान्तिधर्माचारविवर्जितम् ॥ मातापितृगुरुप्राज्ञमहतां हास्यकारकम् ॥ कुलडव्याधिवीभत्सं गुरुसेवाभिमानि
नम् ॥ स्त्रीद्विष्टं समयभ्रष्टं गुरुसन्नं कुलेश्वरी ॥ इत्यादिविगुणोपेतं गुरुः शिष्यं परित्यजेत् ॥ स्नेहाद्वा लोभतो वापि यदि गृह्णाति दीक्षयेत्

तस्मिन्गुरौसशिष्येतुदेवताशापआपतेत्॥ तस्मादेवंविधंशिष्यंनगृह्णीयात्कथंचन॥ यदिगृह्णातिमोहेनतत्पापैर्व्याप्यतेगुरुः॥ मंत्रिपापंच
राजानंपतिंजायाकृतंयथा॥ तथाशिष्यकृतंपापंप्रायोगुरुमपिस्पृशेत्॥ इतिनिंदितशिष्यपरिग्रहेदोषश्रवणाद्दशच्छिष्यन्नपरिगृह्णीयात्
प्रायइतिगुरुणाशिष्य॥ सम्यग्बोधनीयः सम्यग्बोधितोपितज्ञाक्यमताद्यत्पापंचेदाचरतितदातत्पापंगुरुंतव्याप्नोतीत्यर्थः॥ वर्णाश्रमाणां
सर्वेषांमाचारःसङ्गतिप्रदः॥ गुरुस्त्रीवीरमाचारंबोधयेत्कुलनायिके॥ नगृह्णातिहिशिष्यश्चेत्तदापापंगुरोर्नहि॥ ॥इतिकुलार्णववचनात्॥ इ
तिगुरुशिष्यलक्षणानि॥ अथगुरुशिष्यपरीक्षातत्रैव॥ ज्ञानेनकृपयावापिगुरुःशिष्यंपरीक्षयेत् संवत्सरंतदर्द्धंवातदर्द्धंवाप्रयत्नतः॥ उ
त्तमानधमेकार्येनीचाउत्तमकर्मणा॥ प्राणाद्रव्यप्रदानाद्यैरादेशैश्चसमासमैः॥ तन्मर्मसूचकैर्वाक्यैर्मायाभिःक्रूरचेष्टितैः॥ पक्षपातेरुदासी
नैरनेकैश्चसुदुर्सहैः॥ आकृष्टःपीडितश्चापियोविषादंनयातिच॥ गुरुःकृपांकरोतीतिसदासंचिंतयेत्तदा॥ श्रीगुरुःस्मरणोवापिकीर्त्तनेदर्श
नेपिच॥ वदनेपरिचर्यायामाह्वानेप्रेषणेपिप्रिये॥ आनंदकंपरोमांचस्वरनेत्रादिविक्रिया॥ येषांस्यात्तेत्रयोग्यास्युर्दीक्षासंस्कारकर्मसु॥ शि
ष्योपिलक्षणैरेतैःकुर्यात्गुरुपरिक्षणाम्॥ आनंदाद्यैर्जपैस्तोत्रैर्ध्यानहोमार्चनादिभिः॥ ज्ञातोपदेशसामर्थ्यमंत्रसिद्धिरपीश्वरी॥ बोधकत्वं
चविज्ञायशिष्योभूयात्तत्त्वान्यथा॥ ॥अथशिष्याणामधममध्यमोत्तमत्वंतत्रैव॥ आदिमध्यावसानेषुयोग्याशक्तिनिपातितः॥ अ
धमामध्यमाश्रेष्ठाशिष्यादेविप्रकीर्तिताः॥ आदौभक्तिभवेद्देविदीक्षार्थंसंवदंतिये॥ पुनर्विलुप्तभावास्तेआदियोग्याइतीरिताः॥ दीक्षा

समयसंज्ञाज्ञाज्ञानविज्ञानवर्जिताः ॥ तस्मात्प्रध्वस्तवीर्यायेमध्ययोगाइतिस्मृता ॥ आदौभक्तिविहीनायमध्यभक्त्यस्तिवानवा ॥ अंतेप्रभूतभक्तिःस्यादंतयोग्याभवंतिते ॥ अथवर्णानांदीक्षायोग्यताकालविशेषः ॥ तत्रशारदातिलके ॥ एकाब्देनभवेद्योग्योब्राह्मणस्तद्वयान्नृपः वैश्योवर्षैस्त्रिभिःशूद्रश्चतुर्भिर्वत्सरैर्गुरो ॥ शुश्रूषुःपरिग्राह्योदीक्षायागव्रतादिभिरिति ॥ ननुशूद्राणांमंत्रेष्वनधिकारःश्रूयते ॥ यथा महाकपिलपंचरात्रे ॥ नवेदप्रणवंतस्मान्मंत्रोवेदसमुत्थितः ॥ तस्माद्वेदपरोमंत्रोवेदांगश्चागमःस्मृतः ॥ वह्न्याकर्षादिकंकर्मदृष्टादृष्टफलप्रदं ॥ वेदेनसाध्यतेसर्वग्रहयज्ञादिभिकिल ॥ नवेदेनविनायज्ञानवेदायज्ञवर्जिता ॥ तस्माद्वेदपरोमंत्रोनमंत्रोवेदउज्झितः ॥ नमंत्रेष्वाधिकारोस्तिशूद्राणांनियमःपरः ॥ मंत्राभावादमंत्रेणाभाषितंसर्वकर्मणीति तथाशातातपसंहितायामपि ॥ यावन्त्यर्णानिमंत्राणांशूद्रायप्रतियादयेत् ॥ तावन्त्योब्रह्महत्यास्युःस्वयमाहप्रजापतिरितिसमं ॥ एतेषांवचनानांशुद्धिश्राद्दिदाननिषेधवचनानांशुद्धिश्राद्दिदाननिषेधवदसच्छूद्रपरत्वंकल्पनीयं ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्रायेभवयोमलाः ॥ तेषांमंत्राःप्रदेयांवैनतुसंकीर्णधर्मिणामिति भविष्योत्तरवचनात् एवमेषांनिषेधवचनानांमंत्रविशेषपरत्वंकल्प्यते स्वाहा ॥ प्रणवसंयुक्तमंत्रंशूद्रेददत्द्विजः ॥ शूद्रोनिरयगामीस्याद्द्विजःशूद्रत्वमाप्नुयात् इतिदेवीयामलवचनात्तच्छूद्राणांतुस्वाहा ॥ प्रणवरहितमंत्रेष्वधिकारोस्त्येव ॥ ब्रह्मक्षत्रविशःशूद्राअर्वायांशूद्रवद्वयः ॥ गुरुदेवद्विजार्चासुरतास्त्वधिकारिणः ॥ ॥ इतियोगिनीतंत्रवचनात् ॥ वैदिकोमिश्रितोवापिविप्रादीनांविधीयते ॥ तांत्रिकोविप्रभक्तस्यशूद्रस्यापिप्रकीर्त्तितः ॥ स्वाग

शि·व
६

मोक्षेन मार्गेण स्त्रीशूद्रैश्चापि पूजनं ॥ कर्त्तव्यं श्रद्धया विष्णोश्चिंतयित्वा पतिं हृदि ॥ स्त्रीणामप्यधिकारोस्ति विष्णोराराधनादिषु ॥ पतिप्रियरतानां च
श्रुतिरेषा सनातनीति पद्मपुराणवचनात् विष्णोरित्युपलक्षणं शैवादिमंत्रेष्वप्यधिकारोस्ति वक्ष्यमाणयामलवचनाद्याज्ञवल्क्यवचनाच्च ॥ यद्य
वेयेष्टिण्या प्रोतीति विष्णुः परमात्मा तेन सर्वेषां देवानामपि परमात्मस्वरूपत्वात्सर्वदैवतमंत्रेष्वप्यधिकारोस्तीति यावत् चिंतयित्वेति मृत भर्त्तृका
परं पतिप्रियेति सधवापरमिति ज्ञेयं ॥ अत्र नारीणां भर्त्तृशुश्रूषणस्यैव मुख्यधर्मत्वात्पुरःसरमेव कृतानां देवताभजनादीनां साफल्यादन्यथा
वैफल्याच्च पतिसेवापुरस्सरमेव देवताभजनादिकं कर्त्तव्यं ॥ या स्त्री भर्त्रा वियुक्ता च शुभा स्वाचरसंयुता ॥ सा च मंत्रान् प्रगृह्णातु सभर्त्ता तदनुज्ञ
या ॥ विना स्वधर्मं यत्किंचिद्देवताराधनादिकं ॥ परिभ्रश्येत तत्तयस्मात्क्षणात्सैकत भस्मवत् ॥ ॥ इति भविष्योत्तरवचनात् ॥ अत्र स्त्रीणां भर्त्तुरा
ज्ञानुस्वातंत्र्याभावात् ॥ तथा च स्मृतौ ॥ विधवायाः सुतादेशात्कन्यायाः पितुराज्ञया ॥ नाधिकारोन्यतो नार्या भार्याया भर्त्तुराज्ञया ॥ दीक्षादयादि
तिशेषः ॥ तथा ॥ स्त्रीशूद्राणामयं मंत्रो नमोंतश्च शुभावहः ॥ एतज्ज्ञात्वा महासेन चाण्डालमपि दीक्षयेत् ॥ ॥ इति रुद्रयामलवचनात् ॥ अयं
प्रासादमंत्रः ॥ तथा ॥ श्रुतिव्रतनमाशूद्रा धार्मिका द्विजसेवकाः ॥ स्त्रियः पतिव्रताश्चान्ये प्रतिलोमानुलोमजाः ॥ लोकाश्चाडालपर्यताः ॥ सर्वेप्य
त्राधिकारिणः ॥ स्वजातिधर्मनिरता भक्ताः सर्वेश्वरस्य च ॥ उपदेशः समस्तेषां तत्तज्जात्यनुसारतः ॥ इत्यगस्त्यवचनात् ॥ अत्र रामतंत्रे ॥ न वैदिकं ज
पेच्छूद्रः स्त्रियश्चैव कदाचन ॥ नमोंतं शिवमंत्रं वा वैष्णवं वेप्यते बुधैः ॥ इति याज्ञवल्क्यसंहितावचनाच्च ॥ यच्छूद्राणां मंत्रेष्वधिकारो येव नमों

6

राम
६

न निमित्तस्योभयत्र संबधः॥असच्छूद्राणामप्यधिकारोस्ति केषुचिन्मंत्रेष्विति प्रतीयते उक्तयामलवचनात्॥एकद्वित्रिचतुःपंचवर्णाणालोच्चयोग्यतां॥भक्तियुक्तो गुणांश्चापि क्रमाद्वर्णोस संकरे॥ ॥इति तन्त्रराजवचनाद्वक्ष्यमाणकुलमूलावतारवचनाच्च॥इत्थं शूद्रादीनां मंत्रविशेषेधिकारात्प्रधानवदंगेपीति न्यायात्तदंगमंत्रेष्वधिकारे प्राप्ते नस्वाहादिपदयोगेऽधिकारः तेषु निषेधोक्तेः न च प्रधानसंबंधेनैव निषेधो नांगसंबंधनेति सम्यग्विनिगमकाभावात्॥हूषोत्सर्गादावंगानां रुद्रादीनामपि जपप्रसक्तेश्च न च पदांतरयोगेन न तत्कार्यसिद्धिरिति वाच्यं॥नमस्कारोस्य मंत्र इति गौतमेन यावदेकतांत्रिकमंत्रेषु नमो मात्रविधानात्तस्यैव तत्तदपूर्वजनकत्वादिति॥अस्य शूद्रस्यान्यासां विस्तरः॥ ॥अथ मंत्राणां ब्रह्मक्षत्रादिभेदः॥तन्त्रश्रीकु०॥ब्राह्मणाः क्षत्रियो वैश्यः शूद्रो भवति वै मनुः॥अनुलोमेन देयः स्यात्प्रतिलोमे व न कश्चिदिति॥वामकेश्वरतंत्रे तु॥ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राः पोलस्यजातयः॥ ॥इति पंचभेदा उक्ताः॥सोत्रामणितंत्रे॥मायावीज ब्राह्मणाः स्यात्कूर्चवीजं क्षत्रियः स्मृतं॥कामवीजं भवेद्वैश्यो वाग्भवं शूद्र ईरितं॥चतुर्वीजपरित्यक्तो मंत्रो पौलस्यसंज्ञकः॥चतुर्वीजं ब्राह्मणानां क्षत्रियाणां त्रिवीजकं॥वीजद्वयं तु वैश्यानां शूद्राणां त्वेकवीजकं॥कुलमूलावतारे॥ ॥श्रीदेव्युवाच॥शाक्तशांभवसौराणां गाणेशवैष्णवेषु च॥ब्रह्मक्षत्रादिवर्णानां संकराणां विशेषतः॥ प्रसूतिं श्रोतुमिच्छामि साधकानां हिताय च॥येषु येषु च मे मंत्रास्तद्भेदं वद शंकरः॥ ॥ईश्वर उवाच॥उमामहेश्वरश्चैव दक्षिणामूर्त्यघोरकं॥हयग्रीवं च वाराहमष्टाक्षरमतः परं॥प्रणवाद्यं वासुदेवं लक्ष्मीनारायणं तथा

वर्णत्रये च दातव्यं नान्यवर्णे कदाचन॥ पाशुपतं नारसिंहं तथा चैव सुदर्शनं॥ वर्णद्वये च दातव्यं नान्ययोश्चैव कर्हिचित्॥ अग्निमंत्राश्च ये के
चित्सूर्यमंत्राश्च ये तथा॥ नारादि घृणि मंत्राश्च दातव्याश्च त्रिवर्णके॥ आनुष्टुपं शक्तिमंत्रास्तथा वै विंध्यवासिनी॥ तथा नीलसरस्वत्या दातव्याश्च
द्विवर्णके॥ मातंगी नुग्रतारा च कालिकाश्मशानमला तथा॥ छिन्नमस्ता च बाला च दातव्या सर्ववर्णके॥ तारादिश्च गणेशश्च हरिद्रासंज्ञकस्तथा
त्रिवर्णेष्वेव दातव्याः कथिताः सर्वसिद्धिदः॥ त्रिपुरायाश्च ये मंत्रा ये मंत्रा बहुवादयः॥ सर्ववर्णेषु दातव्या उरधीरां विशेषतः॥ प्रणव माया
लक्ष्मीं च वाग्भवं चान्यबीजकं॥ एतद्बीजेन संयुक्तं दातव्यं चाद्यवर्णके॥ मायां लक्ष्मीं वाग्भवं च दातव्यं क्षत्रियेष्वपि॥ लक्ष्मीं च वाग्भवं चैव क
न्तं वैश्यवर्णके॥ वाग्भवं चान्यबीजं च शूद्राणां समुदीरितं॥ हृदादिक्षं षट्कारादि संकराणां प्रशस्यते॥ ॥इति॥ तथा कुलप्रकाशतंत्रे॥ अथ
न्त्रा मनवः सर्वे पंचाशद्वर्णभेदतः॥ द्विविधास्ते च संप्रोक्ता विद्यामंत्रविभागतः॥ विद्यामंत्राः क्रमात्स्त्री पुंदेवताश्च समीरिताः॥ स्त्रीनपुंस
कपुरुषा भवन्ति त्रिविधाः प्रिये॥ स्त्रीमंत्रा वह्निजायांता हृदयांता नपुंसकाः॥ शेषाः पुमांस इत्युक्ताः स्त्रीमंत्राश्चापि शांतिके॥ नपुंसकाः स्मृता
मंत्रा विद्वेषे चाभिचारिके॥ पुमांसः स्मृताः सर्वे वश्योच्चाटनकर्मसु॥ अग्निसोमस्वरूपाः स्युर्मनवः सर्व एव हि॥ रेफोकारवियत्प्राया आग्ने
याः क्रूरकर्मणि॥ सौम्याश्च भृगुधाराया सौम्यकर्मणि ते स्मृताः॥ नारायणीये पि॥ तारांत्याग्निवियत्प्रायो मंत्र आग्नेय इष्यते॥ शिष्टः सौम्यः प्रश
स्तौ तौ कर्मणोः क्रूरसौम्ययोः॥ आग्नेयमंत्रतोयस्मात्प्रायः शांते नमोन्वितः॥ सौम्यमंत्रस्तथाज्ञेयः फट्कारेणान्वितोन्ततः॥ तथा-- पिंगलायाग

ते वायौ प्रबुद्धा घृग्निरूपिणा ॥ इडागते पुयवने तुस्थ तेसोमरूपिणा: ॥ पिंगलेऽगते वायौ प्रबुद्धास्सर्वस्यवहि ॥ प्रबुद्धा मनवः सर्वे साधकानां
फलन्विते ॥ नारायणीयेपि ॥ सुप्तः प्रबुद्धमात्रो वा मंत्रः सिद्धिं न यच्छति ॥ स्वापकालो वामवहो जागरो दक्षिणावह् ॥ आग्नेयस्य मनोः सौम्य मं
त्रस्यैतद्विपर्ययः ॥ प्रबोधकालं जानीयाद्भयो रूभयो वह् ॥ स्वापकाले तु मंत्रस्य जपोनर्थफलप्रद ॥ इति मंत्राणां प्रबोधोपायपउक्तः ॥ शिव
यामले ॥ संपुटीकृत्य यत्नेन लांतानाद्यान्सविंदुकान् ॥ पुनश्च सविसर्गांतान् क्षकारं केवलं पठेत् ॥ एवं जप्तोपदिष्टश्चेत्प्रबुद्धः शीघ्रसिद्धि
दइति ॥ अथयमर्थः ॥ मंत्रोपदेशकाले प्रथमममकारादिलकारांतान्वर्णान्सविंदूनुच्चार्य ततो मंत्रं जपित्वा पुनर्लकाराद्यकारांतान्वर्णान्स
विंदूनुच्चार्य तानष्टोत्तरशतवार मंत्रं जपित्वा पुनस्तथैव सविसर्गैर्वर्णैः संपुटीकृत्याष्टोत्तरशतवारं मंत्रं जपित्वा तन्मंत्रं गुरुः शिष्याय दद्
यात्स मंत्रः सर्वदा प्रबुद्धः सर्वाभीष्टप्रदो भवतीति ॥ इति वह्निजाया स्वाहाकारः हृदयं नमः अभिचारके मारणो वियद्कार चन्द्रः संकारः सुधा
वकारः ॥ पिंगला दक्षिणा नाडी इडा वाम नाडी पिंगलेऽगते संक्रमकाले ॥ अथ मंत्रेषु दोष ॥ तत्र शारदातिलके ॥ छिन्नादिदुष्टमंत्रास्तेपा
लयंति न साधकं ॥ छिन्नो रुद्धः शक्तिहीनः पराङ्मुख उदीरितः ॥ वधिरो नेत्रहीनश्च स्तंभितः कीलितः स्तथा ॥ दग्धस्त्रस्तश्च भीतश्च मलिनश्च ति
रस्कृतः ॥ भेदितश्च सुषुप्तश्च मदोन्मत्तश्च मूर्छिताः ॥ हृतवीर्यश्च हीनश्च प्रध्वस्तो बालक पुनः ॥ कुमारस्तु धोप्रौढो वृद्धो निस्त्रिंसकस्तथा ॥ नि
र्वीजः सिद्धिहीनश्च मंदः क्रूरस्तथाउनः ॥ निरंशः सत्वहीनश्च केकरो बीजहीनकः ॥ धूमितालिंगितौ स्यातां मोहितश्च क्षुधार्तकः ॥ अतिदृप्तो

गहीनश्चाप्यतिक्रुद्धः समीरितः॥ अतिक्रूरश्च सव्रीडः शांतमानसएव च॥स्थानभ्रष्टश्च विकलश्चातिवृद्धः प्रकीर्त्तितः॥ निस्नेहः पीडितश्चापि इ
तिमंत्रदोषा॥ ॥अथै~~तेषां दोषाणां लक्षणानि न चैव॥ वक्ष्यास्येषां च लक्षणं~~॥ मनोर्यस्यादिमध्यांतेष्वनिलं बीजमुच्यते॥ संयुक्तं वा वियु
क्तं वा स्वराक्रांतं त्रिधा पुनः॥ चतुर्धा पंचधा वाथ स मंत्रश्छिन्नसंज्ञकः॥ आदिमध्यावसानेषु भूबीजद्वयलांछितः॥ रुद्धमंत्रः स विज्ञेयो भुक्तिमुक्तिविव
र्जितः॥ मायात्रितत्वश्रीबीजरावहीनस्तु यो मनुः॥ शक्तिहीनस्स कथितो यस्य मध्ये न विद्यते॥ कामबीजं मुखे माया शिरस्यंकुशमेव च॥ असौ परा
ङ्मुखः प्रोक्तो हकारो विंदुसंयुतः॥ आद्यंतमध्येष्विंदुर्वा स भवेद्वधिरस्मृतः॥ पंचवर्णो मनुर्यस्याङ्फाकेंदुविवर्जितः॥ नेत्रहीनः स विज्ञेयो दुःख
शोकामयप्रदः॥ आदिमध्यावशानेषु हंसप्रासादवाग्भवैत्॥ हकारो विंदुमान्जीवो रावं चापि चतुःकलं॥ माया नमामि च पदं नास्ति यस्मिन्स की
लितः॥ एकं मध्ये द्वयं मूर्द्ध्नि यस्मिन्नस्त्रपुरंदरौ॥ न विद्येते स मंत्रः स्यात्स्तंभितः सिद्धिरोधनः॥ वह्निर्वायुसमायुक्तो यस्य मंत्रस्य मूर्द्धनि॥ सप्तधा
दृश्यते तं तु दग्धं मंन्येन मंत्रवित्॥ अस्त्रं द्वाभ्यां त्रिभिः षड्भिरष्टाभिर्दृश्यतेक्षरैः॥ त्रस्तः सोभिहितो यस्य मुखे न प्रणवस्थितः॥ शिवो वा शक्ति
रथवा भीताख्यः स प्रकीर्तितः॥ आदिमध्यावसानेषु भवेन्मार्णाचतुष्टयं॥ यस्य मंत्रः स मलिनो मंत्रवित्तं विवर्जयेत्॥ यस्य मध्ये दकारो
वा क्रोधो वा मूर्द्ध्नि द्विधा॥ अस्त्रं तिष्ठति मंत्रस्य स तिरस्कृत ईरितः॥ मोद्वयं हृदये शीर्षे वषट्कारं च मध्यतः॥ यस्यासौ भेदितो मंत्रस्त्याज्यः सिद्धि
षुसूरिभिः॥ त्रिवर्णो हंसहीनो यः सुप्तस्स उदाहृतः॥ मंत्रो वाप्यथवा विद्या सप्ताधिकदशाक्षरा॥ फट्कारंपंचकादिर्यो मदोन्मत्तउदारित

8

राम
८

तद्वदस्त्रंस्थितंमध्येयस्यमंत्रस्यमूर्छितः ॥ विरामस्थानगंयस्यहतवीर्यःसकथ्यते ॥ आदौमध्येतथामूर्ध्निचतुरस्त्रयुतोमनुः ॥ ज्ञातव्योहीनइ
त्येषयस्मादष्टादशाक्षरः ॥ एकोनविंशद्वर्णोयोमंत्रस्तारसमायुतः ॥ हृल्लेखांकुशबीजाढ्यस्तंप्रध्वस्तंप्रचक्षते ॥ सप्तवर्णोमनुर्बालः कुमारोऽ
ष्टाक्षरःस्मृतः ॥ षोडशार्णोयुवाप्रौढश्चत्वारिंशल्लिपिर्मतः ॥ त्रिंशद्वर्णश्चतुःषष्टिवर्णोमंत्रःशताक्षरः चतुःशताक्षरःश्चापिवृद्धइत्यभिधीयते
नवाक्षरोध्रुवयुतोमनिस्त्रिंशईरितः ॥ यस्यावसानेहृदयंशिरोमंत्रश्चमध्यतः ॥ शिखावर्मचसंस्यातांवौषट्फट्कारएवच ॥ शिवशक्त्यर्ण
हीनोवासनिर्वीजइतीरितः ॥ एषुस्थानेषुफट्कारःषोढायस्मिन्प्रदृश्यते ॥ समंत्रःसिद्धिहीनःस्यान्मंदःपंक्त्यक्षरोमनुः ॥ कूटएकाक्षरोमं
त्रःसएवोक्तोनिरंशकः ॥ द्विवर्णःसत्वहीनःस्याच्चतुर्वर्णस्तुकेकरः ॥ षडक्षरोबीजहीनस्त्वधर्मसाक्षरोमनुः ॥ सार्धद्वादशवर्णोवाधूमितः
सतुनिंदितः ॥ सार्धबीजत्रयस्तद्वदेकविंशतिवर्णकः ॥ विंशत्यर्णास्त्रिंशदर्णोयस्मादालिंगितःस्मृतः ॥ द्वाविंशत्यक्षरोमंत्रोमोहितःपरिकीर्ति
तः ॥ चतुर्विंशतिवर्णोयःसप्तविंशतिवर्णकः ॥ क्षुधार्तःसतुविज्ञेयश्चतुर्विंशतिवर्णकः ॥ एकादशाक्षरोवापिपंचविंशतिवर्णकः ॥ त्रयोविंश
तिवर्णोवामंत्रोदृप्तउदाहृतः ॥ षड्विंशत्यक्षरोमंत्रःषड्त्रिंशद्वर्णकस्तथा ॥ त्रिंशदेकोनवर्णोवाव्यंगहीनोविधीयते ॥ अष्टाविंशत्यक्षरोयए
कत्रिंशदथापिवा ॥ अतिक्रूरःसगदितोनिंदितःसर्वकर्मसु ॥ चत्वारिंशत्समारभ्यात्रिषष्टिर्यावदक्षरं ॥ तावत्संख्यानिगदितामंत्रासव्रीडसंज्ञ
का ॥ पंचषष्ट्यक्षरायेस्युर्मंत्रास्तेशांतमानसः ॥ एकोनशतपर्यंतमपश्चषष्ट्याक्षरादितः ॥ येमंत्रास्तेनिगदिताःस्थानभ्रष्टाह्वयाबुधैः ॥ त्रयोद

शाक्षरायेस्मृर्मंत्राः पंचदशाक्षरा॥ विकलास्तेभिधीयंते शतंसार्द्धसमेतंतुवा॥ शतद्वयंद्विनवतीरेकहीनाथवापिमा॥ शतत्रयंवायत्संख्यानि
स्तेहास्तेसमीरिता॥ चतुःशतान्यथारभ्यावद्दशसहस्रकं॥ अतिवृद्धःप्रयोगेषुपरित्याज्यःसदाबुधैः॥ सहस्राणाधिकामंत्रादंडकाःपीडिता
ह्वया॥ द्विसहस्राक्षरामंत्राःखंडशःसप्तधाकृता॥ ज्ञातव्यास्तोत्ररूपास्तेमंत्रायेनेयथास्थिताः॥ तथाविधाश्चबोधव्यामंत्रिभिःकाम्यकर्मसु
दोषानिमानविज्ञाययोमंत्रंभजतेजडः॥ सिद्धिर्नजायतेतस्यकल्पकोटिशतैरपिइति॥ ॥अथैतेषांश्लोकानांश्रीमदाराध्यगुरुपादवग
तोर्थोलिख्यते॥ तत्रमनोरितिआदिमध्यांतेष्वितिसमुच्चयः॥ अनिलंयकारः॥ बीजंमायाबीजमितिसंप्रदायः॥ मायाबीजस्यनामानिमा
लिनीशिववल्लरी॥ वातावर्त्तिःकलावाणीबीजंशक्तीतिकुंडलीतिशेवागमोक्तं॥ वायुबीजंमेयुक्तंअक्षरांतरयुक्तंतद्रहितः॥ मायाबी
जंतुदीर्घस्वरसक्तानंउक्तंचलक्ष्मसागरे॥ आदिमध्यावसानेषुयस्यमंत्रस्यदृश्यते॥ चतुर्धापंचधाद्वेधाचैकवीरस्वरान्वितं॥ वायुबीजम
सौमंत्रंछेदितःपरिकीर्त्तितः॥ इतिवायुबीजंयकारः॥ एकवीरोहःइतिवर्णः॥ स्वराक्रांतःदीर्घस्वरयुक्तः॥ हां हीं हूं हैं हौं॥ इतितदुदाहर
णमपि॥ अघोरेभ्योथहांघोरेभ्योहींघोरघोरतरेभ्योहूंसर्वतःसर्वेभ्योहैंस्तु॥ नमस्तेरुद्ररूपेभ्योहौंइतिआदिमध्यावसानेष्वितिस्थानत्रय
पीत्यर्थः॥ भूबीजंलकारः अत्रतुस्थानत्रयेपिप्रतिस्थानेलकारद्वयमित्युक्तं॥ तेनांतरदर्शनादाद्यंतयोर्द्वयंमध्येत्रयमितिज्ञेयं॥ तदुक्तंलक्ष्मा
सागरे॥ द्विधापूर्वत्रिधामध्येद्विधाचैवयुतःप्रिये॥ वज्रियुक्तःक्षयोमंत्रःसनिरुद्धःप्रकीर्त्तितः इतिवज्रीलकारः॥ पींगलामते॥ आदौद्विधा

१

राम
६

त्रिधामध्येऽनश्चांतेहिधाभवेत् ॥ इंद्रवीजमसौमंत्रोरुद्र इत्यभिधीयत इति ॥ मायेतिः मायाभुवनेश्वरीवीजं त्रितत्वंप्रणावः ॐकारोवा ॥ राव
क्रेंकारः एवइशैनेसर्वैनापेक्षिताः ॥ मायावीजं नयशक्तितत्वंरावमेववा ॥ श्रीशृहंवापिमंत्रासौशक्तिहीनप्रकीर्तितः ॥ इतिसारसंग्रहात् ॥
मायावीजंत्रितत्वंवाश्रीशृहंनास्तियत्रवेत् ॥ शक्तिहीनइतिख्यातः सामर्थ्यंहंतिमंत्रिणा ॥ ॥ इतिपिंगलावचनाच्च ॥ श्रीशृहंश्रीवीजंय
स्येतिशरवेआदौसिरसिअंतेवकारः समुच्चयार्थः ॥ उक्तंचलक्षसागरे ॥ यस्यकामकलावीजंमध्यस्थानेनविद्यते ॥ आदौमायांकुशश्चांतेनवि
ज्ञेयोसौपराङ्मुखः ॥ ॥ इतिपिंगलामतेपि ॥ ॥ कामवीजंनयन्मध्येमायादावंतिमोकुशः ॥ पराङ्मुखश्चोक्तइति ॥ ह्रुकारइति ॥ इंदुः स(
कारःविंदुयुक्तत्वमस्यापि ॥ आद्यंतमध्यस्थितिस्थानत्रयेपिनापेक्षितं ॥ उक्तंचलक्षसागरे ॥ शून्यंविंदुसमायुक्तंमाद्यंतेचाथमध्यतः ॥ नभ
वेज्जीववीजंवायस्यासौवधिरःस्मृतइति ॥ पंचेति ॥ अर्कोहकारः इंदुःसकारः ॥ वह्न्यर्केंदूनांदेवतानेत्रत्वेनमंत्राणामपिनेत्रत्वात् ॥
पिंगलामतेपि ॥ पंचाक्षरस्तुयोमंत्रःपावकेंद्वर्कवर्जितः ॥ नेत्रहीनइतिज्ञेयोदुःखशोकभयावहइति ॥ आदीति ॥ हंसस्वरूपं ॥ प्रासादो
हौंवाग्भवमैंजीवःसकारःसकीदृशःहकारोविंदुमान् ॥ हकारअकारउकारविंदुभिर्युक्तइत्यर्थः तेनहेहौंइतिवीजसिद्धं ॥ तथाचपिंगला
मते ॥ अष्टमस्वरसंयुक्तोवीजारूढःसविंदुकः ॥ तस्यान्मादृश्यतेनैवकिंवारावश्यतिष्ठत ॥ प्रासादोवाग्भवोहंसोमायावायत्रदृश्यते ॥ आ
दिमध्यांतदेशेषुकीलितंतंप्रचक्षतेइति ॥ आत्माहकारःसजीवारूढोजीवेनारूढःसकारेणारूढोहकारइत्यर्थः ॥ अष्टमस्वरऔकारस्या

ष्टमस्वरत्वंतुह्रस्वदीर्घयोरेकत्वात्का ॥ तथा ॥ अकच्चेके ॥ रावऊँचतुः कलहूँस्कमिति ॥ मूर्द्ध्निअंतेअत्रयथाक्रतोर्थोनभवति ॥ किंतुमध्ये
ष्कोलकारः अंतेलद्वयं ॥ यद्वामध्यएकःफट्कारः अंतेद्विस्त्रिर्वायत्रदृश्यतेसःस्तंभितःइत्यर्थः ॥ तथाचपिंगलामते ॥ सकृन्मध्येद्विधाप्रांतेश
क्रबीजंभवेद्यदि ॥ स्तंभितंतंवदंतीत्थंमंत्रंमंत्रविदोवुधाइति ॥ सारसंग्रहेपि ॥ द्विधात्रिधावाषोढावामंत्रान्तेयत्रदृश्यते ॥ महास्त्रस्तंभितोमं
त्रःश्रीशिवेनप्रकीर्त्तितइति ॥ अत्रमूलश्लोकादेवमध्येपीतिज्ञेयः ॥ वह्निमिति ॥ वह्निरेफः वायुर्यकारः तद्युक्तः मूर्द्धनिआदौपिंगलामतेति
आदिस्थैःसमर्भिवीजैर्मारुतैःपावकाक्षरैः ॥ दीपितंयत्रतंमंत्रमार्यादग्धंप्रवक्षतइति ॥ अस्त्रमिति ॥ उक्तसंख्याक्षरैरंतरितिःफट्कारेदृश्य
तइत्यर्थः ॥ यस्येति ॥ मध्येआदौशिवःहकारःशक्तिः ॥ सकारःएतादृशादौयद्युक्तंयंमातृकाहीनइतिनामानरंवदंति ॥ यथाचपिंगलामते
शिवशक्तिस्तथोंकारोयस्यादौनास्तितंमत्रं ॥ वदंतिमातृकाहीनंहीनसिद्धिप्रदायकमिति ॥ आदौतिस्थानत्रयेपिमिलित्वाकारचतुष्कंय
त्रदृश्यतइत्यर्थः ॥ आदिमध्यांतदेशेषुचतुर्द्धायत्रदृश्यते ॥ मकारोमीलनंविद्यात्तंमंत्रंमंत्रविसदेतिसारसंग्रहात् ॥ लक्षसागरोआदौम
ध्येवशिखरेत्रिधायत्रतुदृश्यते ॥ मार्त्तोमंत्रोमहेशेनमलिनःसइतीरितइत्युक्तः ॥ एतयोर्विकल्पः यस्येतिक्रोधोकंवीजमूर्द्धनि ॥ अंतक्रो
धदकारयोर्विकल्पः मूर्द्धनद्विधास्त्रमित्यन्वयः मध्येदकारयोरेकमंतेफड्द्वयमित्यर्थः ॥ तथाचपिंगलामते ॥ दकारःक्रोधवीजंवायस्यम
ध्येव्यवस्थितः ॥ फड्द्वयंचस्थितंप्रांतेयस्यार्त्तःसतिरस्कृतइति ॥ सारसंग्रहे ॥ यस्यमध्येदकारस्तुक्रोधवीजंहृदिस्थितं ॥ द्विधावांतेचफट्कार

स्यादस्यसतिरस्कृतइतिचकारोविकल्पार्थकः ॥ ऊमिति ॥ प्रणवेआदौॐकारःशीर्षेअंतेचवषट्मध्ये ॥ अस्यङः अउमाः इति ॥ चकारान्नद्ध
यमित्यत्रापिसंबध्यते ॥ तथाचपिंगलामते ॥ अस्यमंत्रद्वयंमध्येवषडंतेयथोदितः ॥ अउमास्फुरसोमंत्रोभेदितःपरिकीर्त्तिताइति ॥ अस्यङु
अउमाः औंकारः त्रिवर्णाइतित्रिवर्णास्यवहंसः वर्णद्वयरहित ॥ तथाचसार० ॥ वर्णत्रयात्मकोमंत्रोयस्तुहंसविवर्जित ॥ सुषुम्नः सतुवि
ज्ञेयः सर्वसिद्धिफलावहः ॥ इति ॥ पिंग० पि ॥ वर्णत्रयेभवेद्यत्रहंसहीनंसशंभुना ॥ सुषुम्नइतिसिद्धांतेप्रोक्तोभीष्टफलावहइति ॥ मं
त्रइति ॥ सप्तचअधिकंचदशचअक्षराणियस्यसः अष्टादशाक्षरइत्यर्थः ॥ फट्काराणांपंचकमादौयस्मिन्निति ॥ उक्तंचलक्षणा० ॥ विद्यावा
यदिवामंत्रोयद्यष्टादशवर्णकः ॥ पंचफट्कारपूर्वःस्यान्मदोन्मत्तःसउच्यते ॥ इतिपिंग० पि ॥ विद्यावामंत्रराजोवायःस्यात्सप्तदशाधिक
फट्कारंपंचपूर्वस्थेउन्मत्तःसप्रकीर्त्तितः ॥ इतिअत्रविशेषणद्वयविशिष्टस्यवउष्टः तद्धमिति ॥ विरामेतिच ॥ विरामस्थानेमंत्रांनगंपंचे
नुभयत्र ॥ उक्तंचपिंग० ॥ अस्यमंत्रोभवेद्यस्यमध्येप्रांतेचशंभुना ॥ हीनवर्णाइतिख्यातः समंत्रोनैवसिद्धिदइतिउगदाविति ॥ स्थानत्रयेमि
लित्वासत्वचतुष्टयमित्यर्थः ॥ अष्टादशाक्षरइत्यनुवर्त्तते ॥ सारसं० तु ॥ एतादृशोमंत्रोभीतइतिनाम्नाउक्तः तथा ॥ आद्यवंतेयथामध्येचतु
र्णास्त्रेणासंयुतं ॥ अष्टादशाक्षरंमंत्रंभीतंतंभैरवोब्रवीदिति ॥ यस्मादितितारः प्रणवः केचित्तुतारः फ्रेमितिवदंतितन्नग्रंथांतरविरोधात्
तथाच० ॥ एकोनविंशत्यर्णोयोयोमंत्रः प्रणवान्वितः ॥ महामायांकुशेभक्तसंप्रध्वस्तंवदंतिहीति ॥ पिंग० पि ॥ यदिसोष्टादशाक्षर विं

शत्येकोनवर्णाश्चमायोंकारांऊशान्विनः ।। प्रध्वस्तइत्यसौमंत्रः शंऽदेवेनकीर्त्तिनइति ।। ममवर्णाइतिचत्वारिंशच्छिपिश्चत्वारिंशद्वर्णाः सार०
च ।। सप्ताक्षरोभवेद्वालः कुमारश्चाष्टवर्णकः ।। चत्वारिंशाक्षरः प्रोधेनरुणः षोडशाक्षरः ।। इति ।। त्रिंशद्वर्णाइति ।। चतुः शताक्षरः चतुरधिक
शताक्षरः ।। उक्तंचसार० ।। त्रिंशद्वर्णाशतार्णावाचतुष्षष्ट्यक्षरंतथा ।। चतुरुर्द्धशतार्णावाहृद्वइत्यभिधीयतइति ।। नवाक्षरइतिध्रुवप्रणा
वः ।। प्रणवयुक्तोनवाक्षरोनिस्त्रिंशइत्यर्थः ।। नवाक्षरस्कनिस्त्रिंशोध्रुवयुक्तोथमृत्युदइतिसारसंग्रहात् ।। यस्येतिहृदयंनमः शिरोमं
त्रः स्वाहाकारः एतद्द्वयमंतेयस्यनास्तिशिखावषट्वर्मऊंकार ।। एतद्द्वयंवावौषट्कारोवाशिवोहकारः शक्त्यर्णा ।। सकारएवद्वयंवा
मध्येनास्तिसनिर्वीजइत्यर्थः ।। हृदिरोतेशिखावर्ममध्येनेत्रास्त्रकेतथा ।। शिवशक्त्यात्मकोवर्णोनसोयस्यसमंत्रराट् ।। निर्वीजइतिसंप्रो
क्तः सर्वकर्मसुगर्हितइति ।। एष्विति ।। अत्रहृत्वेश्वोकेस्थानद्वयस्योक्तत्वादेष्वितिवहुवचनप्रयोगः ।। कथमितिचेत्तत्वंतंत्रांतरेपिनिर्वी
जलक्षणावचनेआदावपिनह्येषप्रतिपादकाक्षरमस्तीत्यभिप्रायेणावहुवचनप्रयोगः कृतोग्रंथकर्त्रा ।। तथाचलक्ष० ।। निर्वीजस्तु
समाख्यातआदावोंकारवर्जितइति ।। एषुआदिमध्यावसानेष्वत्रापिस्थानत्रयेपिमिलित्वैवफट्कारषट्कंज्ञेयं ।। मंदइतिपंचाक्षरोद
शाक्षरः ।। उक्तंचसार० ।। दशाक्षरोभवेन्मंदइति ।। वह्वक्षरात्मकंवीजंकूटः सवह्वक्षरोपिएकाक्षरएवेतिज्ञेयः ।। सत्वहीनवलरहितव
त्तुवर्णाः केकरः ।। पिंग० पि ।। ध्रुवहीनश्चतुर्वीजः षड्विंशकेकरोमतः ।। इतिविशेषउक्तः ।। षडक्षरइतिवीजवर्जितः ॐकारादिरहितः अ

अत्रार्द्धसप्ताक्षरतार्द्धद्वादशाक्षरतावां तेषां जनयोगेन ज्ञेयं ॥ सार्द्धवीजत्रयत्वं चरणे नेधूमिता इत्यर्थः ॥ उक्तं च लक्ष ॥ अर्द्धसप्ताक्षरो मंत्रः सार्द्धद्वादशवर्णकः ॥ धूमितः सप्तमाख्यातो सार्द्धवर्णत्रयोथ वेति ॥ एकविंशतीति ॥ स्पष्टार्थः ॥ द्वाविंशतिरपि स्पष्टाक्षरार्थः ॥ चतुर्विंशतीति क्षुधार्त इति स्पष्टार्थः ॥ ऊनश्चतुर्विंशतिनेवदृप्त इति प्रतिपादकः स्पष्टः ॥ षड्विंशत्यक्षर इत्यपि ॥ त्रिंशदेकोनवर्णो वेति एकोनत्रिंशवर्णा इत्यर्थ एकोनत्रिंशद्वर्णाश्चाप्यंगहीन इति स्मृतः ॥ ॥ इति सारसंग्रहात् ॥ लक्षणासारे तु ॥ अष्टत्रिंशाक्षरश्चेति चतुर्थप्रकारोप्युक्तः ॥ अष्टाविंशत्यक्षर इत्यादि च ॥ चत्वारिंशदिति ॥ चत्वारिंशद्वर्णमारभ्य त्रिषष्ट्यक्षरपर्यंता मंत्रा एकैकाक्षरवृद्ध्या चतुर्विंशतिविधाप्रपीडा इति पंचषष्ट्यक्षर इति स्पष्टः ॥ एकोनेति पंचषष्ट्यक्षर ॥ आदिर्येषां च षष्ट्यक्षरादिति वा पदच्छेदः ॥ तस्य पूर्वमेव शातमानस इत्युक्तान् ॥ पञ्चषष्ट्युत्तराये वयावदेकोनविंशतमिति सारसंग्रहात् ॥ तेन एकैकाक्षरवृद्ध्या चतुस्त्रिंशत्प्रकारस्था नष्टा इति त्रयोदशेति स्पष्टार्थः ॥ शतमिति शतद्वयं द्विनवतिश्चेति एक एव भेदः द्विनवत्यधिकशतद्वयमित्यर्थः ॥ सा शतद्वयं द्विनवतिरेकतिरेकहीनोकनवत्यधिकाशतद्वयमित्यर्थः ॥ तेन शतसंख्यवर्णाद्विनवत्यधिकशतद्वयवर्णाः शतत्रयवर्णाश्चेति पंचप्रकारा निःस्नेहत्वदोषदुष्टास्युरिति ॥ अत्र केचित् शतद्वये त्वेकः प्रकारः द्विनवतिरन्यः एकनवतिरपरः इति वदंति तदसंगतं षष्ट्यक्षरमारभ्य एकोनशतवर्णपर्यंतानां स्थानभ्रष्टा इत्युक्ताः अतएव यत्संख्या इत्युक्तं एषां मंत्राणां वर्णसंख्या शताधिका तेन निःस्नेहा इत्यन्वयः ॥ वहुःशतानीति सुगमः ॥ सहस्रार्ण

इति॥ ये दंडकाः ये स्तोत्ररूपास्ते पीडिता ह्ययाज्ञा नव्यः॥ नर्थेति॥ यथा ये ने मंत्राः सदोषास्तथैव विद्या अपि सदोषा एव ज्ञेयाः॥ उक्तं च सारसंग्रहे॥ य
था विद्यास्तथा मंत्रा भेदभिन्ना परस्परं॥ ज्ञातव्या साधकेंद्रैस्तु नानातंत्रेषु भाषिताः॥ इति काम्यकर्मणि वेत्युक्ते निःकामानां नैते दोषा मंत्रजपे बाध
का इति भाति॥ अथैव परस्परं॥ ज्ञातव्या साधकेंद्रैस्तु नानातंत्रेषु भाषिता॥ इति काम्यक॰ तेषां श्लोकानां विषमपदव्याख्या॥ तत्रानिलवीजं यका
रः॥ भूवीजं ग्लौं मायावीजं ह्रीं त्रितत्वं प्रणवः शवः फ्रें कारः अंकुशः क्रौं इडः सकारः॥ अर्को हकारः प्रासादो हौं वाग्भवः ऐं जीवः सः चतुः कलंक्रः
अस्त्रं फट्कारः पुरंदरो लकारः वह्नि रेफः शिवः अं शक्तिः सकारः एषु स्थानेषु पूर्वश्लोकोक्तनमः॥ पदादिस्थानेषु पंचाक्षरो दशाक्षरः अर्द्धस
प्ताक्षरः सार्द्धसप्ताक्षर इत्यर्थः॥ त्रिंशदेकोनवर्णा एकोनत्रिंशद्वर्णा इत्यर्थः॥ एकहीना एकनवतिरित्यर्थः॥ साद्विनवतिः ऐकहीनेत्यन्वयः
अथोक्तदोषदुष्टानां मंत्राणां तद्दोषनिरसनोपायस्तत्रैव॥ इत्यादिदोषदुष्टांस्तान्मंत्रानात्मनि योजयेत्॥ शोधयेद्दृढपवनो वह्न्या योनिमु
द्रया॥ योनिमुद्रालक्षणमुक्तं रुद्रयामले भैरवी पटले॥ पश्चिमाभिमुखं लिंगं योनिष्ठं परिकीर्त्तितं॥ हृद्ग्रथिविंदुसंस्थानं स्वयंभूर्वाणवाच
कं॥ इतरं चांतरालस्थं चित्रग्रंथिस्तथा परं॥ महापद्मवनं यत्र योगपीठं प्रकीर्त्तितं॥ कदंबगोलकाकारं चक्रांतं विदुस्तत्परां॥ ब्रह्मरूपं तु
तत्रैव सुषुम्नाधारमंडलं॥ पृथिव्यादीनि तत्त्वानि मुद्राणां वाचकानि तु॥ पूर्णाख्यं वैदवं तत्त्वं कोदंडद्वयमध्यगं॥ तदूर्द्ध्वं नादनामा तु ॐ या
नां च भवेत्ततः॥ कामरूपं भवेच्छक्तिः शिवाख्यमकुलं प्रिये॥ सहस्रारं महापद्मं रक्तकिंजल्कशोभितं॥ तत्रस्थो लभते सम्यग्वर्षतं रक्तविं

उकं ॥ तत्वव्यापकयोगेन स्वाधारे योजयेन्मनः ॥ गुदमेढ्रांतरे योनिस्तामाकुंच्य प्रबोधयेत् ॥ भ्रमद्योनिगतं ध्यात्वा कामं बंधूकसन्निभं ॥ ज्वलत्का
लानलप्रख्यं तडित्कोटिसमप्रभं ॥ तस्योर्द्ध्वगं शिवा सूक्ष्मा विह्नस्था परमा कला ॥ तया सह तमात्मानमेकीभूते विचिंतयेत् ॥ गछंती ब्रह्ममार्गेण
लिंगभेदक्रमेण तु ॥ अमृतं यद्विसर्गस्थं परमानंदलक्षणं ॥ उत्करत्काशु तेजाख्या धारापातप्रवर्षिणी ॥ पीत्वा कुलामृतं दिव्यं पुनरेव विशेत्कुलं
पुनरेव कुले गछेन्मात्रायोगेन नान्यथा ॥ सा च प्राणसमाख्याता तंत्रेस्मिन् परमेश्वरि ॥ उर्द्धत्वा प्रोच्यते सो हि प्राणानां ते विशते यदा ॥ स्वयमभ्यस
तस्तस्य अहन्यहनि निश्चयात् ॥ जरामरणदुःखाद्यैर्मुच्यते भवबंधनात् ॥ चतुर्विधा तु या सृष्टिरस्यां योनौ प्रवर्त्तते ॥ पुनः प्रलीयते तस्यां काला
ग्न्यादिशिवांतकं ॥ योनिमुद्रासमभ्यासान्नवबंधप्रकीर्त्तितः इति ॥ अस्यार्थः तत्र गुरुः सिद्धासनस्थो वामपार्ष्णिना गुदमेढ्रांतरं नीः पीड्य तदु
परि दक्षिणपादं गुल्फग्रंथ्योरन्योन्यसंमर्द्दं यथा भवति तथा दक्षिणपार्ष्णिना लिंगमूलं निष्पीड्य स्थिरकायः सम्यगुपविश्य गुदमाकुंच्यापानवायु
मुत्थाप्य संरुद्धः प्राणवायुः प्राणापानयोः मेघघट्टं कुर्वन्नेकचित्तो मूलाधारगतचित्स्वरूपे कुंडल्यात्मके परमात्मनि स्वसाध्यमंत्रं ज्ञानदीपसं
चिंत्य तन्मंत्राक्षराणापकैकशः सुषुम्णामार्गेण मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञाख्यषट्चक्रभेदक्रमेण ब्रह्मरंध्रं प्रापय्य
तत्रस्थसोममंडलनिर्गतामृतप्लवसिक्तानि मंत्राक्षराणि विभाव्य पुनः सुषुम्णामार्गेणाज्ञाविशुद्धानाहतमणिपूरकस्वाधिष्ठानचक्र(
भेदक्रमेण मूलाधारं प्रापयेदिति ॥ ततस्तन्मंत्रमृष्यादिन्यासपूर्वकं यथोक्तभावनयाष्टोत्तरसहस्रं जपेदित्यानरीणो मंत्रसंस्कारः ॥ अ

थवाद्यःक्रियारूपोमंत्रदोषनिरसनायदशविधसंस्काराः॥ शारदा०॥ मंत्राणांदशकथ्यंतेसंस्काराःसिद्धिदायिनः॥ जननंजीवनंपश्चा
त्ताडनंबोधनंतथा॥ तथाभिषेकोविमलीकरणाप्यायनेपुनः॥ तर्पणंदीपनंगुप्तिर्दशैतामंत्रसंक्रियाइति॥ अथदशानांसंस्काराणां
लक्षणानि॥ तत्रैव॥ मंत्राणांमातृकामध्यादुद्धारोजननंस्मृतं॥ प्रणवान्तरितान्कृत्वामंत्रवर्णान्जपेत्सुधीः॥ एतज्जीवनमित्याहु
र्मंत्रतत्वविशारदाः॥ भूर्जेसंलिख्यमंत्राणांताडयेच्चंदनांभसा॥ प्रत्येकंवायुनामंत्राताडनंतदुदाहृतं॥ विलिख्यमंत्रतन्मंत्रीप्रसूनैःक
रवीरजैः॥ तन्मंत्राक्षरसंख्यातैर्हन्याद्यांतेनबोधनंस्वतंत्रोक्तविधानेनमंत्रीमंत्रार्णसंख्यया॥ अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये
सचिंत्यमनसामंत्रंज्योतिमंत्रेणनिर्दहेत्॥ मंत्रेमलत्रयंमंत्रीविमलीकरणंत्विदं॥ तारंव्योमाग्निमनुयुग्दंडीज्योतिर्मनुमतः॥ कुशो
दकेनजप्तेनप्रत्यर्णप्रोक्षणंमनोः॥ तेनमंत्रेणविधिवदेतदाप्यायनंमतं॥ मंत्रेणवारिणापात्रेतर्पणं३स्मृतं॥ तारमायारमायोगो
मनोर्दीपनमुच्यते॥ जप्यमानस्यमंत्रस्यगोपनंत्वप्रकाशनं॥ संस्कारादशसंप्रोक्ताःसर्वतंत्रेषुगोपिताः॥ यान्कृत्वासंप्रदायेनमंत्रि
वाछितमश्नुते॥ अथमंत्राणामित्याद्यप्रकाशनमित्यनस्यसार्द्धश्लोकाष्टकस्यायमर्थः॥ तत्रप्रथमश्लोकस्यपूर्वार्द्धेनैतदुक्तंभवति
तत्रकश्चिद्विपश्चिच्चंदनादीपीठेॐक्रमादिनावक्ष्यमाणपांचभौतिकचक्रंविरच्यतत्रलिपिवितक्रमेणअकारादिक्षकारांतांमातृकां
विलिख्यतत्रमातृकांसरस्वतींवक्ष्यमाणविधिनावाह्यसंपूज्याष्टोत्तरशतंमातृकांजपित्वातन्मध्यात्त्वाभिष्टंमंत्रंस्वरव्यंजनविंदुविस

र्गसंयोगाक्षराणि पृथग्भूत्येकीकृत्य स्वगुरूपदेशेन ज्ञानेन मंत्रं जनयेदिति जननं ॥ अथ प्रथमश्लोकोत्तरार्द्धेन द्वितीयश्लोकस्य पूर्वार्धेन चै
तदुक्तं भवति ॥ प्रागुद्धृतस्य मंत्रस्यैकैकमक्षरं प्रणवान्तरितं कृत्वाष्टोत्तरशतं जपेत् ॥ यथा नमः शिवायेति मंत्रस्तस्य जपप्रकारः ॥ ॐ नॐ
मः ॐ शि ॐ वा ॐ य ॐ एव सर्वत्र बोध्यमिति जीवनं ॥ अथ द्वितीयश्लोकस्योत्तरार्धेन तृतीयश्लोकस्य पूर्वार्धेन चैतदुक्तं भवति ॥ मंत्रं भू
र्जपत्रे कुंकुमादिद्रव्यैस्तं मंत्रं विलिख्य चंदनमिश्रितजलेन यमिति वायुबीजमुच्चरन्प्रत्यक्षरं शतवारं ताडयेदिति एतत्ताडनं ॥ अथ तृती
यश्लोकस्योत्तरार्धेन चतुर्थश्लोकस्य पूर्वार्धेन चैतदुक्तं भवति ॥ तत्र प्राग्वत् पीठे मंत्रं विलिख्य तन्मंत्राक्षरसंख्यातानि करवीरपुष्पाणि पा
सायरमिति ह्रा बीजमुच्चरन् प्रत्यक्षरं तैपुष्पैः शतवारं हन्यादित्येतद्बोधनं ॥ अथ चतुर्थश्लोकस्योत्तरार्धेन पंचमश्लोकस्य पूर्वार्द्धेन चै
तदुक्तं भवति ॥ तत्र प्राग्वत् पीठे कुंकुमरोचनादिभिरष्टदलकमलं कृत्वा तत्कर्णिकायां कुंकुमादिद्रव्यैर्मालतीकलिस्तन्मंत्राक्षरसंख्या
भिरेकया कलिकयैकमेकमक्षरं लिखेदिति तन्मंत्रं विलिख्य तन्मंत्राक्षरसंख्याकाश्वत्थपल्लवान्यानीय तमेव मंत्रमुच्चारन्नमुकमंत्रमभि
षिंचामि नम इत्यभिषेकं सुगंधिजलेनैकैकपल्लवेनाष्टोत्तरशतवारं कुर्यादिति अभिषेकः ॥ अथ पंचमश्लोकस्योत्तरार्धेन षष्ठश्लोक
स्य पूर्वार्द्धेन चैतदुक्तं भवति ॥ तत्र स्वमूलाधारे वह्निमंडले वक्ष्यमाणाज्योतिमंत्रं संचिंत्य तद्दहेन संस्कर्त्तव्यं मंत्रं विभाव्य ज्योतिर्मंत्रस्य
तेजसा संस्कर्त्तव्यमंत्रगतमाणवकामकमायीयं मलत्रयं सहजागंतुकयोगाख्यं मनसा पुनः पुनरेकमेकं निर्दह्य तं मंत्रं विगतमल

त्रयं ध्यायेदिति विमलीकरणं ॥ षष्ठश्लोकस्योत्तरार्धेन सज्योतिर्मंत्रं समुद्धरति ॥ तत्र तारः प्रणवः ओम हकारः अग्नी रेफः मनुश्चतुर्दश
स्वर औकारः इंदुरनुस्वारः ॥ ॐ ह्रौँ इति ज्योतिर्मंत्रः सिद्धः ॥ अथ सप्तमश्लोकेनैतदुक्तं भवति ॥ तत्र प्राग्वत्पीठाग्रे तन्मंत्रं कुंकुमादिभिः
र्विलिख्य ताम्रादिपात्रे कर्पूरवासितं शुद्धजलमापूर्य लिखितमंत्रेणैवाष्टोत्तरशतवारमभिमंत्र्य तेनैव मंत्रेण तज्जलबिंदुभिः कुशैः प्र
त्यक्षरं त्रिस्त्रिः प्रोक्षयेदित्येतदाप्यायनं ॥ ॥ अथाष्टमश्लोकस्य पूर्वार्द्धेनैतदुक्तं भवति ॥ ॥ तत्र ताम्रादिपात्रे प्राग्वत् मंत्रं विलिख्य पा
त्रांतरे कर्पूरादिवासितं शुद्धजलमानीय तमेव मंत्रं पठन् अंते अमुकमंत्रं तर्पयामि नमः इत्यष्टोत्तरशतवारं लिखितमंत्रस्योपर्यंज
लिदानेन तर्पयेदिति तत्तर्पणं ॥ अथाष्टमश्लोकस्योत्तरार्द्धेनैतदुक्तं भवति ॥ तत्र तारः प्रणव माया भुवनेश्वरीबीजं रमा श्रीबीजं योग
लक्षणां तु आदौ योगो भवेदित्युक्तं ॥ अयमर्थः ॥ प्रणवभुवनेश्वरीश्रीबीजांते साध्यमंत्रं कृत्वाष्टोत्तरशतवारं जपेदित्येत ॥ दीपनं ॥ अथो
र्वरितार्द्धश्लोकस्यार्थः स्पष्ट एव ॥ इति दशसंस्काराः ॥ ॥ सुंदराचार्यशिष्येण श्रीनिवासेन धीमता ॥ चंद्रिकायां प्रणीतायां प्रकाशः प्रथ
मो गमत् ॥ ॥ इति श्रीसुंदराचार्यचरणारविंदद्वंद्वांतेवासिना श्रीश्रीनिवासभट्टेन विरचितायां श्रीशिवार्चनचंद्रिकायां प्रथमः प्र
काशः ॥ ॥ अथ मंत्रमेलनप्रकारः ॥ तत्रादौ नक्षत्रचक्रं ॥ तत्र श्रीरुद्रयामले ॥ राज्यलाभोपकाराय प्रारभ्यारिः खरः कुरुन् ॥ गोपालांकु
रिप्रायाक्षणाबीनृदिता लिपिः ॥ अथयमर्थः रा २ ज्य १ ला ३ भो ४ प १ का १ रा २ य १ प्रा २ र २ भ्या १ रि २ ख २ रः २ कु १ रुन् २ ॥ गो ३ पा १ ला ३

14

राम
१४

न्कु १ कु १ टि १ प्रा २ यान् १ फु २ ह्न ३ वि ४ ॥ अथैतच्चक्ररचनाप्रकारः ॥ तत्र दक्षिणोत्तरायताश्च तस्रोरेखाः प्राक्प्रत्यगायता दशरेखाश्च वि
लिख्य सप्तविंशति कोष्ठानि कृत्वा दक्षिणोत्तरायतपंक्तित्रये सर्वोर्ध्वपंक्तेः प्रथमकोष्ठे अ आ द्वितीये इ तृतीये ई उ ऊ चतुर्थे ऋ ॠ ऌ ॡ· पंच
मे ए षष्ठे· ऐ सप्तमे ओ औ अष्टमे क· नवमे ख ग ॥ इति विलिख्य तदधस्य द्वितीयपंक्तेः प्रथमकोष्ठे घ ङ· द्वितीये च तृतीये· छ ज चतुर्थे· झ ञ·
पंचमे· ट ठ· षष्ठे· ड सप्तमे ढ ण अष्टमे· त थ द· नवमे· ध ॥ इति विलिख्य तदधस्थ तृतीयपंक्तेः प्रथमकोष्ठे· न प फ· द्वितीये· ब· तृतीये भ· चतु
र्थे· म पंचमे· य र· षष्ठे· ल· सप्तमे· व श· अष्टमे· ष स ह· नवमे· ळ क्ष· अं अः ॥ इति स्ववामादि दक्षिणांतं विलिख्य सर्वोर्द्ध्वपंक्तेः प्रथमकोष्ठ
मारभ्य सर्वाधस्थतृतीयपंक्ते नवकोष्ठपर्यंतेषु सप्तविंशति कोष्ठेषु एकादि सप्तविंशत्यंकानेकैकशः समालिख्य तानंकानश्विन्यादि सप्तविं
शति नक्षत्राणि परिकल्प्य विचारयेत् ॥ तत्र तस्मिन् कोष्ठे साधकस्य नामाद्यक्षरं तिष्ठति तत्रस्थांकवशाच्च विज्ञाय तत्र यन्नक्षत्रस्थमेकम
क्षरमायाति तत्साधकस्य जन्मनक्षत्रं परिकल्प्य तत्कोष्ठमारभ्य मंत्रस्याद्यमक्षरं यस्मिन्कोष्ठे तिष्ठति तावत्पर्यंतं गणयित्वा तत्रस्थमेकम
क्षराणि च विज्ञाय तत्र तन्नक्षत्रं दृश्यते तदेव मंत्रनक्षत्रं परिकल्प्य साधकनक्षत्रमारभ्य मंत्रनक्षत्रपर्यंतं ॥ नामाद्यक्षरमारभ्य यावन्मंत्रा
द्यमक्षरं जन्म संपद्विपत्क्षेमा प्रत्यरिः साधको वधः ॥ मैत्रं परममैत्रं च जन्मादीनि पुनः पुनरिति कुलार्णवोक्तप्रकारेण जन्मादि नवकं पर्या
यत्रयेण विज्ञाय फलानि च निर्दिशेत् ॥ तत्र फलानि कुलार्णवस्व ॥ जन्मसत्कारया मृत्युराशुर्नाशस्तृतीयया ॥ मृत्युः पंचमतारायां सप्तमोया

नकोमनः॥ द्विचतुः षडष्टनवगताः ताराः शुभा मता॥ इति ताराफलं ज्ञात्वा मन्त्रं दद्याद्विशालधीः॥ अथ नक्षत्राणां गणभेदः॥ तत्र कुलमुलावतारे
अश्विनी मृगशीर्षं च तथा पुष्य पुनर्वसू॥ हस्तस्वाती रनुराधा रेवती विष्णुदैवतं॥ भरणी चैव आर्द्रा पूर्वोत्तरा तथा॥ पूर्वाषाढोत्तराषाढा पूर्वा
भाद्रोत्तरान्तजः॥ कृत्तिका हि मघा चित्रा विशाखा ज्येष्ठका तथा॥ मूलं धनिष्ठा शतभिषा च रक्षोगणाः प्रिये॥ विष्णुश्रवणनक्षत्रं देवतं देवगणा
इति॥ अत्र विसर्गलोपः छान्दसः॥ अहिः आश्लेषान्तजः मनुष्यगणाः॥ अथ तेषां गणानां प्रीतिविरोधौ रुद्रयामले॥ स्वगणे चोत्तमा प्रीतिर्म
ध्यमा देवमानुषे॥ अधमा राक्षसे देवे मृत्युर्मानवराक्षसे॥ इति नक्षत्रशोधनप्रकारः॥ ॥ अथ राशिचक्रं॥ तत्र रु॥ बालं गौरं खुरं शोण
शमी शोभेति राशिषु॥ क्रमेण भेदिता वर्णाः कन्यायां शादयः स्मृताः॥ ॥ इति अयमर्थः॥ बाल ४ ल ३ गौ ३ रं २ खु २ रं २ शो ५ णं ५ श ५ मी ५
शो ५ भे ४ कन्यायां शादयः स्मृताः॥ इति षष्ठे राशौ शषसहलक्षअंअः इत्यष्टौ वर्णा योजयेदित्यर्थः॥ अथ तत्र चक्ररचनाप्रकारः॥ तत्र प्राक्
प्रत्यगायतं रेखाद्वयं दक्षिणोत्तरायतं रेखाद्वयं मध्ये चतुरस्रं यथा विलिख्य मध्यचतुरस्रस्य चतुःकोणेषु बहिरेकैकां रेखां कृत्वा दशखं
डान्निष्पाद्य तेषु खंडेषु प्रागादिप्रादक्षिण्येन प्रथमखंडे अआइई २ उऊऋ ३ ॠलृॡ ४ एऐ ५ ओऔ ६ अंअः शषसहलक्ष ७ कखगघ
ङ अष्टमे च ५ नवमे ट ५ दशमे त ५ एकादशे प ५ द्वादशे यरलव इति मातृकावर्णान्विलिख्य तेषु प्रागादिषु द्वादशखंडेषु एकादिद्वाद
शपर्यंतानंकानेकैकशः क्रमाल्लिख्य यस्मिन्खंडे साधकस्य नामाद्यक्षरं तिष्ठति तदारभ्य यस्मिन्खंडे मंत्राद्यक्षरं तिष्ठति तत्पर्यंतं गणये

त् ॥ तत्र स्वलग्नादि द्वादशस्थानानां नामानि कुलार्णवे ॥ नामाद्यक्षरमारभ्य यावन्मंत्रादिवर्णकं ॥ लग्नो धनभ्रातृशत्रुबंधुपुत्रकलत्रकाः ॥ म
रणं धर्मकर्मायव्यया द्वादश राशयः इति ॥ अथैतेषां फलानि रत्नसागरे ॥ एको वाप्यथ पंचमोथ नवमो राशिस्सुसद्बांधवो राशिः स्याद्दशमो
द्वितीयसहितः षष्ठो भवेत्सेवकः ॥ रुद्राग्निस्वरसंख्यया यदि मतो मंत्रो भवेत्पोषकः ॥ सप्ताद्वादशकाष्टकश्चनिमितो मंत्रस्तु नो घातक
इति ॥ रुद्र एकादश अग्निः तृतीयः स्वराः सप्त इति मिलित्वार्थः ॥ ॥ अथ राशीनां वर्णभेदाः प्रपंचसारे ॥ स्तुः कर्कटो वृश्चिकमीनराशिवि
प्रा नृपाः सिंहधनुश्च मेषः ॥ तुला सकुंभो मिथुनश्च वैश्याः कन्यावृषोथो मकरश्च शूद्राः ॥ इति राशिशोधनप्रकारः ॥ ॥ अथ पांचभौतिकच
क्रं ॥ तत्रादौ दक्षिणामूर्त्तिसंहितायां ॥ उऊओगजडवर्णादवलालश्च पार्थिवाः ॥ ऋऋऔघढधदभवसावर्णास्तु नीरजाः ॥ इईएखछठ
थफरक्षार्णाश्चाग्निसंज्ञकाः ॥ अआएकचटतपयषावर्णाश्च वायुजाः ॥ ललृअंङ ञणानमशहावर्णा नाभसा मता ॥ इति श्लोकार्थः स्पष्टः
अथैतच्चक्ररचनाप्रकारः ॥ तत्र दक्षिणोत्तरायताः षड्रेखाः प्राक्पश्चिमायता एकादशरेखाश्च विलिख्य पंचाशत्कोष्ठानि कृत्वा दशकोष्ठै
रेकैका पंक्तिरिति पंक्तिपंचकं परिकल्प्य तासु पंक्तिषु सर्वोर्ध्वगत प्रथमपंक्तौ वामादि दक्षिणांते दशसु कोष्ठेषु अआएकचटतपयष द्विती
यपंक्तौ इईएखछठथफरक्ष तृतीयपंक्तौ उऊओगजडवलल चतुर्थपंक्तौ ऋऋऔघढधभवस पंचमपंक्तौ ललृअंङ ञणानमश
ह इति वाय्वग्निभूजलाकाशात्मकान् पंचवर्गान्विसर्गसहितपंचाशद्वर्णविभागजनितान्विलिख्य नामाद्यक्षरं यत्र पंक्तौ तिष्ठति तत्रैव चे

शि·चं
१६

मंत्राद्यक्षरमपि तिष्ठति तदा तन्मंत्रमेकभूतदैवतं स्वकुलज्ञेयं ॥ अन्यत्र चेन्मंत्राद्यक्षरं तिष्ठति तदा तत्किंभूतदैवत्यमिति ॥ विचार्य तद्गुणा
दोषान जानीयात् ॥ आत्मनो नामाधिदैवतभूतारिदैवतं चेत्तन्मंत्राद्यक्षरं भवति तदा तन्मंत्रं न गृह्णीयात् ॥ मित्रभूतदैवतं वा तटस्थंभूतदैव
तं वा मंत्राद्यक्षरं स्यात्तदा तन्मंत्रं गृह्णीयात् ॥ तत्र भूतानां वैरमैत्रीतटस्थतास्वरूपमुक्तं कुलार्णवे ॥ महीसलिलयोर्मैत्रमनलानिलयोरपि ॥ सामान्य
मग्निभूम्योस्तु सलिलानिलयोस्तथा ॥ शत्रुत्वं वैपरीत्येन मित्रं सर्वत्र चापरं ॥ परस्परविरुद्धानां वर्णानां यत्र संगतिः ॥ वर्जयेत्तादृशं मंत्रं नाशहे
तुं कुलेश्वरीति अपरं आकाशः ॥ इति स्वकुलान्यकुलशोधनप्रकारः ॥ ॥ अत्र मंत्राणां सिद्धसाध्यादिशोधनप्रकारः ॥ तत्रादौ द्वादशारचक्रं ॥
तत्र कुलमूलावतारे ॥ द्वादशारे तथा चक्रे कूटषंढविवर्जितान् ॥ आदिहांतान्लिखेद्वर्णान्पूर्वतो यावदीश्वरं ॥ अंकानेकादिभान्वंतान्लिखेत्पू
र्वादितः क्रमात् ॥ सिद्धः साध्यः सुसिद्धोरिश्चतुर्वर्गः स्फुटो भवेत् ॥ स्वनामाद्यर्णमारभ्य सिद्धादीन्गणयेत्सुधीः ॥ इति ॥ कूटः क्षंकारः षंढाः ऋ
ॠऌॡतेश्वराः ॥ चक्ररचनाप्रकारस्तु प्रागुक्तराशिचक्रवद्द्वादशारचक्रं ॥ विधाय तस्य द्वादशसु खंडेषु प्रागादिप्रादक्षिण्यक्रमेण ॥ अकडमः
आखढयः ॥ इगणार ॥ ईघतल ॥ उङथव ॥ ऊचदशः ॥ एछधष ॥ ऐजनस ॥ ओझपह ॥ औञफल ॥ अंटव ॥ अःठभ ॥ इति मातृकावर्णान्विलि
ख्य तेषु प्राग्वदेकादिद्वादशांतानंकानपि समालिख्य यस्मिन्खंडे शिष्यनामाद्यक्षरं तिष्ठति तदारभ्य मंत्राद्यक्षरपर्यंतं सिद्धसाध्यसुसिद्धादि
क्रमेण गणयेत् ॥ तत्र कुलमूलावतारे ॥ नवैकपंचमाः सिद्धः साध्यः षड्दशयुग्मकः ॥ सुसिद्धो गुणिरुद्राग्निस्तुर्याष्टद्वादशोरिकः ॥ इतिज्ञा

16

पद
१६

त्वावरारोहे मंत्रं दद्याद्विशालधीः॥ अथैतेषां फलान्यग्रे वक्ष्यते॥ ॥अथ षोडशचक्रे सिद्धसाध्यादिशोधनप्रकारः॥ तत्रकुलमूः॥ चतुरस्रां भुवं भित्वा कोष्ठा
नां षोडश लिखेत्॥ अकारादिक्षकारांतां मातृकामपि विन्यसेत्॥ ईशानकोणादारभ्य वायव्यां तं लिखेत्सुधीः॥ प्रांदक्षिण्यक्रमेणैवेति॥ तत्रैव षनप्र
कारमाह॥ लक्ष्मीकुलार्णवे॥ एकद्विरुद्रनवनेत्रयुगार्कपंक्तिधरानागषोडशचतुर्दशपंचकेषु॥ कोष्ठेलिखेन्मुनितिथीच तथावसिष्टे वर्णान्
ऊनाशनमितान्क्रमशोंबिकायाइति॥ रुद्र ११ नेत्र २ युग ४ अर्क १२ पंक्ति १० नाग ८ मुनि ७ तिथि १५॥ अवशिष्टेत्रयोदशमेऊनाशनमि
तान्पंचवर्णान्अंबिकायाः मातृकायाः॥ अथैतच्चक्ररचनाप्रकारः॥ तत्र प्राक्प्रत्यगायतान्दक्षिणोत्तरायतांश्च पंचपंचरेखा विलिख्य षो
डशकोष्ठानि कृत्वा तानि कोष्ठानि चतुःचतुःकोष्ठेनैकैकचतुष्कमिति चतुष्कचतुष्टयरूपेण चतुर्धा विभज्य तत्रैशानगतचतुष्कस्य कोष्ठ
चतुष्टये ईशानकोष्ठादिप्रादक्षिण्येन॥ अथ कह· उउ· पछृ ऋम ओडव आग्नेयचतुष्के ईशानादिप्रादक्षिण्येन॥ आखडल॥ ऊचफ॥ ऌञय
ओठस॥ नैर्ऋतिचतुष्के ईशानादिप्रादक्षिण्येन॥ इगधस॥ ऋछव॥ एटर॥ अंणाष·॥ चतुर्थचतुष्के ईशानादिप्रादक्षिण्येन॥ ईघन॥ ऋ
जभ· ऐठल॥ अः तस॥ इति समस्तमातृकावर्णान्विलिख्य शिष्यनामाद्यक्षरं यत्रकोष्ठे तिष्ठति तत्कोष्ठमारभ्य मंत्राद्यक्षरकोष्ठावधि गणा
यित्वा सिद्धसाध्यसुसिद्धारीन्विचारयेत्॥ तत्र साधकमंत्राद्यक्षरयोरेककोष्ठ एव स्थितिश्चेन्मंत्रः सिद्धसिद्ध इति ज्ञेयः॥ तच्चतुष्कस्यैव द्वितीयको
ष्ठे चेन्मंत्राद्यक्षरं तदा मंत्रः सिद्धसाध्यः॥ तृतीये चेत्सिद्धसुसिद्धः चतुर्थे चेत्सिद्धारिः॥ द्वितीयचतुष्के चेत्तत्समानकोष्ठं प्रथमकोष्ठं परिकल्प्य त

दारभ्यप्रादक्षिण्येन गणयेत् ॥ तत्र प्रथमकोष्ठे चेन्मंत्राद्यक्षरं तिष्ठति तदा स मंत्रः साध्यसिद्धः ॥ द्वितीये चेत्साध्यसाध्यः ॥ तृतीये साध्यसुसि-
द्धः ॥ चतुर्थे साध्यारिः ॥ एवं तृतीयचतुष्केपि प्रथमकोष्ठे सुसिद्धसिद्धः द्वितीयसुसिद्धसाध्यः तृतीयसुसिद्धसिद्धः ॥ चतुर्थे सुसिद्धारिः ॥ ए-
वं चतुर्थचतुष्केपि प्रथमकोष्ठे चेन्मंत्राद्य क्षरं तदा अरिसिद्धः ॥ द्वितीये चेदरिसाध्यः तृतीये अरिसुसिद्धः चतुर्थे अर्यरिः ॥ इति सम्यग्वि-
चार्य विज्ञाय मंत्रमेलनं कुर्यात् अन्यथा मंत्रस्त्वनर्थकारी भवेत् ॥ नास्ति मंत्रसमं मित्रं नास्ति मंत्रसमो रिपुः ॥ इति सारसंग्रहवचनात् ॥
अथैतेषां फलानि कुलमूलावतारे ॥ सिद्धः सिध्यति कालेन साध्यः सिध्यति वा न वा ॥ सुसिद्धस्तत्क्षणादेव अरिर्मूलं निकृंतति ॥ तंत्रराजे ॥
सिद्धः सिद्धो जपात्सिद्धो द्विगुणात्सिध्यसाध्यक ॥ सिद्धसुसिद्धः संप्राप्तेः सिद्धारिर्हंति गोत्रजान् ॥ साध्यसिद्धो विसंक्लेशात्साध्यसाध्योतिदुःख-
कृत् ॥ साध्यसुसिद्धो भजनात्साध्यारिः स्वपित्र्यं हरेत् ॥ सुसिद्धसिद्धोर्धजपात्फलदद्याद्यथेप्सितं ॥ सुसिद्धसाध्यो जावाद्यैः सिद्धयेत्स्यादतो-
न्यथा ॥ सुसिद्धेतु सुसिद्धस्तु पूर्वजन्मकृतश्रमः ॥ तस्मात्तं सर्वसिद्धीनां साधने योजयेन्मनुं ॥ सुसिद्धारिरशेषेण स्वकुलान्नाशयेद्ध्रुवं ॥ अ-
रिसिद्धः सुतं हन्यादरिसाध्यस्तु कन्यकां ॥ तत्सुसिद्धस्तु पत्नीं ह्यामर्यरिः साधकापहः ॥ तथा सारसंग्रहे ॥ उष्ट्रर्क्षराशिभूतारिवर्णप्रचुरमंत्र-
कं ॥ सम्यक्परीक्षितं यत्नाद्वर्जयेन्मतिमान्नरः ॥ अत्र मंत्रमेलने प्रसिद्धमेव नामग्राह्यं ॥ सिद्धसाध्यादियोगेषु मंत्रदाने विशेषतः ॥ प्रसिद्ध-
नामगृह्णीयात्सुप्तो येन जागृयात् ॥ इति ज्ञानोत्तरवचनात् ॥ ॥ तथा सारसंग्रहे ॥ आदौ सिद्धस्तथा चांते सर्वसिद्धफलप्रदः ॥ आद्यंवं

17

नैभवेत्साध्यः कृच्छ्रसाध्यउदाहृतः ॥ आदावंतेसुसिद्धस्तु क्षिप्रमेवप्रसिध्यति ॥ आदावंतेरिपुर्यस्तु साधकंसंनिहंतयेन् ॥ आदौसिद्धोंतसाध्यो
योद्विगुणो नसंसिध्यति ॥ आदौसाध्यः सुसिद्धोंते प्रोक्तमार्गेणासिध्यति ॥ सुसिद्धादिस्तु साध्यंतश्चतुर्गुणामपेक्षते ॥ आद्यंतयोर्यदासिद्धोम
ध्येसाध्यः प्रजायते ॥ आद्यंतयोर्यदासाध्योमध्येसिद्धः प्रजायते ॥ तावुभौसाध्यसिद्धौहि जपाधिको नसिध्यतः ॥ आदौसिद्धेनसंयुक्तः सुसि
द्धेनतथांततः ॥ अरिणादेवसिध्येत साधकस्यनसंशयः ॥ सिद्धांतरितसाध्यस्तु सुसिद्धांतरितोथवा ॥ शीघ्रंसिध्यति मंत्रो वै यथोक्तंमंत्रवित्तमे
सिद्धेनांतरितः शत्रुः सुसिद्धेनापिचेद्भवेत् ॥ नासौरिपुर्भवेन्मंत्रः किंतुकृच्छ्रेणासिध्यति ॥ साध्येनांतरितासिद्धः सुसिद्धोपितथायदि ॥ सिध्यत्यती
वकष्टेनसाधकस्य नचान्यथा ॥ रिपुणांतरितंसिद्धं सुसिद्धंचतथात्यजेत् ॥ रिपुणादूषितोमंत्रो नैवग्राह्यः कदाचन ॥ तथाविजयमालिनीतंत्रे ॥ अ
ल्पदोषाबहुगुणा मंत्राज्ञेयाविचक्षणैः साध्यादिकोष्टकंज्ञात्वा ततःसिद्धिः प्रजायते कुलार्णवे ॥ एकाक्षरेतथाकूटे त्रैपुरमंत्रनायके ॥ स्त्री
दत्तेस्वप्नलब्धेच सिद्धादीन्नैवशोधयेत् ॥ नृसिंहार्कवराहाणां प्रासादप्रणवस्यच सपिंडाक्षरमंत्राणां सिद्धादीन्नैवशोधयेत् ॥ सोमसिद्धांते
पाद्यत्र्यक्षरंमंत्रं त्रैपुरंचंडनायकं ॥ सौरंमृत्युंजयंसाक्षं शांभवंविनतात्मजं ॥ सौरमंत्राश्चयेपिस्युर्वैष्णवानारसिंहकाः ॥ सिद्धसाध्यसुसिद्धारि
विचारपरिवर्जिताः ॥ प्रणवंत्र्यक्षरंमाया व्योमव्याप्यंषडक्षरं ॥ मालामंत्रेषुसर्वेषु सिद्धादीन्नैवशोधयेत् ॥ तथारत्नसागरे ॥ हंसस्याष्टाक्ष
रस्यापितथापंचाक्षरस्यच ॥ एकद्वित्र्यादिबीजस्य सिद्धादीन्नैवशोधयेत् ॥ नृसिंहार्कवराहाणां कालिकासिद्धकालिका ॥ स्यामलाचतथा

चंडीसिद्धादिन्नैवशोधयेत् ॥ रुद्रयामले ॥ अघोरमंत्रदेवेशि मालामंत्रस्य पार्वति ॥ नपुंसकस्य मंत्रस्य सिद्धादिन्नैवशोधयेत् ॥ कुलमूलाव
तारे ॥ ॥ स्वप्नोपदिष्टमंत्रस्य नविधिर्नैवचक्रिया ॥ उद्दिष्टदेवतां ध्यात्वा जपेत्कुंभकं भवेत् ॥ अगस्त्यसंहितायां ॥ राममंत्रेषु सर्वेषु भृगु
श्रेष्ठमुनिपुंगवः ॥ तारकत्वान्मंत्रराजे सिद्धादिन्नैवशोधयेत् ॥ सिद्धांतशेखरे ॥ एकत्रिपंचसप्तार्णान वह्न्यक्षरान्विते ॥ द्वात्रिंशदक्षरे मंत्रे
सिद्धादीन्नैवशोधयेत् ॥ ये च बौद्धाश्च जैनाश्च गोपाला वैष्णवाश्च ये ॥ सिद्धसाध्यसुसिद्धारिविचारणीवर्जिताः ॥ व्योमव्यापीषडर्णश्च मा
नकाहरवल्लभा ॥ वऊरूपाह्वयो मंत्रः पंचसाधारणाः मताः ॥ ॥ अथ षट्पद्मचक्रं ॥ तत्र कुलमूला० ॥ षड्दलपद्ममालिख्य प्रागादिषु दलेषु च
अकादिवर्णानेकैकांल्लिखेत्त्रिः चेटकूटकान् ॥ स्वनामाद्यक्षरं यत्र तदारभ्य विचारयेत् ॥ इति ॥ अथैतच्चक्ररचनाप्रकारः ॥ तत्र षट्दलक
मलमालिख्य तद्दलेषु प्रागादिप्रादक्षिण्येन ऋॠऌॡक्षवर्जितान्मातृकावर्णानेकैकशः पुनः पुनः समालिख्य नामाद्यक्षरं यत्र दले ति
ष्ठति तत्प्रथमदलं परिकल्प्य तदारभ्य मंत्राद्यक्षरं यत्र तिष्ठति तद्दलपर्यंतं गणयित्वा तत्फलानि विचारयेत् ॥ ॥ तान्त्रिकसारसंग्रहे ॥ प्रथ
मे संपदुद्दिष्टा द्वितीये संपदंतकः ॥ तृतीये तु धृतिं विद्याच्चतुर्थे बंधुविग्रहः ॥ पंचमे संशयं विद्यात् षष्ठे सर्वविनाशनः ॥ ॥ अथ ऋणधन
चक्रं ॥ तत्र कुलमूलावतारे ॥ इंद्वक्षे नेत्ररविं पंचदशाब्धिवेदवस्वाशुधाष्टनवभिर्गुणितांश्च साध्यान् ॥ दिग्भूगिरिश्रुतिगजाग्निसुनीभवेद
षड्भूमिभिश्च गुणितानथ साधकार्णान् ॥ नामाक्षरादकठवाज्जभकशेषं ज्ञात्वोभयोरधिकशेषयुतं ऋणी स्यात् ॥ इति ॥ ॥ अस्यार्थः ॥ इं

18

राम
१८

न्द्र १४ ऋक्ष २७ नेत्र २ रवि १२ पंचदश १५ ऋतु ६ वेद ४ वह्नि ३ अष्टध ८ अष्ट ८ नव ९ दिक् १० भू १ गिरि ७ श्रुति ४ गज ८ अग्नि ३ मुनि ७ इषु ५ वेद ४ षट् ६ वह्नि ३ नामाङ्कादयमर्थः ॥ मंत्रवर्णान्साधकनामाक्षराणि च स्वरव्यंजनबिंदुविसर्गभेदैः पृथक्पृथक्कृत्वा वक्षमाणा कठवादिवर्गैकदाशोत्थांकेषु गृहृक्रमशस्तान्संयोज्य पृथक्पृथक्जातांकसमुदायं गजभक्तं शेषं अष्टभिराहृतोर्वरितं ज्ञात्वोभयोः साधकमंत्राक्षरयोः हृतावशिष्टांकयोर्मध्ये यत्रांकाधिक्यं स ऋणी स्यात् ॥ इति ॥ ॥ अथैतच्चक्ररचनाप्रकारः ॥ दक्षिणोत्तरायता सप्तरेखाः प्राक्प्रत्यगायता द्वादशरेखाश्च विलिख्य षट्षष्टिकोष्ठानि कृत्वा सर्वोपरिगतैकादशकोष्ठात्मकप्रथमपंक्तौ स्ववामादिदक्षिणान्ते प्रथमकोष्ठ १४ द्वितीये २७ तृतीये २ चतुर्थे १२ पंचमे १५ षष्ठे ६ सप्तमे ४ अष्टमे ३ नवमे ८ दशमे ८ एकादशे ९ ॥ इत्येकादश भेदानेकानलिख्य तदधो द्वितीयपंक्तौ स्ववामादिदक्षिणान्ते अ इ उ ऋ ॠ ए ऐ ओ औ अं अः ॥ इत्येकादशस्वरानेकादशकोष्ठेषु क्रमाल्लिखेत्तदधः पंक्तौ ककारादिटकारान्तानेकादशवर्णांस्तथैव समालिखेत्तदधः पंक्तौ ठकारादिफकारान्तानेकादशवर्णान्विलिख्य तथैव तदधः बादिहान्तान्विलिख्य तदधः पंक्तौ ११।१।७।४।८।३।७।५।४।६।३। इत्येकादशविधानंकानेकादशकोष्ठेषु लिखेदित्थं कठवचक्रं निर्माय विचारयेत् तत्र स्वेष्टमंत्रस्य वर्णान्स्वरव्यंजनबिंदुविसर्गान्पृथक्कृत्वा सर्वोपरिगतपंक्तिस्थांकेन यस्य वर्णस्य यो यो अंकः तं तं वर्णं तेन तेनांकेन गुणयित्वा सेजातसंख्यासमुदायमष्टभिराहृत्यावशिष्टमंकं पृथक्संख्याप्य शिष्यनामाक्षराणि च तथैव स्वरव्यंजनबिंदुविसर्गैः पृथक्कृत्वा सर्वा

धःपंक्तिस्थाकेषुयस्ययस्यवर्णस्ययोयोअंकःतंतंनेनतेनांकेनगणयित्वासंजातांकसमुदायमष्टभिराहृत्यावशिष्टमेकंप्रथकसंस्थाप्य
मंत्रसाधकयोरवशिष्टांगमध्येयोअंकस्त्वधिकसंख्याकःसऋणीतिविज्ञेय॥मंत्रश्चेदृणीनदाममंत्रोग्राह्यःयस्यमंत्रस्यसाधकोऋणीभ
वतिसमंत्रस्त्याज्यःइति॥ ॥इतिऋणशोधनप्रकारः॥तंत्रराजे॥कथंऋणित्वंमंत्राणांसाधकानांचवैवदः॥पूर्वजन्मकृतात्पापा
पादस्याफलाप्तिकृत्॥पापेनष्टेफलावाप्तिजायतेऽसंशयंनृणां॥मंत्रस्यप्राप्तिमात्रेणप्राक्तनःसिद्धयेभवेत्॥सिद्धमंत्रांकुरोलब्धमंत्रो
यःसिद्धिभाङ्नर॥लक्ष्मीमदादनाहत्यमंत्रंभोगमवाप्नवान्॥समंत्रस्यऋणीज्ञेयोभजनंतस्यपूर्वकं॥तस्मादृणविशुद्धस्ककार्यसर्वैस्तुसर्व
तः॥इतिमंत्रसाधकयोरन्योन्यंऋणित्वंधनित्वंच॥ऋणविशुद्धिस्कमंत्रयावत्संख्याकैःसाधकोऋणीभवतितावत्संख्यालक्षजपेनैवभवे
दितिसांप्रदायिकाः॥ ॥अथदीक्षांगभूतमंडपरचनार्थंप्राचीपरिज्ञानस्यावश्यकत्वात्तत्परिज्ञानप्रकारःप्रदर्श्यते॥तत्रदिव्यसारस्वततंत्रे
विमलेदिवसेहृक्षप्रासाद्यदिविवर्जिते॥स्थानेसमतलेलक्षोकृत्वाहंसपदंसुधी॥तदवष्टभतःकृत्वाःकुर्यात्द्वादशांगुलमानतः॥वृत्तं
नुपरितोभ्रांत्वातन्मध्येस्थापयेद्ध्रुव॥सूच्यग्रंसरलंसऊर्ध्वजुलंद्वादशांगुलं॥षडंगुलपरिणाहमलंशिल्पिवरेणतु॥रचितंयत्नतस्मिन्वृ
त्तेपूर्वापराह्णयाः॥शंकुग्रहायासेपान्तस्थानयोश्चिह्नयुग्मकं॥कृत्वाडंगुलपरीणाहमलंशिल्पिवरेणतु॥रचितंयत्नतस्मिन्वृत्तेपूर्वाप
राह्णयाः॥शंकुग्रहायासंपातस्थानयोश्चिह्नयुग्मकं॥कृत्वाविह्नद्वयंप्रापीसूत्रंप्राक्प्रत्यगात्मकं॥दत्वासूत्रंनायतार्द्धेनसूत्रेणाद्धाधिकेनच॥

19

राम
१९

पूर्वपश्चिमयोर्वृत्तद्वयं श्लिष्टं परस्परं ॥ विधाय वृत्तयोः संधिद्वयगामी प्रसारयेत् ॥ मध्यचिह्नस्पृष्टमध्यं तत्सूत्रं दक्षिणोत्तरं ॥ एतस्यार्थः शामा
नेन कृत्वा कोणेषु लाञ्छनं ॥ तेषु सूत्राष्टकन्यासाच्चतुरस्रं समं भवेत् ॥ ॥ अथैतद्रचनाकारः ॥ तत्र मेघाद्यनावृतसूर्यनिर्मलनभोमण्डले दि
वसे वृक्षप्रासादाद्यनावृते भूप्रदेशे समे स्थाने क्वचिच्चिह्नं कृत्वा तदवष्टंभतः ॥ प्रतिदिशं द्वादशाङ्गुलमानेन वृत्तं निष्पाद्य तत्र षडङ्गुलमान
परिणाहमूलमुत्तरोत्तरपरिणाहापचयेन सूचीमात्रीकृताग्रपरिणाहमृत्वाकृतिं द्वादशाङ्गुलोच्छ्रायोपेतं वृत्ताकारं शिल्पिवरेण निर्मि
तं शंकुं वृत्तमध्यस्थचिह्नमध्ये शंकुमूलपरिणाहमध्यं यथा भवति तथा संस्थाप्य तच्छंकुच्छायाग्रस्य पूर्वाह्णे तद्वृत्तरेखापश्चिमभागे यत्र यत्र
संपातः स तत्र चिह्नं कृत्वा अपराह्णेपि शंकुच्छायाग्रस्य तद्वृत्तरेखापूर्वभागे यत्र संपातो भवति तत्र चिह्नं विधाय तच्चिह्नद्वयप्रापि सूत्रं विधा
य पूर्वपश्चिमं परिकल्प्य तच्चिह्नद्वयावष्टंभेन तच्चिह्नान्तरालमानस्य चेष्टाधिकेनार्द्धमानेनान्योन्यसमेन किंचिदन्योन्यसंश्लिष्टं पूर्वापरं वृ
त्तद्वयं विधाय वृत्तरेखा दक्षिणोत्तरसंधिद्वयप्राप्तिप्राक्पश्चिमसूत्रमध्यगत्वा तिर्यग्रूपेणायतसूत्रं तद्दक्षिणोत्तरं परिकल्प्य पूर्वपश्चिमद
क्षिणोत्तरसूत्रद्वयाग्रचतुष्कसंपाताद्दृश्यमाणमानेन तुल्यरूपकल्पितसूत्राग्रैस्तेषां मण्डपकुण्डादीनां प्राक्प्रत्यग्दक्षिणोत्तरात्मक
दिक्चतुष्टयं परिकल्पयेदिति ॥ अत्र स्थूलदृष्ट्यानेन राजाद्युक्तप्रकारेण प्राचीसाधनविधिः प्रदर्शितः ॥ सूक्ष्मप्रकारस्तु सारसंग्रहे ॥ सु
समे भूतले कृत्वेत्यारभ्योक्तप्रकारेण पूर्वदिनकृत्यमुक्त्वा ॥ दिनान्तरेपि देवेशि प्राग्वच्चिह्नद्वयं सुधीः ॥ कृत्वा वृत्तं तु यत्र स्याच्छायायां याममेरं

श्वरि ॥ प्रवेशो निर्गमश्चैव तत्र पूर्वदिने यदा ॥ प्रविष्टा निर्गता छाया पदान्तमध्यनाडिका ॥ छायादिना तु विज्ञाय छायापगमचिह्नयोः ॥ अंतरं दिनयोरि-
ष्टे चतुराशैर्विभागकैः ॥ विभज्य तत्र चिह्नानि कृत्वा नाभिः कुलेश्वरि ॥ नाडीभिः कल्पिता भागा गणनीयाः प्रयत्नतः ॥ षष्ठ्या हृतं तु लब्धांशैः ॥ पूर्वे पूर्यत्क-
न्ते भवेत् ॥ प्राचीसूत्रं पूर्वभागे उत्तरे तूत्तरायणे ॥ अयने दक्षिणे चैव दक्षिणस्यां दिशि ध्रुवं ॥ चाल्यते चिह्नकं तस्मात् प्राची तु परमेश्वरी ॥ इ-
ति प्राचीसाधनं ॥ विधाय व्यासद्विगुणां रज्जुं तत्पाशौ कृत्वा कयेदिमां ॥ व्यासार्द्धमाने शंकद्वसार्द्धस्मिन्कर्षणाय च ॥ प्राच्यंतशंक्कोस्तत्पाशौ कृ-
त्वा चाकर्षकर्षणात् ॥ शंकुकेवाकर्णाग्रेव सूत्रस्य मस्यजांशकौ ॥ इति शिल्पशास्त्रोक्तरीत्या मंडपे क्षेत्रमुद्दिष्टमानादधिकविस्तारायामे सम-
चतुरस्रं कल्पयेत् ॥ अस्यार्थः ॥ कुंडमंडपादेर्व्यासो यावान्निर्दिष्टस्तद्विगुणां रज्जुमुभयतः पाशं कृत्वा तामेकतः ॥ पाशाद्व्यासार्द्धमात्रे शंकर्थ
चिह्नयेत् ॥ ततः शंकुकादग्रतो व्यासार्द्धमाने तच्चिह्नायकर्षणात् ॥ कुंडमंडपादौ प्राचीसूत्रं प्रमाणेन दत्वा तदंतयोः शंकुं निखन्य तयोस्तद्र-
ज्जुपाशौ तथा कुर्यात् यथा व्यासार्द्धीयंकोयतः कृतः स पाशः प्रतीच्यां स्यात् ततः वर्षचिह्नं दक्षिणत आकृष्य व्यासार्द्धचिह्ने दक्षिणश्रोणीशंकुं द-
त्वा तस्यैवमुत्तरदिक्कोणांवशंकुं दद्यात् । ततः पाशौ व्यत्यस्यैवमंशौ साधयितेति ॥ एवं समचतुरस्रक्षेत्रं कृत्वा वाऽमात्रमुद्दिष्टमानाभ्यधि-
कां चतुरस्रां उर्वां वाऽमात्र खननादिभिस्तेषां गारास्थिलोष्टादिकं निरस्य भुवं मृद्भिरापूर्य दृढीकृत्य कीलेनैकीकृत्य मूले पृथक्सूक्ष्मसमाग्रयोः
अग्रयोरग्नेककर्णेन्यसेतन्मध्यविहृत ॥ कीलादिना योजनीयो दंडः समतयाद्वयोः मूलदेशे लंबसूत्रमस्पृशन्नार्जवं ध्रुवं ॥ भूम्यग्रयुग्मे मध्याका

तिर्यङ्दंडगतात्पुनः ॥ एवलेनसूत्रयेदन्यान्निम्नयेह्यपियुक्तितः ॥ अकेयावत्सूत्रमेतिभूरेवंसमंताव्रजेत् ॥ अयमर्थः ॥ समस्थोल्पदीर्घरज्वोः की
मेनप्रोतमूलयोः ॥ दंडयोरग्रान्निकटेनाहस्ततिर्यग्दंडेनदृढदीर्घकीलेनयोजयित्वातन्मध्येचिह्नंकृत्वादंडत्रयेणदीर्घत्रिकोणाकारंविधायदी
र्घदंडयोर्मूलाल्लंबमानंसूत्रमग्रेलघुपाषाणादिबद्धंतिर्यग्दंडस्यमध्यचिह्नोपरिभूमिंयथानस्पृशतितथानिधायभूमिस्पृष्टाग्रयोस्तयोर्मूले
धत्वाशनैराकृष्टेतिर्यग्दंडमध्यांकाद्यत्रसूत्रंचलतितत्रनिम्नाभूस्तांपूरयेत् ॥ अन्यत्रखनित्वावायथामध्यचिह्नेसूत्रमेतितथासर्वत्रकुर्या
दितिशिल्पशास्त्रोक्तप्रकारेणभूमिंसमीकृत्यतत्रोत्तममध्यमकनिष्ठिकान्यतमंमंडपलक्षणमुक्तंसारसंग्रहे ॥ राज्ञांहोमाभिषेकेषुदीक्षास
नपनादिषु ॥ भानोर्गत्यादिशोज्ञात्वापुण्याहंवाचयेत्सुधीः ॥ ततःपंचनिनादेनमंडपंरचयेच्छुभम् ॥ ज्येष्ठमध्याधमत्वेनतन्मानंत्रिविधंम
तं ॥ षोडशाष्टादशाभिर्नैर्हस्तैर्मानमिहोत्तमं ॥ हस्तैर्विंशतिभिःकेचिन्मानमुत्तममूचिरे ॥ मध्यमंद्वादशाकरैश्चतुर्दशकरैर्मतं ॥ अधमंदशभि
र्हस्तैर्मितमाहुर्मनीषिणः ॥ केचित्तुनवभिस्तद्वत्सप्तभिर्वाथपंचभिः ॥ हस्तैर्मितंवदंत्येवंविस्तारायामसंयुतं ॥ स्तंभैःषोडशभिर्युक्तंचतुर्द्वारं
सुशोभनं ॥ दिक्षुद्वाराणिचत्वारिसाष्टांगुलकरद्वयात् ॥ साष्टांगुलंकरद्वंद्वाद्विदधीतकरद्वयात् ॥ ततोमंडपसूत्रंतुत्रिगुणांपरिकल्पयेत्
पूर्वादिषुक्रमात्तस्यमध्यभागस्थवेदिका ॥ इष्टकाभिर्मृदावासाकार्यादर्पणसन्निभा ॥ वेदिकोणेषुविन्यस्ताःस्तंभावेदस्वरूपकाः ॥ तेभ्योन
मेतदर्धोच्चामध्यमाधमयोःपुनः ॥ अष्टहस्तोन्नतिर्मतस्तनोद्वादशशोभना । ऊर्जवःपंचहस्तास्तेसमशिखास्तुसमंततः ॥ चतुःकोणेषुचत्वा

रथ्याष्टौ तेमूच्चकोटिषु ॥ समांतरालाः सर्वे तस्थाप्याषोडशदेशिकैः ॥ पंचमाशोभितांस्तास्तु निखनेद्वि देशिकः ॥ मध्यस्तंभचतुष्काद्यादेकी
भूनाग्रकं पुनः ॥ कृत्वाष्टकाचतुष्कांतु तदूर्ध्वे कलशं शुभं ॥ शोभितं कमलेनाथ पुरस्थे मणुद्वारजं ॥ निर्मितं शिल्पिभिः सम्यक स्थापयेद्देशि
कोत्तमः ॥ आछादयत्ततो वंशकटैकेरदलैश्च तं ॥ मंडपद्वारबाह्ये च युग्मं युग्मं दिशां क्रमात् ॥ अश्वत्थोदुंवरप्लक्षवटोत्थं तोरणं न्यसेत् ॥ स
प्तषट्पंच करकं निखनेद्विपूर्ववत् ॥ विशालता च तस्याथ दशभिस्त्वंगुलैर्मता ॥ पंचांगुलमितं स्थौल्यं विषमं चतुरस्रकं ॥ मध्यभागे तो
रणायोक्तिर्यक्काष्टं प्रविन्यसेत् ॥ सार्द्धहस्तद्वंद्वपादहस्तयुक्हस्तयुग्मतः ॥ अग्निमीलेति मंत्रेण विन्यसेत्पूर्वतोरणं ॥ इषेत्वेत्यादिमंत्रेण
दक्षिणं तोरणं न्यसेत् ॥ अग्न आग्नयेति मंत्रेण पश्चिमस्य निवेशनं ॥ सन्नोदेवीति मंत्रेण दद्यादुत्तरतोरणं ॥ मंत्रैस्तु लोकपालानां पताकावि
निवेशयेत् ॥ ऊर्द्धध्वजं च बध्नीयाद्घंटाचामरभूषितं ॥ पंचहस्तो ध्वजः प्रोक्तः पताका बाहुसंमिता ॥ दंडस्तु दशहस्तः स्यात्तत्तत्स्थानेषु ता
न्यसेत् ॥ द्वादशांगुलविस्तारास्तत्र सूर्याच लांछिताः पीतरक्तश्यामधूम्रश्वेतधूम्राक्षितार्जुनाः ॥ आयुधांकाः पताकास्तु पुष्पगंधस
मन्विता ॥ यथायोगं दंडयुतानां तत्तन्मंत्रेण तान्न्यसेत् ॥ चंद्रमंडलगौरेण वितानेन विभूषितं ॥ दुकूलवेष्टितं स्तंभं नानादीपाद्यलंकृतं ॥
आम्रपल्लवमालाभिः शोभितं द्वारमुत्तमं ॥ वेष्टितं दर्भरज्वा च दद्यान्मंडपं शुभमिति ॥ अथैतद्रचनाप्रकारः ॥ तत्र षोडशहस्तैरष्टादशहस्तै
र्वोत्तमो मंडपो द्विविधः ॥ विंशतिहस्तैरप्युत्तमर्विधः ॥ अत्र पक्षेन्तीयेयं यथावकाशं ऋत्विक्तदस्य सामयिकाद्युपदेशादिसौकर्यमुक्तं

मंडपं कुर्यात् ॥ हस्तस्तु चतुर्विंशांगुलदैर्घ्यः ॥ अंगुलिमानं तु महाकपिलपंचरात्रे ॥ वातायनपथं प्राप्य ये भांति रविरश्मयः ॥ नेषु सूक्ष्मा विसर्पन्तो रेणावस्त्रसरेणावः ॥ परमाणोरष्टगुणास्त्रसरेणुरुदाहृतः ॥ नेष्टौ केशाह्वयास्तेष्टौ लिक्षा यूकास्तदष्टकं ॥ तदष्टकं यवस्तेष्टावंगुलिः समुदाहृता ॥ मानन्तमांगुलिः सप्तयवास्ते वतु मध्यमाः ॥ षड्वा साधमा प्रोक्ता मानांगुलमितीरितं ॥ विन्यसेत्तिर्यगष्टाभिर्यवैर्मानांतरांगुलं ॥ शालिभिर्वाक्षतुन्यसेत्रिभिर्मानांतरं भवेत् ॥ आचार्यदक्षिणाकरे मध्यमांगुलिमध्यमं ॥ पर्वणोरंतरं दीर्घमात्रांगुलमुदाहृतं ॥ विनांगुष्टेन शेषाभिर्मुष्टिमंगुलिभिः कृतं ॥ चतुर्धा विभजेदेको भागो मुष्ट्यंगुलः स्मृतः ॥ यं कंचित्प्रतिरूपायामं विभज्य दशधा पुनः ॥ एकं द्वादशधा भागं कृत्वा तेष्वेकमंगुलं देहलब्धांगुलं नाम जानीयात्तस्य तत्त्वतः ॥ एभिश्चतुर्विंशतिभिर्हस्तः स्यादंगुलैः क्रमात् ॥ उच्छ्रायप्रतिमायाः स्यान्महामानांगुलाश्रयः ॥ महामानांगुलिरिति मात्रांगुलिरिहोच्यते ॥ प्रासादादिष्वतो नैव कुर्यान्मानान्तरेण वै ॥ वेदिकापीठशिविकारथादीनां विधिः ॥ पुनः मानान्तरांगुले नैव भवेन्मानेन केचित् ॥ योगोपकरणानां च कुर्यान्मानांगुलेन वै ॥ ॥ होमांगानि स्रुवादीनि कुंडमुष्ट्यंगुलाश्रयं ॥ देहलब्धांगुले नैव प्रतिमांगानि कल्पयेत् ॥ चतुर्विंशतिसंख्याभिर्हस्तस्त्वंगुलिभिर्भवेत् ॥ अत्र आवरणे आचारवेतोन्याचार्यो यजमानः ॥ यदुक्तं कुलाः स्वयमावरणे शिष्याणाचारे स्थापयेन्नपि ॥ व्याकरोति हि शास्त्रार्थौ आचार्यस्तेन कथ्यते ॥ एतावदुक्तं यन्मानं यजमानस्य तज्ज्ञ वेदितिसारसंग्रहवचनात् ॥ कर्त्तुर्दक्षिणहस्तेनेति शारदातिलकवचनाच्चेति इत्येवमुक्तप्रकारेण मानान्तरांगुलात्मकांगुलिभिः ॥ हस्तादिपरिकल्पप्रोक्त

मंडपादिकं कुर्यात्· तत्रप्रोक्तविधिनासमीकृते भूतले पंचवाद्यघोषपुरस्सरं ब्राह्मणैः स्वस्तिवाचयित्वा यथोदिष्टमानहस्तविस्तारं समचतु
रस्रं कोणचतुष्टयनिखातशंकुचतुष्टयलग्नरज्जुचतुष्टयं विधाय पूर्वापरायतं दक्षिणोत्तरायतं च मध्यसूत्रं दृढीकृत्य तत्सूत्रचतुरस्रक्षेत्रंप
नर्नवधाविभज्य परितः कोणचतुष्टये स्तंभचतुष्टयं दिक्चतुष्टयगतं पूर्वापरायतं दक्षिणोत्तरायतं चतुष्ककोणाष्टकगतस्तंभाष्टकमि
ति संभूय द्वादशस्तंभान्नातिस्थूलकृशान् अवक्रान् अव्रणानेकजातीयान् सुवृत्तान्स्वंचहस्तसप्तछायान् द्वादशस्तंभान् खातप्रविष्टस्वस्वपंच
मांशान्प्रमाणाबहिर्भूतस्वस्वस्यौच्च्यतृतीयांशास्थूलविनम्रोन्नतशिखायुक्तान्मध्यविभक्तचे कोणचतुष्टये स्तंभचतुष्टयं पूर्वस्तंभसजा
तीयं पूर्ववत्· किंचित्स्थूलमुन्नतममंडपे तन्मानस्यार्धमाने यद्वमन्यमंडपेष्टहस्तसमुन्नतं पूर्ववत्तशिखं पंचमांशेन प्रविष्टभूतलमिति सं
भूय षोडशस्तंभान्निखाये तेषामुपरि सजातीयानि क्रतून्यव्रणानि शिखाप्रवेशयोग्यवेधयुक्तकोटिद्वयवंति तिर्यक्काष्ठानि शिल्पिभिः ॥ प
रिकल्पितानि द्वादशस्तंभाग्रेषु मध्यस्तंभचतुष्टयाग्रेषु च चतुरस्राकारेणासमारोप्य मध्यस्तंभचतुष्टयशिखाग्रप्रविष्टमूलवेधयुक्तमेकी
कृताग्रचतुष्टयनिविष्टं शिल्पिवरनिर्मितं सजातीयकाष्ठभवकलशकमलाकृतिशोभितमूर्ध्वदिग्वकथद्वादशस्तंभशिखाग्रपोतमूलमध्य
स्तंभचतुष्टयाग्रस्थस्वाग्रमध्यात्तिर्यक्काष्ठचतुष्टयमध्यमगताग्रं कृत्वाकृतियथायोग्यादीर्घस्थौल्ययुतप्रसारितद्वादशकाष्ठयुतमन्यैरपि
काष्ठैर्यथायोग्यदृढीकृतं नारिकेलदलैर्वंशकटैर्वान्यस्थगाच्छादितं तैरेवनिःशेषाविहितं कोणचतुष्टयं चतुर्दिक्षूत्तममध्यमकनिष्ठप्रमाणं

गुलहस्तद्वयसचतुरंगुलहस्तद्वयंद्विहस्तद्वयंसचतुरंगुलहस्तद्वयद्विहस्तविस्तारयुतसमशाखंद्वारचतुष्टयोपेतंमंडपंविरच्यमंडपस्यपूर्वद्वा
राद्बहिर्हस्तमात्रंपरित्यज्याश्वत्थवृक्षेणोत्तममध्यमकनिष्ठेषुसप्तषड्पंचहस्तोच्छ्रितंदशांगुलविस्तृतंपंचांगुलस्थूलंविषमचतुरस्रंप्रमाणा
न्निस्किवितस्थूलनशिखंद्वारस्तोभयपार्श्वयोरुत्तममध्यकनिष्ठेषुसार्द्धहस्तद्वयसपादहस्तद्वयान्तरालंयथापूर्वंपंचमासेनप्रविष्टभूत
लंफलकद्वयंअग्निमीलेपुरोहितंयज्ञस्यदेवमृत्विजंहोतारंरत्नधातममितिमंत्रेणनिखायतत्तज्जातीयकाष्ठेनसमानविस्तारस्थूलंविषम
चतुरस्रंकोटिद्वयेपिशिखाप्रवेशयोग्यवेधयुतंतिर्यक्फलकंतुमारोप्यहर्म्यमालांचवध्नीयात्॥ एवंदक्षिणद्वारेप्लक्षतरुमयंतोरणम्
इषेत्वोर्जेत्वावायवस्थदेवोवःसविताप्रार्थयतुश्रेष्ठतमायकर्मणोइतिमंत्रेणन्यसेत्॥ ततःपश्चिमद्वारेउदुंबरमयंतोरणंप्राग्वन्निर्मितम्॥
अग्नआयाहिवीतयेगृणानोहव्यदातयेनिहोतासत्सिबर्हिषिइतिमंत्रेणन्यसेत्ततउत्तरद्वारेवटवृक्षमयंतोरणंप्राग्वन्निर्मितंशन्नोदेवीरभि
ष्टयआपोभवन्तुपीतयेशंयोरभिस्रवन्तुनःइतिमंत्रेणन्यसेत्॥ ॥अथवापूर्वद्वारेअश्वत्थमयंदक्षिणाऔदुंबरमयंपश्चिमेप्लक्षतरुज
मुत्तरेन्यग्रोधमितितोरणचतुष्टयमुक्तलक्षणविधिनैवस्थापयेत्॥ ततस्तेषामुपरिगततिर्यक्फलकेषुमध्यतःसुषिरंविधायतेषुतो
रणासजातीयकाष्ठेननिर्मितमुत्तममध्यमकनिष्ठेषुत्रयोदशैकादशनवांगुलमात्रदैर्घ्यंतत्रचतुर्थांशविस्तारंचशेषेत्रिशूलाकारंवैष्णवे।
तोरणोपरिगततीर्यक्फलकस्यद्वारशांशमात्रदीर्घंप्रागादिक्रमेणशंखचक्रगदापद्मलांछितंप्रतितोरणमेकैकंकीलमारोपयेत्॥ तत्र

शूलनिर्माणप्रकारस्तु पिंगलागमे ॥ शूलेनचिह्निताः कुर्याद्द्वारशाखास्तु मस्तके ॥ शेषाणां अंगुलावृद्धिर्विंशत्यांगुलवृद्धितः इति ॥ शूलेनवांगु
लंदैर्घ्यं तुरीयांशश्च विस्तृतिः ॥ अन्तुवै मध्यमशृंगं स्यात्किंचिद्वक्रं तु पार्श्वयोः ॥ हीने चैवं समाख्यातं अंगुलं रोपयेत्तथा । शेषाणां अंगुलावृद्धिर्विंशत्यां
गुलवृद्धितः इति ॥ हीने कनिष्ठमण्डपे ॥ शेषाणां मध्यमोत्तमानां विंशः प्रवेशः ॥ ॥ वास्तुशास्त्रे ॥ मस्तके द्वादशांशेन शंखचक्रगदांबुजम् ॥ प्रागा
दिक्रमयोगेन न्यसेत्तेषां स्वदारुजम् ॥ द्वादशांशं तीर्यकफलकस्य स्वदारुजे ॥ ततस्तोरणसजातीयकाष्ठसंभवे ॥ तेन कनिष्ठमंडपे चतुरंगु
लोच्चं मध्यमे सार्द्धचतुरंगुलमुत्तमे पंचांगुलमिति ॥ केचित्तु ॥ तत्र हस्तोन्मिताः कीलाः संस्थाप्या वेस्ववे तथा ॥ शंखचक्रगदापद्मैर्लांछिता
शूलसंनिभाः ॥ शैवे इति सारसंग्रहवचनात् ॥ हस्तमात्रं कीलवदंति तत्र तिर्यकफलकगतेषु हस्तमात्रेषु कीलेषु उक्तमानेनैवाग्रदेशे
षु शंखचक्राकारं वा त्रिशूलाकारं वा कार्यं विलप्रवेशश्च तत्रैव कार्यः ॥ उर्वरितं तु तेषां दण्डवदृश्यत इति ॥ ततो मंडपाग्रे दशहस्तदैर्घ्य
म् ॥ दशदण्डावलंबितं हस्तमात्रविस्तृतं पंचहस्तदैर्घ्यं दातव्यं तत्र देवतावाहनमूर्त्यंकितं घंटादिविभूषिताग्रं मध्ये तं तत्तद्देवतवर्णा
नुरूपवर्णं वा ध्वजमारोप्य दशदिक्षु वाहुमात्रदीर्घा यथायोग्यमानदण्डावलम्बितास्ततो लोकपालवर्णानुरूपवर्णास्ततल्लोकपाल
वाहनमूर्त्यंकिताः द्वादशांगुलविस्तृताः लोकपालानां वेदोक्तमंत्रेणापताकाश्च बध्नीयात् ॥ तत्रेंद्रस्य पीतवर्णा वह्नेः पिंगलवर्णा
यमस्य कृष्णवर्णा निर्ऋतेश्यामवर्णा ॥ वरुणस्य श्वेतवर्णा वायोधूम्रवर्णा कुवेरस्य सोमलवर्णा ईशानस्य सीतवर्णा ब्रह्मणो रक्तवर्णा अ

23

राम
२३

नन्तस्तम्भेन वर्णा इति पताकाभिरलंकृत्य मण्डपाभ्यंतरं स्थले न वितानपुष्पमालाभिरलंकृत्याम्राश्वत्थदलग्रंथितदर्भरज्जुरूपवन्दनमाल
या मंडपमंतर्बहिश्च परिवेष्ट्य संभानुकूलैः संवेष्टनमध्यस्तंभचतुष्टयमध्यगते चतुरस्रस्वरूपे मध्यखंडे अपक्वेष्टकाभिः स्निग्धमृद्भिर्वा
चतुरस्रां दर्पणोदरनिभपार्श्वचतुष्टयमध्यमप्रदेशां समनतलां वेष्ट्यायामस्यैकादशांशेन नवमांशेन सप्तमांशेन पंचमांशेन तृतीयांशेन वा
समुन्नतां वेदीं विदध्यात् ॥ यदुक्तं सारसंग्रहे ॥ उच्छ्रायोस्या ईशानवसप्रेष्वथवा त्रिभागकैः इति ॥ कपिलपंचरात्रेपि ॥ चतुर्थांशोच्छ्रितिस्तस्या
स्त्रिपंचसप्तमोपि वा ॥ नवैकादशभागैस्तामिष्टकाभिः प्रकल्पयेदिति ॥ तंत्रराजे ॥ विदध्यान्मध्यतो वेदीं करमात्रसमुन्नतामिति मंडपनिर्मा
णविधिः ॥ अत्र कनिष्ठमंडपे षड्दशहस्तमंडपेपि मध्यत्र्यंशाधिकत्रिक॥ रायतापदा वेदीकुंडयोरंतरालमुभयतः पदद्वयमात्रं तद्बहिरु
भयतः कंठमेखलासहितं कुंडद्वयव्यासभूमिश्चतुर्हस्तमिता तद्बहिः ॥ पार्श्वद्वयेपि कुंभस्थापनार्थं हस्तद्वयमिति समस्तमंडपभूमिर्व्याप्ता अ
तः परमाचार्यर्त्विक्सदस्याद्युपवेशनस्थानमपि न लभ्यत इति इति नायं पक्षः समीचीनः ॥ तस्मादयं पक्षेस्त्वेककुंडैकमेखलासंक्षेपविकी
र्णायामेतावतापि चारितार्थ्यान्नद्विषय इति ज्ञेयः ॥ इत्थं मंडपं विधाय तस्मिन्मंडपे पूर्वाद्यष्टदिक्षु चतुरस्रयोन्यर्धचंद्रत्रिकोणवृत्तषट्को(
णपद्माष्टास्रास्थान्यष्टौ कुंडानि कुर्यात् ॥ तत्रादौ चतुरस्रकुंडनिर्माणप्रकारमाह ॥ तंत्रराजे ॥ प्राक्प्रत्यक्सूत्रमास्फाल्य तन्मध्ये चिह्नकल्पनं
कृत्वा तत्पूर्वतः पश्चाद्द्वादशांगुलमानतः ॥ ततस्तद्वाराणालंब्य मध्यचिह्नस्यमानतः ॥ कुर्याद्विसमपदं कोष्ठान्यभिन्नस्नेषु पातयेत् ॥ परं प्रस्

स्त तत्रापि विदध्याच्चिह्नयुग्मकं ॥ प्राक्प्रत्यक्चिह्नमानेन तयोरेवावलंबनं ॥ दक्षिणोत्तरतो हंसपदे कृत्वा ततस्तयोः ॥ प्रसार्य सूत्रं तस्मा
धिमार्जयित्वोक्तमानतः ॥ चतुष्टयं तु सूत्राणां चतुरस्रं भवेत्सममिति ॥ तथैतत्कुंडरचनाप्रकार ॥ तत्र वेद्याः पूर्वभागे षडंगुलमानेन हस्त
मात्रां ध्रुवं परित्यज्य प्राक्कल्पितदिक्क्रमेण प्राक्प्रत्यगायतं सूत्रयास्फाल्य तन्मध्ये चिह्नं कृत्वा तच्चिह्नात्पूर्वतः ॥ पश्चिमतश्चतुर्षडंगुल
द्वादशांगुलमानेन विंदुं कृत्वा तत्तदवधिकाष्ठं मार्जयित्वा तच्चिह्नद्वयावष्टंभनतः सूत्रार्द्धात्किंचिदधिकमानभ्रमेण पूर्वापरतः किंचिदन्योन्यसं
श्लिष्टंह्नद्वयं विधाय तयो दक्षिणोत्तरसंदंशरूपहंसपदद्वयप्राप्तिप्राक्प्रत्यक्त्रलसूत्रमध्यगतहंसपदसंभेदे दक्षिणोत्तरं सूत्रमास्फा
ल्य तत्रापि मध्यचिह्नाद्वादशांगुलमानेन दक्षिणोत्तरचिह्नद्वयं विधाय तत्तदवधिकाष्ठं मार्जयित्वा तत्सूत्राग्रचतुष्टयावलंबनेन द्वादशांगु
लमानेन चतुर्षु कोणेषु अपि हंसपदं विधाय तत्तदग्राद्धंसपदप्राप्तिप्राक्प्रत्यक्सूत्रद्वये दक्षिणोत्तरसूत्रद्वये च संभूय सूत्रचतुष्टयमा
स्फाल्य चतुरस्रं कुर्यात् ॥ ततस्तत्प्राक्प्रत्यगायतत्रलसूत्रमानेन चतुरस्रं तत्रखाततत्क्रमात्तत्परितः कुंडमानस्य चतुर्विंशांशमितां ध्रुवं प
रित्यज्य तद्वहिर्द्वादशांगुलविस्तारां चतुरंगुलोत्सेधां मेखलां कृत्वा तदुपरि वाह्यपरितः ॥ चतुरंगुलमानं त्यक्त्वाष्टांगुलविस्तारां चतुरंगुलोन्नतां
द्वितीयां मेखलां कृत्वा तदुपरि वाह्ये चतुरंगुलं त्यक्त्वा विस्तारोत्सेधाभ्यां चतुरंगुलमितां तृतीयां मेखलां कुर्यात् ॥ एवं कृते प्रथममेखला
द्वादशांगुलोन्नता चतुरंगुलविस्तृता द्वितीया मेखलाष्टांगुलोन्नता चतुरंगुलविस्तृता तृतीया चतुरंगुलोन्नता चतुरंगुलविस्तृता च भवे

नीति ॥ अत्र केचित् ॥ प्रथमाद्यंगुलायामा हस्तनासानवांगुलैः ॥ मध्या तु त्र्यंगुला वा स्यात्तृतीया तु यमांगुले ॥ इति लक्षणासंग्रहवचनात् ॥ ना
भियोनिसमायुक्तं कुंडं श्रेष्ठं त्रिमेखलं ॥ कुंडे द्विमेखलं मध्यं नीचस्यादेकमेखलं ॥ प्रधानमेखलोत्सेधयुक्तमंत्र नवांगुलं ॥ तदर्द्धं मेखलो
त्सेधमंगुलं द्वितयं क्रमात् ॥ चतुस्त्र्यंगुलो व्यासो मेखलात्रितयस्य त्विति ॥ क्रियासारवचनाच्च ॥ प्रथमा मेखला चतुरंगुलविस्तृता नवांगु
लोन्नता द्वितीया तु त्र्यंगुलविस्तृता पंचांगुलोन्नता तृतीया तु द्व्यंगुलविस्तृता द्व्यंगुलोन्नतेति मेखलामानमाहुः ॥ एतन्मेखलया सह हस्तमा
त्रखातपक्षे ज्ञेयं ॥ तत्र पंचदशांगुलनिम्नखातस्यैव विश्वकर्मणोक्तत्वात् ॥ तदर्द्धे नवांगुलोच्छ्रायस्यैवावश्यकत्वादिति हस्तमात्रखातप
क्षे तु सर्वेषां मेखलामानं वितस्त्यष्टतदर्द्धकैः ॥ विस्तारोत्सेधयोः कुर्यादिति तत्त्वराजवचनात् ॥ सत्वपूर्विकगणान्विता-क्रमाद्द्वादशाष्टचतु
रंगुलोच्छ्रिता ॥ सर्वतोंगुलचतुष्कविस्तृता मेखलाः सकलसिद्धिदा नता इति प्रपंचसारवचनाच्च ॥ पूर्वोक्तपक्षस्यैव समीचीन इति ॥ तत्र:
सर्वबाह्यस्य मेखलायां बहिश्चतुरंगुलायामविस्तारमेकांगुलोत्सेधं चतुरस्रं पीठं मृदा कृत्वा तदुपरि निहितमूलद्वादशांगुलदीर्घोन्नतरो
न्तरहीनपरिणाह मध्ये मेखलासंलग्नसरंध्रनालयुतां मूले कुंभद्वययुक्तां मध्ये सगर्त्तामुपरितनमेखलोपरिगतामष्टांगुलमानविस्ता
रमूलान्तप्रदेशा उभयपार्श्वतः ॥ क्रमेणासंकुचितामेकांगुलविस्ताराग्रां द्वादशांगुलमानायामामेकांगुलोत्सेधमेखलायुक्तामश्वत्थपत्राका
रां मूलात्किंचित्क्रमान्निम्नामीषत्कुंडप्रविष्टाग्रां योनिं कुर्यात् ॥ अथ कुंडमेउपमध्यस्य हंसपदावलंबनेन प्रतिदिशं चतुरंगुलमानेन नम्रत्वनि

ष्यायतनद्बहिः ॥ पुनः षडंगुलमानेन चतुरस्रं कृत्वा तत्र वृत्तं कर्णिकां परिकल्प्य वृत्तद्वयांतरालवीथ्यामष्टदलानि कृत्वा षडंगुलोच्चं नाभिं कुर्या
दिति चतुरस्रकुंडनिर्माणविधि ॥ ॥ सुंदराचार्यशिष्येण श्रीनिवासेन धीमता ॥ चंद्रिकायां प्रणीतायां प्रकाशोद्वितीयक ॥ ॥ इति
श्रीसुंदराचार्यचरणारविंदद्वंद्वानेवासिनाः श्रीश्रीनिवासभट्टेन विरचितायां श्रीशिवार्चनचंद्रिकायां द्वितीयः प्रकाश ॥ २ ॥ ॥ अथ
योनिकुंडमाह ॥ तंत्रराजे ॥ ॥ तन्मध्यपंचमांशेन विकाशप्रसमसूत्रकं ॥ पूर्वतः पश्चिमद्वंद्वकोष्टयोर्मध्यदेशतः ॥ तत्कोणमानेन
तथा भ्रामयेत्पश्चिमाग्रकात् ॥ उत्तराग्रावधि तथा दक्षिणाग्रावधि प्रिये ॥ तन्मध्यात्तिर्यक्सूत्राग्रद्वयावष्टंभतस्तथा ॥ विकाशितप्रसमसूत्रा
वधि सूत्रद्वयं भवेत् ॥ योनिकुंडमिति ॥ अथैतद्रचनाप्रकारः ॥ तत्र प्राग्वच्चतुरस्रं निर्माय चतुःकोष्टगतस्य तस्य प्रसमसूत्रं तन्मानपंचमां
शेन पूर्वस्यां दिशि वर्धयित्वा तत्कोष्टचतुष्टयात्मकचतुरस्रस्य पश्चिमभागस्थदक्षिणोत्तरकोष्टयोर्नैरृत्याद्याशांतमाग्नेयादिवायव्यांतं च को
णसूत्रद्वयास्फालनेन लक्षितसूत्रद्वयसंपातविदितमध्यदेशावष्टंभतस्तत्कोणावधिमानेनोत्तरकोष्टे प्राक्प्रत्यक्प्रसमसूत्रपश्चिमाग्रादि
दक्षिणोत्तरतिर्यक्सूत्रोत्तराग्रावधि तद्दक्षिणकोष्टेन तत्सूत्रपश्चिमाग्रादितिर्यक्सूत्रदक्षिणाग्रावधि भ्रामयेदेवं द्वयमुत्पाद्य तन्मध्यात्तिर्यक्
सूत्राग्रद्वयमारभ्य प्राक्प्रसारितप्रसमसूत्रावधिसूत्रद्वयास्फालनेन योन्याकारं क्षेत्रं परिकल्प्य तद्बहिश्च कंठमेखलयोर्यथोक्तमानेनोक्त
युक्त्या योनिमंडलद्वयं निष्पाद्य प्राग्वत्खातं कृत्वा योन्याकारमेव कंठमेखलादि कल्पयेत् ॥ इति ॥ कुंडानां यादृशं रूपं मेखलानां च तादृशं

कुर्यात्सर्वेषु कुंडेष्विति कुलप्रकाशवचनात् ॥ ॥ अर्द्धचन्द्राकारं कुंडमाह ॥ तत्रैव ॥ तन्मध्यदशमासेन्तु परित्यज्याथ दूर्ध्वतः ॥ शेषांशांशकमा
नेन तन्मध्याद्भ्रमयेत्तथा ॥ अर्द्धचंद्राकृतिर्येन भवेत्कुंडं तदीश्वरीति ॥ अथैतत्कुंडरचनाप्रकार ॥ तच्च प्राग्वच्चतुरस्रं विधाय तद्विष्कंभमानं
दशधा विभज्य तेष्वेकैकांशं प्राक्पश्चिमयोः परित्यज्य विहूद्वयं विधाय तत्पश्चिमचिह्नाद्दक्षिणाग्रोत्तरायतं तिर्यक्सूत्रं तच्चतुरस्राद्बहिरप्यंश
त्रयावधिक मासकाल्प तदग्रद्वयावधि तत्कल्पितपश्चिमत्र्यस्रसूत्रसंधिमध्यावलंबनेन प्राक्कल्पितचिह्नाद्दशांशमानेन भ्रमाद्र्द्धचंद्राका
रं कुंडं भवेदिति ॥ एवं मर्द्धचंद्राकारं मंडलं निर्माय तद्बहिरष्टकृत्युक्त्या एकांगुलमानेन द्वादशांगुलमानेन चार्द्धचंद्रनिभं मंडलद्वयं कृत्वा
प्रथमकृतमंडलमध्ये हस्तमात्रं निम्नखातं कृत्वा बहिः कंठस्थानं परित्यज्य प्राग्वन्मेखलादिकं कुर्यादिति ॥ अथ त्रिकोणकुंडमाह ॥ तत्रैव
तस्यैव षष्ठमांसं तु पार्श्वयोस्तु विकारायेत् ॥ प्रत्येकं पश्चिमसूत्रं तन्मानेनाथ सूत्रयोः ॥ विन्यासात्कुलसूत्राग्रद्वयाग्रावधिलंबनात् ॥ कुंडं त्रि
कोणमुदितमिति ॥ अथैतत्कुंडरचनाप्रकार ॥ तच्च प्राग्वच्चतुरस्रं कृत्वा तत्कुलसूत्रस्य प्रागग्रं बहिर्गत्वा प्रसार्य तच्चतुरस्रविष्कंभमानं षोढाविभ
ज्य तेष्वेकैकांशमानेन पश्चिमतिर्यक्सूत्राग्रद्वयपार्श्वद्वयेपि बहिः प्रसार्य तदग्रद्वयात्तत्सूत्रमानोपेतसूत्रद्वयस्य प्राक्प्रसारितकुलसूत्रस्य च यत्र
संपातस्तदवधास्फाल्य त्रिकोणकुंडं परिकल्प्य तद्बहिरेकांशमानेन तद्बहिर्द्वादशांशमानेन चोक्तयुक्त्या त्रिकोणद्वयं निष्पाद्य खातकंठमेखला
दि प्राग्वत्कल्पयेदिति ॥ अथ वृत्तकुंडमाह ॥ तत्रैव ॥ तन्मध्यादष्टादशांशेन प्राक्सूत्राग्रं प्रकल्पयेत् ॥ तिर्यक्सूत्राद्बहिस्तेन मानेन भ्रमयेत्तथा ॥ म

शि॰ व
२६

ध्यचिह्नावलंबेनाभवेत्तद्वृत्तकुंडकमिति॥ अथैतत्कुंडरचनाप्रकार॥ तत्र प्राग्वच्चतुरस्रं साधयित्वा तन्मध्यविष्कंभमानमष्टादशधा विभज्य तेष्वे
कांसमानन तच्चतुरस्राद्बहिस्त्र्यस्रसूत्रस्य प्रागग्रं विस्तार्य मध्यचिह्नमवलंब्य विस्तारितेन त्र्यस्रसूत्राग्रमानेन परितो भ्रमणाद्वृत्तं निष्पाद्य तद्बहिः पु
नश्चतुरस्रस्य चतुर्विंसमानेन केणार्थं वृत्तं कृत्वा तद्बहिः पुनर्द्वादशांगुलमानेन वृत्तांतरं निष्पाद्य प्रथमकृतवृत्तमध्ये हस्तमात्रं निम्नं खात्वा तं कृ
त्वा कंठवृत्ताद्बहिः द्वादशांगुलांतरालवीथ्यां प्राग्वन्मेखलात्रयं योन्यादिकं च रचयेत्॥ अत्र वृत्तकुंडे योनिर्नास्तीति केचित्॥ योनिकुंडे योनिः
पद्मकुंडे नाभिश्च नास्तीतांत्रिकसिद्धांत॥ अथ षडस्रकुंडमाह तत्रैव॥ तन्मध्ये षोडशांशेन विकाश्य त्र्यस्रसूत्रकं॥ तेन मानेन च तथा कृत्वा सूत्र
मतिस्फुटं॥ तद्वृत्ते वृत्तमध्यस्य कुर्याद्दर्घेन लांछनं॥ तत्र षट्सूत्रपातेन भवेत् कुंडं षडस्रकमिति॥ अथैतत्कुंडरचनाप्रकार॥ तत्र प्राग्वच्चतु
रस्रं विधाय तन्मध्यमानं षोडशधा विभज्य तेष्वेकांशमानेन त्र्यस्रसूत्रस्य प्रागग्रं विकाश्य तन्मानेन चतुरस्रमध्यस्थं हंसपदमध्यावलंब
नेन भ्रमाद्वृत्तं निष्पाद्य तद्वृत्तमध्यविष्कंभमानार्द्धेन तन्मध्यात्तिर्यक्सूत्रदक्षिणाग्रादि परितो वृत्ते चिह्नषट्कं विधाय तत्र विस्फाल्लिहृत्याद्
यं सूत्रषट्कमास्फाल्य तत्तद्वापरूपं सततं षडमार्जनेन षट्कोणां कुंडक्षेत्रं निष्पाद्य तद्बहिरेकांशतो द्वादशांशतश्चोक्तप्रत्यापषट्कोणाद्व
यं निष्पाद्य खातादीनि प्राग्वत्कल्पयेदिति॥ अथ पद्मकुंडमाह॥ लक्षणासंग्रहे॥ चतुरस्रीकृते क्षेत्रे विभजेदष्टधां विके॥ अष्टमांशप्रमाणेन
कर्कटेनतु मध्यत॥ वर्तुलं भ्रमयेत्तेयं कर्णिके केसरात्मत॥ अष्टमांशद्वये नैव मध्यतो वर्तुलं भवेत॥ तृतीयेनाष्टमांशेन पत्राग्राणां मध्यभू

26

राम
२६

र्मता ॥ चतुर्थेनांगुभूक्षेत्रं व्यासतुल्येन वभ्रमात् ॥ चतुर्विंशतिधा भक्ता वृत्तसूत्रे वरानने ॥ तस्यैकं भागमादाय भक्ता षोडशधा पुनः पं
चभिः षोडशैर्भाभैर्न्यूनं यं च समष्टमं ॥ भागमादाय तद्बाह्ये पंचमं मंडलं शिवे ॥ मध्यतो भ्रामयेत्सर्वैः पद्माणामग्रभूर्मता ॥ शास्त्रोक्तविधि
नादेवि ततः पद्मं समालिखेत् ॥ बाह्यवृत्तांतरालं यत्तन्मानं केसराग्रतः ॥ तन्मानं कर्कटं कृत्वा केसराग्रे विधाय वै ॥ गुरूपदिष्टमार्गेण
षोडशार्द्धनिशाकरान् ॥ लिखित्वा कृतहस्तेन पत्राग्राणि समालिखेत् ॥ कर्णिकाव्यासमानेन परित्यज्य तदुच्चतां ॥ निषनेदवशिष्टं तु
केशराणां च मंडलं ॥ खनेदंतस्तदाकारं कुर्वन्पत्रत्रयं खनेत् ॥ पत्राकारं यथा सम्यग्जायते परमेश्वरी ॥ पद्मकुंडमिति प्रोक्तमिति ॥ अथै
तत्कुंडरचनाप्रकार ॥ तत्र प्राग्वच्चतुरस्रीकृतक्षेत्रमष्टधा विभज्य तन्मध्यबिंद्ववलंबनेन परितश्चैकांशमानेन कर्णिकार्थवृत्तं निष्पाद्य
तद्बहिरपि सार्धपंचयवाधिकद्व्यंगुलमानेन चतुरस्रक्षेत्राद्बहिर्वृत्तमेकं भ्रामयेदिति ॥ वृत्तपंचकं कृत्वा द्वितीयवृत्तपंचमवृत्तयो
रंतरालमानकर्कटेन केसरवृत्ताग्रात्सर्वबाह्यवृत्तस्पृष्टशृंगद्वयात्मकान् षोडशार्द्धचंद्रान्निष्पाद्य साग्राण्यष्टदलानि कृत्वा तन्मध्ये कर्णि
कावृत्तं विहाय केसराणि कर्णिकां परितः प्रकाशयन् केसरवृत्तं दलमध्यवृत्तं च सम्यक् खनित्वा चतुर्थपंचमवृत्तयोर्दलानि साग्राणि
यथा भवंति चतुरस्रकुंडस्य विस्तारायामखातसमानक्षेत्रफलं तत्क्षेत्रफलं च यथा भवति तथा गुरुक्रमज्ञतया खननं विधाय बहिः प
प्राकारेणौष्ठकंठमेखलादिकं कुर्यादिति ॥ अथाष्टास्रकुंडमाह ॥ तंत्रराजे ॥ तन्मध्यस्य चतुर्विंशमानेन बाह्येपि च पूर्ववत् ॥ विधाय चतुर

स्वंतुपूर्वकोणार्द्धमानत॥ कोणादभितोवास्यकृत्वाचिह्नानिचाष्टवै॥ तेषुचिह्नेषुकृत्वाष्टसूत्राणिपरितःशिवे॥ ऊर्ध्वदृष्टास्यकुंडमिति॥ अथै
तत्कुंडरचनाप्रकार॥ तत्रप्राग्वच्चतुरस्रंविधायतन्मध्यसूत्रमानेनचतुर्विंशतिधाविभज्यतेष्वेकैकमानंतद्बहिःप्रतिदिशंप्रसारितसूत्राग्रे
पूर्ववच्चतुरस्रंप्रोक्तक्रमेणविधायतत्रपूर्वचतुरस्रकोणसूत्रस्यार्द्धमानेनवाह्यचतुरकोणाच्चतुष्टयप्यत्वासावष्टंभाउभयतःप्रति
रेखंचिह्नद्वयंस्यात्क्रमात्तंभूयाष्टचिह्नानिकृत्वातच्चिह्नंप्राग्वत्सूत्राष्टकमास्फाल्यतद्बहिर्गतकोण·मार्जनादष्टास्यकुंडंभवति॥ इत्थम
ष्टास्यकुंडक्षेत्रेपरिकल्प्यखातकंठमेखलादिकंयथावत्कुर्यादितिदीक्षायामष्टौकुंडानिकार्याणि॥ अथप्रसंगसंगत्याकाम्यहोमार्थंचपं
चास्यसप्तास्यकुंडयोरपिलक्षणमुच्यते॥ तत्रादौपंचास्यकुंडमाह॥ तत्रैव॥ तन्मध्यसप्तमांशेनब्रह्मसूत्रंविकाश्यततः॥ मानेनपरितो
भ्रांत्याकृत्वावृत्तंयथाततः॥ तच्चांशमानात्तद्वृत्तेकृत्वाचिह्नानितत्रवै॥ पातयेत्पंचसूत्राणितस्मात्पंचास्यकुंडकमिति॥ अथैतत्कुंडनि
र्माणप्रकार॥ तत्रप्राग्वच्चतुरस्रंकृत्वातन्मध्यमानस्यसप्तमांशेनब्रह्मसूत्रस्यप्रागग्रंबहिर्विकाश्यतन्मानेनचतुरस्रमध्यस्थहंसपदा
वलंबनेनभ्रमाद्वृत्तंनिष्पाद्यतच्चतुरस्रमध्येसूत्रंचतुर्धाकृत्वातेषांशत्रयेणतद्वृत्तेब्रह्मसूत्रप्रागग्रादिपरितःपंचचिह्नानिविधायतत्र
चिह्नाद्विक्रमपारूपाणिपंचसूत्राण्यास्फाल्यतत्पार्श्वायवृत्तखंडमार्जनात्पंचास्यंकुंडंभवतिइत्थंपंचास्यकुंडक्षेत्रंपरिकल्प्यतद्बहिरपिप्रोक्तयु
क्त्याकंठमेखलार्थंपंचास्यद्वयंपरिकल्प्यखातादिकंप्राग्वत्कुर्यादिति॥ अथसप्तास्यकुंडमाहतत्रैव॥ तन्मध्यदशमांशेनविकाश्यब्रह्मसू

27

राम
२७

त्रकं ॥ तेन मानेन संभ्राम्या कृत्वा वृत्तं यथा तत ॥ तच्चतुःषष्टिभागेषु त्रयस्त्रिंशांशमानतः ॥ वृत्ते विधाय चिह्नानि सप्तसूत्राणि पातयेत् ॥
तत्सप्तास्रकुंडमिति ॥ ॥ अथ तत्कुंडनिर्माणप्रकारः ॥ तत्र प्राक् तत्समचतुरस्रं कृत्वा तन्मध्यमानं दशधा विभज्य तेष्वेकांशमानेन ब्रह्मसू
त्रं बहिर्विकाश्य तन्मानेन तच्चतुरस्रमध्येस्थहंसपदमवष्टभ्य वृत्तं कृत्वा तच्चतुरस्रमध्यसूत्रप्रमाणां चतुःषष्टिधा विभज्य तेषु त्रयस्त्रिं
शदंशमानेन ब्रह्मसूत्रप्राग्रादारभ्य वृत्ते सप्त चिह्नानि कृत्वा चिह्नाच्चिह्नं कुन्तारूपेण सप्तसूत्राणि पास्फाल्य तत्तच्चापरूपवृत्तं रखेदुमार्जनादे
तत्सप्तास्रकुंडं भवेदिति ॥ दशविधकुंडनिर्माणप्रकारः ॥ अत्र दीक्षायां महोके कुंडानि प्रागाद्यष्टदिक्षु नवममाचार्यकुंडं चतुरस्रमेवेंद्रे
शानयोर्मध्ये कुर्यादिति संभूय नवकुंडानि कार्याणि ॥ अष्टकुंडकरणाशक्तौ प्रागादिचतुर्दिक्षु चतुरस्रार्धचंद्रवृत्तपद्माख्यानि चत्वार्येव कुं
डानि कुर्यात् ॥ तत्राप्यशक्तावैंद्रेशानयोर्मध्ये चतुरस्रमाचार्यकुंडमेव कुर्यादिति ॥ अथैतेषां कुंडानां काम्यहोमेषु कुंडभेदेन फलभेदः ॥ त
त्र कुलप्रकाशतंत्रे ॥ चतुरस्रे स्तंभनं स्यात्सर्वसिद्धिकरं च तत् ॥ भोगाः पुत्राः योनिकुंडे अर्धचंद्रे शुभावहम् ॥ मारणे केचिदिच्छंति त्रिकोणं द्वेष
कारके रिपुघातकरं केचिद्वृत्तं शांतिकरं जगुः ॥ षट्कोणमुच्चाटयति छेदेषु च विशिष्यते ॥ वृष्टिदं पुष्टिदं चापि पद्मकुंडं विदुर्बुधाः ॥ अष्टकोणं
तु मुक्तौ स्याद्रोगे पीतिके च नः ॥ पंचकोणं चाभिचारशमने भूतकृंतने ॥ सप्तास्रमेवं विज्ञाय काम्यकर्माणि भावयेत् ॥ ॥ अथ वर्णभेदेन
कुंडभेदः ॥ कुलमूलावतारे ॥ वर्णानामादितः कुंडान्युक्तानि क्रमतः शिवे ॥ चतुरस्रं वृत्तमर्धचंद्रत्र्यस्रमिति क्रमात् ॥ सर्वेषां चतुरस्रं वादी

शि॰च
२८

क्षायासन्नमंशिवे॥ अथकुंडस्वरूपंतद्वासनाचप्रथमतंत्रे॥ परंशारीरंप्रकृतेःकुंडरूपंपरःशिव॥ याम्येसौम्येकरोकुंडमदंवंपश्चिमेतथा
योनिचरत्रोग्रोक्तोसर्वतंत्रेषुशांभवीति॥ अथहोमसंख्यादिभेदेनकुंडमानभेदः॥ तत्रलक्षसागरे॥ पंचाशात्समितेहोमेकुंडरत्निमितंभ
वेत॥ अरत्निमात्रंतुशतेसहस्रमितिहोमके॥ चतुर्विंशांगुलाढ्यंद्विहस्तमयुतेमतं॥ चतुर्हस्तमितेलक्षेषट्करंदशलक्षके॥ कोटिहो
मेचाष्टहस्तंकुंडंकुर्यान्महेश्वरि॥ प्रकारान्तरंचतत्रैव॥ एकलक्षंसमारभ्ययावत्स्याद्दशलक्षकं॥ तथैवहस्तमारभ्यदशहस्तंविवर्द्धयेत्
कोट्यादशकरंकुंडंप्रशस्तंपरमेश्वरीति॥ एतत्सर्वमप्यकेवलघृतहोमेधिनिज्ञयं॥ तत्रापिविस्तरस्यप्रयोजनाभावादिति॥ अथैतेषां
द्विहस्तादिकुंडविशेषाणांमानांगुलक्षेत्रफलानिच॥ लक्षणसंग्रहे॥ फलांगुलानियावंतिहस्तक्षेत्रेभवंतिहि॥ द्विहस्तस्यतुकुंडस्य
ततोद्वैगुण्यमिष्यते॥ हस्तक्षेत्रांगुलान्यत्रषट्सप्तत्यातथैवच॥ शतानिपंचविद्यन्तेतन्मूलंमध्यसूत्रकं॥ चतुर्विंशांगुलानिविदध्याद्वि
करेषुतः॥ अंगुलानिद्विपंचाशदेकादशशतानिच॥ तद्वीजमध्यतोलिक्षाचतुष्कंचार्द्धसंयुतं॥ चतस्रश्चतथायूकायवाःसप्ततथैवच॥ अं
गुलानित्रयस्त्रिंशन्मानंस्त्रेतुमध्यमे॥ सप्तदशशतान्यष्टाविंशतिस्त्वंगुलानिच॥ क्षेत्रस्यतुत्रिहस्तस्यमानमेवमुदीरितं॥ तन्मूलमंगुला
न्यकचतुर्विंशञ्चतुर्यवा॥ यूकाचतुष्टयंकिंचिन्न्यूनंलिक्षाचतुष्टयं॥ चतुरंगुलषट्कानित्रयोविंशच्छतानिच॥ चतुर्हस्तस्यकुंडस्यमानमेवमु
दीरितं॥ मूलंतस्यांगुलान्यष्टचत्वारिंशन्मितंभवेत्॥ त्र्यस्रसूत्रंततःपंचहस्तेक्षेत्रांगुलानितु॥ द्विसहस्रंशतान्यष्टचशीतिबीजमुच्यते॥ षट्पंचा

28

रम
२८

शदंगुलानि चतुस्त्रिंशछतानि च ॥ तन्मूलमष्टपंचाशदंगुलानि षषयवा ॥ किंचिज्ज्ञागाधिकं यूकाद्वये सप्तकरस्य च ॥ वेदसंख्यसहस्राणि
साष्टानि षट्शतानि च ॥ अगुलानि तथा सप्तषष्टिसप्तयवागुनः ॥ किंचिदूनं मूलमस्य नवहस्ते तु दृश्यते ॥ शतानि त्वेकपंचाशच्चतुर्भिर
धिकानि च ॥ अशीतिरंगुलान्यत्र क्षेत्रमानमिदं भवेत ॥ द्वासप्ततीरंगुलानि मूलमस्य प्रकीर्त्तितः ॥ पंचागुलानि क्षेत्रस्य दशहस्तमितस्य च
सहस्राणि षुसंख्यानि षुनिरख्याशतानि च ॥ षष्टिश्च कथितान्यस्य तन्मूलं ब्रह्मसूत्रकं ॥ वर्धमं च सप्तत्याधिकैः सप्तयवैस्तथा ॥ अल्पाधिका
भांलिशाभ्यासः क्रमेव प्रकल्पयेत ॥ द्विहस्तादिकुंडनिर्माणे ॥ तत्र बौधायनमतः ॥ चतुर्हस्तस्य क्षेत्रस्य करणीसूत्रं तु यत्स्थितं ॥ तावन्मितं ब्रह्म
सूत्रं यत्र स्याद्विकरादिषु ॥ अतियत्नं समास्थाय कुंडमारचयेत्सुधीः ॥ द्विहस्तादिमितानां च निर्माण दुर्घटं शिवे इति ॥ अतियत्नमिति त्रस
रेण्वादिदशसहस्रपर्यंतान्मानभेदान्सम्यग्विज्ञाय कुंडविस्तारायामसमाननिम्नत्वानि यथोक्तमानकं मेखलादिकं च कुर्यादित्यर्थः ॥ दुर्घटं
अतिप्रयत्नसाध्यत्वात् ॥ त्रसरेण्वादिमानभेदास्तु ॥ लक्षणसंग्रहे ॥ जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः ॥ प्रथमं तत्प्रमाणानां त्रसरेणुं
प्रचक्षते ॥ त्रसरेणुस्तु विज्ञेयोऽष्टौ स्युः परमाणवा ॥ त्रसरेणोश्चाष्टगुणो रथरेणुस्तु संस्मृतः ॥ रथरेणवस्तेह्यष्टौ वालाग्रं तन्मतं बुधैः ॥ वाला
ग्राणष्टलिक्षा तु यूका लिक्षाष्टकं स्मृतं ॥ अष्टौ यूका यवं प्राहुरंगुलं तु यवाष्टकं ॥ रत्निरंगुलपर्वाणां विज्ञेयः त्वेकविंशति ॥ करस्त्वकलांशेन हीनो
रत्निरुदाहृतं ॥ चत्वारिंविंशतिश्चैवः हस्तस्यादंगुलानि त्विति ॥ ॥अथात्र कुंडविस्तारायामनिम्नत्वानां करणीमेखलादीनां च प्रमाणवचनानि

तथा च विंशद्भिश्चतुरधिकाभिः ॥ लक्षणेनाप्यथ परीक्ष्य भूमिभागं ॥ नाभिश्च प्रखनन्तु ॥ तावतीभिरंशमिति प्रपंचसारवचनात् ॥ यावत्कुंडस्य
विस्तारः खननं तावदेवमिति शारदातिलकवचनात् ॥ कुंडं विस्तारवन्निम्नमिति वायवीयसंहितावचनात् ॥ चतुरस्रं चतुःकोष्ठं सूत्रैः कृत्वा यथा
पुरा ॥ हस्तमानेन तन्मध्ये नावनिम्नायतस्वनेदिति दिव्यसारस्वतप्रयोगसारयोर्वचनात् ॥ चतुर्विंशांगुलायामं तावत्खातसमन्वितमिति
गणेश्वरपरामर्शिनीवचनात् ॥ चतुर्विंशतिसंख्याभिरंगुलीभिस्तु विस्तृतं ॥ खातं चरेच्च येत्कुंडमिति दक्षिणामूर्त्तिसंहितावचनाच्च ॥ कुंडवि
स्तारायामसमानं निम्नत्वेन कर्त्तव्यमिति ॥ सिद्धांतः ॥ अत्र केचित् ॥ हस्तमात्रं खनेत्तीर्थं ऊर्द्ध्वं मेखलया सहेति ॥ होमसारवचनात् ॥ पंचत्रि
मेखलोच्छ्रायं ज्ञात्वा शेषमधः खनेदिति प्रतिष्ठासारसंग्रहवचनात् ॥ व्यामात्खातः करः प्रोक्तो निम्नं तिथ्यंगुलेन त्विति विश्वकर्मवचना
त् ॥ कुंडं जिनांगुलैस्तीर्थं ऊर्ध्वं मेखलया सहेति प्रथमतंत्रवचनात् ॥ खातं कुंडप्रमाणं स्यादूर्द्ध्वं मेखलया सहेति सिद्धांतशेखरवचना
च्च मेखलया सह हस्तमात्रं खातं वदंति ॥ तन्नन्तरम्यमेखलया अननुगमनेन खातस्याप्यननुगमप्रसंगात् ॥ खाते कुंडायतने तुल्ययंगत्वे
तस्य कीर्तितं ॥ सन्निपत्योपकारेणामेखलादिविशिष्यत ॥ इति योगिनीहृदयवचनात् ॥ सन्निपत्योपकारस्य खातस्यारादुपकारको
गमेखलया सह निर्वाहानौचित्याच्चोक्तपक्षस्यैव युक्तत्वात् ॥ किंच मध्यमांगुलिमध्यस्थपर्वणा परिणाहतः ॥ ततो याशो भवेदन्तं तेन्द्रे
सर्वत्र चांगुलि ॥ तैश्चतुर्भिर्भवन्मुष्टिर्वितस्तिस्तत्त्रिभिर्गुणैः ॥ अरत्निस्तद्द्वयेनस्याद्धस्तस्तद्द्वयतः शिवे ॥ तद्द्वयं तु भवेद्व्याम तन्मानात्स्या

29
राम
२९

त्रोन्नतिः ॥ षणनवतेंगुलामाम्यान्मानेः कुंडलकल्पनं ॥ ॥ इति श्रीतंत्रराजवचनात् ॥ षणनवत्यंगुलायामविस्तारस्यैवावश्यकत्वा
त् पंचदशांगुलखातपक्षेप्यात मध्यादारभ्य मेखलोर्ध्वपर्यंतस्य तृतीयांशकस्य न्यूनत्वात् द्वादशांगुलोच्चमेखलासहितहस्तमात्रखाते
तु पार्श्वद्वयेपि मध्यप्रदेशाद्वादश द्वादश चतुर्विंशति द्वादश इति गणनया षट्चत्वारिंशन् द्वैगुण्येन षणनवतिरिति प्रोक्तसंख्यापरिपू
र्णत्वाद्धस्तमात्रखातयुक्तद्वादशांगुलोच्चमेखलायपक्षश्रेयानिति ॥ नन्वत्रएकांगुलीविस्तारस्य कथमविद्यमानत्वात्पार्श्वद्वयेपि न
कुहेतोर्नश्चांगुलविस्ताराधिक्यात्षणनवत्यंगुलायामत्वं कुंडस्योपपन्नमिति चेन्नत्र कंठस्यानावश्यकत्वात् ॥ अतएव तंत्रराजे ॥ कंठोक्तः नहि
कंठाकरणेपि दोषः ॥ अयने सत्यं तस्य तत्रराजविरोधादेव न्यून मेखलापरत्वं कल्पनीयमिति तस्मान्मेखलयामहत्वात प्रतिपादकवचनाति
रत्यादिकुंडेषु पंचवाशदादिहोमविधानेखाताधिक्यप्रयोजनाभावान्नहि विषयकानीतिमेनत्वानि अथाच मेखलापंच वा कार्याः षट्पंचाग्निवि
पक्षैकैरिति लक्षणासंग्रहवचनात् ॥ षड्ढांगाग्निवेदैकनेत्रमितासु पंचमेखलाः इति सिद्धांतशेखरवचनाच्च पंच वा मेखलाः ॥ तथा चपि
गलागमते ॥ षष्ठांशेनाष्टमांशेन मेखलाद्वितयमतं ॥ एकाषडंगुलोत्सेधविस्तारा मेखला मता इति ॥ अथ कुंडानामन्यथाकरणे दोषा
भवतीत्याह वशिष्ठः ॥ अनेकदोषदं कुंडमत्र न्यूनाधिके यदि ॥ तस्मात्सम्यक्परीक्ष्येदं कर्त्तव्यं शुभमिच्छतेति ॥ तत्र दोषानाह विश्वकर्मा
खाताधिके भवेद्रोगी हीने धेनुधनक्षयः ॥ चक्रकुंडे तु संतापो मरणाद्धिन्नमेखले ॥ मेखलारहिते शोको ह्यधिके चित्तसंक्षयः ॥ भार्यावि

शि॰चं
३०

नाशकंकुंडंप्रोक्तंयोन्याविनाकृतं॥ अपत्यध्वंसितत्प्रोक्तंकुंडंयत्कंठवर्जितमिति॥ तथाक्रियासारे॥ न्यूनाधिकप्रमाणंयत्कुंडंजर्जरमेख
लं॥ शृंगाररहितंयच्चयजमानविनाशकृदिति॥ तथाजयद्रथयामले॥ न्यूनाधिकेसुतहृद्देवोमानाहीनेदरिद्रता॥ वाग्रोधःकंठही
नेस्यादभिछिन्नूनखातके॥ अधिकेचातुरेभोगोमानेनाधिकमेखले॥ व्याधयःसंप्रवर्त्तंतेवियोनौस्यादपस्मृतिः॥ उच्चाटस्फु
टितेछिद्रसंकुलेवाव्यथाभवेदिति॥ इत्थंनिदर्शश्रवणाद्यथोक्तलक्षणासंपन्नानिसर्वाणिकुंडानिकार्याणीति॥ अथकंठःतत्र
वशिष्ठकंठोद्व्ययवमात्रकेइति॥ तथाकालोत्तरे॥ खातोर्द्धेद्व्यंगुलंकंठःसर्वकुंडेष्वयंविधिः॥ चतुर्विंशतिमेभागंमंगुलंपरि
कल्पयेत्॥ इति॥ अथयोनिः॥ तत्रवायवीयसंहितायां॥ मेखलामध्यतःकुर्यात्पश्चिमेदक्षिणेपिवा॥ योनिंसुशोभनांकिंचि
न्निम्नामुन्मूलिकांशनैः॥ अग्रेणाकुंडाभिमुखींकिंचिदुन्नतमेखलां॥ कुंभद्वयसमायुक्तामश्वत्थदलसंनिभामिति॥ यथाव
शिष्ठसंहितायां॥ योनिश्चपश्चिमेभागेप्राङ्मुखीमध्यसंस्थिता॥ अष्टांगुलैश्चविस्तीर्णाचायताद्वादशांगुलैः॥ अष्टोन्नतागजो
ष्ठीचसच्छिद्रामध्यरन्ध्राज्यधातिस्तथेतिशैलोकासारवचनात्॥ आज्यधारितियोनिमध्यगर्त्तंकर्त्तव्यमित्याहुःसांप्रदायि
काः लक्षणासंग्रहे॥ इषत्कुंडप्रविष्टाग्रानीनांसमकृतमेखला॥ मेखलार्थेपृथक्भूमिर्नग्राह्यावायतःप्रिये॥ योनिक्षेत्रंतुसा
कार्येतितथानारदः॥ कुंडत्र्यंशेनविस्तारायोनिरुच्छ्रायतोंगुलाः॥ कुंडार्द्धेनतुदीर्घास्यादितितथाशैलकासारे॥ दैर्घ्यात्कुर्यांगुला

३०

राम
३०

नालत्र्यंशो नाविस्तरेणात् ॥ एकांगुलोछ्रिता सा त्विति नालत्र्यंशो नाअष्टांगुलविस्तारा नालस्य द्वादशांगुलदैर्घ्यादिति ॥ स्वायंभुवेपि
मेखलामध्यतो योनिकुंडार्द्धत्र्यंशाविस्तृता ॥ इति विस्तारो मूलदेशेपि पिप्पलपत्राकृतित्वात् ॥ हस्तादिके कुंडेष्वर्ध्यनयोक्तरीत्यानन्त
न्तुमर्द्धदीर्घा तत्तृतीयांशविस्तारा तच्चतुर्विंशोच्चायोनिः कार्या ॥ यदुक्तं सोमशंभौ ॥ कुंडानां यश्चतुर्विंशो भागसोंगुलिसंज्ञका ॥ वि
भज्यते न कर्त्तव्या मेखला कठनाभय इति । सिद्धांतशेखरेपि ॥ चतुर्विंशतिभो भागः कुंडानामंगुलं स्मृतमिति सिद्धांतशेखरे तु
दीर्घार्कपर्वभिर्योनिविस्तारेणाषडंगुला उन्नतिस्त्र्यंगुले नासा इत्युक्तं ॥ अत्राष्टांगुलषडंगुलत्र्यंगुलयोश्च विकल्पः ॥ होतुरग्रयो
निरामाग्रपर्यश्वत्थपत्रवदिति शारदातिलकवचनात् ॥ योनिः सर्वत्र होतुरग्रे प्रागुक्तविधिना स्थाप्येति तत्र चतुरस्रे अर्द्धचंद्रे कु
ंडे च योनिर्दक्षिणाभागस्थलमेखलोपरि स्थाप्य तयोर्होत्रोउत्तराभिमुखत्वात् ॥ अन्येषु कुंडेषु पश्चिममेखलोपरि योनिः स्थाप्या तेषु
होतृणां पूर्वाभिमुखत्वात् ॥ दक्षस्यापूर्वयामे तु जलस्था पश्चिमोत्तरे ॥ पंचमस्यापि कुंडस्य योनिर्दक्षिणादिकस्थितेति ॥ त्रैलोक्यसा
रवचनात् ॥ पंचमस्य आचार्यकुंडस्येत्यर्थः ॥ अष्टकुंडपक्षे तु प्रागग्नियाम्यकुंडानां प्राक्ता योनिरुदङ्मुखी ॥ शेषाणां प्राङ्मुखी प्रो
क्तेति सारसंग्रहवचनाच्च पूर्वाग्नेययथामेषु उदङ्मुखी योनिरन्यस्य प्राङ्मुखीतवमस्य प्राग्वदेव ॥ एतेन योनिकुंडेपि योनिः कर्त्त
व्येति चिंतनं ॥ योनिकुंडयोनिमब्जकुंडे नाभिं च वर्जयेदिति शारदातिलकवचनात् ॥ आसां मेखलानां नालमुक्तं तंत्रराजे ॥ वहिस्थमेख

लामध्यादारभ्यनिजनालकं ॥ वितस्तिमात्रकमितिवितस्तिमात्रं द्वादशांगुलमात्रं ॥ प्रयोगसारेतु ॥ योन्याः पश्चिमतोलालमायामेव
चतुरंगुलं ॥ त्रिधैकांगुलविस्तारं क्रमान्नूनमपीष्यत इति चतुरंगुलमानेन नालमुक्तं एतच्चतुरंगुलषडंगुलादिस्वस्वमेखलादिस्व
स्वमेखलापक्षेत्रयं ॥ वहिःस्थमेखलामध्यात्तन्मध्यगतचतुरस्रपीठादित्यर्थः ॥ तट्टीकाकृतामनोरमाकारेणातथाव्याख्यातत्वात् आ
चार्यरवरशौक्तयोनिस्तत्पश्चिमायामथदिशि चतुरस्रस्थलारब्धनालेउक्तं तत्रपद्मापादाचार्यैरुक्तमेखलात्रयाद्बहिश्चतुरस्रंपीठंचतुरं
गुलोच्छ्रायामविस्तारंमृदाकृत्वा तत्रनालेस्थाप्यमितिव्याख्यातं ॥ नाभिसाह तंत्रराजे ॥ नाभिंकुर्यात्सर्वत्रकुंडमध्येविधानतः ॥ अष्ट
छन्दरोजंतुविदध्याचारुविग्रहं ॥ चतुर्भिरंगुलैकूर्यात्कर्णिकांदलमेवच ॥ विस्तारादपिचोत्सेधंषड्भिषड्भिहृदारितमिति ॥ शारदा
तिलकेतु॰ कुंडाकल्पयेदंतनाभिमंबुजसंनिभं ॥ तत्तकुंडानुरूपंवामानमस्याभिगद्यते ॥ नित्रवेदांगुलोपेतःकुंडेष्वन्येषुवर्द्धयेत्
नाभिक्षेत्रंत्रिधाभित्वामध्येतुवर्तिकर्णिकां ॥ वहिरंशद्वयेनाष्टौपत्राणिपरिकल्पयेदिति ॥ नाभिलक्षणमुक्तं ॥ अत्रयथागुरूपदे
शकार्यमिति ॥ आनयेश्याग्नियेनाभिप्रागग्रंगेपिद्वयोरिति ॥ नाभिशब्दोपुंलिंगोप्यस्ति ॥ अथवास्तुपूजा ॥ तत्रश्रीतंत्रराजे ॥ चतुरस्राकृ
तिःकश्चिदसुरःसर्वनाशकपुरातस्यवधायैवसर्वदेवासमुद्यतं ॥ कृत्वानिहंतुमुक्तास्तेरवध्योभवद्धरातं ॥ आवयोस्तन्निरासायमा
मेत्याकथयंस्तदा ॥ कथयास्माकमधुनातस्मान्नुपद्रवस्यतु ॥ दर्पशांतिर्भवेदस्याविश्वमासीदुपद्रुतं ॥ इत्युक्तेनेर्मयाप्रोक्तंनिधनंत

स्यउः शकं ॥ खात्वा तमवनौ तस्य शरीरे स्थापयात्तथा ॥ नित्य शश्वत्रिपंचाशन्निस्यंदाक्रमशाय वै ॥ नियोज्यन्ते धांयेपूजाविमुखास्तैकृ
तानि तु ॥ सुकृतानि समादधुर्दुःकृतानि च कुर्वते ॥ तस्मात्तेषां मर्चनं तु प्रयत्नं कुर्वतां सदा ॥ शुभान्येव तु जायन्ते नैवाशुभकथापि चेति
रु तच्चक्रादिकमाह सारसंग्रहे ॥ तच्चक्रादिविधानं च यथावदभिधीयते ॥ कृत्वा समतलां भूमिं चतुरस्राकृतिं शुभां ॥ अष्टाष्टकोष्ठ
तपदां कोणासमन्वितां ॥ चतुष्पदयुते तस्या मध्यकोष्ठे तु देशिकः ॥ ब्रह्माणमर्चयेत्तत्र चतुष्पदयुतेषु न ॥ प्रादक्षिण्येन पूर्वादि
यजेत्कोष्ठचतुष्टयं ॥ आर्यकं च विवस्वन्तं मित्रमन्यं महीधरं ॥ कोणार्धकोष्ठयोरेकमेकमेत्रीसमर्चयेत् ॥ वह्न्यादीशानमभितो वभ
मारो यथाक्रमात् ॥ सावित्रः सविता शक्रइन्द्रजिद्रुद्र तज्जयौ ॥ आपापवत्सकौ चेति प्रोक्तास्तेष्टौ तु मानतः ॥ कोणार्धकोणपार्श्वेषु वह्न्या
दीशानमर्चयेत् ॥ शर्वग्रहं चार्यमाणं जंभकं पिलिपिञ्छकं ॥ चरकीं च विदारिं च पूतनां चैव देशिकः ॥ ततः पूर्वादि परितो यजेदष्टौ दिशे प्र
ति ॥ ईशानश्चाथ पर्जन्यो जयन्तः शक्रभास्करौ ॥ सत्योभृशोन्तरिक्षश्च पूर्वाशाकोष्ठगाः क्रमात् अग्निः पूषा च वितथो यमोथ गृहरक्ष
कः ॥ गंधर्वो भृंगराजश्च मृगो दक्षिणादिग्गता ॥ निऋतिश्च तथा दौवारिकः सुग्रीवस्तथा ॥ वरुणः पुष्पदन्तश्चासुरः शोषाख्यरोगकौ ॥
पश्चिमाशास्थकोष्ठेषु पूज्या एते यथाक्रमं ॥ वायुर्नागस्तथा मुख्यो सोमो भल्लाटकस्तथा ॥ अर्गलो दितिरप्येवमदितिश्च तथाक्रमं ॥
कोष्ठेषूत्तरसंस्थेषु देवा एते समीरिताः ॥ चित्रो रजोभिरापूर्य देवतानां यथानि वै ॥ ब्रीहिमुद्गयवैश्चौदघृतदुग्धामृतैः क्रमात् ॥ अष्टो

शि·बं
३२

त्तरशतमथाष्टोत्तरविंशतिमेववा॥ प्रत्येकंनैर्ऋतेद्रव्यैमंत्रैस्तद्वत्पायसैः॥ बलिंचतेषांकुर्वीतपायसैर्व्यंजनान्वितैः॥ समितेइध्मकदली
फलापूपादिसंयुतामिति॥ अथैतच्चक्ररचनाप्रकारः॥ पूजाविधिश्चवक्ष्यंतेतत्रमंडपस्यनैर्ऋतिकोणेहस्तमात्रविस्तारायामांवितस्त्यु
न्नतांसमचतुरस्रांवेदिकांमतिमान्कृत्वातत्रप्राक्प्रत्यगायतादक्षिणोत्तरायताश्चनवरेखाः॥ कृत्वासमांतरालानिचतुःषष्टि
कोष्ठानिनिष्पाद्यतत्रवायव्यकोणादाग्नेयकोणगतं·नैर्ऋत्यकोणादैशानकोणगतंचेतिकर्णसूत्रद्वयमास्फाल्यवास्तुचक्रंनिर्मा
यतन्मध्येकोष्ठचतुष्टयमेकीकृत्यतद्बहिः प्रागादिचतुर्दिक्षुप्रतिदिशंचत्वारिकोष्ठानिमध्यकोष्ठसंलग्नान्येकीकृत्यतिमध्यकोष्ठसं
लग्नात्रिपंचाशद्देवतास्थानानिपरिकल्प्यतानिस्थानानिवक्ष्यमाणायंचवर्णरजोभिर्मनोहरंयथाभवतितथासम्यगापूर्यपुष्पांजलिं
यब्रह्मादित्रिपंचाशद्देवताइहागच्छंतेतिपुष्पांजलिप्रक्षेपेणावाह्यब्रह्मादित्रिपंचाशद्देवतायथास्थानंतिष्ठंतिष्ठेतिसंस्थाप्यब्रह्मादिभ्यः
इदमासनमित्यादिपुष्पांजलिंदत्वामर्दमध्ये॥ ॐ ब्रह्मणेनमः पूर्वादिचतुर्दिक्षु· ॐ आर्याय: ॐ विवस्वते॰ ॐ मित्राय॰ ॐ महीधराय
इतिप्रादक्षिण्येसंपूज्याग्नेयादिकोणचतुष्कगतार्द्धकोष्ठाष्टकेप्रादक्षिण्येनाग्नेयादीशानकोणपर्यंते· ॐ सावित्रायनमः एवंसवित्रे
शक्राय·शक्रजिते·रुद्राय·रुद्रजिते·अद्भ्यः आपवत्सकाय इतिसंपूज्यतद्बहिस्थमाग्नेयादीकोणचतुष्कगतकर्णसूत्रभिन्नकोष्ठच
तुष्टयपार्श्वगतकोष्ठाष्टकेआग्नेयादीशानपर्यंतं॥ ॐ शर्वायनमः एवंगुहायअर्यम्णो·जंभकाय·पिलिपिच्छकाय·चरक्यै·विदार्यै·

32
शाम
३२

पूतनायै· इतिसंपूज्य तद्बहिर्गतवीथ्यांचतुष्पदप्राच्यादिगानथ्यामीशायाग्नेयपर्यन्तं ॐ ईशानाय नमः॥ एवंपर्जन्याय· जयन्ताय· शक्राय· भास्करा
य· सत्याय· भृशाय· अन्तरिक्षाय· इतिष्टौ देवताः संपूज्य दक्षिणवीथ्यामाग्नेयादिनैर्ऋत्यन्तं ॐ अग्नये नमः॥ एवं पूष्णे वितथाय॥ यमाय गृहरक्ष
काय· गंधर्वाय· भृंगराजाय· मृगाय· इतिसंपूज्य ततः पश्चिमवीथ्यां नैर्ऋत्यादिवायव्यान्तं ॐ निर्ऋतये नमः एवं दौवारिकाय· सुग्रीवाय वरुणा
य पुष्पदंताय· असुराय· शोषाय· रोगाय नमः इतिसंपूज्योत्तरवीथ्यां वायव्यादीशानान्तं ॐ वायवे नमः॥ एवं नागाय· मुख्याय· सोमा
य· भल्लाटकाय· अर्गलाय दित्यै अदित्यै इति गंधपुष्पाद्यैस्त्रिपंचाशद्देवतासंपूज्य कुंडस्थंडिलादौ वक्ष्यमाणविधिनाऽग्निस्थापनं कृ
त्वा· ॐ ब्रह्मणे स्वाहा आर्यकाये स्वाहेत्यादि पूजितदेवतानां स्वाहान्तेन नाममंत्रैः प्रत्येकं व्रीहीयवमुद्गैर्घृतमधुदुग्धपरिप्लुतैः सघृ
तैः पायसैश्चैकैकद्रव्येणाष्टोत्तरशतं शतमष्टाविंशतिसंख्यं वा एकैकदेवतानामाम्नाहुत्वा ॐ ब्रह्मण एष बलिर्नमः॥ इत्यादिपू
जितदेवताभ्यः सन्नान्नाज्यतिलदुग्धकदलीफलापूपनानाव्यंजनान्वितैः पायसैः स्वतन्त्रदेवतस्य बलिं निवेदयेत्॥ इति वास्तुपूजा
विधिः॥ अथ वास्तुपूजाफलं॥ नंदकरणोफलवैपरीत्येव तंत्रराजे॥ एवं सीहगते भानौ पूर्णाया प्रतिवत्सरं॥ स्वगेहे वास्तुपूजा
यो मंडलेषु समाचरेत्॥ न बालमरणव्याधिभूतप्रेतादिकानि च॥ न सर्पपीडा नान्यो कलहाद्यशुभानि च॥ पुत्रपौत्रधनारोग्य
पशुदासीसमृद्धिभाक्॥ अरोगी विजयी ख्यातश्चिरंजीवति तद्गृहे॥ राजवेश्मसु सर्वत्र तथा च महिषीगृहे॥ सचिवामात्यशेनानी

भवनेषु पुरे तथा ॥ विदध्यात्सनिवर्षेषु प्रोक्तमिष्टोत्र देशिकः ॥ नवेद्युक्तान्यथारूपफलिक्लेशो निश्चं भवेत् ॥ अथांकुरार्पणाविधि
तत्रसारसंग्रहे ॥ सप्तभिर्नवभिर्वापि दिनैर्दीक्षादिना त्वरा ॥ बीजारोपणाकर्मेदं कर्त्तव्यं सर्वकामदं ॥ मंडपोत्तरदिग्भागे सुसंहृत
तरे परे ॥ भवने मंडलं कुर्यादेकपाश्वरुणायतं ॥ याम्योदिव्याय तत्त्वम्वे प्रवदंति मनीषिणः ॥ पदानि द्वादशात्र स्युस्तेषु स्था
नत्रयं भवेत् ॥ वज्रहृदयपदोपेतं पदान्यापूरयेत्ततः ॥ पीतारक्तसितश्यामैरजोभिर्वह्निपूर्वकं ॥ इशांतक्रमतस्त्वाद्यः पञ्चा
पाविविधानि च ॥ वेश्मव्यापालिकाः प्रोक्ताश्चतुर्विंशांगुलोच्छ्रिताः ॥ वैरिश्चः पंचमुखश्चाप्युच्छ्रितां षोडशांगुलैः ॥ शैवाः शरा
वाश्चत्वारो भान्वंगुलसमुच्छ्रयाः ॥ प्रक्षाल्य सूत्रैः संवेष्ट्य स्थाने स्वस्वादिविन्यसेत् ॥ शालिपूर्णोभगंधादिदर्भकूर्वयुतेषु च ॥ पूरयेत्ता
निपात्राणि वालुकामृत्करीषकैः ॥ शंखस्वनेन तनादैश्च पंचभिः ब्राह्मणाशिषा ॥ लाक्षयेदुग्धवें बीजे ततो बीजानि निर्वपेत् ॥ ना(
निप्रियंगुश्यामकतिलसर्षपशालयः ॥ मुद्गाढकीमुनिष्पावखल्लमाषाः प्रकीर्त्तिताः ॥ हरिद्राभिश्च संमिश्च्य वस्त्रे राच्छादयेद्गुरुः
संध्ययोरुभयोरात्रौ प्रदद्याडुन्नमंवलि ॥ त्रित्रिविविधस्यापि पात्रस्य सप्तषष्ठपि दिनेषु च ॥ प्रथमेह्नि भूतेम्यापिल लाजा हरि
द्रया ॥ दधिसक्तत्रभिश्रक्तं पितृभ्यः तिलतंडुला ॥ तृतीयेह्न्यक्षेभ्यः करंभा लातसंयुताः ॥ चतुर्थेह्नि नागेभ्यो नारिकेलजला
प्लुतं ॥ सक्तुपिष्टं रवसंप्रोक्तं पंचमे ब्रह्मणो वलिः ॥ पद्माक्षतांश्च षष्ठेह्नि शिवायायूपसंयुतं ॥ अन्नेस्यात्सप्तमे वाह्नि विश्वेस्याङ्कुडो

हृनं॥ यदिस्यान्नवराजेंव ततोभयदिनेवलिः॥ विह्मेस्याच्छुगंधानंक्रमरंस्याक्रमान्नत॥ प्रणावाद्येहृदंतैस्वनामभिर्वलिमंत्रकाः
शतिःकरंभादधिसक्तवः॥ पद्माक्षाःपद्मवीजानिक्रसरःतिलमुद्गैः सहसिद्धओदन॥ अथैतन्मंडलरचनाप्रकारादि॥ तत्रदीक्षा
दिनात्पूर्वमेवनवभिःसप्तभिर्वादिनैःप्राङ्गुर्मितंमेउयस्योत्तरभागेसुसमहन्नंग्रहनिर्माय तत्रगोमयोपलिप्तेसुसमेभूतलेप्राक्
प्रत्यगायतांपंचहस्तदीर्घःपंचरेखायाम्योदीच्यायतावितक्रंतराश्चैकादशरेखाःकृत्वाविंशत्कोष्टोपेतंसार्द्धद्वयहस्तविस्तारोपेतं
मंडलेकृत्वातत्रचतुर्दिक्षुगतचतुर्विंशतिकोष्टान्येकीकृत्यवीथीःकृत्वामध्येचतुष्कस्योभयपार्श्वयोःकोष्टद्वयंकोष्टद्वयंमार्जयित्वाव
शिष्टचतुष्कत्रयात्मकद्वादशपदोपेतंविष्णुमंडलंनिर्मायचतुश्चतुःकोष्टैरेकमेकंस्थानंब्रह्मविष्णुरुद्राणांपश्चिममध्यपूर्वक्रमेणा
परिकल्प्यतत्रपश्चिमादिचतुष्कत्रयेपिप्रतिचतुष्कमाग्नेयकोष्टमारभ्यैशानकोष्टपर्यंतंपीतरक्तश्वेतस्यामवर्णैरजोभिः॥ प्रतिचतु
ष्कमेकेनरजमेकैकोष्टमितिक्रमेणाद्वादशकोष्टान्यापूर्यवीथीःचतुष्टयंरक्तरजसारेखाःसर्वाआपूर्यतत्रस्थानत्रयमध्येचतुष्केविष्णु
दैवत्याश्चतुर्विंशत्यंगुलोन्नतिविस्तृतियुक्तामृत्काकाराश्चतस्त्रपालिकामध्येऽश्वपिप्पलदलाम्रपल्लवैःसहसूत्रेणासंवेष्टिताःसं
स्थाप्यतथापश्चिमचतुष्केकस्मिन्पात्रेपंचपात्राणियथाभवंतितथाशिल्पिवरान्निर्मितानिप्राग्वत्मृत्काकाराणिषोडशांगुलो
न्नतिविस्तृतियुक्तानिरुद्रदैवत्यानिचत्वारिपात्राणितथैवपिप्पलदलादिसंयुक्तानिसंस्थाप्यतथापूर्वचतुष्केद्वादशांगुलोन्नतिविस्तृति

र्भतः शिवदैवत्यां ॥ प्राग्वत्पिप्पलदलादियुक्ताश्चत्वारः शरावाः संस्थाप्याः इति द्वादश पात्राणि प्रक्षालितानि द्वादशकोष्ठेषु प्रतिकोष्ठमेकंपा
त्रं शालिपुंजेषु गंधाक्षतकूर्चयुक्तेषु संस्थाप्य तानि पात्राणि वालुकामृत्करीषैः संपूर्य एकस्मिन्नूतनभांडे स्वर्णादिरचिते मृन्मये वा प्रियंगु
श्यामाकतिलसर्षपशालीमुद्गाढकीनिष्पावखल्वमाषाख्यानि दश धान्यान्येकीकृत्य वपित्वा मृतवीजेन गोदुग्धैः प्रक्षाल्य संखस्वनादि
पंचवाद्यादिघोषपुरःसरं तेषु प्रथमं ब्रह्मदैवत्येषु ततो विष्णुदैवत्येषु ततः शिवदैवत्येष्विति क्रमेण वीजानि निर्वाप्य हरिद्रामिश्रित
जलैः संसिच्य नूतनवस्त्रैराच्छाद्य संध्ययोर्धरात्रे च स्वपि दिनेषु प्रतिदिनं वलिं दद्या ॥ तत्र प्रथमदिवसे तिललाजासक्तुशाल्योदना
न् हरिद्राचूर्णसंयुक्तानेकीकृत्य वलिचयं निष्पाद्य पात्रत्रये कृत्वा त्रिविधस्यापि पात्रस्य समीपे त्रिकोणमंडले साधारणवलिपात्रं निधाय प्र
थमं ब्रह्मदैवतपात्रसमीपे सर्वभूतानिहागच्छंतु इह तिष्ठंत्विति भूतान्यावाह्य संस्थाप्य ॐ सर्वभूतेभ्यो नमः इति गंधादिभिः संपूज्य सर्वभूतवलिद्रव्या
य नमः ॥ इति वलिद्रव्यं च संपूज्य हस्ततले जलं गृहीत्वा वामहस्तेन वलिपात्रं स्पृशन् ॐ सर्वभूतेभ्यः एष वलिर्नमः ॥ इति वलिपात्रोपरि जलं निक्षिप
न् वलिं विसर्जयेत् ॥ एवं विष्णुपात्रसमीपे तथा शिवपात्रचतुष्कसमीपे वलिं दद्यादिति प्रोक्तकालत्रयेपि वलिदानविधिः ॥ अत्र केचिन्मंडलस्य च
तुर्दिक्षु वलिर्देय इत्याहुः ॥ यथागुरूपदेशकार्यो ॥ ततो द्वितीयदिने पितृभ्यः ॥ तिलतंडुलैर्गुडक्षीरपरिपाचितैर्वा प्रोक्तकालत्रयेपि वलिं दद्यात् ॥ ए
वं तृतीयदिवसे यक्षेभ्यो दधिसक्तुलाजमिश्रितं वलिं दद्यात् ॥ चतुर्थेहनि नागेभ्यो नारिकेलजलाप्लुतसक्तुपिष्टवलिः ॥ पंचमदिने ब्रह्मराक्षसा

34

ष्मनवलिः ॥ षष्ठदिने तु शिवायाय्यूपसंयुतोदनवलिः ॥ सप्तमे दिने विल्वकेयुतौदनवलिः ॥ नवरात्रपक्षे तु विल्वपत्रं वाष्टमदिने दुग्धोदनवलिः ॥ नवमदिने
क्रमस्ववलिर्देयः ॥ अत्र सर्वत्र वलिदाने प्रथमदिनप्रोक्तस्वविधिर्ज्ञेय ॥ तत्र तत्रामन्त्रा पूजनं वलुक्तजंनं वत्रेपमिमिअत्र नवस्वपि दिनेषु प्रतिदिनं तत्तद्देवतानां वलि
दानानंतरं दशदिक्पालेभ्यो पि तत्तदिक्षु ॐ इन्द्राय एषः वलिर्नमः ॥ इत्यादि ॥ तत्र तत्रामन्त्रा घृतशर्करासहितपायसेवलिर्देयः ॥ इति वीजारोपणविधिः ॥
अथ दीक्षाकालः ॥ तत्रादौ मासाः ॥ तत्र मथानभैरवंतंत्रे चैत्रे दुःखाय दीक्षा स्याद्वैशाखे सर्वसिद्धिदा ॥ ज्येष्ठे मृत्युप्रदा स्यादाषाढे वंधुनाशिनी ॥ श्राव
णे हि सिद्धिदा नृणां नभस्ये दुःखदामता ॥ आश्विने सर्वसिद्धिः स्यात्कार्त्तिके ज्ञानवृद्धिदा ॥ शुभदा मार्गशीर्षे च पौषे मेधाविनाशिनी ॥ माघे तु वर्णलाभः स्या
त्फाल्गुने सर्वसिद्धिदा ॥ तथा सारसंग्रहे ॥ मधुमासे भवेद्दुःखं माधवे रत्नसंचयः ॥ मरणं भवति ज्येष्ठे चाषाढे वंधुनाशनं ॥ समृद्धिः श्रावणे नूनं भवेद्भाद्र
पदे क्षयः ॥ प्रजानामाश्विने मासि सर्वतः शुभमेव हि ॥ ज्ञानं स्यात्कार्त्तिके सौख्यं मार्गशीर्षे भवत्यपि ॥ पौषे ज्ञानक्षयो माघे भवेन्मेधाविवर्द्धनं ॥ फाल्
गुने पि समृद्धिः स्यान्मलमासं परित्यजेत् ॥ इति ॥ अत्र यद्यप्याश्विनमासे दीक्षायां विहित ॥ तथापि ॥ महाभवचतुर्द्दशी शिवरात्रिः ॥ तथा श्रीकंठस
हितायां ॥ शरत्काले वा वैशाखे दीक्षा श्रेष्ठफलप्रदा ॥ मार्गफाल्गुनके श्रेष्ठा ज्येष्ठे चैव तु साधमा ॥ माघमासे तु शुभदा तुष्टा चाषाढमासके ॥ आनंददा र
श्रावणे सा पौषे भाद्रे च निंदिता इति ॥ तथा ज्ञानार्णवे ॥ शुक्लपक्षे शुभदिने शुभवारे वरानने ॥ मंत्रापारंभणं कुर्यादिति ॥ तथा कालोत्तरे ॥ मुक्ति
कामैः कृष्णपक्षे भुक्तिकामैः सिते सदा ॥ दीक्षा कार्या महादेवीति ॥ तथा शैवागमे ॥ शुक्लपक्षे प्रकुर्वीत कृष्णे वा देशिकोत्तमः ॥ शुक्ले सर्वसमृद्धिः स्या

क्लेशेमध्यमतोभवेदिति ॥ अथनक्षत्राणिसिद्धानामरौ ॥ अश्विनीरोहिणीवार्द्रातथापुष्योत्तरापणी ॥ हस्तचित्रास्वातिमैत्राविशाखाश्चधनिष्ठया ॥ उत्तर्क्षरेवतीवदीक्षायामुत्तमामता ॥ मैत्रमुत्तराषा ॥ तथाकामधेनौ ॥ रोहिणीमृगशीर्षंचतथापुष्यश्चहस्तकः ॥ स्वात्यनुराधारेवतीवतथावापुत्तरात्रयं ॥ शुभान्येतानिदीक्षायांनक्षत्राणिवरानने ॥ इति ॥ ॥ अथतिथिरात्रिपिंगलामते ॥ कृत्तिकायामतस्तापोभरणांचमहापदः ॥ पूर्वायांदंडयेगजामघायांमृत्युमादिशेत् ॥ स्वलेनकलहंविंद्याज्येष्ठाभवतिहानिदा ॥ पूर्वाषाढेभयंप्रोक्तंश्रावणाऽनेकरोगदा ॥ क्षोभदाशतभीषायांसंतापभाद्रपदेभवेदिति ॥ ॥ अथतिथयः ॥ नवमारसंग्रहे ॥ पूर्णिमापंचमीचैवद्वितीयासप्तमीतथा ॥ त्रयोदशीचदशमीउसमस्तासर्वकामदा ॥ तथाश्रीकंठसंहितायां ॥ द्वितीयासप्तमीश्रेष्ठाषष्ठीसर्वत्रनिहिता ॥ द्वादश्यामपिकर्तव्यंत्रयोदश्यांतथापिवा ॥ विजयकालिनीतंत्रे पंचम्येकादशीशुक्लासप्तमीत्रयोदशी ॥ दशमीशुक्लपक्षस्यद्वादशीचविशेषतः ॥ रत्नसागरे ॥ द्वितियाविहितानित्यंषष्ठीसर्वत्रनिंदिताः ॥ सप्तम्यांधनलाभःस्यादष्टम्यांगुरुनाशनं ॥ नवम्यांरिक्थनाशःस्याद्दशमीसुखदायिनी ॥ एकादश्यांभवेद्भोगोधनस्यक्षयमस्यच ॥ द्वादश्यांधनलाभःस्यात्त्रयोदश्यांसदोदयः ॥ शिष्यहानिश्चतुर्दश्यांपौर्णमासीतुसिद्धिदा ॥ अमायांपुत्रनाशःस्यात्प्रतिपद्दुषितातिथीति ॥ ॥ अथदेवताविशेषेतिथिविशेष ॥ कालोत्तरे ॥ ब्रह्मणःपौर्णमास्युक्ताद्वादशीवज्रधारिणः ॥ चतुर्दशीशिवःस्योक्तागवःप्रोक्तात्रयोदशी ॥ द्वितियानुश्रियःप्रोक्तापार्वत्याश्चतृतीयका ॥ चतुर्थीगणनाथस्यभानोःप्रोक्तातुसप्तमीति ॥ ॥ अथवासराणि ॥ तत्रमंत्रमहार्णवे ॥ मंत्रारंभोरवौशुक्रेबुधेजीवेविशेषतः ॥ शनौम

35

॥राम॥
॥३५॥

न्तुक्षयंभौमेमेसोमेसर्व्वंचनिष्फलं ॥ सारसंग्रहे रवौगुरौबुधेशुक्रेकर्त्तव्यंपरमेश्वरि ॥ इतिज्ञात्वावरारोहेमंत्रंदद्याद्विचक्षणः ॥ विजयमालिनीतंत्रे ॥ रवौबु
द्धिमवाप्नोतिशुक्रेचैववश्यनागमः ॥ बुधेश्रियोगरहीनोगुरौप्रज्ञान्वितोभवेत् ॥ शन्यंगारकयोर्मृत्युरविद्यासोमकेभवेत् ॥ इतिज्ञात्वावरारोहेशीक्षांदद्या
द्विशालधीरिति ॥ ॥अथयोगा ॥ तत्ररत्नावल्यां· योगाश्चप्रीतिरायुष्मान्सौभाग्यशोभनः ॥ शुभः ॥ सुकर्माचधृतिर्वृद्धिः ध्रुवः सिद्धिश्चहर्षणः व
रीयांश्चशिवःसिद्धोवृसाचैंद्रश्चषोडशेति ॥ ॥अथावयोगः ॥ तत्रवशिष्ठः ॥ पूर्वाषाढाद्वत्रिपदापंचमीकृत्तिकातथा ॥ पूर्वाभाद्रपदाषष्ठीदशमी
रोहिणीतथा ॥ द्वादश्यांसर्पनक्षत्रमर्यम्णाचत्रयोदशी ॥ नक्षत्रंतुपाद्स्येतेदेवानामपिनाशदा ॥ इति ॥ सर्वनक्षत्रमाश्लेषाच्चार्यमाद्युत्तराफा
ल्गुनी ॥ तथाज्योतिःशास्त्रे ॥ करणानि ॥ शुभानिकरणान्याहुर्दीक्षायांचविशेषतः ॥ शकुन्यादीनिविष्टिंचविशेषेणविवर्जयेत् ॥ आदिशान्तेतकि
स्तुघ्नचतुष्पदनागानांग्रहणं ॥ ॥अथलग्नानि ॥ तत्रसारसंग्रहे ॥ मंत्राघाभरंभरणंमेषेनधान्यप्रदंभवेत् ॥ वृषेमरणमाप्नोतिमिथुनेऽपत्य
नाशनं ॥ कर्कटेसर्वसिद्धिःस्यात्सिंहेमेधाविनाशिनी ॥ कन्यालक्ष्मीप्रदानित्यंतुलायांसर्वसिद्धयः ॥ वृश्चिकेसर्वसिद्धिःस्याद्धनुर्ज्ञानविना
शनं ॥ मकरःपुत्रदोप्रोक्तःकुंभोधनसमृद्धिदः ॥ मीनोदुःखप्रदोनित्यमेवराशिफलंप्रिये ॥ तथारुद्रयामले ॥ मीनेसिंहेतथाचापेवृषेहानिः
भां विधाय तत्पार्श्वयोरप्यंतः पंक्तेकोष्ठमेकं बहिः पंक्तेः कोष्ठद्वयमिति कोष्ठचतुष्टयमेकीकृत्योपशोभाः परिकल्प्यावशिष्टैः षड्भिः ड्भिः कोष्ठैः
चत्वारि कोणानि परिकल्प्येयदिति सर्वतोभद्रमंडलं निर्माय सरोजकर्णिकाकेसरदलाग्रपीठवीथीद्वारशोभोपशोभकोणस्थानानि पंचवर्णरजो
भिर्भूषयेत् ॥ पंचवर्णरजांसि तु ॥ हरिद्राचूर्णं पीतरजः तंडुलचूर्णं शुक्लरजः कुसुंभकुसुमचूर्णं रक्तं दग्धतंडुलचर्णं कृष्णवर्णं विल्वपत्रचूर्णं
श्याममिति ॥ रजोविन्यासप्रकारस्तु ॥ सीमागताः सर्वरेखाः शुक्लरजसा एकांगुलोत्सेधविस्तारयुताः कार्याः पीतरजसा कमलकर्णिकां के
शराणि च समापूर्य शुक्लरजसा दलानि च दला संपूर्य श्यामरजसा दलसंधिना पूरयेत् ॥ अथवा कर्णिकां पीतेन केसरान्पीतरक्ताभ्यां दला
नि रक्तेन रजसा संपूर्य पीतेन कृष्णेन पीठगर्भमापूर्य पीठपादान् रक्तेनापूर्य पीठगात्राणि शुभ्ररजसापूर्य वीयं चतुष्टये कल्पवल्लीः कारक
पुष्पपल्लवफलमंडितानानावर्णरजोरारचय्य शुभ्रेण रजसा द्वारचतुष्कमापूर्य रक्तवर्णेन द्वारशोभाः पीतेनोपशोभाः कृष्णेन कोणानि चा
पूर्य तद्बहिरेखात्रयमेकांगुलोन्तरालं शुक्लरक्तरजोभिः कुर्यादिति सर्वतोभद्रमंडलं विधाय वेदीपरितो दीपान् परिकल्प्य वक्ष्यमाणविधि
नापूजाद्यापापासाद्यतयैवतानि संस्कृत्य छत्रचामरद्वयदर्पणव्यंजनादिकं च यथावत् निधाय गुर्वादिवंदनपूर्वकं करशुद्धितालत्रय
दिग्बंधनाग्निप्राकारत्रयभूतशुद्धिप्राणप्रतिष्ठामातृकान्यासयोगपीठन्यासश्च विधाय मुद्रा विरचयन् स्वेष्टदेवताध्यानमानसपूजां तवेश्व

देवमूलमंत्रजपनत्समर्पणार्घस्थापनात्मपूजनांनर्हवनमूलमंत्रजपनत्समर्पणार्घस्थापनात्मपूजनांतमपूजनांनर्हवनमूलमंत्रजपत्समर्प
णानिविधायसर्वतोभद्रमंडलायनमः इति पंचोपचारैः संपूज्यार्घजलेनपोक्ष्यवक्ष्यमाणविधिनापीठपूजांविधायतत्कर्णिकायांशालिभिः आ
पूर्यतदुपरितंडुलान्कुशान्दूर्वाःसप्तविंशतिभिःकुशैरेकीकृताग्रविरचितसूत्रग्रंथिकंकूर्चंचनिधायतत्रवक्ष्यमाणविधिनाशालिपूजोपरि
वह्निमंडलवह्निकलाश्चसंपूज्यतत्रस्वर्णादिनिर्मितंत्रिगुणीकृतंसूत्रवेष्टितंसर्वागंचंदनागुरुकर्पूरधूपदीपितंकुंभंप्रणवमुच्चरंसंस्थाप्य
तत्रपुष्परागनीलवैडूर्यविद्रुममौक्तिकमरकतवज्रगोमेदपद्मरागाख्यानिनवरत्नानिवज्रमुक्तानीलपद्मरागमरकतेतिपंचरत्नानिवा
ससुवर्णानिनिक्षिप्यकुंभस्योपरिगंधाक्षतदूर्वान्वितप्रागुक्तलक्षणंकूर्चंनिधायतत्रक्षंलंहंसंषंशंवंलंरंयंमंभंबंफंपंनंधंदंथंतंणंढंडंठं
टंञंझंजंछंचंङंघंगंखंकं अः औंओंऐंएंॡंऌंॠंऋंऊंउंईंइंआंअं इति विलोममातृकांतेनमूलमंत्रंत्रिर्जपन्नात्मनकुंभस्ययोगपीठस्यचैक्यंभा
वयन्वक्ष्यमाणपंचाशद्दोषधीक्वाथैरश्वत्थोडुंबरप्लक्षवटत्वक्क्वाथैः पलाशवृक्षत्वक्क्वाथैः कर्पूरकस्तूरीकुंकुमवासितैस्तीर्थजलैर्वाकुंभ
मापूर्यस्वपुरतोवक्ष्यमाणविधिनाशंखंसंस्थाप्यकुंभपूरितजलसजातीयजलेनापूर्यतत्रगंधाष्टकंविलोड्यतत्रवक्ष्यमाणावह्निकलाः सूर्यक
लाः सोमकलाश्चावाह्यपृथक्संपूज्यतासांतासांप्राणप्रतिष्ठांविधायप्रणवाद्यैकपंचाशत्कलावक्ष्यमाणमातृकासोक्ताः संपूज्यतत्रप्रथम
मकाराद्यस्वराणान्यन्ताः कयचवर्गोत्थाः सूर्यादिदशकलाः समावाह्य ॐ हंसः शुचिःषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसन्नृष

ध्ननमस्यो मम दत्वा गोजांश्च नजाश्च द्विजाश्च न त्र हन ॥ इति मंत्रमुच्चार्य प्रसरेणेन इति संपूज्य ॐ कमस्थै नमः इत्यादि दश कलाः संपूज्य सद्यादि
दश कलानां प्राणप्रतिष्ठां विधाय उकारं हिंसोरुत्पन्नाः स्तनवर्गोस्थाज्जरादिश कलाः समावाह्य ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुच
रो गिरिष्ठाः यस्योरुषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा इति पठित्वा विष्णवे नमः इति संपूज्य ॐ जरायै नमः इत्यादि संपूज्य प्राग्वज्जरा
दिदश कलानां प्राणप्रतिष्ठां विधाय मकारात् रुद्रादुत्पन्नाः पयोगास्थाः तीक्ष्णादि दश कलाः समावाह्य ॐ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं उ
र्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् इति पठित्वा रुद्राय नमः इति संपूज्य तीक्ष्णायै नमः इति संपूज्य तीक्ष्णादीनां प्राणप्रतिष्ठां विधाय ईश्व
रादिवेत्पन्नाः पकारादि क्षकारांत पंचवर्णोस्थाः पीनादि पंच कलाः आवाह्य गायत्रीमुच्चार्य ईश्वराय नमः इति संपूज्य ॐ पीनायै नमः इत्या
दिसंपूज्य पीनादीनां प्राणप्रतिष्ठां विदध्यात् ॥ ततो नादात्सदाशिवादुत्पन्नाः स्वरजा निवृत्याद्याः षोडश कला आवाह्य ॐ विष्णुर्योनिं कल्पयतु त्वष्टा
रूपाणि पिंशतु आसिंचतु प्रजापतिर्धाता गर्भं दधातु मे ॥ सदाशिवाय नमः ॥ इति संपूज्य ॐ निवृत्यै नमः इत्यादि संपूज्य निवृत्यादीनां प्राणप्र
तिष्ठां विदध्यात् ॥ इत्थं चतुर्नवति देवताः संपूज्य सकल कलामयं शंखजलं मूलमंत्रेण ॐ भजले संयोज्य स्थापनस्तान्यपह्नवानि इत्युप
रुणि लतया संवेष्ट्य कल्पवृक्षधिया कलशमुखे निधाय तदुपरि कलशजातीयं तंडुलपूर्णनालिकेरफलाद्यं कल्पवृक्षफलबुध्या पात्रं सं
स्थाप्य परवस्त्रयुगेन घटं संवेष्ट्य वेदिनिवेशं प्रधानकुंभस्थापनं विधाय पूर्वादितोरणसमीपेषु प्राग्वत् मंडले षट्दलकमलेषु वा शालि

॥शिः चं॥
॥५४॥

युगेन घटं संवेष्टयेदिति वेशाप्रधानकुंभस्थापनं विधाय पूर्वदिग्गतकुंभे ध्रुवं दक्षिणे धरां पश्चिमे वाक्पतिमुत्तरे विघ्नेशं च संपूज्य तदाग्नेयादिको
णचतुष्टयकुंभान्संस्थाप्याग्नेयकुंभे क्षमनं नैऋत्ये दुर्जयं वायव्ये सिद्धार्थमीशाने मंगलं च संपूज्य पुनः पूर्वादिकुंभेष्विंद्रादिलोकपालानां वाह
वेदोक्तनाममंत्रेण संपूज्यमानः पूर्वादिषु कुंभाद्बहिरैरावतं पुंडरीकं वामनकुमुदांजनौ पुष्पदंतं सार्वभौमं सुप्रतीकं च पूजयेत् इति दिग्गजा
न्संपूज्य पुनर्गुरुर्वेद्यांगत्वा न्यासासने समुपविश्य स्वेष्टमंत्रेण प्राणायामत्रयं कृत्वा तस्य ऋष्यादिकरषडंगन्यासपूर्वकं सकलन्यासजातं वि
धाय देवं ध्यात्वा मानसैरुपचारैः संपूज्य प्रधानकुंभे वक्ष्यमाणप्रकारेण मूलमंत्रेण मूर्त्तिं परिकल्प्य तत्र स्वेष्टदेवतावाह्य वक्ष्यमाणप्रकारे
ण पाद्यैरुपचारैः सांगं सावरणं तत्कल्पोक्तविधिना संपूज्य वेद्या दक्षिणभागे हस्तमात्रायामविस्तारमंगुष्ठपार्वमात्रोच्चं वालुकाभिः स
मचतुरस्रस्थंडिलं कृत्वा तत्र वक्ष्यमाणनित्यहोमोक्तविधिना वह्निं संस्थाप्य तत्र देवमावाह्य संपूज्य नित्यहोमोक्तविधिना पायसेन हुत्वा पु
नर्देवं संपूज्य कुंभस्थमूर्त्तौ संयोज्य तथैव वह्निं संपूज्य विसृज्य वक्ष्यमाणविधिना सर्वभूतबलिं दत्वा कल्पोक्तबलिदानं च विधाय देवायोत्तरापो
शनादिनीराजनांतं नित्यपूर्वोक्तविधिना विधाय प्राणायामत्रयं कृत्वा ऋष्यादिकरषडंगन्यासपूर्वकं मूलमंत्रमष्टोत्तरसहस्रं जपित्वा देवाय वक्ष्य
माणविधिना जपं समर्प्य पूर्वमंडपस्यैशानकोणे स्थापितविकिरोपरि सुवर्णगर्भं वस्त्रयुग्मवेष्टितं जलपूरितं करकं विन्यस्य तत्रास्त्रदे
वतां सिंहस्थां दक्षिणवामकरयोः खड्गखेटकधारिणीं घोररूपां पश्चिमाभिमुखीं त्वोध्योतिषमां धादिपंचोपचारैः संपूज्य नमस्कृत्य तत्क

॥रामः॥
॥५४॥

54

रकं कराभ्यामुद्धृत्य मंडपाभ्यंतरे प्रदक्षिणं भ्रमन् तन्नालोदकेन धारां सिंचन् शंभोर्लोकपालानां ज्ञया मां शिष्यं रक्ष रक्षेति वदन् प्रदक्षिणां परि
क्रम्य तं करकं स्वस्थाने निवेश्योपविश्यास्त्रमंत्रेण पुनस्तामस्त्रदेवतानां पंचोपचारैः संपूज्य ततः प्रागुक्तेषु कुंडेषु इन्द्रेशानयोर्मध्यगताचार्यः कुं
डे गुरुरग्निस्थापनं कुर्यात् ॥ तत्रादौ कुंडं गोमयेनोपलिप्य कुंडसमीपे गुरुर्वक्ष्यमाणनित्यपूजोक्तविधिना स्वासनमास्तीर्य संपूज्य तत्रोप-
विश्य मूलमंत्रेण प्राणायामत्रयं कृत्वा मूलमंत्रस्य ऋष्यादिकरषडंगन्यासान्विन्यस्य देवं ध्यात्वा मानसैरुपचारैः संपूज्य स्वेष्टमंत्रं यथाशक्ति ज
पित्वा जपं समर्प्य श्रीगुरुः प्रणम्य कुंडकुंडसंस्कारान् कुर्यात् ॥ तत्रादौ कुंडं मूलमंत्रेण वीक्षास्त्रमंत्रेण प्रोक्षणेनैव कुशैस्त्रिः संताड्य कव
चमंत्रेणाभ्युक्ष्यास्त्रमंत्रेण कुंडमध्ये किंचित्खननं कृत्वा मंत्रेण ॥ तां मृदमंगुष्ठानामिकाभ्यामुद्धृत्य बहिस्त्यक्त्वा हृन्मंत्रेण शुद्धमृत्ति
करवानमापूर्य्यास्त्रमंत्रेण समीकृत्य कवचमंत्रेण संसिच्यास्त्रमंत्रेण काष्ठादिना कुट्टयित्वा दृढीकृत्य कवचमंत्रेण कुशैः कुंडं समार्ज्य क
वचेनैवयोगोमयाद्भिः संलिप्य कवचेनैवाग्निसूर्यसोमानामष्टत्रिंशत्कलारूपं संचिन्त्य कवचेनैव मेखलात्रयं पवित्रसूत्रीकृतसूत्रेण
प्रतिमेखलं त्रिभिः संवेष्ट्य ॐ अमुककुंडाय पद्मासनंने नमः ॥ अमुककुंडाय एषोर्घः स्वाहेत्यादि वक्ष्यमाणविधिना आसनादिपीठांतैरुप
पचारैः प्रवचतुरस्त्रादिन्न कुंडनाम चतुर्थीनमोंतेन संपूज्य तथैव नाभिं संपूज्य मेखलात्रयं हृन्मंत्रेण तथैव संपूज्यास्त्रमंत्रेण कुंडं
वज्रपट्टं चिंत्य हृन्मंत्रेण कुशैः कुंडस्य चतुर्दिक्षु बहिर्ज्वालासापचतुष्पथं मार्गचतुष्टयं परिकल्प्य कवचमंत्रेणाच्छिन्नाग्रैः कुशैरस्त्र

मंत्राभिमंत्रितेकुंडं भित्तिगणसर्वमाच्छायत्न क्षपाटं विदध्यादित्यष्टादश संस्कारान् कुर्यात् ॥ अत्र शक्तौ प्रथमोदितैश्चतुर्भिर्वसंस्कारैः कुंडं
संस्कृत्य हृन्मंत्रेणास्त्रमंत्रेण वा दक्षिणमध्योत्तरेषु प्रागग्राः पश्चिममध्यपूर्वेषु उदग्राः इति तिस्रस्तिस्रो रेखाः कुशमूलेन विलिख्य प्रण
वेनाभ्युक्ष्य प्रागग्रासु रेखासु दक्षिणरेखायां विष्णवे नमः मध्यरेखायां रुद्राय उत्तररेखायां इन्द्राय उदगग्रासु रेखायां ब्रह्मणे मध्यरेखा
यां यमाय पूर्वरेखायां सोमाय इति संपूज्य तत्र वक्ष्यमाणया पीठपूजाक्रमेणाऽसं हृकादि परमात्मांतं योगपीठं संपूज्य तत्पद्मकेसरेषु
र्वाद्यासु दिक्षु दक्षिणोत्तरमध्यांतं ॐ जयायै नम ॥ ॐ विजयायै ॐ अजितायै ॥ अपराजितायै नित्यायै विलासिन्यै दोग्ध्र्यै अघोरायै मं
गलायै नमः ॥ इति संपूज्य ह्रीं सर्वशक्तिकमलासनाय नमः इति मध्ये पुष्पांजलिं निक्षिप्य तत्र भुवनेश्वरीति मंत्रेण वा हृन्नादि परमी
करणांतं तत्र मुद्रया विधाय मनादिषोडशोपचारैः संपूज्य तत्र श्रीशिवं त्वां ध्यात्वा मूलमंत्रेण तथैव तं संपूज्य देवीमृतुस्नातां
देवं च कामोन्मत्तं विचिंत्य स्वर्णादिपात्रेण मृत्पात्रेण वा नूतनेन सूर्यकांतादिभवमरणीभवं वा श्रोत्रियद्विजगृहाद्वाग्निमस्त्रमं
त्रेण पात्रे कृत्वा कवचमंत्रेण मंजानीयेन पात्रांतरेण पिधाय कत्मकपाभुवा सिन्यावा समानीतं गुरुदायास्त्रमंत्रेणोक्तमंगारं
नरात्मध्यात्क्रव्यादांशं नैर्ऋत्यकोणे उपरि न्यस्य देवांशमूलेन पुरतः संस्थाप्य मूलमंत्रेण वीक्ष्यास्त्रेण प्रोक्ष्यास्त्रेण कुशैः संताड्य क
वचेनाभ्युक्ष्य तत्र स्वमूलाधारस्थवह्निमंडलमध्यगतपरमात्मस्वरूपाग्निषोमात्मकविन्दोः प्रकाशाद्वह्निं मणिपूरकगतजठरान

55

लेनसहसुषुम्नामार्गेणवह्न्नासापुटांध्वनानिष्कास्यरमितिवह्निबीजमुच्चरन्पुरतःपात्रस्थितवह्नौवह्निचैतन्यसंयोज्य श्रोदर्यवैदवपार्थिव
वह्निनामैकंविभावयन्प्रणवेनाभिमंत्र्यवमितिधेनुमुद्रयामृतीकृत्यास्त्रमंत्रेणसंरक्ष्यकवचंमंत्रेणावगु ॥ ॐ रंवह्नयेनमः इतिगंधादि
भिः संपूज्यजानुभ्यांमवनीपातस्तत्पात्रंकराभ्यामादायकुंडस्योपरित्रिः ॥ प्रसादक्षिणंपरिभ्राम्यदेव्यायोनौशिवबीजमितिध्याय
त्स्वाभिमुखंकुंडमध्येप्रणवमुच्चरन्ममग्निनिक्षिप्यमैथुनांतधियादेवदेव्योर्व्याराचमनंदत्वा ॐ चित्पिंगलहनदहनपचपचदहद
हमज्ञापयस्वाहा ॥ इमंमंत्रमुच्चरन्मुखंकृत्वाकुशैरग्निंप्रज्वाल्यकाष्ठैः पडुकृत्यकृतांजलिस्तिष्ठन् ॥ अग्निंप्रज्वलितंवंदेजातवे
दंहुताशनं ॥ सुवर्णवर्णमनलंसमिद्धंसर्वतोमुखं ॥ इतिज्वलितमग्निमुपविश्यवक्ष्यमाणवह्निमंत्रेणप्राणायामत्रयंकृत्वाशिरसिभृ
गुऋषयेनमः ॥ मुखेगायत्रीछंदसेनमः ॥ हृदयेअग्नयेदेवतायेनमः ॥ गुह्येरंबीजायनमः ॥ पादयोः स्वाहाशक्तयेनमः ॥ इतिविन्यस्य
दीक्षांगहोमेविनियोगः ॥ इतिकृतांजलिर्वदेत ॥ लिंगेसुहिरण्यायैनमः ॥ गुह्येषुगगनायैनमः शिरसिसुरक्तायैनमः मुखेबूकृष्णा
येनमः ॥ नाशिकायांतुसुप्रभायैनमः ॥ नेत्रयोः पूत्र्यतिरक्तायै ॥ सर्वांगेषुबहुरूपायैनमः ॥ इतिसप्तजिह्वाविन्यस्य ॥ ॐ सहस्रार्चि
षेहृदयायनमः ॥ ॐ स्वस्तिपूर्णायसिरसेस्वाहा ॥ ॐ उत्तिष्ठपुरुषायशिखायैवषट् धूमव्यापिनेकवचायहुं ॐ सप्तजिह्वायनेत्रत्रया
यवौषट् ॐ धनुर्धरास्त्रायफट् ॥ इतिषडंगमंत्रानंगुष्ठादिकरतलांतंकरयोर्विन्यस्यहृदयादिषडंगेषुविन्यसेत ॥ ततः शिरसि ॐ त्र

ग्नये जातवेदसे नमः ॥ वामांसे अग्नये सप्तजिह्वाय॰ वामपार्श्वे ॐ अग्नये हव्यवाहनाय॰ वामकट्यां ॐ अग्नये अश्वोदराजाय॰ लिंगे ॐ अग्नये
वैश्वानराय: दक्षिणकट्यां ॐ अग्नये कौमारतेजसे॰ दक्षिणपार्श्वे ॐ अग्नये वीश्वमुखाय॰ दक्षिणांसे अग्नये देवमुखाय नमः इति
विन्यस्य वक्ष्यमाणवह्निरूपं स्वात्मानं ध्यात्वा सप्तजिह्वामुद्रां वश्वा प्रदर्श्य कुंडस्योत्तरभागे कुशास्तरे स्रुक्स्रुवौ प्रणीताप्रोक्षणीपात्रे
आज्यस्थालि परिविन्नयं समित्त्रयं च कातमकमिध्मल्नमूलसाग्रदीर्घकुलमुष्टिरिति पात्राण्यधोमुखानि संस्थाप्यान्यान्यपि॰
होमद्रव्यदध्यक्षताज्यवालिद्रव्याणि गंधपुष्पादिपूजाद्रव्याणि च यथायथं संस्थाप्याधोमुखहस्तमेकं रूपावोक्षणपूर्वकमुत्तानी
कृत्य प्रणीतापात्रं प्रक्षाल्यं स्वपुरतः कुशास्तरे निधाय शुद्धजलेन पूर्वं तत्र गंधाक्षतान् निक्षिप्य प्रादेशमात्रसाग्रं कुशद्वयं मध्ये व
ल्यग्रंथीयुतं जलं मध्ये उत्तराग्रं पवित्रं निधाय करद्वयानामिकांगुष्ठाभ्यां पवित्रमूलाग्रे विधृत्या स्वमंत्रमुच्चरन्पवित्रमध्येन जलं पात्राव
हिस्त्रिवालं भूमौति निक्षिप्य दितुत्पवनं विधाय तन्मध्ये किंचिद्धृतं निक्षिप्य तत्पात्रं कराभ्यां यामस्तकमुद्धृत्य कुंडस्योत्तरभागे कुशास्तरे नि
धाय तदुपरि प्रागग्रान्दर्भान्निक्षिपेदिति प्रणीतापात्रं संस्थाप्य प्रोक्षणीपात्रं प्राक्षाल्य शुद्धजलेन पूर्य तन्मध्ये प्रणीतापात्रं जलं पात्रांतरेण
धृत्य किंचिद्धृत्वा तेन मूलमंत्रेण सर्वाणि पात्राणी होमद्रव्याणि च प्रोक्षयेदिति द्रव्यासादनं विधाय प्रोक्षणीयजलेनाग्निं मूलमंत्रे
ण परिषिंच्यागमौश्चतुर्भिर्दर्भैः प्राचीं दिशमारभ्य प्राच्यामुत्तराग्रैरीशानादि अग्न्यंतं परिस्तीर्य पुनर्दक्षिणस्यां प्राग्राय: पूर्वपरि

56

स्तरणमूलमग्रेण हृदयन्तुरतः पश्चिमायामुत्तराग्रैर्दक्षिणपरिस्तरणमूलं मूलेनाहृदयमुत्तरस्यां प्रागग्रैः पश्चिमपरिस्तरणाग्रं मूले पूर्वपरि
स्तरणाग्रमग्रेणावाहृदयन्परिस्तीर्य परिधित्रयमादाय सर्वतः स्थूलं पश्चिमे उत्तराग्रं ततः कनिष्ठं दक्षिणोग्रे पूर्वाग्रं पश्चिमपरिधेर्मूलोपरि मू
लं यथा भवति तथा पुनस्ततोपि कनिष्ठमुत्तरस्यां पूर्वाग्रं पश्चिमपरिधेरग्रोपरिस्थमूलमिति कुंडस्य मध्यमेखलोपरि परिस्तरणोपरि परिधि
त्रयं निक्षिपेत् ॥ अत्र पश्चिममेखलाया परिस्तरणपरिधिस्थानंयोनितालोर्ध्वमेखलयोरंतराले कार्यमिति ॥ ततः पश्चिमपरिधौ ॐ ब्रह्मणे
नमः ॥ दक्षिणपरिधौ ॐ विष्णवे उत्तरपरिधौ ॐ रुद्राय इति संपूज्य स्विष्टदेवतामंत्रदीक्षितं ब्राह्मणमाहूय कुंडस्य दक्षिणभागे कुशासने समुप
वेश्य अमुकगोत्रोमुकशर्माहममुकगोत्रिसाममुकवेदांतर्गतामुकशाखाध्यायिनममुकशर्माणं मोक्षविधायदीक्षांगभूतहोमकर्मणि कृता
कृतावेक्षणाय ब्रह्मत्वेन त्वामहं वृणे इति वस्त्रालंकारादिभिर्वृणुयात् ॥ ततस्तं गंधादिभिः पूजयेत् ॥ ब्रह्मलाभे कुशबटुकं वा संपूज्य वह्नि
मंत्रेणार्घपाद्याचमनीयमधुपर्कपात्राणि संस्थाप्य संस्कृत्य कुंडमध्ये षट्कोणाभिन्नकर्णिकं केसरं चतुर्द्वारयुक्तं चतुरस्रत्रयवेष्टितमष्ट
दलकमलं वह्निपूजार्थं पीठं विभाज्य तत्र प्रागुक्तविधिना मंडूकादिज्ञानात्मांतं योगपीठं संपूज्याष्टदलकेसरेषु स्वाग्न्यादिप्रादक्षिण्येन मध्यांते
ॐ पीतायै नमः ॥ स्वं श्वेतायै अरुणायै कृष्णायै धूम्रायै तीव्रायै विस्फुलिंगिन्यै रुचिरायै ज्वालिन्यै नमः ॥ इति नवशक्तीः संपूज्य रं सर्व
शक्तिकमलासनाय नमः इति समस्तपीठं संपूज्य तन्मध्ये वह्नि ॥ कौबेरस्वस्तिकशक्त्यभीतिर्दधानमंभोजगतं त्रिनेत्रं ॥ सिंदूरवर्णतपनी

यभ्रूंषंवह्निजराभूषितमौलिमीडे इत्यग्निंध्यात्वासप्तजिह्वामुद्राप्रदर्श्य ॥ ॐ वैश्वानरजातवेदइहावहलोहिताक्षसर्वकर्माणिसाधयस्वाहा
अग्नयेनमइत्यग्निंत्रिःपुष्पांजलिनासंपूज्यपुनर्वह्निमंत्रमुच्चार्यअग्नयेएतदासनंनमः पुनर्वह्निमंत्रमग्नयेएषनैवेद्यर्घःस्वाहाएवंएतत्तेपा
द्यंनमः॥ एतत्तेआचमनीयंस्वधाएषतेमधुपर्कःस्वधाएतत्तेआचमनीयंस्वधाएतत्तेस्नानंनमः॥ इतिशिरश्चरणमुखमूर्द्धादिसर्वांगोदे
शेनमेखलायावहिःपात्रांतरघर्पाद्यादिस्नानांतानुपचारान्वह्नेस्तत्तद्देशभावनयापरिकल्प्यपुनराचमनीयंदत्वावह्नावेववस्त्रंदत्वापुनर्वि
राचमनीयंदत्वायज्ञोपवीतंनिवेद्यवह्निःपुनराचमनीयंदत्वागंधपुष्पंवह्नावेवनिनिवेदयनइतिवह्निमंत्रेणासमन्तादिपुष्पानानुपचाराग्र
पर्वर्यिषट्कोणेषुदेवायकोणमारभ्यमध्यांतं ॐ स्रूंहिरणायैनमः ॐ घूंगगनायै ॐ स्रुंरक्तायै ॐ व्रूंकृष्णायै ॐ लूंसुप्रभायै ॐ स्रूंअतिर
क्तायै ॐ ष्रूंबहुरूपायैनमः इतिसप्तजिह्वाःसंपूज्याष्टदलकेसरेषुअग्नीशासुरवायव्यदेवाग्रनादिचतुर्दिक्षुच ॥ ॐ सहस्रार्चिषेहृदया
यनमः ॐ स्वस्तिपूर्णायशिरसेनमः ॐ उत्तिष्ठपुरुषायैनमः ॥ ॐ धूमव्यापिनेकवचायनमः ॐ सप्तजिह्वायनेत्रायनमः ॐ धनुर्धराया
स्त्रायनमः ॥ इतिषडंगानिसंपूज्याष्टदलेषुदेवाग्रमारभ्य ॥ ॐ अग्नयेजातवेदसेनमः ॥ ॐ अग्नयेकौमारतेजसे ॥ ॐ अग्नयेसप्तजिह्वाय
ॐ अग्नयेहव्यवाहनाय ॐ अग्नयेअश्वोदरजाय० ॐ अग्नयेवैश्वानराय ॥ ॐ अग्नयेकौमारतेजसे ॐ अग्नयेविश्वमुखाय० ॥
ॐ अग्नयेदेवमुखायनमः ॥ इतिप्रादक्षिण्येनाष्टमूर्त्तिःसंपूज्यतद्बहिश्चतुरस्रेइन्द्रादिसायुधान्संपूज्यपुनर्वह्निमंत्रेणैववह्निंसंपूज्यधू

पदीपादिदत्वाग्नेर्वेग्रमुन्मृज्याग्रावेव निक्षिप्य प्राग्वदाचमनीयं दत्वा तांबुलं वस्त्रं चैव निधायाग्निप्रदास्रुक्स्रुवावादायाधोमुखेनाग्नौ प्रताप्य कु
शान्गृहीत्वा तयोरग्रं कुशाग्रैर्मध्यं मध्यैर्मूलं मूलैरिति त्रिः संमार्ज्य पुनरधोमुखेनाग्नौ प्रताप्य वामकरेणादाय प्रोक्षणीजलेन दक्षिणकराग्रे
णा प्रोक्ष्य पुनरपि प्राग्वत्प्रताप्य कुशानन्यानुत्क्षिप्य स्रुक्स्रुवौ स्वदक्षिणभागे कुशास्तरे निधायाज्यस्थालीमादायास्त्रमंत्रेण प्रक्षाल्य स्वपु
रतः कुशास्तरे निधाय तदुपर्युत्तराग्रं प्रादेशमात्रं समाग्रमध्ये तुलग्रंथियुतं कुशद्वयरूपं पवित्रं निधाय पात्रांतरस्थं गोघृतं दुग्धं वापि
द्रवणारहितं वीक्षणादिचतुर्भिः संस्कारैः संस्कृतमाज्यस्थाल्यां निक्षिप्य कुशांगारानुद्धृत्य मेखलाया बहिर्भूमौ वायव्यकोणे निक्षिप्य
शेषमग्नौ निवेश्य पुनर्दर्भद्वयं प्रज्वाल्य कवचमंत्रेणाज्ये निक्षिप्य शेषमग्नौ निवेश्य पुनर्दर्भद्वयं प्रज्वाल्य कवचमंत्रेणाज्ये प्रज्वा
ल्य कवचमंत्रेणाज्यस्थालीं परितः परिभ्राम्य दग्धशेषमग्नौ निक्षिप्य पुनः कुशान्प्रज्वाल्य हृन्मंत्रेणाज्ये प्रदर्श्य दग्धशेषं वह्नौ नि
क्षिप्याज्यस्थालीपात्रमुद्धृत्य प्रादक्षिणेपनकुपरितो भ्रामयित्वानीय स्वपुरतः कुशास्तरे निधाय वाह्यस्थानंगात्कुंडमध्ये निक्षिप्याय
स्पृशांगुष्ठानामिकाभ्यां करद्वयेन पवित्रमूलाग्रे ॥ धृत्वास्त्रमंत्रमुच्चरन्पवित्रमध्येन घृतमुत्प्लाव्य हृन्मंत्रमुच्चरन्तथैव पवित्रम
ध्येन स्वाभिमुखं घृतं त्रिः संप्लाव्य पवित्रमाज्यस्थाल्यां प्रागग्रं मध्ये निवेश्य भागद्वयं कृत्वा दक्षिणभागं शुक्लपक्षं वामभागं कृष्णपक्ष
परिकल्प्य पुनस्तथैव वामभागे पुनस्तत्रैव वामभागे इडां दक्षिणे पिंगलां मध्ये सुषुम्नामिति नाडित्रयं संचिन्त्य स्रुवेण दक्षिणभा

गादन्मंत्रेणाज्यमादायाग्नये स्वाहेति वह्नेर्दक्षिणनेत्रे हुत्वाग्नय इदं न ममेत्युद्देशत्यागं विधाय पुनर्मन्त्रेण वामभागाज्यं गृहीत्वा ॐ
सोमाय स्वाहेति वह्नेर्वामनेत्रे हुत्वा सोमायेदं न ममेत्युद्देशत्यागं विधाय पुनर्मन्त्रेण मध्यादाज्यं गृहीत्वा ॐ अग्निषोमाभ्यां स्वाहेति वह्ने
र्ललाटलोचने हुत्वा अग्निषोमाभ्यां न ममेत्युद्देशत्यागं विधाय पुनर्दक्षिणभागादाज्यं गृहीत्वा अग्नये स्विष्टकृते स्वाहेति वह्नेर्वक्त्रे हुत्वाग्न
ये स्विष्टकृते न ममेत्युद्देशत्यागं विधाय ॐ भूः स्वाहा अग्नय इदं न मम ॐ भुवः स्वाहा वायव इदं न मम स्वः स्वाहा सूर्यायेदं न मम ॐ भूर्भुवस्वः स्वा
हा प्रजापतय इदं न मम ॥ ॐ वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इति वह्निमंत्रेण वारत्रयं हुत्वाग्न इदं न म
मेति प्रवारमुद्देशत्यागं कृत्यागं कृत्वा ॥ ॐ अग्नेर्गर्भाधानं संपादयामि स्वाहा ॐ अग्नेः पुंसवनं संपादयामि स्वाहा ॐ अग्नेः सीमन्तोन्न
यनं संपायामि स्वाहा इति प्रतिकर्माज्याहुत्यष्टकं कृत्वा । वागीश्वरीगज्जातं वह्निं प्राग्युक्तरूपं ध्यायन् ॥ ॐ अग्नेर्जातकर्म संपादयामि
स्वाहा इत्यष्टवाज्याहुतीर्हुत्वा वह्नेर्नालिछेदं कृत्वा सूतकं शोधयन् वह्नेर्नामकरणं संपादयामि स्वाहा ॐ अग्नेश्चौलं संपा० ॐ अग्नेरु
पनयनं सं० ॥ ॐ अग्नेर्महानाम्न्यं सं० ॥ ॐ अग्नेर्महाव्रतं सं० ॥ ॐ अग्नेर्गोदानं सं० ॥ ॐ अग्नेरुपसदं सं० ॐ अग्नेः समावर्तनं सं० ॥ ॐ अग्ने
रुद्वाहं संपादयामि स्वाहा इति प्रतिकर्म अष्टावष्टावाज्याहुतीर्हुत्वा गर्भाधानाद्युद्वाहान्तान् संस्कारान्विधाय वह्नेः पितरौ देवदेव्यौ प्राग्व
त्संपूज्य विसर्ज्य मूलाग्रे घृतनसिक्ताः पंच समिधस्तूष्णीमेकदैवांजलिना वह्नौ समर्प्य ॥ ॐ स्तूं हिरण्यायै स्वाहा ॥ ॐ ष्णूं गगनायै० ॥

ॐ यं पुरक्तायै० ॥ ॐ बूं कृष्णायै० ॐ लूं सुप्रभायै ॥ ॐ यूं अतिरक्तायै स्वाहा अपूं बहुरूपायै स्वाहा ॥ ॐ सहस्रार्चिषे हृदयाय स्वाहा ॥ ॐ स्वस्तिपूर्णाय
सिरसे स्वाहा ॥ ॐ उत्तिष्ठपुरुषाय शिखायै स्वाहा ॥ ॐ धूमव्यापिने कवचाय स्वाहा ॐ सप्तजिह्वाय नेत्राय स्वाहा ॥ ॐ धनुर्धराय अस्त्राय स्वाहा ॥ ॐ अ-
ग्नये जातवेदसे स्वाहा ॥ ॐ अग्नये सप्तजिह्वायः स्वाहा ॐ अग्नये हव्यवाहनाय स्वाहा ॐ अग्नये अश्वोदरजाय नम ॥ ॐ अग्नये वैश्वानराय० ॐ
अग्नये कौमारतेजसे स्वाहा ॥ ॐ अग्नये विश्वमुखाय स्वाहा ॐ अग्नदेवमुखाय स्वाहा इति जिह्वांगमूर्त्तिमंत्रैरेकैकामाहुतिं दत्वा ॐ लं इन्द्राय स्वा-
हा ॥ ॐ अग्नये स्वाहा इत्यादिलोकपालानां तदायुधानां च तत्तन्नामभिरेकैकाहुतिं सर्वत्र प्रागवत्तत्तन्नामादेशात्यागं च कुर्यात्ततः स्रुवेणाज्यं स्रुवि च
तुर्वारं निक्षिप्याधोमुखं स्रुवं स्रुचो मुखे निधाय पुष्पाद्युक्तवह्निमंत्रमुच्चार्य स्वाहास्थाने वौषडिमत्रौ निष्ठन्हुत्वा चोपविश्य ॥ ॐ स्वाहा० श्री
स्वाहा ॥ ॐ श्री ह्रीं स्वाहा ॥ ॐ श्री ह्रीः क्लीं स्वाहा० ॥ ॐ श्री ह्रीं क्लीं ग्लौं स्वाहा० ॥ ॐ ह्रीं क्लीं ग्लौं गं स्वाहा० ॥ ॐ श्री ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा ॥ ॐ श्री
ह्रीं ग्लौं गणपतये वरद स्वाहा० ॥ ॐ श्री ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं वशं स्वाहा ॥ ॐ श्री ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वसजनं
मेवसमानय स्वाहा० ॥ इति दशधा विभक्तेन महागणपतिमंत्रेण चतुर्वारमाज्येन जुहुयादित्यग्निस्थापनविधिः ॥ इत्यमग्निस्थापनं विधाय ततो
नूतनताम्रादिपात्रमस्त्रमंत्रेणाप्रक्षाल्य तत्र मूलमंत्रेणाष्टधाभिमंत्रितान्तंदुलान्पंचदशप्रसृतिमितानस्त्रमंत्रं जपन्निक्षिप्य तत्र गोदुग्धं या-
वत्पक्वं भवति तावद्विक्षिप्य प्रक्षालितेन पात्रेण कवचमंत्रमुच्चरन् तत्पात्रवदनं पिधाय मूलमंत्रं स्मरन् घृतप्लुतो गुरुः स्वयं पाकान्समन्तु

नेमूलमंत्रेणस्रुवेणाज्यं निक्षिप्य कवचमंत्रेण तन्नात्रमवतार्यास्त्रमंत्रेणाभिमंत्रितेषु शरावत्रयं निक्षिप्य त्रिधा विभज्यैकभागं देवायकुंभस्यापतिवेधमंडलं परितः पूर्वमंकुरार्पणकर्मणि आहृतांकुरपात्राणि निक्षिप्य घृतपूर्णपिष्टमयदीपांश्च निधाय कुंडमध्ये वह्नेर्मुखे सचकं सावरणं देवं विभाव्य तत्र च वक्ष्यमाणविधिना मंडुकादिपीठमंत्रा॥ ॥संपूज्य तत्र देवमावाह्य वक्ष्यमाणविधिना सांगं सावरणं सर्वोपचारैः पूजयेत्॥ अत्रार्यादिस्नानां तानपि पूजा व देवकुंडा बहिःपात्रांतरे देवमुदिश्य कल्पयेत्॥ अन्यत्सर्वं कुंडमध्य एव कल्पयेदिति॥ ततो मूलमंत्रेण वह्निदेवतयोर्वह्नेः कीकरणार्थं पंचविंशत्याज्याहुतीर्हुत्वास्वात्माग्निदेवतानामेकीभावयन्मूलेन नाडीसंधानार्थमेकादशवारं घृतेन हुत्वा षडंगावरणदेवतानामेकैकामाहुतिं कृत्वा प्राक्स्विन्नचरोस्तृतीयांशं नवधा विभज्यैकांशेन मूलमंत्रेण पंचविंशतिधा कृत्वा प्रागादिदिक्स्थाष्टसु कुंडेषु ऋत्विग्भिः प्रागुक्तविधिनाष्टादशसंस्कारेषु गुरुः स्वयं कुंडादग्निमुद्धृत्योद्धृत्य निक्षिपेत्॥ ऋत्विग्भिश्च स्वस्वकुंडवह्निं परिषेचनपरिस्तरणपरिधिप्रक्षेपणपूजादिभिः सम्यक्परितोष्य समिद्धे तस्मिन्स्वस्वदेवतानित्यपूजोक्तविधिना स्वस्वमतपूदिपूर्वकं देवमावाह्य नांचूलांतैरुपचारैः सम्यक्संपूज्य वह्नेः किकरणनाडिसंधानांगावरणहोमांते मूलमंत्रेणागुरुणा विभज्य दत्तेन घृतमिश्रितेन पायसेन पंचविंशतिधा स्वस्वकुंडेषु जुहुयुः॥ अथ गुरुः सर्वतोभद्रमंडलस्य पूर्वादिवीथीचतुष्टये मेषादिस्थानेषु प्राच्यां मेषवृषौ आग्नेय्यां मिथुनं दक्षिणे कर्कतसिंहौ नैर्ऋत्ये कन्या पश्चिमे तुलावृश्चिकौ वायव्ये धनुः उत्तरे मकरकुंभौ ऐशान्यामीनं इति विभक्तेषु राशिषु तदधिपेभ्यो ग्रहेभ्यो नक्ष

59

॥राम॥
॥५९॥

०अ१८०२

त्रेभ्यो: करोम्यश्च बलिं दद्यात्तद्यथा॰ ॐ मेषवृश्चिकराश्यधिपतये मंगलाय एष: बलिर्नमः॥ एवं वृषतुलाराश्यधिपतये शुक्राय एष बलिर्नमः॰ ॐ मिथुनकन्याधिपतये बुधाय॰ कर्कराश्यधिपतये सोमाय॰ सिंहराश्यधिपतये सूर्याय॰ धनुर्मीनराश्यधिपतये बृहस्पतये॰ ॐ मकरकुंभराश्यधिपतये शनैश्चराय एष: बलिर्नमः पुनः मेषराश्यंशसमुत्ताश्विनीभरणीकृत्तिकापदनक्षत्रदेवताभ्यो दिवानक्तंचरेभ्यः सर्वेभ्यो भूतेभ्यो एष बलिर्नमः एवं वृषराश्यंशभूत कृत्तिकापादत्रयरोहिणीमृगशीर्षनक्षत्रेभ्योदिदेवेभ्यादिभ्यः मिथुनराश्यंशसमुत्तमृगशिरोत्तरार्द्धार्द्रापुनर्वसुपादत्रयनक्षत्रदेवताभ्यो दिदेवेभ्यादि॰ एवं अग्रेपि मंत्रा ऊहनीयाः॥ ततो मीनमेषयोरंतराले बलकरणाय एषगंधाक्षतयुक्तपयसबलिर्नमः एवं वृषमिथुनयोर्मध्ये बालकरणाय मिथुनकर्कटयोर्मध्ये कौलवाय॰ सिंहकन्ययोर्मध्ये॥ तैतिलाय कन्यातुलयोर्मध्ये गराय॰ वृश्चिकधनुषोर्मध्ये वणिजे॰ धनुर्मकरयोर्मध्ये विष्टये एषगंधाक्षतेत्यादि॥ इत्थं कृतशेषं रायसेन बलिं दत्वा ततस्त्वजीयभागं शिष्येण सह गुरुर्भुक्त्वा स्वभ्यवांस्वाचांताय शिष्याय षडंगन्यासयोगेन सकलीकृताय प्रादेशमात्रं दंतकाष्ठं यथोक्तं हृन्मंत्रेणाभिमंत्रितं दद्यात्तच्छिष्योपि तेन दंतधावनं विधाय दंतकाष्ठं प्रक्षाल्य पुरतः परित्यज्याचम्य गुरोः समीपं गच्छेत् ततो गुरुः शिष्यं शिखाबंधनेन मूलमंत्राभिमंत्रितेन संरक्ष्य तेन सार्द्धं समस्थो वेद्याः कुशास्तरणे स्वापं रात्रौ शयनं कुर्यादित्यधिवासः॥ ॥सुंदराचार्यशिष्येणाश्रीनिवासेन धीमता॥ चंद्रिकायां गुणीतायां प्रकाशो गाच्च पंचमः॥ ॥इति श्रीसुंदराचार्यचरणारविंदद्वंद्वांतेवासिना श्रीनिवासभट्टेन विरचितायां श्रीशिवार्चनचंद्रि

कार्यां पंचमः प्रकाशः ॥ ॥ ततो गुरुः शिष्यः प्रातरुत्थाय कृतावश्यकक्रिया शिष्याय प्रादेशमात्रं यथोक्तं दंतकाष्ठं मूलमंत्रेण सप्तधाभिमं-
त्रितं दत्वा दंतधावनं कारयेत् ॥ शिष्योपि तेन वक्ष्यमाणा दंतधावनमंत्रं स्मरन् दंतान् विशोध्य दंतकाष्ठं प्रक्षाल्य पुरतश्चतुरस्रे हस्तमात्रे स्थंडि-
ले त्यजेत् ॥ ततो गुरुस्तत्परीक्षां कुर्यात् ॥ तत्र शुभाशुभफलानि ॥ सारसंग्रहे ॥ ईशानाग्रे ज्ञानलाभः प्रागग्रे मूर्तिरुत्तमा आग्नेयाग्रे मनस्ता-
पो बंधुनाशश्च दक्षिणे ॥ राक्षसाग्रे मृत्युभयं वारुणाग्रे मनःशुचः ॥ वायव्याग्रे व्यग्रता चैवोत्तराग्रे सुखावहः इति ॥ ततः स्वप्नपरीक्षां च कु-
र्यात् ॥ ततः श्रीकुलप्रकाशतंत्रे ॥ कुस्वप्ने मध्यमा दीक्षास्फुक्रूरे मध्यमा मता ॥ उत्तमस्वप्नपूर्वा तु दीक्षा सर्वोत्तमा मता ॥ ततो दंतकाष्ठस्व-
मंगलदिगग्रपाते दुःस्वप्नदर्शने च शमश्चित्तं सारसंग्रहे स्वप्नमंगलस्यातपाते प्रायश्चित्तं समाचरेदिति ॥ प्रायश्चित्तं त्वग्रे पुरश्चरणा-
प्रकरणे वक्ष्यते ॥ ततः शिष्योपि स्नातः कृतपूर्वाह्णिकक्रियः समलंकृतः श्रीगुरुं प्रणम्य तदाज्ञया तत्पार्श्वे उपविशेत् ॥ ततो गुरुः स्वकृ-
त्विजश्च स्वस्वकुंडे तथैव देवं समावरणं संपूज्य स घृतैस्तिलैस्तत्तत्कल्पोक्तपुरश्चरणहोमोक्तद्रव्यैर्वाष्टोत्तरशतं वा जुहुयुः ॥ ततो गुरुः शिष्यं भू-
तानिरिक्तं पंचगव्यं पाययित्वा कुंडसमीपं गत्वा दिव्यदृष्ट्या विलोक्य तस्य हृदयारविंदज्ञीमात्मानं भूतशुद्ध्युक्तपरिपाट्या तद्देहाद्ब्रह्मरंध्रमा-
र्गेण निःसार्य स्वात्मनि योगबलेन गुरुरुक्तयुक्त्या संयोज्य शिष्यस्य षडध्वशोधनं कुर्यात् ॥ तच्च शिष्यस्य पादयोः कलाध्यानं निवृत्तिप्रतिष्ठावि-
द्या शांतिः शांत्यतीता चेति पंचकलात्मकं संचिंत्य ततस्तस्य लिंगप्रदेशे शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाविद्याकलारागकालनि-

60

पतिप्रकृतयप्रकृत्यहंकारबुद्धिमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलिलपृ
थिव्यात्मकषट्त्रिंशतत्त्वरूपंशैवतत्वाध्वानंध्यायेत्॥इतिशैवदिक्षायां॥वैष्णवदिक्षायांतुजीवप्राणधियस्तुमनइंद्रियदशकतन्मात्राभूत
नांपंचकं॥पिंडत्वमंतेजसांचिंतयेत्तच्चवासुदेवप्रमुखाश्चत्वारउपदिष्टाइति॥इंद्रियदशकंप्रागुक्तंश्रोत्रादयोवागादयश्चतन्मा
त्राश्चशब्दादय॥भूतपंचकमाकाशादि॥तेजंसांत्रपंचशोमनुष्याग्निमयंवासुदेवप्रमुखाश्चवासुदेवसंकर्षणप्रद्युम्नादिनिरुद्धश्च
त्वारसौदिक्षायांतुभूततन्मात्रेंद्रियाणिमनोगर्वश्चधीस्तथा॥प्रधानंचेतिगर्वोहंकारःप्रधानंप्रकृतितत्वं॥शक्तिदिक्षायांतुआत्म
विद्याशिवाख्येतिविपरीतास्तस्वच॥सर्वतत्वंचेति॥विपरीताशिवविद्याआत्मेतिक्रमेणतत्वचआत्मविद्याशिवायवइतिदश
तत्वानीत्यंतत्रदिक्षायांतत्तदध्वानंचिंतयेदितिगाणपत्यदीक्षायांतुशैवतत्वान्येवज्ञातव्यानि॥ततशिष्यगात्रेअतलवित
लसुतलमहातलःतलातलरसातलपातालभूर्भुवस्वर्महर्जनस्तप॥सत्यलोकात्मकचतुर्दशभुवनरूपंभुवनाध्वानंसंचिंतयेत्तस्यहृ
दयेअकारादिक्षकारांतवर्णावदंवरूपंवर्णाध्वानंविभाव्यतस्यललाटेमूलमंत्रवर्णसमुदायरूपंपदाध्वानंसस्मृत्यततः॥शिष्यशिरसिप
दसमुदायमंत्रस्वरूपंमंत्राध्वानंध्यायेदितिशिष्यशरीरेषडध्वंसंचिंत्यतंकूर्चेनस्पृशन्गुरुःस्वकुंडेॐअमुकस्यकलाध्वानंशोधयामि
स्वाहाःएवंघृतानैस्तिलैरष्टधाहुत्वाकलाध्वानंतत्वाध्वनिविलीनंविभाव्यपुनः॥अमुकस्यतत्वाध्वानंशोधयामिस्वाहाइत्यष्टधा

॥शि॰ चं॥
॥६१॥

हुत्वा भुवनाध्वान वर्णाध्वनि विलिनं विभाव्य पुनः॥ वर्णाध्वानं शोधयामि स्वाहा इत्यष्टवाहुत्वा तं ब्रह्मरंध्रस्थ परमशिवे विलिनं विभाव्य पुनः संहृतिप्रतिलोमेन शिवशक्त्यात्मंत्राध्वानं संस्थाप्य ततः॥ पदाध्वानं तस्मात् वर्णाध्वानं ततो भुवनाध्वानं ततस्तत्वाध्वानं ततः कलाध्वानं च सृष्ट्वा तत्तत्स्थानं संस्थाप्य शिष्यदिव्यदेहध्यावि लोकात्मनि स्थितं शिष्यचैतन्यं तद्धृदपारविंदे स्त्रावाहनोक्तप्रकारेण तद्दुलरंध्रेणासंयोज्य ततः पुनः पूर्ववत्स्वदेवतायाङ्गावरणदेवताभ्यो घृतेनैकैकामाहुतीं हुत्वा ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा॥ ॐ भुवो वायवे चांतरिक्षाय च महते च स्वाहा॥ ॐ सुवरादित्याय च दिवे च महते च स्वाहा॥ ॐ भूर्भुवस्सुवस्संद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा इत्याज्याहुतिचतुष्टयं हुत्वा इत॥ पूर्वप्राणबुद्धिदेहधर्माधिकारजाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा इत्यष्टवाज्याहुतीं हुत्वा ॐ सहस्रार्चिमहातेजा नमस्ते वहुरूपं धृक्॥ सर्वाशिने सर्वग नपावकाय नमो स्तुते॥ त्वं रौद्र घोरकर्मा च घोर हालं नमामि ते॥ विष्णुस्त्वं लोकपालो सि शांतिमंत्र प्रयच्छ मे॥ इत्यग्निप्रार्थ्याग्निमंत्रेण प्राग्वदग्निं संपूज्य न्यूनातिरिक्तसिद्ध्यर्थं ददामि सघृतं तिलं॥ ॐ हं साङ्गं कुरु कुरु स्वाहेति सतलेरेकामाहुतीं हुत्वा घृतेन स्रुवमापूर्य तदुपरि॥ पुष्पमधोमुखे स्रुवं च निधाय शंखवत्संपुटाभ्यां कराभ्यां गृहीत्वोत्थाय स्रुक्स्रुवयोर्मूलं नाभौ निधाय वौषडंतेन मूलमंत्रेणाहुतित्रयं हुत्वा प्राग्वत्तत्र देवं संपूज्य वहिः सकाशाद्वास्य कलशो विसृज्य प्राग्वद्वाहृत्याग्निजिह्वांगमूर्तिमंत्रैरेकैकामा-

61

॥राम:॥
॥६१॥

ज्याहुतिं कृत्वा प्राग्वत्प्रोक्षणीयजलेनाग्निं परिषिंच्य ॥ ॐ भो भो वह्ने महाशक्ते सर्वकामप्रसाधकं ॥ कर्म्मन्तरेपि संप्राप्तसान्निधिं कुरु सादरमित्यग्निं प्रार्थ्य संहारमुद्रयानेन स्वात्मन्युद्वास्य परिधीपरिस्तरणांश्च तूष्णीमग्नौ प्रक्षिप्य प्रणीता ॥ पात्रमुद्वास्य स्वपुरतः कुशास्तरे निधाय ॥ ॐ प्राच्यै दिशे नमः ॥ ॐ दक्षिणायै दिशे नमः ॥ ॐ प्राच्यै दिशे नमः ॐ उदीच्यै दिशे नमः ॥ इति तत्तद्दिक्षु प्रणीताजलमुत्क्षिप्याधरायै दिशे नमः ॥ इति भूमौ जलं क्षिप्य भूमौ पतितजलेन स्वात्मानं शिष्यं च कुंभं संप्रोक्षयेदिति प्रणीतां वामतं विधाय ब्रह्माणमुद्वासयेत् ॥ ब्रह्मस्थाने वृताय ब्राह्मणाय सहिरण्यं पूर्णपात्रं दापयेदिति दीक्षांगहोमविधिः ॥ ततो नेत्रमंत्रेण शिष्यनेत्रे नूतनपट्टवस्त्रेण वध्वा तद्धस्ते तत्गृहीत्वा कुंभसमीपं नीत्वा तस्यांजलिं पुष्पैरापूर्य स्वयं मूलमंत्रमुच्चरन् ॥ घटस्य देवतायै पुष्पांजलौ दापयित्वा तस्य नेत्रबंधनं विमुंच्य कुशास्तरे तं समुपवेश्य अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ इति मंत्रं शिष्यं पाठयित्वा कुंभदेवं सांगं सावरणं सर्वोपचारैः संपूज्य प्रागुक्तभूतशुद्धिविधिना तस्य देहं हृन्य संशोध्योत्पाद्य तस्य देहे मूलमंत्रस्य ऋष्याद्यखिलन्यासजालं विन्यस्य पुनः कुंभस्य देवतां गंधादिपंचोपचारैः संपूज्य मंडलद्वारदेवताः सलोकपालांगावरणदेवता गणेशादिचतुरायतनदेवताः स्वस्वांगावरणादेवहिता देवस्यांगे विलीना इति विभाव्य तां प्रागुक्तविधिना षडंगन्यासयोगेन सकलीकृत्य तेजोरूपतां तामापाद्य तत्तेजोरूपं कलशजलं ब्रह्मरूपं संचिंतयन् शिष्यं समलंकृतं वेद्यासमीपे सर्वतोभद्रादिमंडलपूर्वाभिमुखं समुपवेश्य पंचवाद्यघोषपुरःसरं गुरुः कुंभं समुद्धृत्य कुंभमुखस्थपल्लव

वादिकं कलशहृक्षशारवाबुध्वा शिरसि निधा प्राग्वद्विलोममातृकामुच्चरन् वदेद्घोषं कुर्वस्त्विति रन्येष्व ब्राह्मणो ॥ सह मूलमन्त्रेण पूर्वाभिमुखो
पविष्टमुत्तराभिमुखस्तिष्ठन्नभिषिंच्य पुनः पूर्वमभ्यर्चितमस्त्ररूपं करकं गृहीत्वा नेत्रोयै रक्षार्थमभिषिच्य तत्करकावशिष्टजलेन शिष्य
मावम् पीत्वा देवतास्वरूपं ज्ञात्वांऽगन्यासेन कलीकृत्य शुद्धे धौते नूत्ने वाससि परिधाय स्वाचांतेनं समीपे समुपवेश्य शिष्यदेहे संक्रांतस्य
देवतस्यैव देहगंधादिपंचोपचारैः संपूज्य शिष्यदेवतयोरैक्यं विभावयन्सुविनीतस्य शिष्यस्य दक्षिणकर्णे श्रीमूलमंत्रं गणेशादि चतुरापत्तपू
र्वकं गणेशदीक्षायंत्रप्यादिपूर्वकं वक्ष्यमाणतत्त्वदिग्नस्थानक्रमेण वारत्रयं ४ वदेत् ॥ शिष्यो ब्राह्मणश्चेत्तस्य हस्ते मंत्रदानरूपेणोदकं द
द्यात् ॥ अन्यस्य त्वेवमेव वदेत् ततः शिष्यस्तु गुरूपदिष्टं मूलमंत्रं ऋष्यादिकरषडंगन्यासपूर्वकमष्टोत्तरशतवारमष्टाविंशतिवारमष्टधा वा
जपित्वा जपं समर्प्य गुरुमंत्रदेवतानामैक्यं विभाव्य साष्टांगं वकृ श्रीगुरुं प्रणम्य पुनः पंचांगप्रणामेत् ॥ तत्र साष्टांगपंचांगयोर्लक्षणमुक्तं शा
गेवप्रमाणो इत्थं प्रणम्य गुरवे शक्त्विग्म्यध्व प्रमाणोक्तां दक्षिणां दद्यात् ॥ ॥ अथैवं विस्तरतः क्रियादीक्षां कर्तुमसक्तश्चेन्मूर्वैक्केकेने नि
ष्टे मंडपे प्राग्वद्वेदिकायां मंडलं कृत्वा तथैव तत्र कुंभस्थापनं कृत्वा ऋत्विग्वरणाशक्तौ गुरुश्चतुरश्रमेवकुंडं कृत्वा तत्राग्निस्थापनाद्यखिलक
र्म कृत्वोक्तविधिनाभिषिषिंच्य दीक्षां दद्यात् ॥ मंडपकरणाशक्तौ क्वचित्प्रशस्तस्थले प्राग्वन्मंडलं कृत्वा तदशक्तौ चतुरस्रवृत्तवेष्टितमष्ट
दलकमलं वा निमयितप्रोक्तविधिना कलशं संस्थाप्य प्राग्वच्चतुरस्रं कुंडं तदशक्तौ प्रागुक्तविधिनां स्थंडिलं वा कृत्वा तत्रोक्तविधिनाग्निसंस्था

62

प्याग्निस्थापने विस्तारः शक्तो नित्यहोमोक्तविधिना वग्निं संस्थाप्योक्तविधिना वाग्निं स्थाप्योक्तविधिना होमादिकं कृत्वाभिषिंच्य मंत्रं दद्यात् ॥ अथा
ग्नेर्वर्णाद्याः तत्र नारदपंचरात्रे ॥ अग्ने भमिश्च गंधाश्च शब्दाश्चाकृतयस्तथा ॥ विकाराश्च शिखाश्चैव संवेद्या कर्मसिद्धये ॥ पद्मरागद्युतिः श्रेष्ठा
लाक्षारसमप्रभः ॥ बालार्कवर्णो हुतभुग्ज पार्थ शस्यते बुधैः ॥ इन्द्रगोपकसंकाशः शोणिमो ऽथ पावकः ॥ रक्तचापनिभ ॥ स्वर्णकुसुंभास्य स्त
थैव च ॥ रक्तानां पुष्पजातीनां वर्णो नाग्नेर्हितोच्यते ॥ अथ गंधः ॥ सुगंधद्रव्यगंधोऽग्निर्घृतगंधाश्च शोभनः ॥ आयुर्दः पद्मगंधः स्याद्बिल्वगंधश्च
सुव्रत ॥ नागचंपुंनागपानलामुन्यिकानिभः ॥ पद्मेदीवरवकुलरसर्पिर्गुग्गुलसंनिभः पावकस्य शुभो गंध इति ॥ अथ शब्दः ॥ जीमूतवल्लकी
शंखमृदंगध्वनितुल्यकः शब्दोऽग्नेः सिद्धये हेतुरेवान्यस्मादसिद्धदः ॥ शारदानिलकेपि ॥ भेरीवारिदहस्तीन्द्रध्वनिर्वह्नेः ॥ शुभावह इति ॥ अथाकृति
नारदपंचरात्रे ॥ छत्राकारो द्विजश्रेष्ठ ध्वजचामरसन्निभः ॥ विमानानां हयानां च प्रासादानां वृषस्य च ॥ आकारेणाथ हंसानां मयूराणां च सिद्धि
द ॥ तथाकृतिः सदा वह्निः सद्यः सिद्धिकरः स्मृतः ॥ शेषाणां दुष्टराणां रूपं शस्तं होमकर्मणि ॥ यद्रूपकथितं चैव न यदि तस्य प्रदक्षिणा ॥ अन्योन्यत्वं प्रप
द्येत न तदा सिद्धिकरो नर ॥ अथ शिखा ॥ विषमाश्च शिखा वह्नेः स्युरादय शुभावहा ॥ ह्रस्वा ह्रस्वोन्नतादीर्घाग्निज्वाला ज्वाला ॥ सिद्धिदा स्मृता ॥ तथा
शारदानिलकेपि ॥ प्रदक्षिणास्तकनकपाण्डुराभाः शिखिनः शिखा ॥ शुभदा यजमानस्य राज्यस्यापि विशेषतः ॥ तथा नारदपंचरात्रे ॥ प्रदीप्ते लो
लिहानेऽग्नौ निर्धूमे मग्ररोन तथा ॥ हूं पेन्नुस्ति प्रदेचैव होतव्यं सिद्धिमिच्छता ॥ स्निग्धः प्रदक्षिणावर्त्तस्तु शब्दश्चापि प्रियो भवेत् ॥ नित्यमेवं शुभकरो प

॥शि॰च॥
॥६३॥

दन्यैर्वर्जितोगुणौ॥ अथनिषिद्ध॥ अल्पतेजाश्चरूक्षश्चविस्फुलिंगसमन्विते॥ धूमावलीरज्वालाश्चकृसात्मैवसिद्धिदः।दुर्गंधश्चावलिट
स्वकृत्स्नश्चयोजयेत्॥ भूमिंचविलिखेयस्तुसोपिदघनराभवं॥ तथासारदानिलके॥ कृष्णःकृष्णागतेवर्णेयजमानंविनाशयेत्॥ प्रतिगन्धोद्भूत
मूजोहोतुर्दुःखप्रदोभवेत्॥ छिन्नहस्ताशिखाकुर्यान्नतुंधनपरिक्षय॥ शुकपक्षनिभोधूमःपारावतसप्रभ॥ हानिंतुरगजातीनागवांचकु
र्तेविरात्॥ तथानंत्वानरे॥ खरोष्ट्रमहिषादिनांवातमत्रनिषिद्धये॥ रूक्षश्चवेशब्दस्त्वपसव्यगतिसःसिदा॥ उच्छिखेवप्रमुखोयश्चवंयश्चार्धं
शिखस्वव॥ नेष्यतेसोमुनिश्रेष्ठशास्त्रेस्मिन्नपारमेश्वरे॥ अत्रैवंविधेषुदोषेषुप्रायश्चित्तमुक्तंकुलप्रकाशतंत्रे॥ एवंविधेषुदोषेषुप्रायश्चि
त्तायदेशिक॥ मूलेनाऽयुतजुह्यात्पंचविंशतिमाहुतिरिति॥ पंचविंशतिरेकैकस्मिन्दोषे॥ अथवह्नेःसात्त्विकादिजिह्वाभेद॥ तत्रदिक्षा
गहोमशांतिकादिशात्त्विकहोमेषुहिरण्याख्याःप्रागेवोक्ता॥ अथवश्यादिकामेहोमेषुराजसजिह्वाकुलमूलावतारे॥ गजस्वपद्मरागे
कासुवर्णाभडलोहिताचतुर्थिलोहिताधूमिन्यन्याकरालिकेति॥ ॥अथक्रूरहोमेनामस्यापितत्रैव॥ नामस्योविश्वमूर्तिकास्फुलिं
गनिधूम्रवर्णाचचतुर्थिमनोजवा॥ पंचमिलोहितारव्यास्यात्करालीगदिनास्तथा॥ कालीचसप्तमीप्रोक्ताज्ञातव्याकार्यभेदत॥ यागक्रियाको
कास्यहोमक्रूरहोमेषुचक्रमात्॥ इति॥ अथजिह्वानामधिपदेवनानत्रकुलप्रकाशतंत्रे॥ जिह्वानामदिदेवास्तुविबुधापितरस्तथा॥ गं
धर्वजक्षनागाश्चपिशाचाराक्षसास्तथा॥ रसनासुसुरादीनांजुहुयात्कार्यसिद्धये॥ नत्याद्गुप्ततोदेवावाह्निनासिद्धिमृच्छमां॥ रसना

63

॥रामः॥
॥६३॥

स्वीयनाभाः कृसानोप्रायशोमता ॥ इति ॥ अथात्र होमकाले वह्नेर्जिह्वाशिरः कर्णादिकंज्ञात्वा जिह्वायामेवजुहुयात् ॥ तथाचोक्तंमहाकपि
लपंचरात्रे ॥ श्रुतकल्पेच ॥ सर्वकार्यप्रसिध्यर्थंजिह्वायामेवहोमयेत् ॥ चक्षुकर्णादिकंत्त्का होमयेद्दिशीकोतम ॥ अग्निकर्णौ हुतंयस्तुकुर्याच्चेद्व्या
धिनोभयं ॥ नाशिकायामहुःखंचक्षुषोनाशनंभवेत् ॥ केशेदारिद्र्यदंपाक्तं तस्माज्जिह्वासुहोमयत् ॥ यत्रकस्तंतत्र कर्णौयत्र धूममस्तुनाशिके
यत्राल्पज्वलनंनेत्रं भस्मन्तुतच्छिर ॥ यत्रैवज्वलितोवह्निस्तत्रजिह्वाप्रकीर्त्तितेति ॥ तथासारदातिलके ॥ वैश्वानरंस्थितंध्यायेत्सर्वहोमेषुदेशिका
शयानमाज्यहोमेषुनिषनंशेषवस्तुषु ॥ आस्यान्तर्जुहुयाद्वह्नेर्विपश्चित्सर्वकर्मसु ॥ कर्णहोमेभवेद्व्याधिर्नेत्रेन्धत्वमीरितं ॥ नाशिकायांमनः
पीडामस्तकेधनसंक्षय ॥ सधूमोग्निः शिरः प्रोक्तो निर्धूमश्चक्षुरेवचः ॥ जलन्कृशोभवेत्कर्णः काष्ठलग्नश्चनाशिका ॥ अग्निर्विज्ञायनेयत्रसु
दस्फतिकसन्निभ ॥ तन्मुखंतत्रविज्ञेयंचतुरंगुलमानतः इति ॥ अथस्रुक्स्रुवौतत्रसारसंग्रहे ॥ स्रुक्स्रुवौसिंशपाश्वत्थश्रीपर्णीखदिरामजौ ॥ चंद
नक्षयदेवद्रुवैकंकतसमीभवौ ॥ विल्वोदुंवरपालाशनागकेशरसंभवौ ॥ वकुलाशोकपुन्नागप्लक्षन्यग्रोधचंपके ॥ निर्मिताविति ॥ शा
रदातिलके ॥ श्रीपर्णीशिंशपाक्षीरद्राश्चिकेनकमंवुध ॥ गृहीत्वाविभजेद्धस्तमात्रंषट्विंशतापुना ॥ विंशत्यंशेर्भवेद्दंडोवेदिस्तेरस्तभिर्मवे
त् ॥ एकांशेनमितः कंठः सप्तभागमितंमुखं ॥ वेदिच्यंशेनविस्तारकंठस्यपरिकीर्त्तितं ॥ अग्रेकंठसमानंस्यान्मुखेमार्गंप्रकल्पयेत ॥ क
निष्टांगुलिमानेनसर्पियोनिर्गमायच ॥ वेदिमध्येविधानव्याभावेनैकेनकर्णिका ॥ विदधितवहिस्तस्मादेकांशेनाभिनोवटं ॥ तस्यखातंत्रि

भिर्भगैर्वृत्तमर्द्धांशतो वहिः ॥ ञ्चं नैकेन परितो दलान्यष्टौ प्रकल्पयेत् ॥ मेचलामुखवेघोस्यान् परितोर्द्धांशमानतः ॥ दंडमूलाग्रयोः कुंभौ गुणावे
दंगुलैकमानत् ॥ गडीगुणं मध्यमांशैस्या दंडस्यानाह इरित ॥ षड्विंशैः एष वा गे वेधा कुर्माकृतिर्भवेत् ॥ हंसस्य वाहुस्रिनो वा पोत्रिणां वा मुखवल्लि
खेत ॥ मुखस्य पृष्ठभोग्यस्यासं प्रोक्तं लक्षणं श्रुच ॥ सुचश्चतुर्विंशभिःर्भागै रौरवयेत्स्रुवं ॥ द्वाविंशत्या दंडमानं मंशैरेन तस्य कीर्त्तितं ॥ चतुरभि
रंशैरणानाहः कर्षाज्यग्राहितद्विर ॥ स्रुसचयेन निखनेत्त्यं के मृगपदाकृती ॥ भवेत्कंकणभूषितेनेति ॥ गंडिगुणं कंकणाकारं कंकणभूषितेनेति
स्वयंमुक्तत्वात् ॥ गंडीकंकनवद्भवेदिति वायवियसंहितावचनाच्च ॥ अन्यच्च नतुंगंडिकुंभः ॥ तत्र तस्यैवावश्यकत्वात् ॥ अथैतद्रचना
प्रकार ॥ तत्र शिंशुपाश्वत्थश्रीपर्णीखदिरामुवंदनरक्तचन्दनदेवदारुवैकंकतशमीपलाशोडुंवरविल्वपनसवकुलाशोकनागकेशर
पुन्नागचंपकचप्लक्षवृक्षाणामन्यतमस्य शुष्कमव्रणमकीघशिर्णाप्रणादिभिरदुष्टमुदिष्टमानादधिकस्थूलदीर्घसमचतुरस्त्रं काष्टं गृ
हीत्वा तम्पुष्यांगुलेन चतुर्विंशत्यंगुलिमानं षड्विंशदंशेन विभज्य तेषु विंत्रिंशत्यंशं दशविभज्यावशिष्टषोडशभागेस्वदेशे भागाष्टकं मुखा
र्थं परिकल्प्यावशिष्टभागाष्टकेन समचतुरस्त्रां वेदीं कृत्वा तन्मध्ये चिह्नं कृत्वा तच्चिह्नमवलंब्यार्द्धमानेनाभितो वृत्तं निष्पाद्य तद्बहिरेकांशमा
नेन वृत्तांतरं निष्पाद्य वृत्तयोरंतराले मांगत्रयं निम्नं मध्यवृत्ताकारं कर्णिकां स्थापयन्नार्द्धं कृत्वा तत्कर्णिकासमानेन वृत्तं निष्पाद्य तद्बहिरप्येकांश
मानेन वृत्तांतरं कृत्वा वृत्तद्वयांतराले दलानि परिकल्प्य तद्बहिरर्द्धांशमानेन समसमाकारां चित्रितां वाशोभां विदध्यात् ॥ ततोग्रेऽवशिष्टांशं

64

॥एम॰॥
॥६४॥

शेनवेधास्तनीयांशेनपार्श्वद्वयखण्डेनेनमध्ये एकांशमितकण्ठं विधायकण्ठतः किञ्चिन्निम्नमवसिष्टसप्तभिरंशैरग्रेकंठसमानविस्तारं समतलमधस्तादधोधः॥ क्षीयमाणाग्रल्पमूर्ध्वं कृत्वा मुखे वेदिवन्मेखलां परिकल्प्य कण्ठादधोमुखस्य मेखलामभिंदन्त्रनालिकाकारसेकांशमाननिम्नं कनिष्टाप्रवेशयोग्यं खाने कृत्वा कर्णिकामध्यस्थखातमध्यान्मुखमध्यस्थप्रनालाकारखातमध्ये यथा घृतं निस्सरति तथा नम्रलोहशलाकया कण्ठवेदिपरिधिनेदिनं सुषिरं विधाय तथैवाग्रेपि मुखपरिधिवेदिनं एतदीर्घमायकनिष्टाप्रवेशयोग्यं रंध्रं कुर्यात्॥ ततोवेधापृष्ठभागे कूर्माकारं मध्ये किंचिन्नमनतलं भूमौ यथा निश्चलं तिष्ठति तथा कृत्वा मुखस्य पृष्ठभागे मध्ये किंचिन्नं कृत्वा मुखरंध्राधस्तादुच्चभागं हंसमुखाकारं गजमुखाकारं वराहमुखाकारं वा मुखस्यंकारयित्वा दंडस्य मूले एकांशेन कंकणाकारं त्रयं चतुष्टयं वा कृत्वा तदधोंशत्रयेण मुखकंठमध्ये मूलादिसुशोभितमूर्ध्वमुखंकुंभं निर्माय तदधः पुनरेकांशेन प्राग्वत्कंकणानि कृत्वा तदधो नवांशमानेन कंकणादि तदधोंशचतुष्टयेन प्राग्वदूर्ध्वमुखंकुंभं तदधः पुनरेकांशमानेन कंकणादि च कुर्यात्॥ इतिमुखंनिर्मायमुक्त॥ चतुर्विंशतिमानदैर्घ्यमग्रदेशेंशद्वयमानेन वर्तुलाकारस्थूलशिरोभागयुतं सुवर्तुलं स्रुव निर्माय तस्य मुखप्रदेशे पंकमध्यगतमृगपदाकारं कर्षमात्रघृतग्राहिखातं कृत्वा तदधो दंडमूलेभकासमानेन प्राग्वत्कंकणानि तदधोंशचतुष्टयेन कुंभं तत एकांशेन पुनः॥ कंकणानि ततकांशमात्रं चमुरंशंगुलमानदैर्घ्यं स्रुववेष्टनयोग्यस्थूलत्वका पुनरेकांशेन कंकनानि ततोंशत्रयेण कुंभं पुनरेकांशेन कंकणानि॥ च कुर्यादिति स्रुवनिर्माणप्रकारः॥ स्वस्व

र्णरौप्यताम्रमयौ वा स्रुक्स्रुवौ कार्यौ स्रुवाक्स्रुवाभावे पलाशस्य मध्यपत्रद्वयं पिप्पलदलद्वयं वा होमे ग्राह्यं ॥ संस्कारोपि स्रुक्स्रुवयोरिव नास्मि
न्समये पात्रयोरपि कार्यं इति ॥ अथ होमद्रव्यमानानि ॥ तत्र सारदातिलके ॥ कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतं ॥ गुडः पलार्द्धमानः
स्याछर्करापि तथा मता ॥ ग्रासार्द्धं चरुमानं स्याद् दिक्षुः पर्वमितः स्मृत ॥ एकैकं पत्रपुष्पाणि तत्वाद्यूपाणि कल्पयेत् ॥ कदलीनागरंगाणांफ
लान्येकैकशो विदुः ॥ मातुलिंगं चतुःखंडं पनसं दशधाकृतं ॥ अष्टधा नालिकेराणि खंडितानि विदुर्बुधा ॥ त्रिधाभूतं बिल्वफलं कपित्थं खंडितं (
द्विधा ॥ उर्वारुकफलं होमे कटितं खखितं त्रिधा ॥ फलान्यन्यान्यखंडानि समधस्तु दशांगुला ॥ दूर्वात्रयं समादिष्टं गुडूची चतुरंगुला ॥ व्रीहयो
मुष्टिमात्रास्युस्तु प्रामाणाय वा अपि ॥ तंडुलास्तुस्तदर्धांशाः ॥ कोद्रवा मुष्टिसंमिता ॥ गोधूमा रक्तकलया विहिता मुष्टिमात्रत ॥ तिलाश्चुलुक
मात्रास्युः सर्षमास्तत्प्रमाणकाः ॥ शुक्तिप्रमाणं वल्लं मरीचानपि विंशति पूरवदरसमानं स्याज्जामतं तत्समं स्मृतं ॥ चंदनागुरुकर्पूरकस्तूरीकुंकु
मानि च ॥ त्रित्रिशीवीजमानानि सप्तद्विशानि देशिकैरिति ॥ कर्षलक्षणमुक्तं सारसंग्रहे ॥ माषो दशगुंजः स्यात्षोडशमाषो निगद्यते ॥ क
र्ष इति ॥ तैलस्याप्येतद् देवपरिमाणं ॥ शुक्तिः कर्षद्वये ॥ प्रसृतिमात्रं पलद्वयमात्रं ॥ मुष्टिः पलं ॥ पलार्द्धं कर्षद्वयं ग्रासार्द्धत्र्यक्षिनिरत्नि
कामात्रं ॥ तदुक्तं कुलमूलावतारे गुंजाभिर्दशभिर्माषः शाणो माषचतुष्टयं ॥ द्वौ शाणौ तोलकः कोलो वदरं दक्षणाश्च यः ॥ तौ द्वौ पाणितलं कर्ष
सुवर्णकलशाग्रद ॥ पिचुर्विदालपक्षकं विंदुकोक्षश्च तद्द्वयं ॥ शुक्तिरष्टमिका ते द्वे पलं बिल्वं चतुर्थिका मुष्टिराम्रं प्रगुंजो थ द्वे पले प्र

65

भूतिस्तथैव ति॥ मातुलिंगं बीजपूरं दूर्वा हृत्कं कर्कटी न दर्शोशा॥ शुक्तिनी नावुन्न कमाच॥ प्राशितलतत्प्रमाणा कर्षमात्रा इत्यर्थ॥ पुरः गुग्गुलु वदरमा
नं त्र्य सीति गुंजाभि तं नामद हिंगु॥ तथा नारदपंचरात्रे॥ तिनियं रंवइमूलानां कुस्वानि स्वप्रमाणेन॥ शैवागमेपि॥ विशिर्णा द्विहला हूस्वा वक्रा
स्थूला कृशा द्विधा॥ कृति दश्ताग्ध्वदिर्घाश्च नित्यं च परिवर्जिता॥ विशिर्णायु क्षयं कुर्यात् द्विदलाव्याधिसंभव॥ स्वायां मृत्युमाप्नोति वक्रा वि
घ्नकरिमपा॥ स्थूलाभिर्हरते लक्ष्मीं कृशायां जायते क्षय॥ छिन्नायां नेत्रदोषाः स्युः कित दश्तार्थनाशिनी॥ द्वेषं प्रकुरुते दिर्घा प्राणाश्चाति स्व
च स्मृता॥ सक्षीरेणाधिकान्यूनाः समिधः सर्वकामदा॥ आर्द्रत्वचं न हच्छेदां तनर्जं त्यंगुलवर्जिता॥ ईदृशी होमयेत्मन्तः प्राप्नोति विपुलां श्रियं
श्रीतेस्मानित्वनं चोक्तं समिध परिकिर्त्तिता॥ तथा वायवीयं संहितायां॥ तापलास्य पराचापि यज्ञीयाश्चादशांगुल॥ अवक्रा अव्रणाश्चैव
सत्वचो निर्वणाः समा॥ दशांगुला वा विहिता कनिष्ठांगुलसंमिता॥ प्रादेशमात्रा वाला भे हेतव्या सकला स्थपि॥ ॥अथ प्रष्टाते कियादि
क्षाशंकानां वर्णादिविधिर्लिख्यते॥ ॥अथ वर्णादिक्षा॥ तत्र पुंप्रकृत्यात्मकान कारादि क्षकारान्तान्मातृकावर्णान् पुंप्रकृत्यात्मकेशि
ष्य देहे यथोक्तविधिना विन्यस्य पुन॥ संहारक्रमेण मूर्द्धादिहृदयांतस्थं क्षकारं हृदयादिनाभ्यंतस्थलकारे संहरामि हृदयादिनाभिपर्यंतस्थं ल
कारं हृदयादिवामपादाग्रहकारे संहरामी॥ हृदयादिदक्षिणपादाग्रपर्य्यन्तस्थं सकारं हृदयादिवामपाणयामधिस्थ्ये षकारे संहरामि॥ हृदया
दिदक्षिणपादाग्रपर्य्यन्तस्थं वकारं हृदयादिदक्षिणपाणाग्रावधिस्थ्ये शकारे संहरामि॥ हृदयादिदक्षिपादाग्रावधिस्थं सकारं॥ एवं कृत्वा
ण

शकारे वकारे शं हरामि इत्यादि मुखवृत्तस्य माकारं शिष्य अकारे संहरामि तं तमुक्तयुक्त्या वर्णान्संहृत्य पुनस्तेषु तत्वं सकलतत्वग्रामसमेतं
परमात्मनि संयोज्य विलिनं सकलतत्वसमूलं निगतनिषिलकलुखं दियतनुं शिष्यं विचिन्त्य पुनः परमात्मनः सकासादकारादि क्षका
रांतान्वर्णान्नत्वा पवक्षमाणसृष्टिन्यासक्रमेण शिष्यदेहे मातृकावर्णान्विन्यस्य पुनस्तेषु तत्वं तत्वग्रामसमेतं तस्मिन्न योज्योक्तविधिनो
पदेशं कुर्यादिति निर्वाणदिक्षा॥ ॥अथ कलादीक्षा॥ तत्र पादतो जानुपर्यंतं निवृत्तिकलां जानुतो नाभिपर्यंतं प्रतिष्ठां कलां नाभितः कंठप
र्यंतं विद्याकलां कंठतल्लाटपर्यंतं शान्तिकलां ललाटाद्ब्रह्मरंध्रांतं शान्त्यतीतकलां च शिष्यदेहे संचिंत्य निवृत्तिकलां प्रतिष्ठाकलायां संहरामि प्रतिष्ठा
कलां विद्याकलायां संहरामि॥ विद्याकलां शांतिकलायां संहरामि॥ शांतिकलां शांत्यतीतकलायां संहरामि। इति क्रमात्संहृत्य वेधयित्वा पुनः॥ पर
मात्मनः॥ सकाशाच्छान्त्यतीतकलां ततः शांतिं ततो विद्यां ततः प्रतिष्ठां ततो निवृत्तिं च सृष्टिक्रमेण शिष्यदेहे तत्तत्स्थाने संयोज्योपदेशादिकं कु
र्यादिति एवं सप्तविंशत्कलाभिर्वा एवं पंचाभिर्वा विद्यामात्राभिर्वा उक्तयुक्त्या संहारसृष्टिन्यासक्रमेण शिष्यं संस्कृत्य दीक्षां दद्यादिति कलादीक्षा
॥ ॥अथ स्पर्शदीक्षा॥ तत्र गुरुः स्वहस्ततले शिवस्वरूपं स्वगुरुं ध्यायन्मूलविद्यां षडंगं तं त्रात्मानं कां वा जपन् शिष्यशिरसि स्वदक्षिणकरं निधा
योपदिशेदिति स्पर्शदीक्षा॥ ॥अथ वाग्दीक्षा॥ तत्र गुरुः परचिद्रूपे शिवे चित्तं निधाय तद्रूपान् समस्तांश्चात्मनः ध्यायंस्तन्मयं स्वयं शिष्याय मं
त्रानुपदेशेदिति वाग्दीक्षा॥ अथ दृग्दीक्षा॥ तत्र गुरुः स्वनेत्रे निमील्य परमात्मस्वरूपिणीं मंत्रदेवतां ध्यात्वा तत्प्रसन्नचित्तो दिव्यचक्षुषा शि

ष्यंनिरिक्षमंत्रोपदे ॥ कुर्यादितिस्पर्शदीक्षा ॥ पश्चाऽक्रमेनतद्दीक्षात्रयंवीरकान्तांशिष्याणांवत्सत्वविदागुरुणाकार्यमिति ॥ स्त्रीणांतुदीक्षैवविशी
नास्त्यतो ॥ अथवेधदीक्षा ॥ तत्रगुरुःशिष्यस्यमूलाधारेचतुर्दलपंकजमध्यत्रिकोणमध्येयथोक्तरूपांकुंडलिनींध्यात्वातत्रचतुरक्षमयस्यस्व
वादिशांतारक्षचतुष्टयंतन्मध्यस्थितेकमलासनेसंहृत्यतंब्रह्माणंतदूर्ध्वगतस्वाधिष्ठानाख्यषट्पत्रकमलमध्यस्थितेविष्णौसंयोज्यवेधयित्वा
तत्पत्रषट्कमध्यस्थंवादीलांतवर्णषट्कंचविष्णौसंयोज्यतदूर्ध्वंनाभिमंडलेदशकलात्मकेमणिपूरकचक्रेविष्णुंसंयोज्यतत्पत्रकमलदश
कमलमध्येस्थडादिफांतवर्णदशकसहितंविष्णुंतत्पंकजमध्येस्थरुद्रेसंयोज्यवेधयित्वातंरुद्रमनाहत॰ एवंहृत्पद्मेकादिठांतद्वादशवर्णाख्यद्वाद
शदलसंयोज्यतैरक्षरैःसार्धंतंरुद्रंतन्मध्यस्थितेश्वरेसंयोज्यवेधयित्वाकंठदेशेषोडशस्वराद्यषोडशदलकमलेविशुद्धिचक्रेतमीश्वरेसंयोज्यतैःस्वरैः
सार्द्धमीश्वरंतन्मध्यस्थसदाशिवेसंयोज्यवेधयित्वातंसदाशिवंभ्रूमध्यद्विदलंपंकजमाज्ञाचक्रंनिखातत्पत्रद्वयस्थहक्षवर्णद्वयसहितंसदाशिवं
तन्मध्यवर्तिनिबिंदौसंयोज्यवेधयित्वातंबिंदुंतदूर्ध्वस्थितायांकलायांसंयोज्यतांपुनर्नादेनादंनादांतेनादंतन्मयांतांविशुचक्रेविशुचक्रंगुरुस्वचक्रेचे
तुनरोत्तरंसंयोज्यवेधयित्वाजीवात्मनासहतांकुंडलीनींपरशिवेसंयोज्यवेधयेत् ॥ एवंकृतेशिष्योगुरुःसर्वाज्ञयाछिन्नसंसारपाशोविसंज्ञःसद्य
क्षितितलेविपतति ॥ ततोगुरुःसंहृतविपरीतक्रमेणपरशिवांकुंडलिनीमुत्थाप्यतत्स्थासंहृतमखिलसृष्टिक्रमेणशिष्यदेहेततच्चक्रेतांतां
देवतांसंयोज्यहृदयेजीवंमूलाधारेकुंडलिनींसंयोज्यदीक्षादिकंकुर्यात् ॥ ततःसंजातदिव्यबोधोभूतभविष्यवर्तमानज्ञःसदाशिवोभवतीतिवे

वेधदीक्षा ॥ अथाकाको वेधदीक्षा करोगुरुस्तु योग्य ॥ शिष्यश्चदुलभस्त्याङ्कराचार्या ॥ प्रसंगादत्रापिलिख्यतेयमिनिशिवं ॥ अथैवंदीक्षि
तानांसद्भक्तियुक्तानांगुरुततः ॥ शास्त्रतश्चापितास्येश्वरहस्यपरमार्थानांशिष्याणांगुरुः पूर्णाभिषेकाख्यंद्वितीयमभिषेकंकुर्यात् ॥ तत्रपात्रक्षे
मंडपेवेदिकारहितेवक्ष्यमाणविपुलतत्रसूज्ञाचक्रंनिर्मायप्रागवत्पंचवर्णरजोभिःकनिकादलकेसरकोणादिकमापूर्यतन्मध्येरवादिमो
यपूर्णकुंभंप्रागुक्तविधिनासंस्थाप्याग्नेयदलेषुकोणेषुचतुरस्रेषुचसर्वावरणदेवतापूजास्थानेषुप्रस्थ्यचयजपूर्णान्कलशान्संस्थाप्य
तन्मध्यकुंभेदेवमावाह्यप्रागुक्तविधिनाषोडशोपचारैःसंपूज्यान्येषुकलशेषुतत्थैवांगावरणदेवताःसंपूज्यदीक्षोक्तविधिनाशीष्यजन्मन
क्षत्रेप्रागवत्पंचवाद्यघोषपूरःसरश्रीसदाशिवभक्तैःसहतंसम्यगभिषिचेत् ॥ ततश्शीष्योपिप्रागवद्गुरुंप्रणम्यदक्षिणादिकंदत्वाब्राह्मणा
नभूरिदक्षिणादिभिस्तोषयेत् ॥ इतिपूर्णाभिषेकविधि ॥ सुंदराचार्यशिष्येणश्रीनिवासेनधीमता ॥ चडिकायांप्रणीतायांप्रकाशोगा
श्चषष्टम ॥ इतिश्रीसुंदराचार्यवरनारविंदद्वंद्वानेवासिनाश्रीनिवाशभट्टेनविरचितायांःश्रीशिवायनचंडिकायांषष्टप्रकाश ॥ ६ ॥
अथनित्यपूनित्यपूजाद्विविधाच्युनिर्माल्यासनिर्माल्याचेति ॥ अनिर्माल्यामानसपूजासनिर्माल्याबाह्यपूजा ॥ यदुक्तंतंत्रसारसंहितायां ॥ श्च
निर्माल्यमर्चनंद्विविधेमतं ॥ दिव्यैर्मनोमयैर्द्रव्यैर्गंधपुष्पैःस्रगादिभि ॥ यदर्चनमणिर्माल्यंदिव्यभोगापवर्गदं ॥ आम्नायाणापादिशम्भूनैर्यागद्रव्ये
मनोरमे ॥ भक्तैर्यत्क्रीयतेसम्यक्तन्निर्माल्यंतदर्चनं ॥ जातमात्राणिवस्तूनींप्राणान्येवनिसर्गत ॥ पंचभिश्चमहाभूतैभावनाशोधितानतथा ॥ प्राणा

67

भिक्षुर्द्विरेपाद्यैः·योग्यैरेवनशेशय॥ अतोनिर्माल्यमित्युक्तमिति॥ अत्रनादौययतीनामधिकार॥ पद्मागमस्त्व॥ द्विविधंस्याद्ब्रह्मनोर्बाह्यांतमन्तु
पाशंतं॥ न्यासिमात्रान्नरेप्रोक्तमिति॥ यत्तु॥ मनसापूजयेद्योगिपुष्पैर्वारापसंभवै॥ शिवार्थपुष्पहिंसायांनभवेत्तत्तुहिंसक॥ इतिशिवरहस्यव
चनंनजितेंद्रियतिपरं॥ वस्तुवस्तुपरिज्ञानमात्रेणहोमदानादिभिर्विना॥ सर्वदुःखपिशाचेभ्योमुक्तोभवतिनान्यथा॥ परिव्राथविरक्तश्चवि
रक्तश्चनथागृहि॥ कुंभिपाकेतुमज्जेतेतावुभौकमलानने॥ उपपत्तियोगृहस्थाश्चयद्येवंकुर्यादन्वहं॥ हंसारान्नभिवर्नैतेविध्यतिक्रमदोषत॥ आ
रूढपतिताश्चेन्नभवेद्दुःखभाजनमिति कुंभसंभववचनादेव॥ पर्यतितानामसत्त्वियतेंद्रियत्वदोषायैवअत्रतेषांमानसपूजनमेवविहितमिति
यद्वासर्वेषामेवाधिकार॥ यदुक्तंपद्मपुराणेस्मरणेकीर्त्तनेविष्णोस्तथामानसपूजने॥ सदधिकार॥ सर्वेषामल्पपातकिनामपि॥ इति॥ अत्रत्व
चतुर्गृहस्थानामेवाधिकारं॥ यदुक्तमगस्त्येन॥ अनेषामुभयंतथेति॥ अनेषांगृहस्थानांउभयंअभ्यंतरंबाह्यंच॥ अत्राभ्यंतरजपतवाह्यार्चन
स्यांयत्वेनोक्तंकेवक॥ कुर्यादेहनन्वहं॥ नब्रह्मचारिणोदान्तुमधिकारोस्तिभामिति॥ गृहस्थोपिचसर्वेभ्यकोवादपेक्षितमिति॥ अत्र॥ प्रातपू
ष्यात्फलंसिद्धेदल्पतोमानसाद्यथा॥ तस्मादपरिहार्यत्वादन्यथावानुपातय॥ अल्पवुद्धिसत्त्वोरुराणांवाह्यपुष्पैर्भवेक्कियेति॥ यत्तत्वसारसंहि
तावचने॥ तत्तदंगभूतस्याभ्यंतरयजनस्यात्यंतमावश्यकत्वंगृहस्थानामुपपादनीतितस्माद्गृहस्थानांवाह्यपूजैवमित्याशाचवधा॥ यदुक्तंमंत्रतंत्र
प्रकाशे॥ पूजापंचविधाप्रोक्तापंचरात्रादितंत्रके॥ तात्वाभिगमनंचोपादानेज्याध्यायपयोगका॥ तत्राभिगमनंनाममंत्रैर्भिपरिकीर्त्यनं॥ समा

जनोपलेपादिसंस्कारो देवमंडिले ॥ उपासनं भवेदेवपूजासाधनमेलनं ॥ ततश्चापि भवेदिज्यां गंधपुष्पादिभिस्तत ॥ पीठपूजा च देवस्य सांग
वरणपूजनं ॥ मंत्रार्थभावनापूर्वं जपो मंत्रस्य कीर्त्तनं ॥ ततश्च स्वाध्ययनं सम्यक्ता ध्यायो मंत्रिभिः स्मृत ॥ गुरुदेवात्मनामैक्यभावना योग उच्यते
सालोक्यमपि सारूप्यं सामीप्यं सार्ष्टिनात्मकं ॥ सायुज्यमविपंचानां फलान्येवं पिदुः क्रमात् ॥ इति ॥ तत्रादविज्या निरूपणे न सर्वासां निरूप
नं स्यादित्यतः प्रधानभूतेज्या निरूप्यते ॥ तत्र श्रीनारदपंचरात्रे ॥ निशावसाने शयनात्स्मृत्वा नारायणं प्रभुं ॥ उत्थाय दक्षिणांगेन वामपा
दं न्यसेद्भुवि ॥ निशावसाने पश्चिमयामे कश्चित्तो मध्यमो यामो रात्रे ॥ स्मृत्वा विष्णुं पदेस्म चिंतयसिद्धमीर्थौ यामसुत्थाय पश्चिम ॥ इति भारते तथै
वोत्थानोक्ते ॥ दक्षिणांगेनोत्थाय नारायणं स्मृत्वेति संबंध ॥ नारायणमित्युपलक्षणं स्वेष्टदेवतास्मृत्वेत्यर्थं ॥ सारसंग्रहे ॥ तत्र शेषे समुत्था
य कृत्वावश्यकमादरात् ॥ रात्रिवासः परित्यज्य वाससी परिधाय च ॥ स्नात्वस्य शुद्धदेहः सन्देवतायागमंडिरं ॥ मार्जयित्वोपलिप्याथ भक्तियुक्तः
स्वशक्तितः ॥ उपविश्य शुचौ देशे प्राङ्मुखः प्रोक्तश्चासने ॥ प्राणायामं त्रयं कृत्वा कृत्वा न्यासविधानतः ॥ न्यासं हृष्यान्यासं ॥ निर्माल्यमपकृष्या
ठं दद्यात्पुष्पांजलिं तथा ॥ अर्घपात्रे निवेद्याथ दद्याद्वै दंतधावनं ॥ मुखप्रक्षालनं कृत्वा दद्यादाचमनीयकं ॥ करास्यप्रोंछनायाथ दद्याद्वाससी मंगलं शु
भं ॥ दक्षिणामूर्त्तिं ॥ प्रातरुत्थाय देवेशि संस्मरेन्मनुमुज्वलं ॥ कर्पूराभं स्मरेत्तत्र श्रीगुरुं निजरूपिणं ॥ सुप्रसन्नं लसद्भूषामंडितं ज्ञानिभूषितं मैं
रवीतं च ॥ व्योमांबुजे कर्णिकमध्यसंस्थे सिंहासने संस्थित दिव्यमूर्त्तिं ॥ ध्यायेद्गुरुं चंद्रशिलाप्रकाशं चित्पुस्तकाभीतिवरं दधानं ॥ श्वेतांबरश्वेतवि

68.

लेपद्मयुक्ता विभूषंमुदितं हि नेत्रं ॥ वामाकपिकपिठस्थितउक्तशक्तिंमंदस्मितं सांद्रकृपाणिधानं ॥ रक्तांगरागाभरणां वराभ्यांस्मेराननांपी
नकूचां प्रियांके ॥ वामेनिधराणामतिरक्तकांतिं यामेनलीलाकमलंकरेणाध्यायदधानामपरेणसश्लिष्टगात्रं द्विभुजं द्विनेत्रं ॥ पद्मंशिरसि ॥ गु
रुपादांबुजद्वंद्वं निजमूर्द्धनि संस्मरेदिति सारसंग्रहात् ॥ सारसंग्रहे ॥ अर्चयेद्गधपुष्पाद्यैर्विहितैर्मानसैस्तुवा ॥ नामभिस्तस्वसंकेतैस्संनिवेद्य
मुकिन्निवेके ॥ ननज्ञानेगुरुभ्योथनमोनैर्वासमर्चयेत् ॥ स्तुविजस्तुनिभीःप्रीनस्त्राचार्यसर्वसिद्धये ॥ स्तुतिस्तुप्रयोगेवक्ष्यते ॥ ध्यानस्मरणा
तिरिक्तेगुरुध्यानमाह ॥ शैवागमे ॥ दीक्षाकालेयथारूपस्वस्यानुग्रहकर्मणि ॥ दृष्टस्तेनैनभावेनध्यायन्त्वाह्निकमाचरेत् ॥ इति ॥ वैहायस्प
पंचरात्रे ॥ तथैवरविशेषंतु कालसूर्यदत्वावधि ॥ सूर्य्यादयावधिश्रुरुणोदयावधीत्यर्थः ॥ तसैवस्नानकालत्वात् कर्त्तव्यंसजपध्यानंनि
त्यमाराधनेनवै ॥ कपिलपंचरात्रे ॥ विभज्यपंचधारात्रिंदेशेदेवार्चनादिकं ॥ जपहोमंतथाध्यानंनित्यंकुर्वीतसाधक ॥ सारसंग्रहे ॥ इतिस्तुत्वा
हृदिस्वीयेध्यायदिष्टंचदेवमां ॥ गुरुदेवतयोरैक्यंभावयेच्चनिराकुल ॥ इष्टार्थानांकृत्वासाक्षांसंप्रार्थयेत्तम ॥ इष्टदेवस्यमूलमेष्वनस्यास्वा
सानुसारत ॥ विवस्त्रपादउत्थायकुर्य्यादावस्यकीं क्रियां ॥ आज्ञाप्रार्थनश्लोकःप्रयोगेलिख्यते ॥ तथाचाचार्यलक्षाणोदेशिकःशौचमा
चरेत्नारदपंचरात्रे ॥ पदेपदेस्मरेद्विष्णुंदूरेयापाद्विजालयात् ॥ कृत्वामलस्रुतिंतत्रवाससाकंप्रवेष्टाच ॥ स्वंडिसप्तनविक्षेततनोयायां ॥ ला
शयं ॥ शौचंकृत्वाशास्त्रविधिनाचमनंततः ॥ दंतकाष्ठंततोभक्त्यास्नायातदनुनारद ॥ द्विजेतिनारदसंबोधनं ॥ अलयाहरेद्गुनिक्षिप्यपदूर

॥श्री०च॥
॥६९॥

मनित्य॥ नैर्ऋत्यामिषुनिक्षेपमतित्याभ्यधिकभुवमितिविष्णुवचनात्॥ शौचविधिमाह : नारद०॥ तिस्रोलिंगेमृदोदेयाएकांनरमृत्तिका॥ पं
चवामकरेज्ञयास्तिस्वः पाणौविशुद्धये॥ मूत्रोत्सर्गेविशुद्धिःस्याद्भिघस्मापनंनरं॥ पंचापानेमृत्तिकास्युरेकैकांनरमृत्तिका॥ दशवामकरेदेयाः
सप्तभूभपहस्तयो॥ पादयोस्तिसृभिःशुद्धिर्जघाशुद्धिस्तुपंचभिः॥ नियोजयेत्तनोविप्रकर्षांवैसप्तमृत्तिकाः॥ स्वदेहेवेदनायत्रब्राह्मणाःकर्मशु
द्धये॥ भक्तानांक्षत्रियाणांचवर्णाष्वेवंनिरूपितः॥ प्राह्णामुक्ताप्रथैनस्मादेकमन्त्ववनोदनं॥ शरद्ग्रीष्मवसंतेषुनित्यंकार्यक्रियापरैः॥ एतस्माद
पिवैकैकांमृत्तिकांपरिलेपयेत्॥ हेमन्तेशिशिरेचैवश्रोत्रियस्समपस्थित॥ पच्छिशौचमूकर्नेवंदेशकालानुरोधत॥ गंधलेपमपास्यैवमनःशुद्धिविशु
ध्यति॥ इति॥ दंतकाष्ठमंत्रमाहदक्षिणामूर्त्तिः॥ क्लींमतेकामंतेकामदेवयसवनिजनचालिखेत्॥ प्रियायेतिहृदंतायमनुर्दंतविशुद्धये॥ वक्रमूला
मुनानित्यंश्चलयेत्क्षितिहेतवे॥ ॥अथस्नानंतच्चद्विविधंज्ञोदकमोत्रध्यायेमभेदात्· तत्रोदकस्नानंनारदपंचरात्रे॥ अथाधिकारसिद्ध्यर्थंस्ना
नवक्ष्यामिपूर्वजः॥ येनभक्तोभिषिक्तस्तुयागहोमार्हतांव्रजेत्॥ शंकुनाखात्वाभिजप्तेनशुचिस्थानाचमृत्तिकां॥ गृहीत्वास्त्रेनसंचिंत्यपायाजलनि
केतन॥ नद्यादौजलकूलंतुक्षालयेदस्त्रधारिणा॥ मृदंकृत्वाद्विधातत्रएकभागोपतंगत॥ निधायगोमयंदर्भास्त्रिलांचाप्यभिमंत्रितात्॥ लौकि
कंगोणमाद्येनभागेनैकेनयत्नत॥ मलस्नानंपुराकृत्वा·मलस्नानंसमाचरेत्॥ अभिमंत्रितानस्त्रेणविधिस्नानंवैदिकस्नानं॥ वसिष्ठसंहितायां॥
कृत्वादौवैदिकस्नानंततस्तांत्रिकमाचरेत्॥ विन्यस्यांगेषडंगानिप्राणायामपुरस्सरं श्रीसूर्यमंडलद्धितिर्थमाकृष्यांकुशमुद्रया॥ वसिष्ठनैत

69

॥रामः॥
॥६९॥

चाह्राव्यकवचेनावगुंठयेत् ॥ संरक्षास्त्रेनमूलेनमंत्रयद्गुरुशक्तया ॥ आव्यरक्षांततःकुर्याद्वारिक्षेपेणवास्त्रेन ॥ निसज्यंतत्रश्रीदेवध्यायहृत्तयामंत्रं
जयेत् ॥ उन्मज्येत्कुंभमुद्रांचवध्वांसिंचेत्वमूर्द्धनी ॥ तिर्थावाहनमंत्रास्तुप्रयोगेवक्ष्यते ॥ एततीर्थेपिफलानिह्यपार्थकार्यसावाहनमभिधायवि
ह्रिपुराने ॥ योगेनविधिनास्नायायत्रकुत्रजलेद्विज ॥ सतिर्थफलमाप्नोतितीर्थेदशगुणंफलमित्युक्तं ॥ सिंचयेनसप्तधात्रिधावा ॥ सप्तकृ
त्वोभिषिंच्याथमनुनामंत्रितैर्जलैरितिकपिलवचनात् ॥ त्रिधाभिषिंच्यमूलेनेतिसारसंग्रहवचनाच्च ॥ तथा ॥ ततसंक्षेपतोदेवान्मनुष्यां
न्तर्पयेन्पीन्हत् ॥ स्नानेविशेषमाहत्रिपुरार्णवे विधायवैदिकेस्नानंततस्तांत्रिकमाचरेत् ॥ मृदमस्त्रेणमादायतेननामभिमंत्र्यच ॥ शिखामं
त्रेणसंशोध्यमंत्रयेन्मूलमंत्रत ॥ मूर्द्धादिपादपर्यंतंविलप्यचततःपावयुसंमुखिकर्णमुद्रांबध्वाप्राणांनिरुध्यवा ॥ निमज्यन्सूष्मिसमुत्थायनाभि
मात्रेजलेस्थितः ॥ प्राणायामत्रयंकृत्वामूलमंत्रेणमंत्रवित् ॥ विन्यस्यचषडंगानिकल्पयेत्तिर्थमग्रतः ॥ ततसंप्रार्थयेत्तीर्थंसूर्यात्तन्मंडलात्तत
स्तिराणिमंत्रेणांकुशमुद्रांभित्वायाकृष्टतुंडया ॥ तीर्थवाहनमंत्रेणतिर्थमावाहयेत्प्रिये ॥ मूलमंत्रेणसंयोज्यकल्पितेनतिर्थमंडले ॥ तिर्थशक्तिंच
तचैवसमावाह्यार्कमंडलात् ॥ ॥ ध्यात्वातत्संमुखाभ्यर्च्यगंगामंत्रेणमंत्रयेत् ॥ सप्तकृत्वाशिवेवच्चिशुष्ठमंत्रहृदयप्रिये ॥ जलस्थंव्योमष
ड्दीर्घस्वरभिन्नसबिंदुकं ॥ सर्वानंदमयेतिर्थशक्तिंचैहिपुरंगदिठ ॥ जलंवकारं ॥ व्योमःहकारं ॥ तेनकूटंततस्तद्दीर्घस्वरभिन्नंतेनह्वांह्वींह्वूं
ह्वैंह्वौंह्वः इतिदिठ ॥ स्वाहास्वारं ॥ तथायकंविंशाक्षरं ॥ प्रोक्तंतिर्थशक्तिमनुःप्रिये ॥ ततंनमोभगवतिभूयादंचततोविवेकं ॥ अबालिकेमहा

॥श्रि॰च॥
॥७०॥

मालिन्वेहिहि भगवन्यथ॥ अशेषनिर्थालवालेमायाश्चोपिजयोरथ॥ शिवजपरुद्टेस्वगंगेगेगाविकेविठ॥ गमाविधेयमस्थानाचिपंचाद्वाडिरस्स
कै॥ नारत्राणवमाया हिं दिठः स्वाहा॥ सुगममन्मत॥ तथाभुवनेश्पामपालोघामनी हृत्यसुधान्दना॥ कवचेनावगुण्याथसेरक्षास्त्रेणमंत्रविन्
मूलेनदेवतांतत्रसांगांसावरणांप्रिये॥ समाचाह्याजलेध्यात्वा तस्यादहृयनिर्गतं॥ ध्यात्वातिर्थंस्मरन्मूलंमंत्रं स्नायाज्जलेत्रिशः॥ उन्मस्य मूलमं
त्रेणाशिवेच्कंकुंभमुद्रया॥ केशुरुति॥ आवस्मविधिनापश्चान्मूलमंत्रेणतर्पयेत्॥ त्रिधायेविंशमूर्त्रिमजलार्द्धोनेशुभांचरेत्॥ परिधायाथति
लकंकृत्वासंध्यांसमाचरेत॥ निर्थक्रिक्रियानंप्रयोगेवक्षते॥ ॥अथैवास्नानानाशक्तानांमंत्रस्नानविधिमाह॥ नारदपंचरात्रे॥ अथमा
त्रशुभंशुराण॥ तोयाभावेतुयत्कार्यंदुर्गेकालेसुशीतले॥ गमनेक्षिप्रसिद्ध्यर्थंगुरुपार्थस्वतंत्रिन॥ प्राप्नापघथविर्धेडनिशाभागेतथामुते॥ प्र
क्षाल्यपादवसप्रोक्षनेनतुवारिणा॥ स्थानदशदिशाश्चवत्संशोध्योपविशेत्तत॥ अस्त्रेस्मातलेन्यस्य अमान्यासांकृतधृकै॥ मूलमंत्रादिना॥ कुर्या
त्सर्वमंत्रगणोतवै॥ केवलादुदकस्नानासंकापरिवर्जितान्॥ प्रभासादिषुतिर्थेषुयत्फलंस्नानकस्यतुः तयंदशगुणंतस्मान्मंत्रस्नानस्यनार
द॥ ध्यानस्नानमथोवक्षेसाम्मामपि परंवयेत्॥ रवविंतंपुराऽरीकाक्षंमंत्रमूर्तिप्रभुंस्मरेत्॥ तत्पादोदकजांधारांनिपतेतिस्वमर्द्धनि॥ चिंतयत्त
ब्रह्मरंध्रतप्रविशंतींस्वकांतनु॥ तथासंक्षालयेत्सर्वमेतदेहमनंगल॥ तंक्षणाविरजोमंत्रीजायतेस्फटिकोपम॥ इमस्नानवरंमाचात्स्नानानाद्धनयु
णस्मृतं॥ तस्मादेकमनंकार्यंस्नानंशुद्धपरेनतु॥ स्नानपूर्वाः क्रियासर्वायतः संपायुनारद॥ तस्मानानुपराकुर्यासदिदेहेयमात्मन॥ शेवाग

70

॥राम॥
॥७०॥

मेपि॥मनसामूलमंत्रेणप्राणायामपुरःसरं॥कुर्वितमानसंस्नानंसर्वत्रविहितंचतद्दिति॥पुण्डरीकाक्षमित्युपलक्षणंतेनस्वेनदेवतास्मरेदित्य
र्थः मंत्रेषुशिवेव्यतिरिक्तेषुस्वेष॥शिवेनुमंत्रांतरमाह॥नंनासिवाध्यकेमंत्रे॥सत्यानिधेःशिवात्मकं॥मार्जनंसंहितामंत्रैस्ततोयेनसमाचरेत्॥इति
शैवागमात्॥संहितानु‧व्योमव्यापितयोमंत्रं॥पंचब्रह्माणिपानिच॥येमंत्राःशिवगायत्र्योरुद्रंचेतियथाक्रमं॥सर्वपापहराःप्रोक्ताविशेषशिव
संहिते॥व्योमव्यापितु॥ओंमांभूमाद्यतोव्योमव्यापिनेसप्तकीर्त्तयेत्॥प्रणवाद्यंनरुधोयंव्योमव्यापिप्रकीर्त्तितः इति॥नारदपंचरात्रे॥सुधौतंपरिधा
याथवस्त्रयुग्ममखेददं॥नरमावादधःशाटीयोगपट्टकसंयुतं॥नैवैकवाससायस्माद्भवितव्यंकदाचन॥कुर्यात्केशधूननं॥वशिष्ठः॥कर्मपुण्ये
यत्नुताणयरणंदेवप्रसन्नपरमेपदं॥धारयेत्सर्वदाशूलंललाटेगंधवारिभि॥यत्नस्त्रधानंत्रिगुणांब्रह्माविष्णुशिवात्मकं॥धृतंतत्तूलधरणाभव
सेवनसंज्ञस्त्रिपुण्ड्रंतुसैवशाक्तानां॥विनाभस्मत्रिपुण्ड्रेनविनारुद्राक्षमालिकांपूजितोपिमहादेवोनस्यात्तस्यफलप्रदोभवेत्॥भासयत्येयतस्म
कृतभासयतेचरेत्॥भक्षनात्सर्वपापानांभस्मेतिपरिकीर्त्तितं॥यथकार्य्यसहस्राणिकृत्वायस्मात्तिभस्मना॥तत्सर्वंदहतेभस्मयथाग्निस्तेजसाव
नमितिलिंगपुराणवचनात्॥सत्त्रिपुण्ड्रधारणविधिस्तुवायवीयसंहितायां॥शिवाग्नेर्भस्मसंग्राह्यमग्निहोमोद्भवंतुवा॥वैवाह्यमुद्भवंवापिप
क्वमुचिसुगंधीच॥कपिलायास्सकृद्भस्मगृहितंगगणोपतत्॥नक्लिन्नंनपिकष्ठितंनदुर्गंधिनचोषितं॥उपर्यधःपरित्यज्यग्राह्यमत्यंतंयदि॥पिं
दिहृन्यसिवाग्नौतुनक्षिपेत्मूलमंत्रतः॥अपक्वमपिपक्वंचसमस्तंमसितंसितं॥आतपवासदालोध्यंभस्माधारेविनिक्षिपेत्॥भस्मसंग्रहणाकु

र्यां देवेत ब्रह्मतिनेसति ॥ उद्धासने कृते यस्मात् उभस्म प्रजायते ॥ गोमयग्रहणादौ विशेषमाह तत्रैव यत्रा धरामसंस्पृष्टं संग्रहेनानीय गोमये ॥ वाम
नपात्रे संपोज्ये अघोरेण विनिर्दहेत् ॥ पुरुषेण समुद्धृत्य ईशानेन विशोधयेत् ॥ इत्थं संस्कृतं भस्म अग्निरित्यादि मंत्रतः ॥ न कुलेति यजुषा मंत्रये
दुड संज्ञया ॥ प्रणवाद्यैश्चतुर्थीहृदंतैर्नामभिर्लिंगकैः पंचवर्णाद्यक्षरस्थैर्भालांशोदरहस्तेषु ॥ त्रिपुंड्रधारणां कुर्यान्मूर्ध्नि पंचाक्षरेण च ॥ त्रिपुंड्रं धारयेत्
मंत्रिमात्रान्निव स्वावर ॥ नामभिः सद्योजातादिभिः ॥ अंसशब्दं त्वसज्वय वावी नामपंचकत्वात् ॥ अत्र त्रिपुंड्रधारणे गुलिनियमो जाबालोपनिष
द्गलतो ॥ त्रिपुंड्रं कारयेन्नित्यं ब्रह्मविष्णुशिवात्मकं ॥ मध्यांगुलिभिरादाय तिसृभिर्मूलमंत्रितं ॥ अनामामध्यमांगुष्ठैरथ वा स्यात् त्रिपुंड्रकं ॥ तिलके
प्रकारस्तु ॥ इत्थं तु संस्कृतं भस्मा अग्निरित्यादिमंत्रतः ॥ विसृज्यांगानि संस्पृश्य पुनरादाय मंत्रतः ॥ तस्मात्कुलेति यजुषा मंत्रयदुडसंख्यया ॥ ललाटे तु
लविज्ञेयो हृदये हव्यवाहन ॥ नाभौ स्कंदो गलेप्यांकुरो दक्षिणबाहुके ॥ आदित्यो वाकुमध्ये च शशि च मणिवेधकः ॥ वामदेवो वामबाहौ वाकुमध्ये
प्रभंजन ॥ वनिवस्वे च वसव पृष्ठदेशे हरस्मृत ॥ शंभुः ककुदि संप्रोक्तः परमात्मा शिरस्मृत ॥ अत्र मंत्रकवाय वियमहिमायां ॥ पुनर्न्यस्तकरो मंत्रि
त्रिपुंड्रं भस्मना लिखेत् ॥ इति भूतादि विशयरुकं जेय ॥ अत्र भस्मधारणे यद्विशेषास्ते प्रयोगे वक्ष्यते ॥ शाक्तोनांतु वामकेश्वरतंत्रे षट्त्रिंशत्क्त्वाश्रीवि
द्यायजनप्रकारणे ॥ त्रिपुंड्रं विधारिवति ॥ एतत्त्रिपुंड्रकारणं चंदनादिसुगन्धद्रव्येण ॥ रक्तं त्रिपुंड्रं दधज्ज्वालनदनचन्दनेनजनं निधार्यामितेतसं
गलंमिति भगवति ध्याप्यौ दुर्वाससोक्तत्वात् ॥ ॥ अथ संध्यातर्पन महाकपिलपंचरात्रे ॥ उपविश्य शुचौ देशे प्राणायामं त्रयं क्रमात् ॥ मूलमंत्रे

71

णा हत्वा वै देहे कुर्वित मार्जनं ॥ शैवागमे ॥ प्राणायामं त्रयं कृत्वा मूलमंत्रेण मंत्रवित् ॥ अंगानि विन्यसेद्देहे करन्यासपुरःसरं ॥ अमृतिकृत्य पुरतो ज
लं वन्हेतुमुद्रया ॥ अभिमंत्र्य च मूलेन मत्प्रधारं च साधक ॥ अकारादिक्षकारान्ते मातृकार्णैर्मविंदुभि ॥ ब्रम्हर्णा प्रोक्षयन्मूर्द्ध्नि कुशैर्मूलेन वत्रि
धा ॥ देवं ध्यात्वाथ मनुविजानु मंडलसंस्थितं ॥ आदाय वामभागस्थबीजे भूतात्मकेस्तथा ॥ लं वरं यं हं सइति चतान्मुक्तानि पुराविंतो ॥ सप्तकृ
त्व·स्ततो मूलमंत्रेण त्रिपुनश्चनत् ॥ वामहस्ते निधायाथ गलते र्जलविंदुभि ॥ पुनः स्त्रिग्धावसं प्रोक्ष्य मूलमंत्रेण मूर्द्धनि ॥ नासामभ्निध्य शिखे
नते जोरूपेणानेनतु ॥ प्रविश्यान्तर्गतं सर्वं मलं संशोध्य निर्गतं ॥ दक्षरन्ध्रसा पुनैनेनं त्रस्मृत्वा दक्षिणहस्तगं ॥ वामभागे वज्रशिलां ध्यात्वा स्त्रेण चत
क्षिपेत् ॥ प्रक्षाल्य हस्तावाचम्य मूलमंत्रेण मंत्रवित् ॥ गायत्र्या वाथ मूलेन तथा दर्घत्रयं तत ॥ शिवाय मंडलस्थाय रवेर्मूलेन तर्पयेत् ॥
त्रिधा जप्त्वाथ गायत्रीमष्टाविंशतिवारकं ॥ जपित्वा मूलमंत्रं च शतमष्टोत्तरं तत ॥ समर्प्य तज्जपं मंत्री देवमुद्वास्य मंडलात् ॥ निधाय स्वीयहृ
दये तत्स्तर्पणमाचरेत् ॥ इति ॥ मूलेनार्घ्यपनतु गायत्रीरहितमंत्रपरं ज्ञेय ॥ तथा शैवागमे ॥ संध्यालोपो न कर्त्तव्य ॥ अंगेनाज्ञैवमेवाहि ॥ दिक्षित
संध्यया हीनो न दिक्षाफलमश्नुते ॥ संध्याहीनो न संध्यायां पूर्वसंध्यायां पूर्वसंध्यास्त्रियामथ ॥ विधायोत्तरसंध्याया ॥ क्रियां कुर्यादतंद्रित ॥ अत्र
पायश्चित्तमपि कर्त्तव्यं यदुक्तं तंत्रराजे ॥ स्नानसंध्यार्च्चनालोपे जपेद्द्वियांशतं शिवे ॥ इति ॥ तथा ध्यानाजले सम्यक् पूजयित्वाथ मूलत ॥ अग्रे
तरनाद्व्यात्वर्पयेन्मूलमंत्रत ॥ तद्देवैन दशधाथ दर्पयेत् ॥ ततश्च सांगादरणदेवतानर्पयेत् क्रमात् ॥ एकैकांजलिना तत्तन्नाममंत्रेण मंत्रवि

त ॥ पुनसंपुज्य देवेशं सांगावरणकं तत ॥ संपूज्य हृदि स्वीये स्वात्मानं तन्मयं स्मरेत् ॥ इति ॥ नारदपंचरात्रे ॥ ततश्चोदकसंपूर्णं भाजनमादाय
पाणिना ॥ एकांतं निर्जनं पायात्मनोहं दोषवर्जितं ॥ हृन्मध्यस्थं स्मरेद्विष्णुं प्रपुष्पानंदविग्रहं ॥ दिगंतरं न विक्षेत मौनी संरोधिरोचन ॥ महाक
पिलपंचरात्रे मूलमंत्रं जपन्गच्छेद्यावत्स्नानिवेग्रहं ॥ प्राप्य हस्तौ च पादौ च प्रक्षाल्याचम्य तत्नतः ॥ यागमंडपमासाद्य विशेत्कृत्वा प्रदक्षिणं ॥ य
न्मूर्वमर्जितं पापं तद्दिनेपि वा ॥ प्रायश्चित्तैर्नीषजुदेनदा पापं स्मरेद्धिया ॥ तस्यापस्यापनोदार्थं मंत्रद्वयमुदीरयेत् ॥ मंत्रद्वयं तु प्रयोगेव
क्ष्यते ॥ एवं कृते पृथग्मतपापात्मादनकर्मणि ॥ यत्स्याद्दत्तरं पापं न हरेवावनिश्चये ॥ प्रतिते पूजने स्यान्न संप्रयाति पुनश्च तत् ॥ यस्माद्दल
नरं पापं नत्वा समुपगच्छति ॥ पूजने स्वकृपापस्य कामभिरक्षणाद्भवेत् ॥ सारसंग्रहे ॥ ततः प्रक्षाल्य पादौ च हस्तौ नाचम्य यत्नतः ॥ दयादर्भ
दिने शायनमस्कारइहोच्यते ॥ गोमयेनोपलिप्यायां भूमौ कृत्वा तु मंडलं ॥ सिंदूरेण ततः पश्चादुपविश्य निजासने ॥ प्राङ्मुखः परमावेदिहृद्देव
तां भक्तितत्परः ॥ प्राणायामत्रयं कृत्वा सूर्यमंत्रेण मंत्रवित् ॥ विन्यस्य च तथेंगादीन्ध्यात्वार्घ्यं समनत्वधि ॥ तत्कल्पोक्तविधानेन पूजयेदुपचा
रैः ॥ पुरतो मंडलं कृत्वा जलेन चतुरश्रकं ॥ निधाय तत्र साधारं सजलं ताम्रपात्रकं ॥ गंधपुष्पाक्षतान्दर्भान्दूर्वासर्षपसंयुतान् ॥ सतिलान्रक्तपुष्पा
णि यवांश्चापि विन्यसेत् ॥ सूर्यमंत्रेण तत्पात्रं स्पृशन्नष्टोत्तरं शतं ॥ अभिमंत्र्य च तत्पात्रं समुत्थाय करद्वयात् ॥ मूर्ध्नांते सूर्यमंत्रेण दद्यादर्घ्यं
विचक्षणः ॥ जपेत्ततो यथाशक्ति सूर्यमंत्रमनन्यधीः ॥ तदर्घ्यप्लुतं सूर्यं ध्यायन्देशिकसत्तमः ॥ स्तुत्वा प्रणम्य विसृजेन्मंडलांतं दिवाकरं ॥ सूर्य

72

॥ रामः ॥
॥ ७२ ॥

मंत्रंत्र्यक्षरंत्ततउत्थायविधिवद्वारपूजांसमाचरेत् ॥ द्वारमर्घ्याम्बुनाप्रोक्ष्यविघ्नमन्त्रैस्समर्चयत् ॥ तद्दक्षिणेसदालक्ष्मिस्वामेचैवसरस्वती ॥
द्वारंश्रियंचतन्मध्येद्वारयोर्दक्षिणान्ययो ॥ गणायंक्षेत्रपालंचशंखपद्मनिधिंक्रमात् ॥ मायाशक्तिंचविद्धुक्तिंगंगाचयमुनांतथा ॥ धातारं
वविधानारमूर्ध्वादिक्रमतोयजेत् ॥ अधस्त्वदेहलिमिष्ट्वाद्वारपालोसमर्चयत् ॥ पश्चिमद्वारमारभ्यद्वारपालाअमीक्रमात् ॥ नंदीचैवमहा
कालोगणेशोवृषभस्तथा ॥ ततोभृंगीरिटिस्कंदाउमाचंडेश्वरोततः ॥ ऐतेचाष्टौमहेशस्यद्वारपालाप्रकीर्तिताः ॥ नंदसुनंदचंडोचप्रचं
डवसंज्ञकौ ॥ प्रबलोभद्रगमस्सुभद्र–श्चाष्टमस्मृता ॥ क्रमादमीसमभ्यर्च्यवैष्णवद्वारपालकाः ॥ वक्रतुंडैकदंष्ट्रोचमहोदरगजाननौ ॥ लम्बो
दरश्चविकटेविघराजस्तनपरं ॥ धूम्रवर्णास्त्वसंप्रोक्ताविघ्नेसद्वारपालकाः ॥ ब्राह्मीमाहेश्वरीचैव·कौमारिवैष्णवीतथा ॥ वाराहीचतथेंद्राणी
चामुंडासर्वश्रियासहः ॥ पुनोदेष्यःक्रमादष्टौशाक्तेयद्वारपालकाः ॥ एताएवसौरद्वारपालकासेया ॥ सौरंसक्तिमयत्विमहाविजयतेसौदर्प
मीमास्वदमितिवामदेवतंत्रवचनात् ॥ आर्कमाध्वशिशिरंविध्वेशिकायाचण्डरितिसारसंग्रहवचनाच्च ॥ ॥ अथद्वारदेवतानांध्यानंतत्त्वा
स्मराराध्यवरेणः श्रीललितार्चनचंद्रिकायांनानातंत्रेभ्यःसंगृहितंयथा ॥ पाशांकुशकरांभोजपाणिंपाटिलतुंदिलं ॥ विरपक्षेस्वरंवन्देग
जवक्त्रंत्रिलोचनं ॥ पद्मद्वयवराभितिभावत्पाणिचतुष्टया निर्दग्धगौरहेमांगीमहालक्ष्मित्रिलोचना ॥ अक्षस्रकुंडपुस्तकाभितिर्दधानांव
ऊभिर्वरं ॥ त्रिलोचनांस्मरेद्देवीसर्वशुक्लांसरस्वती ॥ सप्तकार्तस्वराभासादिव्यरत्नविभूषिता ॥ द्वारश्रीरूर्ध्वपद्मस्थावराभयवरांबुजा

सितो गजास्य· परशुदंडपाशं त्रिशुलकं ॥ भुजैश्चतुर्भिर्विभ्राणो मुषिकोपरिसंस्थित ॥ कपालशुले विभ्राणं कपालं कृष्णविग्रहं ॥ तीक्ष्णा
अक्षं समर्चामि क्षेत्रे संक्षन विद्विषं ॥ मुक्तामाणिक्यसकाशौ· किंचित्स्मितमुखांवुजे ॥ अन्योन्यालिंगनपरौ शंखपद्मजधारिणी ॥ विलसद्र
त्नवर्षाभ्यां शंखाभ्यां मुद्रिलाछितौ· शंखासनसमाशितौ विश्वसंकल्पकौ ॥ तुदिलं केवुकनिधिं वसुधारां पनस्तनी ॥ वामनपंकजनिधिं प्रि
ययासहितं स्मरेत ॥ सिंदुराभौ भुजाश्लिष्टौ रत्नपद्मोत्पलान्वितौ ॥ निसरद्रत्नवर्षाभ्यां मुर्द्रिलांछितौ· पद्मासनसमीनौ विश्वसंकल्पकल्प
कौ ॥ तुदिलं पंकजनिधिं नत्वी वसुमतीमपि ॥ वरांकुशौ पाशमभीतिमुद्रां करैर्दधानां भवभावमूलं ॥ घनाघनौघप्रभदेहकांतिं मायां निचे
चामनिशं स्मरामि ॥ पाशांकुशौ वराभीतिं दधानामरुणप्रभा ॥ त्रिनेत्रां विधुकलां वन्दे गौरि रत्नां वरोज्वलां ॥ वराभयकरां सौम्यां सोमकोटिसम
प्रभां ॥ भजे गंगा महादेवी परां देवतुरंगिणि ॥ वामपादार्घसंभूतां परां देवनरंगिणी ॥ वराभयकरां वन्दे कालिंदिं कालविग्रहं ॥ कर्त्तारं जगतां व
न्दे शंखचक्रगदांबुजे ॥ विभ्रानं गरुडारूढं विधातारं कृष्णविग्रहं ॥ रक्तारक्तारविंदस्थ वराभयमराडलं हंसारूढं विधातारं वन्दे अक्षसमम
न्वितं ॥ सिंहारूढं श्यामवर्णा खड्गखेटकधारिणीं· अथ स्नादेहरीदेवीपश्चिमायां सुरक्षिणी: सिति ॥ नवसारसंग्रहे ॥ पश्चिमद्वारमासाद्य ता
लत्रिनयपूर्वकं ॥ द्वारमुद्घाट्यचास्त्रेणामंत्रितान्सर्षपाक्षतान् ॥ पुष्पयुक्तांस्तु विकीरेन्मंडपाभ्यंतरे बुद्ध ॥ नाराचमुद्रयासम्यगस्त्रमंत्रेणा
देशिक ॥ नूर्णीमागे ॥ सिद्धार्थाक्षतपुष्पाणि नाराचास्त्रधियावुध ॥ अस्त्रमंत्रं समुच्चार्य मंडपांतविनिक्षिपेत् ॥ नारायणीये ॥ अपका

मंत्रभूतानिस्यतत्मंत्रवयगुरु ॥ पठित्वाक्षतसिद्धार्थपुष्पाणिविकिरेत्तत ॥ अस्त्रमन्त्रेनमंत्रज्ञो मंडपाभ्यंतरेबुध ॥ मंत्रवंप्रयोगेवक्ष्यते
अस्त्रेणाशोपाश्यमंत्रांगंभूतेनतनुफट्कारमात्रेयतुक्रंभुवनेस्वरीपादिजाते ॥ हकाररेफौचविसर्गनावस्त्रायफट्कारवच्चसद्दते ॥ ङ्क्तानवे
सर्षपमक्षतांश्चपुष्पाणिमुञ्चेदिति ॥ तुराणपद्धतौ ॥ निर्गच्छतांतुविघ्नानांवर्ज्यदग्धान्त्ववामत ॥ सोमशंभु ॥ मंडपाभ्यंतरेविघ्नावामपाद
पुरसरे ॥ प्रविश्यविघ्नान्विविधानुत्सोर्यास्त्रमनुस्मरन् ॥ यामले ॥ पारवण्ठकारितोभूतानाभूमौयेचान्तरिक्षगा ॥ दिविलोकेस्थितायेचतेनतश्यं
तुशिवाक्षया ॥ इत्येतेस्त्रमनुच्चार्यपार्ष्णिघातादिभि ॥ विघ्नानुत्सादयेदिति ॥ तुराणयागे ॥ पार्ष्णिघातैस्त्रिभि ॥ भौमास्तांस्तेस्तानांतरिक्ष
गान् ॥ विघ्नानुत्सादयेद्दिव्यानस्त्रनीक्षावलोकनात् ॥ पार्ष्णिघातेनमपास्यवामपार्ष्णित्रिभिर्वतिभूमिनिशानिनिसोमशंभुवचनात् ॥ सा
रसंग्रहे ॥ विघ्नानुत्सार्यविधिवद्वारमासाद्यवासमाप्यंवागव्यार्घतोयाभ्यांप्रोक्षयन्मंडपान्तरं ॥ कुलार्णवे ॥ सम्मार्जनोपलेपाद्यैर्दर्पणोदरव
त्कृतं ॥ विमलंधूपदीपादिपुष्पदामादिशोभितं ॥ पंचवर्णरजोभिश्चस्थानशुद्धिरियंमता ॥ सारसंग्रहे ॥ नैऋत्यामर्च्चयेद्वास्तुपुरुषंचन्द
नादिभि ॥ इशानेक्षेत्रनाथंचक्षेत्रपालाज्ञयाततः ॥ सविघ्नादसमेमंत्रिति ॥ क्षेत्रपालप्रार्थनमंत्रः प्रयोगेवक्ष्यते ॥ उत्तरेणचेफडितिवमं
त्रेणपूजावेदिंततोविशेत् ॥ संस्कार्यादासनेस्थानंचतुर्भिर्विक्षणादिभि ॥ संस्कारैस्तत्रसंपूज्यावेद्योनापिठदेवता ॥ आधारशक्तिमारभ्य
स्वासनंतत्रविन्यसेत् ॥ आपस्तंब ॥ पूजासनंतथात्मीयंवैराजिनकुशोत्तरं ॥ तत्रोपविश्यविधिवत्स्मरेद्दिव्यंगुरुंसदा ॥ योगिनीतंत्रे ॥ ए

ध्रीमंत्रेणासनेसन्निविश्यइतिमंत्र ॥ प्रयोगेवक्ष्यते ॥ भैरवीतंत्रे ॥ मेरुपृष्ठऋषि ॥ प्रोक्तःसुतलंछंदइरितं ॥ पृथिवीदेवताप्रोक्ताः विनि-
योगोस्मिन्नासने ॥ विजासनेस्वात्मासने ॥ सारसंग्रहे ॥ आसनस्यचतुष्कोणगणेशंवमरस्थिति ॥ दुर्गाक्षेत्रपतिंचापिवह्न्यादिषुसमर्चयेत्
गौतमीयतंत्रे ॥ प्राङ्मुखोदङ्मुखोवापिस्वस्तिकासनमास्थित ॥ उत्तरतंत्रे ॥ उदङ्मुखप्राङ्मुखोवाभूत्वाप्रयतमानस ॥ स्वस्तिकासनमा-
सीनपद्मासनमथापिवा ॥ सारसंग्रहे ॥ स्वस्तिकादीक्रमेणैवकल्पनाकायेवसद्बुध ॥ स्थापयेद्दक्षिणेभागेपूजाद्रव्याणिचात्मन ॥ सु-
वासितांबुसंपूर्णसंख्येकुंभसुशोभ ॥ प्रक्षालनायकरयोपात्रेपृष्ठेनिवेशयेत् ॥ घृतादिज्वलितान्दीपान्स्थापयेन्परितप्रभान ॥ दर्पणा-
चामरंछत्रंतालवृन्तंचपादुके · यथापथंनुसंस्थाप्यसकुर्यान्यानिचात्मनात्दुत्तरतंत्रे · ॥ पुष्पनैवेद्यगंधादिनाकुंफडितिमंत्रके ॥ नाराचमुद्र-
याध्वासमयाचविलोकयेत् ॥ यदात्मघातंसम्यकुपुष्पादिरूपणाः ॥ अस्पृश्यस्यदर्शनंवापियदन्यायार्जितंचवा ॥ तथानिर्माल्यसंस्पृ-
ष्टंकिनाघ्राणेहृतंचयत् ॥ तत्सर्वनाशमायातिनैवेद्यायेवलोकयत् ॥ ततोरमिन्निमंत्रेणशिखादियस्यसंस्पृशेत् ॥ सतुस्माद्भुमदोदोषोपि-
कव्यादसुखप्रदं ॥ पतंगकीटकेशादिदाहाकुर्यादसंहते ॥ वसामज्जादिसंस्पृष्टैर्पज्ञात्वाधुपयोजने ॥ अज्ञानरूपतत्सर्वदोषस्पर्शाद्विन-
श्यति ॥ नारसिंहेणमंत्रेणदेवतिर्थेनसंप्रक्षेत् ॥ पानीपात्र~मध्यस्थंविक्षतुहंचपावक ॥ वामेणपाणिनाधृत्वावामपार्श्वस्थितंतत-
दा ॥ पात्रमाधारमंत्रेणसंकुर्वन्संस्पृशेज्जलं ॥ पदत्तातादमेपाध्यादिसंस्पृष्टशिरिहंसंगता ॥ यदन्यद्रूपनंपात्रेनोयेचाज्ञानतोभवेत् ॥ ज-

74

त्तामयत्र्वस्पर्शाजलस्यामात्त्वमंगतं ॥ दूषतानि विनस्यंति तपि येदेव पूजने ॥ नृसिंहमंत्रमेकाक्षर· मत्राग्रेव वक्ष्यते ॥ स्वाधारमंत्रस्तुस्व संज्ञा
यक्षरं विंदुचन्द्रार्धपरियोत्रि नमिति ॥ स्वयम्भुत्त्वः मंत्राद्यक्षरेणामात्रक्षरमित्यर्थ ॥ उत्तरमंत्रे ॥ कृतांजलिपुटो भूत्वा वामदक्षिणपार्श्वयोनत्वा
गुणगनेशानपुरतः स्वहृदेवतां ॥ सुगन्धपुष्पाण्यादाय चंदनाक्तानि मंत्रवित् ॥ मद्दपिन्याकरोसंम्पकुसुरभो कृत्वसाधक ॥ वामहस्ते समादा
यनिश्वाघ्रायन तन्तुत ॥ वक्ष्यमानेन मंत्रेण वैशान्यां दूरतस्त्यजेत् ॥ त्येजेन्नाराचमुद्रया ॥ त्येजेदुत्तर ॥ पुष्पं मंत्री नाराचमुद्रये निसारसंग्र
ह्वचनात् ॥ मंत्रः प्रयोगे वक्ष्यते ॥ नृसिंहकल्पे करशुद्धिसमापाद्यकुर्यात्तालत्रयं ततः ॥ ऊर्ध्वधिं मस्त्रमंत्रेणादिग्वंधमपि देशिक ॥ तेन संज
प्ति तं नेजोरक्षां कुर्यात्तमानतः ॥ अस्त्रमंत्रेण्यस्य करमुष्ट्यादिपत्रिपुसंवंध ॥ पाणीविधोयेदस्त्रमंत्रेण मन्त्रवित्तम ॥ इति दक्षिणामूर्त्तिकल्पव
चनाच्च ॥ अस्त्रमंत्रस्तु तत्रदंगभूतः मन्तु केवलफट्कार ॥ रअस्त्राफट् प्रोक्ताभ्रामयदक्षिणाकरमिति कुंभसंभववचनात् ॥ अन्तयकात्रयत्र
त्रयत्रास्त्रादिपदेनाभिधानं तत्र तत्रदंगभूतास्त्रादिमंत्राः ग्राह्या ॥ ननु फट्कारमात्रमुक्तवचनन्यात् ॥ मन्वैवं पादांगुजे दद्यादेवस्य हृदयाग्रा
नेत्रास्त्रवर्वंरां मंत्रादानं प्रसंग ॥ निराकांक्षत्वात् ॥ नत्वमन्त्राधारेति प्रसंगः अगमंत्रयाहकाभावात् ॥ मंत्राधारानंतमेवाग्र मंत्रोद्धारात् ॥
क्वचिदस्त्रपदेन क्वचित्फट्पदेनोच्चारावेति दिग्वंधस्वरूपमुक्तं प्रयोग सारेपि ॥ अस्त्राय दिक्षु तर्जन्या अस्त्राग्रवलिताग्रयेति ॥ सारसंग्रहे
प्राकारं चिन्तयेद्बह्निः कृत्वास्त्रेणास्य मुद्रयाः मान्त्रग्रेवक्ष्यते ॥ गोपालकल्पे ॥ सुरसासनेनोपविश्य प्राणानां विधायवै ॥ भूतशुद्धिं ततः ॥ कृत्वा

न्यासंकुर्यादनंतरं ॥ न्यासंमातृकायां ॥ सारसंग्रहे ॥ भूतशुद्धिंततःकुर्यात्प्राणायामपुरःसरं ॥ पादतोजानुपर्यंतंचतुरस्रंसवज्रकं ॥ लंयु-
तंपीतवर्णंचभवस्थानंविचिंतयेत् ॥ जान्वोरानाभिवंद्वार्द्धनिभपद्मेनलांछितं ॥ षट्कोणांविंदुभिःषड्भिर्युक्तंवीजेनचिंतयेत् ॥ भ्रूमध्याद्ब्र
ह्मरंध्रांतुवर्तुलंध्वजलांछितं ॥ धूम्रवर्णंस्ववीजेनयुक्तंध्यायेन्नभस्थलं ॥ इतिध्यात्वानुभूतानिस्वदेहेदेसिकोत्तम ॥ धर्मकंदसमुद्भूतंज्ञानना
लसुशोभितं ॥ कृत्वातत्कर्णिकासंस्थंप्रदीपकलिकानिभं ॥ सुषुम्नावर्त्मनात्मानंपरमात्मनियोजयेत् ॥ आत्मानंजीवात्मानं ॥ योगसुमे
नविधिनासोहंमंत्रेणसाधक ॥ तत्रैवसर्वभूतानिविलीनानिविचिंतयेत् ॥ ततःपुरुषनिभंपापमित्यादिपापपुरुषध्यानंप्रयोगेव
क्ष्यते ॥ तथासंशोषयेद्देहंपूरकादिक्रमेणवै ॥ विधायप्राणसंरोधंवायुवीजेनचायुना ॥ वह्निविजेनतेनैवप्लावयेत्सकलंततः ॥ भस्म
तत्संतमार्गेणनिर्गतंचिंतयेत्सुधिः ॥ ततोवमीतिविज्ञेनप्लावयेत्सकलंततः ॥ संजातेसकलेदेहेदेवतापासनक्षमे ॥ आत्मलीनानितत
त्वानिस्वस्थानंप्रापयेत्ततः ॥ आत्मानंहृदयांभोजमानयेत्परमात्मनः ॥ हंसमंत्रेणविधिवत्तेजोरूपकलेवरं ॥ देवताराधनेयोगेसुमन्त्र
मितिभावयेत् ॥ इतिअत्रकेचित्-संयोज्यजीवमथदुर्गमसध्यनाडीमार्गेणपुष्कर ॥ निविहशिवेसुसूक्ष्मे ॥ हंसेनदेहममरेंद्रपुरोगाते
नेतियोगिनितत्रवचनात् ॥ सोहंमंत्रेणतामाघांनादांतेसिद्धभाषितां ॥ ध्यात्वैवंब्रह्मरंध्रात्तुहृदीजीवकलोन्यसेत् ॥ इतिवसिष्ठसंहि
तावचनाच्च ॥ हंसमंत्रेणजीवस्योन्नयनःलोहमंत्रेणपुनरानयनंचवदंति ॥ यथागुरूपदेशमंत्रविधेयमिति ॥ अत्रकेचित्वायुवीजा

75

॥रामः॥
॥७५॥

दिनां षड्ङ्कं कात्यायनीयसंहितायां ॥ नमो भूतात्मकं देहं वायुबीजेन वायुना वायुस्तुमोल्पसंशोष्य ज्ञात्वाग्नु दक्षयाम्यजेन ॥ इति । यथा । योगि
नितंत्रेपि ॥ दक्षिणो वह्निबीजेन प्राग्दग्धमिति भावयेत् ॥ इति ॥ कुंभसंभव भूतशुद्धिविहीनेन कृत्वा पूजाभिचारवत् । विपरीतफलं दद्यादभ
क्त्या पूजनं यथेति · अत एवेयमावश्यकी ॥ केचित्तु श्रीमच्छंकराचार्यचरणो योगिनीप्रकरणे प्रोक्तत्वाद्योगिपरं वदंति तन्न तत्र प्रथमवाप्यश्रवणात्
श्रीकुलार्णवे आत्मस्थानमनुद्रव्यदेवशुद्धिश्च पंचमी ॥ यावन्न कुरुते देवि तावद्देवार्चनं नहि सुस्नानभूतसंशुद्धिः प्राणायामादिभिः प्रिये ॥
षडंगाद्यखिले न्यासैर्देहशुद्धिरितीरितेति सारसंग्रहे ॥ भूतशुद्धिं विधायथं नमो वेस्थापयेदसून् ॥ अस्मत्स्थाणांस्तत्स्थानिकारप्रयोगे वक्ष्यते
न चासनाक्रमोपि पुरस्ताद्वक्ष्यते ॥ त्रैलोक्यमोहनतंत्रे ॥ प्राणायामं ततः कृत्वा मातृकान्यासमाचरेत् ॥ कुंभसंभव ॥ वामपूरयेद्वायुस्व
रैः कालैश्च कुंभयेत् ॥ रेचयेद्यामिदिः वर्णैस्तु न पिंगलया पुनः प्राणायामं त्रयं त्वेवं कृत्वा व्यापकमाचरेत् ॥ अकारादिक्षकारान्तैः पादतल
मस्तकं इति ॥ मातृकाप्राणायामः ॥ मातृकान्यप्रयोगे वक्ष्यते ॥ ग्रहकल्पे ॥ एवं विन्यस्य देहे स्वे मातृकाविष्वमानतरं प्राणायामत्त्रयं कृ
त्वा मूलमंत्रेणामंत्रवित् ॥ विनस्यनृषिछंदो दैवतानि महामते ॥ कृत्वा करांगविन्यासं योगपीठं न्यसेत्ततो ॥ श्रीभद्रयामले ॥ सगर्भश्च
विगर्भश्च प्राणायामो द्विधा मतः ॥ योगिनीतंत्रे ॥ अथ प्राणायाम ॥ सगुरितश्चंसनकरो विगर्भः ॥ प्रोक्तो मोऽनगुणाकल्लोगर्भकलित ॥ ज
पध्यानोपेत ॥ सतु निगदितो गर्भरहितः सगर्भस्तु प्रोक्तो मुनिपरिदृष्टैर्यागनिरतैः ॥ ज्ञानार्णवे ॥ आसने सम्यगासीनो वामेनापूर्वयोदरं ॥

कुंभकेनत्रिराहृत्याद्भिरोनतुरेचयेत्॥ कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं॥ प्राणायामस विज्ञेयस्तर्जनीमध्यमे विना॥ आहृत्य मूलमंत्रं त्रि
रिति मूलं न संख्यावच्छेदकं॥ कुंभसंभवयावच्छक्तानियम्यासून्मनसैव मनुं जपेत्॥ यामं मुहूर्त्तं हृध्यायन् पूर्वोक्तविधिना मुने॥ अनुत्रियम्य कुंभं
कृत्वा रामध्यायान्यावच्छकं मनुं जपारान संबंध॥ अतः कुंभकसमय एव मंत्रजपोज्ञेय॥ दक्षिणामूर्त्तिकल्पेपि॥ प्राणायामसमौ कृत्वा उविधायच
कुंभकं॥ हृत्पंकजे समासीनं मां ध्यायन्यन्नमानस॥ मूलमंत्रं यथाशक्ति जपेद् क्षिपरायणः॥ अतो त्रजप पूर्जांगभूत प्राणायामेषु यथाशक्ति मू
लमंत्रस्य जप एव कार्य॥ नतु मात्रादिगणनानस्यासुपोगांग प्राणायाम परत्वात्॥ उक्तं च कात्यायनीतंत्रे मध्यमूलाद्यावस्यमंगुष्ठेन नीपीयते॥
मात्रासाप्रोच्यते सद्भिर्योगेभि एवयद्विनिति योगशास्त्रेपि॥ जानुंप्रदक्षिणीकृत्यघावत्कालेन हस्तक॥ तावत्कालमितामात्रास्व निश्वाससमायिसे
नि॥ कुलार्णवे॥ नयोशितीर्थपाद्याद्याम षडात्मभ नारद्य॥ प्राणायामापनसेनेकलानां हँतिबोदशिं॥ मानसंवाचकं पायं कायिकं वापियत्कृतं
नत्सर्वं निर्दहेच्छीघ्रं प्राणायामत्रयेणवै॥ दह्यंते ध्यायमानानां धातूनां च यथामल॥ तर्थेंद्रियाणां दह्यंते दोषाः प्राणस्य संयमात्॥ प्राणायाम
विभुत्वात्माय यत्कर्मकरोति हि॥ तत्तत्फलमसंदेहस्वप्रयत्नेनवाकृते॥ कुंभसंभव॥ प्राणायामौ विनायघत्कृतं कर्म निरर्थकं॥ नतोयत्वेन कर्त्त
व्याः प्राणायामाः शुभार्थिभिः॥ अतः परं शोपास्यमंत्रस्य ऋष्यादिकरषडंगन्यासं कृत्वा योगपीठन्यासं कुर्यात्॥ तत्र ऋष्यादिपदार्थानान्यासासे
भवान्तत्वावकपदानामेव न्यासः कार्यः तथा तदक्षिणामूर्त्तिसंहितायां॥ ऋषिस्तु दक्षिणामूर्त्तिरहं शिरसि मां न्यसेत्॥ पंक्तिश्छंदस्तु विज्ञेयं मुखेवि

न्यस्य पार्वति ॥ देवतां हृदयबालां विन्यसेत् परमेश्वरि ॥ न्यासप्रकारस्तु योगिनितंत्रे ॥ ऋष्यादिन्विन्यसेद्देवि चतुर्थौ हृदयांतिकानिति ॥ ऋषये नम
छंदसे नम इत्यादि ॥ प्रपंचसारे ॥ ऋषिर्गुरुत्वाच्छिरसैव धार्यं छंदोक्षरत्वाद्रसनागतं स्यात् ॥ धियावगंतव्यतयास्य दैवं ऋदि प्रविन्यासमनु देवताया
ऋष्यादिपदार्थानामर्थानुसारसंग्रहे ॥ अवर्णादिभ्यगन्यर्थौ धातुप्रत्यर्थकस्तया ॥ शिवर्णार्थविज्ञानमननस्त्रायापकश्चसः ॥ अनयोरूपसंप
त्तौ ऋषिर्गुरुरितीरितः ॥ छदीतिधातुरिच्छायां दादिस्तं नाथकोभवेत् ॥ छंदो वक्ति मनो वर्णांस्तयोरिच्छाप्रदानतः ॥ कौशार्थकाद्ददातीति संपद्दे
वतापदं ॥ साधकाय मनोभावं ददातीति जगुर्यत इति ॥ करषडंगन्यासमिति ॥ अत्र केचित् करन्यासे अंगुष्ठाभ्यां नमः तर्जनीभ्यां नमः ॥ इत्यादिन्यास
वदंति तत्र प्रमाणं चिंत्य ॥ वस्तुतस्तु ज्ञानार्णवादिनानातंत्रदर्शनात् दज्ञानविजृंभितमिति भाति ॥ यथा ज्ञानार्णवे ॥ मूलविद्यांछिराष्टस्य पंचांगुलित
लेषु च ॥ षडंगक्रमयोगेन विन्यसेत् परमेश्वरीति षडंगक्रमयोगे च हृदयाय नमः ॥ शिरसे स्वाहेत्यादिक्रमेणेत्यर्थः ॥ शारदातिलकेपि ॥ अंगुष्ठादि
षडंगुलीषु न्यसेदंगैः सजातिभिः ॥ अस्त्रं तु तलयोर्न्यसेदिति ॥ सजातिभिः हृदयाय नमः शिरसे स्वाहेत्यादिभिः इत्यर्थः ॥ जातिलक्षणं तु कारणागमे ॥
नमः स्वाहा वषट् हुं वौषट् फट्कारस्ततः ॥ जातिषट्कमिदं प्रोक्तं हृत्पादाद्यस्त्रांतसंगतमिति ॥ नारदपंचरात्रेपि पृथक् वांगानि योजयेत् ॥ स्वकी
यहृदयायेति नमो युक्तं कनीयसि ॥ अंगुष्ठेन न्यसेदिति शेषः ॥ ईश्वरं प्रणवादेवि चं प्रविवत्समायुतं ॥ सुखस्वकायनीवाय शिरसे तदनंतरं ॥ स्वा
हायुक्तं मविन्यस्येत् तर्जन्यानामिकांगुलौ ॥ ऊकारं प्रणवाद्देवि विडंतांछितमस्तकं ॥ श्रीवज्रायतनोवाच्यं शिखायै च ततः परं ॥ वषडंतं प्रविन्यसेन्म

ष्ठयामध्यमांगुलौ॥मात्राद्वादशिकान्ताराद्विड्याशायसंयुताः॥कवचायहुमित्येनन्तर्जेष्ठामध्यनामया॥अकारादिविसर्गान्तैर्योजयेत्स्वरणात्मकं॥अ
क्षुरक्षरमायेवअसहायनदनेनतरं॥षडक्षरसमायुक्तंविन्यसेन्नलयोर्द्वयोरिति॥स्पष्टमेवोक्तं॥अतएवनमःस्वाहादीनांहृदयादिंपदयोगेनैवापि
ननंगुष्ठादियोगेनअन्यथान्तरप्यधीयननुल्पयायादिति॥षडंगमंत्राणांवासनानुसारसंग्रहे॥बुद्धिगम्यंवहृन्मंत्र॥नत्वाप्रणामडकोहिहृदा
सौऽङ्गीयतेधुना॥नमस्त्रिपाबुद्धिगस्याप्नुवेरर्थेशिरोमतं॥स्वाहायाचततःस्वस्वविषयाहरणेमतं॥ततःशिरोयदनासम्यक्याप्तेर्येविंषयाप्ति
शिखासहोवषड्ंगंशिखात्मतनुमेहः॥प्राक्तंकवसाद्रुहरणेनयुक्तंकवचंपदं।हुंमहःकवचेनास्यमहसागृह्यतेततः॥शरीरमंत्रिणास्तद्नेत्रंघटि
श्चदर्शनं॥वौषडायंनत्वदृशीतेनस्यानमहःस्मृतं॥नेत्रंहृत्सुरक्षेयवावीत्रसुरंतवनार्थकः।फडग्निस्नेनवानिष्टमाक्षिप्यपरिपालयेत्॥गोनमी
येपि॥रज्ञेमानोहृदात्मायेहृदयेस्याशिवात्मकः॥क्रियतेतत्परत्वंतुहृन्मंत्रेणततःपरं॥सर्वज्ञादिगुणोत्तुंगेसविद्रूपेचिदात्मनि॥क्रियतेविष
याहारःशिरोमंत्रेणाधीमता॥हृद्धिरोरूपविद्यामयमयतोभावनादृता॥क्रीयतेनिजदेहस्यशिखामंत्रेणसादरं।पंचात्मकस्यदेहस्यमंत्रवा
च्येनतेजसा॥सर्वतोवर्ममंत्रेणक्रियतेनन्यसंवृतिः॥यद्दाणिपरंसान्तेसविद्रूपंचिदात्मनि॥हृदयादिमयंतेजस्पादेनन्नेत्रसंज्ञकं॥आध्यात्मि
कादिरूपंयस्याधकस्यविनाशायेन॥अविद्याज्ञानमस्त्रंतत्परंधामससमीरितमिति॥अत्रकेचित्षडंगन्यासेनेत्रत्रयायवौषडितिप्रयोगंवदंति
तत्रप्रमाणंचिंत्यंवक्तव्यसु॥हृदयःशिरसोःशिखायांकवचाक्षस्त्रेषुसहवतुर्थीमिरिति॥प्रपंचसारेवचनात्॥षडंगंविन्यसेन्मंत्रीहृछिरभ्य

77

शिखामनः ॥ कवचंनेत्रमस्त्रंचेतिदक्षिणामूर्त्तिसंहितावचनात् ॥ हृदयंचशिरोदेविशिखाचकवचंततः ॥ नेत्रमस्त्रंन्यसेदङ्गेनेत्रमितिज्ञानार्णवाच्च
चतुर्थेवावचनस्यैवदर्शनात् ॥ नेत्रायेतितत्त्वं ॥ अतएवपवित्रमनतान्त्रदंकमलेगोपनानिकं केवलःशंकरस्थानेसरुकंपश्चिमामुखं ॥ अजि
तेनवामृताधारंसंस्थितेप्रोज्झरेत्ततः ॥ धरेद्यकेवलंरथ्यानेत्रायत्र्यक्षरंपरं ॥ नदंनेवौषडित्युक्तंनेत्रमंत्रोप्ययंस्मृतः ॥ इतिनारदपंचरात्रेसाष्टवो
क्तः ॥ अन्यथाद्विनेत्रदेवतापक्षेनेत्राभामित्यादिपदांतरप्रक्षेपापक्षेपायनेः ॥ प्रपंचसारे ॥ संदीक्षितोमनुमिमंप्रतिजप्तुमिच्छुःकुर्यान्निजे
नवपुषैवतुयोगपीठं ॥ अंसोरुयुग्मपरसाननताभिमूलपार्श्वद्वयैर्विहितमात्रसमुज्वलेच ॥ मध्येनताद्यैरपिजनान्मानिकैर्यजेन्मंत्री ॥
पीठाख्यमंत्रपश्चिमममिति ॥ ज्ञाननवामयार्ध्वनाभिमूलदक्षपार्श्वेरितिपद्मावार्या ॥ ईशानशिव ॥ आराधाख्यपजेच्छक्तिंहृदयेसेचद
रो ॥ धर्मंज्ञानेचसव्यांसेउर्वोवीमन्ययोरपि ॥ वैराग्यसंगमैश्वर्यमितिअनंतायैरियारेनपद्मसूर्यसोमवह्निसत्वरजतमात्मान्तरात्मपर
मात्मज्ञानात्मज्ञानतत्वमायातत्वकलातत्वविद्यातत्वपरतत्वानांग्रहणं ॥ सारसंग्रहे ॥ मूलाधारेमंडूकरूढकालाग्निसंज्ञकं ॥ स्वाधिष्ठाने
वनाभ्यजेच्छक्तिंमूलप्रकृतिकां ॥ आधारशक्तिंहृदयेविन्यस्यमनुवित्तमः ॥ कूर्मानंतौवराहेचधरणींचसुधार्णवे ॥ रत्नद्वीपंचविन्यस्यमनत्र
स्वर्णामहीधरं ॥ तदूर्ध्वंनंदनोद्यानंतन्मध्येमणिमंडपं ॥ कोटिसूर्यप्रभंहेमप्राकारपरिवेष्टितं ॥ रत्नमंडपमध्यस्थांवेदिकांहेमनिर्मितां ॥
विन्यस्या —— मध्यस्थरत्नसिंहासनेशुभं ॥ शरीरेस्वस्यदर्भाद्यैःपीठकल्पनमाचरेत् ॥ दक्षिणांसेन्यसेद्धर्मंज्ञानंवामांसकेन्यसेत् ॥ वा

मोरूमूलेवैराग्यमैश्वर्यंदक्षिणेन्यसेत्॥मुखेधर्मंवामपार्श्वेचाज्ञानंनाभिमंडले॥अवैराग्यंदक्षपार्श्वेचानैश्वर्यंन्यसेत्क्रमात्॥धर्मादीन्य
ष्ठपादाश्वगात्राण्यान्यासुकल्पयेत्॥हृद्यनंतंन्यसेदक्षिणमध्येतत्कर्णिकोपरि॥अर्कंचकेसरेसोमंपनेवह्निंततोन्यसेत्॥तेषांकलान्य
सेत्तत्तन्मंडलेतत्रतत्रवै॥तत्रतत्रतत्तन्मंडलन्यासएवेत्यर्थः वैशब्दस्त्वेवकारार्थवाची॥तथान्यसेद्गुणत्रयंपश्चात्मादिकमतःपरं॥आ
त्मानरात्मपरमात्मविज्ञानात्मकंन्यसेत्॥ज्ञानमायाकलाविद्यापरतत्त्वानिचक्रमात्॥पीठमंत्रप्रविन्यस्यततोदेशिकसत्तमः॥देहा
त्मकेततःपीठेध्यायेदिष्टांचदेवतां॥अथपीठाख्यमंत्रमभ्विममितिपीठमंत्रमनेनमरमिति॥पीठमंत्रंप्रविन्यसेदितित्वप्रपंचसारः
शारदातिलकसारसंग्रहाणांवचनैः॥पीठशक्तिन्यासोनास्तीतिप्रतीयते॥अथमूलमंत्रन्यासः तत्रश्रीरुद्रयामले॥प्राणायामत्रयं
कृत्वामूलमंत्रेणसाधकः॥विन्यसेत्तदृषिछंदोदेवतानियथाविधि॥करांगन्यासषडङ्गस्तुथासानन्यान्समाचरेत्॥तत्रकल्पोदिता
मंत्रीततोमुद्राप्रदर्शयेत्॥नारदपंचरात्रे॥एवंन्यासंपुराकृत्वाकयोर्विग्रहेततः॥मूलमंत्रादिसर्वस्यन्यस्तमंत्रगणस्यच॥मुद्राःप्र
दर्शयेत्स्वस्वध्यानमंत्रसमन्विता॥ततस्तुविग्रहेध्यायेदात्मानंविन्यसेत्परां॥सारसंग्रहे॥ततःस्वोपास्यमंत्रन्यासानृष्यादिकान्न्यसेत्
यस्यमंत्रस्ययेन्यासाःकर्तव्याःसिद्धिमिच्छता॥ततोमंत्रपुटैर्वर्णैर्मातृकायाःसबिंदुभिः॥विन्यसेन्मंत्रवित्सम्यक्शास्त्रदृष्टेनवर्त्मना॥
अनर्घ्यांगकरन्यासांस्ततोमुद्रांप्रदर्शयेत्॥श्रीकुलार्णवे॥आगमोक्तेनमार्गेणन्यासान्नित्यंकरोतियः॥देवताभावमाप्नोतिमंत्रसिद्धिप्र

78

॥राम:॥
॥७८॥

जायते ॥ यो न्यासकवचच्छन्नो मंत्रं जपति तं प्रिये ॥ दृष्ट्वा विघ्ना पलायंते सिंहं दृष्ट्वा यथा गजाः ॥ अकृत्वा न्यासजालं यो मूढात्मा कुरुते जपः ॥ विघ्नैः
सबाध्यते नूनं व्याघ्रैर्मृगशिशुर्यथा ॥ कालिकापुराणे ॥ न्यासानां प्रचुरत्वं हि फलानामपि भूरिता ॥ उक्तन्यासोन हिन्यास्यः स्वधिकं न समाचरेत्
उत्तरतंत्रे ॥ वाग्भवस्य द्वितीयेन कामराजेन भैरव ॥ छत्रपाबंधनं कार्यं मूलमंत्रेण दर्शितं ॥ परित्यागस्तु मुद्राया माराबीजेन वाचरेत् ॥ प्राणादि
वंडविडम्या षष्ठस्वरसमीन्वितं ॥ माराबीजमिति प्रोक्तमिति ॥ प्राणादिहंकारः सुगमन्यत् ॥ सारसंग्रहे । ध्यानं कुर्यात्ततो मंत्री तत्तत्कल्पो-
क्तवत्मना ॥ ध्यानमात्मेष्टदेवस्य वेदनं मनसा मतं ॥ तदपि द्विविधं प्रोक्तं सगुणं निर्गुणं तथा ॥ आत्मनो हृदयांभोजकर्णिकाकेसरोज्वलं ॥
चक्रतं सोमसूर्याग्निमंडलेन विराजितं ॥ स्वीयेष्टदेवतां तत्र यत्नेदागमबोधितां ॥ एवं यद्वेदनं तद्धि सगुणध्यानमुच्यते यज्जीवब्रह्मणोरै-
क्यं सोहमस्मीति वेदनं ॥ तदेव निर्गुणं ध्यानमिति तत्त्वविदो विदुः । ध्यानं तु तत्तत्कल्पेषु वक्ष्यते ॥ योगिनीतंत्रे ॥ अथांतर्यजनं वक्ष्ये यथा व-
रवधारय । वामनाडीसमाकृष्य किंचिदाकुंचयेद्गुदं ॥ रेचयेत्तममार्गेण जिह्वामालुगतां चरेत् ॥ शक्तिः शिवपदे योज्या किंचिदाकुंचयेदधः ॥
अनर्यागमिमं देवि कथितं गुरुभाषितं ॥ फेत्कारिणीतंत्रे ॥ आराधयेन्मनसा भक्त्या बाह्यपूजां यथा चरेत् ॥ गौतमीये ॥ पूजां च मानसीं कुर्यात्ततो
र्घस्थापनं चरेत् ॥ ध्यात्वा स्वेतर्यजेत्पीठं न्यासमार्गेण मंत्रवित् ॥ तस्मिन्पीठे स्थितामिष्टदेवतां मुक्तविग्रहां । ध्यात्वा यजेत्स्वच्छंदनाद्यैर्मानसैर्भोजनां-
तिकैः । भोजनावसरे त्वान्नवैश्वदेवं समाचरेत् ॥ मूलाधारे स्मरेत्कुंडं कुंडलग्निसमज्वलं ॥ आत्मागरात्मपरमज्ञानात्मचतुरस्रकं ॥ धर्माधर्मादि-

मेनत्रमूलमंत्रपुरःसरं॥ अहंजुहोमिस्वाहेतिप्रमेकंजुहुयान्नरः॥ अहंतासमन्यपैशुन्यकामक्रोधादिकंहविः। मनस्त्वक्स्रुवःशोकःस्रुक्स्नास्रुगुदीरि
ता नदंमेनन्मयेभूत्वायथाशक्तिजपेन्मंत्रं॥ नज्ञपंसर्वसंपन्मेदेवतायैनिवेदयेत्। जपनिवेदनमंत्रस्तत्रैवक्ष्यते॥ लक्षसागरे इत्थंतर्पयेयथाश
क्तिकृत्वादेविसमर्पयेत्॥ गुरुप्रणाम्यविधिवत्पूजाचक्रंसमुद्धरेत्॥ सिद्धेश्वरीतंत्रे॥ प्रणम्यश्रीगुरुंभक्त्यासाधकःकुंकुमादिभिः॥ स्वर्णादिसं
चतेपीठेपूजाचक्रंसमुद्धरेत्॥ संस्थाप्यपुरतोदेविभूमेस्थानेसुरेश्वरि॥ दद्यात्पुष्पांजलिंतत्रमूलमंत्रेणसाधकः॥ दक्षिणामूर्तिसंहितायां
श्रीखंडरक्तश्रीखंडश्रीपर्णीसंभवेपटे॥ चक्रंसंस्थापयेद्देवितामत्रवरवर्णिनि॥ श्रीरुद्रयामले॥ नतःकुंकुमसिंदूरैःकार्यंमंत्रंतुयोगिनासौ
वर्णेराजतेताम्रेस्फाटिकेवैद्रुमेतथा॥ चक्रंयथोक्तविधिनापूजादेविनरोत्तमैः॥ दक्षिणामूर्तिः॥ गंडकीभवपाषाणेस्वर्णेरंजितयोरिति॥ रत्न
सागरे॥ यावज्जीवंसुवर्णेस्याद्रूप्येद्वाविंशतिःप्रिये॥ ताम्रेद्वादशवर्षाणितदर्द्धंभूर्जपत्रके॥ सारसंग्रहे॥ ताम्रेद्वारशकंचवर्षंस्फटिकादौतुसर्व
दा॥ तेषामध्येस्फाटिकंतुसर्वसिद्धिप्रदंभवेत्॥ लक्षसागरे॥ भमौसिंदूररजसारचितंसर्वकामदं सुवर्णरचितंयंत्रंसर्वराजवशंकरं॥ र
जतेनकृतंयंत्रमायुरारोग्यकामदं॥ ताम्रेणरचितंयंत्रंसर्वैश्वर्यप्रदंमतं॥ यंत्रंहिस्फाटिकंदेविमनोभिलषितंप्रदं॥ माणिक्यरचितंयंत्रंराज्य
दंमुक्तिदंमतं॥ कृतंमरकतैर्यंत्रंसर्वशत्रुविनाशनं॥ लोहत्रयोद्भवंयंत्रंसर्वसिद्धिकरंमतं॥ लोहत्रयविभागंतुकथयामितवानघे॥ भागाद्दश
सुवर्णस्यरजतस्यचषोडश॥ ताम्रस्यरविभागेनपीठंकुर्यान्महेश्वरि॥ तस्मिन्पीठेतुनिर्माणंपूजाचक्रस्यकारयेत्। शांतिदंपुष्टिदंप्रोक्तंसर्वश

79

त्रुनिवर्हणं ॥ आयुरारोग्यजननकं कांतिदं पुष्टिदं मतं ॥ तंत्रराजे ॥ सीसकाद्यादिभिष्पुनः पूर्वोक्तविपरीतकृत्वा । फलकामो पठेन्मिनौ स्थापयेच्चकदाचन । स्थापितं
यदि मोहेन लोभतो ज्ञानतोपि वा ॥ कुलं वित्तमपत्यं च निर्मूलयति सर्वथा ॥ कुलमूलावतारे ॥ अग्निरंगुलविस्तारं प्राक्प्रत्यग्दक्षिणोत्तरं ॥ पत्रप्रमाणं कर्तव्यम
र्धपीठं मनोहरं ॥ पत्रार्द्धं वेष्टकं कुर्वन्ति चतुरस्रं समंततः ॥ तस्मिन्पीठे च निर्माणं पूजाचक्रस्य ॥ सौत्रामणितंत्रे ॥ मज्जरेखा भवेल्लक्ष्मी चक्ररेखा दरिद्रता । लक्ष्मसा
गरे ॥ अग्निरंगुलं हेमस्य रजतस्य तथैव च ॥ ताम्रस्य पूर्वसंख्यैव माणिक्यादौ यथेच्छया ॥ अग्निरंगुलविस्तारस्त्र्यंगुलविस्तारायाममप्यथ ॥ पलं विंशत्युत्तरत्रिंश
न्गुंजापरिमितं ॥ त्र्यंगुलविस्तारस्तु मानं तु अंगुलमानेन ॥ वेदिकापीठशिविकारथादीनां विधिः पुनः ॥ मानांतरांगुलेनैव भवेन्नान्येन केनचिदिति महाकपिल
पंचरात्रं ब्रवीत् ॥ पूजाचक्रस्य पीठशब्दवाच्यत्वात् ॥ मानांतरांगुललक्षणं तु प्रागेव मंडपकरणे प्रोक्तं ॥ तंत्रराजे ॥ चक्रे देव्या तथा शिष्यप्रतिष्ठाविधिरुच्यते
सा च तत्त्वविदा कार्या संप्रदायानुरोधिना ॥ नित्यनैमित्तकोपास्तिनिरतेन यथास्थिते ॥ शुभग्रहोदये नेतुकुले गुणशालिनि ॥ सुमुहूर्ते कारयेदिति ॥ तथा । क्षौद्रा
ज्यगुग्गुलैः प्रथमं नारिकेलांभसा ततः ॥ अभिषिच्याथ मंत्रेण कवचेनाक्षरोषवै ॥ आवाह्याभ्यर्च्य तत्रैव चक्रं संस्थाप्य पूजयेत् ॥ गंधपुष्पैर्नैवेद्यधूपदीपैर्नैवेद्यदर्पणैः
त्रिरात्रं पूजयेद्देवीमिति ॥ तथा ॥ एवं दिनत्रयं कृत्वा ततो नित्यक्रमं भवेत् ॥ एवं देवीप्रतिष्ठायां क्रमः सान्निध्यकारकः ॥ इति लक्ष्मसागरे ॥ आदौ वेदादिभिर्मंत्रैरस्तुत
रणामाचरेत् ॥ धातुनिर्मितचक्राणां मूर्तीनां च विशेषतः ॥ इति । अस्य तारणप्रकारस्तु प्रयोगे वक्ष्यते । नारदीये । देवाग्रतस्तु वामाग्रे त्रिकोणं चंदनांभसा ॥ वृत्तेन
वेष्टितं वाथ चतुरस्रेण चैव हि ॥ विरच्य मुद्रया मत्स्यरूपया साधकोऽपि । सारसंग्रहे । त्रिकोणं वृत्तसंवीतं चतुरस्रेण वेष्टितं ॥ गंधलिप्ते स्ववामाग्रे विदध्यान्मत्स्य

मुद्रया॥कुलार्णवे॥आधारेणविनाभ्रंशोनन्ध्यंतिचमानरः॥तस्माद्विधिवदाधारंकल्पयेत्कुलनायिके॥आधारंत्रिपदंप्राक्तुवर्त्तुलंवाचतुष्पदं॥अथवावर्त्तुला
कारंकुर्याद्देविमनोहरं॥सारसंग्रहे॥मूलेनाक्षालितंशंखंधारेसंस्थापयामिव॥कालेनविंदुरनुस्वारः॥भुजंगेशोरेफः॥नादशंविंदुयुक्तंतेनमंरंइति॥याम
ले॥धूम्राचिरुष्माज्वालिनीविस्फुलिंगिनी॥सुश्रीःसुरूपाकपिलाहव्यकव्यवहातथा॥वह्नेर्दशकलातेयादशधर्मफलप्रदा॥सारसंग्रहे॥अस्त्रेणाक्षालितंशं
खंतत्रसंस्थाप्यपूजयेत्॥यामले॥तपिनीतापिनीधूम्रामरीचिर्ज्वालिनीरुचिः॥सुषुम्नाभोगदाविश्वाबोधिनीधारिणीक्षमा॥एताद्वादशधापूज्यारवेरर्थप्र
दाःकलाः॥सारसंग्रहे॥ततःसुधामयैर्नीयैर्मूलांतेमातृकांपठन्॥विलोमांपूरयेत्तस्मिन्पूजकोमनुनामुना॥अर्घपात्रंपूरयानिमुक्त्वासंपूजयेत्ततः॥
शारदातिलके॥विंदुस्रुतसुधामयैः॥तोयैःसुगंधपुष्पाद्यैःपूरयेत्तंयथाविधि॥विंदुःकुमध्यंतत्रचंद्रमंडलस्यविद्यमानत्वादिति॥सारसंग्रहे॥करणीचंद्रोविंदु
युतौकामप्रदपदंततः॥षोडशानेकलाशब्दमात्मनेनमइत्यथ॥गंधपुष्पैःसमभ्यर्च्यकलाषोडशकंयजेत्॥करणोडचंडस्तविंदुरनुस्वारःतेनडंसंइति॥
यामले॥अमृतामानदापूषापुष्टिस्तुष्टिरतिर्धृतिः॥शशिनीचंद्रिकाकांतिर्ज्योत्स्नाश्रीःप्रतिरंगदा॥पूर्णापूर्णामृताकामदायिन्यःस्वरजाःकला॥सोम
मण्डलमध्यस्थाइति॥नारदीये॥प्राणप्रतिष्ठांकुर्वीतकलानांतत्रतत्रच॥तत्रतत्रैवतत्तत्कालानांपूजनांतइत्यर्थः॥सारसंग्रहे॥प्राग्वत्तीर्थंसमावाह्यमू
लमंत्रेणतत्रच॥संयोज्यनेत्रमंत्रेणपुष्पेनस्यशिखाणुना॥प्रदर्श्यगालिनीमुद्रांमुद्रयाधेनुसंख्यया॥अमृतीकृत्यविधिवत्सुधाबीजेनसाधक॥ध्यात्वेष्ट
देवतांतत्रसकलीकृत्यदेशिकः॥अंगन्यासेनचास्त्रेणाकलयेद्दिशोदश॥नेत्रमंत्रेणसंवीक्ष्यमुद्रयाशंखसंज्ञया॥अवगुंठ्यततोधेनुमुद्रयायोनिरूपया

गंधपुष्पादिभिस्तत्र पूजयेदिष्टदेवतां ॥ षडंगानि च संपूज्य मंत्रयेन्मूलमंत्रतः ॥ अष्टकृत्वस्ततस्त्वार्घं छादयेन्मत्स्यमुद्रया ॥ नारदीये ॥ वीक्षणं नेत्रमंत्रेणान च मूलेन मंत्रवित् ॥ मूलेनेति मंत्रांगपरं तत्र मंत्राभावात् ॥ गुरुश्चापि सर्वत्र तत्तदंगमंत्राणामेवादानं हृदयादिपदैरिति ॥ अगस्त्यः ॥ कवचेनावगुंठयेति तत्तन्मुद्रयेति शेषः ॥ सारसंग्रहे ॥ तच्छंखस्थजलं किंचित्कुंभतोये विनिक्षिपेत् ॥ शारदा ॥ अर्घस्योत्तरतः कार्यं पाद्यं साचमनीयकं ॥ शौनकः ॥ अर्घस्योत्तरदिग्भागे पाद्यं साचमनीयकं ॥ मधुपर्कं च संस्थाप्य त्रिकोणेषु यथाक्रमं ॥ एकैकपात्रमंत्रेणाहृष्टस्त्वाभिमंत्रयेत् विष्णुधर्मोत्तरे ॥ मधुपर्कं च संक्षौडं दधिप्रोक्तं मनीषिभिः ॥ दध्यभावे पयः कार्यं मध्वभावे गुडस्तथा ॥ एतत्प्रतिनिधिर्नास्ति तत्र यत्नं समाचरेत् पात्रमुक्तमुत्तरतंत्रे ॥ तद्दद्यात्कांस्यपात्रेणैवैभ्येन भवेदथवा ॥ वराहपुराणे ॥ परमं ह्यन्नदं नाम मधुसंज्ञं तदुच्यते ॥ तदाप्यनेयदानेन मधुपर्कस्तदास्मृतः ॥ पात्राणि वक्ष्यन्ते शारदातिलके ॥ दक्षिणे प्रोक्षणीपात्रमादायाद्भिः प्रपूरयेत् ॥ किंचिदर्घांबु संगृह्य प्रोक्षण्यंभसि योजयेत् ॥ पंचरात्रे ॥ पुनराचमनीयार्थं पात्रं संस्थापयेत्ततः ॥ प्रपंचसारे ॥ गंधपुष्पाक्षतयवाकुशाग्रास्तिलसर्षपाः ॥ दूर्वा चेति क्रमादर्घद्रव्याष्टकमुदीरितं ॥ अक्षतास्तंडुलाः ॥ न चनाक्षतैरर्चये ॥ विष्णुमिति ॥ वचनविशेषः तस्य केवलाक्षताचानिषेधात् ॥ नारदपंचरात्रे ॥ श्रीविष्णोरर्घे ॥ सिद्धार्थकास्तिला दूर्वाः सयवास्तिलतंडुलाः ॥ तोयक्षीरघृतोपेतमिदमर्घमुदाहृतमित्युक्तत्वात् ॥ सिद्धार्थकास्तिला दूर्वाः सयवास्तिलतंडुलाः ॥ तोये क्षीरघृतोपेतमिदमर्घमुदाहृतमित्युक्तत्वात् ॥ सिद्धार्थाः सर्षपाः शस्ता दूर्वा यत्र वान्वितः ॥ यत्र त्रयान्विता दूर्वा प्रशस्ता होमकर्मणीति सोमशंभुवचनात् ॥ प्रपंचसारे ॥ पाद्यं स्यामाकदूर्वाप्र

विल्लुक्कांतामिष्यते ॥ जातीलवंगकंकोलैर्मनमाचमनीयकं ॥ जाती२फलं ॥ तथाचमतपात्रेपिदद्याज्जातीफलंमुनेरित्यगस्तिसंहितावचनात् ॥ जा
तीफलादीनिचूर्णितानिदेयानि ॥ चूर्णयित्वाततथान्याप्यंक्षिपेदाचमनीयके ॥ इतिफेत्कारिणीतंत्रवचनात् ॥ लिंगपुराणे ॥ वंशायाराप्यंक्षनाचे
वयवव्रीहितिलानिच ॥ आज्यासिद्धार्थदु-र्वाअसितंवार्घपात्रके ॥ कुशपुष्पयवव्रीहिवकुमूलनमालकं ॥ दापयेत्प्रोक्षणीपात्रेभसितेषुएवेन
व ॥ उशीरंचंदनंचैवपाद्येचपरिकल्पयेत् ॥ जातीकंकोलकर्पूरवकुमूलनमालकं ॥ चूर्णयित्वायथान्यायंक्षिपेदाचमनीयके ॥ वकुमलंतुर्वा ॥ प्रपंच
नारे ॥ पुष्पाभिरद्भिर्विहितंपुनराचमनीयकं ॥ पुष्पादिभिरितिपुष्पैर्जात्यादिजदेयमित्यवगम्यते ॥ अर्घ्यादिद्रव्यालाभेतुशौनकः ॥ एषामभावेपुष्पा
दिनतत्रज्ञावनयान्यसेत् ॥ मंत्रतंत्रप्रकाशेपि ॥ द्रव्याभावेप्रदातव्याक्षालितास्तंदुलाःशुभाः ॥ भसितंतुशिवपूजायामेव ॥ अर्घ्यादिपात्राणितुतंत्रराजे
त्रिलोककांचमृत्पात्रेष्वेकस्मिन्नर्घकल्पनं ॥ भैरवीतंत्रे पात्रकांचनकारूप्यजनितंमुक्ताकलायोद्भवंविष्णामित्रमयंहिकामफलदंहेमंस्त्रियस्फाटिकं
नारंश्रीनिदमिष्टसिद्धिजनकंथ्वीमारिकलोद्भवंकापालंस्फुटमंत्रसिद्धिजनकंमुक्तिप्रदंमौक्तिकं ॥ हेमादित्रिवुक्ष्णमिति ॥ कुलार्णवे ॥ स्वर्णास्फ
प्यशिलाताम्रकापालाब्जमृन्मये ॥ नालिकरंचशंखंचमुक्ताशुक्तिसमुद्भवं ॥ पुराणवृक्षकृतंरम्यंपात्रमलोलितंशुभं ॥ भैरवयामले ॥ हेमपात्रं
दारकोत्थंपावनंचोत्तमोत्तमं ॥ नारिकेलोद्भवंविक्षेपंचोत्तममध्यमं ॥ कांचपात्रंतुमुख्येणिज्ञेयंचोत्तमकन्यकां ॥ मध्यमोत्तमकंहेमंतारंमध्यम
मध्यमं ॥ नाम्रपात्रादिकंचैवप्रोक्तंमध्यमकन्यकं ॥ कन्यसोत्तमकंवैत्वंतुसवृक्षजमेवच ॥ कन्यसेमध्यमंप्रोक्तंयन्मयकन्यसाधमं ॥ महाहारकतं

ये ॥ शृणु देवि प्रवक्ष्यामि नारिकेलविधिं शुभं ॥ पुरा वै निर्मितं पात्रं विश्वामित्रेण धीमता ॥ विश्वामित्रकपात्रं तु सर्वपात्रोत्तमं ॥ तस्मिंस्तु पूजये
द्देवं वसिष्ठदेवि विश्वं सर्वशः ॥ तस्य दर्शनमात्रेण चैकविंशति कं कुलं ॥ उद्धरिष्यत्यसंदेहो गृहस्थो भवति प्रिय ॥ ब्रह्महत्यादिपापानि तथा विश्वास
घातकाः ॥ दृष्ट्वा पात्रं नारिकेलं सर्वपापं प्रणस्यति ॥ कन्याकोटिप्रदानानि तथा हेमशतानि च ॥ यो ददाति महेशानि राहुग्रस्ते दिवाकरे ॥ तत्फलं को
टिगुणितं नारिकेलार्घदानतः ॥ अलाभे तस्य पात्रस्य चान्यपात्रेण पूजयेत् ॥ दृष्ट्वार्घपात्रं देवेशि ब्रह्माद्या देवतागणाः ॥ नृत्यन्ति सर्वयोगिन्यः प्रीता
सिद्धिं ददाति च ॥ देवीपुराणे ॥ हेमराजतताम्राणि काष्ठमृच्छैलजानि च ॥ रत्नादीनि च पात्राणि शुभरेखांकितानि च ॥ अर्घनैवेद्यपूजार्थं वलिदाने प्र
कल्पयेत् ॥ शिवरहस्ये ॥ हेमयात्राणि सर्वाणि ——— तानि भवेत्तु मे ॥ अर्घं दत्वा तु रौप्येण आयुराज्यसुतान् लभेत् ॥ ताम्रपात्रेण सौभाग्यं धर्मं मृ
न्मयसंभवे ॥ सर्वालाभे तु माहेय स्वहस्तघटितं यदि ॥ आसने चार्घपात्रं च भक्तमासादयेत्तु ॥ सर्वस्ववर्णाच्च ताम्रमर्घपात्रेन ततोधिकं ॥ पात्राणा
मरः कार्यपात्रारम्भेवोत्तमानि तु ॥ वलिहोमक्रियार्थे हि विना पात्रं न सिध्यति ॥ षड्विंशदंगुलं पात्रमुत्तमं परिकीर्तितं ॥ मध्यमं तु त्रिभागोनं कनि
ष्ठं द्वादशांगुलं ॥ वस्वंगुलविहीनं तु न पात्रं कारयेत्क्वचित् ॥ नाभीविवररूपाणि पुंडरीकाकृतानि च ॥ शंखनीलोत्पलाभानि पात्राणि परिकल्प
येत् ॥ देवीयामले ॥ वश्याकर्षणकर्माणि हेमपात्रे सुरेश्वरि ॥ शांतिके पौष्टिके चैव राजतं कारयेत्प्रिये ॥ लोहं पात्रं समानेयं मारणोच्चाटने तथा ॥
स्तंभकार्ये तु पाषाणं विद्वेषेणानुमृन्मयं ॥ सर्वकार्येषु कर्तव्यं विश्वामित्रं च सुव्रते ॥ काष्ठपात्रं विजानीयान्मंत्राराधनकर्मणि ॥ शारदातिलके

आत्मानेयागवस्तूनिन्मंऽस्त्रंप्रोक्षयेद्गुरुः प्रोक्षणीपात्रतोयेनमनुनात्मान्यपिक्रमात्॥ कुलार्णवे॥ पूजाद्रव्याणिसंप्रोक्ष्यमूलास्त्रेणविधानवि
त्॥ दर्शयेधेनुमुद्रांचद्रव्यशुद्धिप्रकीर्त्तिता॥ रुद्रयामले॥ अप्रोक्षितंनैवदद्यात्प्रोक्षितंसमर्चयेत्॥ शारदा॥ न्यासक्रमेणस्वदेहेधर्मादीन्पूजयेत्ततः॥
पुष्पाद्यैःपीठमन्त्रंतंतस्मिन्ध्यायपरदेवतां॥ पंचकृत्वःपुनःकार्यान्पुष्पांजलिमनन्यधीः॥ उत्तमांगेहृदाधारेपादसर्वांगकेक्रमात्॥ विनानिवेद्यंपंचांगे(
रुपचारैःसमर्चयेत्॥ गुरूपदिष्टविधिनाशेषमन्यत्समापयेत्॥ सर्वमेतत्प्रपूजीतप्रोक्षणपभिःसमाहितः धर्मादीनित्युपलक्षणं॥ तेनमंडूकादिपी
ठमंत्रायोगपीठदेवतायोगपीठन्यासस्थानेषुपूज्याइत्यर्थः॥ शेषजपादिकंसारसंग्रहे॥ मूलाधारगतेकुंडेपूर्वोक्तचतुरस्रके॥ पूर्ववत्पूजयात्मंत्रीधर्मा
धर्मादिकंहविः॥ प्रकाशोदये॥ ॥अथयागाभ्यंतरेकार्यमग्निकार्यंब्रवीमितत्॥ विदग्निमंडलेदंडमूलेकुंडलिरूपिणी॥ त्र्यस्रकुंडेकृतेद्यसूर्य
मंडलवद्विधि॥ वासनेंधनसंदीप्तेपंचभिर्व्वसमीरणैः॥ संधु—क्षिप्रजुहुयाद्दक्षहृन्निरतंनरं॥ मूलविद्यांसमुच्चार्यजुहुनेत्सप्ताहुतीस्ततः॥ मज
रूपंपटेभ्योकपरंगुरुतरेपरात्॥ धर्माधर्महविर्दीप्तेआत्माग्नौमनसास्रुवा॥ सुषुम्नावर्त्मनानित्यमक्षवृत्तिर्जुहोम्यहं॥ स्वाहांतेनाहुतिंदत्वाप्रा
णायामनिरोधकः॥ निरस्तनिखिलोपाधीमात्मानंचिन्मयंस्मरेत्॥ हवनप्रकारस्तुप्रयोगेवक्ष्यते॥ मुंचनंचप्रकाशे॥ अष्टोत्तरसहस्रंतुकृत्वांत
र्यागमादरात्॥ जपेत्प्रदिदिनंमंत्रीति॥ अंतर्देहेयागःपूजा॥ सारसंग्रहे॥ आत्मपूजांविधायेत्थंयथाशक्तिमनुंजपेत्॥ स्वेष्टदेवतमात्मानंभावयन्त
न्मानसः॥ एतेनाष्टोत्तरसहस्रंतुशक्तपरं॥ अथयोगपीठपूजा॥ तत्रश्रीसारसंग्रहे॥ अर्घोदकेनसंप्रोक्ष्यमूलमंत्रेणमंत्रवित्॥ पूजापीठंततस्तत्र

पीठपूजांसमाचरेत् ॥ देवस्योत्तरतः पूज्यागुरुपंक्तिस्ततः परं ॥ महागणपतिः पूज्योदक्षिणेचंदनादिभिः ॥ उत्तरतः उत्तरदिशितेनदेवस्यदक्षिणा
भुजसमीपस्थायातं ॥ उत्तरत्वंतथावक्ष्यति ॥ रुद्रयामले ॥ सर्वाधोमंडुकाधारेरुद्रकालानलोविभुः ॥ रक्षांकरोतुमेनित्यंयामूलप्रकृतिःसदा ॥ तत्र आ
धारशक्तिर्याममरक्षांकरोतुसा ॥ कूर्मस्तुसततंपापादनंतोरक्षयेत्सदा ॥ तस्यमूर्द्ध्निस्थितेनचक्रेवाराहपरिरक्षतु ॥ दंततस्यस्थितापृथ्वीपातुनित्यंव
सुंधरा ॥ समुद्रःसर्वदापातुमरलैरमृतैर्जले ॥ रत्नद्वीपस्तुमेरक्षांकरोतुसर्वतः ॥ पातुमांनंदनोद्यानंरक्षंतुकल्पपादपाः ॥ अधस्तेषांसदापातुप
विचित्ररत्नभूमिकाः ॥ श्रीरत्नमंदरंपातुमनंतंपातुवेदिका ॥ इति ॥ भैरवयामले ॥ रक्तवर्णामहाकायंमंडूकंप्रथमंयजेत् ॥ तत्रकालाग्निरुद्रंचश्रानवा
ऊरुसमन्वितं ॥ पंचवर्णैरक्तकृष्णवर्णादक्षापरांगकं ॥ तदूर्ध्वेमूलप्रकृतिंवधुकाभांवराभय ॥ सारसंग्रहे ॥ अथपीठस्यरक्ताभांपाशांकुशवराभ
या ॥ हस्तैर्दधतःसम्यग्यजेदाधारशक्तिकां ॥ तस्याउपरिसंपूज्यःकूर्मःस्वर्णरुचिर्दृढः ॥ सहस्रसिरसंतत्रशुक्लवर्णमलंकृतं ॥ नीलवस्त्रंमहा
कायमनंतंसम्यगर्चयेत् ॥ पीतांबरधरंतत्रनीलवर्णांसुभूषणां ॥ शंखचक्रगदापद्मधारिणीयोषितांयजेत् ॥ व्रीह्यग्रकुशहस्ताभ्यांवराभयकरां
शुभां ॥ तद्दंष्ट्रापरिनीलाभांधरांधीरःसमर्चयेत् ॥ रत्नद्वीपःतमरत्नमयः ॥ सुकंचनवराजे ॥ नवरत्नमयेद्वीपंनवखंडविराजितं ॥ पुष्पनील
चवैडूर्यविद्रुमंमौक्तिकंतथा ॥ ईशान्येमरकतंवज्रंगोमेदंपद्मरागकं ॥ ईशानात्ईशानकोणे ॥ मरकतरत्नंयथाभवतितथापश्चिमोविलोमेनन
वरत्नमयाखंडानिमध्यानानितेयानीत्यर्थः ॥ तत्रैवकुरुकुल्लापटले ॥ पश्चिमंपुष्परागंतुसंप्राप्यावतरेत्तत्रशुक्लत्वात् ॥ रत्नमंदिरंनानारत्न

॥शि॰वं॥
॥८३॥

मयं स्वर्णप्राकारवेष्टितं च अमृताब्धौ मणिद्वीपे कल्पवृक्षवनोज्ज्वले ॥ स्वर्णप्राकारसंदीप्तं स्मरेन्माणिक्यमंडपमिति देवीयामलवचनात् ॥ वे
दिका स्वर्णमयी विचित्रमंडपं तत्र पूजयेत्स्वर्णवेदिकामिति सारसंग्रहवचनात् ॥ सपसंग्रहे ॥ रत्नसिंहासनं तत्र पूजयेन्मंडलान्वितं ॥ तत्पादेषु य
जेत्सम्यगाग्नेयादि शिवांतकं ॥ धर्मं वृषतनुं रक्तं स्वर्णमादौ समर्चयेत् ॥ सिंहाकारं ततो ज्ञानं श्यामवर्णसमाहितं ॥ भूताकारं च वैराग्यं पीतवर्णं यजे
त्ततः ॥ हस्तिवर्णगताकारमैश्वर्यं साधु पूजयेत् ॥ अग्निदेशं समारभ्य चतुर्दिक्षु समर्चयेत् ॥ अधर्मादींश्च पीठस्य विदिग्भागधिपास्त्वथ ॥ वामके
श्वरतंत्रे ॥ मध्ये मायां तथा विद्यां पूजयेत्साधकोत्तमः ॥ सारसंग्रहे ॥ तल्पाकारं ततोऽनंतं पीठमध्ये समर्चयेत् ॥ तस्य मूर्ध्नि यजेत्पद्मं सर्वलक्षणसंयु
तं ॥ आनंदकंदमर्च्यं संविन्नालमनंतरं ॥ प्रकृत्यात्मकपत्राणि विकारात्मककेसरान् ॥ तत्त्वरूपां कर्णिकां च मातृकावर्णविग्रहं ॥ लिंगपुराणे ॥
तस्य पूर्वदलं साक्षादणिमामयमक्षरं ॥ लघिमा दक्षिणं चैव महिमा पश्चिमं तथा ॥ प्राप्तिश्चैवोत्तरं पत्रं प्राकाम्यं पावकस्य तु ॥ ईशित्वं नैरृतं पत्रं
शिवत्वं वायुगोचरं ॥ सर्वज्ञत्वं तथैशानं ॥ कर्णिका सोम उच्यते ॥ सोमस्याधस्तथा सूर्यस्तथाधः पावकः स्वयं ॥ सार० ॥ पात्रकोणेषु पद्मस्य
सत्वादीन्क्रमतो यजेत् ॥ सत्वपूर्वान्गुणान्सूर्येंदग्नीनां मंडलानि च ॥ ब्रह्मविष्णुमहेशाख्यानात्मादींस्त्रीन्यथाक्रमं ॥ संमोहनतंत्रे ॥ बोधरूपः सत्व
गुणो रजः प्रकृतिरूपकं ॥ तमोगुणो मोहरूपः प्रोक्ता ह्येवं गुणास्त्रयः ॥ वामके० ॥ ज्ञानतत्वात्मकं चैव मायातत्वात्मकं यजेत् ॥ कलातत्वात्मकं चैव
विद्यातत्वात्मकं तथा ॥ परतत्वात्मकं चैव क्रमेण परिपूजयेत् ॥ चतुर्दिक्षु च मध्ये चेति ॥ प्रपंचसारे ॥ मध्येऽनंतं पद्ममस्मिंश्च सोमं वह्निनारवर्णौर्दि

83

॥रामः॥
॥८३॥

भक्तैः ॥ सत्वादींश्च त्रिगुणानात्मशक्तान्शक्तिः किंजल्केषु च मध्ये यजेच्च ॥ सारसंग्रहे ॥ केसरेषु ततो मध्ये पूर्वादिषु यथाक्रमं ॥ तन्त्रमंत्रोक्तमी
ठस्थानवशक्तिः प्रपूजयेत् ॥ पीठमंत्रेण गंधाद्यैः पीठमध्ये ततो यजेत् ॥ सनत्कुमारः ॥ प्राणाद्यष्टसुपत्रेषु कर्णिकायां यजन्तु ते ॥ चतुर्थ्यंतनमोयु
क्तैः स्वैस्स्वैरेव तु नामभिः ॥ मध्ये पुष्पांजलिं दद्यात्पीठमंत्रेण मंत्रवित् ॥ यजेत्प्रादक्षिण्येन ॥ एतादृशादक्षिणां पूज्यांइति मंत्रतंत्रप्रकाशवचनात्
पूर्वादिष्वित्यत्र पश्चिमस्यैव पूर्वत्वं ॥ स्वराः षोडशदेवेशि युग्मयुग्मप्रभेदतः ॥ दलाष्टकेतु संलिख्य पश्चिमादि प्रदक्षिणमिति ॥ यज्ञार्णवे यंत्रे
विन्यासदर्शनादावर्णाचार्यादेवाग्रे प्राप्यभिधानाच्च लाघवाद्वापि कल्पनात् ॥ दक्षिणे च तथा गुरुमिति ॥ संकर्षणवचनात् ॥ नारदपंचरा
त्रेपि ॥ गुर्वर्चायां ॥ मंडले देवदेवस्य दक्षिणे मंडलोपरि ॥ गुरुं समर्चयेदिति ॥ अत एव देवतन्त्रस्यान्तरत इति पूर्वोक्तस्यापि पूजामंडलस्याप
पर्येव पूजात्तया धर्मादिपूजामप्येवमेव देवायेकल्पीनप्राच्यनुसारेणैवाग्नेयादि कल्पयेत् ॥ अत्र भाविनीभूतवदुप–रः ॥ आवाह्यमंत्रेणामुनेइ
त्यनंतरमावाहनोक्तैः ॥ भूताकारमिति भूतदेवयोनिः ॥ भूतोमी देवयोनयइति कोशात् ॥ नवतनरूपंतु ॥ रक्तवस्त्रधरा कृष्णा नखदंष्ट्रायुदंष्ट्रिका
कत्रीखड्गांगरुण्डाश्च राक्षसा घोररूपिणः ॥ भूतास्तथैव दिनास्याइति ॥ भूतोउड्डामरतंत्रोक्तस्वरूपाः पीठशक्तयः ॥ पीठमंत्राध्यायेन तन्त्रकरणाव
क्ष्यते ॥ सारसंग्रहे ॥ पीठशक्तिर्नवाभ्यर्च्यान्केसरेषु च मध्यतः ॥ वरदाभयधारिणः पीठंपीठगाडनायनेन ॥ मूलमंत्रे समुच्चार्य षष्ठ्यंतपीठनाम च
मूर्त्तिं च कल्पयामीति मूर्त्तिं मध्ये विनिक्षिपेत् ॥ पुनर्मूलं समुच्चार्य देवनाम च पूर्ववत् ॥ मूर्त्तिं च पूजयामीति वायुष्येणासमर्चयेत् ॥ अथेष्टदेवना

डीन्येयजेदापतनान्यपि ॥ आयतनानि चतुरायतनानि तु मध्यस्थस्वेष्टदेवतायाः अंगभूतानि ॥ तत्स्थापनप्रकारमाहतत्रैव ॥ तत्राथ पंचायतनस्य
वक्ष्ये संस्थापनं भक्तिविभेदभिन्नं ॥ भास्वद्गणाश्रीपतिपार्वतीशाविघ्नेश्वरार्कौगसुनाहदिष्ठ ॥ क्रमेण कद्रनेनतगेन्दुजेशामायेश्वरे भाननमास्व
रज्ञा ॥ ईशेन विद्याधिपशक्तिहृत्स्मामध्याग्निकोणाक्रमतस्तु पूज्याः ॥ रत्नसागरे ॥ रविर्विनायकोदेवी विष्णुशंकरपूजने ॥ गणेशार्कौ विकेश
नानथानारायणार्चने ॥ शिवो विष्णो हरिः कात्यायनी सूर्यार्चने क्रमात् ॥ देव्यर्चने शिवो विघ्नः सूर्यो विष्णुस्तथैव च ॥ शिवो रविर्भवानी च विष्णुर्वि
घ्नेश्वरार्चने ॥ आग्नेयादिषु कोणेषु स्थाप्याश्चांगांगिभावतः ॥ पूज्याश्चैवमहेशानीति ॥ अत्र सर्वत्र देवपूजाचक्ररूपं यंत्रमुद्धृत्य तत्र तत्रोक्तलोक
विधिनानत्पीठपूजापूर्वकं पंचायतनदेवताः पूजयेत् ॥ अन्यथापूजायां निष्फलं स्यात् ॥ तदुक्तं कुलार्णवे ॥ देवस्य मंत्ररूपस्य यंत्रं व्याप्रिमजान
नां ॥ कृत्वार्चनादिकं सर्वं चार्थं भवति शांभवि ॥ यंत्रं मंत्रमयं प्रोक्तं देवतामंत्ररूपिणी ॥ यंत्रे संपूजिता देवि सहसैव प्रसीदति ॥ कामक्रोधादिदोषोत्थ
सर्वदुःखनियंत्रणात् ॥ मंत्रमित्याहुरेतस्मिन्देवताप्रीणाति पूजिता ॥ शरीरमिव जीवस्य दीपस्नेह-व प्रिये ॥ सर्वेषामपि देवानां तथा यंत्रं प्रतिष्ठितं ॥ त
स्माद्यंत्रं लिखित्वा वा ध्यात्वा वा भजते शिवं ॥ ज्ञात्वा गुरुमुखात्सर्वं पूजयेद्विधिना शिवे ॥ एकपीठे पृथक्पूजां विनायंत्रं करोति यः ॥ अंगांगित्वमपि
त्यक्त्वा देवताशापमाप्नुयात् ॥ एकपीठे कुलेशानी स्वेस्वे यंत्रे पृथक्पृथक् ॥ यजेदावरणोपेतान्देवांस्तत्रविधानतः ॥ आवाह्य देवतामेकामर्चयेच्चान्य
देवतां ॥ उभाभ्यां लभते शापं मंत्री चंचलमानसः ॥ कुलप्रकाशतंत्रे ॥ खंडिते स्फुटिते दग्धे भ्रष्टे मानविवर्जिते ॥ व्यंगे नष्टे पशुस्पृष्टे पतिते दुःखभूमिषु

84

अन्यं मंत्राचिंतितैर्वैवपतितस्पर्शदूषितैः॥ दशस्वेतेषु नो कूर्चसंनिधानं दिवौकस इति॥ अथ पंचयतनंपूजांयामपि मंडलत्यान्यूज्यपूजयोर्मध्ये पूर्वदि
शं परिकल्प्यत पक्षसारेणाग्नेयादिकं परिकल्प्य चतुरायतनदेवताः पूजयेत्॥ धर्मादिपूजामुक्तकेषु तुल्यत्वात्॥ अत्र केचित्प्रधानदेवतावाहनानं
तरमेव तदावरणपूजार्थं देवताग्रे प्राचीकल्पनात् न पूर्वमेव चतुरायतनदेवतानां पूजायाः कार्यत्वान्न कल्पनमयुक्तमिति तथास्थितानाग्नेयादिदिक्षु
चतुरायतनदेवताः पूजनीया इत्याहुः तन्न॥ काम्यपूजासु॥ उत्तराभिमुखो भूत्वा यंत्रचक्रं प्रपूजयेत्॥ उत्तराशैव पूर्वाशानं वह्निकोणकमित्यादि
स्तानार्णववचनात्॥ अग्निराक्षसवायव्यशंभुकोणस्थितादेवतायाः कदाचित्प्रधानदेवतायावामभागे कदाचिद्दक्षिणे कदाचिदग्रे कदाचित्पृष्ठे
चेति स्थितत्वेनैव्यवस्थाप्रसंगात् यथास्थितानाग्नेयादिषु स्थापनासंभवात्प्रधानदेवतायाः पीठपूजानंतरमेव चतुरायतनदेवतापूजना पीठपूजायामपि ध
र्मादिपूजने कल्पितप्राच्यनुसारेणैव कल्पना छत्राघवादत्रापि यथा कल्पना चतुरायतनदेवतानामंगत्वात्प्रधानदेवतायाः मूर्त्तेः कल्पितत्वात्तद
ग्रे प्राचीकल्पनस्यौचित्यादिति॥ अत्र पंचायतनपूजायां गणेशव्यतिरिक्तचतुर्देवोपासकैः प्रोक्तक्रमेण देवतास्थाप्येशमारभ्य प्रादक्षिण्यक्रमप्रा
प्तदेवताचतुष्टयं संपूज्यांते गणेशं पूजयेदित्यागमसिद्धांतः॥ अत्र केचित्पंचायतनपूजायां देव्याराधनकेन सूर्यगणेशशिवविष्णून्भ्यर्च्यांते देविं संपूज
येदिति सूत्रमुक्तमिति वदंति तदसंगतं प्रादक्षिण्यांपुत्रे अन्यदेवतापजनेऽप्रादक्षिण्यक्रमस्याप्यलाभतया अशेषव्यस्तक्रमापत्तेश्च वस्तुतस्तु गणेश
सूर्यविलीशदुर्गा आवाह्य पूजयेदिति॥ योगिनीतंत्रे देवीपूजायां पंचायतनपूजाक्रमदर्शनात्॥ आरोग्यपतिं देवं सूर्यं विष्णुमुमापतिं॥ दुर्गां च पूज

॥शि॰च॥
॥८५॥

येत्तानिति ॥ भैरवीतंत्रेपि ॥ पंचायतनपूजाक्रमदर्शनाद्यायमेवर्नीत्रिकस्मिंयांतः ॥ सत्संप्रदायसिद्धश्चदेवतोपासकैरपितथैवगणेशादिक्रमस्त्वकार्यः एकत्वदृष्टिन्यायात् ॥ इयंपंचायतनपूजात्ववश्यंकार्या ॥ शिवभास्करमग्निंचकेशवंकोऽप्येकमपि ॥ मनसानर्चयन्यातिस्वर्गलोकंदधोगतिमितिभविष्यपुराणोप्रस्तवायश्रवणात् ॥ मनसाप्यनर्चयन्नित्यर्थः ॥ अग्निर्गणेशः ॥ पावकः कार्त्तिकेयोसौ कार्त्तिकेयोनिनायकः ॥ इतिभविष्योत्तरपुराणवचनात् ॥ अथमध्यस्यापितन्मूर्त्तिस्विष्टदेवतावाह्यपूजयेत् ॥ तत्रमूर्त्तिस्तुतत्तद्ध्यानोक्तरूपानुशिवलिंगसालग्रामौ ॥ तावपिभावनीयाशिवलिंगादीनांसर्वदेवतपूजाधिकरणत्वात् ॥ तेषुसर्वाश्चदेवताः पूजाः ॥ तेषांलिंगेगणेशोकुंभेमंडलेवप्रपूज्यनंशालग्रामेचतद्ध्यानंत्रादौचप्रपूजयेत् ॥ भूमावेवकृतापूजापुत्रायुर्धननाशिनीति ॥ रुद्रयामलवचनात् ॥ शालग्रामशिलायांतुतत्तद्ध्यासमर्चयेत् ॥ इतिसोमशंभुवचनात् ॥ लिंगस्थंडिलयोवह्नौसूर्यकुंभपदेषुच ॥ मंडलेफलकेमूर्त्तिहृदयेदशकीर्त्तिताः ॥ एषुस्थानेषुदेवेशियजंतिपरमंशिवमितिकुलार्णववचनाच्च ॥ शिवमित्युपलक्षणंतेषांमित्युक्तेः ॥ तेषांपंचायतनदेवतानांयेत्रादाविघ्नादिपदंप्रतिमापदं ॥ शालग्रामेमणौयंत्रेस्थंडिलेप्रतिमासुच ॥ हरेः पूजातुकर्त्तव्याकेवलेनतुभूतले ॥ इतित्रैलोक्यसंमोहनतंत्रवचनात् ॥ तदातुतत्तद्ध्यानोक्तरूपाप्रतिमाकार्य्या ॥ मानांगुलप्रमाणेनदशपंचदशांगुला ॥ गृहेतुप्रतिमापूज्यासाधिकातुप्रशस्यते ॥ इतिकपिलपंचरात्रोक्तरूपाप्रतिमाकार्या ॥ दशांगुलमितापंचदशांगुलमितावेत्यर्थः ॥ दशांगुलप्रमाणावानिथंगुलमितापिवा ॥ अभ्यर्च्याप्रतिमाविष्णोर्गृहेषुगृहमेधिभिरितिहयशीर्षपंचरात्रवचनात् ॥ मानांगुललक्षणंतुप्रागेवमंडपप्रकरणेभिहितं ॥ कालोत्तरे ॥ लिंगमस्त

85

॥रामः॥
॥८५॥

कविस्तारां लिंगे ह्यायसमो भवेत् ॥ त्रिगुणः परिणाहः स्यात द्वर्त्तिंडी प्रतिष्ठिताः ॥ लिंगन्तु स्वप्रमाणांस्यान्पंचसूत्रस्य लक्षणा ॥ पंचसूत्रसमायुक्तं
शिवलिंगं समर्चयेत् ॥ भुक्तिदं मुक्तिदं देवि धनारोग्यसुतप्रदं ॥ शिल्पशास्त्रे ॥ लिंगमस्तकमध्यात्तु सूत्रं स्यात्प्रनालकं ॥ लिंगप्रनालीपृष्ठत्वं तत्र
देवप्रकीर्त्तितं ॥ उक्तन्त्वपि तथा पीठे पंचसूत्रं प्रवक्ष्यत ॥ इति ॥ हयशीर्षपंचरात्रे ॥ आदिमूर्त्तिर्वासुदेवः संकर्षणमथासृजेत् ॥ प्रद्युम्ने चानिरुद्धं च स्वय
मेवासृजत्प्रभुः ॥ चतुर्मूर्त्तिः परं प्रोक्त एकैको भिद्यते त्रिधा ॥ केशवादिप्रभेदेन मूर्त्तिर्द्वादशकं स्मृतं ॥ पंकजं दक्षिणे दद्यात्पांचजन्यं तथोपरि वामे
धस्तं गदा यस्य चक्रं योर्द्धं व्यवस्थितं ॥ आदिमूर्त्तेस्तु भेदोयं केशवेति प्रकीर्त्त्यते ॥ अधरोत्तरभावेन कृतमेतन्नुयच्चवै ॥ नारायणाख्यसा मूर्त्तिः स्थापिता भु
क्तिमुक्तिदा ॥ सव्याधः पंकजं यस्य पांचजन्यं तथोपरि ॥ दक्षिणोर्द्धे गदा यस्य चक्रं चाधो व्यवस्थितं ॥ आदिमूर्त्तेस्तु भेदोयं माधवेति प्रकीर्त्तितः ॥ दक्षि
णाधः स्थितं चक्रं गदा यस्योपरि स्थिता ॥ वामोर्द्धे संस्थितं पद्मं शंखं चाधो व्यवस्थितं ॥ संकर्षणस्य भेदोयं गोविंदेति प्रकीर्त्त्यते ॥ दक्षिणोपरि पद्मन्तु ग
दा चाधो व्यवस्थिता ॥ वामोर्द्धे पांचजन्यं च चक्रं चाधो व्यवस्थितं ॥ संकर्षणस्य भेदोयं विष्णुरित्यभिधीयते ॥ दक्षिणोपरि शंखं च चक्रं चाधः प्रदृश्यते ॥ वामो
र्द्धे पंकजं यस्य गदा चाधो व्यवस्थिता ॥ मधुसूदन नामायं भेदः संकर्षणस्य तु ॥ दक्षिणोर्द्धे गदा यस्य पंकजं चाप्यधः स्थितं ॥ वामोर्द्धे संस्थितं चक्रम
धः शंख प्रदृश्यते ॥ ब्रह्मांडगं वामपादं दक्षिणांशोपरिष्ठितं ॥ बलिं वंचनसंसक्तं वामनं चाप्यधः स्थितं ॥ वामोर्द्धे कौमुदी यस्य पुंडरीकमधः स्थितं ॥ दक्षि
णोर्द्धे सहस्रारं पांचजन्यमधः स्थितं ॥ सप्रनालप्रमाणेन वामनं कारयेत्सदा ॥ ऊर्द्धे दक्षिणतश्चक्रमधः पद्मं व्यवस्थितं ॥ वामोर्द्धे कौमुदी यस्य पां

चजन्यमधःस्थितं ॥ पद्मा पद्मकरा वामपार्श्वे यस्य च व स्थिता ॥ स्थितो वाप्युपविष्टो वा सानुरागो विलासवान् ॥ प्रद्युम्नस्य हि भेदोयं श्रीधरेति
प्रकीर्त्तिते ॥ दक्षिणोर्ध्वे महाचक्रं कौमुदीदधनः स्थिता ॥ वामोर्ध्वे नलिनं यस्य स्वधः शंखो विराजते ॥ हृषीकेश इति ज्ञेयः स्थापितः सर्वकामदः ॥
दक्षिणोर्ध्वे पुंडरीकं पांचजन्यमधस्तथा ॥ वामोर्ध्वे संस्थितं चक्रं कौमुदीदधनः स्थिता ॥ पद्मनाभेति सा मूर्त्तिः स्थापिता मोददायिनी ॥ दक्षि
णोर्ध्वे पांचजन्यमधस्तात्तु कशेशयं ॥ सव्योर्ध्वे कौमुदी देवी हेतिराजमध स्थितं ॥ अनिरुद्धस्य भेदोयं दामोदर इति स्मृतः ॥ एतेषांतु स्त्रियोका
र्यै पद्मवीणाधरे शुभं ॥ सिद्धार्थसंहितायां तु चतुर्विंशतिमूर्त्तयउक्ताः ॥ वासुदेवो गदाशंखचक्रपद्मधरो मतः ॥ पद्मशंखं तथा चक्रं गदां वहति
केशवः ॥ शंखपद्मं गदाचक्रं धत्ते नारायणः सदा ॥ गदां चक्रं तथा शंखं पद्मं वहति माधवः ॥ चक्रं पद्मं तथा शंखं गदां च पुरुषोत्तमः ॥ पद्मं कौमोद
कीं शंखचक्रं दत्तेप्यधोक्षज ॥ संकर्षणो गदाशंखं पद्मचक्रधरः स्मृतः ॥ चक्रं गदां पद्मशंखौ गोविन्दोद्धरते भुजो ॥ गदां पद्मं तथा शंखं चक्रं विष्णुर्वि
भर्त्तियः ॥ चक्रं शंखं तथा पद्मं गदां च मधुसूदनः ॥ गदां सरोजं चक्रं च शंखं धत्ते च्युतः सदा ॥ शंखं कौमोदकीं चक्रमुपेन्द्रः पद्मसुद्धरेत् ॥ चक्रं शंखं ग
दां पद्मधरः प्रद्युम्न उच्यते ॥ पद्मं कौमोदकीं चक्रं शंखं धत्ते त्रिविक्रमः ॥ शंखं चक्रं गदां पद्मं वामनो वहते सदा । पद्मं चक्रं गदां शंखं श्रीधरो वहते भु
जैः ॥ चक्रं पद्मं गदां शंखं नरसिंहो विभर्त्तिपः ॥ पद्मसुदर्शनं शंखं गदां धत्ते जनार्दनः ॥ अनिरुद्धश्चक्रगदाशंखपद्मलद्भुजः ॥ हृषीकेशो गदां चक्रं पद्म
शंखं च धारयेत् ॥ पद्मनाभो वहेच्छंखं पद्मं चक्रं गदां तथा ॥ पद्मं चक्रं गदां शंखं धत्ते दामोदरः सदा ॥ शंखं चक्रं सरोजं च गदां वहति यो हरिः ॥ शंखं कौमोद

कीपमंचक्रं कृष्णा विभर्त्ति यः ॥ एताश्च मूर्त्तयो ज्ञेया दक्षिणाधः करक्रमात् ॥ इति ॥ विश्वेश्वरसुंदराचार्यशिख्येण श्रीनिवासेन धीमता ॥ चंडीका
यां प्रणीतायां प्रकाशः सप्तमोगमत् ॥ ॥ इति श्रीसुंदराचार्यचरणारविंदद्वंद्वांतेवाना श्रीनिवासभट्टेन विरचितायां श्रीशिवार्चनचंडिका
यां सप्तमः प्रकाशः समाप्तः ॥ ७ ॥ ॥ अथ शालिग्रामलक्षणानि स्कंदपुराणे ॥ ॥ स्निग्धा कृष्णा पांडुरा च पीता नीला तथैव च ॥ रक्ता रू
क्षा च वक्रा च महास्थूला त्वलांछिता: ॥ कपिला कर्वुरा भग्ना वक्रु चक्रैकवक्रिका: ॥ ग्रहन्मुखी वृहच्चक्रा लग्नचक्राथवा पुनः ॥ वद्धवक्राथवा
यास्याद्भग्नचक्रा त्वधोमुखी ॥ ॥ अथ नाम्नां वर्णादिभेदेन गुणदोषास्तथैव ॥ स्निग्धा सिद्धिकरी मंत्रे कृष्णा कीर्त्तिं ददाति च ॥ पांडुरा पापदहनी
पीता पुत्रफलप्रदा ॥ नीला संदिसते लक्ष्मीं रक्ता रोगपयरणी ॥ रूक्षा चोद्वेगदा नित्यं वक्रा दारिद्र्यदायिका ॥ स्थूला निहंति चैवायुर्निःफला तु ह्य
लांछिता ॥ कपिला कर्वुरा भग्ना वक्रुचक्रैकचक्रिका ॥ ग्रहन्मुखी वृहच्चक्रा लग्नचक्राथवा पुनः ॥ बद्धचक्राथवा यास्याद्भग्नचक्रा त्वधोमुखी
पूजयेद्यः प्रमादेन दुःखमेव लभेत सः ॥ अग्निपुराणे ॥ तथाव्यालमुखी भग्ना विषमा बद्धचक्रिका ॥ विकारा वर्त्तनाभिश्च नारसिंही तथैव च
कपिला विभ्रमा वर्त्तिरेखा वर्त्तिश्च या शिला ॥ दुःखदास्ता तु विज्ञेया सुखदा न कदाचन ॥ स्निग्धा स्यामा तथा सूक्ष्मा मायीपा समचक्रिका: ॥ घोणि
र्घुर – नंताख्या गभीरा संपुटा तथा ॥ परं सूक्ष्मं मूर्त्तिश्च संमुखी सिद्धिदायिका ॥ धात्रीफलप्रमाणा या कारेणोभयसंयुता ॥ पूजनीया प्रयत्नेन चोपचा
रैः प्रपूजयेत् ॥ पूजितो फलमाप्नोति इह लोके परत्र वै ॥ इति ॥ दोषाश्चैते सकामार्चनविषयाः ॥ तदुक्तं भगवता स्कंदे ॥ खंडिते स्फुटितं भग्नं शालग्रा

मेरादोषभाक् ॥ इष्टानुयस्ययामूर्त्तिःसततांयत्नेनपूजयेत् ॥ तथा ॥ चक्रंवाकेवलंतत्रपद्मेनसहसंयुतं ॥ केवलावनमालावाहरिःलक्ष्म्यासह
स्थितइति ॥ मुख्यास्तिस्थायदस्तत्रामुख्यारक्तादयोमताः ॥ मुख्याभावेत्वमुख्याहिपूज्याइत्युच्यतेपरैः ॥ अथतासामेवलक्षणविशेषेणसंज्ञाविशे
षःशालेश्रीभगवद्ब्रह्मसंवादे ॥ निवसामिसदाब्रह्मन्शालग्रामाख्यवेश्मनि ॥ तत्रैवरथचक्रांकभेदेनाख्यामिमेशृणु ॥ द्वारदेशेसमेचक्रेदृश्यते
नान्तरीयके ॥ वासुदेवःसविज्ञेयःशुक्लाभश्चातिशोभन ॥ द्विचक्रेएकलग्नेतुपूर्वभागस्तुपुष्कल ॥ संकर्षणाख्योविज्ञेयोरक्तस्वाति—शोभन
प्रद्युम्नःसूक्ष्मचक्रस्तुपीनदीप्तिस्तथैवच ॥ सुषिरंछिद्रबहुलंदीर्घाकारंतुतद्भवेत् ॥ अनिरुद्धस्तुनीलाभोवर्त्तुलश्चातिशोभनः ॥ रेखात्रयंतु
द्वारिपृष्ठंपद्मेनलांछितं ॥ सौभाग्यंकेशवोदद्याच्चतुष्कोणोभवेत्तुयः ॥ श्यामंनारायणंविद्यान्नाभिचक्रंतथोन्नतं ॥ दीर्घरेखासमोपेतंदक्षिणे
सुषिरंपृथु ॥ उर्द्ध्वमुखविजानीयाद्द्वारेचहरिरूपिणं ॥ कामदंमोक्षदंचैवअर्थदंचविशेषतः ॥ परमेष्ठीचशुक्लाभःपद्मचक्रसमन्वितः ॥ विल्वा
कृतिस्तथापृष्ठेसुविरंचापिपुष्कलं ॥ कृष्णवर्णस्तथाविष्णुःस्थूलेचक्रेसुशोभने ॥ द्वारोपरितथारेखादृश्यतेमध्यदेशतः कपिलोनारसिंहस्तुपृथु
चक्रःसुशोभनः ॥ ब्रह्मचर्येधिकारीस्यान्नान्यथापूजनंभवेत् ॥ ब्रह्मचर्येणपूज्योसावन्यथाविघ्नदाभवेत् ॥ क्वचिच्च ॥ नरसिंहःत्रिविंदुःस्यात्का
पिलःपंचविंदुकः ॥ ब्रह्मचर्येणपूज्यास्यादन्यथासर्वविघ्नदः ॥ स्थूलंचक्रद्वयंमध्येगुडलाक्षासवर्णकं ॥ द्वारोपरितथारेखापूजाकारासुशोभना
स्फारितंविषमंचक्रंनारसिंहंतुकापिलं ॥ संपूज्यमुक्तिमाप्नोतिसंग्रामेविजयीभवेत् ॥ पाद्मेकार्त्तिकमाहात्म्येच ॥ यस्यदीर्घमुखंपूर्वंकथितंल

87

॥राम॥
॥८७॥

क्षरोगुनः॥ रेखावन्केसराकारा नारसिंहो मनोहरः॥ व्राले॥ वाराहं शक्ति लिंगे च चक्रे च विषमे स्मृते॥ इंद्रनील निभं स्थूलं त्रिलेखालाछितं स्थूलं
पाम्भेव॥ वाराहकृतिराभुग्नश्च चक्रे रेखालंकृत॥ वाराहस्तिति समप्रोक्तः॥ दीर्घकांचन वर्णा या विंदुत्रय विभूषीता॥ मत्स्याख्या मा शिला ज्ञेया भुक्ति
मुक्तिफलप्रदा॥ क्वचिद्व मत्स्यरूपं च दीर्घाकारं तु यद्भवेत्॥ विंदुत्रय समायुक्तं कांस्यवर्णा सुशोभन॥ व्राले॥ कुर्वस्तथो च्चनः एष्टेवर्त्तुलः परिपूरि
तः॥ हरितं वर्णामाधत्ते कौस्तुभेन च विहृतं॥ पाम्भेव॥ कूर्माकाराच चक्रांकाशिलो कूर्मः प्रकीर्त्तित॥ व्राले॥ हयग्रिवो कुशाकारो रेखा चक्रसमीप
गाः॥ बद्रु विंदु समायुक्तं पृष्टं नीरदनीलकं॥ क्वचिद्व॥ हयग्रीवाय थालं वा रेखाका या शिला भवेत्॥ तथा सौम्या हयग्रीवः पूजितो ज्ञानदो भवेत्॥
किंच॥ अश्वाकृतिमुखं यस्य साक्षामालां शिरस्तथा॥ पमाकृतिभवेद्वापि हयशीर्षास्त्व सौमतः॥ वैकुंठं निलवर्णाभं चक्रमेकं तथाध्वजं॥ द्वारोप
रि तथा रेखा पूज्या कार्या सुशोभना॥ श्रीधरस्तु तथा देव चिंह्नितो वनमालया॥ कदंबकुसुमाकारं रेखापंचकभूषिता॥ वर्त्तुलश्चातिह्रस्वश्च
वामनः परिकीर्त्तितः॥ अतसीकुसुमप्रख्यो विंदुनोपरिशोभितः॥ अन्यच्च॥ वामनाख्यो भवेद्देवो ह्रस्वायः स्यान्महाद्युति॥ उर्ध्व चक्रो ह्यधः श्व
क्रः सोभिष्टार्थप्रदेचितः॥ व्राले॥ सुदर्शनस्तथा देवः श्यामवर्णो महाद्युतिः॥ वामपार्श्वे गदा चक्रे रेखैकैव प्रदक्षिणा॥ पाम्भेव॥ चक्राकारे
णा पंक्तिः सा यत्र रेखा मयी भवेत्॥ स सुदर्शन इत्येवं ख्यातः पूज्या फलप्रदः॥ दामोदरस्तथा स्थूलो मध्ये चक्रं प्रतिष्ठितं॥ दूर्वाभं द्वारि संकी
र्णं पीता रेखा तथैव च॥ पाम्भेव॥ उपर्यधश्च चक्रे द्वे नातिदीर्घं सुखे विलं॥ मध्ये रेखा च लंबे वै कास च दामोदरः स्मृत॥ अन्यत्र च॥ स्थूलो दामो

दरो ज्ञेयः सूक्ष्मरंध्रं भवेत्तु यः ॥ चक्रे च मध्यदेशस्थे पूजितः सुखदः सदा ॥ नानावर्णाह्यनंताख्यो नागभोगपनचिह्नत ॥ अनेकचक्रसंभिन्नः स
र्वकामफलप्रदः ॥ शाले ॥ विदिक्षु दिक्षु सर्वासु यस्योर्ध्वे दृश्यते मुखं ॥ पुरुषोत्तमः ॥ स विज्ञेयं भुक्तिमुक्तिफलप्रलंप्रद ॥ दृश्यते सिमरे लिंगं
सालग्रामसमुद्भवं ॥ तस्य योगेश्वरो नाम ब्रह्महत्यां व्यपोहति ॥ आरक्तं पद्मनाभाख्यं पंकजछत्रसंयुतं ॥ तुलस्या पूजयेन्नित्यं दरिद्रस्त्वीश्वरो भवे
त् ॥ वज्राकृति हिरण्याख्यं रश्मिज्वालं विनिर्दिशेत् ॥ सुवर्णरेखावकुलं स्फटिकद्युति शोभितं ॥ किं न पश्ये ॥ वज्रकीटेन वारेखाः पंक्तीसहोर्ध्व
पत्रैवे ॥ पक्षाकारेतु पंक्तिहेमक्षेत्रं वा चरेखिकाः ॥ गरुडः स तु विज्ञेयः चतुर्ध्वको जनार्दनः ॥ चतुश्चक्रः सूक्ष्मद्वारो वनमालांकितोदरः ॥ लक्ष्मी
नारायणः श्रीमान्भुक्तिमुक्तिफलप्रदः ॥ ऊर्ध्वं वज्राकृतिर्देवो हृषीकेशस्तु दाहतः ॥ न मम्यर्च्य लभेत्स्वर्गं विषयांश्च समीहितान् ॥ वामपार्श्वसमे चक्रे
कृष्णवर्णः सविंदुकः ॥ लक्ष्मीनृसींहो विख्यातो भुक्तिमुक्तिफलप्रदः ॥ त्रिविक्रमस्तथा देवः श्यामवर्णो महाद्युतिः ॥ वामपार्श्वे तथा चक्रे रेखां
चैव तु दक्षिणे ॥ प्रदक्षिणावर्त्तकृत वनमालाविभूषिता ॥ या शिला कृष्णसंज्ञा सा धनधान्यसुखप्रदा ॥ चतस्रो यत्र दृश्यंते रेखा पार्श्वे समीपगा
श्चक्रे मध्यदेशेतु सा शिलातु चतुर्मुखेति ॥ एतल्लक्षणयुक्ता यस्तु शालग्रामशिला शुभा ॥ पाषाणास्त्वपि सूक्ष्मास्तु ज्ञाय सप्तन्तराः स्मृताः ॥ तथा च
श्रीभगवद्गुरुसंवादेनश्चैव ॥ यथा यथा शिला सूक्ष्मा महत्पुण्यं तथा तथा ॥ तस्मात्तां पूजयेन्नित्यं धर्मकामार्थसिद्धये ॥ तत्राप्यामलकीतुल्या
सूक्ष्मा चातीव या भवेत् ॥ तस्यामेव सदा ब्रह्मन् श्रिया सह वसाम्यहं ॥ इत्थ श्रीशिलाग्रामशिलामाहात्म्यं ॥ ॥पाद्मोमाघमाहात्म्ये ॥ यप्र

४४

जयेद्धरिंचक्रे शालग्रामशिलोद्भवे ॥ राजसूयसहस्रेणयेनेष्टंप्रतिवासरं ॥ यदाम्ननतिवेदांतांब्रह्मनिर्गुणमच्युतं ॥ तत्प्रसादोभवेन्नृणांशालग्रामशिलार्चनात् ॥ महाकाष्टस्थितोवह्निर्मध्यमानप्रकाशयेत् ॥ अपिपापसमाचाराकर्मण्यधिकारिणः ॥ सालग्रामार्चकावैष्णानैवयांतियमालयं ॥ ननथारमतेलक्ष्म्यांननथास्वपुरेहरिः ॥ शालग्रामशिलाचक्रेयथासरमतेसदा ॥ अग्निहोत्रंहुतंयेनदत्तापृथ्वीससागरा ॥ यथाविनोहरिःश्चक्रेशालग्रामशिलोद्भवे ॥ कामैः ॥ क्रोधैर्मदैर्लोभैर्व्याप्तोयोत्रनराधमः ॥ सोपियातिहरेर्लोकंशालग्रामशिलार्चनात् ॥ येपूजयंतिगोविंदंशालग्रामेसदानरः ॥ आभूतसंप्लवंयावन्नसप्रच्यवतेदिवः ॥ विनातिर्थैर्विनादेवैर्विनायज्ञैर्विनामखैः ॥ मुक्तिंयातिनरोवैश्यशालग्रामशिलार्चनात् ॥ नरकंगर्भवासंचयान्तिक्रंकृमियोनिकं ॥ नयातिवैश्यपापोपिशालग्रामेच्युतार्चक ॥ दीक्षाविधानमंत्रज्ञश्चक्रेयोवलिमाहरेत् ॥ सयातिवैस्नवंधामसत्यंमयोदितं ॥ नैवेद्यैर्वस्त्रभिःपुष्पैर्धूपदीपैर्विलेपनैः ॥ गीतवादित्रस्तोत्राद्यैःशालग्रामशिलार्चनं ॥ कुरुतेमानवोयस्तुकलौभक्तिपरायणाः ॥ कल्पकोटिसहस्राणिरमतेसंनिधौहरेः ॥ लिंगैस्तुकोटिभिर्दृष्टैःयत्फलंपूजितैस्तुतैः ॥ शालग्रामशिलायांतुश्राद्धंकुरुतेनरः ॥ पितरस्तस्यतिष्ठंतितृप्ताःकल्पशतंदिवि ॥ शालग्रामसमिपेतुकोशमात्रंसमंततः ॥ कीननेपिमृतोयांतिवैकुंठभवनंनरः ॥ शालग्रामशिलाचक्रंयोदद्याद्दानमुत्तमं ॥ भूचक्रंतेनदत्तंस्यात्सशैलवनकाननं ॥ स्कांदेकार्तिकमाहात्म्येशिवस्कंदसंवादे ॥ ॥ शालग्रामशिलायांतुत्रैलोक्यंसचराचरं ॥ मयासहमहासेनलीनंतिष्ठतिसर्वदा ॥ दृष्टाप्रणमितायेनस्नापिताःपूजातथा ॥ यज्ञकोटिसमंपुण्यंगवांकोटि

॥शि॰चं॥
॥८९॥

फलंभवेत॥ कामासक्तोपियोनित्यंभक्तिभावविवर्जितः॥शालग्रामशिलांऽत्रसंपूज्यैवाच्युतोभवेत्ः॥ सिंहदृष्ट्वायथायांतिवनेमृग
गणाभयात्॥ मनःकरोतिमनुजःशालग्रामशिलार्चने॥ पापानिविलयंयांतितमःसूर्योदयेयथा॥ कामाशक्तोथवाक्रुद्धःशालग्राम
शिलार्चनं॥ भक्त्यावायदिवाभक्त्याष्ट्वामुक्तिमवाप्नुयात्॥ वैवस्वतंभयंनास्तियथामरणजन्मयोः॥ यःकथांकुरुतेविष्णोःशालग्राम
शिलाग्रतः॥ गीतैर्वाद्यैस्तथास्तोत्रैःशालग्रामशिलार्चन॥ कुरुतेमानवोयस्तुकरोभक्तिपरायणः॥ कल्पकोटिसहस्राणिरमतेविष्णुसम
नि॥ शालग्रामेनमस्कारेभावेनापिनरैःकृते॥ भयंनैवकरिष्यंतिमद्भक्तायेनराभुवि॥ मद्भक्तिवलदर्पिष्ठामत्प्रभुंननमंतिये॥ वासुदे
वंनतेतेयामभक्ताःपापिनोहिते॥शालग्रामशिलायांतुसदाऽत्रवसाम्यहं॥ दत्तंदेवेनतुष्टेनस्वस्थानंममभक्तितः॥ यज्ञकोटिसहस्रैस्तुपू
जितेमयियत्फलं॥ तत्फलंकोटिगुणितंशालग्रामशिलार्चने॥ पूजितोहंनतैर्मर्त्यैर्नमितोहंनतैर्नरैः॥ नकृतंमर्त्यलोकेयैःशालग्रामशि
लार्चनं॥ शालग्रामशिलाग्रेतुयःकरोतिममार्चनं॥ तेनार्चितोहंसततंयुगानामेकसप्ततिः॥ किंमर्चितलिंगशतैर्विष्णुभक्तिविवर्जितै
शालग्रामशिलाविंवंनार्चितंयदिपुत्रकः॥ क्वतर्हिममनैवेद्यंपत्रपुष्पंफलंजलं॥ शालग्रामशिलालग्नंसर्वंयातिपवित्रतां॥ योहिमाहेश्वरो
भूत्वावैष्णभूत्वावैष्णवलिंगमुत्तमं॥ द्वेष्टिवैयातिनरकंयावदिंद्राश्चतुर्दश॥ सकृदभ्यर्चितंलिंगंशालग्रामसमुद्भवं॥ मुक्तिंप्रयातिमनुजास्न
सांख्येनंवर्जिताः॥ मल्लिंगैःकोटिभिर्दृष्टैर्यत्फलंपूजितैस्तुतैः॥ शालग्रामशिलायांतुएकेनपिहितद्भवेत्॥ तस्माद्भक्त्याव्रमद्भक्तैःप्रीत्यर्थंमम

89

॥राम॥
॥८९॥

पुत्रकं ॥ कर्त्तव्यं सततं भक्त्या शालग्रामशिलार्चनं ॥ शालग्रामशिलाग्रे तु सकृत्पिंडेन तर्पिता ॥ वसंति पितरस्तस्य संख्यानस्य विद्यते ॥ प्रमाणाममि सर्वस्य सुहृत्तस्य हि पुत्रक ॥ फलं प्रमाणहीनं तु शालग्रामशिलार्चने ॥ यद्दाति सिलां विष्णोः शालग्रामसमुद्भवां ॥ विप्राय विष्णुभक्ताय तेनेष्टं वहुभिर्मखैः मातुष्पादुर्ल्लभा लोके शालग्रामोद्भवा शिला ॥ प्राप्यते न विना पुण्यैः कलिकाले विशेषतः ॥ स धन्यः पुरुषो लोके सफलं तस्य जीविते ॥ शालग्रामशिला पुत्र गृहे यस्य च पूजिता ॥ सन्निधत्स्वेंद्रियग्रामं शालग्रामशिलार्चनं ॥ यः कुर्यात्स्मानवो भक्त्या स याति परमं पदं ॥ भक्त्या वा यदि वाऽभक्त्या यः करोति स पुण्यभाक् ॥ द्वेषेण पि च लोभेन दंभेन कपटेन वा ॥ शालग्रामोद्भवं देवं दृष्ट्वा पापात्प्रमुच्यते ॥ अपुत्रिर्वा दुराचारः सत्य सौच विवर्जितः ॥ शालग्रामशिलां स्पृष्ट्वा सद्यस्सुपुनिर्भवेत् ॥ तिलप्रस्थप्रदानं भक्त्या यो ददाति दिने दिने ॥ तत्फलं समवाप्नोति शालग्रामशिलार्चने ॥ पत्रं पुष्पं फलं मूलं तोयं दूर्वाक्षतासु नः ॥ जायते मेरुणा तुल्यं शालग्रामशिलार्चने ॥ विधिहीनोपि यः कुर्यात्क्रियां मंत्रविवर्जितां ॥ चक्रपूजां स वाप्नोति सम्यक् शास्त्रोदितफलं ॥ न चैवान्यत्र ॥ स्कंधे कृत्वा योर्ध्वानं वहते शैलनायकं ॥ तेनार्द्धं तु भवेत्सर्वं त्रैलोक्यं सचराचरं ॥ ब्रह्महत्यादिकं पापं यत्किंचित्कुरुते नरः ॥ तत्सर्वं निर्दहत्याशु शालग्रामशिलार्चनं ॥ न पूजनं न मंत्राश्च न जपो न च भावना ॥ तत्सुनिर्णयकारश्च शालग्रामशिलार्चने ॥ शालग्रामशिला यत्र तत्तीर्थं योजनत्रयं ॥ तत्र दानं च होमं च सर्वं कोटिगुणं भवेत् ॥ गरुडपुराणे ॥ नृत्यंति नित्यं पितरो मनुष्यास्तीर्थानि गंगागयप्रयागा ॥ यत्राश्वमेधाश्च पि पुण्यशैलाश्चक्रांकिता यस्य वहंति गेहे ॥ पाद्मे कार्त्तिकमाहात्म्ये यमधूमकेशसंवादे ॥ शालग्रामशिलायां तु येनै

रैः पूजितो हरिः॥ संशोध्यते पापानि मुक्तये बुद्धिदो भवेत्॥ कार्त्तिकमथुरायां तु सारूप्यं दिशते हरिः॥ शालिग्रामशिलायां तु पितॄनुद्दिश्य पूजिते॥ कुरुतः
समुद्धरेत्तस्य पितॄन्नोनाः सलोकतां॥ कृष्णद्वारवतीयत्र यज्ञध्वजोपाख्यानां ते॥ शालग्रामशिलारूपी यत्र तिष्ठति केशवः॥ न वाधन्ते सुरास्तत्र भूतवे
तालकादयः॥ शालग्रामशिला यत्र तत्तीर्थं योजनत्रयं॥ शतं वा पूजिता भक्त्या तदा स्यादधिकं फलं॥ अथ तदाकुकल्पे फलविशेषः पाद्मे माघमा
हात्म्ये देवहूतिविकुंठसंवादे॥ शालग्रामा युगाः पूज्या युगो बुद्धिनयेन हि॥ अयुग्मा नैव पूज्यन्ते विषमे एकमेव हि शिवा द्वादशभावे स्य शालग्रामस
मुद्भवं॥ विधिवत्पूजिता येन तस्य पुण्यं वदामि ते॥ कोटिद्वादशलिंगेषु पूजितेषु स्वर्णपंकजैः॥ तत्स्याद्द्वादशकल्पेषु दिनेनैकेन तद्भवेत्॥ यः पूज
पूजयेत् भक्त्या शालग्रामशिलाशतं॥ तत्फलं नैव शक्नोहं वक्तुं कल्पशतैरपि॥ इत्याद्यास्तां विस्तर॥ इति तल्लक्षणमाहात्म्यं च॥ अत्र केचित्शाल
ग्रामे विष्णोनांवाहनकर्त्तव्यमिति वदन्ति तत्र प्रमाणं चिंत्यं वस्तु वस्तुकं दपुराणादिदर्शनात्॥ आवाहनमवश्यं कार्यमिति निर्णीये॥ तथा स्कं
दपुराणे॥ विप्रपूर्वं निजे देहे स्पृष्ट्वांकेन्यन्यसेद्बुधः॥ ततस्तु प्रतिमायां च शालग्रामे विशेषतः॥ क्रमेण च ततः कुर्यात्क्रमादावाहनादिकं॥ आवाहये
त्पुरतो ध्यानसेव्यं विजोत्तमेति॥ अत एवावाहनाद्युपासनांतमर्चनमभिधायोक्तं वौधायनेन॥ शालग्रामे प्रतिमास्वप्स्वग्नौ चाप्यावाहनवि
सर्जनमिति॥ तथा त्रैलोक्यमोहनतंत्रे॥ शालग्राम इत्युपक्रम्य विसर्जनांतां पूजोक्ताः॥ अत्र शालग्रामशिलायां तु प्रतिष्ठां नैव कारयेत्॥ इति प्र
तिष्ठामात्रनिषेधादावाहनमवश्यं विष्णोरन्यदेवतानां वापि तद्वमिति॥ आवाह्यार्च्यादिकं स्थाप्य तत्सांगं मां प्रपूजयेत्॥ इति भागवतेपि भ

९०

गवतास्वयमस्त्वयमभिधानात् ॥ आदिपदेनयंत्रादयोगृह्यंते ॥ आवाहनस्वरूपमुक्तं सिद्धांतशेखरे ॥ स्वतएवाभिपूर्णास्यनतत्वस्येहार्चना
दिषु ॥ सादरंसंमुखीभावस्तस्यावाहनमाप्यते ॥ इति ॥ तात्पर्यमाहशारदातिलके ॥ मूलमंत्रसमुच्चार्यसुषुम्नावर्त्मनासुधीः ॥ आनीयतेजःस्वस्था
नान्त्वाशिकारंध्रनिर्गतं ॥ करस्थनासिकांभोजेचैतन्यंपुष्पसंचये ॥ संयोज्यकुसुमंध्रेणमूर्त्तीवावाहयेत्सुधीः ॥ सुषुम्नावर्त्मनाकुसुमरंध्रेणदक्षिणा
नासारंध्रनिर्गतमिति ॥ गरुडपुराणे ॥ आगच्छविप्रयोगेणमूलमंत्रेणशंकरं ॥ आवाहनप्रकर्त्तव्यमिति ॥ नृसिंहपुराणे ॥ आगच्छनृसिंहेसि
हेति ॥ सारसंग्रहे ॥ आवाहनस्थापनंचसन्निधापनमेवच ॥ संनिरोधनमित्युक्तंसंमुखीकरणंततः ॥ अथावगुंठनंप्रोक्तंसकलीकरणंततः
अमृतीकरणंचैवपरमीकरणंचैवपरमीकरणंतथा ॥ विधायस्वस्वमुद्राभिः प्राणस्थापनमाचरेत् ॥ सकलीकरणस्वरूपंचसिद्धांतशेखरे
अपिभिन्नस्वभावानांयदमन्निप्रयोदनं ॥ अंगानांनगिनासार्द्धंसकलीकरणंत्विदमिति ॥ श्रीकुलार्णवे ॥ पीठेदेवंप्रतिष्ठाप्यसकलीकृत्यमंत्र
वित् ॥ मूलमंत्रेणदीपंनागालिन्याघोंदकेनच ॥ त्रिवारंप्रोक्षयेद्विद्वान्देवशुद्धिरियंप्रिये ॥ पंचशुद्धिंविधायेत्थंपश्चाद्यजनमारभेत् ॥ सा
पूजासकलादेवीचान्यथानिःफलाभवेत् ॥ तथा ॥ वाग्भवंयदयुग्मांनेवाग्वादिन्निववाग्भवं ॥ कामराजंततःक्लीन्वेक्लेदिनिक्लेदयेनिव ॥ म
हाक्षोभंकुरुयुगंकामराजमतःपरं ॥ नानीयमोक्षशब्दांतेकुरुयुक्तंवदेततः ॥ स्यान्म्रसादपराचांनेसप्तत्रिंशद्भिरक्षरैः ॥ दीपनीमनुरित्युक्तः
सर्वसिद्धिःकरप्रिये ॥ चकारान्तकुरुयुग्मंतेनातीयंतदनुपरा ॥ प्रासादबीजमित्यर्थः ॥ सप्तत्रिंशदक्षरंमित्युक्तेः ॥ वाग्भवकामजनान्निर्यावा

त्वाविधायापाएव ॥ सान्वयेनैवक्षाने ॥ परप्रासादबीजं तु परस्तात्परस्तात्प्रयोगस्यैव मंत्रस्यांते ऽष्टकं ॥ तथा ॥ सकलीकृत्यनत्प्राणांस्तदीपानिं उपानि च ॥ प्रतिष्ठांप्यार्चयेद्देवमन्यथा निःफलं भवेत् ॥ अत्र केचित् ॥ अस्मिन्प्राणप्रतिष्ठां प्रतिमापूजनादृते ॥ न कश्चित्तु बुधः कुर्यात्कृत्वा मन्तुमवाप्नुयात् ॥ इतिउत्तरतं च वचनात् प्रतिष्ठा न कार्येत्याहुः ॥ तन्न तस्य वचनस्यावाहनादिरहितस्य केवलस्थंडिलादेः ॥ पूजनविषयत्वात् ॥ अतएवोक्तं तत्र प्रतिमापूजनादृते इति ॥ प्रतिमामूर्त्तिस्थां मंत्रमय्यामपि तथात्वादन्यथा कथं सकलीकरणमिति ॥ सारसंग्रहे ॥ मुद्राप्रदर्श्य विधिवदुपचारान्प्रकल्पयेत् ॥ मुद्रास्तत्र त्वकल्पोक्तास्तास्त्वगुरुदर्शितं कुलमूलावतारे ॥ मुदं स्वरूपलाभाभ्यां देहकारेण चात्मनः ग्राह्यपयन्त्यः ऽ य त्वेन मुद्रास्ताः शक्तयो मताः ॥ मोलयंति ग्रहादीम्प पापौघं द्रावयंति च ॥ मोहनं द्रावणं यस्मात् मुद्राशास्त्रेषु वर्णितमिति मुद्राशब्दनिरुक्तिः ॥ प्रपंचसारे ॥ आसनस्वागते चार्घ्यं पाद्यसाचमनीयके ॥ मधुपर्काचमस्नानवसनाभरणानि च ॥ सुगंधसुमनोधूपदीपनैवेद्यचंदनाः प्रयोजयेदर्चनायामुपचारांस्तु षोडश ॥ अर्घ्यं पाद्येसाचमने मधुपर्काचमन्यपि ॥ गंधादयो निवेद्यांता उपचारा दशक्रमात् ॥ गंधादयो निवेद्यांता पूजा पंचोपचारिका ॥ सपर्या त्रिविधा प्रोक्ता तासामेकतमां श्रयेत् ॥ अत्र पंचोपचारपूजापक्षेऽर्घ्यादिपात्रस्थापनं नास्ति प्रयोजनाभावात् ॥ भैरवीतंत्रे ॥ एकैकस्यां ततो मंत्री प्रणम्य तु निवेदयेत् ॥ तन्निवेदनप्रकारमाह नारदपंचरात्रे ॥ प्रणवांते त्रिधा कृत्वा प्रणाव्योमविभूषितं ॥ इदमिदं पश्चात्पदद्यात् षडक्षरं ॥ गृहाणचननस्त्वा मंत्रः पंचदशाक्षरः ॥ योज्यः सर्वोपचारेषु पाद्यादिषु सदैव हि ॥ प्र

णाह्कारः॥ व्योमविंदुः॥ अत्र तृतीयहकारोपरिस्थितविंदोरिकारेण सह संधिः कार्यस्तदा मिभवति॥ मूलेनैवासनं दद्यानेन स्वागतमीरयेत्
ततोर्घं मूर्द्धि दद्याच्च मधुपर्कं मुखांबुजे॥ अत्रार्घाचमनीयं मधुपर्कपुष्पेष्वपि ङेर्नमः पदमेव स्वहादिस्थाने प्रयोजक्तव्यं॥ प्रागुक्तयुक्तेः
अथात्र॥ वैदिको मिश्रितो वापि विप्रादीनां विधीयते॥ तांत्रिको विप्रभक्तस्य शूद्रस्यापि प्रकीर्त्तितः॥ इति पद्मपुराणवचनात्॥ ब्राह्मणक्ष
त्रियवैश्यैर्गणेशादिपंचदेवतानां तत्तद्वैदिकमंत्रेणाप्रथपूजां कृत्वा तत्तांत्रिकमंत्रेण पूजा कार्या यद्वा तत्तद्वैदिकमंत्रांनेन तत्तांत्रिकमंत्र
कृत्वा वा पूजा कार्या केवलतांत्रिकयजनस्य शूद्रविषयत्वात्॥ उक्तवचनात्॥ तच्च वैदिकमंत्रास्तु॥ गणानां त्वेति गणपते॥ गौरीर्मिमाये
ति भुवनेश्वर्यादिगौरीभेदानां॥ यद्वागिति भारत्या॥ श्रीसूक्तं लक्ष्म्या॥ जातवेदसे सुनवाम इति दुर्गायाः॥ विष्णोः पुरुषः सूक्तं॥ रवेराकृष्णेने
ति॥ शिवस्य नमः शंभवेति त्र्यंबकं यजामह इति वा॥ गणानां त्वेति मंत्रस्य गृत्समरोगणपतिर्जगती॥ गौरीर्मिमायेति दीर्घतमा उमा जगती
आकृष्णेय हिरण्यस्तूपः सविता त्रिष्टुप्॥ अथोपचाराः॥ तत्रादावासनानि॥ सारसंग्रहे॥ देवस्य वामभागे तु दद्यान्मूलेन वासनं॥ पौष्पं दा
रुमयं वास्त्रं चार्मं कौशं च तैजसं॥ षड्विधवासनमिति॥ उत्तरतंत्रे॥ पौष्पं पुष्पादिरचितं कुशसूत्रादिसंयुतं॥ अतिप्रीतिकरं देव्या मम चान्य
स्य भैरव॥ यज्ञदारुसमुद्भूतं प्रासनं चायुराशुभं॥ अन्यदारुमयं वापि दद्याद्दासनमुत्तमं॥ मर्कटकक्षीरयुतं तारुसारविवर्जितं॥ चैत्य
श्मशानसंभूतं वर्जयित्वा विभीतकं॥ चैत्यः ग्रामप्रसिद्धं तु हेमंतो महावृक्षः॥ दारुमयासने विशेषमाह रुद्रयामले॥ गांडिल्यभाद्रसार

स्वचासनं हस्तपात्रकं ॥ सप्ताङ्गुलोछ्रितं दद्याद्विष्टं वा विचक्षण: ॥ शांडिल्यो विल्व: शांडिल्यो विल्व शैलूषो मापूर श्रीफलांवपीत्यमर: ॥ भा
डसार: श्चंदन: ॥ भडसारे मलयेजो भद्रश्री वंदनो स्त्रिया ॥ इत्यमरकोशात् ॥ विष्टरो दर्भमुष्टि: ॥ शामरे ॥ सप्तविंशतिदर्भाणां वेणाग्रग्रं
थिभूषिता: ॥ विष्टरं सर्वयज्ञेषु लक्षणपरिकीर्त्तितमिति ॥ यद्वा विष्टरस्त्वासनमात्रवाची ॥ विष्टरो विटपी दर्भमुष्टिपीठाद्यमासनं ॥ इत्य
मरकोश: ॥ उत्तरतंत्रे ॥ कौशजं वाल्कलं शाणं वस्त्रमेतद्द्वयं स्मृतं रोमजं कंवलं चैव वादरं वा चतुष्टयं ॥ चास्त्रेषु कंवलं श्रेष्ठमासनं देवतेषु
ये ॥ वस्त्रमासनचतुष्टयमित्यर्थ: ॥ वादरं कार्पासं ॥ कार्पासं नास्त्र एं च — इति विश्वप्रकाशकोशात् ॥ तथा सिंहव्याघ्रतरक्षूणां छागस्य म
हिषस्य च ॥ गजानां तुरगाणां च कृष्णसारस्य चर्मणा ॥ पाकजं रोमजं स्रेष्ठं दारवं वदनोद्भवं ॥ रावकं रंकुनामां मृग: काश्मीरदेशे प्रसिद्ध: तज्जोम
जं पासवीति लोके प्रसिद्ध: कंवलविशेष: ॥ तथा ॥ यद्वासनं कुशमयं तदासनमनुत्तमं ॥ योगपीठस्य सदृशमासनं कौशमुच्यते ॥ तथा ॥ स
र्वेषां तैजसानां वाप्यासनं स्रेष्ठमुच्यते ॥ वर्जयित्वा लोहमयं वास्यं सीसकमेव चेति ॥ अत: परमर्घ्यदानं ॥ शोमं शंभु: ॥ आगताय तथा वायांस्ना
नुमासनगाय च ॥ पूजानोगंतुकामाय दद्यादर्घं विचक्षण: ॥ आगते स्नानकाले च नैवेद्योपक्रमे तथा ॥ माघस्यापि समुद्दिष्ट: समयस्त्रिविधो
बुधै: ॥ पाद्ये च मधुपर्के च स्नाने वस्त्रोपवीतयो: ॥ भोजने चाचमं दद्यादिति ॥ नूराणयागे ॥ सुगंधतैलैरभ्यज्य सुगंधामलकादिभि: ॥ उद्वर्त्तनं विधायाथ
स्नापयित्वाष्टवारिणा ॥ गंधोदकैश्चमूलेन यथाशास्त्रमभिषेचयेत् ॥ महाविषेकं सर्वत्र शंखेनैव प्रकल्पयेत् ॥ सर्वत्रैव प्रशस्तोऽत्र शिवस्यापि

॥राम॥
॥९२॥

92

र्चनविना ॥ अगस्त्यः ॥ स्नानं पुरुषसूक्तेन शुद्धसंरमोदकेन च ॥ क्षीरदध्याज्यमधुभिः खंडेन च पृथक् ॥ नारिकेलोदकेनापि तथा तालफ
फलांबुना ॥ गंधद्रव्यैश्च वकुभिस्तथा गंधोदकेन च ॥ ऐक्षवेनापि सकर्पूरादिगंधिना ॥ कदलीपनसाम्राथ जलेनापि सुगंधिना ॥ शतं सह
स्रमयुतं शक्त्या वाप्यभिषेचयेत् ॥ शंखं संपूर्य तेनैव स्नापयेतमनन्यधीः ॥ ॥ अथ श्रीशिवस्य शंखेन स्नापनं निषिद्धं पुराणेषु शंखेन स्नापनं
प्रशस्तं श्रूयते ॥ यथा स्कंदपुराणे ॥ ब्रह्मोत्तरखंडे ॥ सुप्रतिष्ठितशंखस्थतीर्थैरपि ॥ अभिषिंच्य महादेवं रुद्रसूक्तैः समाहितः ॥ इति ॥ यामले ॥ पीत
कौशेयवसनं विष्णुप्रीत्यै प्रकीर्तितं ॥ रक्तं शक्त्यर्कविघ्नानां शिवस्य च सितं प्रिय ॥ मलहीनं तथाछिद्रं क्षौमं कार्यसमेव चा ॥ मंत्रतंत्रप्रकाशे ॥ नै
लादिदूषिताद्रोगः सद्भिर्गर्हात्मना भवेत् जीर्णाहरिद्रता कर्तुर्मलिनाकांतिहीनता ॥ कालिकापुराणे ॥ निर्दशं मलिनं जीर्णं छिन्नं याज्ञावलं
वितं ॥ परकीयचासुदग्धसूचिविद्धं तथासितं ॥ उपकेशमधौतं च श्लेष्मसूत्रादिदूषितं ॥ यत्नेन देवताभ्यश्च देवे पित्र्ये च कर्मणि ॥ वर्जीतवाप
योगे च यज्ञादाउपयोजयेत् ॥ सारसंग्रहे ॥ यज्ञोपवीतं दत्वाथ भूषणानि समर्चयेत् ॥ तानि नानाविधानि स्युर्मुकुटादिप्रभेदतः ॥ स्त्रीपुंप्रभेदत
श्चापि विज्ञेयानि विचक्षणैः ॥ योगिनीतंत्रे ॥ गंधपुष्पं तथा धूपो दीपो नैवेद्यमेव च ॥ यस्य यदीयते वस्त्रमलंकारादिकांचनं ॥ तेषां दैवतमुच्चा
र्य हुत्वा प्रोक्षणपूजने ॥ उत्सृज्य मूलमंत्रेण प्रतिनाम्ना निवेदयेत् ॥ वरुणस्तु वीजेन तेषां प्रोक्षणमाचरेत् ॥ अन्नस्य देवता लक्ष्मीरथवा
वापि प्रजापतीः ॥ सुवर्णवाग्निदैवत्यं रजतं चंद्रदैवतं ॥ हीयकं वारुणं ज्ञेयं रसानां पृथ्वी तथा ॥ जलस्य वरुणो देवः पेयानां वरुणस्तथा ॥ कुस

रस्परस्मादेवीपरमात्वस्यचैवहि ॥ घृतप्रदीपके विष्णुस्नेलयोगोवनस्पति ॥ गंधर्वश्च तथा धूपो ह्याज्यं चैवाग्नि दैवत ॥ मधु चैव वारुणा ज्ञेयं दधिक्षी
रं चवैस्रवं ॥ वानस्पत्यं तथा पुष्पं वै स्नवो गंधर्व इरितः ॥ मालायाश्च तथा दुर्गा सर्वं वा विष्णु दैवतं ॥ अत्र पूजन एव वै दैवता ज्ञारः ॥ तेषां दैवतस्म
र्थे पूजयेत्तु विक्षणः ॥ इति स्वयमभिधानात् ॥ कालिकापुराणे ॥ चूर्णीकृतो वा घृष्टो वा दाहकर्षितं एव वा ॥ रसः संमर्दजो वापि प्राणांगो
द्भवस्ववा ॥ गंधपंचविधः प्रोक्तो देवानां प्रीतिदायक ॥ गंधचूर्णगंधपत्र चूर्णसुमनसस्तथा ॥ प्रशस्त गंधयुक्तानां पत्रचूर्णानि यानि च
तानि गंधाह्वयानि स्युश्चूर्णजः प्रथमः स्मृतः ॥ घृष्टोमलयजो गंधः सरलश्च श्चमरुणा ॥ अगुरुः प्रभृतिश्चैवयस्य पंकप्रदीप्यते ॥ घृष्टेन घ
र्षो गंधो यं द्वितीयः परिकीर्त्तितः ॥ शारदातिलके ॥ गंधश्चंदनकर्पूरकालागुरुभिरीरितः ॥ तथा ॥ देवदार्वगुरुवुसमारसाराजुचंदनात् ॥ प्रिया
दिनां च यो द्रव्याग्रहनेदाहजो रसः ॥ सदाहकर्षितो गंधस्तृतीयः परिकीर्त्तितः ॥ सुगंधकरवीराप्यंसुगंधलतिका तथा ॥ सुगंधान्यरसोप्योनो
निष्पीडापरिगृह्यते ॥ सरसंमर्दजो वो गंधः संमर्दज इतिष्यते ॥ मृगनाभिसमुद्भूतस्तत्कोशोद्भव एव वा ॥ गंधप्राणंगजः प्रोक्तो मोददः स्वर्गवासिनां
मंत्रतंत्रप्रकाशे ॥ पुष्पं पंचविधं प्रोक्तं मुनिभिर्नारदादिभिः ॥ परापरोत्तमं चैव मध्यमं च तथाधमं ॥ सौवर्णा परिमिन्मुक्तं परमंचीत्रजं ॥ एक्षयुत्मल
नापुष्पमुत्तमं परिकीर्त्तितं ॥ अधमं पत्रतोयादि मध्यमं तु फलात्मकं ॥ उक्तरूपेण क्रियायोग्ये परापरे ॥ एतपदुक्तरूपं देवेभ्यो दत्तं न तु नः क्रियायो
ग्यं न भवतीत्यर्थं ॥ परापरेति परं सौवर्णमपरं वा सत्र ॥ ते चानुक्तरूपे चेत्सदा योग्ये भवत ॥ देवतोपिंस्मदा धार्य इत्यर्थं ॥ तयोरेकतरस्मयुक्तरूपदिभव

93

तितस्तनन्तुनः क्रियायोग्यं दिवपूजायोग्यं भवतीत्यर्थं ॥ यदुक्तं ज्ञानार्णवे ः पुष्पैः पर्युषितैर्देवि नार्चयेत् स्वर्णजैरपि ॥ निर्माल्यभूतोकुसुमैरुछिष्टैः
परमेश्वरीति ॥ निर्माल्यभूतैरुच्छिष्टैर्दत्तैरिति यावत् ॥ उच्छिष्टैः पूजावशिष्टैः उत्तमपुष्पाणि सारसंग्रहे ॥ शुक्लाकृष्णा च तुलसी शुक्लं रक्तं च पं
कजं ॥ केतकीयुगलं जातीद्वयं द्वंद्वहयारिजं ॥ पुष्पाणां दशकं ह्येतत् प्रशस्तं परिकीर्तितं ॥ रक्तानीलोत्पले श्वेतमल्लिकाकुसुमं तथा ॥ कुंदकल्हारकं
चैवमंदारं तगरं पुनः ॥ अर्जुनं किंशुकं रक्तमंदारं नागपंचकं ॥ अशोकविल्वपुष्पाणि पाटली नवमल्लिका ॥ चंपकं वर्णिकारं च पारिजाततरूद्भवं
शानवेगोद्भवं पुष्पं कोरैदकुसुमानि च ॥ इत्यादीनि सुपुष्पाणि गंधवंति लसंति च ॥ तत्तन्मंत्रविधानेषु विहितानि समर्पयेत् ॥ म्लानानि च्युतगलग्ना
नि जीर्णानि क्ष्मागतानि च ॥ यानि पर्युषितानि स्युः क्रिमिभिर्भक्षितानि च ॥ कोरकानि च पुष्पाणि समाघ्रातानि नार्पयेत् ॥ मंत्रतंत्रप्रकाशे ॥ पत्रे तु
लसी श्रेष्ठ विल्वं दामनकं शुभं ॥ मरुकोदेवकल्हारी विष्णुक्रांता तथैव च ॥ अपामार्गोथ गंधारिपत्री सुरभिसंज्ञिका ॥ नागवल्लीदलं दुर्वा कुशपत्रं त
थामनं ॥ पत्रं चागस्तिवृक्षस्य पुंनागधात्री थेति ॥ ज्ञानतुलस्या गणाधिपं ॥ नदुर्वया यजेदुर्गां विल्वपत्रैर्दिवाकरं ॥ देवीनामर्कमंदारावादित्ये तगरं तथा
गणेशाय च सूर्याय रक्तपुष्पमतिप्रियं ॥ शिविकुंदमदंती च यूथीवं धूथकेतके ॥ जपांरक्तांत्रिसंध्येदेसिंदूरंकुरजानि च ॥ मालतीपुष्पगां रक्तहयारीव
र्वरीं त्यजेत् ॥ उग्रगंधमगंधं च कृमिकेशादिदूषितं ॥ अशुद्धपात्रप्राप्तंगवासोभिः कुत्सितात्मभिः ॥ आनीतं नार्पयेद्धीमोः प्रमादादपि दोषकृत् ॥ का
लिकाभिस्तथावर्ज्यं विना चंपकपंकजैः ॥ शुष्कैर्न पूजयेद्धंभुं पत्रैः पुष्पैः फलैरपि ॥ स्नात्वानीतैः पर्युषितैर्याचितैः कृष्णवर्णकैः ॥ स्वयंविकाशितैः

॥शि·च॥
॥९४॥

पुष्पैः स्वयंच पतितैर्भुवि ॥ वर्जयेद्दहनीपुष्पं कांचनारं कुरंटकं ॥ सर्वपुष्पैः सदा पूजा विहितैरपि ॥ कर्त्तव्या सर्वदेवानां भक्तिरेवात्र कारणं ॥ स्वत्र
स्नात्वानीतैर्मध्याह्नस्नानोत्तरमाहृत्यानीतैरित्यर्थः ॥ प्रातरुत्थानादि प्रातःकालीनपूजांतं प्रथमप्रहरकृत्यमुक्त्वा ततः पुष्पफलादीनामु
पार्जनमाचरेदिति द्वितीयप्रहरकृत्यत्वेन नारदपंचरात्रे पुष्पाहरणस्योक्तत्वात् ॥ तथा ॥ पत्रं वा यदि वा पुष्पं फलं नेष्टमधोमुखं ॥ दुःखदं तत्
समाख्यातं यथोत्पन्नं तथार्पणं ॥ चित्रपूजासु सर्वासु न विरुद्धम्पदूषणं ॥ अधोमुखार्पणं नेष्टं पुष्पांजलिविधौ न तत् ॥ लक्षपूजासु सर्वासु स
र्वासु सर्वासु पुष्पमेकैकमर्पयेत् ॥ समुदायेन चेत्पूजा लक्षपुष्पार्पणं न तत् ॥ न पर्युषितदोषोस्ति जलजोत्पलचंपके ॥ तुलस्यागस्त्यबकुले बिल्वे
गंगाजले तथा ॥ अत्र चोत्पलपददर्शनाज्जलपदेन कमलमात्रं ग्राह्यं ॥ भविष्यपुराणे ॥ तुलस्यां बिल्वपत्रे च जलजेषु च सर्वशः ॥ न पर्युषितदोषो
स्ति मालाकारगृहेषु चेति ॥ सारसंग्रहे ॥ परारोपितवृक्षेभ्यः पुष्पाण्यानीय चार्चयेत् ॥ अविज्ञाय च तैर्यत्तु निष्फलं तस्य पूजनं ॥ ज्ञानमालायां ॥ फले
ष्वामलकं श्रेष्ठं बादरं तिन्त्रीफलं ॥ दाडिमं मातुलिंगं च जंबीरं पनसोद्भवं ॥ कदली चूतसंभूतं श्रेष्ठं जंबूफलं तथा ॥ यजेद्देवं सदा विप्रः पत्रैः पुष्पैः फलैर
पि ॥ दिवसे दिवसोत्फुल्लैः पुष्पैः पूजा तथाश्विनि ॥ पुष्पाभावे प्रवालैर्वा कारयेत्त्वपि कोरकैः ॥ अतः परमावरणपूजा ॥ तत्र पुष्पोपचारं तु सारसंग्रहे ॥ मंत्र
संपूरितैर्वर्णैर्मात्रकायाः सबिंदुकैः ॥ क्रमेण गंधपुष्पाद्यैर्देवस्यांगे समर्चयेत् ॥ लयांगसर्वये देहे देवस्य मनुवित्तम ॥ ज्ञानार्णवे ॥ लयांगसर्वये देहेस्विति
पप्ववाहिन्यामपि ॥ लयांगमर्चयेद्देहे न्यासस्थाने पुमंत्रविदिति ॥ शारदा ॥ अंगादि लोकपालांतं यजेदावरणान्यपि ॥ केसरेष्वग्निको— —हृदया

94

॥राम:॥
॥९४॥

दीनि पूजयेत् ॥ नेत्रमग्ने दिशास्त्वस्त्रं ध्यानव्याख्यांगदेवताः ॥ तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः ॥ वरदाभयधारिण्यः प्रधानतनवस्त्रियः ॥ अङ्गा
दीनि विशेषानभिधाने ॥ लोपकालशब्देन तदस्त्राणामप्यादानं ॥ अत्रादिकोणादित्यादिपदस्य क्रमग्राहित्वादग्निरक्षसवायव्येशानकोणेष्वंग
चतुष्टयं यजेदिति वदंतितन्न ॥ अग्नीशासुरवायव्यमध्येदिक्ष्वंगपूजनमिति ज्ञानार्णवसंहितयोर्वचनात् ॥ हृदयं वाग्निदिग्भागे ईशान्यां च शिरो यजे
त् ॥ शिखां निरृतिदिग्भागे वायव्ये कवचं तथा ॥ अत्र मंत्रं यथा दिक्षु नेत्रमग्रे प्रपूजयेत् ॥ इति दक्षिणामूर्त्तिकल्पवचनात् ॥ वह्नौ हृदयमीशान्यां शि
रो रात्रिंचरे शिखां ॥ वायौ वर्म पुरो नेत्रमस्त्रं दिक्षु चतुर्ष्वपीति कपिलपंचरात्रवचनात् ॥ चतुर्ष्वपीति दिक्ष्वन्त्राच्च नमस्स्वित्यर्थः ॥ इष्ट्वा हृदयमाग्नेय्या
मीशान्यां च शिरो यजेत् ॥ नैरृत्यां च शिखां पूज्य वायव्यां कवचं यजेत् ॥ अभ्यर्च्य पुरतो नेत्रमस्त्रं दिक्षु समर्चयेत् ॥ इति सामशंभुवचनात् ॥ पूर्वाया
म्यांतरे विद्वान् हृदयं विनिवेशयेत् ॥ शिरः पूर्वोत्तरे दद्याच्छिखां पश्चिमदक्षिणे ॥ पश्चिमोत्तरदिग्भागे कवचं विन्यसेद्बुधः ॥ अग्रतः केसरोद्देशे नेत्रं दिक्ष्व
स्त्रमादत्त तथेति नारदपंचरात्रवचनाच्चेति ॥ अत्र ॥ ॥ अथावरणपूजामपुरः प्रावीं प्रकल्पयेत् ॥ तदादिपरिवाराणां प्रादक्षिण्येन पूजन
मिति नृसिंहकल्पवचनात् ॥ यष्टुरभिमुखादेवाभिमुखेनोदशं ॥ प्राच्यांदिहरितो ज्ञेयाः पूजाहोमादिकर्मस्विति सारसंग्रहवचनात् ॥ यत्रैव भास्वा
नुदये प्रयाति प्रावीमिमां वेदविदो वदंति ॥ मध्ये तु सा पूजकपूज्ययोश्च सदागमज्ञैः सततविचिंत्येति भैरवीतंत्रवचनाच्च ॥ देवाग्रं प्रावीं प्रकल्प्य तदनुसा
रेणाग्नेयादिकं कल्पयित्वांगानि पूजयेत् ॥ आवरणदेवताश्चैवमेव पूजयेदिति ॥ महाकपिलपंचरात्रे ॥ शिरःप्रभृति मंत्रेषु पूजायां तु नमोंतता ॥ शि

॥श्री·च॥
॥९५॥

णभिन्नेण मंत्रेण होमे स्वाहांतनाम भवेत् ॥ आवरणदेवतास्तत्रकल्पे वक्ष्यंते ॥ विजयमालिनीतंत्रे ॥ स्वस्वस्थाने स्वाभिमुखान् पूजयेत्प्रोक्षणादिभिः ॥ अ
भिमुखान्देवस्य श्रीविद्यावरणपूजायां दक्षिणामूर्त्तिसहितायां श्रीविद्यां संमुखीं स्मरेदित्युक्तेः ॥ तथा सिद्धेश्वरीतंत्रे ॥ अघृष्यत्रसमर्थ्यश्च मार्त्तं
डस्वपरी विधिः ॥ तद्वदंगैर्निजैर्देवो ध्यातव्यः स्वमरीविभीः ॥ तूर्णापागे ॥ देवीध्यान्वात द्वीरान्सर्पूजति चपंचहिः ॥ विनिसृत्य स्थिरीभूतं परिवारं विचिंत
येत ॥ अभ्यर्च्यावरणं खाघं मूलमुच्चार्य मंत्रवित् ॥ संपूज्य देवी संबोध्य वदेन्मंत्रमिमं ततः ॥ अभिष्टसिद्धिमे देहि शरणागतवत्सले ॥ भक्त्या समर्पयेत्तु
भ्यं प्रथमावरणार्चनं ॥ इति पुष्पांजलिं दत्वा प्रणमेदतिभक्तितः ॥ प्रत्यावरणमेवं तु तत्तन्मंत्रान्समर्पयेत् ॥ इत्थमावरणं सम्यगभ्यर्च्य मनुवित्तमः ॥ अं
ते यजेल्लोकपालांस्तेषामस्त्राणि च क्रमात् ॥ इंद्रं सुराधिपं पीतं वज्रहस्तं वाहनं ॥ अग्निं तेजोधिपं रक्तं शक्तिहस्तं सुभूषणं ॥ यमं प्रेताधिपं कृष्णं दंडह
स्तं समर्चयेत् ॥ रक्षोधिपं च निऋतिं खड्गहस्तं सधूम्रकं ॥ पाशहस्तं सुशुभ्रांगं वरुणं यादसांपतिं ॥ वायुं प्राणाधिपं धूम्रमंकुशाढ्यकरं यजेत् ॥ यक्षंपतिं 95
कुवेरं च शुक्लवर्णं गदाधरं ॥ विद्याधिपं तथेशानं स्वच्छं शूलकरं यजेत् ॥ नागाधिपं तथानंतं गौरं वक्र यजेत् ॥ लोकाधिपंधिपं विधातारं रक्तं पद्मकरं
यजेत् ॥ ऐरावतं तथा मेषं महिषं मृतपूरुषं ॥ मकरं मृगमन्यो च वृषं च विश्हंसकौ ॥ इंद्रादिलोकपालानां वाहनानि विदुर्बुधाः ॥ वज्रं पीतं सितां शक्तिं पा ॥रामः॥
शं विद्युन्निभं यजेत् ॥ अंकुशं रक्तवर्णं च शुक्लवर्णां गदां यजेत् ॥ त्रिशूलं नीलवर्णं च यजेत्संचीततः परं ॥ रथागं करवंदाभं पद्मं रक्तं समर्चयेत् ॥ लो ॥९५॥
कपालायुधानेवं क्रमेण परिपूजयेत् ॥ तत्रकेचित ॥ अंते यजेल्लोकपालान्मूलवारिषदान्वितान् ॥ हेतिजात्यधिपोयेतां दिक्षु पूर्वादितः क्रमात् ॥ इति

शारदातिलकवचनात् ॥ यथास्थिते पूर्वादिदिक्षुइंद्रादिपूजनमिति वदंति तन्त्र ॥ चतुरायतनदेवतास्थापनप्रकरणोक्तयुक्तेः सर्वेषामावरणानां देवा
यतनत्वात् भाल्लोकपालावरणस्थाप्यावरणत्वात्कल्पितप्राच्यनुसारेणैव पूजनयुक्तमिति भाति विद्वान इति ॥ पुनमूलं समुच्चार्य मांगायेत्सपरतिच
वारयेन्नाम देव्याश्च चतुर्थ्यंतमुदीरयेच ॥ नम इत्यर्पयेद्गंधपुष्पाद्यैः साधकस्त्रिधा ॥ ततोयजेद्धूपदीपनैवेद्यसुमनोहरः ॥ प्रपंचसारे ॥ सगुग्गुल्वगुरुशी
रसीतांज्यमधुचंदनैः ॥ सारांगारं विनिक्षिप्तैर्मंत्री नीचैः प्रधूपयेत् ॥ कुलमूलावतारे ॥ शैलेयं मलयोद्भवं जननखं सर्जं च कुष्ठं समं सिद्धाख्यागुरुगुग्ग
राद्विगुणितानाप्रत्येकसंचूर्णितं ॥ षड्भागावरमाक्षिकस्यसमुसितावाप्ताष्टभागान्वितं धूपोयं निमृशं करेण विहितः श्रीसुंदरीवल्लभः ॥ शैवागमे
धूपभाजनमस्त्रेण प्रोक्ष्याभ्यर्च्य हृदाणुना ॥ अस्त्रेण पूजितां श्ययं वादयन्गुग्गुलं दहेत् ॥ नारदपंचरात्रे ॥ आवाहनेर्घधूपे च पुष्पे नैवेद्ययोजने ॥ नि
त्यमेवं प्रभुंजीत ततनन्नमन्त्राभिमंत्रितामपि ॥ चकाराद्दीपेपि ॥ तथा पूजाकालं विनान्यत्र हितं नास्याप्रचालनं ॥ नानया च विना पूजा कारयेत्सिद्धिः
लालसः ॥ दद्याच्चारवसानेव जगध्वनिपरं ततः ॥ मंत्रमातः परं चैव स्वाहाक्षरसमन्वितं ॥ एकादशाक्षरो मंत्रो घंटायाः सर्वसिद्धिदः ॥ उद्धारः सु
गमः ॥ कालिकापुराणे ॥ वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे ॥ न धूपं वितरेद्भूमौ नासने न घटे तथा ॥ यथा तथा घ्राणांतं कृत्वा तं विनिवेदयेत् ॥
मेदामलासमायुक्तान धूपान्विनिवेदयेत् ॥ न यक्षधूपं वितरेन्माधवाय कदाचन ॥ यक्षधूपस्तु रालिलोके प्रसिद्धः ॥ विष्णुः ॥ धूपार्येन जीवजातमि
ति ॥ प्रपंचसारे ॥ गोसर्पिषा वा तैलेन वर्त्याचलघुगर्भया ॥ दीपंतं सुरभिं शुभ्रं दीपमुच्चैः प्रदर्शयेत् ॥ वाशब्देनोभयोरमिश्रणमुक्तं ॥ नमिश्रीकृत्य

दयात्तुदीपस्नेहान्घृतादिकान्॥ कृत्वामिश्रीकृतंस्नेहंनामिश्रंनरकंव्रजेत्॥ इतिकालिकापुराणवचनात्॥ तूर्णायागे॥ पारावतभ्रमाकारंदीपंने
त्रादिदर्शयेत्॥ दक्षिणेसर्षपादीपंतिलतैलेनवामतः॥ सिवार्द्धेनदक्षिणतोरक्तावर्त्तिस्तुवामतः॥ कालिकापुराणे॥ वृक्षेषुदीपोदानंव्यानंतुभूमौ
कदाचन॥ कृत्वातुपृथवीनापंयोदीपमुत्सृजेन्नरः॥ सनान्नतापनरकमाप्नोत्येवशतंसमा॥ रुद्रयामले॥ नैवनिर्वापयेद्दीपंसाधकस्तुकदाचन॥ य
स्तुनिर्वापयेद्दीपंतस्यलक्ष्मीर्विनश्यति॥ कुष्मांडछेदिकानारीदीपनिर्वापकःपुमान्॥ विधवाश्चदरिद्रश्चभवेत्सप्तसुजन्मसु॥ मंत्रतंत्रप्रकाशे
गधामारमनीयंवदलानैवेद्यमर्पयेत्॥ सनत्कुमारकल्पे॥ इत्थंकृत्वासममभ्यर्च्यपंचावरणसंयुतं॥ कदलीफलसंयुक्तंपायसंविनिवेदयेत्
सारसंग्रहे॥ सघृतंपायसंशुद्धंसुपक्वंश्रद्धयासह॥ सर्करादधिकंयुक्तंसोपदंशंसमोचकं॥ सुसंस्कृत्यविधानेननैवेद्यंतुसमर्पयेत्॥ ज्ञानार्णवे
शुद्धस्फटिकसंकाशंचंद्ररश्मिसमप्रभं॥ रसान्नुवर्णजेपात्रेचारुसृष्टौदनंप्रिये॥ हिंगुजीरमरीचाद्यैराडकैःरचितःशुभः॥ वटकःकुंकुमाकारः
पायसंहेमसंन्निभं॥ दुग्धमावर्त्तितंसम्यक्छर्करासारपूरितं॥ कपिलाघृतसंयुक्तंभूर्जत्वक्छविभिमंडकाः॥ सर्कराफाणिताभ्यैवसूपंमुद्गोद्भवं
तथा॥ नानाविधानिपेयानिव्यंजनानिबहूनिच॥ सारसंग्रहे॥ निधायस्वर्णजेपात्रेसाधानांतत्त्वमंडले॥ संस्थाप्यचतुरस्त्रेचसंस्कुर्याद्धास्त्र
माग्रतः॥ अस्त्रमंत्रेणसंप्रोक्ष्यवक्त्रमुद्राभिरक्षितं॥ वायुवीजेनसंशोष्यवह्निवीजेनतंदहेत्॥ स्पृशंदक्षकराग्रेणसुधावीजेनमंत्रवित्॥ अ
मृतीकृत्यनत्सर्वंमूलमंत्रेणतत्पुनः॥ स्पृशेत्कराभ्यांविधिवदष्टधावाभिमंत्रयेत्॥ धेनुमुद्रांप्रदर्श्याथगंधपुष्पैःसमर्पयेत्॥ देवमभ्यर्च्यकुर्या

96

त्तुपुष्पांजलिमनन्यधीः ॥ हेमपात्रस्थितं दिव्यं परमान्नं सुसंस्कृतं ॥ पंचधा षड्रसोपेतं गृहाणममसिद्धये ॥ मूलमंत्रं समुच्चार्य्य स्वाहांतं जलमर्पये
त् ॥ कराभ्यां तत्समुद्धृत्य पूजितं च सुधात्मकं ॥ निवेदयामि भवते सानुगापजुषाणानत् ॥ सर्वपूजास्तु तत्राम्ना नैवेद्यस्य मनुस्त्वयं ॥ प्राणसंज्ञस्त
थापानो व्यानोदानमनूनतः ॥ समानाऽयुवाः सर्वेप्राणवाया ह्वियंतकाः ॥ पंचमंत्राः भवंनीहक्रमेणपरिकीर्त्तिताः ॥ प्राणादिनां मुद्राश्चवक्ष्यंते ॥
नैवेद्यसंस्कारस्तन्निवेदनप्रकारश्चाग्रेप्रयोगेवक्ष्यते ॥ स्मृतिसमुच्चये ॥ त्रिषुवर्णेषुदातव्यं वैश्वदेवे पाकभोजनं ॥ स्वंडाज्यानिकृतं पाकं नदद्याच्छूद्र
जन्मनः ॥ श्राद्धकल्पे ॥ भूडेस्त्वमान्नेनैवदासाहिफंपिंडेदेयमित्युक्तं तेन देवतानैवेद्यमयामान्नेनैवदेयं तुल्यन्यायादिति ॥ ज्ञानार्णवे ॥ संकल्प
परमेशान्यै नित्यं होमविधिं चरेत् ॥ संकल्पनैवेद्यं ॥ सारसंग्रहे ॥ इत्थं तु संस्कृतेनैव वह्नौ देवमावाह्य मंत्रवित् ॥ संपूज्य मूलमनुना पंचविंशतिमाहु
ती ॥ हुनेदाज्येन हविषा तिलैर्वा पायसैः शुभैः ॥ तंडुलैस्तिलमिश्रैर्वा केवलैर्वाथ पुष्पकैः ॥ अंगावरणदेवानामेकैकामाहुतीं हुनेत् ॥ उद्वास्य
देवं वह्नौ च पूजास्थानं भजेत्ततः ॥ उपविश्यासने मंत्री दद्याद्भूतबलिं ततः ॥ ईशाने मंडले कृत्वा साधारं तं च निक्षिपेत् ॥ अन्नव्यंजनतोयाद्यपा
त्रं पुष्पादिपूरितं ॥ नेत्रभूतानि संपूज्य ततस्तेभ्यो बलिं हरेत् ॥ भूतानां ध्यानप्रागेव पूजाप्रकरणेप्रोक्तं --- चोवल्यन्सर्गश्चप्रयोगे वक्ष्यते ॥ उ
द्वास्यपूजा चक्रे देवं स्वात्मनि वह्निं चेति ॥ अग्निसंस्कारः प्रागेव दीक्षाप्रकरणेऽभिहितः ॥ ततो संक्षेपप्रकारस्तु प्रयोगे वक्ष्यते ॥ वशिष्ठः ॥ अग्न्या
धानादिकं कर्म नित्यहोमेन विद्यते ॥ इति ॥ नारदीये ॥ पुनराचमनं दद्यात्करोद्वर्त्तनमेव च ॥ पु–वत्परिपूज्य च––वामादिकं दत्वेति ॥ नाराय

॥शि·व॥
॥९७॥

णीये॥सकर्पूरं च ताम्बूलं दद्यान्नीराजनं तथा॥सत्स्वर्णमुकुटादीनि भूषणानि विचक्षणाः॥आदर्शयेत्तथादर्शं कल्पयेच्छत्रचामरे॥अत्रमन्त्रः॥कर्पूरशक
---मिश्रं नागवल्लीदलैर्युतं॥सुधाबिंदुसमायुक्तं पूगीफलमनोहरं॥ताम्बूलं रघुनाथाय दत्त्वा काममवाप्नुयात्॥सुधाबिंदुश्चूर्णं॥नीराजनमा
ह सोमसंभुः॥शिरस्यारोप्य देवस्य दूर्वाक्षतपवित्रकमिति॥अत्र नीराजनशब्देनारात्रिकमुच्यते॥तत्रज्ञानार्णवे॥ आरात्रिकं ततः कुर्यात्सर्वकाम
र्थसिद्धये॥सौवर्णे राजते कांस्ये लोकनेत्रमनोहरे॥कुंकुमेलिप्यसंवसुपत्रं वरानने॥दीपमेकं वर्णिकायाव सुपत्रेष्ट दीपकान्॥यवयोधूमरवि
तान्सर्कराडुग्धसंयुतान्॥वलयांचित्रशोभाभिः शोभितान्घृतपूरितान्॥अभिमंत्र्य ततो मंत्री रत्नेस्वर्या ततः परं॥मूलमंत्रेण वाभ्यर्च्य ततः आ
रात्रिकं चरेत्॥ तस्मात्तु समुद्धृत्य मस्तकांतपुनःपुनः॥ नववारं महादेव्या मस्तके नीराजनं चरेत्॥आरात्रिके महादेव्याश्चक्रमुद्रां प्रदर्शयेत्॥श्रीबीजं च
पराबीजं समालिख्य मंत्रवित्तमः॥गसौ च मथनात्पश्चाड्डिम्याक्रमतो लिखेत्॥वामकर्णसमायुक्ता बिंदुनादविभूषितान्॥बीजपंचकमेतद्धि पंचर
त्नमुदीरितं॥पूर्वबीजे विलोमेन रत्नेश्वरीयं नवाक्षरी॥पराबीजं भुवनेश्वरी बीजं॥गसौ च यनाद्यन्ति॥ गकारस्स·म·य·नकाराः॥ एते प्रत्येकं लकारोपरिस्थी
ता॥उकारबिंदुनादयुक्ताः॥ पंचरत्नाबीजानी भवंति॥तानितु ग्लूं स्लूं म्लूं न्लूं इति॥पूर्वबीजे विलोमे मायाश्रीक्रमेण॥कात्यायनीतंत्रे॥इत्थं मारात्रिकं
कृत्वा प्रणम्य परदेवतां॥प्राणायामं त्रयं कृत्वा मूलमंत्रेण साधकः॥ न्यासं कृत्वा यथापूर्वं मूलदेवीं हृदंबुजे॥मूलमंत्रं यथाशक्ति जपेत्तन्मानसं॥श्री
कुलार्णवे॥ ग्रथित्वा मातृकावर्णैर्मूलमंत्राक्षराणि च॥क्रमोत्क्रमात्रिरावृत्त्या मंत्रशुद्धिरियं मता॥शारदातिलके॥सहस्रकृत्व·संजप्य मूलमंत्रमन·

॥राम॥
॥९७॥

97

न्यधीः ॥ तं जपं सर्वसंपत्त्यै देवतायै निवेदयेत् ॥ नित्यहोमे कालांतरमाह दक्षिणामूर्त्तिः ॥ यथाशक्ति जपं कृत्वा नित्यहोमं समाचरेदिति ॥ शैवागमे ॥ अष्टोत्तरसहस्रं तु तदर्द्धं त्रिशतं तु वा ॥ अष्टोत्तरशतं वापि जपेन्नित्यमतंद्रितः ॥ जपो जपसमर्पणप्रकारश्च पुरश्चरणप्रकरणे वक्ष्यते ॥ तथा ॥ इत्थं जपं समर्प्याथ घंटावादनपूर्वकं ॥ स्तुवीत स्तुतिभिः सम्यक् साधको भक्तिसंयुतः ॥ उत्तरतंत्रे ॥ पौराणिकैर्वैदिकैश्च मूलमंत्रेण वै वहि ॥ प्रदक्षिणं प्रणामं च कुर्याधर्मार्थसाधकं ॥ ततः क्षमापयेन्मंत्रैर्वक्ष्यमाणैर्महेश्वरीं ॥ क्षमापनमंत्राः प्रयोगे वक्ष्यंते ॥ अत्र पौराणिकैर्वैदिकैरिति त्रैवर्णिकपरं ॥ मूलमंत्रेणेति शूद्रपरं ज्ञेयं ॥ शूद्राणां पौराणिकादिस्तवपाठेपि निषेधात् ॥ यदुक्तं कालिकापुराणे ॥ मोहाद्वा कामतः शूद्रः पुराणं संहितां स्मृतिं ॥ पठन्नरकमाप्नोति पितृभिः सह पापकृत् ॥ इति पंचरात्राणां तु श्रवणेपि नाधिकारः ॥ यदुक्तं नारदपंचरात्रे ॥ ब्राह्मणक्षत्रियविशां पंचरात्रं विधीयते ॥ शूद्रादीनां न तच्छ्रोत्रपदवीमधिरोहतीति ॥ शैवागमे ॥ अर्घपात्रं समुद्धृत्य मूलमुच्चार्य मंत्रवित् ॥ साधु वासाधु वा कर्म यद्यदाचरितं मया ॥ तत्सर्वं भगवन् शंभो गृहाणाराधनं परं ॥ इत्यर्घोदकमुत्सृज्य किंचिद्देवस्य दक्षिणे ॥ करे समर्पयेद्विद्वान् कृत्नमाराधनं शिवे ॥ श्रीकुलार्णवे ॥ कृतार्चनादिकं सर्वं समं चोदपुरस्सरं ॥ ततः पूर्वादिमनुना देवतायै समर्पयेत् ॥ सारसंग्रहे ॥ वदेदितः परं पूर्वं प्राणबुद्धिं ततो वदेत् ॥ देहधर्माधिकारं च जाजाग्रत्स्वप्नसुषुप्तिति ॥ वदेत्त्यवस्था सुमनसा वै चापदमुद्धरेत् ॥ कर्मणा वै वहस्ताभ्यां पद्भ्यामुदरेण च ॥ वदेच्छिश्ना च यत्कृतं स्मृतं यत्पदमुच्चरेत् ॥ उक्तं च यत्कृतं यच्च सर्वं ब्रह्मार्पणं भव ॥ तु स्वाहांतश्च संप्रोक्तो ब्रह्मार्पणमनूत्तमः ॥ मंत्रः प्रयोगे स्पष्टो विज्ञेयः ॥ सनत्कुमारः ॥ उद्वासयेत्ततो देवं परिवारगणैः सह ॥ प्रपंचसारे

स्तुत्वेदुखंडपरिमंडितमौलिमेवमुद्वासयेत्पुनरमुंहृदयांबुजेस्वे ॥ शिवरहस्ये ॥ रश्मिरूपा महेशस्य पूजियाश्वदेवता ॥ श्रीशिवांगे विलीनास्ताः सन्तु सर्व
शुभावहा ॥ इति पुष्पांजलिंदत्वा प्रणम्य परिभावयेत् ॥ देवस्यांगे विलीनंतनड्रश्मिवृंदमशेषत ॥ तेजोरूपं शिवंध्यात्वा क्षमस्वेति पुनः पुनः ॥ क्षमाप्यारोप
येत्त्वायहृदंभोजे महेश्वरं ॥ गह्वराद्गह्वरं स्थानं स्वस्थानं परमेश्वर ॥ यत्र ब्रह्मादयो देवा न विदुः परमंपदं ॥ विसर्ज्यानेन मंत्रेण ततः पूरकवायुना ॥ ध्या
यंतु मंत्रेणानेनध्यात्वांतंस्थापयेद्धृति ॥ तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठंति मे हृदि ॥ विसत्संहारमुद्रया ॥ संह
रमुद्रांवध्वा तत्तेजोरूपां महेश्वरी ॥ विभाव्य पुष्परेणाहृत्य वहन्नासाध्वना शिवे ॥ प्रवेश्य द्वादशांतस्य सहारसरोरुहे ॥ विश्राम्य मध्यनाड्याता मानीय
हृदयांबुजे ॥ संस्थाप्य सम्यक्संपूज्य स्वात्मानंतन्मयस्मरेत् ॥ इति हंसपारमेश्वरवचनात् ॥ कुलमूलावतारे ॥ ऐशान्यां मंडलं कुर्याद्वारयमविव
र्जितं ॥ विसर्जनार्थं निर्माल्यं वास्तिन्याः पूजनाय वै ॥ निक्षिप्य तस्मिन्निर्माल्यं मंत्रेणानुसमर्चयेत् ॥ चंडेश्वरीं महादेवीं निर्माल्येश्वंदनादिभिः ॥ लेह्य
चोष्यान्नपानादि निर्माल्यं ह्यग्निलेपनं ॥ निर्माल्यभोजिन्यै तुभ्यं ददामि श्रीशिवाज्ञया ॥ इति नैवेद्यशेषं तु दत्वा नत्वा विसर्जयेत् ॥ गणेश्वरपरामर्शि
न्यां ॥ लंबोदराय निर्माल्यं मैशान्यां मंडले न्यसेत् ॥ संमोहनपंचवाणेन ॥ विश्वक्सेनाय निर्माल्यं नैवेद्यं च निवेदयेत् ॥ पूर्वोत्तरीदिशि प्राज्ञश्चंडेशं मंडले
र्चयेत् ॥ देवदेवस्य निर्माल्यैर्ध्यायंतं चंडशेखरं ॥ वामदेवतन्त्रे ॥ तेजश्चंडस्य निर्माल्यं भोक्तादेवेशिनन्तत ॥ तस्मै समर्पयेन्नित्यं नाजिघ्रेन्नाक्रमेच्च तत्
उत्तरतन्त्रे ॥ ततो भास्करवीजेन सहितेनामुना पुनः ॥ मंत्रेण भास्करायार्चामछिद्रार्थं निवेदयेत् ॥ ॐ नमो विवस्वते तुभ्यं भास्वते विष्णुतेजसे ॥ जगत्स

98

विचेशुचयेसविचेकर्मदायिने ॥ ततः कृतांजलिर्भूत्वा पठित्वा मंत्रमीरितं ॥ एकाग्रमनसा वाग्भिरछिद्रमविधायेत् ॥ ॐ यज्ञछिद्रं तपश्छिद्रं पूजने मम सर्वंतदछिद्रमस्तु भास्करस्य प्रसादतः ॥ भास्करबीजं त्र्यक्षरमंत्रः समंत्रस्तत्प्रकरणे वक्ष्यते ॥ विजयमालिनीतंत्रे ॥ अर्घनायेन देवेशि गंधपूजावशेषितं ॥ आलोज्य किंचिन्मूलेन मंत्रयेद्दृधा शिवे ॥ प्रोक्षयेत्तेन तोयेन स्वात्मानं मूलमंत्रतः ॥ निर्माल्यमस्तके धार्यं मूलमंत्रेण मंत्रिणा ॥ प्राश्य पादोदकं देवि नैवेद्यं विभजेत्प्रिये ॥ तद्भक्तेभ्यं स्वयं भुक्त्वा तन्मयो विहरेत्सुखं ॥ ननु शिवादिप्रसादस्वीकारनिंदावचनविरोधः ॥ न तस्याशुचिपरत्वात् ॥ स्कंदपुराणे तन्निर्माल्यस्वीकारस्योक्तत्वात् ॥ यथा ॥ ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् ॥ तस्य पापं महच्छिघ्रं नाशयिष्ये महाव्रते ॥ स्नापयित्वा निधानेन यो लिंगस्नापनोदकं ॥ त्रिःपिबेत्त्रिविधं पापं तस्येहापि प्रणश्यति ॥ लिंगस्नपनवाभिर्यः कुर्यान्मूर्ध्नाभिषेचनं ॥ गंगास्नानफलं तस्य जायतेत्र विपाप्मन इति ॥ तथा ॥ निर्माल्यं हि तु यो भक्त्या शिरसा धारयिष्यति ॥ अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः ॥ नरके पतिते घोरे तिर्य्यग्योनौ प्रजायते ॥ इति च ॥ कालिकापुराणे ॥ फलपुष्पं च तांबूलमन्नपानादिके च यत् ॥ अदत्वा तन्महादेवी नभोक्तव्यं कदाचन ॥ पठितापर्वताग्रे वा सभायामपि साधकस्तथा तस्यै निवेद्यैव स्वमर्थमुपकल्पयेत् ॥ वाराहपुराणे ॥ विष्णुरुद्रांतरं कुर्याच्छ्रीगौर्येरितरं तथा ॥ नास्तिकानां हि मूर्खाणां वा कुशास्त्रविगर्हितं ॥ भविष्यपुराणे ॥ यथा शिवस्तथा विष्णुर्यथा विष्णुस्तथा उमा ॥ उमा यथा तथा गंगा चतुरूपं न भिद्यते ॥ विष्णुरुद्रांतरं यश्च श्रीगौर्योरंतरं यथा ॥ गंगागौर्योरंतरं च यो कुरुते मूढधिस्तु सः ॥ घोरवादिषु नरकेषु पतत्यधः ॥ भविष्योत्तरे ॥ यो ब्रह्मा स हरिः प्रोक्तो यो हरिस्स महेश्वर

महेश्वरः स्मृतः सूर्यः सूर्यः पावक उच्यते ॥ पावकः कार्त्तिकेयोसौ कार्त्तिकेयो विनायकः ॥ गौरी लक्ष्मीश्च सावित्री शक्तिभेदाः प्रकीर्त्तिताः ॥ देवंदे
वीमथुद्दिश्य यः करोति पुनं नरः ॥ न भेदस्तत्र मंतव्यः शिवशक्तिमयं जगत् ॥ पद्मपुराणे ॥ सौराः शैवाश्च गाणेशा वैष्णवाः शक्तिपूजकाः नामेव ते प्र
पद्यंते वर्षायः सागरं यथा ॥ एकोहं पंचधा जातः क्रीडया नामभिः किल ॥ देवदत्तो यथा कश्चित्पुत्राद्याह्वाननामभिरिति विष्णुवचनं ॥ गीतासु ॥ अहं हि स
र्वयज्ञानां भोक्ता च प्रभुरेव च ॥ प्रभः फलशाक्षा ॥ विष्णुपुराणे ॥ यजन्त्वा नजत्येन सपत्नेनं जपंतप ॥ घुस्तथानं हितत्त्वेन सर्वभूतोपतो हरिः इत्थं स
र्वत्र सर्वरूपेण श्रीविष्णोरेव क्रीडनान्मिष्टदेवताप्रसादस्वीकारे दोषाहई तिभाति विचारकारिणामिति ॥ अत्र अदत्वादित्येन विवेचैवेत्यपने न च किंचि
देयं किंचिद्भोक्तव्यं इति व्यपदेयं तद्भोक्तव्यमिति वा विधीयते ॥ नत्र केचित् विनियुक्त विनियोगदोषाद्दत्तापहारप्रसंगाच्च पूर्वः पक्षः श्लाघ्य
इति वदंति वस्तु किंचिद्गुरोषादिपदाभावात्कर्मत्वात्श्रुतिसंवादात्तत्र देशित्वाद्वोत्तर पक्ष एव श्रेयानिति ॥ श्रुतिः तस्माद्विद्वांसो विष्णुपहृतमे
वभक्षयेयुरिति ॥ नारदपंचरात्रे ॥ यात्किंचिन्त्वयमश्नीयात्तुरो विप्राणिवेदितं ॥ विष्णोर्वाक्कायमनसां मूले साष्टशतं जपेदिति ॥ प्रायश्चित्तमयु
क्तंमिति ॥ विप्रेत्ति नारदसंबोधनं ॥ नित्यपूजायां संक्षेपकारः प्रयोगे वक्ष्यते ॥ अथ नित्यपूजायामतिसंक्षेपेपि यावत्याव – – – – – – – नामा
ह ॥ प्रपंचसारे ॥ ॥ अथ पुनराचम्य गुरुः वाग्वदनो विष्टरोपविष्टः सन् ॥ प्राणायामं सलिपिन्यासकृत्वान्यसंहृष्यादीनिति ॥ अत एव प्राणा
याममातृकान्यासऋष्यादिकरांगन्यासानभियोक्तं तच्चैव ॥ जपारंभमनुनांनुसामान्येयं प्रकनेति ॥ इयं प्राणायामादिक्रिया प्रकर्षेण कल्प्यते येषां

99

॥राम॥
॥९९॥

पूजाधिकारः अतस्वैतेषाप्रकरणानि श्रूयते ॥ यथागस्त्यसंहितायां ॥ प्राणायामैर्विना यद्यत्कृतं कर्म निरर्थकं ॥ अतो यत्नेन कर्त्तव्याः प्राणायामाः शु
भार्थिभिः ॥ इति ॥ दक्षिणामूर्त्तिकल्पे ॥ जपार्थं सर्वमंत्राणां विन्यासेन लिखेर्विना ॥ कृते सनिःफलं विधानस्मादादौ लिपिं न्यसेत् ॥ कपिलपंचरात्रे ॥ ऋषि
छंदोदैवतानां विन्यासेन विना यदा ॥ जप्यते साधितोप्येष तत्तुक्षफलं भवेत् ॥ गोतमीये ॥ ध्यानं जपार्चना होमा सिद्धमंत्रकृता अपि ॥ अंगविन्यासविधरा न
दास्यंति फलान्यमी ॥ अतएव विधिहीनानुष्ठाने दोषमाह याज्ञवल्क्यः ॥ विधिदृष्टं तु यत्कर्म करोत्यविधिना नरः ॥ फलं न किंचिदाप्नोति क्लेशमात्रं हि
नस्यदिति ॥ उत्तरतंत्रे ॥ प्रवासे पथि दुर्गे वा स्थानाप्राप्तौ जलेपि वा ॥ कारागारनिबद्धो वा प्राप्तो वैशगतोपि वा ॥ मनोभये समुत्पन्ने सिंहव्याघ्रसमाकुले ॥ परत्र
कागमे चैव कुर्यात्मानसपूजनं ॥ मनसा हृदयं स्थानं ध्यात्वा योगाख्यपीठकं ॥ नत्रैव पृथवीमध्ये पूजां तत्र समाचरेत् ॥ मंत्रप्रमादनस्नानं दंतधावनकर्म वै
अन्यच्च सर्वं मनसा ध्यात्वा कुर्याच्च पूजनं ॥ यथा पुष्पादिभिः पूजा बहिर्देवे विधीयते ॥ तथा हृद्यपि कर्त्तव्याः सर्वास्व प्रतिपत्तये ॥ जले प्रवहणादौ ॥ आयोवि
शेगतः गृहित्वासनव्रतः ॥ अन्यच्च सर्वमिति मंत्रप्रसाधनदंतधावनव्यतिरिक्तमित्यर्थः ॥ मंत्रादीनां मनसा संभवात् ॥ मंत्रशौचं ॥ यः शौचनिरतो विप्रः स
वै मंत्रउदाहृतं इति भागुरीकृतस्मृतिसमुच्चयलिखितब्रह्मांडपुराणवचनात् ॥ नारदपंचरात्रे ॥ ब्राह्मान्मुहूर्त्तादारभ्य प्रागंशं विप्रवासरात् ॥ जपध्यानार्च
नस्तोत्रैकायवाङ्मनसायुतैः ॥ अभिगच्छेज्जगद्योनिं तच्चाभिगमनं स्मृतं ॥ ततः पुष्पफलादीनां उत्थाव्यार्जनमाचरेत् ॥ भगवद्यागनिष्पत्तिकारणं ग्रह
णंपरं ॥ ततो ध्यंगेन यागेन पूजयेत्परमेश्वरं ॥ साधकः प्रहरं विप्र इज्याकालो हि स्मृतः ॥ श्रवणं चिंतनं व्याख्यानं ततः पीठसमन्विना ॥ स्वाध्यायकालं तद्वि

॥शि॰च॥
॥१००॥

कालांतंमुनिसत्तम॥ विनावमानेसंप्राप्ते पूजाकृत्वासमन्यसेत्॥ योगंनिशावसानेथविश्रामैरंतरीकृतं॥ विप्रेतिनारदसंबोधनं॥ आदिपदेनसमिदाघा
रणां॥ समित्पुष्पकुशादीनांसकालःसमुदाहृतः॥ इतियक्षवचनात्॥ अंगेनयोगेनति॥ स्वयमेवनिवृत्तोगति॥ मध्याह्नार्केनदध्याच पूजापशुनानतथा॥ चित
यंनच पागांगंनैर्वेद्यमन्येचपूजनं॥ मध्याह्ने स्यनेनमधुपर्कउक्तः॥ पश्चसंदंगं॥ विष्णुधर्मोत्तरे॥ मधुपर्किकयार्घ्यैर्यननैो मंत्रां निवेदयेत्॥ सहिरण्यंवीजपा
त्रंद्वविरोनसंदेवतु॥ पशुकालोनकर्त्तव्यः इत्याहभगवान्भृगु॥ द्रविणांदक्षिणां॥ एतन्मध्याह्नपूजानंतरंसनिसंभवेकार्य्यं॥ तथातत्त्वसासारसंहिता
यां॥ अनुरीसोत्तुकीचैवत्रासिदैवोधकीतथा॥ साधनाभाविनीवेतिपंचधाविद्यतेपुनः॥ यदिलंघनपर्यंतोव्याधिरात्मनिदृश्यते॥ नदापूजानकर्त्तव्या
स्थंडिलेप्रतिमासुच॥ नम्नानंदत्तंकाष्ठवाकुर्याद्धोममथापिवा॥ रविमंडलमालोक्यप्रतिमामथवापुनः॥ मूलमंत्रसकृज्जप्त्वापुष्पंसाक्षान्नमुक्षिपेत्॥ आं
नोव्याधिभिरत्युग्रैः स्नानश्चैवोपवासकैः॥ निजसामर्थकेर्वापिस्वकर्त्तव्यंसमापयेत्॥ स्नात्वादेवमथाग्निंश्च गुरून्विप्रांश्चपूजयेच॥ एतावत्कालवैछिन्ना
पूजायुष्मत्प्रसादतः॥ नदोषोस्त्विवसंप्रार्थ्यपुनःपूर्ववदाचरेत्॥ संप्रार्थ्यजपहोमादिकंचकार्यं॥ यस्तुरोगवशाहंचवशादोषमुपागत॥ जपेनक्षालनं
यस्यादेहनहवने व च॥ ध्यानेनापिमुनिश्रेष्ठज्ञात्वाकर्मबलाबलमितिनारदपंचरात्रवचनात्॥ तथा॥ अथसूतकिनःपूजावदाम्यागमवोधिता॥ स्ना
त्वानित्यंचनिर्वर्त्यमानस्याक्रियमातुवै॥ बाह्यपूजाक्रमेणैवस्यान्नयोगेनपूजयेत्॥ यदिकामीनित्यंपूर्ववदाचरेत्॥ त्रासितेनोवक्ष्यते पूजायथैवागम
वोधिता॥ लब्धवायदिवालब्धमर्घपात्रादिसाधनं॥ पूजोदकेनकर्त्तव्यानचेत्तोयंचविद्यते॥ नदासंपूजयेद्देवंभवनाकुसुमादिभिः॥ दोर्वेधकिप्रव

100

॥राम॥
॥१००॥

क्ष्मामीपूजामागमबोधितां ॥ सूर्यश्रीबालवृन्दावाड्वैर्धाइतिभाविता ॥ रत्नमंडपधर्मादीचतुष्कसुरगोवृजं ॥ मूलमूर्त्तिषडंगानितेषांपूजांविधि
यते ॥ अन्येषामपिसर्वेषांप्रोक्तासंस्तेयकर्मणि ॥ सर्वेषामपिवस्तूनामालाभेभावनेत्वहि ॥ निर्मलेनोदकेनाथपूरयेत्याहनारदः ॥ तथापुनस्त्रिधापू
जाउत्तमामध्यमाधमा ॥ अधिकारनिमित्ताभ्यांभिद्यतेशृणुधाउन ॥ यागोपकरणेक्तस्तेक्रियमाणामना ॥ यथालब्धोविनिष्पाद्याडवेपूजानुमध्य
मा ॥ पत्रपुष्पांतुनिष्पाद्यापूजावाधमसंज्ञका ॥ विहितामिकवेदार्थैर्वुल्लर्षिभिरकल्मषैः ॥ क्रियमाणातुयापूजासात्विकीयाविमुक्तिदा ॥ राजर्षिभि
स्तयोनिष्टेभवनत्वरैदिभि ॥ यापूजाक्रियतेसम्यक्राजसीसासुखप्रदा ॥ स्त्रीबालवृद्धमूर्खाद्यैर्भक्तरक्षुद्रमानसैः ॥ यापूजाक्रियतेनित्यंतामसीसा
प्रकीर्त्तिता ॥ तथाशारदातिलके ॥ आराधनासमर्थश्चेदमादर्चनसाधकं ॥ दातुंनैवचशक्तोनिक्रपीदर्चनदर्शनं ॥ नैकंतुयस्यविद्येतसाधौयात्सेव
नान्यथा ॥ यस्तुभक्त्याप्रयत्नेनस्वयंसंपाद्यचाखिलं ॥ साधनंचार्चयेद्विद्वान्ससमग्रफलंलभेत् ॥ यार्वयेद्विधिवद्भक्त्यापरानीतैश्चसाधनैः ॥ पूजाफ
लार्द्धमेवास्यनसमग्रफलंलभेत् ॥ कुंभसंभवः ॥ सुस्थःसमर्थकुर्वीतचोत्तमैरेवसाधनैः ॥ मध्यमोमध्यमैरेवन्यूनोन्यूनैस्तपोधन ॥ आपन्नश्चेत्समर्थो
पिन्यूनैरेवसमाचरेत् ॥ पूजाकर्मविशेषेणदेशकालानुसारतः ॥ भविष्यपुराणे ॥ विभवेसतियोमोहान्नकुर्याद्विधिविस्तरं ॥ नतत्फलमवाप्नोतिप्रलो
माक्रांतमानसः ॥ शिवयामले ॥ शिवपिठवलिंगवृक्षपुष्पवृहद्रजलसंगमचत्वरेसुदेशे ॥ अपिशिवगदितंविमुच्यशास्त्रंनिजगृहएवपूजनंमुमु
क्षोः ॥ अरणेपस्वल्पकामानांसिध्यर्थंपूजनंहितं ॥ निष्कामानांमुमुक्षुणांगृहेशस्तंशिवार्चनं ॥ ॥ सुंदराचार्यशिष्येणश्रीनीवासेनधीमता ॥ च

ड्रिकायांप्रणीतायांप्रकाशोगमदष्टम ॥ ॥ इतिश्रीसुंदराचार्यचरणारविंदद्वंद्वांतेवासिनाश्रीनिवासभट्टेनविरचितायांशिवार्चनचंद्रिकायां
अष्टमप्रकाशः ॥ ८ ॥ ॥ अथनित्यपूजाप्रयोग ॥ ॥ तत्रश्रीमान्साधकेंद्रोब्राह्मेमुहूर्त्तेशयनाद्दक्षिणांगेनमुत्थायशिवंस्मृत्वा
वामपादंभुविविन्यस्योत्थायगृहाद्बहिर्निर्गत्यावश्यकंकृत्वाहस्तौपादौप्रक्षाल्यरात्रिवासःपरित्यज्यधौतेनवाससीपरिधायाचम्यदेवतायागमंदि
रंसंमार्ज्यगोमयेनोपलिप्यवितानादिभिरलंकृत्यतत्रस्थासनेसमुपविश्यपूजामूर्त्तिर्निर्निर्माल्यमपकृष्यप्रक्षाल्यसंस्थाप्यप्राणायामत्रयऋष्यादि
न्यासत्रयपूर्वकंपूर्वदिनपूजावशिष्टपत्रादिनामूलमंत्रेणतांमूर्त्तिंत्रिरभ्यर्च्यपाद्याचमनीयेदत्वादेवस्यकर्पूरशकलैःदंतधावनकारयित्वासुगंधिज
लैःगंडूषमुखप्रक्षालनादिदत्वापुनराचमनीयंनिवेद्यकरास्यप्रोञ्छनायसूक्ष्मनिर्मलवस्त्रंदत्वास्वशिरसिश्वेतसहस्रदलकर्णिकायांश्रीगुरुंश्वे
तवस्त्राभरणभूषितंवराभयज्ञानमुद्रापुस्तककरंचंद्रकांतिनिभंसुप्रसन्नंश्वेतगंधानुलेपनंश्वेतमाल्यविभूषितंवामांकगतयारक्तवर्णयार
क्तवस्त्राभरणगंधमाल्यविभूषितयावामकरधृतलीलाकमलयादेव्यादक्षिणभुजेनालिंगितंत्रिनेत्रंशांतंतमुर्स्वंशिवरूपिणंध्यात्वातच्च
रणारविंदयुगलस्रुतपीयूषधारयास्वदेहमभिषिक्तंसंचिंत्यश्रीअमुकानंदनाथश्रीपादुकांपूजयामीतिनिजगुरुणाकृतनसंकेतनाम्नानदत्ताने
श्रीगुरुभ्योनमः ॥ श्रीगुरुपादुकाभ्यनम ॥ इतिमंत्रेणवागंधादिभिरुपचारैर्मानसैर्वाह्यैर्वासंपूज्यआनंदमानंदकरंप्रपन्नंज्ञानस्वरूपंनिज
वोधयुक्तं ॥ योगेंद्रमीड्यंभवरोगवैद्यंश्रीमद्गुरुंनित्यमहंनमामि ॥ इतिप्रणम्यहृन्मंत्रेणस्वहृदिलयंभावयेत ॥ ततोमूलाधारादिब्रह्मरंध्रांतंसुष

सूर्यसहस्रप्रभं सुप्रसन्नान्तस्तेजोदंडनिभं मूलमंत्रं ध्यात्वा जत्तेजसा व्याप्तं स्वशरीरं विचिन्त्य वक्ष्यमाणविधिना मूलमंत्रेण प्राणायामत्रयं कृत्वा वक्ष्यमाणऋ
ष्यादिकरषडंगन्यासान्विधाय हृदयकमले वक्ष्यमानरूपं देवं ध्यात्वा मानसैरुपचारैः संपूज्य मूलमंत्रं यथाशक्ति जपित्वा देवाय जपं समर्प्य स्तुत्वा प्र
णम्य ॥ त्रैलोक्यचैतन्यमयादिदेव श्रीशंकर त्वच्चरणाज्ञयैव ॥ प्रातसमुत्थाय तव प्रियार्थं संसारयात्रमनुवर्त्तयिष्ये ॥ संसारयात्रामनुवर्त्तमानं त्वदा
ज्ञया शंकर देवदेव ॥ स्पर्द्धातिरस्कारकलिप्रमादभयानि मां प्राभिभवंतु नाथ ॥ जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ॥ त्वमपि प्रि
याणामधिदेवतेन यथा नियुक्तोसि तथा करोमि ॥ एतेन प्रार्थनश्लोका गणेशाद्युपवासकैः यथायोग्यसमूहनीया ॥ इति प्रार्थ्य देवाज्ञामादाय ॥ स
मुद्रमेखले देवि पर्वतस्तनमंडले ॥ विष्णुपत्नीं नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ इति भूमिं स्थानानुसारेण तस्यां पादं निधाय श्रीशिव इत्युदीर्य स्था
यपदे पदे स्वमंत्रं स्मरन् ग्रामाद्बहिर्नैरृत्यां याम्यां वा दिशि शरक्षेपमात्रां भुवमतीत्य हरेगत्वा उत्तिष्ठन्तु ये देवा गंधर्वा यक्षराक्षसाः ॥ परितस्त्यज्य
नां स्थानं विण्मूत्रोत्सर्जनाय मे ॥ इति मंत्रं पठित्वा तृणालोष्टप्रक्षेपेणान्तर्देवादीनुद्वास्य यथाविधि मलमूत्रोत्सर्गं कृत्वा जलैः शौचं कुर्यात् ॥ यथा
प्रथमं मृज्जलैर्लिंगं प्रक्षाल्य दशवारं मृज्जलैः प्रक्षालयेत् ॥ इति मूत्रोत्सर्गे पुरीषेप्येवमेव लिंगं पुनर्वामकरं पुनर्लिंगमिति प्रक्षाल्य पुनर्वामकरं पंच
वारं मृज्जलैः प्रक्षाल्य पुनः करद्वयं त्रिः प्रक्षाल्यैकैकवारं पादौ मृज्जलैः प्रक्षालयेत् ॥ इति मूत्रोत्सर्गे पुरिषेप्येवमेव लिंगवर्ज्यं च वारमपानं प्रक्षाल्य दश
वारं वामकरं सप्तवारं करद्वयं त्रिस्त्रिः पादद्वयं मृज्जलैः प्रक्षालयेदिति ॥ इतोप्यधिकोयं शौचविधिरुपपुराणादेवावगंतव्यः ॥ इत्थं शौचं विधाय गं

ह्णाचमनादिकंचविधायानिषिद्धदिनेषुविहितदंतकाष्ठमादाय॥ क्लींकामदेवायसर्वजनप्रियायनमइतिमंत्रेणदंतधावनंविधायदंतकाष्ठंप्रक्षा
ल्यपुरतःशुद्धदेशोपरित्यज्यमूलमंत्रेणमुखंप्रक्षाल्यकुशतिलयवगंधाक्षतकुसुमधौतवस्त्राण्यादायास्त्राभिमंत्रितशंकुनाशुचिस्थानान्मृत्तिकांगृहि
त्वाजलाशयंगत्वाभिमंत्रितजलेननीरंप्रक्षाल्यतत्रास्त्राभिमंत्रितंकुशादिकंनिधायोधतलेनतीर्थाद्बहिःकटिशौचंकृत्वास्वशाखोक्तविधिनावैदि
कस्नानंविधायतदंगतर्पणंकृत्वातीरंगत्वास्त्रमंत्रेणमृत्तिकादायास्त्रमंत्रेणैवाभिमंत्र्यशिखामंत्रेणतृणादिकंनिरस्यमूलमंत्रेणाभिमंत्र्यतया
मृत्तिकयामूर्द्धादिपादांतंविलिप्य॥ आधारःसर्वभूतस्यविष्णोरतुलतेजसः॥ तद्रूपाश्चततोजातास्ताःआपःप्रणमाम्यहं॥ इतितीर्थजलंप्रणम्य
वक्षमाणमुमुखीकरणमुद्रांबद्ध्वाप्राणवायुंनिरुध्यतज्जलांतःप्रविश्यतूष्णीमितिमज्ज्यान्मज्जनाभिमात्रेजलेस्थित्वाद्यघेत्यादिश्रीशिवप्रीत्यर्थंतांत्रिक
विधिस्नानमहंकरिष्ये॥ इतिसंकल्पंकृत्वामूलमंत्रेणप्राणायामत्रयंमूलमंत्रस्यऋष्यादिकरषडंगन्यासांश्चकृत्वास्वपुरतोजलेहस्तमात्रंचतुरस्रंती
र्थंपरिकल्प्यब्रह्मांडोदरतीर्थनिकरैःस्पृष्टानितेरवे॥ तेनसत्येनदेवेशतीर्थंदेहिदिवाकर॥ इतिसूर्यंतीर्थंप्रार्थ्यक्रोमित्यंकुशमुद्रयासूर्यमंडलंभित्त्वागंगे
चयमुनेचैवगोदावरिसरस्वती॥ नर्मदेसिंधुकावेरिजलेस्मिन्संनिधिंकुरु॥ इतिसूर्यमंडलात्तीर्थमावाह्यपुरःकल्पितेतीर्थमंडलेसंयोज्यवक्ष्यमाणती
र्थशक्तिमंत्रेणतीर्थशक्तिसमावाह्यतत्रतांध्यायेत्॥ सर्वानंदमयामशेषदुरितध्वंसांमृगांकप्रभांत्र्यक्षांचार्द्धकरद्वयेनदधतीपाशेसृणिंवक्रमा
त॥ दोर्भ्यांचान्यतपूर्णहेमकलशंसुक्ताक्षमालोवरगंगासिंधुसरिद्वयादिन्यसंहितांश्रीतीर्थशक्तिंभजे॥ वामोर्वादिवामधःकरपर्यंतंपाशादिचत्वा

रिध्यमाभ्यां कलशमित्यायुधध्यानं ॥ इति तीर्थशक्तिं ध्यात्वा ॥ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वानंदमे तीर्थशक्ति एह्येहि स्वाहा ॥ तीर्थशक्त्यै नमः ॥ इति तीर्थशक्तिं संपू
ज्य ॥ ॐ नमो भगवति अंबालिके अंबिके महामालिन्येहि भगवती अशेषतीर्थालवाले ह्रूं श्रीं शिवजटाधिरूढे गंगे गंगांबिके स्वाहेति मंत्रेणाष्टवारमभि
मंत्र्य तज्जलं ह्रीं करेण लोड्य वमिति धेनुमुद्रयामजीकृत्य कवचमंत्रेणावगुंठनमुद्रयावगुण्यास्त्रमंत्रेण छोटिकाभिः संरक्ष तत्र मूलमंत्रजपन् हृदि दे
वस्मरन् त्रिनिमज्ज्योन्मज्ज्य कुंभमुद्रं वध्वा मूलमंत्रेण स्वशिरसि त्रिरभिषिंच्य ॥ ॐ वं शिमक्षो विविलावं स्वं सुरुष्व क्रपजापते ॥ मातरः सर्वभूतानां
मापो देव्यः पुनंतु मां ॥ वं ॐ अलक्ष्मीमलरूपाया सर्वभूतेषु संस्थिता ॥ क्षालयंतु निजं स्पर्शादापो देव्यः पुनातु मां ॥ यन्मे केशेषु दौर्भाग्यं सीमंते यश्च
मूर्द्धनि ॥ ललाटे कर्णयोरक्ष्णोपापस्तं घ्नंतु वो नमः ॥ इति त्रिभिः श्लोकैः शिरशि त्रिभिषिंच्य मूलमंत्रेण स्वाहांतेन त्रिराचम्य त्रिसंतर्प्य देवं विसृ
ज्य तीरमागत्य धौतवाससी परिधाय करौ मृदाङ्घ्री च प्रक्षाल्याचम्य प्रमाणोक्तस्ववर्णविहितं तिलकमादौ विधाय पश्चाद्वशीकृतं तभूतभस्म त्रिपु
ण्ड्रधारणं कुर्यात् ॥ तत्र स्ववर्णविहितं तिलकं तु ब्राह्मणस्योर्द्ध्वपुंड्रं क्षत्रियस्य त्रिपुंड्रं वैश्यस्यार्द्धचंद्राकारं शूद्रस्य वृत्ताकारं ॥ अथ भस्मधारणवि
धि ॥ तत्राग्निहोत्रोद्भवं वा पूर्वोक्तविधिना वक्ष्यमाणविधिना वा संस्कृताग्नेः प्रमाणोक्तविधिनांतरिक्षे गृहीतकपिलागोमयपिंडं शुष्कं मूलमंत्रेण
दग्धं देवोद्धादशनात्पूर्वमेव रहितमपक्वातिपक्वरहितं वस्त्रेण संशोधितं कर्पूरादिसुवासितं भस्मादाय संस्थाप्य तेन वा त्रिपुंड्रधारणं कुर्यात् ॥ तत्प्रकारस्तु मूल
मंत्रेण प्राणायामत्रयं कृत्वा शिरसि पिप्पलाद ऋषये नमः ॥ मुखे गायत्रीछंदसे नमः ॥ हृदये श्रीरुद्राय देवतायै नमः ॥ गुह्ये अग्निबीजाय नमः

॥शि॰चं॥
॥१०३॥

पादयोर्भस्मशक्रयेनमः॥ मममोक्षार्थेभस्मधारणेविनियोगः इतिऋष्यादिन्यासंविधाय॥ ॐ अंगुष्ठयोः कालायनमः हृदयायनमः तर्जन्योःक
लविकरणायनमः॥ सिरसेस्वाहा॥ मध्यमयोःवलविकरणायनमः॥ शिखायैवषट्॥ अनामिकयोःवलप्रमथनायनमः कवचायहुं॥ कनिष्ठ
योःसर्वभूतदमनायनमः नेत्रत्रयायवौषट्॥ करतलकरपृष्ठयोःमनोन्मनायनमः अस्त्रायफट्॥ इतिविन्यस्यहृदयशिरःशिखाकवचनेत्रेषुप्रागु
क्तान्यंगमंत्रान्विन्यस्यास्त्रमंत्रेणतालत्रयंदशदिग्वंधनंचकृत्वा॥ विभूतेभूमिमानासीद्वामदेवःसदाशिव॥ रक्षावंधस्त्वयादेविरक्षमामनथेस
दा॥ इतिविभूतिप्रणम्यादायसद्योजातमित्यादिंवानुवाकानांसंहिकिर्देवतोपनिषदोऋषयः प्रथमद्वितीयचतुर्थीनुकानामनुष्टुप्अघोरेभ्य
इत्यस्यस्वराडनुष्टुप्शअंयोगायत्रीसर्वेषांरुद्रोदेवताइतिऋष्यादिकंस्मृत्वाविन्यस्य॥ ॐ सद्योजातंप्रपद्यामिसद्योजातायवैनमः॥ भवेभवेना
तिभवेभवस्वमांभवोद्भवायनमः॥ वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालायनमःकलविकरणायनमोवलविकरणाय
नमोवलायनमोवलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनम॥ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यःसर्वेभ्यःसर्वसर्वेभ्योनमः
स्तेअस्तुरुद्ररूपेभ्योः तत्पुरुषायविद्महे महादेवायधीमहितन्नोरुद्रप्रचोदयात्॥ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधि
पतिःब्रह्माशिवामेअस्तु॥ सदाशिवोम्॥ इतिमंत्रान्पठित्वाविभूतिंवामकरेनिधायभस्माभिमंत्रेणमंत्रस्यऋष्यादिन्यासंकुर्यात्॥ तत्रसिर
सिअथर्वशिरसेऋषयेनमः॥ मुखेगायत्रैछंदसेनमः॥ हृदयेरुद्रायेदेवतायैनमः॥ इतिविन्यस्यअग्निरितिभस्मवायुरितिभस्मजलमितिभस्म

103

॥राम॥
॥१०३॥

स्थलमितिभस्मव्योमेतिभस्मसर्वंहवाइदंभस्मनमइत्येतानिचक्षूंषिभस्मानीत्यभिमंत्र्य॥ आपोवाइत्यस्यप्रजापतिरृषिःजगुः॥ आपोदेवताइ
तिऋष्यादिकंस्मृत्वाविन्यस्य॥ ॐ आपोवावाइदंसर्वंविश्वाभूतान्यापःप्राणावापःपशवोआपोन्नमापोमृतमापःसम्राडपोविराडपःस्वराडपःछं
दांस्यापोज्योष्यापःयजूंष्यापःसत्यमापःसर्वादेवताआपोभूर्भुवःसवराप ॐ॥ इतिमंत्रेणाद्भिःसंसिच्यमानस्तोकइतिमंत्रस्यभगवानृषि
जगतीछंदःहिरण्यदेवताइतिऋष्यादिकंस्मृत्वाविन्यस्य ॐ मानस्तोकेतनन्आयुषिमानोगोषुमानोगोषुमानोअश्वेषुरीरिषःमानावीरान्रुद्र
भामिनोवधीर्हविष्मंतोनमनविधेमते॥ इतिमंत्रेसमर्घतस्माद्धुल्लनदेनन्याशुपतंपशुपाशविमोक्षायेतिमंत्रेणैकादशवारमभिमंत्र्यद्विधाकृत्ना
पर्वकेनभागेनइशानःसर्वविद्यानामितिप्राग्रुक्तमंत्रेणमुखे॥ अघोरेभ्यइतिमंत्रेणबाह्वोःवामदेवायेतिमंत्रेणकंठादीनाभ्यंतंसद्योजातमिति
मंत्रेणउरुमूलादिपादद्वयपर्यंतं॥ इतिसर्वांगेषुभस्मद्धुलनंकृत्वाहस्तौप्रक्षाल्यद्वितीयंभस्मादायसिरसि॥ ॐ ऐं ह्रीं हरहर ॐ नमः शिवा
यललाटेब्रह्मणेनमः हृदयेहव्यवाहनायनमः॥ नाभौस्कंधायनमः॥ कंठेपूष्णो॥ दक्षिणबाहुमूलेरुद्रायबाहुमध्येआदित्यायमणिबंधेवंद्रा
यवामबाहुमूलेवामदेवाय॥ बाहुमध्येप्रभंजनाय॥ मणिबंधेवसुभ्योनमः॥ पृष्ठेहरणय॥ ककुदिशंभवे॥ सिरसिपरमात्मने॥ इतित्रिपुंड्रधारणं
कृत्वावैदिकसंध्यांकृत्वातांत्रिकसंध्यांकुर्यात्॥ अयंभस्मधारणविधिस्त्रैवर्णिकानामेव॥ अन्येस्तुपंचाक्षरेणमूलमंत्रेणत्रिपुंड्रधारणंकार्यं
॥ ॥ अथतांत्रिकसंध्यातत्रमूलमंत्रेणाचम्यशिखांबध्वामूलेनैवप्राणायामत्रयंकृत्वामूलमंत्रस्यऋष्यादिकरषडंगन्यासान्विन्यस्य

॥शि॰व॥
॥१०४॥

स्वपरतोवमितिधेनुमुद्रयाजलममृतीकृत्यमूलमंत्रेणाष्टवारमभिमंत्र्य॥ ॥कुशैरकारादिलकारांतैरेकपंचाशदक्षरैःसविंदुभिःप्र
त्यक्षरंस्वशिरःप्रोक्ष्यसूर्यमंडलेप्रोक्तरूपंदेवंध्यात्वादक्षिणकरेणजलमादायवामकराग्रेणस्पृशन्लंवंरंयंहंइतिपांचभौतिकमंत्रेणसप्तवारमभि
मंत्र्यमूलमंत्रेणचत्रिरभिमंत्र्यतज्जलंवामकरेनिधायतज्जलेनविंदुभिर्मूलमंत्रेणदक्षिणकराग्रेणस्वशिरसित्रिःप्रोक्ष्यावशिष्टंवामकरस्थंज
लंवामनासासमीपंनीत्वातेजोमयंवामनासारंध्रेणस्वदेहांतप्रविष्टंध्यात्वातेनजलेनस्वदेहांतस्थंसकलकलुषंप्रक्षाल्यकृष्णवर्णंतज्जलंदक्षिण
नासारंध्रैवितिविभाव्यदक्षिणकरेणादायस्ववामभागेवज्रशिलांध्यात्वा॥ॐह्रींपशुहुंफट्॥इतिपाशुपतास्त्रमंत्रेणतस्यामास्फाल्यहस्तौप्रक्षा
ल्यमूलमंत्रेणत्रिराचम्यांजलिनाजलमादायोत्थायवक्ष्यमाणशिवगायत्रीमनुच्चार्यश्रीमहादेवस्यवतेर्घःस्वाहाइतित्रिरर्घांजलिंसूर्याभिमुखं
मुक्षिप्यमूलमुच्चार्यश्रीरुद्रंतर्पयामिनमःइतित्रिःसंतर्प्यप्राग्वत्प्राणायामादिकंकृत्वासूर्यमंडलेदेवंध्यायत्॥ॐतन्महेशायविद्महेवाग्विशुद्ध
यधीमहितन्नःशिवःप्रचोदयात्॥इतिशिवगायत्रींयथाशक्तिजपित्वामूलमंत्रंवाष्टोत्तरशतंजपित्वाजपंसमर्प्यस्तुत्वाप्रणम्यसूर्यमंडलाद्देवंस्व
हृदिविसर्ज्यश्रीगुरुंप्रणमेदिति॥त्रिषुकालेषुनाविकसंध्या॥संध्यालोपोनकर्तव्यःशांभवाज्ञैवमेत्वहि॥दीक्षितःसंध्ययाहीनोनविद्याफलमश्नु
ते॥इतिशिवरहस्यवचनात्संध्यात्रयमावश्यकमिति॥स्वसमयेकृताचेत्संध्यातदाष्टोत्तरशतंप्रायश्चित्तार्थंमूलमंत्रंजपित्वापूर्वसंध्यांकृत्वातत्का
लसंध्यांकुर्यात्॥ततःप्रकृतेप्रतसंध्यानंतरंवैदिकतर्पणानिवर्त्यमूलेनप्राणायामत्रयंऋष्यादिन्यासत्रयपूर्वकंस्वपरतोवमितिधेनुमुद्रयाजल

104

॥रामः॥
॥१०४॥

मसृतीकृत्यतत्रसत्वक्रसांगासावरणंदेवंध्यात्वामूलमंत्रसमुच्चार्यश्रीशिवंतर्पयामिनमइत्यष्टोत्तरशतवारंतदर्द्धमष्टाविंशतिवारंवादेवस्यमुखक
मलेपरमामृतबुध्यातत्तीर्थजलेःसंतर्प्यावरणदेवताश्चामुकंतर्पयामिनमइतिप्रत्येकमेकैकांजलिनासंतर्प्यदेवंस्वहृदिविसृज्यतीर्थंचसूर्यगुरुदि
कपतिग्रहान्प्रणम्यशुद्धोदकपूर्णपात्रमादायहृदिस्वष्टदेवतांस्मरन्मौनिस्वपदमात्रदृष्टिस्तोत्रादिकंपठन्गृहंगच्छेत्॥ततोद्वारिस्थितःस्वपापंम
नसासंचिंत्य॥ ॐदेवत्वप्रकृतंचित्तपापाक्रांतमभून्मम॥तन्निःसारयचित्तान्मेपापंफट्फट्फट्तेनमः॥सूर्यःसोमोयमःकालोमहाभूतानिपंच
च॥एतेशुभाशुभस्येहकर्मणोनवसाक्षिणः॥इतिपठित्वाऊंफडितिक्रोधदृष्ट्यापार्ष्णिद्वयमूर्द्धमवध्यापलोकासुमनाभूत्वागृहांतःप्रविश्यपांगणेस्थि
त्वापादौप्रक्षाल्याचम्यांगणभूमौगोमयेनोपलिप्तायांसिंदूरादिनारचितवृत्तमंडलमध्येस्वासनमास्तीर्यह्रींआधारशक्तिकमलासनायनमःइत्या
सनंसंपूज्यतत्राम्मुखउपविश्यवक्ष्यमाणसूर्यमंत्रेणप्राणायामत्रयंकृत्वाशिरसिब्रह्मणेऋषयेनमःमुखेगायत्रीछंदसेनमःहृदयेश्रीसूर्या
यदेवतायैनमः॥इतिविन्यस्यसूर्यार्घदानेविनियोगः॥इतिकृतांजलिर्वदेत्॥ततःअंगुष्ठयोःह्रांहृदयायनमः॥तर्जन्योःह्रींशिरसेस्वाहा॥मध्य
मयोःह्रुंशिखायैवषट्॥अनामिकयोःह्रैंकवचायहुं॥कनिष्ठयोःह्रौंनेत्रत्रयायवषट्॥करतलकरपृष्ठयोःह्रःअस्त्रायफट्॥इतिकरयोर्विन्यस्यैना
नेवमंत्रान्हृदयशिरःशिखाकवचनेत्रस्थानेषुविन्यस्यास्त्रमंत्रेणतालत्रयंदिग्बंधनंकृत्वा॥रक्तांबुजासनमशेषगुणैकसिंधुंभानुंसमस्तजगताम
धिपंभजामि॥पद्मद्वयाभयवरान्दधतंकरामाणिक्यमौलिमरुणांगरुचिंत्रिनेत्रं॥इतिसूर्यंध्यात्वास्वपुरतःपुरस्तात्मुकरणोवक्ष्यमाणप्रयोजन

तिलकाख्यमष्टाक्षरं मंत्रोक्तविधिना सांगा सावरंणं संपूज्य तदग्निकोणे तन्मंडले सांगा सावरणां ध्यात्वा संपूज्य स्वपुरतश्चतुरस्रत्रिकोणात्मकमंडलं कृत्वा श्रीसूर्यार्घ्याधारमंडलाय नमः॥ इति मंडलं संपूज्य तत्र साधारं प्रस्थजलग्राहिताम्रपात्रं निधाय सूर्यमंत्रेण शुद्धोदकेनापूर्य तिलयवसर्षपपुष्पामाककुशाग्रं गंधाक्षतरक्तपुष्पाणि रक्तचंदनं च निक्षिप्य कुशैराछाद्य तत्पात्रं करांभ्यांमादाय सूर्यमंत्रमष्टोत्तरशतं जपित्वा जानुभ्यामवनीं गतस्तत्पात्रं करांभ्यां मामस्तकमुद्धृत्य पूर्वोक्तरूपं सूर्यनिजेष्टदेवताभेदेन ध्याय ह्रांह्रींसः सग्रहराशिनक्षत्रयोगकरणपरिवृतासनसंस्थित श्रीसूर्ययेषतेर्घ॥ स्वाहा इति सूर्यायार्घं दत्वा तदर्थांबुप्लुतं सूर्यंध्यायंस्तन्मंत्रं यथाशक्ति जपित्वा सूर्यं स्तुत्वा प्रणम्य स्वपुरत· पूजापक्षे तंनिसृज्य पूजामंडपद्वारं गत्वा तत्र वक्ष्यमाणविधिना समान्यार्घं संस्थाप्य तदग्निकोनाम्रादिपात्रस्थं जलं धेनुमुद्रयामृतीकृत्य तेन जलेन वा मंडपद्वारं प्रोक्ष द्वारं स्पार्श्वसाखायोर्मध्ये ॐ विघ्नराजाय नमः॥ दक्षिणे महालक्ष्म्यै वामे शरस्वत्यै॥ पुनर्मध्ये द्वारश्रियै: द्वारस्य वामदक्षिणशाखायोः गं गणपतये· क्षं क्षेत्रपालाय० शं शंखनिवसुधाराभ्यां मां मायाशक्त्यै० विं विघ्नेश्यै० गं गंगायैभ्यं० यं यमुनायै० धं धात्रे विं विधात्रे नमः इति द्वंद्वंक्रमेण वाधः संपूज्य अग्रतः देहल्यै नमः तस्याः वामदक्षिणयो· नं नंदिने महाकालाय० इति धामपालौ संपूज्योत्तरद्वारं गत्वाऽर्घांबुनाभ्युक्ष्य प्राग्वद्विघ्नादिदेहल्यंतं संपूज्य द्वारपार्श्वयोः गणेशाय: वृषभाय· इति द्वारपालौ संपूज्य पूर्वद्वारं गत्वा तथैवाभ्युक्ष्य विघ्नादिदेहल्यंतमभ्यर्च्य द्वारपार्श्वयो· भृंगीरिटे· स्कंदाय· इति द्वारपालौ संपूज्य दक्षिणद्वारे गत्वा तथैवार्घांबुभिः अभ्युक्ष्य विघ्नादिदेहल्यंतमभ्यर्च्य द्वारपालयो· उमायै· चंडेस्वराय नमः इति द्वारपालौ संपूजयेत्॥ वैक्ष्म

105

वेनतु ॥ नंदसुनंद चंडप्रचंड वलप्रवल भद्रसुभद्राः प्रतिद्वारं द्विद्विक्रमेण पूज्या ॥ गणेशः वक्रतुंडैकदंष्ट्रमहोत्कटगजाननलंबोदरविकटवि
घ्नराजधूम्रवर्णास्तथैव पूज्या ॥ शाक्तसौरैस्तु द्वास्था अश्वमानरप्राग्वत्पूज्या इति पुनः पश्चिमद्वारं गत्वास्त्रमंत्रेण तालत्रयपूर्वकं द्वारमुद्धा
टय सर्षपाक्षतभस्मकुसुमान्यादायास्त्रमंत्रेण सप्तधाभिमंत्र्य अपक्रामंतु भूतानि पिशाचाः प्रेतगुह्यका ॥ ये चात्र निवसंत्यन्ये देवता भुवि
संस्थिता ॥ अपसर्पंतु ये भूता ये भूता भुवि संस्थिता ॥ ये भूता विघ्नकर्त्तारस्ते नश्यंतु शिवाज्ञया ॥ इत्यनेस्त्रमंत्रं पठन् नाराचमुद्रया मंडपांतः
पक्षिप्य तस्मान्निर्गतानां विघ्नसंघानां स्ववामांगसंकोचेन मार्गं दत्वास्त्रमंत्रं स्मरन् वामपार्ष्णिघातत्रयेन भौमानूर्ध्वर्द्धनालत्रयेणांतरिक्षगास्ति
मीलितदृष्ट्यवलोकनेन दिव्यान्विघ्नानुत्सार्य दक्षिणपादपुरःसरं शाक्तैर्वामपादपुरस्सरं देहलीमुल्लंघ्यांतः प्रविश्य वासशरीरमाछाद्य पंच
गव्यार्घतोयाभ्यां घंटांवादयन् मंडपाभ्यंतरं प्रोक्ष्य मंडपस्यैन्नऋतिकोणे वास्तुपुरुषाय नमः ॥ तत्रैवास्त्रधीशाय ब्रह्मणे इति संपूज्य मंडपस्ये
शानकोणे रक्तवर्णरक्तद्वादशशक्तिसहिताय श्रीदीपनाथाय नमः इति दीपनाथं संपूज्य अतितीक्ष्णमहाकायकल्पांतदहनोपम भैरवाय
नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ इति भैरवाज्ञां गृहीत्वा ॥ स्वड्गिति पठन् मंडपमध्यस्थां पूजावेदीं गत्वा शिरसि मेरुपृष्ठऋषये नमः सुतलं छंद
से नमः ॥ हृदि पृथिव्यै देवतायै नमः ॥ इति विन्यस्य पृथिवीप्रार्थने विनियोगः ॥ इति कृतांजलिरुक्त्वा ॥ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना
धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनं ॥ इति पृथिवीं प्रार्थ्य स्वासनस्थानं मूलमंत्रेण वीक्ष्यास्त्रमंत्रेण प्रोक्ष्य तेनैव मंत्रेण कुशैः स्त्रिसंता

॥शि॰चं॥
॥१०६॥

थ कवचमंत्रेणाभ्युक्ष्य त्तनत्र मृदुकादिवेदिकांताः सपूज्य नत्रैवेलाजिनकुशोत्तरं हस्तद्वयमात्रं चतुरस्रं चतुरंगुलोच्छ्रितं स्वासनमास्तीर्य
मूलमंत्रेण द्वादशधाभिमंत्रितजलेनाक्ष्य॥ ह्रीं आधारशक्तिरनिस्वासनं सं पूज्य नत्र प्राङ्मुखो दङ्मुखो वा पद्मस्वस्तीकवीरसिद्धान्यतमेना
सनेनोपविश्य आसनस्य दक्षिणाग्रकोणादि वजुस्कोणाश्च प्रादक्षिण्येन गंगणपतये नमः । ऊं दुर्गायै नमः॥ संसरस्वत्यै क्षं क्षेत्रपालायइ
ति संपूज्य गंधपुष्पाक्षतादीनि पूज्याङ्घ्याणि स्वदक्षिणभागे निधाय ह्रां ह्रूं फडिति मंत्रं स्मरन् नाति दिव्यदृष्ट्या विलोकयन् पूर्णादि वामित शुद्धोदक
पूर्णं वामभागस्थं कुंभं आमिति वामपाणिना संस्पृशन् दक्षिणकरांगुलत्रयेणाक्षौमिति कुंभस्थं जलं संस्पृश्य परं इति दीपशिखां संस्पृष्ट्वा करं प्रक्षा
ल्य कृतांजलिः॥ वामे गुरुभ्यो नमः॥ दक्षिणे गणपतये नमः॥ अग्रे श्रीमहादेवाय नमः॥ इति प्रणम्य चन्दनसुगंधपुष्पाणि स्तोमिति मंत्रेणास
्त्रमंत्रेण मर्दयित्वा करौ सुरभीकृत्य तत्पुष्पं वामकरेण स्वमूर्द्धानं परितो ऊं मिति भ्रमयित्वा घ्रायहौं अंते सर्वे विलयं यांतु ये मां हिंसंति हिंस
काः मृत्युरोगभयक्लेशाः॥ तंतु रिपुमस्तके॥ इति पठित्वास्त्रमंत्रेण नाराचमुद्रया ऐशान्यां दिशि दूरे प्रक्षिप्यास्त्रमंत्रेण पुनः करावन्योन्यं मार्जने
न संशोध्यास्त्रमंत्रेणोर्द्धनालत्रयमंगुष्ठतर्जन्युत्थशब्देन दशदिग्बंधं च कृत्वा त्रिशूलमुद्रामुद्रितो व्यन्यस्तोमणिबंधेनान्योन्यसंश्लिष्टौ क
रौ स्वमूर्द्धानं परितो स्त्रमंत्रं स्मरन् प्रादक्षिण्येन त्रिर्भ्रामयन्नग्निस्थानं चतुरस्रं वज्रलांछितं पीतवर्णं ब्रह्मदेवतं निवृत्तिकलाधिष्ठितं लं
वीजं युक्तं ध्यात्वा॥ जान्वादिनाभिपर्यंतं वायुस्थानं षट्कोणाकारं मपांस्थानमर्द्धचंद्राकारं शुक्लवर्णं भृगदैवयिपिपद्मलांछितं विष्णुदेवतं प्र

106.

॥एमः॥
॥१०६॥

तिष्ठाकलाधिष्ठितं वंवीजयुक्तं ध्यात्वा ॥ नाभ्यादिकंठपर्यंतं स्वहृत्स्थानं स्वस्तिकोपेत त्रिकोणाकारं रक्तवर्णं रुद्रदैवतं विद्याकलाधिष्ठितं रंवीज
युक्तं ध्यात्वा ॥ कंठादिभ्रूमध्यपर्यंतं वायुस्थानं षट्कोणाकारं षडिंदुलांछितं वृत्तवेष्टितं धूम्रवर्णमीश्वरदैवतं कलाधिष्ठितं यंवीजयुक्तं विचिंत्य
भ्रूमध्यादिब्रह्मरंध्रांतमाकाशस्थानं वृत्ताकारं ध्वजलांछितं धूम्रवर्णं सदाशिवदैवतं शांत्यतीतकलाधिष्ठितं हंवीजयुक्तं ध्यात्वा तत्र पंचभूतमये
देहे धर्मकंदसमुद्भूतं ज्ञाननालकमैश्वर्याष्टदलोपेतं परवैराग्यकर्णिकं स्वहृदयारविंदं विभाव्य तत्कर्णिकायां जीवात्मानमाराग्रमात्रं प्रदीपक
लिकाभासुरमनादिमलसंछिन्नपरविद्रूपं संचिंत्य प्राग्युक्तमंत्रेण मूलाधारात्कुंडलिनीमुत्थाप्य सुषुम्नावर्त्मना धारस्वाधिष्ठानमणिपूरका
नाहतांतचक्रगतवर्णवर्णाधिदेवताग्रसंतिहृदयकमलमानीय तया कवलीकृतं जीवात्मानं ध्यापन्सुषुम्नावर्त्मना विशुध्याज्ञाचक्रस्थ
वर्णवर्णाधिदेवताग्रसंतिब्रह्मरंध्रं नीत्वा तत्र स्थितसहस्रदलकमलकर्णिकामध्यवर्तीनि परमात्मज्योतिवर्णवर्णाधिदेवताकरंवसहितं जी
वात्मानं हंस इति मंत्रेण संयोज्य कुंडलीनीं स्वस्थानमानीय तत्त्वसंहारं कुर्यात् ॥ तत्र पृथ्वीस्थाने पदेंद्रियगमनक्रियागंधघ्राणपृथ्वीब्रह्मणि
वृत्तिसमानवायून् संस्मृत्य ॥ ॐ ह्रां ब्रह्मणो पृथिव्याधिपतये ॥ निवृत्तिकालात्मने हुं फट् स्वाहेति मंत्रेण तान्सर्वान्कुंडलिनीद्वारांबुपामध्ये सं
हरेत् ॥ ततोपांस्थाने हस्तादानदानव्यरसरसनाजलविष्णुप्रतिष्ठोदाना संचिंत्य ॥ ॐ विष्णवे जलधिपतये प्रतिष्ठाकलात्मने हुं फट् स्वाहेति
तान्सर्वाकुंडलीनीद्वारागवह्निरावह्नितत्त्वे संहारेत् ॥ ततो वह्निस्थाने वायुविसर्गनीयं रूपचक्षुर्वह्निरुद्रविद्याव्यानान् संस्मृत्य ॥ ॐ हुं रुद्रायते

॥शि०वं॥
॥१०७॥

जोधिपतये विद्याकलात्मने ॐ फट् स्वाहेति तान्सर्वान् वायुमंडले संहरेत् ॥ ततो वायस्थाने उपस्थानंदतद्विषयस्पर्शाख्यवाधीश्वरशांत्यपा
नानांसंस्मृत्य ॐ हैं ईश्वराय वाय्वधिपतये शांतिकलात्मने ॐ फट् स्वाहेति तान्सर्वानाकाशस्थाने संहरेत् ॥ ततआकाशस्थाने वाग्वदनवक्तव्य
शब्दस्थो आकाश सदाशिव शान्त्यतीतप्राणान्संस्मृत्य ॐ ह्रौं सदाशिवायाकाशाधिपतये शांत्यतीतकलात्मने ॐ फट् स्वाहेति तान्सर्वान् कुंडलि
न्या संहृत्य ताविंदुशक्तौ विंदुशक्तिं नादशक्तौ नादशक्तिं परशक्तौ प्रणवेन संहृत्य ॐ ह्रीं ॐ फट् स्वाहेति तां परशक्तिं पूर्वोक्तपरमात्मनि संयो
ज्यं केवलशरीरे वामकुक्षौ पापपुरुषं विचिंतयेत् ॥ तद्यथा ॥ वामकुक्षिस्थितं पापंपुरुषं कज्जलप्रभं ॥ ब्रह्महत्यांशिरस्कं च स्वर्णस्तेयभुजद्व
यं ॥ सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं ॥ तत्संसर्गपदंद्वंद्वमंगप्रत्यंगपातकं ॥ उपपातकरोमाणां रक्तश्मश्रुतिलोचनं ॥ खड्गचर्मधरं क्रु
द्धं कुक्षंपापं विचिंतयेत् ॥ इति पापपुरुषं संचिंत्य वामनासारंध्रेण वायुबीजेन संह् वायुमापूर्य नाभिस्थं षट्कोणाकारे वायुमंडले संयोज्य त
त्रयमिति वायुविजं कृष्णवर्णं संचिंत्य कुंभकेन यवीजमावर्त्तवर्त्तनं तदुद्भूतेन प्रचंडवायुना सपापपुरुषं स्वदेहं संशोष्य तं वायुं दक्षिणनासया
विरेच्य पुनर्दक्षिणनासया रंवीजेन सह वायुमापूर्य मूलाधारे संयोज्य तत्रस्थवह्निमंडले रमिति वह्निवीजं रक्तवर्णं विचिंत्य कुंभकेन रमिति वी
जमावर्त्तयंस्तदुत्थितेन महावह्निना सपापपुरुषं स्वदेहं संदह्य पापपुरुषभस्मना सहितं वायुं वामनासया विरेच्य पुनर्वामनासया वंवीजेन सह वा
युमापूर्य ब्रह्मरंध्रे संयोज्य तत्रस्थितच्चिचंडमंडले वमित्यमृतवीजं शुक्लवर्णं संचिंत्य कुंभकेन वंवीजमावर्त्तयं संन्निस्रुतामृतधारया स्वदेहभस्म

107

॥रामः॥
॥१०७॥

संमिंच्यते वायुं दक्षिणानासया विरेच्य पुनर्दक्षिणानासया लंवीजेन सह वायुमापूर्य मूलाधारस्य पार्थिवमंडले संयोज्य तत्र लमिति पृथ्वीवीजं पी
तवर्णं संचिंत्य कुंभकेन लंवीजमावर्त्तयंस्तदुद्भूतेन तेजसामृतप्लावितं भस्मधनीकृत्य तं वायुं वामनासया विरेच्य पुनर्वामनासया मायावीजेन सह
वायुमापूर्य मूलाधारस्थविंदुमध्ये मायावीजं स्फुरद्बालार्कवर्णं संचिंत्य कुंभकेन मायावीजमावर्त्तयंस्तेन करंचरणाद्यवयवसमेतं स्वदेहं निष्प
न्नं विभाव्य तं वायुं दक्षिणानासया विरचयेदिति स्थूलशरीरं निष्पाद्य सूक्ष्मशरीरंउत्पादयेदिति ॥ तद्यथा ॥ तत्र पूर्वोक्तसहस्राकरकमलस्थ
परमात्मनः सकाशात्सकलजगत्सिसृक्षया विजृंभितपरव्रह्मस्वरूपिणी परशक्तिं ॐ ह्रीं नमः इति स्वस्थानमानीय ततो नादशक्तिं ततो विंदु
शक्तिं प्रणवेन तत्स्थ विंदुशक्तेः सकाशात्सकलजगत्सृष्टिहेतुभूतां कुंडलिनीं प्रणवेन निःसार्य्य ततः ॐ ह्रौं सदाशिवायाकाशाधिपतये शांत्यती
तकलात्मने नमः इति प्राणाशांत्यतीतसदाशिवाकाशश्रोतवक्तव्यवचनवाचस्वाकाशस्थाने स्थापयेत् ॥ ततः आकाशमंडलात् ॐ ह्रूं ईश्वराय
वायवधिपतये शांत्यकलात्मने नमः इति मंत्रेणाशानशांतीश्वरवायुस्पृश्यत्वक्स्पर्शतद्विषयानंदोपस्थान्वायुस्थाने स्थापयेत् ततो वायुमंडलात्
ॐ रुद्राय तेजोधिपतये विद्याकलात्मने नमः इति मंत्रेण व्यानविद्यातेजश्चक्षुरूपवीसर्जनीयविसर्गपायुनग्निस्थाने स्थापयेत् ॥ ततोग्निमंड
लात् ॥ ॐ ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने नमः इति मंत्रेणोदानप्रतिष्ठाविष्णुजलासनारसदानव्यादानहस्तानपांस्थाने स्था
पयेत् ॥ ततो जलमंडलात् ॐ ह्रां ब्रह्मणे पृथिव्याधिपतये निवृत्तिकलात्मने नमः इति मंत्रेण समाननिवृत्तिब्रह्मपृथिवीघ्राणगंधगंतव्यागमन

क्रियायाइंद्रियाणिपृथ्विस्थानेस्थापयित्वानादशक्तिंविंदुशक्तिंपरशक्तीनोप्रणवेनस्वदेहव्याप्तिंविभाव्यतत्त्वब्रह्मरंध्रस्थपरमात्मनःस
काशाकुडलिन्याजीवात्मानंसंहृत्यवर्णावर्णाधिदेवताःस्थापयत्हृदयकमलमानीयहृदयकमलेजीवात्मानंस्थापयित्वाकुंडलिनीसुषुम्ना
मार्गेणमणिपूरकादिचक्रेषुवर्णावर्णाधिदेवताःस्थापयन्मूलाधारंनीत्वातत्रतांस्थापयेत् ॥ ततःस्वशरीरंनिरस्तकलुषंतेजोरूपंदेवताराध
नयोग्यंविभाव्यप्राणप्रतिष्ठांकुर्यात् ॥ अथप्राणप्रतिष्ठामायथा । शिरसिब्रह्मविष्णुशिवेभ्योऋषिभ्योनमः मुखेऋग्यजुसामेभ्यश्छंदोभ्यो
नमः हृदयेप्राणशक्त्यैदेवतायैनमः ॥ गुह्ये: आंबीजाय: पादयोह्रींशक्तयेनमः ॥ नाभौक्रोंकीलकायनमः ॥ इतिविन्यस्यममप्राणप्रतिष्ठाप
नार्थेविनियोगः ॥ इतिकृतांजलिर्वदेत ॥ ततः ॐ आंह्रींक्रोंकंखंगंघंङं आकाशवाय्वग्निसलिलपृथिव्यात्मने आं हृदयायनमः ॥ ॐ आंह्रींक्रों
इंचं५शब्दस्पर्शरूपरसंगंधात्मनेईंशिरसेस्वाहा ॥ ॐ आंह्रींक्रोंइंटं५श्रोत्रत्वकचक्षुर्जिह्वाघ्राणात्मनेउंशिखायैवषट् ॥ ॐ आंह्रींक्रोंतं५वा
क्पाणिपादपायूपस्थात्मनेऐंकवचायहुं ॥ ॐ आंह्रींक्रोंओंपं५वचनादानविसर्गानंदात्मनेत्रायवौषट् ॥ ॐ आंह्रींक्रोंअंयं१०मनोबुध्य
हंकारचित्तात्मनेअः अस्त्रायफट् ॥ इतिषडंगमंत्रानंगुष्ठादिकरतलांतकरयोर्विन्यस्यहृदयादिषडंगेष्वपिन्यसेत् ॥ ततोनाभ्यादिपादद्वयापां
तंआंनमः कंठादिनाभ्यंतंह्रींनमः ॥ मूर्द्धादिकंठांतंक्रोंनमः ॥ ततोहृदयकमलेवायव्यदलेयंनमः ॥ आग्नेयेइंनमः पूर्वेलं· पश्चिमेवं· ईशानेशं·
नैऋत्यषंउत्तरेसं० दक्षिणेहं· कर्णिकायांक्षंनमः इतिन्यसेत् ॥ ततोध्यानं । रक्ताब्धिपोतारुणपद्मसंस्थांपाशांकुशांविक्षुशरासवाणान्

108

शूलंकपालंदधतीकराब्जैःरक्तांत्रिनेत्रांप्रणमामिदेवीं॥ वामाङ्गुष्ठोर्ध्वयोरग्रेणतन्नदाग्रधस्थयोरन्येनतदाग्रधस्थयोरपरेइत्यायुधध्यानं॥ शरासोधनुः
इतिध्यात्वाहृदिहस्तंनिधाय॥ ॐ आंह्रींक्रोंयंरंलंवंशंषंसंहोंहंसः सोहंममप्राणाइहप्राणाः आमित्यादिममजीवइहस्थितः आमित्यादिममसर्वे
न्द्रियाणिआमित्यादिममवाङ्मनश्चक्षुश्रोत्रघ्राणप्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहा॥ ॐमितिप्राणप्रतिष्ठामंत्रंजपित्वानिजवपुर्ज्योतिर्मयंध्या
येदितिप्राणप्रतिष्ठाविधिः॥ ॥अथमातृकान्यासः॥ तत्रमातृकावर्णैःप्राणायामत्रयंकृत्वामातृकान्यासंकुर्यात्॥ तत्रैस्वरैःपूरकःका
दिभिःकुंभकोयादिभीरेचकइतिप्राणायामक्रमोज्ञेयः॥ इत्थंप्राणायामत्रयंकृत्वासिरसिब्रह्मणेऋषयेनमः॥ मुखेगायत्र्यैछंदसेनमः॥ हृदयेश्री
मातृकासरस्वत्यैदेवतायैनमः गुह्येहलोबीजेभ्योनमः पादयोस्वरेभ्य॥ शक्तिभ्योनमः॥ नाभौव्यक्त यातत्रांगुष्ठानां
सर्वांगुलीनांविहितत्वात्तथैवसंप्रदायात्षडंगमुद्राणामपिपृथक्पृथक्प्रतिपादनाच्चेति॥ अथबहिर्न्यासः॥ तत्रध्यानं॥ पंचाशद्वर्णभेदैर्वि
हितवदनदोःपादयुक्कुक्षिवक्षोदेशांभास्वत्कपर्दाकलितशशिकलाबिंदुकुंदावदातां॥ अक्षस्रक्कुंभचिंतालिखितकरकरांत्रीक्षणांपद्मसं
स्थामच्छाकल्पामतुच्छस्तनजघनभरांभारतींतांनमामि॥ चिंतालिखितंपुस्तकं॥ दक्षिणोर्ध्वकरमारभ्यदक्षिणाधःकरपर्यंतमयुधध्यानं॥ इति
पूर्वोक्तब्रह्मरंध्रस्थवर्णारविंदेमातृकासरस्वतींध्यात्वा॥ सिरसिअंनमः मुखवृत्तेआंदक्षिणनेत्रेइंवामनेत्रेई·दक्षकर्णेउं·दक्षिणनासापुटे
ऋं·वामेॠंदक्षिणगंडेलृंवामेलॄंओष्ठेएंअधरेऐंऊर्ध्वदंतेओंअधोदंतेऔंतालुमूलेअं·जिह्वाग्रेअःनम॥ दक्षिणबाहुमूलेकंमध्येखं॥ म०

Nepal Sanskrit University, Balmiki Campus, Kathmandu

णिवंगं अंगुलीमूलेघं० अंगुल्यग्रे·ङं·वाहुमूलेचं० मध्येछं·मणिवंधेजं० अंगुलीमूलेझं० अंगुल्यग्रेञं·दक्षोरुमूलेटं·जानुनिठं·गुल्फेडं·अंगु
लीमूलेढं· अंगुल्यग्रेणं·वामोरुमूलेतं·जानुनिथं·गुल्फेदं· अंगुलीमूलेधं· अग्रेनं·दक्षिणपार्श्वेपं·वामेफं·पृष्ठेवं·नाभौभं·जठरेमं·हृदयेयं·
दक्षिणांसेरं·ककुदिलं·वामांसेवं·हृदयादि·दक्षिणकराग्र·पर्यंतंसं·हृदयादिवामकराग्र·पर्यंतंषं·हृदयादिदक्षिणपादाग्रपर्यंतंसं० हृद
यादिवामपादाग्रपर्यंतंहं·हृदयादिमूर्द्धांतंक्षंनम॥ इतिकेवलमातृकान्यासः॥ अत्रकेवलेपिविंदुयुक्तत्वमक्षराणांविर्ययोजनार्थंइति
संप्रदायः॥ अथविंदुमातृकान्यासः॥ तत्रऋष्यादिकरषडंगन्यासस्तुप्रागुक्तएव॥ ध्यानंतु॥ अक्षस्रजंहरिणटंकमुदंग्रटंकं विद्याकरैरवि
रतंदधतींत्रिनेत्रां॥ अर्धेंदुमौलिमरुणामरविंदवासांवर्णेश्वरींप्रणमतस्तनभारनम्रां॥ विन्यासक्रमः॥ दक्षादूर्ध्वकरयोराद्येनतदाधस्थयोरन्य
इतिवर्णारविंदंध्यात्वापूर्वादिहृदयांतंक्षंनम॥ नाभ्यादिहृदयांतंलंवामपादाग्रादिहृदयांतंहंदक्षिणपादाग्रहृदयांतंसंइतिशिरसिअंनमः इत्यंतंसं
हारंक्रमेणयस्यवर्णस्यपस्थानंतत्रतत्रतदक्षरंन्यसेत्॥ ॥अथविसर्गमातृकान्यासः॥ तत्रऋष्यादिध्यानांतंकेवलमातृकान्यासोक्तमेव
अः नमः आः नमः इत्यादिविसर्गांतान्वर्णान्केवलमातृकान्यासस्थानेष्वेवविन्यसेत्॥ इतिसविसर्गसृष्टीमातृकान्यासः॥ अथविंदुविसर्गयु
क्तः॥ स्थितिमातृकान्यासः॥ तत्रऋष्यादिकरषडंगन्यासाः केवलमातृकान्यासवदेवध्यानंतु॥ सिंदूरकांतिममिताभरणांत्रिनेत्रंविद्याक्षसूत्रम
मिताभरणदधानं॥ पार्श्वस्थितांगवतीमपिकांवनामांध्यायेत्कराजतपुस्तकवर्णमालां॥ वामाद्यधः करयोः राद्येनदा ऊर्द्ध्वयोरन्येइत्यापुध

109

॥राम॥
॥१०९॥

ध्यानं ॥ शिवस्य ॥ देव्यास्तु वामादि इति वर्णारविंदे ध्यात्वा दक्षिणगुल्फे उं नमः ॥ अंगुल्फयेणा ॥ ॥ भोरुस्तलेनं ॥ इत्यादि हृदयादि मूर्द्धांतं क्षं नमः ॥ इत्यंतं केवलमातृकान्यासस्थानेष्वेव विन्यस्य पुनः अं नमः आं नमः इत्यादि दक्षिणजानुनि टं नमः इत्यंतं बिंदुविसर्गयुक्तान् वर्णान् केवलमातृकास्थानेष्वेव न्यसेत् ॥ इति स्थितिमातृकान्यासः अत्र पतिवानप्रस्थयोरादौ सृष्टिन्यासः ततः स्थितिः ततः संहार इति क्रमेण कार्य्यः गृहस्थेषु प्रथमं संहारस्ततः सृष्टिस्ततः स्थितिः कार्य्यः ब्रह्मचारिभिरादौ स्थितिस्ततः संहारस्ततः सृष्टिः कार्यः ॥ एवं कृते स्थित्यंततास्सृष्ट्यंततासंहारांतता च भवतीत्याहुः अत्र यथागुरूपदेशं कार्यमिति ॥ ॥ सुंदराचार्यशिष्येण श्रीनिवासेन धीमता ॥ चंद्रिकायां प्रणीतायां प्रकाशो नवमो गमत् ॥ ॥ इति श्रीसुंदराचार्यचरणारविंदद्वंद्वान्तेवासिना श्रीनिवासभट्टेन विरचितायां नवमो प्रकाशः ॥ ९ ॥

॥ ॥ अथ तारोत्यैकपंचाशत्कलामातृकान्यासः ॥ तत्र शिरसि प्रजापतये नमः मुखे गायत्रीछंदसे नमः ॥ हृदये कलारूपिण्यै मातृकासरस्वत्यै देवतायै नमः इति विन्यस्य न्यासे विनियोग इति कृतांजलिर्वदेत ॥ अं ॐ आं हृदयाय नमः ॥ इं ॐ ईं शिरसे स्वाहा ॥ उं ॐ ऊं शिखायै वषट् एं ॐ ऐं कवचाय हुं ओं ॐ औं नेत्राय वौषट् ॥ अं ॐ अः अस्त्राय फट् ॥ इति करांगन्यासः ॥ ततो ध्यानं ॥ हस्तैः पद्मं रथांगं गुणमथ हरिणं पुस्तकं वर्णमालां टंकं शुभ्रं कपालं दरममृतलसद्धेमकुंभं वहंती ॥ मुक्ताविद्युत्पयोदस्फटिकनवजपाबंधुरैः पंचवक्त्रैस्त्र्यक्षैर्वक्षोजनम्रां सकलशशिनिभां शारदां तां नमामि ॥ दरः शंखः ॥ वामोर्द्ध्वादि दक्षिणोर्ध्वपर्यंतमायुधध्यानं ॥ इति वर्णारविन्दे ध्यात्वा न्यसेत् ॥ तद्यथा ॥ ॐ आं

निवृत्त्यैनमः॥ ॐ आंप्रतिष्ठायै॰ ॐ इंविद्यायै॰ ॐ ईंशान्त्यै॰ ॐ उंइंधिकायै॰ ॐ ऊंदिपिकायै॰ ॐ ऋंरेचिकायै॰ ॐ ॠंमोचिकायै॰ ॐ ऌंपरायै॰
ॐ ॡंसूक्ष्मायै॰ ॐ एंसूक्ष्मामृतायै॰ ॐ ऐंज्ञानामृतायै॰ ॐ ओंआप्यायिन्यै॰ ॐ औंव्यापिन्यै॰ ॐ अंव्योमरूपिण्यै॰ ॐ अःअनंतायै॰ ॐ कंसृष्ट्यै॰
ॐ खंऋद्ध्यै॰ ॐ गंस्मृत्यै॰ ॐ घंमेधायै॰ ॐ ङंकान्त्यै॰ ॐ चंलक्ष्म्यै॰ ॐ छंद्युत्यै॰ ॐ जंस्थिरायै॰ ॐ झंस्थित्यै॰ ॐ ञंसिद्ध्यै॰ ॐ टंजरायै॰ ॐ ठंपालि
न्यै॰ ॐ डंशान्त्यै॰ ॐ ढंऐश्वर्यै॰ ॐ णंरत्यै॰ ॐ तंकामिन्यै॰ ॐ थंवरदायै॰ ॐ दंह्लादिन्यै॰ ॐ धंप्रीत्यै॰ ॐ नंदीर्घायै॰ ॐ पंतीक्ष्णायै॰ ॐ फंरौद्र्यै॰ ॐ
बंभयायै॰ ॐ भंनिद्रायै॰ ॐ मंतंद्रायै॰ ॐ यंक्षुधायै॰ ॐ रंक्रोधिन्यै॰ ॐ लंक्रियायै॰ ॐ वंउत्कार्यै॰ ॐ शंमृत्युरूपायै॰ ॐ षंपीतायै॰ ॐ संश्वेता
यै॰ ॐ हंअरुणायै॰ ॐ ळंअसितायै॰ ॐ क्षंअनंतायैनमः॥ इतिशुद्धमातृकान्यासस्थानेषुन्यसेत्॥ अथनादात्मनः सदाशिवात्संभूताः
स्वरकलाः श्वेताक्षस्रक्पुस्तकपाशकपालधराध्येयाः॥ कवर्गकलाअकारात्ब्रह्मणउत्पन्नाः पीताअक्षस्रक्पंकजाभयकमंडलुक
राध्येयाः॥ टतवर्गजाउकाराद्विष्णोरुत्पन्नाः श्यामाश्चभयशंखचक्रवरहस्ताध्येयाः॥ पयवर्गजाकलामकाराद्रुद्रादुत्पन्नाः शरच्चंद्रनिभा
अभयशूलकपालवरहस्ताध्येयाः॥ षादिपंचवर्णजाईश्वराद्विंदोरुत्पन्नाः॥ रक्ताभयहरिणटंकवरहस्ताध्येयाः॥ इतिनादोत्थकलामातृका
न्यास॥ ॥ अथकेशवादिमातृकान्यासः॥ तत्रसाध्यनारायणऋषिर्गायत्रीछंदः श्रीलक्ष्मीनारायणोदेवतान्यासेविनियोगः॥ इ
तिऋष्यादिकंस्मृत्वामूर्द्धादिषुप्राग्वच्चतुर्थीनमोंतान्विन्यस्य॥ अंक५आंहृदयायनमः॥ इंच५ईंशिरसेस्वाहा॥ ॐउंट५ऊंशि

110

॥राम॥
॥११०॥

रतायैवषट्॥ ऐंतंप ऐंल्कैंकवचायहुं॥ श्रौंपंपश्रौंल्कोंनेत्रायवौषट्॥ अंयं १० अल्कः अस्त्रायफट्॥ इति मंत्रै प्राग्वत्त्वङ्गन्यासं कृत्वा विभ्रा
रविंदमकुरामृतकुंभपद्मकौमोदकीदरसुदर्शनशोभिहस्तं॥ सौदामिनीमुदिरकांतिविभातिलक्ष्मीनाराएयणात्मरवरिउतमान्मूर्तै॥ वपुरिति
शेष॥ वामाद्यधःकरमाभ्यदक्षिणाधःकरपर्य्यंनं आयुधध्यानं॥ इति ध्यात्वा॥ क्लीं अंकेशवायकीर्त्यैनमः॥ क्लीं आंनारायणायकान्त्यैनमः
इवं क्लीं इंमाधवायतुष्ट्यै॥ क्लीं ईंगोविन्दायपुष्ट्यै॥ क्लीं उंविष्णवेधृत्यै॥ क्लीं ऊंमधुसूदनायशान्त्यै॥ क्लीं ऋंत्रिविक्रमायक्रियायै॥ क्लीं ॠंवाम
नायदयायै॥ क्लीं लृंश्रीधरायमेधायै॥ क्लीं ॡंहृषीकेशायहर्षायै॥ क्लीं ऐंपद्मनाभायश्रद्धायै॥ क्लीं ऐंदामोदरायलज्जायै॥ क्लीं ओंवासुदेवा
यलक्ष्म्यै॥ क्लीं औंसंकर्षणायसरस्वत्यै॥ क्लीं अंप्रद्युम्नायप्रीत्यै॥ क्लीं अःअनिरुद्धायरत्यै॥ कंचक्रिणोजयायैखंगदिनदुर्गायै॥ गंशार्ङ्गि
णेतिप्रभायै॥ घंखड्गिणेसत्यायै॥ ङंशंखिनेचण्डायै॥ चंहलिनेहरिन्यैनारापै॥ छंमुशलिनेविलासिन्यै॥ जंशूलिनेविजयायै॥ झंपाशिते
विरजायै॥ ञंअंकुशिनेविश्वायै॥ टंमुकुन्दायविनन्दायै॥ ठंनन्दजायसुनन्दायै॥ डंनन्दिनेस्मृत्यै॥ ढंनरायऋद्ध्यै॥ णंनरकजितेसमृ
द्ध्यै॥ तंहरयेशुद्ध्यैथंकृष्णायभुक्त्यै॥ दंसत्यायबुद्ध्यै॥ धंसात्वतायमत्यै॥ नंशौरयेक्षमायै॥ पंशूरायरमायै॥ फंजनार्दनायउमायै॥ बंभूधरायक्ले
दिन्यै॥ भंविश्वमूर्त्तयेक्लिन्नायै॥ मंवैकुण्ठायवसुदायै॥ यंत्वगात्मनेपुरुषोत्तमायवसुधायैरंअसृगात्मनेबलिनेपरायै॥ क्लीं लंमांसात्मनेब
लानुजायपरायणायै॥ क्लीं वंमेदात्मनेबलायनिशायै॥ क्लीं लंशक्त्यात्मनेविमलाअमोघायै॥ क्लीं क्षंपरमात्मनेनृसींहायविशुतायनमः

॥शि·त्र॥
॥१११॥

इतिकपंचाशमूर्त्तिशक्तीः केवलमातृकान्यासः ॥ ॥ अथश्रीकराठादिमातृकान्यासः ॥ तत्रश्रीदक्षिणामूर्त्तिः ऋषिर्गायत्रीछंदः ॥ श्रीअर्द्धना
रीश्वरोदेवतान्यासेविनियोगः ॥ इतिऋष्यादीन् विन्यस्यषडंगन्यासंकुर्यात् ॥ अंकंखंगंघंङं ॥ आं ह्रां हृदयायनमः ॥ इंचंछंजंझंञंईं ह्रीं शिरसेस्वा
हा ॥ उंटंठंडंढंणं ऊं ह्रूं शिखायैवषट् ॥ एंतंथंदंधंनंऐं ह्रैं कवचायहुं ॥ ओंपंफंबंभंमंऔं ह्रौं नेत्रायवौषट् ॥ अंयंरंलंवंसंषंशंहंळंक्षंअः ह्रः अस्त्रायफट्
इतिषडंगमंत्रानंगुष्ठादितलांतंविन्यस्यहृदयादिष्वपिषडंगेषुविन्यसेत् ॥ ॥ ततोध्यानं ॥ बंधूककांचननिभंरुचिराक्षमालां ॥ पाशांकुशंचवरदैर्नि
जवाहुदंडैः ॥ विभ्राणमिंदुसकलाभरणंत्रिनेत्रमर्द्धाम्बिकेशमनिशंवपुराश्रयाम ॥ दक्षाधःकरमारभ्यःवामाधःकरपर्यंतंआयुधध्यानं ॥ इतिध्या
त्वान्यसेत् ॥ तद्यथा ॥ क्लौं अं श्रीकेशायपूर्णोदर्य्यैनमः ॥ अनंतेशायविरजायै ॥ इं सूक्ष्मेशायशाल्मल्यै ॥ ईं त्रिमूर्त्तिशायलोलाक्ष्यै ॥ उं अमरे
शायवर्तुलाक्ष्यै ॥ ऊं अर्घीशायघोणायै ॥ ऋं भारभूतीशायदीर्घमुख्यै ॥ ॠं तिथीशायगोमुख्यै ॥ लृं अक्रूरेशायश्रीमुख्यै ॥ ॡं महासेनेशायविघा
मुख्यै ॥ क्लौं एं क्रोधीशायमहाकाल्यै ॥ क्लौं ऐं चंडेशायसरस्वत्यै ॥ क्लौं ओं पंचान्तकेशायसर्वार्थसिद्धिगौर्य्यै ॥ क्लौं औं शिवोत्तमेशायत्रैलोक्यविद्यायै
क्लौं अं एकरुद्रेशायमंत्रशक्त्यै ॥ क्लौं अः कूर्मेशायात्मशक्त्यै ॥ क्लौं कं एकनेत्रेशायभूतमात्रे ॥ क्लौं खं चतुराननेशायलंबोदर्य्यै ॥ क्लौं गं अजेशायवि
द्राविन्यै ॥ क्लौं ङं सर्वेशायनार्य्यै ॥ क्लौं चं सोमेशायखेचर्य्यै ॥ क्लौं छं लांगलीशायमंचर्य्यै ॥ क्लौं जं दारुकेशायरूपिण्यै ॥ क्लौं झं अर्द्धनारीशायवीरिण्यै
क्लौं ञं उमाकांतेशायकाकोदर्य्यै ॥ क्लौं टं आषाढीशायपूतनायै ॥ क्लौं ठं दंडीशायभकाल्यै ॥ क्लौं डं अत्रीशाययोगिन्यै ॥ क्लौं धं मीनेशायशंखि

111

॥ राम ॥
॥१११॥

न्यै॥ क्ष्रौं रंमेषेशाय गर्जिन्यै॥ क्ष्रौ पंलोहितेशाय कालरात्र्यै॥ क्ष्रौ फंशिखीशाय कुर्दिन्यै॥ क्ष्रौ वंछगलंडेशाय कपर्दिन्यै॥ क्ष्रौ भंद्विरण्डेश्वराय॰
वज्रायै॥ क्ष्रौ मंमहाकालेश्वराय जयायै॥ क्ष्रौ यंत्वगात्मने वालीशाय सुमुख्यै॥ क्ष्रौ रं असृगात्मने भुजंगेशाय रेवत्यै॥ क्ष्रौ लंमांसात्मने पिनाकीशा
यमाधव्यै॥ क्ष्रौ वंमेदात्मने खड्गीशाय वारुण्यै॥ क्ष्रौं शं अस्थ्यात्मने भुजंगमाय वायव्यै॥ क्ष्रौ षंमज्जात्मने श्वेतेशाय रक्षोवधारिण्यै॥ क्ष्रौ संशुक्रात्मने
भृग्वीजशाय सहजायै॥ क्ष्रौ हंप्राणात्मने नकुलीशाय महालक्ष्म्यै॥ क्ष्रौ लंशक्त्यात्मने शिवेशाय व्यापिन्यै॥ क्ष्रौं क्षंपरमात्मने संवर्त्तकेशाय महामा
यायै नमः॥ ॥ इति केवलमातृकास्थानेषु न्यसेत्॥ अत्र रुद्राः स्मृता रक्ता धृतशूलकपालकाः॥ शक्तयो रुद्रपीठस्थाः सिंदुराभरणाविग्रहाः॥ रक्तो
त्पलकपालाभ्यामलंकृत्वा करोम्बुजाः॥ इति मूर्त्तिशक्तीनां ध्यानं॥ इति श्रीकण्ठादिमातृकान्यासः॥ अथ भुवनेश्वरीमातृकान्यासः॥ तत्र शक्तिऋ
षि॰ गायत्रीछन्दः श्रीमातृकामयी भुवनेश्वरी मातृकान्यासे विनियोगः॥ इति ऋष्यादिकं स्मृत्वा चतुर्थीनमोन्तेन विन्यसेत् अं अं कं खं गं घं ङं॰ आं ह्रां हृद
याय नमः॥ इं चं छं जं झं ञं ईं ह्रीं शिरसे नमः॥ उं टं ठं डं ढं णं ऊं ह्रूं शिखायै वषट्॥ एं तं थं दं धं नं ऐं ह्रैं कवचाय हुं॥ ओं पं फं बं भं मं औं ह्रौं नेत्राय वषट्॥ अं यं रं लं
वं सं षं शं हं क्षं अः ह्रः अस्त्राय फट्॥ इति मन्त्रैः करषडंगन्यासं विधाय॥ ॥ ततो ध्यानं उद्यत्कोटिदिवाकरप्रतिभतां तुंगोरुपीनस्तनी वस्त्रार्द्धेन्दुकि
रीटिहाररसनामंजीरसंशोभिता॰ विभ्राणा करपंकजैर्जपपटीपाशांकुशौ पुस्तकं दिश्यान्नो जगदीश्वरी त्रिनयना पद्मे निषण्णा मुखं॥ दक्षाधःक
रमारभ्य वामाधःकरपर्यन्तमायुधध्यानं॥ इति वर्णारविंदे ध्यात्वा ह्रीं नमः॥ ह्रीं क्षं नमः॥ इत्यनन्तं केवलमातृकास्थानेष्वेव न्यसेत्॥ ॥ अथ॰

श्रीवीजादिन्यासः॥ तत्रभृगुऋषिर्गायत्रीछंदः मातृकास्वरूपिणीलक्ष्मीदेवतान्यासेविनियोगः॥ इतिऋष्यादिकंस्मृत्वाप्राक्तविधिनाविन्यस्य॥ अं
कंखंगंघंङं आंश्रांहृदयायनमः॥ इंचंछंजंझंञंईंह्रींशिरसेनमः॥ उंटंठंडंढंणंऊंश्रूंशिखायैवषट्॥ ऐंतंथंदंधंनंऐंश्रैंकवचायहुं॥ ओंपंफंबंभंमंओंश्रौंने
त्रायवौषट्॥ अंयंरंलंवंशंषंसंहंलंक्षंअः श्रः अस्त्रायफट्॥ इतिषडंगमंत्रैः षडंगन्यासंविधाय॥ विद्युद्दामसमप्रभांहिमगिरिप्रख्यैश्चतुर्भिर्गजैः शु
ण्डादण्डसमुद्धृतामृतघटैरासिच्यमानामिकांविभ्राणांकरांपद्मजैर्जपवटीपद्मद्वयंपुस्तकंभास्वत्कान्तसमुज्वलां॥ कुचनतांध्यायेज्जगत्स्वामिनीं॥ दक्षा
धः करमारभ्य वामाधःकरपर्यंतं आयुधध्यानं॥ इतिवर्णारविन्देध्यात्वा॥ श्रीअंनमः॥ इत्यादिमातृकास्थानेषुन्यसेत्॥ इतिवीजादिमातृकान्यास
॥ ॥ अथकामवीजादी॥ संमोहनऋषिर्गायत्रीछंदः मातृकासंमोहिनीन्यासविनियोगः॥ इतिऋष्यादिकंस्मृत्वान्यस्यप्रागुक्तविधि
नाह्रस्वदीर्घयुक्तकामवीजान्वीतैः करषडंगन्यासंविधाय॥ वालार्ककोटिरुचिरांस्फटिकाक्षमालाकोदण्डमिक्षु-नितंमरपंचवाणान् विभ्राच
हस्तकमलैर्दधती॥ त्रिनेत्राध्यायेसमस्तजननीनवचंद्रचूडां॥ वामामूर्द्धयोः पुस्तककोदण्डौदक्षोर्द्धाध॥ पंचवाणाक्षमालेइत्यायुधध्यानं॥ इतिवर्णा
रविंदेध्यात्वा॥ क्लींअंनमः इत्यादिमातृकास्थानेषुन्यसेत्॥ इतिकामवीजादिमातृकान्यास॥ अथश्रीकामवीजादी॥ तत्रसंमोहनऋषि॥ गायत्रीछं
दःमातृकामायीमहासंमोहनीदेवतान्यासेविनियोगः॥ इत्यादिऋष्यादिकंस्मृत्वाप्राग्विन्यस्य॥ अंकंखंगंघंङं आंह्रींहृदयायनमः॥ इंचंछंजं
झंञंईंश्रींशिरसेनमः॥ उंटंठंडंढंणंक्लींशिखायैवषट्॥ ऐंतंथंदंधंनंऐंह्रींकवचायहुं॥ ओंपंफंबंभंमंओंश्रींनेत्रायवौषट्॥ अंयंरंलंवंशंषंसंहं

लंक्षं अं श्रीं अस्त्राय फट् ॥ ध्यायेयमक्षवलये क्षुशागमपाशपद्मद्वयांकुशाग्रं नवपुस्तकंच ॥ आविभ्रती निजभुजैररुणांकुचार्त्तासंमोहन्नि त्रिनयनां
नवचंद्रचूडां ॥ वामाधःकरमारभ्य दक्षिणाधःकरपर्यन्तं मायुधध्यानं ॥ इतिवर्णारविन्देध्या ॥ ह्रीं श्रीं क्लीं अं नमः ॥ इत्यादिमातृकास्थानेषु न्यसेत् ॥
इति त्रिवीतादी ॥ ॥ अथ पंचयाग मातृका ॥ तत्र महागणपति प्राणायामं त्रयं कृत्वा ॥ शिरसि गणक ऋषये नमः ॥ मुखे निवृद्गायत्री छन्दसे नमः
हृदये श्रीमहागणपतये देवतायै नमः ॥ गुह्ये गं बीजाय नमः ॥ पादयोः स्वाहा शक्तये नमः ॥ प्रपंचयागांगत्वेन न्यासे विनियोग ॥ इति ऋष्यादिन्यासं
विधाय ॥ ॐ गां हृदयाय नमः ॥ श्रीं गीं शिरसे ॥ ह्रीं गुं शिखायै ॥ क्लीं गैं कवचाय ॥ ग्लौं गौं नेत्राय ॥ इति षडंगमंत्राणां गुष्ठादितलांतं करयोर्विन्यस्य हृदया
यशिरःशिखाकवचं नेत्रेषु विन्यस्यास्त्रमंत्रेण तालत्रयं कृत्वा तर्जन्यंगुष्ठ शब्दै दशदिग्बंधनं कृत्वा ॥ हस्तीन्द्राननमिंदुचूडमरुणच्छायं त्रिनेत्रंरसा
श्लिष्टं प्रियया सपद्मकरया स्वांकस्थया संततं बीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपाशोत्पलव्रीह्यग्रस्वविषाणरत्नकलशान्हस्तैर्वहन्तं भजे ॥ ग
ण्डभित्तिगलद्दानपूरलालसमानसान् ॥ द्विरेफान्वर्णनाराभ्यां वारयंतं मुहुर्मुहुः ॥ कराग्रधृतमाणिक्यकुंभवक्त्रविनिर्गत ॥ रत्नवर्षैः प्रीणयंतं सा
धकं मधुविह्वलं ॥ माणिक्यमुकुटोपेतं रत्नाभरणभूषितं ॥ युगपत्सेवितं देवैरसुरैश्च मुहुर्मुहुः ॥ वामाधःकरमारभ्य दक्षिणाधःकरपर्यन्तमायुधध्या
नं ॥ रक्तघंठं शुण्डाग्रे इति मांगं सावरणं गणपतिं ध्यात्वा ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा ॥ इति मंत्रमष्टधा जपित्वा ग
णपतीबीजस्य गणक ऋषि निवृद्गायत्री छन्दः विघ्नेश्वरो देवता प्रपंचसांगत्वेन जपे विनियोगः ॥ इति ऋष्यादिकं स्मृत्वा विन्यस्य ॥ गां गीं गूं गैं गौं गंः

॥शि·च॥
॥११३॥

तिमंत्रैः·षडंगन्यासविधाय॥सिंदूराभंत्रिनेत्रंपृथुतरजठरंहस्तपद्मैर्दधानं॥दन्तंपाशांकुशेष्टान्युरुकलविलसद्बीजपूराभिरामः॥बालेन्दुद्योतिमौ
लिकलितपरिवदनंदापूराद्रगण्डं·भोगीन्द्राबद्धभूषंभजतगर्जपतिंरक्तवस्त्रांगरागं॥वामाधःकरमारभ्यदक्षिणाधःकरपर्यंतमायुधध्यानं॥इ
ष्टवरं॥उरुकरशुन्दादन्तः॥इतिध्यात्वागमितिगणपतिंवीजंचतुस्त्रिंशद्वारंजपित्वागणानांत्वागणपतिंहवामहेइतिगणपतिवैदिकमंत्रमे
कवारंजपित्वा॥गणपतिमालामंत्रस्यगणकऋषिअमितछन्दःगणपतिदेवताइतिऋष्यादिकंस्मृत्वाविन्यस्य·ह्रींक्रौंॐनमः॥सर्वविघ्नाधि
पायसर्वार्थसिद्धिदायसर्वदुःखप्रशमनायएह्येहिभगवन्वादयस्तंभयह्रींगंगांनमःस्वाहाक्रोंह्रीं॥इतिमालामंत्रंचतुरावृत्तिजपित्वाततपूर्वोक्ता
शुद्धमातृकाऋष्यादिकरषडंगन्यासध्यानपूर्वकंवारत्रयंविन्यस्यमुखेअंआं१५आदित्यायनम॥दक्षिणवाहुमूलादग्रांतंयंसोमायनमः॥वा
मवाहुमूलादग्रांतंकंपभौमायनमः॥दक्षिणोरुमूलादिपादाग्रांतंवंपशुक्रायनमः॥वामोरुमूलादिपादाग्रांतंटंपवुधायनमःजठरेतंपवृहस्प
तयेनमः॥हृदयेपंपशनैश्चरायनमः॥इतिसप्तग्रहान्विन्यस्यप्रपंचयागमंत्रस्यब्रह्माऋषिःपरगायत्रीछन्दःसकलपदार्थानुगतपरिपूर्ण
स्वप्रकाशसच्चिदानंदपरंज्योतिपरमात्मादेवताप्रपंचयागमातृकान्यासेविनियोगः॥इतिऋष्यादिकंस्मृत्वाचतुर्थिमोन्तान्मूर्द्धादिषु
ऋष्यादिन्विन्यस्य॥ॐह्रींअंकंखंगंघंङंआंस्वाहाहृदयाय॥ॐह्रींइंचंछंजंझंञंईंसोहंशिरसे॥ॐह्रींउंटंठंडंढंणंऊंहंसः·शिखायै॥ॐह्रींएं
तंथंदंधंनंऐंह्रींकवचाय॥ॐह्रींओंपंफंवंभंमंऔंनेत्राय॥ॐह्रींअंयंरंलंवंशंषंसंहंलंक्षंअःहरिहरायअस्त्रायफट्॥इतिषडंगमंत्रैःकरषडंग·

113

॥एम:॥
॥११३॥

न्यासं कृत्वा ॥ तारादिपंचमुनिभिः परिधीयमानं मारोरंगम्पमणिसंजगदेकमूलं ॥ सच्चित्तमत्तमनस्वरमच्चनंतत्तेज·परं भजतसांकृरूपं
वुराशिं ॥ इतिसकलप्रपंचातिरिक्तः पूर्णासच्चिदानन्दोहमिति स्वात्मानं ध्यात्वा परमात्मावह्नौ तत्तन्स्थानगुणान्वर्णान्तज्जुहोमि इति धिया ॐ ह्रीं क्षं हं
सः सोह स्वाहा इत्यन्तान् सविसर्गान् केवलमातृकान्यासस्थानेष्वेवन्यसेदिति प्रपंचांगवन्यासः ॥ अथ मूलमंत्रेण प्राणायामत्रयं कृत्वा यो
गपीठन्यासं कुर्यात् ॥ तत्र प्राणायामप्रयोगः ॥ तत्र बद्धपद्मासनऋजुकायसंसमुपविश्य दक्षिणांगुष्ठेन दक्षिणनासापुटेन वायुमाकृष्यो
दरं पूरयित्वा कनिष्ठानामिकाभ्यां वामनासापुटं निरुध्य हृदि देवं ध्यायन् ॥ मूलमंत्रजपन्यावद्धक्यवायुकुंभेन कृत्वा पुनर्दक्षिणनासापुटे
न शनैः शनैस्तत्वायुस्त्यजेत् ॥ इति एकप्राणायामः ॥ [illegible] ॥ पुनर्दक्षिणनासापुटेन वायुमाकृष्य तथैव कुंभयित्वा ॥ तथैव वामनासारंध्रेण वा
युत्यजेदित्यपरः ॥ इत्यप्राणायामत्रयं कृत्वा ॥ मूलाधारे मण्डूकाय नमः ॥ स्वाधिष्ठाने कालाग्निरुद्राय नमः ॥ मणिपूरे मंलकृत्ये ॥ हृदये आ
धारशक्तौ ॥ हृदये एवं कूर्माय ॥ अनन्ताय वाराहाय पृथिव्यै सुधार्णवाय रत्नद्वीपाय· स्वर्णपर्वताय ॥ नन्दनोद्यानाय ॥ कल्पवृक्षेभ्यः ॥ विचि
त्ररत्नभूम्यै स्वर्णप्राकाराय ॥ रत्नमण्डपाय ॥ रत्नवेदिकायै ॥ रत्नसिंहासनाय इत्येतत्सर्वं तत्तत्स्थाने भावनया विन्यस्य स्वसरीरमंशद्वयोरू
कल्पितपादचतुष्टयं मुखनाभिपार्श्वद्वयकल्पितगात्रचतुष्टयरत्नसिंहासनं ध्यात्वा दक्षिणांसे धर्माय नमः ॥ वामांसे ज्ञानाय ॥ वामोसे वैः
राग्याय ॥ दक्षोसे ऐश्वर्याय ॥ मुखेऽधर्माय ॥ वामपार्श्वेऽज्ञानाय ॥ नाभौ अवैराग्याय ॥ दक्षिणपार्श्वे अनैश्वर्याय ॥ इति विन्यस्य पुनर्हृदयापे

ह्रैंमायायैनमः॥ विद्यायैनमः॥ इतिमायाविद्याओतप्रोतरूपेविचिंत्यतदुपरिसिंहासनमध्येअनन्तायपद्मायःआनन्दकन्दाय·संविन्नाला
यप्रकृतिमयपत्रेभ्योविकारमयकेसरेभ्य॥ पंचाशद्वीजाढ्यसर्वतत्त्वम ॥इतिसंपूज्य॥ वराहस्यदंष्ट्राग्रेपृथिव्यै॥ तस्यांसुधार्णवाये
तस्मिन्नवरत्नद्वीपाय॥ तन्मध्येस्वर्णपर्वताय॥ तदुपरिनन्दनोद्यानाय॥ तन्मध्येकल्पवृक्षेभ्यः॥ तेषांमध्येविचित्ररत्नभूम्यै॥ तन्मध्येस्वर्णप्राका
राय॥ तन्मध्यरत्नमण्डपाय॥ तस्यांतःस्वर्णवेदिकायैनमः॥ इतितन्त्रभावनयासंपूज्याचक्राधीरपीठसिंहासनत्वेनपरिकल्प्यतस्याग्नेयादिकोणच
तुष्टयस्थपादचतुष्टये धर्मायज्ञानायवैराग्याय·ऐश्वर्यायनमः॥ इतिप्रादक्षिण्येनपूजयेत्॥ ततःसिंहासनस्यमध्येमायायैविद्यायै॥ इतिमाया॰
विद्यापत्रस्त्वमपदिकारूपेणालोकिकदेवतांप्रोतरूपेणग्रंथितेध्यात्वासंपूज्यतदुप–रिअनन्तायनमः॥ इतितल्पाकारमनन्तंसंपूज्यतस्यमूर्द्धिपद्मा
यसंविन्नालाय·दहलेषुप्रकृतिमयपत्रेभ्योविकृतिमयकेशरेभ्यः॥ तत्कर्णिकायांपंचाशद्वर्णबीजायसर्वतत्त्वरूपायैकर्णिकायै॥ केशरेषुअंअर्क
मण्डलायकर्णिकायांउंसोममण्डलाय॥ पत्रेषुसंवह्निमण्डलाय·तथेवब्रह्मणेविष्णवेरुद्राय·तत्रमंप्रबोधात्मनेसत्वाय·रंप्रकृत्यात्मनेरजसे·त
मोहात्मनेनमसे·आंआत्मने·अंअन्तरात्मने·पंपरमात्मने॥ इतिसंपूज्य॥ रत्नसिंहासनस्यस्वाग्रादिचतुर्दिक्षुमध्येच॥ ज्ञानतत्त्वात्मनेमायातत्त्वात्म
नेविद्यातत्त्वात्मनेइतिसंपूज्य॥ तत्केशरेषुस्वाग्रादितन्त्रपीठस्यनवशक्तीःपीठमंत्रेणसमस्तपीठंसंपूज्यतन्मूलमुच्चार्यश्रीशिवादिमूर्त्तिंपरिक
ल्पयामीतिपीठमध्येशिवालिंगादिनदमावेपुष्पादिकवानिक्षिप्यध्यानोक्तमूर्त्तिविभावयन्मूलमंत्रमुच्चार्यश्रीशिवादिनमः॥ इतिकल्पितांमू

114

न्निपूजयेत्॥ ॥सुंदराचार्यशिष्येण श्रीनिवासेनधीमता।प्रणीतायांचंद्रिकायांप्रकाशोदशमोगमत्॥ ॥इतिश्रीसुंदराचार्यचरणा
विंदद्वंद्वांतेवासिनाश्रीनीवासभट्टेनविरचितायांश्रीश्रीश्रीशिवार्चनचंद्रिकायांदशमप्रकाशः॥ ॥अथपंचायतनीचेन्मध्येशिवपूजायांदे
वस्याग्नेयादिकोणचतुष्टयेसूर्यगणेशदुर्गाविष्णूनांस्थाप्यगणेशादिक्रमेणतत्तत्कल्पोक्तविधिनातत्तद्यंत्रेतत्तत्पीठपूजापुरस्सरंपृथक्पृथक्सां
गावरणांसर्वोपचारैः॥संपूज्यतत्तन्मंत्रजपस्तोत्रपाठप्रणामक्षमापनाभिःपरितोषयेत्॥एवंविष्ण्वादिषुप्रमाणोक्तप्रकारेणकोणेषुदेवताःसंस्था
प्यप्रमाणोक्तप्रकारेणायतनदेवताःपूजयेत्॥अत्रपंचायतनपूजायामपिपूज्यपूजकयोर्मध्येपूर्वदिशापरिकल्पनंतुसारेणआग्नेयादिचतुष्टयं
सकेशरंपीतशर्वर्णमूलाधारंसंचिन्त्यतन्मध्येसोमसूर्याग्निमयाकथादित्रिरेखंत्रिकोणंविभाव्यतन्मध्येसूर्यकोटिप्रतीकाशंचन्द्रकोटिसुशीतलं
जवाकुसुमप्रभंज्योतिर्लिंगंध्यात्वा॥तदुपरिचिद्रूपांतडित्कोटिप्रभांदीप्तांविशतंतुतनीयसींप्रसुप्तभुजंगीमिवसार्द्धत्रिवलयेनसर्वान्नयामीनयास्थि
तांपरब्रह्माविनाभूतांकुण्डलिनीशक्तिंचिरविभाव्यगुरूपदिष्टविधिनागुदाकुंचनपूर्वकंहुंकारेणतांकुण्डलिनीमुत्थाप्यसुषुम्नावर्त्मनामूलाधार
स्वाधिष्ठानमणिपूरकानाहतविशुद्ध्याज्ञाख्यषट्चक्रक्रमेणब्रह्मरंध्रंनीत्वातत्रस्थपरमाम्बुधौपरमात्मणिसंयोज्यशिवशक्त्यात्मकंतत्तेजोवहर
साध्वनानिःसार्यकरस्थपुष्पांजलौसंयोज्यमूलमंत्रमुच्चार्यश्रीशिवइहागच्छागच्छेतिचक्रमध्यंस्थितमूर्त्तेःशिरसिपुष्पांजलिप्रक्षेपणात्तत्तेजआ
वाहनीमुद्रयाममावाह्यतद्ब्रह्मरंध्रेणप्रविष्टंसंचिंत्यश्रीशिवरूपेणपरिणतंध्यायन्मूलमंत्रमुच्चार्यश्रीशिवइहतिष्ठतिस्थापनीमुद्रांप्रदर्श्य॥दे

वेशशक्तिमुलमसवीश्वरणासंयुतं॥ यावनत्वां पूजयिष्यामितावत्त्वं सुस्थिरो भव॥ इति प्रार्थ्य पुनर्मूलमन्त्रमुच्चार्य श्री शिव इहसंनिधेहि संनिधहीति सन्निधायनमुद्रयामनिधाय पुनर्मूलमुच्चार्य श्री शिव इति संनिरुधो भव॥ पुनर्मूलमंत्रं श्री शिव इह समुखा भव ५ इति तन्मुद्राय विधाय पुनर्मूलमंत्रं श्री शिव सकलीकृतो भवेति सकलीकृत्य धेनुमुद्राबधा देवस्य मूर्ध्नि मृतवृष्टिं ध्यायन्मूलमुच्चार्य श्री शिवअमृतीकृत्य महामुद्राबध्व॥ मूलमुच्चार्य श्रि श्री शिव परमीकृतो भवेति देवमूर्द्धि परमामृतीकृत्य ततः ऐं वदवद वाग्वादिनि ऐं क्लीं क्लीन्ने क्लेदय महाक्षोभ कुरु२ क्लीं सौ मोक्ष कुरु२ सौः स्त्रौंः इति दीपनी मकारादिक्षकारान्तां मातृकामुच्चार्यार्घोदकेन देवत्रिः प्रोक्ष्य देवस्य हृदयं स्पृशन् पूर्वोक्तप्राणप्रतिष्ठामंत्रे मयपदस्थाने श्री शिवस्येति पदं प्रक्षिप्य प्राणप्रतिष्ठामंत्रं जपन्देवस्य प्राणप्रतिष्ठां विधाय मूलमंत्रमुच्चार्य श्री शिवाय नमः इति त्रिपुष्पांजलिगयोनित्रिशूलाक्षमालावराभयमृगखट्वांगडमरुकाख्यमुद्रादशमुद्राः प्रत्येकं कामवीजेन विरच्य मूलमंत्रेण प्रदर्श्य इति मिम्नवेदिनि दप्रोक्तशमुद्राः प्रदर्श्य मूलमुच्चार्य श्री शिव एतत्ते स्थासनं नमः॥ इति वार्क्षवार्मवा स्वपोष्यं तैजसं वा यथासंभवमासनं देवस्य वामभागे विन्यस्य॥ ॐ हं हंह मिदं मिदं गृहाण स्वाहा॥ इति निवेद्य मूलमंत्रेण पद्ममुद्रां प्रदर्श्य पुनर्मूलमुच्चार्य श्री शिव एष तेर्घः स्वाहा॥ इति पूर्वस्थापितार्घपात्रे तु गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वान्वितं जलं पात्रान्तरेणोद्धृत्य देवस्य शिरसि दत्वा ॐ हं हंह मिदं मिदं मिदं गृहाण स्वाहेति निवेद्यार्घमुद्रां प्रदर्श्य मूलमुच्चार्य श्री शिवाय नमः इति पुष्पांजलिं दत्वा पुनर्मूलमुच्चार्य श्री शिव एष तत्ते पाद्यं नमः इति प्राग्वत्पात्रान्तश्यामाकदूर्वांकुरविष्णुक्रान्तान्वितं जलं पात्रान्तरेणोद्धृत्य देवस्य पादयोर्दत्वा ॐ हं हंह मित्यादिमंत्रेण प्राग्व

115

न्निवेश्य पाद्यमुद्रा प्रदर्श्य मूलमंत्रेण प्राग्वत्पुष्पांजलिं दद्यात्॥ अत्र सर्वोपचारे पुष्पोक्तमंत्रेण निवेदनं मूलमंत्रेण पुष्पांजलिप्रत्युपचारं कुर्यादिति
तत आचमनीयपात्रान् जातीफललवंगकक्कोलयुतं जलं पात्रांतरेणोद्धृत्य मूलमुच्चार्य श्रीशिव एतत्ते आचमनीयं स्वधेति देवस्य मुखकमले दत्वा प्राग्वन्नि
वेश्य मधुपर्कमुद्रां प्रदर्श्य पुष्पांजलिं कृत्वा पुनराचमनीयपात्रांत्पात्रांतरेण जलमुच्चार्य श्रीशिव एतत्ते आचमनीयं स्वधेति पुनराचमनीयं दत्वा प्राग्वन्नि
वेश्याचमनीयमुद्रां प्रदर्श्य पुष्पांजलिं दत्वा रत्नपादुके उपनीय पादुकारूढ भगवन् त्वन्निर्मितं स्नानमंडपमायाहि स्नानार्थे शक्रदिग्गतमिति प्रा
र्थ्य पूर्वस्यां विरचितं स्नानमंडपं नीत्वा प्राग्वदाचमनीयं दत्वार्घपाद्याचमनीयादि प्राग्वन्निवेश्य सुगंधतैलादिकमुपनीय मूलमुच्चार्य श्रीशिव ए॰
तत्ते सुगंधतैलाभ्यंगस्वामलकाद्युद्वर्तनस्नानादिकं नमः इति सुगंधतैल॥ अभ्यंगं सुगंधामलकाद्युद्वर्तनं च विधाय महाराजोपचारवन्नानाविधैर्जलैरभि॰
षिंच्य गंगादितीर्थादाहृतजलपूर्णकनककलशसहस्रैर्देवकन्याभिषिक्तं मत्वा प्राग्वन्निवेश्य स्नानमुद्रा प्रदर्श्य मूलेन॥ पुष्पांजलिं दत्वा प्राचमनीयं दत्वा
जलापकर्षणार्थं वस्त्रं दत्वांगप्रोक्षणं परिकल्प्य श्वेतदुकूलयुग्ममानीय वमिति वरुणबीजेनाभिमंत्रितजलेनास्त्रमंत्रेण प्रोक्ष्य बृहस्पतिदेवभ्यां वा
सोभ्यां नम इति संपूज्य मूलमुच्चार्य श्रीशिव एतत्ते वाससेनामः॥ इति वाससि परिधार्य पूर्ववन्निवेश्य वस्त्रमुद्रा प्रदर्श्य पुष्पांजलिं दत्वा पूर्ववदाचमनी
यं दत्वा स्वर्णादिनिर्मितं यज्ञोपवीतमानीय मूलमुच्चार्य श्रीशिव एतत्ते यज्ञोपवीतं नम इति यज्ञोपवीतं दत्वा प्राग्वन्निवेश्य पुष्पांजलिं दत्वा यज्ञोपवीत
मुद्रां दर्श्य प्राग्वदाचमनीयं दत्वा रत्नपादुके उपनीय पादुकायुग्ममारूह्य भगवन् त्वन्निर्मितं॥ आगच्छ निलंकारस्य मण्डपमिति दक्षिणदिग्गतं मं॰

लंकारमण्डपनीत्वानितत्रसिंहासनेउपविश्यनानाविधालंकरणानिसमुपनीयप्राग्वत्प्रोक्ष्यनादैवतेमुकुटाभरणेभ्योनमइतिसंपूज्यमूलमुच्चार्यए
तन्नेमुकुटंनमइतिनानाभरणानितत्तन्त्रान्नासमर्प्यनिवेश्याभरणमुद्राप्रदर्श्यपुष्पांजलिंदत्वातत्रपादुकेउपनीय·पादुकेपरिधायशपंचवाद्यपुरस्स
रं॥ यागमण्डपमायाहिपरिवारगणैःसह॥ इतिप्रार्थ्यप्रधानमण्डपनीत्वातत्रप्राक्कल्पितयोगपीठेदेवंसमुपविश्यतत्रछत्रचामरादिनानोपकरण
मग्रहस्तंपरिवारगणदेवतासुर्यान्किरणसमूहमिवदेवशरीरान्निर्गच्छन्स्वस्वस्थानेसमुपविश्यप्रधानदेवतासदृशाकाराभरणायुधादिशोभितंस्थिरी
भूतंस्थिरीभूतंपरितश्चक्रमध्येध्यात्वाचन्दनागुरुकर्पूरादिनानागंधमानीयप्राग्वत्प्रोक्ष्यगंधर्वदैवत्यायगंधायनमः॥ इतिसंपूज्यमूलमुच्चार्यश्रीशि
वशेषपतेगन्धेभ्योनमः॥ इतिदेवायगन्धंसमर्प्य॥ शरीरंतेनजानामिचेष्टांनैवचनैवच॥ मयानिवेदितान्गंधान्प्रतिगृह्यविलिप्यतां॥ प्राग्वन्निवेद्यगन्धमुद्रा
प्रदर्श्यतंपूजापुष्पाणिप्राग्वत्प्रोक्ष्यवनस्पतिदैवतेभ्यःपुष्पेभ्योनमः॥ इतिपुष्पाणिसंपूज्यमूलमुच्चार्यश्रीशिवइमानिवौषडितिनानाविधानिसुगन्धशु
भ्रपुष्पाणिसमर्प्यप्राग्वन्निवेद्यपुष्पमुद्रांप्रदर्श्यतंपूज्यदेवस्यहृदयादिषुषडंगन्यासस्थानेषुउंगानिलयागत्वेनसंपूज्यश्रीशिवपरिवारदेवतापूजनार्थं
अनुज्ञांदेहिइतिदेवंप्रार्थनन्तत्कस्योक्ताणावरणदेवतापूजयेत्॥ तत्रादौदेवस्यदेहेमस्तकादिषुमातृकाक्षरन्यासस्थानेषुमूलमंत्रपुटितैर्मातृकार्णैः
संपूज्यपश्चाद्वाह्यागदेवतापूजयेत्॥ इत्थमावरणदेवताःसंपूज्यतद्वाह्येदेवाग्रादारभ्यदिक्क्रमेण॥ लंइन्द्रायधिपतयेपीतवर्णायवज्रहस्तायऐरावणवा
हनायनमः॥ रंअग्नयेतेजोधिपतयेरक्तवर्णायशक्तिहस्तायमेषवाहनायनमः॥ टंमार्यप्रेताधिपतयेकृष्णवर्णायदण्डहस्तायमहिषवाहनायनमः॥ क्षंनिऋ

116

तयेरक्षोधिपतयेधूम्रवर्णायखड्गहस्तायप्रेतवाहनायनमः॥ वंवरुणायजलाधिपतयेशुक्लवर्णायपाशहस्तायमकरवाहनायनमः॥ इतिसंपूज्येन्द्राशा
नयोर्मध्ये॥ आंब्रह्मणेलोकाधिपतयेरक्तवर्णायपद्महस्तायहंसवाहनायनमः॥ नैरृतवरुणयोर्मध्ये॥ ॐअनन्तायनागाधिपतयेगौरवर्णायचक्रहस्ताय
गरुडवाहनायनमइतिपूजयेत॥ एवंविस्ताराशक्तौ॥ लंइन्द्राय॥ रंअग्नयेटंयमायनिऋतयेवंवरुणाययंवायवे॥ ॐकुवेरायहंईशानायइतिप्रादक्षि
णेनसंपूज्यन्द्राशानयोर्मध्येआंब्रह्मणेनिरृतवरुणयोर्मध्येह्रींअनन्तायइतिकुर्वीतवुध्यासंपुज्येन्द्रादीनांसमीपेॐवज्रायनमः एवंशक्तयेदण्डायख
ड्गायपाशायअंकुशायगदायैत्रिसूपद्मायचक्राय इतिलोकपालानामायुधानिचपूजयेत॥ तत्रसर्वत्रावरणपूजायांप्रथमावरणपूजान्तेमूलमन्त्रे
णदेवंसंपूज्यमूलमुच्चार्य॥ अभीष्टसिद्धिंमेदेहिशरणागतवत्सल॥ भक्त्यासमर्पयेतुभ्यंप्रथमावरणार्चनं॥ इतिदेवस्यावानरर्घ्योदकपुष्पादिकंद
द्यात्॥ एवंविततायावरणादिष्वप्यूहनीयं॥ ततोमूलमुच्चार्यसांगायसावरणायश्रीसदाशिवायनमः इतिः त्रिपुष्पाञ्जलिनासंपूज्यास्त्रमन्त्रेणधूपभा
जनंप्रोक्ष्यहृदयमन्त्रेणगन्धाभिर्धूपभाजनमभ्यर्च्यतत्रसारांनिधायवमितिधेनुमुद्रयामृतीकृत्यह्रींसुरभितेजसेस्वाहेतिगुग्गुल्वादिधूपंनिक्षिप्यासु
करैवत्याधूपायनमः॥ इतिधूपंसंपूज्यमूलमुच्चार्यवनस्पतिरसोत्पन्नोगन्धाढ्योधूपमुत्तमः॥ आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां॥ इतिधूपमुत्सृज्य
वामभागेघंटांनिधायास्त्रमन्त्रेणप्रोक्ष्यतेनैवमन्त्रेणघंटायैनमः॥ इतित्रिरभ्यर्च्यॐजयध्वनिमन्त्रमातःस्वाहेतिघंटामन्त्रेणानामभिमन्त्र्यवामकरेण
तांघंटांवादयन्॥ ॐहूंहंहषिदमिदंगृहाणस्वाहेतिमन्त्रेणानीचैर्धूपंनिवेद्यधूपभाजनंदेवस्यवामभागेनिनिवेश्यधूपमुद्रांप्रदर्श्यदेवंसंपूज्यदीपंया

हिरण्पो गो घृतं तिलस्नेहं वा निक्षिप्य तत्र कर्पूरगंभिणीं वर्त्तिं विधाय॥ ह्रौं मिति प्रक्षाल्य विष्णुदैवत्याय घृतदीपाय नमः॥ तैलदीपश्चैव तस्य नि
दैवत्याय तैलदीपाय नमः इति संपूज्य वं मिति धेनुमुद्रयामृतीकृत्य मूलमुच्चार्य॥ सुप्रकाशो महादीपः सर्वत्र तिमिरापहः॥ सबाह्याभ्यन्तरं ज्योति
र्दीपोयं प्रतिगृह्यतां॥ इत्युच्चार्य श्रीशिव एष ते दीपो नमः॥ इति दीमुत्सृज्य प्राग्वत् घण्टां वादयन् देवस्य मुखादिपादांतं दीपं प्रदर्श्य घृतदीपश्चै देवस्य
दक्षिणभागे तैलदीपश्चैदेवस्य वामभागे दीपं निवेश्य दीपमुद्रां प्रदर्श्य देवं संपूज्य प्राग्वद्देवस्य पाद्याचमनीये दत्वा स्वर्णादिपात्रे भक्ष्यभोज्यचोष्यपेया
त्मकं पंचविधमन्नं कटुलतिक्तकषायमधुरात्मकपरमोपेतं नानाविधव्यंजनसहितं नैविद्यमानीय विष्णुदैवत्याय नैविद्याय नमः॥ इति नैवेद्यं संपूज्य
देवस्य पुरतश्चतुरश्रमण्डले साधारं पात्रं निधाय मूलमुक्त्वा साविक्ष्यास्त्रमंत्रेण प्रोक्षणीयजलेन प्रोक्ष्य तेनैव मंत्रेण कुशैस्त्रिः सताडा कवचं मंत्रेणा
मुक्ष्य॥ अधोमुखदक्षिणहस्तोपरि तादृश वामहस्तं निधाय यं मिति वायुबीजेनाष्टवारमभिमंत्रयन् नैविद्यगतस्पर्शादिदोषान् शोधयित्वा पुनर्वामस्यो
परि दक्षिणकरं प्राग्वन्निधायाधोमुखवामहस्तेनाच्छादयन् रमिति वह्नीबीजमष्टवारं जपन्ग्व्या धेनुमुद्रां प्रदर्शयेत्॥ वमिति वमन बीजमष्टधा जपन्
नैविद्यममृतीकृत्यास्त्रमंत्रेण नैवीद्यस्योपरि चक्रमुद्रां दर्शयन् तत्संरक्ष्य मूलमंत्रेणाष्टवारं मपन्नभिमन्त्र्य दक्षिणहस्ते जलं गृहीत्वा॥ हेमपात्र
गतं दिव्यं परमान्नं सुसंस्कृतायं चधाषड्रसोपेतं गृहाण परमेश्वर इति नैवेद्यस्योपरि चुलुकोदकं निक्षिप्य मूलमुच्चार्य श्रीशिव एतत्ते नैवेद्यं न
मः॥ इत्युत्सृज्य कराभ्यां नत्वा मस्पृशन् पूर्वोक्तनिवेदनमंत्रेण विवेद्यपात्रान्तरे धेनुमुद्राजलममृतीकृत्य देवस्य दक्षिणहस्तेन जलं किंचि

॥राम:॥
॥११७॥

117

दत्वा अमृतोपस्तरणिमिमिस्वाहे देवभावयित्वा वामहस्तेन विकचोत्पलसन्निभाग्रासमुद्रां प्रदर्शयन् दक्षिणहस्तस्य कनिष्ठानामिकांगुष्ठयोगेन ॐ
प्राणाय स्वाहा ॥ एवं पुनस्तर्जनीमध्यमांगुष्ठयोगेन अपानाय स्वाहा · पुनर्मध्यमानामिकांगुष्ठयोगेन व्यानाय स्वाहा · पुनस्तर्जनीमध्यगुष्ठयोगेन उदा
नाय स्वाहा · पुनपंचगुलीभीः समानाय स्वाहा · इति पंचमुद्राभिः पंचग्रासान् ग्राहयित्वा स्वर्णादिपात्रे जलं धेनुमुद्रयामृतीकृत्य देवस्य दक्षिणहस्तेन
मस्ते देवदेवेश सर्वतृप्तिकरं परं ॥ अन्यानिवेदितं शुद्धं प्रकृतिस्थसुशीतलं · परमानन्दसंपूर्णं गृहाण जलमुत्तमं · इति देवस्य वामभागे जलपात्रं निवेश
यतज्जलं निवेद्यपुष्पाजमादाय ॥ सत्पात्रं सद्धविसोरखं विधिनानेन भक्षनानिवेदयामी देवेश सानुगाय जुषानतत् ॥ इति पुष्पांजलिं दत्वा स्वमंत्रेण ·
दिग्बंधनं कुर्वन्देवपरिनोयवनिकविभाव्यवमात्मकनैवेद्यं नमः ॥ इत्यंगुष्ठानामिकायोगरूपाकारद्वयेन निवेद्यमुद्रां प्रदर्श्य देवं भुजानं ध्यायन् ब्रह्मेसा
द्यैः सरसमभितः समुपविष्टैः समेतो देव्याः स्मिजवलयकारयासादरं वीक्ष्यमाणः ॥ नर्मक्रीडाप्रहसनपरो हासयन्पंक्तिभोक्तॄन् ॥ भुक्ते पात्रे कनकघटिते
षड्रसान्देवदेवः ॥ इति ध्यायन् मूलमंत्रं दशधा जपित्वा जपसमर्प्य निवेद्य नित्यहोमं कुर्यात् ॥ तत्र पूजास्थानस्येशानभागे कुण्डस्थंडिलवेदिकाद्यन्य
तमे गोमयेनोपलिप्य प्रागुक्तवीक्षणादिचतुःसंस्कारैः संस्कृते हुत्वं त्रेणाविष्णुरुडेन्द्रदेवताकाः प्रागग्रास्तिस्रो रेखा ब्रह्मयमचन्द्रदेवताका उत्तरा
ग्रास्तिस्रो रेखा कुशमूलेन विलिख्य मध्ये आवसथ्यं पूर्वे सत्यं पश्चिमे आवनी उत्तरे अन्वाहार्यं दक्षिणे गार्हपत्यमिति पंचवह्निस्थानानि संचिन्त्य कु
शांबुना त्रिणसंप्रोक्ष्य ह्रीं सर्वशक्तिकमलासनाय नमः ॥ इति योगपीठं संपूज्य तत्र भुवनेश्वरीमृतुमतीं विचिन्त्य तत्र श्रोतावाव मध्ये स्थाने शिवविजधी

यामर्य्यकान्यारीभवमग्निप्रणवेसंस्थाप्य॥ चित्पिंगलहन२दह२पच२सर्वज्ञाज्ञापयस्वाहेति मंत्रेणाकुशैर्मुखबन्धनंकृत्वाग्निप्रज्वाल्यकाष्टैः फट्‌ कृत्वा
अग्निंप्रज्वलंवन्देजातवेदहुतासनंसुवर्णवर्णममलंसमिद्धंसर्वतोमुखं॥ इतिनिष्टुरकृतांजलिरुपस्थानयोपविश्यलिंगेखुं हिरण्यायैगुदेष्वूंक
नकायैशिरसिक्षुंरक्तायैमुखेश्रूंकृष्णायैनासिकायांल्पूंसुप्रभायैनेत्रयोस्पूंअतिरक्तायैसर्वांगेष्पूंबहुरूपायैनमः॥ इतिसप्तजिह्वाविन्यस्यमहस्ता
विषिहृदयायस्वस्तिपूरनायशिरशेउतिष्ठपुरुषायैवषट्॥ धूपव्यापिनेफवचाय॥ सप्तजिह्वापनेत्राय॥ धनुर्धरायास्त्राय॥ इतिषडंगमंत्रानुगुणादितः
लांतकरयोर्विन्यस्यहृदयादिषडंगेष्वपिन्यसेत॥ ततोमूर्ध्निजातवेदसेनमः॥ वामांगेअग्नयेसप्तजिह्वायवामपार्श्वेअग्नयेहव्यवाहनायवामकरेअ
ग्नयेश्वोदरजातायलिंगेअग्नलेवैश्वानलायदक्षिणकट्यांअग्नयेकौमातेजसे॥ दक्षिणपार्श्वेअग्नयेविश्वमुखाय॥ दक्षिणांसेअग्नयेदेवमुखाय
इतिमूर्त्तीरष्टौविन्यस्यगर्भरहितेमेदिभेरग्निप्राणादिक्रमेणानुराये॥ पूर्वाग्रेश्वपश्चीर्ययहूमुखेषट्कोणविभाव्यतनमध्येषट्सुकोणेष्वमध्यादिप्रदक्षिण
नप्रागुक्तानिसंपूज्याष्टदलेषुस्वाग्यादिप्रादक्षिण्येनाष्टमूर्त्तिः प्रागुक्ताः संपूज्यचतुरस्रेदिक्पालांस्तदायुधानिसंपूज्यमध्ये॥ ॐवैश्वानलजातवेद
इहावहलोहिताक्षसर्वकर्माणिसाधयस्वाहेतिमंत्रेणाग्निंगंधादिभिः संपूज्यास्त्रमंत्रेणप्रक्षालितायामाज्यस्थाल्यामाज्यंनिक्षिप्यमूलमंत्रेणाष्टवारम
भिमंत्र्यवमितिधेनुमुद्रयामृतीकृत्यकवचंमंत्रेणप्रदीदर्भद्वयंनिक्षिप्यपुनर्दर्भान्प्रक्षाल्यास्त्रमंत्रेणघृतंप्रदक्षिणमग्नौनिक्षिप्यास्त्रमंत्रेणप्रोक्षस्वकश्च
वौतदभावेपलाशमथापत्रद्वयमश्वत्थपत्रद्वयंवाग्रहीत्वाग्नौप्रताप्यकवचंमंत्रेणदर्भैः॥ समार्ज्यपुनः प्रताप्यास्त्रमंत्रेणप्रोक्ष्यदर्भमूनिधायमार्जनद

र्भान्तद्भिः सम्मृश्याग्नौ निक्षिप्य स्रुवेणाज्यमादायाग्नये स्वाहा इत्यग्नेर्दक्षिणनेत्रे हुत्वाग्नये नमः॥ इति कुशत्यागं कुर्यात्॥ एवं चतन्नत्वाग्नेर्देशात्या[illegible]डुहनीयः
ततः पुनराज्यमादाय सोमाय स्वाहेति वह्नेर्वामनेत्रे हुत्वा पुनराज्यमादायाग्निसोमाभ्यां स्वाहेति वह्नेर्भालनेत्रे हु पुनराज्यमादायाग्नये स्विष्टकृते स्वाहेति व
ह्नेर्वक्त्रे जुहुयात्॥ ॐ भूस्वाहाग्नयेइनमः॥ ॐ भुवस्वाहा वायवे ॐ स्वः स्वाहा सूर्याय ॐ भुर्भुवः स्वस्वाहा प्रजापतये इत्याहुतिं चतुष्टयं हुत्वा वैश्वानलं जात
वेदेत्यादिश्चाग्निमंत्रेणाहुतित्रयं हुत्वाश्चाग्निर्गर्भाधानं सम्पादयामि स्वाहेत्यादि॥ गर्भाधानपुंसवनसमिनोन्तन्नयजातकर्मान्नाशनचूडाकरणोपनयसमा
वर्त्तनविवाहाख्यान्संस्कारान्पृथक्पृथगष्टाहुतिभिः हुत्वा पूर्वाक्तजिह्वादिमूर्त्यन्तदेवतानां स्तुहिरण्यायै स्वाहेत्यादि तत्तन्नामभिश्चतुर्थिस्वाहांतैरे
कामाहुतिं हुत्वा पुनर्महागणपतिमंत्रं दशधा विभज्य हुत्वा पुनः समस्तेन महागणपतिमंत्रेण चतुर्वारं जुहुयात्॥ इति संस्कृतेग्नौ देवं ध्यात्वा मूलमंत्रे(
णागंधादिभिः संपूज्य वह्निदेवतयोरैक्यं भावयन् मूलमंत्रेण स्वाहान्तेनाज्यपायसतिलतण्डुलव्रीहियवाक्तानामन्यतमेन घृतव्यतिरिक्तद्रव्ये त्रिमधुयोगव
ल घृतयोगं वा कृत्वा पंचविंशत्याहुतीर्हुत्वा हृदयाय स्वाहा॥ शिरसे शिखायै कवचाय नेत्राय अस्त्राय स्वाहेति तत्तत्कल्पोक्तैः षडंगमंत्रैः षडाहुतीर्हुत्वावा
णदेवतानां तत्तन्नाममंत्रेण स्वाहेति काकामाहुतिं हुत्वा ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा ॐ भुवो वायवे चान्तरीक्षाय च महते ॐ स्वः वरादित्याय च
दिवे च महते ॐ भुर्भुवः स्वश्चन्द्रमसे नक्षत्रेभ्यश्च दिग्भ्यश्च महते च महते च स्वाहेति चतस्र आज्याहुतीर्हुत्वा दिक्षाप्रकरणोक्तप्रकारेण प्रत्याहुत्युद्देशत्यागं
कृत्वा ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिरजाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मा

॥शि॰च॥ पेणाभवतुस्वाहेतिमंत्रेणाष्टोवाहुतीरेकांवाकृत्वावह्निंप्राग्वत्संपूज्यन्यूनातिरिक्तसिद्ध्यर्थंददामिसघृतंतिलं॥ ॐ ह्रंसांगंकुरुस्वाहेतिसघृततिलैरेकामा
॥११९॥ हुतिंकृत्वा॥ ॐ सहस्रार्चिर्मिहतेजातनमस्तेवह्निरूपधृक्सर्वाशिनेसर्वगनपावकायनमोस्तुते॥ त्वंरौद्रघोरकार्माप:घोरकर्माच॥ घोररूपानमामितेविश्व
स्त्वंलोकपालोसिसांतिममप्रयच्छमे॥ इत्यग्निंप्रार्थ्यसघृतेनस्रुचमापूर्य्यतदुपरिपुष्पंदत्वाधोमुखेस्रुवेनतन्मुखंपिधायशंखवत्सपुटाभ्यांगृहित्वात
थायमूलमंत्रेणवौषडंतेनाहुतिंकृत्वाप्रोक्षणीजलेनवह्निंप्रतिष्यंचमूलमंत्रेणतत्रदेवंसंपूज्यसंहारमुद्रयास्वहृत्पद्मन्यासयेदितिनित्यहोमविधिः॥ ॥
तत्रैवविस्तारशंकी॥ अग्न्याधानादीकंकर्मनित्यहोमविद्यते॥ इतिवशिष्ठसंहितावचनाल्लौकिकाग्नावेवदेवंध्यात्वासंपूज्यमूलमंत्रेणपंचविंशत्याहु
तीःषडंगमंत्रैश्चोक्तसंख्यंजुहुयादितिनित्यहोमंविधायपूजास्थानंगत्वास्वासनेउपविश्यमूलमंत्रेसाप्राणायामत्रयंकृत्वाऋष्यादिकरषडंगन्यासपूर्व
कंमूलमंत्रेणपुष्पांजलित्रयंदत्वापूजाचक्रस्येशानकोणेचतुरस्त्रंवृत्तत्रिकोणात्मकमण्डलंकृत्वातत्रसाधारंमव्यजनान्नोदकपूरितंताम्रादिपात्रंनिधायसर्व
भूतानिइहागछतागछतेहतिष्ठतेत्यावाह्यसर्वभूतेभ्योनमइतिपुष्पादिभिःसंपूज्य॥ शैवोडारोग्रकर्माणोरौद्रस्थाननिवासिनं॥ योगिन्योग्ररूपाश्चगणानामधि
पाश्चये॰ भूचराश्चै॰ खेचराश्चैवतथाचैवान्तरीक्षगाः तेसर्वेप्रीतिमनसोभूत्वागृह्णंत्विमंबलिं॥ इतिवामकरांगुलीभिरर्घपात्राभ्यन्तरेणाधृतजलधाराबलि ॥रामः॥
पात्रेति॰क्षिपनबलिमुत्सृज्यपुष्पांजलिमादाय॥ भूतानियानिहवसंतीभूतलेबलिंगृहीत्वाविधिवत्प्रयुक्तं॥ संतोषमासाद्यव्रजंतुतान्दत्रनमोस्तुतेभ्यः॥ इ ॥११९॥
तिपुष्पांजलिंदत्वात्वरांम्मयथासुखंविहरंतुभूतानीतिनाराचमुद्रयाविसृज्यास्त्रमंत्रेणशुद्धजलेस्वात्मानंप्रोक्ष्यदेवंतत्रध्यात्वापात्रान्तरेधेनुमुद्रयान

119

लममृतीकृत्य ञ्रुमृतापिधानमसि स्वाहेति देवं नरापोसनं दत्वा नैविशं गतसारमुद्धृत्य नैऋत्यां निवेद्यपात्रं पनिधाय गोमयाद्भिरस्त्रमंत्रेण तत्स्थानं शोधयित्वा तस्मात् किंचिच्छेषमादाय निर्माल्यभोजिने नमः ॥ इत्यैसान्यां निक्षिप्य हस्तं प्रक्षाल्य प्राग्वदाचमनीयं दत्वा सूक्ष्मवस्त्रेण पादौ हस्तौ च प्रोक्ष सुगंधचूर्णादिभिः करौ सुरभित्तौ कारयित्वा तांबूलमादाय श्रीशिव ॥ तमालदलकर्पूरपुगभागतरंगितं ॥ संशोभितं सुगंधश्च ताम्बूलं प्रतिगृह्यतां ॥ एतत्ते ताम्बूलं समर्प्य प्रागुक्तनिवेदनमंत्रेण निवेद्य मूलमंत्रमुच्चार्य ॥ सुप्रसन्नाय शिवाय नमः ॥ इति त्रिपुष्पांजलिना संपूज्य पुनर्मूलमुच्चार्य सुप्रसन्नाय शिवाय एष ते गन्धो नमः ॥ एवं गंधपुष्पदीपैराराधयेत् ॥ इति प्रसन्नमुजां कृत्वा मुकुट परिधायाथादर्शं दर्शयित्वा छत्रचामरव्यंजनादिनानाविधराजोपचारान् परिकल्प्य दुर्वाक्षतकुशजलान्यादाय मूलमुच्चार्य श्रीशिव एतत्ते नीराजनं नमः ॥ इति देवस्य मुकुटोपरि दुर्वादिकं निक्षिपेत् ॥ ततः कास्यादिकृतस्थालां च वरकमलं कृत्वा तत्र मध्ये अष्टदलेषु च पिष्टमयान्नवदीपान् कृतपूर्णान् कर्पूरगर्भवंतिसहितान्निक्षिप्य ह्रींमिति प्रज्व ॥ ल्य क्वचिच्चतुरस्रमंडले निधाय वमिति धेनुमुद्रयामृतीकृत्यास्त्रमंत्रेण च वरमुद्रया संरक्ष्य ॥ श्रीं ह्रिंग्लुं म्लुं प्लुं न्लुं ह्रीं इति वनरत्नेश्वरी विद्यया मूलमंत्रेण च पृथक् पृथगभ्यर्च्य तत्पात्रं कराभ्यामादाय मूलमुच्चरन् देवस्य चरणांतं पुनः पुनर्भ्रामयेत् ॥ नव कृत्वो नीराजयेत् ॥ इति नीराजनविधिः ॥ ॥ ततः प्रणाम्य मूलमंत्रेण प्राणायामत्रयं कृत्वा ऋष्यादिकरषडंगन्यासपूर्वकं वक्ष्यमाणविधिना प्रतिष्ठितामक्षमालां वक्ष्यमाणप्रकारेण देवं भावयन् मूलमंत्रेणाचोच्चारपूर्वकमष्टोत्तरपूर्वसहस्रं तदर्धं शतमष्टोत्तरशतं जपित्वा ॐ इति जपं समाप्य पुनः प्राणायामऋष्यादिन्यासपूर्वकं जपमालां वक्ष्यमाणविधिना शिरसि निधायार्घोदकमादाय ॥ गुह्यातिगुह्यगोप्ता त्वं गृहाण

स्मात्कृतंजपंसिद्धिर्भवतुमेदेवत्वत्प्रसादात्त्वयिस्थितेतिदेवस्यदक्षिणहस्तेगृहीतोदकदानेनजपंसमर्प्यवक्ष्यमाणप्रकारेणजपमालांसंपूज्यरहसि
निधापयेत ॥ अत्रजपमालांसंपूज्यरहसिनिधापयेत् ॥ अत्रजपमालाभावेगुलीभिर्वाजपगणकार्याइत्थंजपविधायघटावादनपूर्वकंशिवसहस्रना
मशतनामस्तोत्रादिभिर्देवंस्तुत्वाप्रदक्षिणांनमस्कारैःपरितोष्य ॥ ॐ यद्दत्तंभक्तिमात्रेणपत्रंपुष्पफलंजलं ॥ निवेदितंचनैवेद्यंतद्गृहाणानुकम्पया
आवाहननजानामिनजानामिविसर्जनं ॥ पूजांचैवनजानामित्वंगतिःपरमेश्वर ॥ कर्मणामनसावाचात्वत्तोनान्यागतिर्मम ॥ अंतश्चारेणभूतानाद्रष्टा
त्वंपरमेश्वर ॥ नाथयोनिसहस्रेषुयेषुयेषुव्रजाम्यहं ॥ तेषुच्युताभक्तिरर्चमास्तुसदात्वयि ॥ देवोदाताचभोक्तादेवःसर्वमिदंजगत् ॥ देवोजयदिसर्वत्रयोदे
वसोहमेवच ॥ इतिकृतांजलिप्रार्थ्यपुनःप्रणम्यस्वेष्टार्थनोःकृत्वार्घपात्रंसमुद्धृत्य ॥ साधुवासाधुवाकर्मयद्यदाचरितंमया ॥ तत्सर्वंभगवन्संभोगृहाण
धनपरं ॥ इतिकृतमाराधनंकिंचिदर्घोदकदानेनसमर्प्यपुनःप्राग्वदर्घंदत्वातत्पात्रंस्वस्थानेविवेश्यपुष्पांजलिमादायरश्मिरूपामहेशस्यपूजितायाः
श्चदेवताःश्रीशिवांगेवीलिनाःसंतुसर्वसुखावहाः ॥ इतिपुष्पांजलिनिक्षिप्यद्वारदेवताश्चतुरातनदेवतार्घगणावरणादेवस्यामेविलीनादितिविमा
यदेवतेनेतोरूपंविभाव्यशिवक्षमस्वेतितालत्रयंदत्वासंहारमुद्रांबध्वा ॥ ॐ गच्छगच्छपरंस्थानंपरमेश्वर ॥ यत्रब्रह्मादयोदेवानविदुष्परपरं ॥ इतिपठि
त्वातिमाल्यपुष्पेणसहतत्तेजःसमुद्धृत्याघ्रायवहन्नासाधनातत्तेजोवुल्लरंश्वनीत्वासुषुम्नामार्गेणहृदयकमलेआनीय ॥ ॐ तिष्ठतिष्ठपरमस्था
नेपरमेश्वर ॥ यत्रःब्रह्मादयःसर्वेसुरास्तिष्ठंतिमहृदि ॥ इतिस्वहृदिस्वस्थाप्ययथोक्तरूपंदेवंध्यात्वामानसैरुपचारैःसंपूज्यस्वाभेदेनध्यायन्प्राणा

120

यामंत्रयं ऋष्यादिकं षडंगन्यासान्विधाय ईशानकोणचतुरस्रवेष्टितं त्रिकोणमंडलं कृत्वा तत्र पंचायतनीविदिशान्यां निर्माल्येन संपूज्य मध्ये चण्डेश्व
राय नमः ॥ इति देवस्य निर्माल्यपुष्पादिकं निक्षिप्य नैवीद्यशेषं किंचिदादाय ॥ लेह्यचोष्यान्नवानानि तांबूलं श्रग्विलेपनं ॥ निर्माल्यभोजिने तुभ्यं ददामि श्री
शिवाज्ञया ॥ इति तत्रैव निक्षिप्य करं प्रक्षालयेत् ॥ अन्यदेवतोपासकैरपि स्वेष्टदेवतागत्वेन पूर्वोस्थापनक्रमेण गणेशादीनां निर्माल्यदेवताः पूज्याः ॥ त
तस्ताम्रादिपात्रे गन्धपुष्पान्वितजलश्चतुष्के प्रादक्षिण्येन लम्बोदराय चण्डेश्वर्यै विश्वक्सेनाय तेजश्चण्डाय इति गणेशादीनामापूर्वं सूर्याभिमुखं स्थित्वा
ॐ नमो विवस्वते तुभ्यं भास्वते विष्णुतेजसे ॥ नमः सवित्रे शुचये सर्वकर्मदायिने ॥ इति पठित्वा ॥ ह्रीं ह्रीं सयेपतेर्घः स्वाहेति सूर्यार्घं दत्वा कृतांजलिः ॥ ॐ यज्ञ
च्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने नमः ॥ सर्वं तदच्छिद्रमस्तु भास्करस्य प्रसादतः ॥ इत्थमच्छिद्रमवधार्य पूजास्थाने गत्वा पूजावशिष्टगन्धं किंचित्स्ववामकरे निधाय
तत्रार्घपात्रोदकं किंचिं क्षिप्यावलोड्य मूलमंत्रेणाष्टवारमभिमंत्रितेन जलेन स्वात्मानं प्रोक्ष्य मूलमंत्रेण निर्माल्यपुष्पं स्वशिरसि निधाय मूलेनैव करनोद
कं प्राश्य नैविद्यं शिवभक्तेभ्यो विभज्य दत्वा स्वयमपि भुक्त्वा शिवरूपः सुखविहरेत् ॥ इति नित्यपूजाविधि ॥ ॥ अत्र स्कन्दपुराणे शिवनिर्माल्यमाल्यधा
रणे नैविद्यभक्षणं च तज्ज्ञैः कर्त्तव्यं निर्माल्यधारणं तन्नैविद्यभनादेनिषेधवचनं तदशुचिपरं ॥ नाधीकारिप्रदीक्षित इति यावत् ॥ तथैव विस्तरतो नित्य
पूजां कर्तुमशक्तश्चेत् ॥ प्रातरुत्थाय श्रीगुरुं स्मृत्वा प्रणम्य शौचादिकं विधायोक्तविधिना स्नात्वा स्नानेपि विस्तराशक्तो निर्मलादिस्नानानंतरं कुंभमुद्रया
स्वशिरसि त्रिरभिषिच्योक्तविधिना त्रिपुंड्रं विधाय तत्रापि विस्तराशक्तो मूलमंत्रेणाभिमंत्रितभस्मना विधिस्योक्ताविधिना संध्यातर्पणं सूर्यार्घदाना

॥ शि॰ चं ॥
॥१२१॥

निहृत्वा तर्पणेष्वपि विस्तराशक्तौ मूलमंत्रेणाष्टविंशतिवारं देवं सन्तर्प्य सूर्यार्घदाने विस्ताराशक्तौ केवलसूर्यमंत्रेणार्घं दत्वा गृहं गत्वा प्रागुक्तविधिना पश्चिमद्वारमेव सम्पूज्य प्राग्वत्प्रविश्यासनं कल्पयित्वासनेपि विस्ताराशक्तौ ह्रीं आधारशक्तिकमलासनाय नमः॥ इत्यासनं सम्पूज्योपविश्य प्राग्वद्द्रव्याणपासाद्य भूतशुद्धिं विधाय शुद्ध्यादि विस्ताराशक्तौ प्राग्वद्धृदये जीवात्मानं हृदयमानीय प्राग्वत्प्राणप्रतिष्ठां मातृकान्यासांश्च कृत्वा समस्तमातृकान्यासकरणाशक्तौ केवलमातृकान्यासं श्रीकण्ठादिन्यासं च तत्राप्यशक्तौ केवलमातृकान्यासमेव कृत्वा प्राणायामयोगपीठन्यासपूर्वं मूलमंत्रन्यासांश्च कृत्वा ध्यानार्थस्थापनादि सर्वं प्राग्वत्समापयेत्॥ पाद्यादिपात्रस्थापनाशक्तौ अर्घपात्रं प्रोक्षणीपात्रं च संस्थाप्य प्रोक्षणीजलेनैवार्घादिकल्पयेदिति संक्षेपप्रकारः शास्त्राकुलगुरवादंवगन्तव्यः इयं संक्षेपपूजा विस्तरतः कर्तुमशक्तानामेव शक्तश्चेद्दालस्यादिना विस्तरं त्यक्त्वा संक्षेपेणाचीयनेतदादोषायभवति॥

॥ सुन्दराचार्यशिष्येण श्रीनिवासेन धीमता॥ चन्द्रिकायां प्रणीतायां प्रकाशोगाद्देशिकः॥

॥ इति श्रीसुंदराचार्यचरणारविन्दद्वंद्वांतेवासिना श्रीनिवासभट्टेन विरचितायां शिवार्चनचन्द्रिकायां एकादशः प्रकाशोध्यायः॥ ११ ॥

॥ अथ पुरश्चरणविधिः॥

॥ तत्र पुरश्चरणसंपन्नो मंत्रो हि फलदायकः॥ किं होमैः किं जपैश्चैव किं मंत्रन्यासविस्तरैः॥ रहस्यानां हि मंत्राणां यदि नस्यात्पुरस्क्रिया॥ पुरस्क्रिया हि मंत्राणां प्रधानं वीजमुच्यते॥ वीर्यहीनो यथा देही सर्वकर्मसु नक्षमः॥ पुरश्चरणहीनोपि तथा मंत्रः प्रकीर्तितः॥ इति वैशंपायनेन पुरश्चरणस्यावश्यकत्वाभिधानात् तस्यतुनीत्रनतिविधिहीनां फलं हंतितु कर्मणामिति विधिहीनानुष्ठाने निदाश्रवणात्तदनुष्ठानविधिर्विचार्य लिख्यते॥ तत्र पुरश्चरणशब्दनिरुक्तिर्वा

॥ राम: ॥
॥ १२१ ॥

121

यवीयसंहितायां॥ साधनं मूलमंत्रस्य पुरश्चरणमुच्यते॥ पुरश्चरणीयत्वाद्धि नियोगाख्यकर्मणां॥ पुरतो विनियोगस्य चरणाद्वा नथोदितंमिति॥ वि
नियोगलक्षणंतु तत्र मंत्रतंत्रप्रकाशे॥ धर्मार्थकाममोक्षाणां शास्त्रमार्गेण योजनं॥ सिद्धमंत्रस्य संप्राप्तो विनियोगो विचक्षणैः॥ पुरश्चरणपूर्वोसौ
विनियोगो विनिर्मितः॥ फलाय मंत्रसेवा या राजसेवा यथा तथा॥ चरणात्पूर्वमेवासौ पुरश्चरणमुच्यते॥ इति॥ एतेन विनियोगाख्यकर्मसामर्थ्य
जनकक्रियारैहिकामुष्मिकमंत्रात्मशुद्धिहेतुक्रिया वा पुरश्चरणमित्युक्तं॥ अत्र केचित्॥ प्राप्यैनां जपविधिरादरेण कार्यो विद्वद्भिः सकृन्न विधिर्नि
जेष्टसिध्यै॥ इति दीक्षाप्रकरणेभिधाय मध्येमध्यपि तत्तत्प्रकरणे पूजाजपहोममेवाभिधाय मंत्रेणा देवताभिस्तुतिभिरजपध्यानहोमार्चनादिभिः
इत्युपसंहारे प्रपंचसारकारैः श्रीशंकराचार्यचरणेभिधानात्॥ शारदातिलककृतापि सर्वं च पूजाजपहोमानभिधाय प्रयोगाभिधानात्॥ नाजपात्
सिध्यते मंत्रो नाहुतिश्च फलप्रदः॥ अनर्चिता हरेत्कामांस्तमात्रितयमाचरेत्॥ इति कुलप्रकाशतंत्रे वचनात्वंगत्रयात्मकं पुरश्चरणमिति वदंति
अन्येतु॥ संसारे दुःखभूयिष्ठे यदिच्छेच्छ्रेयमात्मनः॥ पंचांगोपासकेनैव मंत्रजापी सुखं व्रजेत्॥ पंचांगानि महादेवी जपहोमश्च तर्पणं॥ स्वाभिषेक
श्च विप्राणां माराधनमपीश्वरी॥ पूर्वपूर्वदशांशेन पुरश्चरणमुच्यते॥ इति कुलमूलावतारवचनात्॥ पंचांगं वदंति॥ अन्येतु॥ मूलमंत्रे दशांशः स्यादं
गमंत्रजपादिके॥ इति कपिलवचनात्॥ जपांगानां दशांशेन वर्त्तव्यः सिद्धिमिच्छता॥ इति वायवीयसंहितावचनाच्च षडंगं वदंति॥ इतरे तु॥ जपहोम
तर्पणं च स्वाभिषेकोघमर्षणं॥ सूर्यार्घ्यजलपानं च प्रणामं देवपूजनं॥ ब्राह्मणानां भोजनं च पूर्वपूर्वदशांशतः॥ दशांगोपासनं भक्त्या पुरश्चरणमुच्य

ते॥ इति सारसंग्रहवचनाद्दशांगं वदंति॥ यद्वाज्यपंचतुर्थांशं स्वाहांतं मंत्रमुच्चरन्॥ इति वैशंपायनसंहितावचनात्॥ वर्णलक्षं जपेन्मंत्रं तत्सहस्रं घ
तप्लुतैः॥ पायसान्नैः प्रजुहुयादिति सारदातिलकवचनात्॥ क्षेत्रांतरे जपस्याष्टभागहोमेन सिध्यति इति दक्षिणामूर्त्तिकल्पवचनात्॥ जुहुयान्न दशांशे
न सघृतैस्तिलतंडुलैः॥ इति सारसंग्रहवचनाच्च होमस्यानियमत्वात्॥ तर्पयेत्तद्दशांशेन सघृतेन पयोधसा॥ कुर्वीद दशांशतो होमं ततः सिद्धो भवेन्मनु
इति सनत्कुमारवचनात्॥ तर्पयेत्तावदन्येषां मनूनां कृतसंख्यया॥ तर्पणं विहितं नित्यमिति शैवागमवचनाच्च॥ तर्पणस्याप्यनियतत्वात्तत्कल्पोक्त
मेव पुरश्चरणाद्युक्तमित्यस्मात्सिद्धांतः॥ अथ जपनिर्णयः॥ तत्र वैशंपायनः॥ यस्मिंश्चानिगदे नैव मंत्रे संख्या विधीयते॥ तत्र सर्वत्र मंत्राणां संख्या
वृद्धियुगक्रमात्॥ कल्पोक्तेव कृते संख्या त्रेतायां द्विगुणा भवेत्॥ द्वापरे त्रिगुणा प्रोक्ता कलौ संख्या चतुर्गुणेति॥ रुद्रयामले॥ प्रजपेदुक्तसंख्याया चतुर्गुणं ज
पं कलाविति॥ अत्र केचिदेतेन प्रपंचसारशारदातिलकाद्युक्तजपस्यापि चतुर्गुण्यं दिना कलौ पुरश्चरणमिति वदंति तन्न॥ नारदपंचरात्रादिदर्शनात् प्रपं
चसाराद्युक्तजपश्चतुर्गुण एव॥ तथा नारदपंचरात्रे॥ मार्गशीर्षस्य मासस्य त्रिणुहान्येकमेव वा उपोष्य शुक्लद्वादश्यां मारभ्याष्टाक्षरं जपेत्॥ अष्टलक्ष
म विहितं पुरश्चरणकृद्द्विजः॥ शुक्लाकारः शुचिः स्नातो वाग्यतो विजितेंद्रियः॥ पंचसिद्धिरहस्यार्थी लक्षद्वयजपाद्भवेत्॥ ततोपि द्विगुणाभ्यासादेहि
क्यामुष्मिकी च सा॥ एवमेवात्मशुद्धिः स्यादेतावत्प्रथमे युगे॥ त्रितायां द्विगुणा प्रोक्ता द्वापरे त्रिगुणां भवेत्॥ तथा॥ कलौ चतुर्गुणा प्रोक्ता द्वात्रिंशल्लक्ष
लक्षणः॥ अदृष्टार्था मंत्रसांमुख्यकरी ऐहीकी इहलोकसुखदा॥ आमुष्मिकी स्वर्गलोकादिसुखप्रदा॥ आत्मशुद्धिस्तत्त्वज्ञानसाधनभूता सि

122

द्धिरिति ॥ एवंद्वात्रिंशल्लक्षस्तुनएवद्वात्रिंशल्लक्षमानेनसततुर्मंत्रजपेत् ॥ पुनरित्याद्यार्थंचरणोरख्युक्तंतथाज्ञानार्णवे ॥ वालाप्रकरणे ॥ वर्णलक्षं
जपेन्मंत्रंतद्दशांशंहुनेत्प्रिये ॥ इतिवालायामभिधायन्यासपूजादिकंसर्वमस्याः पूर्ववदाचरेदितिभैरव्यामितिदिष्टेलक्षत्रयजपंचतुर्गुणीकृत्य
दीक्षांप्राप्यजपेन्मंत्रंनवलक्षंजितेंद्रियः ॥ इतिभैरव्यामभिधायवालायांतावदेषावालेतिविख्यातात्रैलोक्यवशकारिणी ॥ जपपूजादिकंसर्वमस्याः
पूर्ववदाचरेत्इतिसारदारत्नातिलककृतादितिरिष्टं ॥ नवलक्षद्वादशलक्षं ॥ ततोद्वादशनत्वानिवदंत्येकेविपश्चितः ॥ इतिप्रयोगसारवचना
त् ॥ इति ॥ तथाप्रपंचसारे ॥ भैरवीप्रकरणे ॥ दीक्षांप्राप्यविशिष्टलक्षणायुजःसत्संप्रदायागुरो· लब्ध्वामनुंजपेन्मुनियतस्तत्वार्धलक्षवशी ॥ इ
तिद्वादशलक्षमुक्तं ॥ तथालक्षत्रयंजपेन्मंत्रमितिदक्षिणामूर्त्तिसंहितायामुक्तस्यत्रिपुरामंत्रस्यजपेच्चमंत्रमादित्यलक्षमिति ॥ भानुलक्षंजपेदे
नमितिचप्रपंचसारसारदातिलयोश्चतुर्गुणजपएवभिहित· तेनैकत्रनिर्णीतइतिन्यायेनसर्वत्रचतुर्गणास्वाभिहितइतिनिर्णीतंमचनतदर्थंसं
ख्यकंवापिपुरश्चकारेजितेंद्रियः ॥ इतिप्रपंचसारेर्द्धजपाभिधानविरोधइतिवाच्यं ॥ उक्तंनारदवचनेनैवास्येहिकसिद्धिपरत्वादामुष्मिकपर
त्वाद्वाविरोधाभावादिति ॥ प्रपंचसारेसमुद्रतीरेयथाद्रीश्रृंगेसमुद्रगाणांसरितांचतीरे ॥ जपेद्धिविक्तेनिजएवगेहेविष्णोगिंहेवापुरुषोत्तमस्वी ॥
समुद्रसासाक्षादेव ॥ अन्यथासर्वासामपिपरेपरयानथास्वाद्धिविशेषणावैयर्थ्यादिति ॥ मनस्वीश्रद्धावान् ॥ सनत्कुमारः ॥ तथाः समुद्रगायि
न्यास्तिरेगोष्ठेतथामुने ॥ अश्वत्थविल्वमूलेवासिंधुनीरेजलाशये ॥ पश्चिमाभिमुखेदेवगृहेवाशैलमस्तके ॥ देवःशिवः ॥ प्रत्यङ्मुखशिवस्थानेवृष

भोगविवर्जिते॥ इति कुंभसंभववचनेकवांक्यात्॥ नारदपंचरात्रे॥ गिरिगोष्ठपविस्यंदनघरण्याश्रमा हृदाः॥ देशाः पुण्याः जपस्यैते यत्रवाजायते रु
चिः॥ प्रविस्यंदः प्रस्रवणं नदीपुण्यनदितीरं॥ अरण्यपुण्यारण्यपुष्करार्बुदादिपावनं वनमीतिशारदातिलकात्॥ त्रैलोक्यसंमोहनतंत्रे॥ विल्वछायांस
मश्रित्यमूले श्वत्थस्य वा प्रिये॥ गुरोर्वा सन्निधौ गोष्ठे वृषभस्येशिवालये॥ नदीतीरे द्विसंगो वा तुलसीकानने पि वा॥ अग्निष्टदेवसान्निध्ये जपेन्मंत्रं समा
हितः॥ नदीतीरे पुण्यनदीतटे॥ अन्यनदीतीरस्य निषिद्धत्वात्॥ कपिलपंचरात्रे॥ क्षेत्रतीर्थनवारामहेमालयनदीहृदाः॥ कुटीविविक्तइत्येते देशास्सुमंत्र
सिद्धिदाः॥ वायवीयसंहितायां॥ सूर्यस्याग्नेर्गुरोरिंदोर्दीपस्य ज्वलितस्य वा॥ विप्राणां चैव देवानां सन्निधौ शस्यते जपः॥ अथवा निवसन्नत्र यचित्तं प्रसीदती
गृहे जपः समः प्रोक्तो गोष्ठे दशगुणो जपः॥ आरामे च तथारण्ये सहस्रगुण उच्यते अयुतं पर्वते पुण्ये नद्यां लक्षगुणास्मृतः॥ कोटिर्देवालये प्राहुरनंतं ममस
न्निधौ॥ मम शिवस्य॥ तथा शंखः॥ अनंतं विष्णुसंन्निधौ॥ यामले॥ म्लेछदुष्टमृगांव्यालशंकातंकविवर्जिते॥ एकांते पावने निंदारहिते भक्तिसंयुते॥ सुदे
शेधार्मिकेराष्ट्रे सुभिक्षे निरुपद्रुते॥ रम्ये भक्तजनस्थाने निवसेत्तपराश्रमे॥ राजानः शत्रिवा राजपुरुषाः प्रभावो जनाः॥ चरंति येन मार्गेण न वसेत्तत्र तत्त्ववित्॥ जी
र्णदेवालयोद्यानगृहवृक्षतलेषु च॥ नदीकूलाद्रिकूलेषु नो वसेत्॥ पुण्यक्षेत्रादिकं गत्वा कुर्याद्भूमिपरग्रहं॥ ब्रूयादमुकमंत्रस्य पुरश्चरणसिद्धये॥ मयेयं रक्ष्यते भू
मीमंत्रेमेसिध्यतामिति॥ भूमेः परिग्रहं कृत्वा परिमाणं च सर्वतः॥ नदीपर्वततोयौघैः परिमाणेन खंडितं॥ ग्रामे क्रोशमितं स्थानं नगरे तद्द्वयं स्मृतं॥ क्षीरवृक्षम
याकीलानष्टमंत्राभिमंत्रितान्॥ निखनेद्दशदिग्भागे तेषु सत्वं च पूजयेत्॥ क्षेत्रे च कीलिते मंत्री निर्विघ्नः परिभूयते॥ क्षेत्रपालादिकांस्तत्र पूजयेद्विधिवित्त

मः॥दिक्पतिभ्योवलिंदत्वाततःक्षेत्रंसमाश्रयेत्॥क्षेत्रमध्येसमाश्रित्यकूर्मचक्रंविचिंतयेत्॥कूर्मचक्रमविज्ञाययःकुर्याज्जपयज्ञकं॥तज्जपस्यफलंनास्ति
सर्वानर्थायकल्पते॥सारसंग्रहे॥कूर्मस्थितिंपरिज्ञाययोजपादिविधौस्थितः॥सप्राप्नोतिफलान्यत्रकान्यन्यथानाशमेतिच॥तस्मात्कूर्मविभागंतुविज्ञायाखि
लमाचरेत्॥सचतुर्द्धास्थितोलोकेतत्प्रकारस्तथोच्यते॥प्रथमस्तुपरःकूर्मस्ततोदेशगतस्तथा॥ग्रामगोगृहगश्चेतिसचतुर्धाव्यवस्थितः॥देशंग्रामंगृहंनाथ
नवधाविभजेत्पुनः॥प्रागादिपश्चिमांतंतुकादिमांतानिविन्यसेत्॥अक्षराण्यथयादीनितथाश्चेदलयोर्लिखेत्॥ईशेद्वयमथोमध्येस्वराणांप्रागादिविन्यसेत्॥
ईशांतांसुदिशःपश्चान्मायाक्षरतोभवेत्॥तन्मुखंपार्श्वयोःपाणीकुक्षीपादौततस्ततः॥पुच्छमेकमथोमध्येएवमेवंषडंगवान्॥मुखेसर्वार्थसिद्धिःस्यात्करयो
रल्पसिद्धिदः॥कुक्षौतुनित्यनैष्कल्यंपादयोर्नैवसिद्धिद॥पृष्ठेमृत्युस्तुनियतःपृष्ठेसर्वार्थसिद्धिदः॥तस्मात्तस्मात्सुविज्ञायकुर्यात्सर्वजपादिकं॥तंत्रराजे॥व्यं
जनंदेशकूर्मस्याद्गृहकूर्मेस्वरास्तथा॥ग्रामकूर्मेनहितयंपरकूर्मेणतुद्वयं॥नित्यंपूर्वमुखोयस्मात्तेननास्तिद्विरीरितेति॥स्वरव्यंजनयुक्तेपिदेशनामनिव्यंजन
प्राधान्यंदेशकूर्मेज्ञेयंतथाग्रामकूर्मेपिस्वरस्येति॥केवलंस्वरयुक्तेतुसर्वत्रस्वरस्यदिक्कोष्ठमुखंज्ञेयं॥देवीयामलेकुरुक्षेत्रेप्रयागेचगंगासागरसंगमे॥महाका
लेचकाश्यांचदीपस्थानंनविचिंतयेत्॥एतच्चकरचनाप्रकारःप्रयोगेवक्ष्यते॥सिद्धेश्वरीतंत्रे॥तस्मान्मुखंसमाश्रित्यसर्वकार्यंसमारभेत्॥तदभावेकरंवापिकू
र्मस्थानेसमाश्रयेत्॥कालिकोद्भवो॥स्थानसाधकयोर्नीत्वोरवित्वंपत्रविद्यते॥तदशास्त्रेनोज्ञात्वातन्नत्सकपरित्यजेत्॥अक्षशास्त्रे॥अलिस्यमथद्व
यस्योक्तंगकारेणपरस्परं॥अद्वयस्यउकारेणवकारस्यापिनेनच॥लृद्वयस्यपकारेणयंकारस्यापिऋद्वयं॥ओद्वयस्यषकारेणषकारस्योपगेनच॥ज

कारस्यटकारेणउकारस्यवकारेणतः॥उकारस्यतकारेणफकारस्यधकारतः॥ऋकारस्यतुरेफेणयकारस्यसकारतः॥अरित्वमेषांवर्णानांमन्त्रेषांमि
त्रभावना॥कूर्मचक्रेरिपुस्थानेसाधकोयत्नतस्त्यजेत्॥यथागर्गस्यवैरीस्याददहासंमनुरं॥गयामहेश्वरस्यैवभास्करोऽश्युपोजयेत्॥ऋंजुमदस्यैवका
खलंतकस्यादिपमके॥ओड्रियाणेषन्मुषस्यचोत्सुंषड्गुणकस्यच॥जपमीरंकणस्यारिखंधारेसंडुणस्यतु डाकदैवस्यनाणखंधर्माखंफजिभदतः॥
मडस्यरम्यकवैरीयत्तदत्रसमोमकः॥एवंक्रमेणसंशोध्यवैरिस्थानंत्यजेद्बुधः॥क्षेत्रसाधकमंत्राणामेकमेवाद्यमक्षरं॥यदिस्यात्तद्ध्रुवंमंत्रंसर्वसिद्धि
फलप्रदः॥अथजपमाला॥सातुद्विधा॥मातृकाक्षरमयीरुद्राक्षादीमनीमयीचेति॥तत्रप्रथमामाहसारसंग्रहे॥अकारादिक्षकारान्तैर्विन्दु
वन्मातृकाक्षरैः॥अनुलोमविलोमस्थैःक्लृप्तयावर्णमालया॥प्रत्येकंवर्णयत्रात्रामनुःक्षिप्रसिद्धिदा॥वैरिमंत्राअपिनृणांसुसिद्धायस्तुकिंपुनरिति
तत्रप्रकारमाहकुलमूलावतारे॥ब्रह्मनाडीगतानाडीक्षांतान्वर्णान्विभाव्यच॥वर्णबिन्दुयुक्तंकृत्वास्वेष्टंमंत्रंजपेत्सुधीः॥अकारादिक्षसंयोज्यतथा
कादिवक्रमात्॥क्षार्णंमेरुमथोतत्रकल्पयेज्जगदीश्वरि॥तदालिपीभवेदक्षमालार्धंशतसंख्यया॥अनयासर्वमंत्राणांजपःसर्वार्थसिद्धिदः॥क्षंकारंमे
रुसंस्थानेलकारादिविलोमतः॥एकैकांतरितंमंत्रंजपेदेवंफलप्रदमिति॥अत्राष्टोत्तरसहस्रंवाष्टोत्तरशतंवायदाजपकार्यस्तदा॥वर्गाष्टकविभेदेनजपेदष्टो
त्तरंशतं॥अक्षमालाशरद्रस्त्वेवमुख्यः॥उक्तंचशारदातिलके॥आदिक्षांतीर्णयोगिन्यांदक्षमालेतिकीर्तितेति॥ज्ञानार्णवे॥अकारप्रथमोदेविक्षकारो
न्त्यस्ततःपरं॥अक्षमालेतिविख्यातामातृकावर्णरूपिणीति॥अचवर्गाष्टकजपस्तुदिक्शतादिसंख्यावसानेकार्यः॥यदुक्तंमातृकार्णवे॥आरभ्याकारमादौ

मनसोपरिजपेन्मातृकार्णैर्वसानां धृत्वातच्चाव सानां पुनपरिचपठेदांतमेवावरोहे॥ लांतानष्टौ च वर्गास्तदनु परिजपदूपये वावसाने ह्यांतं सं
हारमुक्तपशुपतिगदितायामले मालिके यं॥ धृत्वा मेरुस्थाने त्ववसाने क्षकारं॥ कचटतपयशलास्यात्॥ तदनुदिष्टसंख्यासमाप्यनंतरं॥ अव
सानठदिष्टंशनादिसंख्यावसाने श्वावधारणे॥ द्वितीयानुसारसंग्रहे॥ अथ वक्ष्येक्षमालाया विधानं मंत्रिकाम्यया॥ पंचविंशतिभिः प्रोक्ताम
णिभीर्मुक्तिपापिनी॥ त्रिंशद्भिर्धर्मदा सप्तविंशत्वक्षैस्तु सर्वदाः॥ अभिचारकरि पंचदशभिः कल्पिता तु सा॥ चतुपंचाशदक्षैऽ सा काम्यकर्म
सु सिद्धिदाः॥ अष्टोत्तरशतैः स्मृता सर्वाभिष्टप्रदा मता॥ मणयः शंखसंभूताः प्रोक्ता लक्ष्मीप्रदायकाः॥ भुक्तिप्रदा स्फाटिकजा यमाक्षाः पुष्टिव
र्धनाः॥ भुक्तिमुक्तिप्रदा प्रोक्ता सर्वसंपत्समृद्धिकाः॥ पापापहाः कुशमयाः काम्यदाः स्वर्णरौप्यजाः॥ तथाशारदातिलके॥ रुद्राक्षमालिका
स्त्वे जपेन सुमनोरथान्॥ पद्माक्षैर्विहिता माला शत्रूणां नाशिनी मता॥ कुशग्रंथिमयी माला सर्वपापप्रणाशिनी॥ पुत्रजीवफलैः क्लृप्ता कु
रुते पुत्रसंपदं॥ निर्मिता रूप्यमणिभिः जपमालेप्सितप्रदा॥ हिरण्मयैर्विरचिता माला कामान् प्रयच्छति॥ प्रवालैर्विहिता माला प्रयच्छेत्पुष्कलं ध
नं॥ सौभाग्यं स्फाटिकी माला मौक्तिकैर्विहिता श्रियं॥ निर्मिता शंखमणिभिः कुरुते कीर्त्तिकं च[illegible]॥ ॥ सर्वैरेतैर्विरचिता माला स्यान्मुक्त
ये नृणां॥ मिश्रेणानुनिषेधमाह॥ उत्तरातंत्रे॥ इंद्राक्षैर्यदि जपेतं रुद्राक्षैः स्फटिकैस्तथा॥ नान्यमध्ये प्रयोक्तव्यं पुत्रजीवादिकं च यत्॥ पद्मः
त्यक्षप्रपूजात मालायां जपकर्मणी॥ तस्य कामं च मोक्षं चनददाति प्रियंकरी॥ जन्मांतरे जायते सो वेदवेदांगपारगाः॥ मिश्रीभावं तता यातिवा

डालैः पापकर्मभिः ॥ इति ब्रह्मयामले ॥ खड्गशृंगस्य या माला पितॄणां मोक्षदायिनी ॥ निशा दार्वी कृता वश्ये लाक्षया ज्वलकर्मणी ॥ अर्कस्योच्चाटने भार्या
श्रीफलैर्ज्ञानसाधने ॥ गजदंतसमणिभिः कुर्यात्सर्वार्थदायिनी ॥ राजती सर्ववश्येषु मोहने ताम्रजा स्मृता ॥ मारणो वायसी प्रोक्तेति ॥ श्रीफलैः विल्वकाष्ठजैः
विल्वशांडिल्यसंज्ञे लूषसापूरश्रीफलाववीति कोशात् ॥ सारसंग्रहे ॥ सा पुनस्त्रिविधा प्रोक्ता सात्विकी राजसी तथा ॥ तामसी वेति ता स्वाध्याशनैरक्षोत्तरैः शु(
भैः ॥ मणिभिः शंखसंभूतैः श्वेतपद्मसमुद्भवैः ॥ बीजैर्रुद्राक्षफलैः पुत्रजीवे रजतसंभवैः ॥ श्वेतचन्दनसंभूतैः रत्नैः श्वेतसमुद्भवैः ॥ कुशग्रंथिभवैः क्लृप्ता राजसी
चतुरांतरैः ॥ पंचाशद्भीरक्षपद्मबीजैरारक्तचंदनैः ॥ सौवर्णैरक्तनहृज्जैः पीतसारसमुद्भवैः पद्मकाष्ठसमुद्भूतैः रजनीकाष्ठसंभवैः देवदारुसमुद्भूतैः ॥ मणीभिष्टा मसी
वा सा त्रिंशद्भिर्मणिभिः कृता ॥ सा शमीनिंबनिवारखडुंदुभडुसमुद्भवैः ॥ कपिशार्दूलऋक्षाणां जंतूनामस्थिसंभवैः ॥ नराश्वरासभेभाणां स्नायुभिर्ग्रथितैरपि ॥ तन्त्र
त्कार्यविभेदेन सा सा कार्या विपश्चिता इति ॥ कुशग्रंथिमाला तु ब्राह्मणानामेव ॥ कुशग्रंथ्या जपेद्विप्रस्तु वर्णामणिभिर्नृपः ॥ पुत्रजीवैर्जपेद्वैश्यः पद्माक्षैः सर्वस्
व च ॥ इति ॥ नारदवचनात् ॥ गोपालेस्य तु पद्माक्षमतीवप्रशस्तं ॥ गोतमेन तन्त्राच्च विधानात् ॥ तथा ॥ समाहितमना भूत्वा पद्मविक्ष्याजाक्षमालया ॥ जपेदिति
नारदपंचरात्रेपि ॥ जपस्य गणनां प्राहुः पद्माक्षैर्मक्तिवर्मनैः ॥ इति ॥ वैष्णवानामपि रुद्राक्षमाला नीवप्रशस्ता यस्तु भागवतो भूत्वेत्युपक्रम्य रुद्राक्षे श्वान्नमाविति
वराहवचनात् ॥ अथ जपमालायाः संस्कारः ॥ तत्र योगिनीतंत्रे ॥ द्वादश्यां वैष्णवी माला कर्तव्या साधकोत्तमैः ॥ मंत्रज्ञैर्विष्णुमंत्रेण दिव्यभागे प्रयत्नतः ॥ दिव्यभागे पू
र्वान्हे ॥ शक्तीनामपि कर्तव्या भ्रस्कारात्रौ यथाविधि ॥ भौजं तु दिवसे एव ॥ अष्टम्यां च नवम्यां च चतुर्दश्यां तथैव च ॥ त्रयोदश्यां तथा कुर्यात् दिवसापि महेश्वरी

चतुर्थीगणनाथस्य मध्याह्ने भास्करस्य तु॥ पूर्वाह्णे देविकर्त्तव्या सप्तम्यो जगदीश्वरीति॥ अथसूत्राणि तत्रैव॥ पत्तसूत्रकृतामाला देव्याप्रीतिकरीसदा॥ का
र्पासैः वैष्णवीमाला पद्मसूत्रैरथापिवा उर्णाभिर्वाल्कलैर्वापि शैवीमाला प्रकीर्त्तिता॥ कार्पासंसूत्रेरन्येषां विदध्याज्जपमालिकां॥ कार्पाससूत्रे विशेषस्तत्रै
व॥ ततोद्विजेन्द्रपुणपत्नीनिर्मितं ग्रंथिवर्जितं॥ त्रिगुणंत्रिगुणीकृत्य सूत्रंप्रक्षाल्य यत्नतः॥ कालोत्तरे॥ स्कंद उवाच॥ देवदेव महादेव सृष्टिस्थितिलये
श्वर॥ रुद्राक्षेर्जपमाला तु कथं कार्या महेश्वर॥ संस्काराश्च कथं तान कर्त्तव्यः कीदृशं फलं॥ ॥ईश्वर उवाच॥ शृणुषण्मुख वक्ष्यामि रुद्राक्षैः क्रीयते य
था॥ जपमालाविधानेन यतनसा जपसिद्धिदा॥ एकवक्त्रैर्द्विवक्त्रैःश्चचतुर्वक्त्रैश्च पंचभिः॥ षड्वक्त्रैर्वाथ कर्त्तव्या मिथोमिश्रां स्तुवर्जयेत॥ मुखेमुखंतु
कर्त्तव्यं मूलमूले विसर्जयेत्॥ रुद्राक्षसेन्नतं प्रोक्तं मुखं पृष्ठंतु निम्नकं॥ धात्रीफलप्रमाणेन श्रेष्ठमेतदुदाहृतं॥ वदरांउप्रमाणेन वणकान्मध्यमाधमैः
उर्ध्वचक्रंतु मेर्वाख्यं कर्त्तव्यं तत्र लंघयेत्॥ नवत्रितं तु नाचैनकुथनीयमसंस्पृशन्॥ अस्पर्शस्त्वन्योन्यस्य॥ उत्तरतत्रे एको मरुस्तत्र देयः सर्वेभ्यः स्थूलसंभ
व॥ आद्यं स्थूलं ततस्मान्न्यूनं न्यूनतरं तथा॥ विन्यसेत्क्रमतस्मासर्वाकारावसायत॥ ब्रह्मग्रंथियुतं कार्यं प्रतिबीजं यथाविधि॥ अथवा ग्रंथिरहितं दृढरज्जु
समचितं॥ त्रिगुणीकृत्याथ मध्येनैवार्द्धकृत्यां तदेहकृत्यांतदेशतः ग्रंथिप्रदक्षिणावर्त्तः सब्रह्मग्रंथिसंज्ञितः॥ तथा कालोत्तरे॥ एकभक्तो विधायाथ यत्न ऽऽऽऽऽऽ
स्वयं॥ कृतनित्यक्रियः शुद्धः उक्तेष्वक्षेषु मंत्रवित्॥ यथालाभेनथालाभमक्षाण्यानीय यत्नतः॥ यत्नतःचक्रमोकर्षकरणपत्रयुक्तः॥ अन्योन्यस्थूलरूपाणि
नातिस्थूलकषाणि च॥ कीटादिभिरदुष्टानि नजीर्णानि नवानि च॥ गव्यैस्तु पंचभिस्तानि प्रक्षाल्य तु पृथक्पृथक्॥ आदौ पूर्वदिने अक्षान्रुद्राक्षान्

यथाकामं वक्त्रभेदेन फलभेदश्रवणात्॥ शक्तिव्यतिरिक्तमेकभक्तस्तेयं॥ पंचगव्यं तु नृसिंहपुराणे॥ दुग्धं कांचनवर्णाया श्वेतायाश्चैव गोमयं॥ गोमूत्रं ता ३३
म्रवर्णाया नीलायाश्च भवेद्दधि॥ घृतं वै कृष्णवर्णाया इत्येतत्पंचगव्यकं॥ गवां वर्णसुलभाः संति देशेषु यत्र च॥ तत्र वर्णविभागेन पंचगव्यानि चाहरेत् ३३
वर्णालाभे न दोषोस्ति मात्राहीनं तु वर्जयेत्॥ गोशकृद्द्विगुणं मूत्रं सर्पिर्दध्याच्चतुर्गुणं॥ क्षीरमष्टगुणं प्रोक्तं पंचगव्ये तथा दधि॥ गायत्र्यादाय गोमूत्रं गं ३३
धद्वारेति गोमयं॥ आप्यायस्वेति च क्षीरं दधिक्राव्णस्तथा दधि॥ तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकमिति॥ प्रक्षाल्य तु कं विधृणाति स्वयमेव ३३
सद्योजातेति मंत्रेण प्रक्षालयेत्पंचगव्यके॥ पंचगव्यैर्जलैश्च प्रक्षालयेत्पंचगव्येन सद्योजातेन सजलैः इति तत्वसारवचनात्॥ चंदनागुरुगंधाद्यैर्वामदेवेन घर्ष
येत्॥ धूपयेदघोरेण कृष्णागुरुसगुग्गुलैः॥ तत्पुरुषाख्यमंत्रेण लेपयेच्चंदनादिभिः॥ आदिति आदिपदेन कर्पूरकस्तूरीकुंकुमादि गृह्यते॥ मंत्रयेत्पंचमे
नैव प्रत्येकं तु शतं शतं॥ मेरुं च पंचमेनैव तथा घोरेण मंत्रवित्॥ शैवागमे॥ अश्वत्थपत्रनवकैः पद्माकारेण कल्पयेत्॥ सूत्रं मणींश्च गंधाद्भिः क्षालितांस्तत्र
निक्षिपेत्॥ तारं शक्तिं मातृकां च सूत्रे रुद्राक्षकेषु च॥ विन्यस्य पूजयेदाज्ये जुहुयाच्च वशक्तितः॥ मणिमेकैकमादाय सूत्रेण तु योजयेत्॥ गोपुच्छसदृशीका
र्यास्त्वकाग्रा वा समे रुका॥ एकाग्रा समया या॥ रुद्राक्षं दर्शयित्वा प्रत्येकं पूजयेत्क्रमात्॥ ग्रंथितं पंचभिर्मंत्रैः पूर्ववच्च यथा शिवे॥ मंत्रैः सद्योजातादिभिः होमेऽ
प्येभिरेव मंत्रैः पूजाहोमयोरेकमंत्रस्यावश्यकत्वात् मुद्राङ्कं कृत्वावाहनादि अनंतरं पूजाभिधानात्॥ अन्यमणिष्वप्ययं संस्कारः॥ इति वंदनि॥ तदज्ञानवि
ज्ञंभितः॥ रुद्राक्षाणामयं प्रोक्तः संस्कारः श्रुतिचोदितः॥ इतरेषु तु तत्रोक्तः कर्तव्यो गृहसाधकैः॥ इति कालोत्तरवचनादेव॥ अथ रुद्राक्षमाहात्म्यमानऽ

पन्निमुखभेदात्कल्पनिव नाना पुराणेषु॥ तत्र स्कंदपुराणे॥ त्रिपुरो नाम दैत्यस्तु पुरासीदतिदुर्जयः॥ जितास्तेन सुराः सर्वे ब्रह्मविष्ण्वीडदेवताः॥ त्रिपुरस्य
वधार्थाय देवानां प्रार्थनाय च॥ लोकानां भयनाशाय कर्तुर्धर्मप्रवृत्तये॥ सर्वदेवमयं दिव्यं ज्वलितं घोररूपकं॥ चिंतितं स्यान्मया पूर्व अघोरास्त्रमनुत्तमं नष्ट
यातस्य भार्यायास्तावशाव दह्यते॥ दिव्यवर्षसहस्राणि चक्षुरुन्मीलितं मया॥ पुटाभ्यामस्तुलाक्षीभ्यां पतिता जलबिंदवः॥ तत्राश्रुबिंदवो जाता महारुद्रा
क्षवृक्षकाः॥ स्थावरत्वमनुप्राप्य भक्तानुग्रहकारणात्॥ फलंती सर्वकाले हिच्छिन्नविछिन्नफलप्रदाः॥ वाशिष्टलैंगे॥ ब्रह्मेंद्रमुखसकलामररक्षणा
र्थं शंभो पुरासुरविमर्दनकृत्यकाले॥ तत्त्रैपुरंक्षणनिरोध॥ भवाब्धिवारी रुद्राक्षनिकराणि तदा बभूवुः॥ रुद्राक्षान्कंठदेशे दशनपरिमितान्मस्तके विं
शति द्वे षट् द्वे कर्णप्रदेशे करयुगललतान्द्वादश द्वादशेव॥ बाह्वोरिंदोः कलाभिः पृथगिति गदितं चैकमेकं शिखायां वक्षः स्वष्टादिकं यः स्वयं नील
कंठः॥ रुद्राक्षबीजमिति ये प्रविधारयंति हस्ते च मूर्ध्नि तथोरसि भूमीभागे॥ तेषां न संति सदृशा यमपत्तने च पद्मासनेंद्रसुरकिन्नरपट्टणेषु॥ शिरोमा
लाश्च षट्त्रिंशद्वात्रिंशत्कंठमालिका॥ कूर्परे षोडश प्रोक्ता द्वात्रिंशन्मणिबंधयोः॥ अष्टोत्तरशतेनैवं सूत्रमुपवीतं विधीयते तदर्धं सुरसोमाला शिखायामे
कमुच्यते॥ कर्णयोश्चापि षट्संख्याधारणाक्रमईरितः॥ संख्याहीनं कर्तव्यमधिकं नैव दुःख्यति॥ संख्याभेदं प्रवक्ष्यामि जपमाला तु या भवेत्॥ मोक्षार्थे
पंचविंशत्या सप्तविंशतिपोष्टिके॥ त्रिंशच्च धनसंपत्त्यै पंचदश्याभिचारके॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्र स्वेति चतुर्विधः॥ स्वेतारक्तासुवर्णाभकृष्णवर्णा
क्रमादमी॥ एतेषु ब्राह्मणाः श्रेष्ठा जपमालाकृते भृसं॥ अलाभे तु द्विजातीनां पपि वा स्वस्वजाभयः॥ अतिस्थूलोति सूक्ष्म स्फुटितो मणलोलघु॥ भिन्नः

॥शि॰व॥
॥१२७॥

पुराधृतीजीर्णोरुद्राक्षोनवः स्मृते ॥ मणोयदुन्नतंस्थानेमुखंएषतुनिम्नकं ॥ घटयेदेवदिव्यन्समणीन्सदंतपंक्तिवत् ॥ अन्योन्यघर्षणादेवजपहानिर्भवे
ध्रुवं ॥ श्रेष्ठेनरज्जुनातेनवर्न्नेनत्रयरूपतः ॥ अन्योन्यमध्यदेशेतुकर्त्तव्याग्रंथयः शुभाः ॥ चतुर्दशांतवक्त्राणिरुद्राक्षाणांक्रमातभवेत् ॥ धारणस्यफलं
तेषांवक्ष्येतेविधिवक्रमात् ॥ एकवक्त्रः शिवसाक्षाद्ब्रह्महत्यांव्यपोहति ॥ द्विवक्त्रंदेवदेवोतुगोवधंनाशयेध्रुवं ॥ त्रिवक्त्रमनलःसाक्षात्स्त्रीहत्यांहरति
क्षणात् ॥ चतुर्वक्त्रः स्वयंब्रह्मानरहत्यांव्यपोहति ॥ पंचवक्त्रःशिवःसाक्षात्सर्वपापैःप्रमुच्यते ॥ षड्वक्त्रकार्त्तिकेयस्तुधारयेद्दक्षिणेकरे ॥ ब्रह्महत्यादि
भिःपापैमुच्यतेनात्रसंशयः ॥ सप्तवक्त्रंमहानागोह्यनंतोनामनामत ॥ गोवधःस्वर्णचौर्याभ्यांमुच्यतेसर्वदानरः ॥ अष्टवक्त्रंमहासेनसाक्षाद्देवोगण
धिप ॥ विघ्नास्तस्यप्रणश्यंतिसोतेयातिपरागतिं ॥ नववक्त्रंभैरवःस्याधारयेद्वाममस्तके ॥ भुक्तिदंमुक्तिदंप्रोक्तंममतुल्योबलोभवेत् ॥ दशवक्त्रंभवेत्तत्सा
क्षाद्देवोजनार्दनः ॥ पिशाचग्रहवेतालब्रह्मराक्षसपन्नगैः संभवानिचदोषाणिक्षिप्रंनश्यंतिधारणात् ॥ वक्त्रैकादशरुद्राक्षंरुद्राएकादशाःस्मृता
शिखायांधारयत्रीत्वेनतस्यपुण्यफलंशृणु ॥ अश्वमेधसहस्रस्यवाजपेयशतस्यच ॥ गवांशतसहस्रस्यसम्यग्दत्तस्ययत्फलं ॥ तत्फलंसमवाप्नोतिव
क्त्रैकादशधारणात् ॥ वक्त्रद्वादशरुद्राक्षंभास्करद्वादशात्मकं ॥ वक्त्रस्वर्णाश्वगोमेधफलंप्राप्नोतिधारणात् ॥ वक्त्रत्रयोदसंवक्त्ररुद्राक्षंयदिधारयेत् ॥
पूज्यतेशतनंदेवैःप्राप्यतेपुण्यमुत्तमं ॥ चतुर्दशमुवक्त्रंवैरुद्राक्षंधारयेद्यदि ॥ मूर्ध्निस्थितेतुचेन्नित्यंनस्मिन्योम्रियतेनरः पवित्रमपवक्त्रस्तुशशिखं
डशिरःस्वयं ॥ वंद्यतेसततंदेवैःसत्यंचशृणुषण्मुख ॥ वक्त्रलेप्राप्यतेपुण्यंभोगपवान्जायतेनरः ॥ स्नानेदानेजपेहोमे वैश्वदेवसुरार्चने ॥ प्रायश्चि

127

॥राम॥
॥१२७॥

त्रेतथाश्राद्धदीक्षाकालेविशेषतः॥ रुद्राक्षधारीभूत्वाचयत्किंचित्कर्मवैदिकं॥ योविप्रःसततंकुर्यात्तत्कर्मफलंभवेत्॥ पद्मपुराणे॥ कंठेशिरसिहस्ते
चकर्णयोरुपवीतके॥ रुद्राक्षधारणादेवरुद्रोभवतिमानवः॥ शैवपुराणे॥ रुद्राक्षान्धारयेद्विप्रःसंध्यादिषुचकर्मसु॥ तत्सर्वंसफलंप्रोक्तंलक्षकोटि
गुणंध्रुवं॥ लिंगदर्शनवत्पुण्यंभवेद्रुद्राक्षदर्शनात्॥ तत्कोटिसतंपुण्यंलभतेधारणान्नरः॥ शिरसाधारयेत्कोटिःकर्णयोर्दशकोटयः॥ गलेबधा
कोटिशतंमूर्द्ध्निकोटिसहस्रकं॥ अयुतंचोपवीतंचलक्षकोटिभुजद्वये॥ अप्रमेयफलंहस्तेषुरुद्राक्षधरोभवेत्॥ लैंगेवाशिष्ठे॥ खादन्मांसंपिवन्म
द्यंगच्छन्नंत्यजजातिभिः॥ सद्योभवतिपूतात्मारुद्राक्षोशिरसिस्थिते॥ स्कंदपुराणे॥ रुद्राक्षंकंठमाश्रित्यश्वानोपिम्रियतेयदि॥ सोपिरुद्रत्वमाप्नोतिकिं
पुनर्मानुषादय॥ उच्छिष्टोवापिकर्मस्थोयुक्तोवासर्वपातकैः॥ मुच्यतेसर्वपापेभ्योनरोरुद्राक्षधारणात्॥ रुद्राक्षमालिकांकंठेधारयन्भक्तिवर्जितः
पापकर्मापियोनित्यंरुद्रलोकेमहीयते॥ शैवपुराणे॥ अरुद्राक्षधरोभूत्वायत्किंचित्कर्मवैदिकं॥ कुर्याद्विप्रस्तुयोमोह्वान्नासायाप्नोतितत्फलं॥ वा
शिष्ठेलैंगे॥ रुद्राक्षधारणेलज्जायेषामस्तिमहामुने॥ संकीर्णासाभवेद्ब्रह्मन्तेषांवंशपरंपरा॥ अथानेषांमक्षविशेषाणांतुयोगिनीतंत्रे॥ उक्तेष्वक्षे
षूक्तसूत्रेग्रंथितासाधकोत्तमैः॥ मालांनिधायवैपात्रेक्वविजंधादिचर्चितां॥ भूतशुध्यादिकांपूजांसमाप्यतत्रपूजयेत्॥ गणेशसूर्यविष्ण्वीशदुर्गाश्चावा
ह्यमंत्रवित्॥ पंचगव्येषुतांक्षिप्त्वाहोमंत्रेणचमंत्रवित्॥ तस्मादुत्थाप्यतांमालांस्वर्णपात्रेनिधायच॥ पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात्॥ तोय
धूपांतरैःकृत्वापंचामृतविधिंबुधः॥ क्रमात्तत्रैवसंस्थाप्यस्थापयेत्शीतलेजले॥ ततश्चंदनसौगंधिकस्तुरिचंदनादिभिः॥ तांसमालिप्यह्योमंत्र

मष्टोत्तरशतं जपेत् ॥ तस्यां नवग्रहांश्चापि दिक्पालांश्च प्रपूजयेत् ॥ ततः संपूज्य वटुरूरहीयां मालिकां शुभां ॥ भैरवीतंत्रे ॥ आदौ गणपतिं देवं स्मर्यो विष्णु
मुमापतिं ॥ दुर्गां च पूजयेद्विद्वान्मालायां सुसमाहित ॥ पंचगव्ये क्षिपेन्मालां प्रसादेनाभिमंत्रितां ॥ प्रासादेनत्र्यं वैवव क्ष्यमाणप्रासादपरामंत्रेणत
तस्तुतोल्यतां मालां स्थापयेद्धेमपात्रके ॥ पंचामृतेन संस्नाप्य शीतलेन जलेन च ॥ चंदनेन सुगंधेन कस्तूरीकुंकुमादिभि ॥ अभिषेकं ततः कृत्वा मंत्रेण
नेन मंत्रवित् ॥ प्राणजीवसमारूढमोकारस्वरभूषितं ॥ विंदुनादसमायुक्तं मंत्रराजं प्रवीन्यसेत् ॥ नवग्रहान्पूजयित्वा ततो दिक्पालपूजनं ॥ तिलेन
घृतयुक्तेन शक्तितो होमयेत्ततः ॥ स्वर्णं तु दक्षिणां दद्याद्विप्रा — स्तु स्तुतोषयेत् ॥ दक्षिणामाचार्याय ॥ अन्येन प्रासादेन विन्यस्य त्र्यष्टोत्तरशतं जपेदित्य
र्थः प्राणो हकारः जीवसकारः ॥ स्वर्णपात्राभावेश्वत्थपात्रे वा ग्राह्यं ॥ उक्तयोगिनीतंत्रवचनात् ॥ प्रकारांतरस्तु कुब्जिकातंत्रे ॥ कल्पितं पूजयेद्दादेवः
स्त्रग्गंधानुलेपनैः ॥ सहस्रः कारयेन्मालां विशुद्धां स्वर्णरूपिणीं ॥ यथायोग्यं वेदवर्तिं मालां कुर्याद्विचक्षणः ॥ वर्णमानेन सा कार्या पंचगव्येत्र्यहं क्षिपे
त् ॥ वर्णमानेन मात्रकावर्णमानेन तत्संख्यमेत्यर्थः ॥ एतेन शतसंख्येयपक्षे मालाकार्येति प्राप्यते ॥ सूत्रं चापि चतुर्थीं हिक्षालयेद्दशमंत्रकैः ॥ समानव
र्णसूत्रेण पृथयेत्स्वहृदयाणुना ॥ सुवर्णादिगुणो वापि ग्रंथयेत्साधकोत्तमः ॥ ब्रह्मग्रंथितत्तोदद्यान्नागमथापि वा ॥ कवचेनावबध्नीयान्मालां ध्यानपरा
यणः ॥ सर्वशेषं ततो मेरुसूत्रद्वयसमन्वितं ॥ यथायेत्तारयोगेन वध्नीयात्साधकोत्तमः ॥ एवं निष्पाद्य देवेशि प्रतिष्ठां च समाचरेत् ॥ स्थंडीले मंडलं कृ
त्वा यथाभागविधिक्रमात् ॥ मंडलं स्वेष्टदेवस्य पूजांत्वकं ॥ पूजयित्वा यथान्यायमिष्टदेवमनुक्रमात् ॥ न्यासपूर्वं जपेन्मंत्रमष्टोत्तरसहस्रकं ॥ ॐ ऊ

याद्वदशांशेनयस्यदेवस्ययत्प्रिय॥यत्प्रियमित्यनेनपुरश्चरणाङ्गहोमेयद्द्रव्ययस्यदेवस्योक्तंतेनहोमयेदित्युक्तं॥ततोमंडलमध्येतुतांमालांस्थापये
द्बुधः॥अस्त्रमंत्रेणतोन्यस्यमूलमंत्रेणतोन्यसेत्॥अंगानितानिविन्यस्यदेववत्परिविंदयेत्॥अभेदरूपमासाद्यमालाकार्यानदात्मिका॥ततोबलिं
यथान्यायंदद्यात्तैःसाधकोत्तमः॥एवंप्रतिष्ठामासाद्यमालायामिष्टदेवतां॥आचार्यंपूजयेन्मंत्रीशिल्पिनंचयथाविधि॥नान्यमंत्रंजपेत्तत्रयदिच्छे
च्छिद्धिमात्मनः॥अस्त्रादिमंत्रजप्तव्यमंत्रस्याग्राह्य॥बलिमालायाः॥तैःहोमद्रव्ये॥तथाउत्तरतंत्रे॥दृढसूत्रेनियुञ्जीतजपयज्ञंततोयथा॥जीर्णे
सूत्रेपुनःसूत्रंग्रंथयित्वाशतंजपेत्॥शैवागमे॥यदासंत्रुट्यतेमालंग्रथयित्वाथपूर्ववत्॥प्रतिष्ठितायांतस्यांतुमंत्रेजप्यादनन्यधीः॥अत्रपुरश्चरणा
जपःकरेणकर्त्तव्यइतिकेचित्॥तत्रप्रमाणंचिंत्यं॥वस्तुतस्तुपुरश्चरणेपिजपमालाभावेकरेणैवजपगणनाकार्या॥उक्तंचनारदपंचरात्रे॥अथां
गुलिभिरेवापिजपकर्मसमाचरेदिति॥प्रपंचसारेपि॥पद्मासनःप्राग्वदनोप्रलापीतन्मानसजपस्तर्जनीवर्जिताभिः॥अथवांगुलिभिर्जपेन्नाति
द्रुतंनातिविलंबितंवेति॥मंत्रतंत्रप्रकाशेपि॥जपस्यगणनांकुर्यादथवांकुलिपर्वभिरिति॥तत्प्रकारमाह॥भैरवीतंत्रेपि॥अनामामध्यमारभ्य
कनिष्ठानुक्रमेणतु॥मध्यमामूलपर्यंताकरमालाप्रकीर्तिता॥गौतमेप्याह॥कनिष्ठानामिकांगुष्ठमध्यमाभिर्जयेत्सदेति॥नदानामामध्यमूल
कनिष्ठामूलमध्याग्रानामाग्रमध्यमूलपर्यंतमिति॥नवसुपर्वसुगणनायांकृतायांनववारंमंत्रजपोभवति॥एवंद्वादशवारपुनःपुनरावर्त्तनेना
ष्टोत्तरसहस्रंजपोभवति इत्थमयुतादिष्वप्यूह्यं वस्तुतस्तुतंत्रांतरदर्शनात्तर्जनीसंहितांगुलिभिरेवजपःकार्यः॥यदुक्तंकुलमूलावतारे॥अथव

क्षेमहेशानिजपस्यगणनाफलं॥ अंगुलीजपसंख्यायांफलमेकगुणंस्मृतं॥ रेखयाष्टगुणंविद्यात्पुत्रजीवैर्दशाधिकं॥ शतंस्याच्छंखमणिभिःप्रवा
लैस्तुसहस्रकं॥ स्फाटिकैर्दशसाहस्रंमौक्तिकैर्लक्षमुच्यते॥ पद्माक्षैर्दशलक्षंतुसौवर्णैःकोटिरुच्यते॥ कुशग्रंथ्याचरुद्राक्षैरनंतगुणितंभवेत्॥ श्वेतपद्मा
क्षमालायाभिर्जपस्याष्टमितंफलं॥ अंगुलीभिर्जपंकुर्वन्सांगुलीभिर्दर्जयेत्॥ अंगुष्ठेनविनाजप्तंविफलंभवतिप्रिये॥ पर्वभिर्वांगुलीनांतुजपेदनुदि
नंप्रिये॥ मध्यमानामिपर्वमध्यद्वयमिहप्रिय॥ मेरुंप्रकल्प्यतंकुर्वन्प्रदक्षिणमनुक्रमात्॥ अनामामूलपर्वादि कनिष्ठानुक्रमेणतु॥ तर्जन्यग्रादितो
देविमध्यामूलावसानकं॥ गणयेत्तत्क्रमेणैवकिंचित्संकोचयेन्नलं॥ अंगुलाग्रंचपुंजीतनजपकालेमहेश्वरी॥ अंगुलीनांवियोगेनछिद्रेषुश्रवणोजपः॥ ह
ल्लेषंगणनांदेविमनसंप्रजपेत्क्वचित्॥ यतस्तज्जपमीशानीबलाद्धरंतिराक्षसाः॥ अथवामध्यमामध्यमूलपर्वद्वयंप्रिये॥ मेरुंकृत्वाजपेद्देवीत
र्जनीमूलकावधि॥ अनामामध्यपर्वादिप्रादक्षिण्यक्रमेणवै॥ इति॥ अथांगुलीजपोरेखाजपःसर्वजपश्चेतित्रिविधकरमालाजपः॥ तत्रकनिष्ठांगु
ष्ठपर्यंतंपुनःपुनर्गणनांगुलीजपः॥ कनिष्ठांगुलीगतरेखाभिर्जपोरेखाजपः॥ पर्वजपस्तुप्राक्तलक्षणएवेति॥ अथविहितानि॥ तत्रनारदः॥ मनःसंह
रणंशौचंमौनंमंत्रार्थचिंतनं॥ अव्यग्रत्वमनिर्वेदोजपसंपत्तिहेतवः॥ त्रैलोक्यसंमोहनतंत्रे॥ लोभमात्सर्यसहितःकामक्रोधविवर्जितः॥ सर्वथालभतेसि
द्धिमन्यथानिःफलंभवेत्॥ कुंभसंभवः॥ तिनित्यंयत्कुर्वीतचाश्रमोदितं॥ तदेवकर्मकुर्वीततन्मनास्तत्परायणाः॥ दांतस्त्रिषवणस्नायीमौनीसमानितो
नरः॥ पतेतवैस्वंकर्मस्थीरवीर्नियतेंद्रियः॥ गौतमः॥ स्वकर्मणिरतिर्यस्यदितिसत्यंनसंशयः॥ इतडस्यस्वधर्मस्यरहितस्य॥ हरतोपिचिरकालेनापि॥

मंत्रार्णवे ॥ भूशय्या ब्रह्मचारित्वं मौनं चार्यानुसूयता ॥ नित्यं त्रिस्नवणं स्नानं क्षुद्रकर्मविवर्जितं ॥ नित्यपूजा नित्यदानं देवतास्तुतिकीर्त्तनं ॥ नैमित्तिकार्चनं चैव विश्वा
सो गुरुदेवयोः ॥ जपंनिष्ठा सदा ह्येते धर्मास्तु मंत्रसिद्धिदाः ॥ ब्रह्मचार्यं त्वष्टविधमैथुननिवृत्तिः ॥ तदुक्तं दक्षेण ॥ स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणं ॥
संकल्पोध्यवसायश्च क्रियानिष्पत्तिरेव च ॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणं ॥ अभिलाषपूर्वकं स्मरणकीर्त्त
नप्रेक्षणानि निषिद्धानि ॥ केलिः परिहासासिवाह्यचेष्टा ॥ गुह्यभाषणं संभोगार्थं रहोमंत्रणं संकल्पः मानसंकर्म ॥ अध्यवसायहं भोगनिश्चयः ॥ त्रिषवण
स्नानं तु शक्त्यपरं ॥ स्नानं त्रिषवणे प्रोक्तं समक्त्याद्विसकृत्त्वरेदिति वैशंपायनवचनात् ॥ क्षुद्रकर्म तु ॥ रंभदैवौतथोत्सादउच्चाटेभ्रममारणः ॥ न्याधिश्चेति
स्मृतं क्षुद्रमिति नारायणीयोक्तं ॥ नित्यपूजा तत्पूर्वकमेव जपविधानात् ॥ नैमित्तिकं अयनादौ विशेषपूजा ॥ तदुक्तं मंत्रतंत्रे ॥ अष्टोत्तरशतसहस्रं
तु कृत्वा तयागमादरात् ॥ जपेत्प्रतिदिनं यत्तु नित्यस्वजपः स्मृतः ॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ॥ द्वादश्यां पौर्णमास्यां तु तेषु नैमित्तिको जप ॥
नित्यद्विगुणीतः सोथ पूजां चैव हरेत्तथेति ॥ कपिलापंचरात्रे ॥ मंत्रश्च देवतानातारातिथिवारेषु जप्यतं इति ॥ तथा गौतम ॥ ततो गुरोः पादपद्मं पुष्पांजलिभिरर्च्चये
त् ॥ तस्मादाशीः सदा ग्राह्या ततः संतोषमाचरेत् ॥ संतुष्टे तु गुरौ देव संतुष्टो नान्यथा भवेत् ॥ तथा श्रीभगवद्वाक्यं ॥ संतुष्टो हि गुरुर्यस्य तस्य तुष्टं जपत्रयं ॥ नास्त्य
साध्यं जगत्यत्र सुप्रसन्ने गुरौ मुने ॥ हृदिन्वंस्पष्टरोर्वाक्यं न कदाचिद्विकल्पयेत् ॥ कुंभसंभवः ॥ स्नानाद्वा पंचगव्येन केवलामलकेन च ॥ श्रुतिस्मृतिपुराणोक्तमं
त्रैस्नायादरंतरं ॥ अनुतिष्ठेदनुष्ठेयं शुचिव्रतमनोनिशं ॥ प्रपंचसारे ॥ अथ तु हविष्यप्राशी नक्ताशी वा जपेन्मंत्रमिति ॥ वाशब्दः समुच्चये ॥ फत्कारिणीतंत्रे

भैक्षादिनियमाहारः सकृज्ज्ञात्तो विधीयते ॥ दध्नामूलफलैर्वापि कुर्याद्दशनमन्वहमिति ॥ त्रैलोक्यसंमोहनतंत्रे ॥ गुरुगोविप्रबालेषु दीनांधकृपनेषु च ॥ भवे
द्यस्य मतिर्भक्तीन च द्रोहं समाचरेत् ॥ पश्चाज्जाप्यसमभ्यर्च्य ग्रासं दद्यात्तु शोभनं ॥ गौतमः ॥ गोषु भक्तिः सदा कार्या गोषु शुश्रूषणं तथा ॥ नित्यं गोषु
प्रसन्नासु मेरपालोपि प्रसीदति ॥ अथ निषिद्धानि ॥ त्रैलोक्यसंमोहनतंत्रे ॥ प्रियं कस्यवि–यान्नानृतं वा कदाचन ॥ न हृयामाक्रमेद्विद्वान्
विभीतककरंजयोः ॥ न कुर्यात्कस्यचित्किंचिन्न गृह्णी–ज्जपांतरे ॥ तैलाभ्यंगं न कुर्वीत मधुमांसं विवर्जयेत् ॥ स्त्रीषु संभाषणं नैव कुर्याद्देवि विमोहि
तः ॥ न नग्नो न तत्वगांधस्थ्यागी न वाश्चे विसर्जयेत् ॥ न गृह्णीयादिति ॥ सतिशंभवे ॥ असंभवे तु तांबूलभक्षणमाचं ग्राह्यं वक्ष्यमाणयुक्तो विमोहितः काम
परवशः प्रयोगसारे ॥ विभीतकार्ककारंजस्नुहिछायां न संश्रयेत् ॥ कुंभसंभवः ॥ वाङ्मनःकर्मभिर्नित्यं निस्पृहो वनितादिषु ॥ स्त्रीसूद्रपतितव्रात्यना
स्तिकोच्छिष्टभाषणं ॥ असत्यभाषणं जैह्मभाषणं परिवर्जयेत् ॥ सम्येरपि न भाषेत जपहोमार्चनादिषु ॥ वर्जयेद्धीनवाद्यादीश्रवणान्यदर्शनं ॥ तां
बूलं गंधतैलं पंच पुष्पधारणमेव च ॥ मैथुनं तत्कथालापं तद्गोष्ठिं परिवर्जयेत् ॥ असज्जापणमत्यर्थं वर्जयेदन्यपूजनं ॥ कौटिल्यं क्षौरमभ्यंगमनिवे
दितभोजनं ॥ असंकल्पितकृत्यं च वर्जयेन्मर्दनादिकं ॥ त्यजेदुष्णोदकस्नानं सुगंधामलकादिकं ॥ रम्भैरिति ॥ तत्र प्रायश्चित्तमाह ॥ नारदः ॥ सकृदुच्चरिते
शब्दे प्रणवं समुदीरयेत् ॥ प्रोक्ते यामरशब्देपि प्राणायामं सकृच्चरेत् ॥ बहुप्रलापे चावश्यं न्यस्यांगानि ततो जपेत् ॥ क्षुते चैव तथा स्पृश्यस्थानानां स्पर्श
नेन तथेति ॥ योगियाज्ञवल्क्यः ॥ यदि वाग्यमलोपः स्याज्जपादिकथंनच ॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं ॥ वायवीयसंहितायां ॥ पतितानामन्त्य

130

ज्ञानां दर्शने भाषिते श्रुते ॥ क्षुते ष्ठीवासु गमने जृंभणे जपमुत्सृजेत् ॥ प्राप्ता वाचम्य वै तेषां प्राणायामं षडंगकं ॥ कृत्वा सम्यग्जपेच्छेषं यद्वा सूर्यादिदर्शनं
मार्जारं कुक्कुटं क्रौंचं श्वानं गृध्रखरं कपिं ॥ दृष्ट्वाचम्याचरेत्कर्म स्पृष्ट्वा स्नानं समाचरेत् ॥ एवमादिश्च नियमान्पुरश्चरणकृच्चरेत् ॥ इति ॥ यथा शिववच
नं ॥ क्रोधक्षुतमदं स्त्रीणां निष्ठीवनविजृंभणे ॥ दर्शनं स्वस्वनीचानां वर्जयेज्जपकर्मणि ॥ आचान्तः संभवे तेषां स्मरेद्वा मां त्वया सह ॥ ज्योतिषि च प्रपश्ये
द्वा कुर्याद्वा प्राणसंमयं ॥ मां महेशं त्वया पार्वत्या ॥ लिंगपुराणे ॥ सूर्योग्नी चंद्रमाश्चैव ग्रहनक्षत्रतारकाः ॥ एतेज्योतिषि चोक्तानि विद्वद्भिः ब्राह्मणोत्त
थेति ॥ यथा क्रोधो मदः सुधा तंद्रा निष्ठीवनविजृंभणे ॥ स्वनीचदर्शनं निद्रा प्रलापास्ते जपद्विषः ॥ तथा विष्णुधर्मोत्तरे ॥ उपविष्टो जपन्स्नातः क्षुतप्रस्खल
नादिषु ॥ पूजायामानकृत्स्वस्य सप्रवारान्प्रकीर्त्तयेत् ॥ फेत्कारिणीतन्त्रे ॥ जपकाले यदा पश्येदशुचिं मंत्रवित्तमः ॥ प्राणायामं ततः कृत्वा ततः शेषं स
मापयेत् ॥ यदा चैवं भवेन्मंत्री स्वयमथाशुचिः पुनः ॥ स्नानाचम्य यथापूर्वं न्यासं कृत्वा पुनर्जपेत् ॥ इति ॥ न्यासंश्चाधिकारसंपादकं ॥ एतेन मूत्रोत्सर्गा
दावशुचित्वसंभवश्चेत्स्नानमाचम्य यथा प्राणायामषडंगन्यासान्कृत्वा शेषं समापयेदिति ॥ प्रतीयते ॥ वैशंपायनः ॥ अस्नातस्य फलं नास्ति तथातर्पयतः पि
तॄन् ॥ नाप्यतर्पयता देयान्नाशनमभिजल्पतः ॥ नैकवासा जपेन्मंत्रं बद्धवस्त्राकुलोपि वा ॥ योगिनीतंत्रे ॥ अनास्थाविभ्रमेत्येतमश्रद्धा जपकर्मणि
आलस्यभावना शक्तिः सिद्धिनाशाय निश्चिते ॥ त्यजेदुष्टप्रवादं च परिवादं च वर्जयेत् ॥ त्यजेदुर्जनसंस्पर्शं मशकादिमयं त्यजेत् ॥ वायवीयसंहिता
यां ॥ उष्णीशी कंचुकी नग्नो मुक्तकेशो गलावृतः ॥ अपवित्रकरोशुद्धः प्रलयन्न जपेत्क्वचित् ॥ असंवृत्तो करो कृत्वा शिरसि प्रावृतेपि वा ॥ चिंताद्या

कलविनो वा क्रुधो वांतः सुधान्वितः॥ अनाशनः सयानो वा गच्छन्नुच्छित एव वा॥ रश्मायामशिवस्थाने न जपेत्तिमिरांतरे॥ उपानद्रूढपादो वा या
नशय्यागतस्तथा॥ प्रसार्य न जपेत्पादावुत्कटासन एव चा॥ कपिलपंचरात्रे॥ वीक्षेपादथ वालस्यान्जजहोमार्चनां नरा॥ उत्तिष्ठन्नितदान्यासं षडंगं
विन्यसेत्तु न॥ अपवित्रकरः पवित्रं कुशं॥ अस्त्री कुशं कुथो दर्भः पवित्रमिति हि कोशः॥ विना दर्भेण यत्कर्म विना सूत्रेण वा पुनः॥ पाक्षसं तद्भवे
त्सर्वं नेहामुत्र फलंप्रदं॥ इति कूर्मपुराणवचनेन तस्यावश्यकत्वाभिधानात्॥ सव्यं यज्ञोपवीतं॥ विष्णुरपि॥ स्नातः सुप्रक्षालितः पाणिपादः॥ शुचिर्बद्ध
शिखो दर्भपाणिराचांतः प्राङ्मुखो दङ्मुखो वोपविष्टो मौनी ध्यानादेवताः पूजयेदिति॥ तत्र वामेव कुकुशाः दक्षिणे परिभाषिकं पवीत्रं॥ तथा संध्योप
त्रमे कात्यायनः॥ सव्ये पाणौ कुशान्कृत्वा कुर्यादाचमनक्रिया॥ ह्रस्वाः प्रवरणीयास्युः कुशा दीर्घाश्च बर्हिषः॥ दर्भाः पवित्रमित्युक्तमतः संध्यादिकर्मसु॥ स
व्यसोमगृह्य कार्या दक्षिणा सपवित्रकाः॥ सव्ये वामे॥ मनुकीदृशा धार्याः दक्षिणे धार्या नवेन्यत इत्यादह्रस्वाः पर्वणः पंचयज्ञादि प्रवरणार्थाः दीर्घा बर्हिः सं
ज्ञकाः॥ प्रस्तारः प्रविस्तर इत्यर्थः॥ प्रवाण्येष्वेषु संध्यादिषु च दर्भा बहव एव धार्याः॥ विशेषरहिताः॥ कर्मसु शुद्धिसाधनं न त्वेकः कुशोपग्रह इति॥ कुश
हस्तः समाहित इति॥ अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैरिति च पारस्कारगोभिलादिभिरप्युक्तं॥ अतो विशेषाभावात्संध्यादिषु सव्यः कुशमुष्टिद
क्षिणः॥ अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव चा॥ प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचिदिति॥ स्वोक्तलक्षणपवित्रयुक्तः॥ अंतर्गभित्वं गर्भं गर्भदीति य
विहाय चतुर्थे ग्राह्यं॥ लघुहारितः॥ जपे होमे तथा दाने स्वाध्याये पितृतर्पणे॥ अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैरिति॥ स्वर्णधारणं तु दक्षिणानामि

कार्यं ॥ अनामिकायां तर्द्धार्यं दक्षिणस्य करस्य चेति हेमधारणप्रकरणस्थ देवीपुराणवचनात् ॥ रजतं तु तर्जन्या धार्यं ॥ तत्रोपदिश्यते कर्मकर्त्तुरंगनस्य च
ते ॥ दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः इति कात्यायनवचनात् तर्जनीमूलस्य पीतृतीर्थत्वेन तदेव रजधारणं नत्रैव न्याय्यमित्येतन्मूलमहाजनाचारेण निर्णी
त प्रामाण्यं तर्जन्यां रजतं धार्यमिति स्मृतीसमुच्चये लिखितं वचनाच्च ॥ सव्यापसव्यवलितं ब्रह्मग्रंथिसमन्वितं ॥ लंघयेत्पर्वमात्रं तु द्वितीयं नैव लंघयेत् ॥ इति व
चनादनामामध्यपर्वनि सग्रंथिपवित्रं धार्यं ॥ कर्मकाले प्रकुर्वीत सपवित्रामनामिकां ॥ लंघयेदेकपर्वीसा द्वितीयं नैव लंघयेत् ॥ इति शंखवचनाच्च ॥ सुवर्णरज
तैरिति बह्वृचवचनं बह्वृधारणस्य कर्मांगत्वव्यनक्ति ॥ तच्च दधित्ववत्तु वर्णान्वरजतत्वजा-द्यैरेकादशारभ्यदृशेनैरेकमाधारणेप्युपपद्यत इति ॥ वामनपुराणे ॥ उद
केन विना पूजा विना दर्भेण या क्रिया ॥ आज्येन च विना होमः फलदास्यति नैव तं ॥ स्मृत्यर्थसारे ॥ कुशाः काशा यवा दूर्वा उशीराश्च सकुंदराः ॥ गोधूमा व्रीहयो
मुंजा दश दर्भाः सवल्वजाः ॥ नभोमासस्य दर्शे तु शुचिर्दर्भान्समाहरेत् ॥ अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः ॥ विरिंचीना सहोत्पन्न परमेष्ठीनिसर्गज ॥ नुद
शर्वाणि पापानि दर्भ स्वस्तीकरो भव ॥ इमं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः ॥ हुंफट्कारेण सकृच्छित्वा समुद्धरेत् ॥ अच्छिन्नाग्रा अशुष्काग्राः पित्र्ये तु हरिताः शु
भाः ॥ अमूलादेवकार्येषु प्रयोज्याश्च जपादिषु ॥ समूलपत्राः कुशाः शस्ता दैवे पित्र्ये च कर्मणि ॥ अनंतस्तरुणामाग्रो प्रादेशं तु पवित्रके ॥ चतुर्भिर्दर्भपिंजूलैः
र्ब्राह्मणस्य पवित्रकं ॥ एकैकं पर्यमुन्तस्तं वर्णाय थाक्रमं ॥ सर्वेषां वा भवेद्वाभ्यां पवित्रं ग्रंथितं तथा ॥ त्रिभिस्तु शांतिके कार्यं पौष्टिके पंचभिस्तथा ॥ चतु
र्भिश्चाभिचारे स्याद्विनिष्काशे श्वकेन च ॥ सपवित्रेण सदर्भो वा कर्मांगाचमनं चरेत् ॥ नोच्छिष्टं तद्भवेत्तस्य भुक्तोच्छिष्टं तु वर्जयेत् ॥ यैः कृतः पिंडनिर्वापः श्राद्ध

॥शि.च॥
॥१३२॥

वा पितृतर्पणं ॥ विण्मूत्रादिषु ये दर्भास्तेषां त्यागो विधीयते ॥ निवीमध्यस्थितास्ताज्याय क्ष भूमौ स्थितास्तथा ॥ वामहस्ते स्थिते दर्भे न पिबेद्दक्षिणेन तु ॥ वस्त्रा
दिनोपग्रहणे न दोषः पिबतो भवेत् ॥ न ब्रह्मग्रथिना वामेन दुर्वाभिः कदाचन ॥ स्नाने होमे जपे दाने स्वाध्याये पितृकर्मणि ॥ सपवित्रौ सदर्भौ वा करौ कुर्वीत ना
न्यथा ॥ कुशाभावे पि काशाः स्युः काशाः कुशसमाः स्मृता ॥ काशाभावे ग्रहीतव्या अन्ये दर्भा यथोचिताः ॥ नाडीलुनीया जात्रौ वा लुनीया दानसंध्ययोः ॥ दर्भा भ
वेत्स्वर्गारोप्यतामुरत्नै क्रियाश्चरेत् ॥ इत्यास्तां विस्तरः ॥ नारदपंचरात्रे ॥ अपवित्रकरो नग्नः शिरसि प्रावृतोपि वा प्रलपन्वा जपेद्यावतावन्निष्फलमुच्यते ॥ न
ग्नमाहात्रिः ॥ नग्नो मलीनवस्त्रः स्यान्नग्नश्चार्धपटः स्मृतः ॥ नग्नो द्विगुणवस्त्रः स्यान्नग्नो रक्तपटस्तथा ॥ नग्नश्च स्यूतवस्त्रः स्यान्नग्नः स्त्रिग्धपटस्तथा ॥ द्विक
क्षोनुत्तरीयश्च नग्नश्चावस्त्र एव च ॥ भविष्यपुराणे ॥ द्विकच्छः कच्छशेषश्च वहिःकच्छस्तथैव च ॥ एककच्छः कच्छशून्यो नग्नः पंचविधः स्मृतः ॥ देवलः ॥ वक्रुवा
सा भवेन्नग्नो नग्नः कौपीनवासेति ॥ शाखायनः ॥ दानमाचमनं होमं भोजनं देवार्चनं ॥ प्रौढपादो न कुर्वीत स्वाध्यायं चैव तर्पणं ॥ आसनारूढपादस्तु जा
नुनोर्जंघयोस्तथा ॥ कृत्वावसक्थितो यस्तु प्रौढपाद स उच्यते ॥ मंत्रतंत्रप्रकाशे तु ॥ उक्तनियमानभिधाय शक्तावेवं सर्वमेतदशक्तः यथाशक्ति जपेदित्यु
क्तं ॥ ॥ सुंदराचार्यशिष्येण श्रीनिवासेन धीमता ॥ चंडिकायां प्रणीतायां प्रकाशो द्वादशोगमत् ॥ ॥ इति श्रीसुंदराचार्यचरणारविंदद्वंद्वांतेवा
सिना श्रीनीसभट्टेन विरचितायां श्रीशिवार्चनचंद्रिकायां द्वादशप्रकाशः ॥ १२ ॥ अथ जपः ॥ तत्र क्रमसंभवः ॥ गुरोर्लब्धस्य मंत्रस्य प्रसादाद्वर्त्तनं हि
यत् ॥ अंतरंगाक्षराणां वन्यासपूर्वो जपः स्मृतः ॥ अगेनीमुनीक्षासंबोधने ॥ अक्षराणां मंतरावर्त्तनं जप इति संबधः ॥ तद्भेदानाह वायवीयसंहितायां ॥ जजः

॥राम:॥
॥१३२॥

132

स्यादक्षरावृत्तिः सउच्चोपांशुमानसः ॥ सउच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः मंत्रउच्चारयेद्वाचाजपयज्ञः सवाचिकः ॥ शनैरुच्चारयेन्मंत्रमीषदोष्ठौ चचाल
येत् ॥ किंचिच्छ्रवणयोग्यः स्यादुपांशुसजपः स्मृतः ॥ जिह्वाजपः सविज्ञेयकेवलंजिह्वयाजपः ॥ धियायदक्षरःश्रेणींवर्णोस्वरपदात्मीकां ॥ उच्चरेदथसंस्मृत्या
सउक्तोमानसोजपः ॥ उच्चैर्जपोविशिष्टःस्याद्यज्ञादेर्दशभिर्गुणैः ॥ उपांशुस्याच्छतगुणः सहस्रोमानसोस्मृतः ॥ नारदपंच ॥ वाचिकंसर्वकालेषुउपांशुः सर्वसि
द्धिषु ॥ मानसंमोक्षमार्गेषुध्यायेद्देवंचसर्वतः ॥ महाभारते ॥ सर्वेषामेवक्षयानांजपयज्ञः प्रशस्यते ॥ अहिंसयाहिभूतानांजप्यतेसोमहाफलः ॥ जपनिष्ठो
द्विजः श्रेष्ठः सर्वयज्ञफलंभवेत् ॥ श्रीभगवद्वचनञ्च ॥ यज्ञानांजपयज्ञोस्मीति ॥ पद्मनाभीये ॥ यावंतः कर्मयज्ञास्युः प्रदीप्तानीतपांसिच ॥ सर्वेतेजपयज्ञस्य
कलानार्हन्तिषोडशीं ॥ जपेनदेवतानित्यंस्तूयमानाप्रसीदति ॥ प्रसन्नाविपुलान्भोगान्दद्यान्मुक्तिंचशाश्वतीं ॥ भृगुसंहितायां ॥ पाकयज्ञाश्चत्वारोवि
धियज्ञसमन्विताः ॥ सर्वेतेजपयज्ञस्यकलांनार्हन्तिषोडशीं ॥ अथासनानितत्रनारदः ॥ कुशाजिनांवरैर्युक्तंचतुरंगुलमूर्द्धतः ॥ चतुरस्रंविहस्तंचसुदृढंसुवृ
निर्मलं ॥ आसनंकल्पयित्वातुजपकर्मसमारभेत् ॥ वैशंपायनः ॥ सर्वसिद्धिव्याघ्रचर्मज्ञानसिद्धैमृगाजिनं ॥ वस्त्रासनेरोगहरंवेत्रजंश्रीविवर्धनं ॥ कौशेयं
पौष्टिदंप्रोक्तंकंवलंदुःखमोचनं ॥ वस्त्रमाविकंवक्ष्यमाणाद्रुद्रयामलवचनेनकेवलवस्त्रेनेदोषश्रवणात् ॥ वासिष्ठकंवलंश्रेष्ठमासनंदेवतुष्टये ॥ उत्
तरतंत्रवचनाच्च ॥ भृगुः ॥ काम्यार्थंकंवलंचैवाभिष्टदरक्तकंवलं ॥ धर्मार्थकाममोक्षाप्तिश्चैलाजिनकुशोत्तरं ॥ रुद्रयामले ॥ कंवलःश्वेतरक्तोवविचित्रो
नीलपीतकौ ॥ व्याघ्राजिनंचकौरंगमन्यैर्नानाविधासनैः ॥ अथनिषिद्धानि ॥ सारसंग्रहे ॥ वंशाश्मधरणीदारुतृणपल्लवनिर्मितं ॥ वर्जयेदासनंमंत्रीदा

॥ शि·व ॥
॥ १३३ ॥

रिद्रव्याधिदुःखदं ॥ नाडीक्षितौ विषज्ञातु कृष्णजिने गृही ॥ विशेषनिर्वनस्थश्च ब्रह्मचारी च स्नातकः ॥ ब्रह्मयामले ॥ न तृणपल्लववकाष्ठानि पाषाणं मृन्मयं तथा ॥ वंशाशनं च वस्त्रं च केवलं क्षितिमासने ॥ एवंमष्टविधं देवि वासनं परिवर्जयेत ॥ तृणासने भवेद्रोग पल्लवे चित्तविभ्रम ॥ पाषाणे च तथोच्चाटे· ज्वरः स्यान्मृन्मयासने ॥ क्षित्यासने भवेत्पीडा पापविस्फोटदुःखदं ॥ वंशाशने दरिद्रः स्याद्वस्त्रस्थाने विनाशनं ॥ चिंतावपुर्वलाहानि कृष्णाये विविधो ज्वरः ॥ शोकशूलादिका रोगा मृत्युः स्याद्दारुकासने ॥ इत्थं चाष्टासनं देवी वर्जयेत्सर्वकर्मसु ॥ अथ जपे पूर्वदिनकृत्यम ॥ तत्र त्रैलोक्यसम्मोहनतंत्रे ॥ शुभे मुहूर्त्ते नक्षत्रे शुद्धे काले गतव्रतः ॥ गुरोराज्ञां समासाद्य ततः कर्म समारभेत् ॥ सनत्कुमारः ॥ अथ वक्ष्यामि मंत्रस्य पुरश्चरणमुत्तमं ॥ स्नानाभिषेको विधिवन्मंत्रं लब्ध्वा गुरोर्मुखात् ॥ शुभे मुहूर्त्ते नक्षत्रे तिथौ लग्ने यथाविधि ॥ विप्रान्संतर्प्य यत्नेन भोजनाच्छादनादिभिः ॥ अविन्नवस्त्रभूषाद्यैः संतोष्य गुरुमात्मनः ॥ आरभेत जपं पश्चात्सदनुज्ञां पुरःसरं ॥ प्रथमं मंत्रे ॥ क्षेत्रपालांश्च संपूज्य बलिं दद्याद्यथाविधि ॥ बलिमंत्रस्तु ॥ पूर्वमेहिद्वयं पश्चाद्धिंडिषिः स्यात्तु हृद्द्वयं ॥ जंभयाद्वितयं भूयो नर्त्तयद्वितयं पुनः ॥ ततो विघ्नपदं हंहं महाभैरवतत्परं ॥ क्षेत्रपाल बलिं गृह्ण द्वयं पावकसुंदरी ॥ बलिमंत्रोयमाख्यातः सर्वकामफलप्रदः ॥ तस्मै सपरिवाराय बलिमेतेन चाहरेत् ॥ इति ॥ मंत्र· प्रयोगे वक्ष्यते ॥ ततश्चोपवासः कर्त्तव्यः ॥ अथ जपारंभ ॥ तत्र माहाकपिलपंचरात्रे ॥ एतन्नक्षत्रतिथ्यादौ ॥ करणे योगवासरे ॥ मंत्रोपदेशाद्गुरुणा साधनं च शुभावहमिति प्रोक्तत्वात् ॥ दीक्षापुरश्चरणयो· समाननक्षत्रादिकं ज्ञेयं ॥ तत्र प्रागुक्तविधिना विचार्य ममीचिनं समयं ज्ञात्वा समारभेत् ॥ तदुक्तं दक्षिणामूर्त्तिकल्पे ॥ साधयेत्प्रवरो विद्वान्पूर्वपक्षं समाश्रितः ॥

133

॥ रामः ॥
॥ १३३ ॥

पुरोपमुहूर्तेनक्षत्रैतिथौस्नात्वायथाविधि ॥ नत्वागुरुगणेशानं नत्वादुर्गां च मातरः ॥ तथा कुंभसंभवः ॥ ततः संकल्पं कुर्वीत पुरश्चरणमादरात् ॥ नारदीये ॥ संकल्पं तु बुधः कुर्यात्स्वस्तिवाचनपूर्वकं ॥ तथा देवलः ॥ अभुक्त्वा प्रातर्हारं स्नात्वाचम्य समाहितः ॥ सूर्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत् ॥ प्रातर्व्रतं समाचरेदिति संबंधः ॥ व्रतं स्वकर्त्तव्यविषयो नियमसंकल्प ॥ यदुक्तं कुंभसंभवेन ॥ कर्त्तव्यस्य समस्तस्य नियमग्रहणं व्रतं ॥ नियमव्यतिरेकेण सर्वं भवति निःफलं ॥ अभुक्त्वा प्रातराहारमित्येकवचनादर्थात् पूर्वदिने एकभक्तं कार्यं ॥ अस्योपवासाशक्तस्यैकभक्तं ज्ञेयं सूर्यादिदेवताभ्य इति ॥ सोमः सूर्यश्चन्यादिनाम तस्य पुराणोक्तपर्यायेण निवेद्येत्यर्थः ॥ ते श्लोकाः प्रयोगे वक्ष्यन्ते ॥ महाभारते ॥ गृहीत्वोडुंबरं पात्रं वारिपूर्णमुदङ्मुखः ॥ उपवासं तु गृह्णीयात्तथा संकल्पयेद्बुधः ॥ उदङ्मुख इति नियमग्रहणार्थं ॥ संकल्पयेत् मनसा नियमेदिति ॥ तथा गौतमः ॥ अन्तर्जलं करं कृत्वा सलिलं सकुशोदकं ॥ फलं समभिसंधायेति ॥ तथा कुंभसंभवः ॥ निष्कामानामनेनैव साक्षात्कारो भवेदिति ॥ साक्षात्कारः स्वेष्टदेवदर्शनं ॥ अनेन पुरश्चरणेनेति अत्र यद्यपि मनसा संकल्पयति वाचाभिलपति कर्मणा चापपादयति ॥ इति हारिस्मरणात् ॥ तस्माद्यत्पुरुषो मनसाधिगच्छति तद्वाचा वदति तत्कर्मणा करोतीति श्रुतेश्च मनसाधिगतस्य वाचाभिलापक्रियमाणो येन रूपेण मनसाधिगच्छति तेनैव वाचाप्यभिलापः कर्त्तव्य इति प्राप्यते ॥ अतो ऽमुककामेन मयाइदं कर्त्तव्यमिति मूलविषेषोल्लेख एव प्रतीयते ॥ तथा मासादिनामपुल्लेखः कर्त्तव्यः ॥ तथा ब्रह्मांडपुराणे ॥ मासपक्षतिथीनां च निमित्तानां च सर्वशः ॥ उल्लेखनमकुर्वाणेन तस्य फलभाग्भवेत् ॥ इति ॥ मासपक्षतिथीनां सर्वशः सर्वप्रकारेण सामान्यविशेषभावेन तत्र सामान्येन मासपक्षतिथिपदेन विशेषतः कार्त्तिक

शुक्लप्रतिपदादिपदेन द्वयेनेव ॥ इषे मास्यसिते पक्षे इत्यादि मुनिना प्रयोगनिर्णीतानां देशकालानां सर्वप्रकारेण ॥ तत्र सामान्येन भारतवर्षविदेन तस्य
कर्मफलहेतुत्वात् ॥ तदुक्तं विष्णुपुराणे ॥ इति संप्राप्यते स्वर्गो मुक्तिमस्मात्प्रयांति हि ॥ तिर्यक्त्वं नारकत्वं च यात्यतः पुरुषो मुने ॥ नखल्वन्यत्र मर्त्यानां क
र्मभूमिर्विधीयते ॥ इति विशेषणकाश्यादिपदेन कालस्यापि सामान्यत ॥ अथान्येन विशेषतः सूर्योपरागादि — — — नयैव मासादीनां निमित्ततया
मुख्यत्वद्वयप्रसंग. ॥ संयोगपृथक्त्वन्यायेन सकृदुक्तेरव सेवोभ–र्थत्वात् ॥ उक्ते परांगेव प्रयोगमकुर्वतः फलाभावश्चाभिहित ॥ अत एव गरुडपुरा
णे श्राद्धप्रकरणे ॥ ॐ अद्यास्मिन्देशे अमुकमासे अमुकराशिगते सवितरि अमुकपक्षे अमुकतिथावित्याद्युल्लेख ॥ अग्निपुराणे ॥ अद्य सोमार्कग्र
हणे संक्रान्त्यादौ सुतीर्थके इति तथा ॥ मकरस्थे रवौ माघे इत्युक्तं ॥ एवमन्येष्वपि वाक्येषु श्रूयते ॥ फलं चात्र मंत्रसिद्धिः सकामानां उक्तवचनात् ॥ नैवैहिक
मंत्रसिद्धिकाम इत्यभिलपनीयं ॥ उक्तनारदवचनेनोभयसिद्धेः पुरश्चरणफलत्वाभिधानात् इति ॥ तथा ॥ पूजात्रैकालिकी नित्यं जपस्तर्पणमेव च ॥ होमो
ब्राह्मणभुक्तिश्च पुरश्चरणमुच्यते इति कुंभसंभववचनेन जपादीनामेव पुरश्चरणशब्देनाभिधानाच्च पुरश्चरणमहं करिष्ये इति अभिलपनीयं
न च पुरश्चरणस्य विशेषमुपसाध्यत्वेनाद्यामुकतिथौ पुरश्चरणं करिष्ये इति क्त्वातोः कृतिमात्रार्थत्वात् क्रियायाः कृतिसामान्यान्वितत्वेन वर्त्तमान
तिथौ पयाकथापि वृत्त्या संपादितया तत्तिथौ कृते निर्विवादतोपपत्तिरिति ॥ अद्यारभ्य करिष्ये इति वा ॥ अतः परमशौचेपि न जपबाध ॥ तदुक्तं विष्णुना
यज्ञव्रतविवाहेषु श्राद्धे होमार्चने जपे ॥ आरब्धे सूतकं न स्यादनारब्धे च सूतकं ॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतजापयोः ॥ नांदीमुखं विवाहादौ श्राद्धे

याकपरिश्लिष्यति ॥ वस्तुतस्तु तान्त्रीकदीक्षावतारमशौचादिकं भवेपितिस्यार्वेन वाधो नास्ति ॥ जपो दीक्षार्थेन विधिः कार्यो दीक्षाचितैर्नरैः ॥ नास्ति पापं य
तस्तेषां सूतकं वा यतात्मना ॥ मिति देवीयांलवचनात् ॥ सूतके चैव धूमोद्गारादिके तथा ॥ जप्यं चार्घं तथा कुर्यात्मंत्रन्यासपुरःसरमिति ॥ मृडानीतंत्रवच
नात् ॥ शिवविष्ण्वर्चने दीक्षा यस्य चाग्निपरिग्रहः ॥ ब्रह्मचारीयतीनां च शरीर नास्ति सूतकमिति विष्णुयामलवचनात् ॥ सूतके मृतके चैव नित्यं विष्णु
मयस्य च ॥ स्नातु स्थानस्य विप्रेंद्र सद्यः शुद्धिः प्रजायते ॥ इति नारदपंचरात्रवचनात् ॥ उपासनं तु विप्राणां मंगशुद्धिः प्रजायत ॥ इति पराशरवचनाच्च
अत्र विप्राणामित्युक्तेः क्षत्रियादीनामधिकारो नास्तीति प्रतीयते ॥ ब्राह्मणास्यैव पूज्योहं शुचेरप्यशुचेरपि ॥ स्त्रीशूद्रस्यापि शंस्पर्शो वज्रपातात्सु
दुःसहः ॥ इति विष्णुवचनात् ॥ विप्रस्य तु सदैवाहं शुचेरप्यशुचेरपि ॥ पूजां गृह्णामि शूद्रस्य पुस्वा स्वाचारवर्ज्जिन इति ॥ शिववचनात् ॥ न चैवापूज्य भुंजी
न शिवलिंगमहेश्वरं ॥ सूतकं मृतके चैव न त्याजं शिवपूजनमिति ॥ लिंगपुराणवचनाच्चेति ॥ शूद्रस्येत्युपलक्षणं विप्रस्येत्युक्तत्वादिति ॥ एतत्तां
त्रिकपूजायामेव पंचयज्ञादौ तु नाधिकारः ॥ अग्निहोत्रादिकर्मार्थं शुद्धिस्तत्कालिके स्मृता ॥ पंचयज्ञान्न कुर्वीत ह्यशुचिः पुनरेव च ॥ स इति गौतमव
चनात् ॥ आदिपदेन तांत्रिकपूजादि गृह्यते ॥ तात्कालीको यावता नत्कर्म सिध्यति ॥ नैमितिककाम्यपूजायां तु तांत्रिकानामपि नाकारः ॥ सूतके
मृगके चैव वर्त्तमाने तु नारद ॥ कामतः पूजिते मंत्रे शांतीकारो चकुर्वीत् ॥ जपेत्स्वं च शतं मंत्री सिंहमंत्रस्य भक्तितः ॥ शतत्रयमयमकामात्त्वप्रा
यश्चित्तविधौ जपेदिति नारदपंचरात्रवचनात् ॥ अकामान्नैमित्तिकार्चने ॥ वायवीयसंहितायां ॥ एवंमुक्तविधानेन विछंनत्वेरितं विनाउक्तसंख्यं जपं कु

लामंगुष्ठाग्रेण तद्भवेत् ॥ प्रत्येकं वीजमादाय अंगुकाद्दूर्ध्वेन भैरव ॥ प्रतिवारं पठेन्मंत्रं नैरोशेन चालयेत् ॥ मालवीजं तु जप्तव्यं स्पृशेन्नहि परस्परं ॥ पूर्वंज
पप्रयुक्तेन चांगुष्ठाग्रेण भैरव ॥ पूर्ववीजं जपन्मन्तु परवीजं तु संस्पृशेत् ॥ अंगुष्ठेन भवेन्नस्य निष्फलः स जपः सदा ॥ मालां स्वहृदयासन्ने धृत्वा दक्षिणपा
णिना ॥ देवी विचिंतयन्नप्यं कुर्याद्वामेन न स्पृशेत् ॥ अंकाराद्दूर्ध्वेन अंगुष्ठाग्रेणात्यर्थः ॥ मालावीजेन संबंधी मणिः शैवागमे ॥ तर्जन्या न स्पृशेत्सूत्रं
कंपयेन्न विधूनयेत् ॥ न स्पृशेद्वामहस्तेन करभ्रष्टां न कारयेत् ॥ अक्षाणां चालनेंगुष्ठेनान्यमक्षं न संस्पृशेत् ॥ जपकाले सदा विद्वान्मेरुं नैव विलंघये-
त् ॥ परिवर्त्तनकाले च संघट्टं नैव कारयेत् ॥ कलिः खटखटाशब्दे दोलमाने चलन्मतिः ॥ चलिते चैव विछेदः स्फुटिते व्याधिसंभवः ॥ हस्तच्युते महाविघ्नः सू-
त्रछेदे विनश्यति ॥ चलिते मध्यमायां अंगुल्यंतरगते ॥ स्फुटिते मणौ सूत्रछेदे गुणछेदे वीत्यर्थ ॥ तथा ॥ काशेप्सुते वर्ज्जं मायामेकमावर्त्तनं त्यजेत् ॥ प्रमा-
दावर्त्तनं त्यजेत् ॥ आवर्त्तनं मंत्रस्य ॥ जपे निषिद्धसंस्पर्शे क्षालयित्वा पुनर्जपेत् ॥ योगिनीतंत्रे ॥ सर्वासपि च मालासु मेरुः पार्श्वे विधीयते ॥ न स्पृशे-
त्तेकदाचित्तु एषे ह्यावर्त्तनं त्यजेत् ॥ आवर्त्तनं मंत्रस्य ॥ जपे निषिद्धसंस्पर्शे क्षालयित्वा पुनर्जपेत् ॥ योगिनीतंत्रे ॥ सर्वास्वपि च मालासु मेरुः पा-
त्वा गुरुं संतोष्य तस्मै पवित्रं दत्वा पूर्णाहुतिं हुत्वा न्त्ययेपवित्रैं समर्प्य गुर्वनुज्ञया स्वयमपि पवित्रधारणं कृत्वा सामयिकानन्यानपि व्राह्मणा
दीन्पवित्रमादानदक्षिणादिभिः परितोष्य पूजाशेषं समाप्य व्राह्मणान् भोजनभूरिदक्षिणादिभिः तोषयेत् इति पवित्रारोपणविधिः॥ इयं पवि
त्रारोपणपूजात्र्यावश्यकीश्वकरणेनिदंश्रवणात्॥ तथा कुलमूलावतारे॥ पवित्रकेणानेन पूर्वमाराधितः शिवः॥ प्रसादाभिमुखो भूत्वा
तस्मैवरमदाद्विभुः॥ प्रतिवर्षं न कुर्वंति पवित्रारोपनान्निये॥ तेषां सांवत्सरि पूजा तव कृत्स्न भविष्यति॥ ततः प्रभृति कुर्वंति शिवभक्ताः पवित्र
कं॥ त्राराधकैश्च कर्त्तव्यं कामाः चारश्च योगिनः॥ कुर्यान्मिथुनसंक्रान्ते तुलासंक्रमणावधि॥ पक्षद्वयेपि पूजास्याच्चतुर्थ्यामष्टमीदिने
नवम्यां च चतुर्दश्यां पवित्रारोपणं चरेत्॥ सौवर्णं राजतं ताम्रं कृतादिषु यथाक्रमं॥ कलौ कार्पासजं वापि यथाशक्ति पवित्रकं॥ कर्त्ति
तं द्विजकन्याभिस्त्रिगुणं त्रिगुणीकृतं॥ धौतं शुक्लं शुभं सूत्रं मनसदप्सुपयुज्यते॥ पटवल्कलंपक्षास्यं क्षौमदार्भसरोद्भवं॥ मुंजादिसंभ

154

णिकुर्यात्॥इत्थंपूज्यावरदेवंदशमंसंख्यानिपवित्राणिकृत्वाष्टोत्तरशतसरंग्रंथियुक्तंविनानात्रपूजाविस्तरमानंदैर्घ्यमेकंवृहत्यवि
त्रंकृत्वात्मनश्चागमज्ञानांशिष्याणांवक्षधादिनाभिपर्यंतंदैर्घ्यमुक्तयक्षेत्रयेत्वेकपक्षानुसारमरग्रथीयुक्तानीपवीत्राणीकुर्यात्
अन्येषांसामान्यपवित्राणिएकग्रंथियुक्तानियथेष्टसंख्यातंतुभिःपरिधानउमाणादैर्घ्याणिकुर्यात्॥अथग्रंथिषुसूत्रवेष्टनसंख्यानूत्तम
विपत्रेषुषट्त्रिंशन्मध्येचतुर्विंशतिकनिष्ठेषुद्वादशइतिकवचमंत्रेणग्रंथयःकार्याः॥इत्थंपवित्राणिविधायपवित्रारोपणंदिनात्पूर्वदि
नेसाधकःकृतनित्यकृत्योरात्रौसमपिभिःसार्द्धंपणिपूजास्थानमानीयतत्रसिंदूरादिनाकुंकुमरक्तचन्दनकस्तूरीकर्पूरलाक्षागैरिकाद्यै
र्ग्रंथिस्थानेषुविचित्रितानिपवित्राणिसंस्थाप्यतेषांसूत्रेषु॥ॐकारायनमः॥चन्द्रमसे॰वह्नये॰ब्राह्मणे॰नागाय॰गुरवे॰रवये॰सदाशि
वा॰सर्वदेवेभ्योनमःइतिसंपूज्यशिरोमंत्रेणाभिमंत्र्यहृन्मंत्रेणाभ्युक्ष्यास्त्रमंत्रेणावस्तंभ्यतेषांदशग्रंथिषुॐक्रियायैनमः॥ॐपौरुष्यै॰वीरा
यै॰गायत्र्यै॰अपराजितायै॰विजया॰जया॰मुक्तिदायै॰सदाशिवायै॰मनोन्मन्यैनमः॥इतिदशशक्तीःसंपूज्यपवित्रेषुमूलमंत्रेणाधू
पगंधमंत्रैश्चसंपूज्यसुगंधपुष्पाणिपंचरत्नानिसर्वौषधीश्चनिक्षिप्यनूतनवस्त्रेणाच्छादयेत्॥इत्याधिवासनं॥पंचरत्नानि॥नित्युथ्यादि
त्यपुराणेवज्रमुक्ताफलंनीलंपद्मरागंतथैवच॥मरकतेनसमायुक्तंपंचरत्नमिदंविदुः॥वज्रंहीरकं॰मरकतंपानुइतिप्रसिद्धं॥सर्वौषधयस्तु
सिद्धार्थकुष्ठरजनीद्वयलोध्रमुस्तालायच्छैलफलफलिनिद्वयमांसयुक्ताः॥इतिस्मृत्युक्ताः॥सिद्धार्थसर्षपा॥रजनीद्वयहरिद्रादारुहरिद्रा

युगेहेवरारोहेवह्निगेहेतुमारणे ॥ तत्तद्भूतोदयेकालेतत्तन्मंडलमुद्धरेत् ॥ तंत्रराजे ॥ मूलाधारोद्भवोवायुःप्राणाद्याख्यांसमश्नुते ॥ सतुपंचवि
धोद्भूतभेदाद्भवदेशतः ॥ नासायाःपुटयोःपार्श्वेतुगमध्याधरंध्रगाः ॥ प्राणानिलौवुखान्मानःपवस्पूर्यथाक्रममिति ॥ अस्यार्थ ॥ नासा
रंध्रेणनिर्गच्छन्वायुःर्यदातिर्यक्चलतितदावायुभूतोदयःकालयदोर्ध्वंचलतितदाग्नेरुदयः ॥ यदात्वधश्चलतितदाजलोदयः ॥ यदाम
ध्यगतस्तदाकाशभूतोदयःकालइति ॥ कुलप्रकाशतंत्रे ॥ मंडलानिमहेशानिभूतानांशृणुवल्लभे ॥ आकाशमंडलंधूम्रंवर्तुलंपरिकीर्त्तितं ॥
षट्कोणमंडलंवायोःकृष्णंषड्बिंदुलांछितं ॥ स्वस्तिकंत्रिकोणंतुरक्तंवह्नेस्तुमंडलं ॥ अर्धचंद्रनिभंस्वच्छंपद्मद्वयविराजितं ॥ आप्यमंडलमा
ख्यातंचतुरस्रंमहेश्वरी ॥ अष्टवज्रयुतंपीतंधरामंडलमीश्वरी ॥ तत्तद्बीजसमायुक्तंमंडलंपूजयेत्क्रमात् ॥ तत्तद्वर्णेनतन्निर्मायद्रव्येणापरमेश्वरी
शारदातिलके ॥ तत्तद्भूतसमानानिमंडलानिविदुर्बुधाः ॥ वर्णैस्वैरचितान्याहुःस्वस्वनामावृतान्यपिइति ॥ अत्रस्वनामावृतानित्यस्यतट्टीकाकृ
ताराघवभट्टेनवंव्याख्यानेकृतंवक्ष्यमाणभूतलिपितंत्रेषुतत्तद्यंत्रलिपियंत्रेषुतत्तद्ग्रंथलिखितमंत्रेणावृतानीतिसांप्रदायिकावदंति ॥
ब्रह्मयामले ॥ अथकर्मप्रवक्ष्यामिसर्वदिक्षुयथाक्रमं ॥ दिक्पूर्वाभिमुखोभूत्वावश्यार्थंकारयेत्सुधीः ॥ दक्षिणासामुखोभूत्वासर्वाभिचा
रकर्मसु ॥ धनसिद्धिमवाप्नोतिपश्चिमाभिमुखस्थितः ॥ उत्तराभिमुखःकुर्यात्सर्वंशांतिकरंपरं ॥ आग्नेयाभिमुखोभूत्वासर्वाभिचारकर्म
सु ॥ नैरृतीदिशिमाश्रित्यविद्वेषंकारयेत्प्रिये ॥ वायवीदिशिमाश्रित्यशत्रोरुच्चाटनंभवेत् ॥ इशानिंसमुमाश्रित्यसर्वज्ञानंप्रसाधयेत् ॥ अ

वंस्त्रंपवित्रायप्रशस्यते ॥ इति ॥ आविःपुराणे ॥ दक्षिणामूर्त्तिः ॥ आषाढ उत्तमो मासः श्रावणो मध्यमो भवेत् । हीनो भाद्रपदो मासः पक्षौ
सितासितेतरे ॥ प्रशस्तः शुक्लपक्षस्तु न दला भे मितेतरइति ॥ इति नैमित्तिकपूजा ॥ अथ काम्यपूजा ॥ तत्र श्रीकुलमूलावतारे ॥ शृणु दे
वि प्रवक्ष्यामि काम्यकर्माणि सुंदरी । यानि ज्ञात्वाखिलानंदेवीमंत्री कामानंस्तमश्नुते ॥ षड्विधानि हतानि स्युः शृणु देवी यथाक्रमं ॥ शांति व
श्यं स्तंभनं च विद्वेषोच्चाटमारणे ॥ शांतिर्नाम मनुष्याणां रोगकृत्यादिनाशनं ॥ वश्यं स्त्रीराजलोकानां स्वापतीकरणं मतं ॥ क्रोधोद्योगानीनां तु ति
रोधस्तंभनं मतं ॥ राज्ञादीनां गजव्याघ्रसर्पादीनामपि श्वरीति ब्रह्मयामले ॥ अग्निघायस्तथा सैन्यं वीर्यविद्यं महौषधं ॥ विषदंष्ट्रादि सर्वेषां
स्तंभनं कर्म कारयेत् ॥ तथा ॥ अन्योन्यं वैरजननं स्निग्धानां द्वेषणं मतं ॥ उच्चाटनं तु विषतां देशादिभ्यः प्रवासनं ॥ मारणं प्राणहरणं शत्रूणा
मीरितं प्रिये ॥ मारणं वर्जयेद्विद्वान् त्यांश्चापि सुधार्मिकान् ॥ स्त्रीजनव्यतिरिक्तेषु राजवैरिषु योजयेत् ॥ स्वरोषतो वा लोकानां रक्षार्थं वा तदावरेत्
न तु लोभाज्ञया वापि कुर्यान्मंत्री तु मारणं ॥ प्रायश्चित्तं तु कर्तव्यं देवि तद्दोषशांतये ॥ अयुतं प्रजपेन्मंत्रं जुहुयात्तावदीश्वरि ॥ सघृतैः पायसैर्देवि
तिलैर्वा वीरवंदिते ॥ आत्मरक्षा च कर्तव्या कर्मकाले महाबुधैः ॥ षोढा विभज्याहोरात्रं वसंतादिक्रमात् क्रमात् ॥ हेमंते शांतिकं कुर्याद्वसंते वश्यक
र्म च ॥ शिशिरे स्तंभनं प्रोक्तं ग्रीष्मे विद्वेषणं प्रिये ॥ प्रावृट्युच्चाटने शस्ता शरन्मारणकर्मणि ॥ अथाकर्षणोपि वशंतकाल एव ग्राह्यः ॥ तयोरेकफ
लकत्वेनाभेदात् ॥ शांतिकर्मणि देवेशि पूजयेद्वारिमंडले ॥ वश्यायमंडले वह्नेः स्तंभनावनिमंडले ॥ विद्वेषणे व्योमगेहे यजेदुच्चाटने प्रिये ॥ वा

कशाशनंभद्रेसर्वसिद्धिकरंपरं॥ मोहनेराजनेचैवस्तंभनेताम्रमासने॥ मारणोच्चाटनेचैवविद्वेषेचाभिचारके॥ सर्वाकर्षणकार्येषुचासने
चायसंविदुः॥ तोतलामते॥ शृणुदेविप्रवक्ष्यामिकाम्यकर्माणिदेवताः॥ आदौसमर्चयेद्विघ्ननिवृत्तये॥ ततोर्च्चयित्वावासेसोतिथीशान्
क्षदेवताः कर्माधिदेवतांपश्चात्पूजयेद्विधिवत्प्रिये॥ ततोर्च्चयेदिष्टदेवंतत्कर्मोक्त—विग्रहं॥ तत्कर्मोक्तविधिनाततन्मंडलमध्यगं॥ तत्क
र्मोदितेकुंडेजुहुयाद्विधिवत्प्रिये॥ तत्कर्मोदितैर्मंत्रैस्तत्कर्मोक्तमुद्रया॥ मुद्रांतुवुत्सयामले॥ होमेमुद्रात्रयंप्रोक्तंमृगीहंसीचसूकरी॥ सू
करीकरसंकोचीमृगीमुक्तकनिष्ठिका॥ हंसीस्यात्तर्जनीमुक्तात्रिधामुक्ताप्रकीर्त्तिता॥ शांतिकेपौष्टिकेचैवमारणोच्चाटनेतथाविद्वेषस्तं
भनेचैववश्येचपरमेश्वरी॥ शांतिकेचमृगीज्ञेयाहंसीपौष्टिककर्मणि॥ अभिचारेसौकरीस्यान्मारणोच्चाटनादिषु॥ पंचमीश्वरीतंत्रे॥ तर्पणा
नांक्रमंवक्ष्येमंत्राणांपंचमांककं॥ हरिद्रामिलितंतोयंमोहनेभवतिध्रुवंकुंडस्नोदकंसमरिचंमारणेविहितंभवेत्॥ उच्चाटनेमेषरक्तमि
श्रितंजलमाहरेत्॥ जानुभ्यामवनींगत्वाक्रियामुस्तंभनस्यवै॥ वामपार्श्वेनिषणः सन्पंचधातर्पणंमतं॥ पिंगलामते॥ शृणुदेविप्रव
क्ष्यामिवारतिथ्यादिदेवता॥ रवौसूर्यशिवोदेवीचंद्रेमाविकेतनाः॥ भौमेतुमंगलगृहोवुधविष्णुततःपरे॥ परेगुरुश्चतुर्वक्त्रोभृगौशुक्रपुरंद
रो॥ मंदेशनैश्चरःकालावारेशादिविकीर्त्तिताः॥ परेवुधवारेपरेगुरुवारेतथा॥ ब्रह्माविधाताविष्णुश्चयामःशीतकरोग्रहः॥ इंद्रश्चवसवो
नागाधर्मःशिवदिवाकरौ॥ मन्मथश्चकविश्चैवविश्वेदेवास्तिथीश्वराः॥ दर्शेतुपितरोदेवीपूज्याःसर्वोपचारकैः॥ अश्विनौचयमोवह्नि

156

त्रयत्रापि स्तंभने दिगनुक्ता ॥ तथापि दिगत्र कौतु पूर्वास्या स्सर्वकर्मसु सर्वदा इति योगिनीतंत्रवचनात् पूर्वाभिमुख एव स्तंभने कर्म कुर्यादिति
सारसंग्रहे ॥ रतिवाणीरमाज्येष्ठा दुर्गाकालीति षट्क्रमात् ॥ षट्कर्मदेवताः प्रोक्ताः कर्मादौ ताः प्रपूजयेत् ॥ ज्येष्ठा धूमावती· काली· भद्रकाली· तत्त
त्कर्मादौ तत्तदधिदेवतां पूजयेदित्यर्थः ॥ तथापि पद्मपाशगदाख्याश्च मुशलाशनिखड्गकाः ॥ मुद्राः षट्कर्मसु प्रोक्तास्तत्तत्कर्मणि योजयेत् ॥ प
द्मं च स्वस्तिकं चैव विकटोत्कटसंज्ञके ॥ वज्रं भद्रासनं चेति वासनानि विदुः क्रमात् ॥ त्रैलोक्यडामरतंत्रे ॥ नमोन्तः शांतिके पुष्टौ प्रतिपातेव की
र्त्तितः ॥ वश्याकर्षणहोमेषु स्वाहांतः सिद्धिदायकः ॥ वौषट्पल्लवसंयुक्तो मंत्रः पुष्ट्यादिसाधने ॥ हुंकारपल्लवोपेतो मारणोच्चाटनं विना
मंत्रभंजनकार्येषु घोरभयनाशने ॥ वषडंतो महाकालग्रहमालाविनाशकः ॥ खंडनोच्चाटने वेधे मंत्रः फट्पल्लवान्वितः ॥ ॐकारमुख
रो मंत्रो वेदागमसमुद्भवोपल्लवो स्वागमे मंत्रे वैदिके नास्ति पल्लवः ॥ पल्लवेन विना जप्यो मंत्रो वेदसमुद्भवः ॥ न नग्नः कीर्त्यते यस्मादैश्वर्य
परिधानवान् ॥ नमोन्त इत्याद्युक्तमेन तत्पल्लवषट्कं काम्यजपेन तु कामनाभेदे मूलमंत्रांते योज्य ॥ नग्न इति ॥ पल्लवेन विना मंत्रो नग्नः स
परिकीर्त्तितः ॥ इति स्वयमुक्तो दोषः ॥ वेदमंत्रस्तु सदा दोषरहित इत्यर्थः ॥ ब्रह्मयामले ॥ गजचर्म स्तंभने च मारणे महिषं तथा ॥ मृगचर्म तथोच्चा
टे छागलं वश्यकर्मणि ॥ विद्वेषे जांबुकं चर्म गोचर्म सीमोहनं ॥ चित्रकं मोक्षदं चैव सुखार्थे रुरुचर्मणि ॥ अभिचारणे सर्वाणि मेषचर्म
णि कारयेत् ॥ सर्वविज्ञानकार्येषु श्वेतकंबलमासनं ॥ नानाविधेषु कार्येषु व्याघ्रचर्म समीरितं ॥ खड्गचर्मासनं कार्यं पितृमोक्षकरं परं ॥ शांतौ

॥ शि॰व ॥
॥१५७॥

धनस्य च ॥ कृतज्ञस्य वदान्यस्य गुरुदेवार्चनस्य च ॥ सुशीलस्य सुभक्तस्य कुर्यान्नान्यस्य सुंदरी ॥ राजा कारपिता देवी साधकं प्रणिपत्य च
वृणुयात्कर्मकर्त्तारं दीक्षोक्तविधिना ततः ॥ साधकोपि महादेवी सम्यक् संतोषवान् शुचिः ॥ जितेंद्रियो जितक्रोधविवर्जितः ॥ नित्यनै
मित्तिकरतः कुर्यात्काम्यानि पार्वति ॥ क्रूरकर्मसु देवेशि कर्म कृत्वा यथाविधि ॥ तेलाभ्यक्तपुनः स्नातः सांगां सावरणां बुधः ॥ अभ्यर्च्य दे
वतां सिद्धामात्मरक्षार्थमद्रिजे ॥ जपन्मंत्रं प्रसन्नात्मा सहस्रं साधकः प्रिये ॥ मांरक्ष रक्षेत्युक्त्वा च प्रणम्य विसृज्य द्विवे ॥ अन्येसुहृद्भिः सुस्निग्धै
रात्मरक्षां तु कारयेत् ॥ मंत्रजयादिभिर्देवी प्रयोगस्थेन वा गुना जपहोमार्चनाद्यैश्च ब्राह्मणाराधनादिभिः ॥ प्रयोगकरणे यत्नान् ज्ञातव्यं
मंत्रिणा प्रिये ॥ गुरुतः शास्त्रतः श्चापि सम्यग्विज्ञाय साधकः ॥ प्रयोगं नाचरेद्देवी नान्यथा दुःखमाप्नुयात् ॥ ततः कारयिता राजा तोषयेत्
साधकं शनैः ॥ प्रणिपत्य मुहुर्देवि यथास्य तुष्टिमांस्तथा ॥ अन्यथा निष्फलं भूया तस्मात्तं तोषयेत्प्रिये ॥ प्रयोगकाले ज्ञातव्यपदार्थास्तु ॥ श्री
कुलार्णवे ॥ एवं न्यासजपध्याने ॥ सहोमार्चनतत्परः ॥ मंत्री सिद्धतनुर्देवि साक्षात्परशिवो भवेत् ॥ ततः स्वमनसोभिष्टान्प्रयोगान्कुलनायि
के ॥ मंत्रेणानेन मतिमान्साधयेद्भुक्तिमुक्तये ॥ सिद्धमंत्रस्य सिद्ध्यंति निषिद्धकर्माणि न संशयः ॥ नैव सिद्ध्यंत सिद्धस्य देवताशापमाप्नुयात् ॥ का
म्यप्रयोगकर्तृणां परलोको न विद्यते ॥ प्रयोगसिद्धिरेवैषां फलमन्यं न विद्यते ॥ एकस्य हि विधानस्य न कुत्रापि फलत्रयं ॥ देवेशि दृश्य
तेतस्मात्त्रिः कामादेवतां भजेत् ॥ होमतर्पणयंत्राद्यैर्नानाध्यानविशेषकैः ॥ आत्मनश्च परस्यापि षट्कर्माणि समाचरेत् ॥ प्रयोगांते च

157

॥ रामः ॥
॥१५७॥

ब्रह्मेदुश्च शिवो दितिः ॥ गुरुकद्रूजपितरो भर्गोर्यमदिनेश्वराः ॥ त्वष्टा वायुरथैंद्राग्निमित्रश्चेंद्रस्ततःप्रिये ॥ निऋतिश्चैव तोयं च विश्वेदेवाः
प्रजापतिः ॥ विष्णुश्च वसवो देवी वरुणश्चाजएकपात ॥ अहिर्वुध्नश्च पूषा च प्रोक्ता नक्षत्रदेवता ॥ एतासर्वापवारेस्तु तद्दिनेषु समर्पयेत ॥
श्रवणाद्येश्चतुर्थी हृदंते नामभिरीश्वरी ॥ अत्र इंद्राग्निइत्येकस्यैव नक्षत्रस्य देवताद्वयं ज्ञेयं ॥ विशाषनक्षत्रमिंद्राग्निदेवते इति श्रुतेः ॥ उत्त
राषाढनक्षत्रस्य विश्वेदेवाः ॥ श्रवणस्य विष्णुः एतयोर्मध्ये प्रजापतिरिति यदुक्तं तदभिजिन्नक्षत्रमुद्दिश्य ॥ अभिजिन्नाम नक्षत्रं उप
रिष्टादाषाढानामधस्ताच्छ्रोणायेइति श्रुतेरेतयोर्मध्ये अभिजिदिति कीमपि नक्षत्रमस्ति तत्तु ज्योतिशास्त्रादवगंतव्यं ॥ पंचमीश्वरीतंत्रे
॥ ततः काम्यानि कुर्वीत सिद्धमंत्रो दृढव्रतः ॥ गुरुभक्तः शुचिः शांतः काम्यकर्मविधानवित् ॥ आत्मनश्च परस्यापि षट्कर्माणी महेश्वरी ॥ आ
र्द्रीमघा मारणेषु स्वाती त्रासीव मोहने ॥ स्तंभने भरणी चित्रा द्वेषे तिष्यपुनर्वसु ॥ उच्चाटने तथा स्वातौ कथितं ऋक्षसंज्ञके ॥ वाशिष्टकेले ॥ न
क्षत्राणि ध्रुवक्षाणी प्रारंभे सर्वकर्मणां ॥ आज्ञायां सर्वकर्माणि स्त्रायुष्यं वैल्लवि तथा ॥ शांतिपराभिचाराणां मपमत्तुजपं तथा ॥ त्रिषूत्तरा
सु पूर्वासु जनर्क्षेष्वपि च त्रिषु ॥ संपत्तिद्धिचमैत्रेषु सर्वेष्वपि च कारयेत ॥ विद्वेषोच्चाटनादीनि क्रूरकर्माणि कारयेत् ॥ नक्षत्रेषु च क्रूरेषु कृ
त्वा सिद्धिं गमिष्यति ॥ मैत्रनक्षत्राणि तु ॥ चित्रानुराधामृगशिररेवतीनक्षत्राणि ॥ क्रूरनक्षत्राणि तु पूर्वात्रयभरणीमघाख्यानि ॥ तथा पं
चमीश्वरीतंत्रे ॥ षट्कर्माणि परार्थे यः कुर्यान्मंत्रविदुत्तमः ॥ राज्ञो वा राजपात्रस्य धनाढ्यस्य नरस्य च ॥ आस्तिकस्यातिभक्तस्य न्यायार्जित

कुलप्रकाशतंत्रे ॥ श्वेतद्रव्यैर्यजेच्छान्त्यामीरक्तैर्वश्यकर्मणि ॥ स्तंभने पीतवर्णैश्च धूम्रैर्विद्वेषणो जयेत् ॥ उच्चाटने मारणे च कृष्णद्रव्यैः प्रपूजये
त् ॥ आत्मानं तादृशैरेव वस्त्राद्यैर्भूषयेत्तदा ॥ स्वंषट्कर्मणां देवि साधारणमुदाहृतं ॥ विशेषस्तु महेशानि तत्तत्कलोदितो भवेत् ॥ इति विज्ञाय
सकलं गुरुतः शास्त्रतः प्रिये ॥ कुर्यात्कर्मानि कर्माणि तानि सिध्यंति सुंदरि ॥ अन्यथा क्रियमाणानि नैव सिध्यंति मंत्रिणां ॥ गुरुभक्तिः सदा
कार्या कर्मकाले विशेषतः ॥ ऐहिकामुष्मिकाणां तु गुरुरेव परायणं ॥ कर्मणां परमेशानि तस्मात्तद्भक्तिमान्भवेत् ॥ अथ काम्यकर्मप्रयोगः
तत्र काम्यानि तु षट्कर्माणि तानि तु ॥ शांतिवश्यस्तंभनविद्वेषणोच्चाटनमारणाख्यानि ॥ तत्र शांतिर्नाम प्राणिनां रोगकृत्यागृहाद्युपद्रव
निवृत्तिः वश्यं नाम राजामात्यवनितादीनां स्वायत्तिकरणं स्तंभनं तु राजादीनां क्रोधोगप्रवृत्तिनिरोधः विद्वेषणं तु स्निग्धयोरन्योन्यद्वेषजननं
उच्चाटनं तु द्विषतः देशादिभ्यः प्रवासनं ॥ मारणं प्राणहरणमिति ॥ तत्र मारणे ब्राह्मणधार्मिकजनधार्मिष्ठजनधर्मिष्ठराजास्त्रीजनव्यति
दुष्टम्लेच्छांदयो विषयः ॥ तत्रापि स्वरोषतो लोकानुग्रहाय वान्यं कर्म कुर्यात् ॥ न तु द्रव्यादिलोभेन ॥ भक्तैरन्यैश्च शिवभक्तैः स्वेष्टदेवताभज
नं ॥ मृत्युंजयजपादिकं च करणीयं ॥ अथ शांतिकर्मणि साधकः कृतनित्यकृत्यः षोडशविभक्ताहोरात्रस्य वसंतादिषड्ऋतुभूतस्य हेमंता
ख्यं पंचमखंडे कर्पूररजसा स्वेततंडुलचूर्णेन वा स्वदेहे तु जलभूतोदयकाले विपुलमर्धचंद्राकारं जलमंडले सृंगद्वयेपि पद्मलांछितं प्रा
गुक्तं पंचवर्णभूतेषु जलवर्णादशाकारमेव वक्ष्यमाणमूतलिपियवेषु जलयंत्रकर्णिकालिषितमंत्रेण वेष्टितमेकांते सुममृतलेगामयोप

158

कपूजान्तथा मंत्री समाचरेत् ॥ एकलक्षं जपेन्मंत्री ध्यानन्याससमन्वितः ॥ प्रयोगदोषशांत्यर्थमात्मरक्षार्थमेव च ॥ न चेन्न फलमाप्नोति॰
देवताशापमाप्नुयात् ॥ तिथिवारर्थकरणयोगमासर्तुपक्षकं ॥ दीपेश कूर्मचक्राणि ज्ञात्वा कर्माणि साधयेत् ॥ ऋषिं छंदो देवतां गत्वा सध्या
नार्चनादिकं ॥ बीजं शक्तिं कीलवेधौ ज्ञात्वा मंत्राणि साधयेत् ॥ पंचवुध्यासनप्राणायामन्याससमालिकाः ॥ दोषसस्कारशुध्यादीन्ज्ञात्वा॰
कोष्टं बांधवताराख्यराशिवर्णानकूलतां ॥ भूतमैत्रं तथा शुंतं ज्ञात्वा मंत्राणि शोधयेत् ॥ मंत्रविद्याभेदनिद्राबोधाग्नीषोमरूपकं ॥ पुंस्त्रीनपुं
सकाद्यैश्च ज्ञात्वा मंत्राणि शोधयेत् ॥ ग्रथवासनदिग्वंधनाडितत्वानुसंगतिं ॥ देवतात्मकालमुद्रांश्च ज्ञात्वा॰ ॥ साध्यसाधककर्माणि खखनि
डव्यपंचकं ॥ स्थानं यंत्रप्रमाणं च ज्ञात्वा यंत्राणि साधयेत् ॥ उत्पत्तिरसनावर्णमूर्त्तिसंस्कारसंस्थितिं ॥ कुंडरेखाप्रमाणादि ज्ञात्वा होमं
समाचरेत् ॥ अग्निप्रभाधूमवर्णध्वनिगंधशिखाती ॥ हुतवेशादिकं ध्यात्वा कथयीत शुभाशुभं ॥ मंत्रतत्वानुसंधानं देहावेशादिलक्षणं
मंत्रोच्चारनभेदं तु ज्ञात्वा मंत्राणि साधयेत् ॥ तत्र काम्यप्रयोगेषु ध्यानभेदमाह डामरे ॥ तुष्टिपुष्ट्यादिकीर्त्तीनां सिद्धये सर्वकर्मणां ॥ यथा ध्या
नेन तथा कुर्यात्पूजने जपकर्मणि ॥ कुर्वीनां देवतानां च शांतये सर्वकर्मणां ॥ शुद्धस्फटिकसंकाशं ध्यानं स्यात्पूजने मतं ॥ वश्ये रक्ततरं ध्यानं ध्या॰
त्वा भवति सुप्रभवः ॥ सर्वरत्नतिभाकारं ध्यात्वा निश्चलमानसः ॥ सर्वान्कामानवाप्नोति क्कवमुक्ते मयानव ॥ कल्यांताग्निसमं पुंड्वे ध्याने प्रो॰
क्तं सम्मं भुवा ॥ महाशोषसमायुक्तं ध्यानं वारि मेवन ॥ पीयूषवर्णसंयुक्तं पूर्णचंद्रसमप्रभं ॥ ध्यानं कृत्वा लभेत्सत्यं श्रीयं सर्वान्मनोरथान्

पांध्यात्वावाङ्मसकलीकृत्यपद्ममुद्रांप्रदर्श्यतंत्रोक्तमंत्रेणषोडशोपचारैःपंचोपचारैर्वासंपूज्यतदनुज्ञयास्वपुरतःपूजाचक्रंनिर्मी
यनित्यपूजोक्तविधिनागुरुनमस्कारादिसमस्तन्यासजालंविधायमानपूजादिपीठपूजांतंकृत्वासुश्वेतवर्णेतस्मिंश्चक्रेदेवमावाह्य
यथोक्तरूपंसुश्वेतंध्यात्वाश्वेतगंधपुष्पादिश्वेतवस्तुभिःसंपूज्ययथाविध्यंगावरणपूजादिसर्वंनित्यपूजावत्कुर्यादिति ॥ अथवश्यप्रक
र्मणिसाधकःकृतनित्यकृत्यावारेशादीनर्चयित्वारक्तवस्त्रादिभूषणोवसंताख्यदिवसस्यप्रथमखंडेवह्निभूतोदयेसिंदूरादिनोर्ध्वा
ग्रंत्रिकोणंकोणत्रयेपिस्वस्तिकलांछीनपूर्वोक्तपंचभूतवर्णेषुवह्निवर्णादशकगर्भंवक्ष्यमाणभूतलिपिमंत्रेणवह्नियंत्रमध्यलिखित
मंत्रवेष्टितंवह्निमंडलंकृत्वारंवह्निमंडलायनमः ॥ इतिमण्डलंसंपूज्यतत्रपूर्वाभिमुखपूजितेस्वासनेस्वस्तिकासनेनोपविश्यपाशमुद्रा
मुद्रितकरःसरस्वतीकर्माधिदेवतांसंपूज्यपाशमुद्रांप्रदर्श्यतदनुज्ञयास्वपुरतःप्राग्वत्पूजाचक्रंसिंदूरादिरक्तद्रव्येणाधृततत्रोक्तविधि
नादेवमावाह्यरक्तवर्णांध्यात्वानित्यपूजोक्तक्रमेणसांगसावरणांदेवंरक्तगंधपुष्पादिःसंपूज्यसम्यक्परितोषयेदिति ॥ ⁘ ॥ स्तंभनक
र्मणिसाधकःकृतनित्यकृत्योवारेशादीन्समभ्यर्च्यदिवसस्यषष्ठेभागेशिशिराख्यभूमिभूतोदयकालेप्राग्वत्पीतद्रव्यैर्हरिद्रादिभिश्चतु
रस्रंभूमिमंडलंवज्रलांछितंपूर्वोक्तपंचभूतवर्णेषुधाराभूतवर्णादशकगर्भंभूतलिपियंत्रेणभूयंत्रमध्यगतमंत्रवेष्टितंविपुलंचक्रंविर
च्यलंभूमिमंडलायनमः ॥ इतिसंपूज्यतत्रप्राङ्मुखःपीतासनेधारपूजादिपूर्वकमुपविश्यपीतद्रव्यैःस्वपुरतःपूज्यचक्रंसमुद्धृत्यपी

लिङ्गे कृत्वा वंवारिमंडलाय नमः ॥ इति संपूज्य तत्र स्वासनमास्तीर्य प्राग्वक्त्रं पूज्यनत्रोतराभिमुखउपविश्य अद्येत्यादि अमुकस्य रोगादिशां
न्त्यर्थं श्रीपरमेश्वरपूजनमहं करिष्ये इति संकल्प्य कवित्वीठांतरे प्रथमं गणेशं संपूज्य प्रयोगदिवसस्य वारेशठ्यतिथीशनक्षत्रेशान् पृ
थक्पृथक् सर्वोपचारैः संपूज्य पश्चात्तत्कर्माधिदेवतां सर्वोपचारैः सांगां सावरणां संपूज्य तदा तत्र या वक्ष्यमाणा ततन्मंडले तत्तत्कर्मानुरूपद्र
व्याधिभिः स्विष्टदेवतां सांगां सपरिवारां सम्यक्तमर्चयेत् ॥ तत्र वारेशास्तु ॥ रवौ सूर्यशिवौ० सोमे सोमांबिके० भौमे मंगलगुहौ० सौम्ये बुधवि
ष्णू० गुरौ गुरुचतुर्मुखौ० भृगौ शुक्रेंद्रः ॥ मंदे शनैश्चरकालौ ॥ तिथीशास्तु प्रतिब्रह्मा द्वितीयायां विधाता तृतीयायां विष्णुः चतुर्थ्यां यमः पंच
म्यां चंडः पंचम्यां चंडः षष्ठ्यां गुहः सप्तम्यां मिंडः ॥ अष्टम्यां वसव ॥ नवम्यां नागाः दशम्यां धर्म ॥ एकादश्यां धर्म ॥ द्वादश्यां सूर्यः त्रयोदश्यां कामः
चतुर्दश्यां कालिः पौर्णिमास्यां विश्वेदेवाः अमावास्यायां पितरः ॥ नक्षत्रदेवतास्तु अश्विन्यामश्विनौ २ यम ३ अग्नि ४ ब्रह्मा ५ चन्द्र ६ शिव ७
दितिं ८ गुरु ९ सर्पाः १० पितरः ११ भग उत्तराफाल्गुन्यां १२ अर्यमा १३ सूर्य १४ त्वष्टा १५ वायु १६ इंद्राग्निः १७ मित्रः १८ चंड १९ निरृति २० आप
२१ विश्वेदेवाः अभिजित्प्रजापतिः २२ विष्णुः २३ वसव २४ वरुण २५ अजएकपात् २६ अहिर्बुध्न्यः २७ रेवत्याः पूषा एते वारितिथिनक्षत्रेशाः
प्रयोगादिमारभ्य प्रयोगसमाप्तिदिनपर्यंतं प्रत्यहं तत्तद्दिनाधिपाः पूज्याः ॥ पूज्यामंत्रास्तु प्रणवचतुर्थ्यन्तनामरूपाः तेन ॐ श्रीशिवाय
नमः इत्या गृहनीयाः ॥ ततः श्वेतवस्त्राभरणानुलेपनमाल्यविभूषितो वद्धपद्मासनः पद्ममुद्रामुद्रितकरो नित्यंस्मरन पूजाप्रकरणोक्तान्

Nepal Sanskrit University, Balmiki Campus, Kathmandu

स्वचतुर्थेभागेच्चाग्नेयकोणाभिमुखःकज्जलादिकृष्णद्रव्यैः॥प्रागुक्तवह्निमंडलेतत्रतथैवसंपूज्यतत्रकृष्णवर्णांपूजितेस्वासनेदा
रपूजादिपूर्वकमुपविश्यकृष्णवस्त्रादिभूषितवज्रासनस्थःखड्गमुद्रामुद्रितकरोभद्रकालिंतत्कल्पोक्तविधिनासंपूज्यतदनुज्ञया
कृष्णद्रव्यैःपूजाचक्रंसमुद्धृत्यतत्रदेवमावाह्यतामसोक्तध्यानोक्तरूपंध्यात्वासांगसावरणांसंपूज्यनैवेद्यादिभिःसम्यक्परितो
षयेत्॥अथषट्कर्मदेवतानांसरस्वत्यादीनांपूजाविधिरग्रेशाक्तप्रकरणेद्रष्टव्यअथकाम्यपूजायामाकर्षणेवश्यपूजोक्तविधि
नैवपूजाकार्यानयोरेकरूपकत्वात्॥अन्यदपिधनधान्यसमृध्यर्थंपुत्रभार्यादिलाभार्थंवाराजसध्यानोक्तरूपंध्यात्वावत्सरंषण
मासत्रिमासंपूज्यतदभिष्टंप्राप्नुयादिति॥अत्रसर्वेषुकाम्यकर्मसुप्रागुक्तसंकल्पस्तत्कर्मोल्लेखनपूर्वकंकार्यइतिकाम्यपूजा
विधिः॥ ॥सुंदराचार्यशिष्येणश्रीनिवासेनधीमता॥चंडिकायांप्रणीतायांप्रकाशोस्तिथिसंज्ञकः॥ ॥इतिश्रीसुंदराचार्य
चरणारविन्दद्वंद्वांतेवासिनाश्रीनिवासभट्टेनविरचितायांश्रीशिवार्चनचंडिकायांपंचदशःप्रकाशः॥ ॥अथचतुरायतन
मंत्रोच्चारपूर्वकंशैवमंत्राउद्ध्रीयंते॥ ॥तत्रादौप्रथमपूज्यत्वाद्गणेशमंत्राउद्ध्रीयंते॥तत्रश्रीसारसंग्रहे॥अथवक्ष्येमहादेवी
मंत्रमेकाक्षरंपरम्॥शार्ङ्गीप्रीतियुतःप्रोक्तोगणेशस्यैकवर्णकइति॥शार्ङ्गीगकारःप्रीतिरनुस्वारः॥नारायणीयेत्वस्यमंत्रस्यपं
चभेदाउक्ताः॥तथा॥खांताशाङ्कविषसविंदुसकलंविदोयुतंकेवलंपंचैतानिपृथक्फलंविदधंतेबीजानिविघ्नेशितुरिति॥अंते

॥राम॥
॥१६०॥

160

तवस्त्राद्यलकृतो विकटासनस्थः गदामुद्रामुद्रितकरो लक्ष्मातत्कल्पोक्तविधिना देवं सकलांगं सावरणं संपूज्य नैवेद्यादिभिस्तोषयेदि
ति ॥ अथ विद्वेषणे साधकः कृतनित्यकृत्यो वारेशादीनभ्यर्च्य नैर्ऋतिकोणाभिमुखो धूम्रद्रव्यादिभूषितो धूम्रद्रव्ये वामभूतोदयकाले
ग्रीष्मारये दिवसस्य द्वितीयेभागे वृत्ताकारं व्योममंडलं पूर्वोक्तपंचभूतवर्णेष्वाकाशवर्णगर्भभूतलिपियंत्रेपि यद्यंत्रमध्यगतमंत्रवेष्टितं
कृत्वा हं व्योममंडलाय नमः इति संपूज्य तत्र द्वारपूजादिपूर्वकं स्वासने धूम्रवर्णे पूजिते राक्षसकोणाभिमुखउत्कटासनोपविश्य मुशलमुद्रा
मुद्रितकरो ज्येष्ठादेवीं धूमावतीं तत्कल्पोक्तविधिना तन्मंत्रेण सम्यक् संपूज्य स्वपुरतो धूम्रद्रव्यैः पूजाचक्रं समुद्धृत्य तत्र देवमावाह्य धूम्र
वस्त्रादिपरिधानं च ध्यायेत् ॥ इत्थं तामन्यरूपं देवं ध्यात्वा यथोक्तक्रमेण धूम्रवर्णपुष्पाक्षतादिभिः संपूज्य नैवेद्यादिभिस्तोषयेदिति
अथोच्चाटनकर्मणि साधकः कृतनित्यकृत्यो – – –दीनभ्यर्च्य वायव्याभिमुखः कृष्णद्रव्यैः षड्बिंदुलांछितवृत्तयेष्टितषट्कोणरूपं पू
र्वोक्तपंचभूतवर्णेषु वायुभूतवर्णादशाकर्भवायुयंत्रमध्यगतमंत्रवेष्टितं वायुभूतोदयकाले वायुमंडलं समुद्धृत्य यं वायुमंडलाय न
मः इति संपूज्य तत्र द्वारपूजादिपूर्वकं कृष्णस्वासनमास्तीर्य संपूज्य तत्रोपविश्य वज्रासनस्थोऽशनिमुद्रामुद्रितकरो दुर्गां सर्वोपचारैः ॥ सं
पूज्य तदनुज्ञया स्वपुरतः कृष्णवर्णद्रव्यैः सज्जलादिभिः पूजाचक्रं समुद्धृत्य तत्र देवमावाह्य कृष्णवर्ण – त्वा कृष्णवर्णैर्गंधपुष्पाद्यैः सां
गं सावरणं संपूज्य यथा नैवेद्यादिभिस्तोषयेदिति ॥ अथ मारणे कर्मणि साधकः कृतनित्यकृत्यो वारेशादीनभ्यर्च्य शारदाख्येहोरात्र

निनंदेशभोगदाकामरूपिणीचोग्रा ॥ तेजोवतीचसत्यासंप्रोक्ताविघ्ननाशिनीनवमी ॥ वीजांतेसर्वसर्वशक्तिप्रोक्ताकमलास
नायनमः ॥ इतिच ॥ आसनमंत्रः प्रोक्तोनवशक्त्यंतेसमर्चयेत् अमुनेतिअत्रमंडूकादिज्ञानात्मांतानांयोगपीठदेवतानांपूजा
प्रागेव ॥ पूजाप्रकरणेलिखितत्वात्ग्रंथगौरवभयात्त्वनलिख्यते ॥ सारसंग्रहे ॥ अष्टपत्रेसरोजस्थंचतुरस्रत्रयावृतं ॥ चतुर्द्वारसमायु
क्तमर्चापीठसमायच ॥ तत्रवाह्यगणेशानमर्चयेदुपचारकैः ॥ -कर्णिकायांतुपूर्वादिचतुर्दिक्षुगणाधिप ॥ पीतंगौरंगणेशानंर
क्तंश्वगणनायकं ॥ गणक्रीडंनीलवर्णंकेसरेष्वनंतोयजेत् ॥ अग्नीषासुरवायव्यमध्येदिक्षुयथाक्रमेषडंगानिमनो-स्यध्यातव्याश्च
गदेवता ॥ तुषारस्फटिकस्यामनीलकृष्णारुणांत्विषः ॥ वरदाभयधारिण्यःप्रधानतपस्त्रियः वक्रतुंडादिकानष्टौवक्ष्यमाणान्दलेयजे
त् ॥ वक्रतुंडैकदंष्ट्रौचमहोदरगजाननौ ॥ लंबोदराख्यविकटौविघ्नराट्धूम्रकर्णकौ ॥ दलाग्रेषुततःपूजाब्राह्म्याद्यास्त्वष्टमातरः ॥ ब्राह्मी
स्वर्गसमाध्येयामृगचर्मविभूषिता ॥ अक्षमालाभयंदंडकुंडिकेदधतीकरैः ॥ त्रिशिखापरशुंहस्तेडमरुंनृकपालकं ॥ विभ्राणांचंद्रगौरांगी
माहेशींभावयेच्छुभां ॥ शूलंखट्वांगदंडांकुशान्वहंतीकरांबुजैः ॥ इंद्रगोपारुणांध्यायेत्कौमारींकरुणालयां ॥ अभीशंखकपालानिघं
पंचकरपंकजैः ॥ विभ्राणांवैष्णवींध्यायेन्नीलमेघसमप्रभां ॥ तोमरांकुशवज्रांकविशुशुक्तकरांबुजां ॥ इंद्राणींभावयेन्मंत्रीनीलवर्णां
सुभूषणां ॥ धारयंतीशूलखड्गौकपालंनृशिरःकरैः ॥ चामुंडांशोणवर्णांचमुंडमालायुतांस्मरेत् ॥ स्वर्णाभामक्षमालांचवीजपूरकपा

161

॥राम:॥
॥१६१॥

विसर्गःविंदुमकारःताभ्यांमहदवर्त्तिमाराणांखांतंगकारःतेनगंइतिसिद्धंसविंदुरित्यपरःकलाविसर्गःतदुक्तोन्यः॥विंदुश्चजीवताभ्यां
युतेइत्यपरःकेवलेविसर्गादिरहिते॥तथा॥गणकंस्यादृषिश्छंदोनिचृद्विघ्नोस्यदेवतेति॥प्रयोगसारे॥आदौगणंजपायोक्त्वास्वा
हाहृदयमुच्यते॥एकदंष्ट्रायवाभाष्यहुंफट्विघ्नाद्विरस्तथा॥शिखाप्यचलकर्णादिकर्णिनेत्वंततोनमः॥कवचंगजवक्त्रायन
मोनमइतीरितं॥महोदरायचंडायहुंफाडित्यस्त्रमिष्यते॥एतान्यंगानिविन्यस्यपंचोक्तानिमणीषिभिः॥इतिपंचांगान्युक्तानि॥सा
रसंग्रहेतु॥षड्दीर्घणानिजेनैवबीजेनांगानिविन्यसेत्॥इत्युक्तं॥तदेतयोर्विकल्पः॥सप्रांशुनावाबीजेनषडंगानिनियोजयेत्॥इति
प्रयोगसारवचनादेव॥सप्रांशुनासदीर्घणषड्दीर्घयुक्तेनेतियावत्॥अथयथागुरूपदेशंकार्यमिति॥प्रपंचसारे॥रक्तोरक्तां
गरागांसुककुसुमयुतस्तुंदितचंद्रमौलिर्नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणोबीजपूरात्तनासः॥हस्ताग्रात्तप्रपाशांकुशदरवरदोना
गवक्त्रोहिभूषोदेव॥पद्मासनोवाभवतुनतसुरोभूतयेविघ्नराजः॥वामादूर्ध्वयोरग्रेतदधस्थयोरन्येइत्यायुधध्यानम्॥सार
संग्रहेपि॥रक्ताभःशशिमौलिरंग्रशंकुसोदंतंवरंधारयन्हस्तैर्द्विरदाननस्त्रिनयनोरक्तांगरागावृतः॥बीजापूरवृहत्करोजठरो
दानार्द्रगंडस्थलोपद्मस्थःफणिभूषणोगणपतिर्भूयाद्भवद्भूतये॥तत्रदक्षोर्ध्वादितदधानमायुधध्याने॥वृहत्करःशुंडादंडः॥इ
तिध्यात्वा॥गणेशानंमानसैरुपचारकैः॥पूजयित्वेतिशेषःतीव्रादीशक्तिसंयुक्तेपीठेत्वावाह्यपूजयेत्॥प्रपंचसारे॥तीव्राज्वलि

क्ति संयुतं ॥ इह भुक्त्वाखिलान् भोगानंते शिवपदं व्रजेदिति ॥ अथ प्रयोगः तत्र प्रातःस्नानादियोगपीठन्यासांगे गणेशमंत्रेण प्राणाया
मत्रयं कृत्वा शिरसि गणकाय ऋषये नमः ॥ मुखे निचृद्छंदसे नमः ॥ हृदये ॐ विघ्नेश्वराय देवताय नमः ॥ इति विन्यस्य मम सर्वाभिष्टसिद्ध्य
र्थे विनियोगः ॥ इति कृतांजलिः रुत्वा मूलमंत्रेण करशुद्धिं कृत्वा ॐगुष्ठयोः ॥ ॐ गणकाय स्वाहा हृदयाय नमः ॥ तर्जन्योः एकदंष्ट्रा
य हुं फट् शिरसे स्वाहा मध्यमयोः अचलकर्णिने नमः शिखायै वषट् ॥ अनामिकयोः गजवक्त्राय नमः कवचाय हुं ॥ कनिष्ठयोः महोदरा
य वक्त्राय हुं फट् अस्त्राय फट् ॥ इति मंत्रानंगुष्ठाकनिष्ठांतं करयोर्विन्यस्य नेत्रवर्गं हृदादिपंचांगेष्वपि विन्यसेत् ॥ अथ वा गांगीमित्या
दिना करषडंगन्यासं कृत्वा ध्यानात्मपूजांते प्रोक्तविधिना कृत्वा ॥ एकदंष्ट्राय विद्महे वक्रतुडाय धीमहि तन्नो विघ्न प्रचोदयात्
इति गणेशगायत्र्या गणेशपूजाद्रव्याणि पूजास्थानं च प्रोक्ष्य देवाग्र पूर्वं परिकल्प्य तदनुसारेण प्राग्न निऋति कोणे श्रीपर्ण्यादि पीठं कुं
कुमादिना चतुर्द्वारयुक्तचतुरस्रत्रयवेष्टितमष्टदलकमलं पूजापीठं निर्मीय तत्र प्रागुक्तविधिना मंडूकादिपृथिव्यंतं संपूज्य सुधार
सस्थाने इक्षुरससमुद्रं संपूज्य रत्नद्वीपादिपरतत्वांतेष्टदलकमलकेसरेषु स्वाग्रान्मध्यांतं तीव्रायै नमः ॥ ॐ ज्वालिन्यै॰ नंदायै॰ भोग
दायै॰ कामरूपिण्यै॰ उग्रायै तेजोसेवत्यै॰ सत्यायै॰ ॐ विघ्ननाशिन्यै नमः इति संपूज्य गं सर्वशक्तिकमलासनाय नमः ॥ इति समस्तं पीठं
अभ्यर्च्य तत्र मूलमंत्रमुच्चार्य श्रीगणेशमूर्त्तिं परिकल्पयामि नमः इति चक्रमध्ये मूर्त्तिं परिकल्प्य मूर्त्यभावे पुष्पादिकं निक्षिप्य ध्यानोक्त

162

लके॥ पद्मं वरदधतीं हस्तैर्महालक्ष्मीं स्मरेत्सुधी॥ दक्षाधःकरमारभ्य तदूर्ध्वकरपर्वतमायुधध्यानं॥ ब्राह्म्याः॥ दक्षाद्यधस्थयोराद्येन दा
हूर्ध्वयोरन्त्ये इति महेश्याः॥ कौमार्यास्तु वामोर्ध्वकरमारभ्य दक्षोर्ध्वकरपर्यन्तं॥ वैष्णव्यास्तु दक्षोर्ध्वकरमारभ्य दक्षाधःकरपर्यन्तं॥ ख
श्विकं॥ वाराह्या दक्षाहूर्ध्वयोराद्येन दाद्यधस्थयोरन्त्ये॥ इन्द्राण्यास्तु वामोर्ध्वकरमारमारभ्य वामाधःकरपर्यन्तं॥ चामुण्डायास्तु दक्षोर्ध्वा
धःकरयोराद्ये वामोर्ध्वाधःकरयोरन्त्ये॥ माहालक्ष्म्यास्तु दक्षाधःकरमारभ्य दक्षोर्ध्वकरपर्यन्तमायुधध्यानं॥ तथा॥ चतुरस्रत्रयान्त
स्थवीथीद्वन्द्वे समर्चयेत्॥ दिक्पालांश्च दन्तस्थाणि गणेशार्च्चनमीरितं॥ इन्द्रं सुराधिपं पीतं वज्रहस्तं सवाहनं॥ अग्निं तेजोधिपं रक्तं शक्
तिहस्तं सुभूषितं॥ यमं प्रेताधिपं कृष्णं दण्डहस्तं समर्चयेत्॥ रक्षोधिपं निर्ऋतिं च खड्गहस्तं सुधूम्रकं॥ पाशहस्तं सुशुभ्राङ्गं वरुणं या
दशांपतिं॥ वायुं प्राणाधिपं कृष्णमङ्कुशायुधकरं यजेत्॥ यक्षाधिपं कुबेरं च मुक्तावर्णं गदाकरं॥ विद्याधिपं तथेशानं स्वच्छं शूलकरं
यजेत्॥ नागाधिपं तथानन्तं गौरं चक्रकरं यजेत्॥ लोकाधिपं रक्तं पद्मकरं यजेत्॥ ऐरावतं तथा मेषं महिषं मृगपूरुषं॥ मकरं मृगमर्त्यौ च
वृषं च विपहंसकौ॥ इन्द्रादिलोकपालानां वाहनानि विदुर्बुधाः॥ ततो वहिस्तदस्त्राणि तत्तत्पार्श्वे समर्चयेत्॥ वज्रं पीतं शितां शक्तिं दण्डं
कृष्णं समर्चयेत्· खड्गमाकाशसंकाशं पाशं विद्युन्निभं यजेत्॥ अंकुशं रक्तवर्णं च शुक्लवर्णां गदां यजेत्॥ त्रिशूलं नीलवर्णं च यजेत्सा
धकसत्तमः॥ रथाङ्गं करवंदाभं पद्मं रक्तं समर्चयेत्॥ लोकपालायुधान्येवं कथितानीमनीषिभीः॥ य एवं पूजयेत् देवं गणेशं भ

पाशहस्तायमकरवाहनायनमः॥ॐयंवायवेप्राणाधिपतयेकृष्णवर्णायांकुशहस्तायमृगवाहनायनमः॥ॐसंकुवेराय:यक्षाधिपत
येमौक्तिकवर्णायगदाहस्तायनरवाहनायनमः॥ॐइशानायविद्याधिपतयेस्फटिकवर्णायशूलहस्तावृषवाहनायनमः॥इतिसं
पूज्येइशानयोर्मध्येॐआंब्रह्मणेलोकाधिपतयेरक्तवर्णायपद्महस्तायहंसवाहनायनमःइतिनिरृतिवरुणयोर्मध्येॐह्रींअ
नन्तायनागाधिपतयेगौरवर्णायचक्रहस्तायगरुडवाहनायनमःइतिसंपूज्यद्वितीयवीथ्यांॐवज्रायनमः॥ॐशक्तयेॐदंडायनमः
ॐखड्गायनमःॐपाशायनमःॐअंकुशायनमःॐगदायैनमःॐत्रिशूलायःॐपद्मायनमःॐचक्रायनमःइतिलोकपालायुधा
निदेवतायमारभ्यप्रादक्षिण्येनसंपूज्यमूलमुच्चार्यसांगायसपरिवारायश्रीगणपतयेनमः॥इतित्रिःपुष्पांजलिनासंपूज्यधूपदीपादि
पूर्वोक्तविधिनासर्वंकुर्यादिति॥तथासारसंग्रहे॥एकलक्षंमनुंजप्त्वाजुहुयात्तद्दशांशतः॥अष्टद्रव्यैर्महेशानितर्पनादिततश्चरेत्॥
मोदकैःपृथुकैर्लाजैःसक्तुभिःसेक्षुपर्वभिः॥नालिकेरैस्तिलैःशुद्धैःसुपक्वैःकदलीफलैरिति॥अत्रैकैकद्रव्येणसार्द्धद्वादशशतंजु
हुयात्॥उक्तंचगणेश्वरपरामर्षिन्यां॥अष्टद्रव्यैस्त्रिमध्वक्तैर्जुहुयाच्चपृथक्पृथगिति॥अयंजपःकृतयुगपरः॥षकलावेतचतुर्गु
णजपहोमादिकंकार्यमिति॥तथासारसंग्रहे॥दीर्घानेनघृताक्तेनहोमोभिष्टफलप्रदः॥लक्ष्मीकामोनालिकेरैश्चतुर्थ्यांजुहुयाद्धि
वे॥तिलजालान्वितैशक्तुनालिकेरैश्चतुःशतं॥शितपक्षादिमारभ्यप्रत्यहंचहुनेत्क्रमात्॥चतुर्थ्यंतेततःसर्वेप्राणिनोवशगानराणां॥ति

॥राम॥
॥१६३॥

163

मूर्त्तिंभावयन्मूलमन्त्रार्यश्रीगणपतिमूर्त्तयेनमः॥ इतिमूर्त्तिंसंपूज्यतस्यांप्रागुक्तविधिनागणेशमावाह्यवाहनादिमुद्राःप्रदर्श्यप्रा
णप्रतिष्ठांतेदंतपाशांकुशविघ्नपरशुलड्डुकबीजपूराख्यासप्तमुद्राःप्रदर्श्यासनादिपुष्पांतानुपचारानुपचर्यकर्णिकायांदेवाग्रादिचतु
र्दिक्षु॥ ॐगणाधिपतयेनमः ॐगणेशायनमः ॐगणनायकायनमः ॐगणक्रीडायनमः॥ इतिसंपूज्यषड्दलकेशरेष्वाग्नेयेॐ
वाणजयायस्वाहाहृदयायनमः ईशानेएकदंष्ट्रायहुंफट्शिरसेनमः नैरृत्येॐअचलकर्णिनेनमःशिखायैनमः॥ वायव्येॐगजवक्त्रा
नमोनमःकवचायनमः॥ ततोदेवाग्रादिचतुर्दिक्षुॐमहोदरायचंडायहुंफट्अस्त्रायनमः॥ यद्वापूर्वोक्तस्थानेष्वेवगांहृदयायनमःगीं
रसेनमः॥ इत्यादिषडंगानिपूजयेत्॥ अत्रषडंगपक्षेदेवस्याग्रेगौंनेत्रायनमः॥ इतिनेत्रंसंपूज्यपश्चादस्त्रंपूजयेदितिविशेषः॥ ततोष्टदलेषु
देवाग्रदलमारभ्यॐवक्रतुंडायनमः॥ एवंएकदंष्ट्राय० महोदरायगजाननायलंबोदराय·विकटाय·विघ्नराजायधूम्रवर्णायनमःइ
तिप्रादक्षिण्येनसंपूज्यदलाग्रेषुॐब्राह्म्यैनमःईंमाहेश्वर्यै·उंकौमार्यैऋंवैष्णव्यै·लृंवाराह्यै·ऐंइन्द्राण्यै॥ औंचामुण्डायै·अंअःमहा
लक्ष्म्यैनमःइतिसंपूज्यबहिश्चतुरस्रवीथ्यांदेवाग्रमारभ्यॐलंइन्द्रायसुराधिपतयेपीतवर्णायवज्रहस्तायैरावतवाहनायनमः॥ ॐरं
अग्नयेतेजोधिपतयेरक्तवर्णायशक्तिहस्तायमेषवाहनाहनायनमः॥ ॐटंयमायप्रेताधिपतयेकृष्णवर्णायदंडहस्तायमहिष
वाहनायनमःॐक्षंनिरृतयेरक्षोधिपतयेधूम्रवर्णायखड्गहस्तायप्रेतवाहनायनमः ॐवंवरुणायजलाधिपतयेशुक्लवर्णाय

॥ शि·च ॥
॥ १६४ ॥

गणपतिः सर्व्वसुरासुरनमस्कृत ॥ स्वेनषड्दीर्घयुक्तेन षडंगानि प्रकल्पयेत् ॥ अत्राद्ये ग्लां ली मीत्यादिकरषडंगो ज्ञेयः ॥ तथा ॥ ध्यान
पूजाजपाद्यं स्यादस्य पूर्व्ववदेव तु ॥ सतः सिद्धमनौ सम्यक् पूर्व्वोमंत्रे दिता स्त्रिये ॥ प्रयोगान् विधिवत्कुर्यात्साधको भीष्टसिद्धये ॥ इ
ति ॥ इत्थमेकाक्षरः सप्तविधः ॥ काम्यहोममाह ॥ दोग्ध्रान्नेत्यादि तिलाजेत्यादिश्लोकस्यायमर्थः ॥ पुक्तप्रदारभ्य तच्चतुर्थ्येनेषु तच्च
तुर्षु दिनेषु प्रत्यहं प्रथमतस्तीलैरेकशतं तदनु जालैः तदनु शक्तुभिः ॥ तदनु नालिकेरैश्चिकेरैस्त्रिमध्वक्तैरिति त्रिमध्वक्तैः कमा
चतुः शतं जुहुयादिति नवनीत इत्यादिनवेन नवनीते परस्परविमुखगणेशबीजद्वयमध्यस्थतद्बीजद्वयविंदुस्थाने ममवी
जाधः अमुकं तयोर्मध्ये वशं कुर्व्विति साध्यसाधककर्मीणि विलिख्य तत्सर्व्वं गणेशबीजेनावेष्ट्य साध्यप्राणप्रतिष्ठापनं विधाय अ
ष्टोत्तरशतं मूलमंत्रेण नवनीतं स्पृशन् जपित्वा भक्षयेत् ॥ इत्थं सप्तप्रयोगेण साध्यो वश्यो भवति ॥ सारसंग्रहे ॥ विरिशब्दद्वयं प्रोक्ता
वदेद्गणपतिं ततः ॥ वरेति च समुच्चार्य्य वरदेति वदेत्पुनः सर्व्वलोकं द्वितीयांतं मंते वशमथोच्चरेत् ॥ आनयाग्निवधूरंते मायाद्यं व
समुद्धरेत् ॥ विरि विघ्नेशमंत्रोयं षड्विंशत्यक्षरो भवेत् ॥ विरिशब्दद्वयं वीरि २ इति गणपतिलिखनकर्म्मणि द्वितीयांते गणपति
इति ॥ द्वितीयांतं सर्व्वलोकमिती ॥ अग्निवधूः स्वाहाकारः मायाद्यं भुवनेश्वरीबीजाद्यं ॥ केचित्तु मंत्रमेनमेकोनविंशत्यक्षरात्मकं
वदंति ॥ तन्मते वा देति पंचवर्णा लोकमिति वर्णद्वयं इति सप्तवर्णा न भवंति ॥ उक्तं च गणेश्वरपरामर्शिन्यां ॥ वकाररेफावपि लो

164

॥ राम ॥
॥ १६४ ॥

लैस्तंडुलसंयुक्तैर्हेमश्रीवश्यकीर्त्तिनः॥स्वाडुत्रययुतैर्लाजैर्हुनेत्सप्तदिनावधि॥कन्यार्थिलभतेकंन्यावरकांतंवरार्थीनी॥दधिसंमिक्तलंवणै
र्जुहुयाच्चचतुर्दिनं॥निशीथिन्यांचसंवादोभवेद्दश्यंतथेप्सितं॥अत्रसर्वत्रकाम्यहोमेषुसंख्यानुक्तौकार्यस्यगुरुलाघवंज्ञात्वासहस्रा
दिनियुतपर्यंतंकार्यानुसारेणजुहुयात्॥उक्तंचश्रीक्र० एकेनवाथसर्वैर्वातत्कार्यगुरुलाघवं॥ज्ञात्वादेवीसहस्रंवात्रिसहस्रंयुतंचवा
अयुतंनियुतंवापिप्रयुतंवाकुलेश्वरी॥ततत्कर्मोदिनेकुंडेसंस्कृतेहव्यवाहने॥इति॥तथा॥शिवार्कद्रुममूलेनकुचंदनसुराकृभिः॥गज
त्रौटितनिंवेनविषाणेनैवदंतिनां॥विधायविघ्नंसंपूज्यतंस्पृष्ट्वाजपयेन्मनुं॥उपोषितश्चविघ्नंद्रग्देतेवसमुद्वहेत्॥शिखायांव्यवहारादौ
समरेविजयीभवेत्॥एवनासमदानेनसंजप्त्वामनुनाततः॥तिलकंसर्वराजानोलोकास्युर्वशगाःशिवे॥समदागजमदसहिता॥नवनी
तेनवेसाध्यनामालिख्यानुलोमगे॥विलोमेविघ्नविजेवतद्धृतंस्थापितानलं॥अष्टोत्तरशतंजप्त्वातद्दीनद्भक्षयेततः॥सप्ताहाद्दशगाःसा
ध्यःसाधकस्यभवेद्ध्रुवं॥गणेशंतर्पयेत्तोयैःसंख्ययावक्ष्यमाणया॥एकोनपंचाशतावदिनैरिष्टमवाप्नुयात्॥प्रणवादिभिमंमंत्रंकेचिदि
च्छंतिसूरयः॥पूजयाचहृदंतोयंहोमेस्वाहांतईरितं॥तथासारसंग्रहे॥स्मृतिर्भूमनुयुग्विंदुनादालंकृतमस्तका॥एकाक्षरोगणेशस्यमं
त्रएषउदाहृतः॥स्मृतिर्गकारःभूर्लकारःमनुरौकारःविंदुनादेनचयुतः॥शाङ्गाचतुर्दशाद्यस्वरयुग्विंदुभूषितं॥अयमेकोगणपते
रेकाणोमंत्रउत्तमः॥शाङ्गीगकारः॥चतुर्दशाद्यउकारविंदुरनुस्वारस्ताभ्यांयुक्तः॥गणकोमुनिरुक्तःस्यान्निचृच्छन्दस्यदेवता॥वालो

॥शि·चं॥
॥१६५॥

ध्यानं॥ कुंभस्यसर्वोर्ध्वकरेयुक्तत्वान॥ यजेत्पीठेपुरोक्तेनवशक्तिसमन्वितं॥ मूलमंत्रेणक्लृप्तायांमूर्त्तौवावाप्यपूजयेत्॥ मिथुनानिय
जेदादावामोदादीन्दिगंवरान्॥ अंगानिपूजयेत्पश्चाकान्तध्वेवतनंतन्तुधीः॥ अर्चयेल्लोकपालांश्चतदस्त्राणिततोवहि॥ षडावरणसं
युक्तंविधिविघ्नेश्वरंयजेत्॥ अथप्रयोगः॥ तत्रप्राग्वयोगपीठन्यासांतेमूलमंत्रेणप्राणायामत्रयंकृत्वासिरसिगणकायऋषयेनमः
मुखेगायत्रीछंदसेनमः॥ हृदयेविरविघ्नरायदेवतायेनमः॥ इतिविन्यस्यअस्यऋषिछंदयेविनियोगः॥ इतिकृतांजलिरुक्त्वाध्यानादि॥ च
तुर्भिःहृदयंचतुर्भिःशिरःपंचभिःशिखापंचभिः॥ कवचंपंचभीर्नेत्रंघामामस्त्रइतिविभक्तैर्मंत्रवर्णैःषडंगानिविन्यस्यपुष्पोपचारणै
नत्रिकारोणवक्ष्यमाणमहागणपतिपूजोक्तमिथुनत्रयंषट्कोणेष्वामोदादिषट्कंमष्टदलकेसरेषुषडंगषट्कंदलेषुमातृह्लोकेशास्त
दस्त्राणीचचतुरस्रवीथीद्वयेसंपूज्यप्राग्वत्शेषंसमापयेत्॥ इति॥ तथा॥ वेदलक्षंजपेन्मंत्रंजुहुयात्तद्दशांशतः॥ मधुरत्रययुक्तैर्द्रव्यैरष्टभिरीरि
तैः॥ एवंसाधितमंत्रस्तुप्रयोगान्कर्तुमर्हति॥ विकलोत्पलहोमेनवशयेत्सकलंजगत्॥ तिलतंडुलहोमेनश्रियमाप्नोत्यनिंदितां॥ मोदकान्ना
ज्यसंयुक्तान्हुत्वाविजयमाप्नुयात्॥ मधुरत्रयहोमेनराजानंवशमानयेत्॥ अभिषेकसाधनोहोमोमक्ष्यभोज्यादिभिःकृत॥ सारसंग्रहे वदेन्सोमंचतुर्थ्यं
तंमहागणपतिंतथा॥ वरांतेवरदंप्रोक्त्वावदेत्सर्वजनंततः॥ मेवसंचसमामाप्याख्यवदेदानपठद्वयं॥ लक्ष्मीगणेशबीजाद्यएकोनत्रिंशदक्षरः
लक्ष्मीगणेशमंत्रोयंसर्वसंपत्प्रदायकः॥ तथाचतुर्थ्यामहागणपतयेइति॥ ठद्वयंस्वाहा॥ लक्ष्मीबीश्रीगणेशबीजेगएतदाद्यः॥ अंतर्या

॥रामः॥
॥१६५॥
165

वनायोपुनस्तथोधृत्यगणान्पतीति॥सर्वेसमुच्चार्यैवमेवशः स्यान्मकारन्नश्चापिनथानयेति॥शब्दे छिरंस्यादिति॥वकारेरेतमंत्र
स्यैवमंत्रांतरत्वेनोत्वात्॥अन्येतुवैपरीत्येनाद्योगणपतिमंत्रस्यबीजषट्कंयोजयित्वाषड्विंशत्यक्षरस्यद्वात्रिंशदक्षरत्वंवदंति॥
बीजषट्कंतुतन्मंत्रोद्धारप्रकरणेवक्ष्यते वैपरीत्यंतंत्रोक्तक्रमस्य॥तथा॥मुनिर्गणकश्चाख्यातः छंदोगायत्र्यमुच्यते॥देवताव
रिविघ्नेशोदृष्टादृष्टफलप्रदः॥द्वितीयमंत्रेस्यनिचृच्छंदः॥वेदेवेदेषुपंचार्णैः शरलोचनसंख्यके॥विभक्तैर्मूलमंत्रार्णैः सडंगा
निमनोरथः॥मायाद्यानिविधेयानीजातियुक्तानिमंत्रिणा॥वेदाश्चत्वारइषवः पंचशराः॥पंचलोचनद्वयंमायादीनिनीतिप्रत्येकंमा
याबीजयुक्तानिजानयः नमःस्वाहेत्यादयः॥एतल्लक्षमुक्तंप्रागेव॥द्वितीयमंत्रस्यतुमंत्रपदैः षड्भिः षडंगानि॥सिंदूराभनिभाननंत्रि
नयनहस्तैश्चपाशांकुशौविभ्राणमधुमत्कपालमनिशंसार्द्धेंदुमौलिंभजेगपुष्ट्याश्लिष्टतनुंध्वजाग्रकरयापद्मोल्लसद्धस्तयातद्यो
न्याहितपाणिमात्तवसुमत्पात्रोल्लसत्पुष्करं॥वामोर्ध्वकरमारभ्यदक्षाधःकरपर्यंतंपाशादित्रयंवामाधःकरंदेव्यावरांगेवामा
कनिष्ठयो‾दक्षिकरेणप्रियाश्लेषः वामाधःकरेणाध्वजाग्रस्पर्शित्वावामदक्षिणयोःपद्ममित्यायुधध्यानेः ‾‾‾शुंडादंडद्विनी
येपिमंत्रेइदमेवध्यानं॥तृतीयेतु॥बीजापूरगदेशरासनमरिंमालांचवालैःकरैर्दंतैरुत्पलपाशमार्गणरदातुन्नाघकुंभंदधत्॥सि
न्दूरारुणविग्रहस्त्रीनयनोयो‾‾‾‾शुंडाग्रगाःस्तंछिंगाहितपाणिमंबुजकरांपुष्टिंवहन्नोवनात्॥अत्रवामाधःकरादिचायुध

॥शि॰चं॥
॥१६६॥

ज्यचतुरस्रवीथीद्वयेलोकपालांश्चतदस्त्राणिचसंपूज्यधूपदीपादिकंसर्वंवत्समापयेदितितथा॥लक्षमेकंजपेन्मंत्रंदीक्षितोविजितोविजितें
द्रियः॥दशांशंजुहुयाद्बिल्वसमिधोमधुराप्लुताः॥तर्पणादिततःकुर्यात्पूर्वोक्तविधिनाप्रिये॥एवंसिद्धमनुर्मंत्रीसाधयेदिष्टमात्मनः॥हुनेद्व
तुः॥सहस्राणिश्रीककौमधुराप्लुते॥महालक्ष्मीकरोहोमः पुत्रमित्रकरत्रद॥उद्वनोयेनसंतर्प्यचत्वारिंशच्चतुःशतम्चत्वारिंशद्दिनान्मन्त्री
वांछितांलभतेप्रियमिति॥सारसंग्रहे॥विंदुवामाक्ष्यग्नियुतास्मृतिर्मायासुमध्यगा॥अक्षरःशक्तिगणपःसर्वसिद्धिप्रदायकःइति॥स्म
तिर्गिरोग्नीरकःवामाक्षीइकारः॥ऐतैसर्वैरितिवीजंमायासुमध्यगामायावीजंद्वयस्यमध्येकुर्यात्॥तथाभार्गवस्यमुनिश्छंदोविराड्देवस
मीरितः॥शक्त्यादिगणपस्तवदेवदानववंदीतः॥षड्दीर्घभाजावीजेनषडंगानिप्रकल्पयेत्॥गजेन्द्रवदनेसाक्षाच्चतुर्बाहुस्तुचामरं॥देव
रोंचतुर्बाहुंपाशांकुशधरंविभुं॥स्वदंतंदक्षिणेहस्तेवीजपूरंचवामके॥पुष्करेमोदकैश्चैवधारयंतंमनुस्मरेत्॥वामोर्ध्वकरमारभ्यवामा
धःकरपर्यंतंआयुधध्यान॥पूर्वोक्तपूजयेत्पीठेतीव्रादिनवशक्तिवै॥अष्टपत्रांवुजेदेवंचतुरस्रत्रयावृते॥प्रथमंगावृतिःप्रोक्ताद्वितीया
मातृभिःस्मृता॥तृतीयालोकपालैःस्याद्वज्राद्यैश्चचतुर्थ्यपि॥अथप्रयोगः॥तत्रप्राग्वद्योगपीठन्यासांतेशिरसिॐभार्गवायऋषयेनम॥
मुखेॐविराट्छंदसेनमः॥हृदयेॐश्रीशक्तिगणपतयेदेवतायैनमः॥इतिन्यस्यगांयीमित्यादिषडंगन्यासंविधायध्यानादिमानसपूजांते
प्रोक्तपूजाचक्रमनुस्मार्घादिपुष्पोपचारांतेकेशरेषुषडंगानिदलेषमातृश्चतुरस्रेलोकेसांस्तदायुधानीचप्राग्वत्संपूज्यधूपदीपादिपू

॥राम॥
॥१६६॥

166

मीमुनिप्रोक्तोगायत्रीनवृदन्विता॥ ह्रुंरोलक्ष्मीगणेशोत्रदेवतासमुदाहृत॥ षड्दीर्घयुक्तेनाद्येनबीजेनैतेनवनद्भता॥ षडंगानिविधेयानिज्ञानिमु
क्तानिमंत्रीणा॥ हेमाभःपीतवस्त्रःकरतलकमलेःसंदधच्चक्रशंखौदंतामीनीचनाशाधृतकनकघटपद्मसंस्थस्त्रिनेत्रः॥ वामांकाविष्टलक्ष्म्याविधृ
तकमलयाप्रोल्लसद्दक्षदोष्णाश्लिष्टःसौवर्णकांत्याइहमहाश्रीकरोवःश्रियेस्तु॥ दक्षोर्ध्वकरम्यदक्षिणाधःकरपर्यंतमायुधध्यानेनाज्ञाशुंडादं
डः॥ प्राप्रोक्तेपूजयेत्पीठेतीव्रादिनवशक्तिके॥ अष्टपत्रांबुजद्वंद्वकर्णिकाकेसरोज्वले॥ चतुर्द्वारसमायुक्तचतुरस्रत्रयावृते॥ मूलेनमूर्तिसंक
ल्प्यतस्यामावाह्यपूजयेत् प्रथवृत्तिरंगैस्याद्वक्रंतुराद्यादिभिःपरा॥ अणिमामहिमाचैवलघिमागरिमातथा॥ ईशित्वंचवशित्वंचप्राकाम्यप्रा
प्तिरेवच॥ एताःसमर्चयेत्सम्यक्कृतियावरोणक्रमात्॥ ततस्तुमातरःपूज्यालोकेशास्तदनंतरं॥ ततयुधानितद्वज्रमक्तियुक्तसमर्चयेत्॥ इति॥
अथप्रयोगः॥ तत्रप्रातरुत्थानादियोगपीठन्यासांतेमूलेनप्राणायामंत्रयंकृत्वाशिरसिअंतर्यामिनेऋषयेनमः॥ मुखेनिवृजायत्रीछंदसेनमः
हृदयेश्रीलक्ष्मीगणेशायदेवतायेनमः॥ इतिविन्यस्यॐश्रांगांहृदयाय० ॐश्रींगींशिर० ॐश्रूंगूंशिखा० ॐश्रैंगैंकवच० ॐश्रौंगौंनेत्र० ॐश्रःगः
अस्त्राय॥ इत्थंषडंगन्यासंविधायध्यानादिमानसपूजांतेप्रोक्तपर्वीपीठमुद्धृत्यार्घस्थापनादिपुष्पोपचारांतेप्रथमावृद्दलकेसरेषुप्राग्वत्ष
डंगानिसंपूज्यदलाष्टके॥ एकाक्षरप्रोक्ताव्वक्रतुंडादिनान्तंपूज्यद्वितीयावृदलेषुदेवाग्रदलमारभ्यॐअणिमाप्राक्स्थैनमः ॐमहिमा· ॐल
घिमाः ॐगरीमा· ॐईशित्वसि· ॐवशित्व· ॐप्राकाम्य ॐप्राप्तिसिध्यैनमः॥ इतिप्राकदक्षिणक्रमेनसंपूज्यदलाग्रेषुब्राह्म्यादिकाःप्राग्वत्संपू

णगोमूत्रेणमिश्रीकृत्यप्रोक्तसंख्यायामिमंत्रप्रोक्तविधिनापीतमुक्तफलदंभवति॥तथासारसंग्रहे॥नारायणःसर्वमंत्रोसौचतु
र्वर्णाःप्रकीर्त्तित॥इति॥असौपूर्वोक्तःशक्तिगणपतिमंत्रश्चेत्स्वरणवाद्यःस्यात्तदाचतुरस्त्रमंत्रोभवति॥तथा॥ऋषिशुक्रोतिगदि
तःछन्दोगायत्रमुच्यते॥देवताशक्तिगणपःसर्वसिद्धिकरःपरम्॥पूर्ववच्चषडंगानिकुर्यादेशिवत्सत्तमा॥हेमाभंहेमवस्त्रंवृहदुद
रतनुंचारुवाहुंत्रिनेत्रंदोर्भिःपाशाक्षसूत्रेणिजरदमश्रणीमोदकंपुष्करेणविभ्राणंहेमभूषंतरुणतरणिरुक्कारुशक्त्यासमेतंवि
घ्नेशंविश्ववंद्यंत्रिभुवनशरणंचिंतयेश्रीगणेशं॥दक्षोर्ध्वकरमारभ्यवामार्द्धकरपर्यंतमायुधध्यानं॥तथा॥ततःपूर्वोदितेदेवमावा
ह्यपूजयेत्॥प्रथमावृत्तिरंगैस्याद्देवंसंपूजयेत्क्रमात्॥अथप्रयोग तत्रप्राग्वद्योगपिठन्यासांतेशिरसिॐशुक्रायऋषयेनममुखेगा
यत्री०हृदयेगणपतयेदे०इतिविन्यस्यग्रांग्रीमित्यादिनाकरषडंगन्यासंविधायध्यानादिमानसपूजांतेप्रोक्तत्र्यक्षरमंत्रवत्पूजाचक्र
समुद्धृत्यावीदिपुष्पापचाशनैकेसरेषुषडंगानिदलेषुवक्रतुण्डादीन्दलेषुलाग्रेषुमातृःचतुरस्त्रलोकपालांस्तदायुधानिचसंपूज्यप्राग्व
द्वेषंसमापयेदिति॥तथालक्षत्रयंजपेन्मंत्रंतद्दशांशंसमाहितः॥जुहुयाद्घृतसंयुक्तैस्तिलैर्मंत्रविदुत्तम॥तर्पदिततःकुर्याद्देवांसिद्धो
भवेन्मन्तु कलावेषजपएवजापोज्ञेयः॥काम्यकर्मततःकुर्याद्देशिकोयतमानसः॥आज्यान्नैर्जुहुयान्नित्यमन्नवान्वत्सराभवेत्॥पायसा
न्नेनमहतिंश्रियमाप्नोतिमानवइति॥तथासारसंग्रहे॥खांतोबिंदुसमायुक्तःक्षकारोक्षिसमन्वितः॥मादनाहृदंतोयमंत्रःपंक्त्यक्षरोम

र्ववत्समापंयेदिति ॥ लक्षमेकं जपेन्मंत्रं हविष्याशी जितेंद्रियः ॥ तद्दशांशं प्रजुहुयादपूपैर्घृतसंप्लुवैः ॥ एवं सिद्धं मनुर्मंत्री काम्यकर्माणि
साधयेत् ॥ अत्रापि कलावेन चतुर्गुणजपादिकमिति ॥ शुक्लपक्षे चतुर्थ्यां तु पूजयित्वा विनायकं ॥ अपूपैर्गुडसंमिश्रैः पक्वान्नैश्च घृतप्लु
तैः ॥ मरिचैर्जीरकैश्चैव सैंधवेन विमिश्रितैः ॥ देवस्य संनिधौ मंत्री जुहुयात्रिसहस्रकं ॥ गद्यपद्यमयी वाणी सप्ताहाद्भवति ध्रुवं ॥ वश्यार्थी
मधुहोमेन राजानं वशमानयेत् ॥ कन्यार्थी जुहुयाल्लाजैस्तन्नामपुरमंत्रतः ॥ एकाकन्यासधौसप्तभोजयेदुत्तमते वधूं ॥ चन्द्रसूर्यग्रहे ग्र
स्ते पलं तु कपिलाघृतं ॥ कर्षमात्रेन वाचूर्णितिथीकृत्याभिमंत्रयेत् ॥ पिवेत्तन्नीयतो भूत्वा देवताध्यानतत्परः ॥ यावज्जीर्णीभवेत्तावत्वाश्री
यात्किमपि सहः ॥ सप्ताहाज्जायते शीघ्रमपरो वाक्पतिर्यथा ॥ वध्वार्तुस्नानदिवसे पूजयित्वा विनायकं ॥ निष्कार्धपादमानेन हरिद्रां सैंध
वं वचां ॥ गोमूत्रकुडपेपिष्टं सहस्रमभिमंत्रितम् ॥ वध्वः कन्यां भक्षमोर्भाजयित्वा व्रतक्रमात् ॥ गुवे दक्षिणां दत्वा पिवेन्नारीनदोषधम् ॥ त
नसालभते पुत्रं सर्वलक्षणसंयुतं ॥ आयुष्मंतं सुरूपं च बुद्धिमंतं श्रियायुतमिति ॥ चन्द्रसूर्यग्रहेत्यादिनेन तदुक्तं भवति चन्द्रग्रहे सूर्यग्र
हे वा कर्षमात्रमविश्लक्ष्णां ववाचूर्णपलमात्रेण कपिलां गोघृतेन मिश्रीकृत्य मूलमंत्रेणाष्टोत्तरसहस्रवारमभिमंत्र्य तत्सप्तधा विभ
ज्यैकं भागं देवताध्यानपूर्वकं तदा निपिबेत् ॥ उद्धरितं भागषट्कं प्रत्यहमेकैकं भागं प्रतिप्रातर्देवताध्यानपूर्वकं दिनसप्तकं पिवेदेवं कृते प्रो
क्तसिद्धिर्भवति ॥ वध्वेत्यादिनेन तदुक्तं भवति निष्कमात्रं हरिद्रा निष्कार्धं सैंधवं निष्कचतुर्थांशं वचाचूर्णमेतत्त्रयं श्लक्ष्णं पेषितं कुडमात्रे

॥शि॰वं॥
॥१६८॥

द्रव्यैर्वीतपरागादीनितनतः॥पूर्ववदाचरेत्॥एवंसिद्धेमनोमंत्रीकुर्यात्कामानुशेषतः॥कलावेनचतुर्गुणामितिशर्करा घृतसंयुक्तेन हविषा
जुहुयात्सुधीः॥लक्ष्मीवान्केवलाज्येनहोमोलोकवशीकरः घृताक्तान्नंजुहुयादन्नवालाधकोभवेत्॥चत्वारिंशद्दिनेमंत्रीनारिकेलंहु
नेनतः॥सवर्मन्त्रोऽयंपञ्चकंचप्रत्यहंसाधकोत्तमः॥सर्वांछितार्थमभ्येतिनात्रकार्यविचारणा॥सजालकैःसक्तुभिश्चपृथुकैर्वांछितान्नये
होमोभवेद्दृभिश्चद्रव्यैस्त्रीमधुराप्लुतैः॥हुतेननतश्चवश्येराज्ञस्तत्त्वमदाश्रपि॥चतुःश्चत्वारिंशदाद्यंचतुःशतमतंत्रितः॥प्रातःप्रातस्तु
सलिलैर्विघ्नेशस्यचमस्तके॥तर्पयेच्छ्रीसमृद्धिश्चभवेत्स्नपनसंशशः॥पूर्वदिनेगणेशानसायांतंरविविंदतः॥सोपानेनाजसतंस्थविं
तयित्वातुनर्पयेत्॥पूर्वमंत्रप्रयोगांश्चकुर्यादत्रापिसाधकइति॥पूर्वोक्तत्र्यक्षरमंत्रोक्तार्॥तथासारसं॰ विघ्नवींशयुतःशार्ङ्गीना
राद्योनमसायुतः॥चतुर्वर्णोमनुप्रोक्तोहेरंवस्यमहात्मनः॥शार्ङ्गीगकारःविंदुरनुस्वारःअर्वीशःषष्ठस्वरःताभ्यांयुक्तस्ताराद्यश्चरणा
वाद्यःमनसायुतोनमोन्तः॥तथा॥मुनिर्गणकश्छन्दोनोगायत्रीछंदईरितं॥पंचवक्त्रोऽस्यहेरंवोदेवतासिंहवाहनः॥षड्दीर्घबीजयुक्तेनषडंग
विधिरीरितः॥मुक्ताविद्युत्पयोदामृतघुसृणनिभैःपंचभिर्नागवक्त्रैर्हेरंवोभावनीयःशशधरमुकुटोहस्तसिंहाधिरूढः॥हस्तैर्विभ्रद्विशूलां
कुशाकजपवटीमुद्गरान्तुकपालंटंकाङ्कोमोदकंस्याड्दलसदभयेघानकौमेघदीप्तिः॥अधःदक्षवामयोर्वराभये॥तदुपरिमोदक
रदौ॥तदुपरिपरशुकपाले॥तदुपरिअक्षमालामुद्गरौतदुपर्यङ्कुशत्रिशूले॥तथा॥पूर्वोक्तएवपीठेतुयजेद्धेरंवमन्वहं॥पद्मपत्र

168

॥रामः॥
॥१६८॥

न इति ॥ खांतो गः विंदुरनुस्वारस्तद्युक्तः क्षस्वरूपं अक्षीकास्तद्युक्तः मीहितः यकार रेफः स्वरूपं तद्युक्तः पार्श्वः पकारो वह्निरेफस्तद्युक्तस्मा
द्दतमस्वरूपं दंदंतो नमोंतः ॥ ऋषिर्गणकाख्यातछंदः प्रोक्तं विराडिति ॥ देवताकथितक्षिप्रप्रसादनविनायक ॥ इति ॥ दीर्घभाजा स्वबी
जेन कुर्यादंगक्रियां मनोः ॥ पाशांकुशौ कल्पलतां विषाणं दधत्स्वशुंडाहितवीजपूरः ॥ रक्तस्त्रिनेत्रस्तरुणेंदुमौली हारोज्वलो हस्तिमु
खोवतान्नः वामोर्ध्वकरतारभ्य वामाधःकरपर्यंतमायुधध्यानम् ॥ पूर्वोक्ते पियजेत्पीठे नवशक्तीसमन्विते ॥ मूर्तिमूलेन संकल्प्य तस्यां
विघ्नेश्वरं यजेत् ॥ प्रथमावृत्तिरंगैस्याद्वितीया चाष्टभिर्गणैः ॥ विघ्नो विनायकाख्योन्यः शूराख्यो वीरसंज्ञकः ॥ वरदस्त्वेभवक्त्रोन्य एकदंताह्व
मापरः ॥ लंबोदरोष्टमः प्रोक्तो दलाग्रे मातृपूजने ॥ वाह्यलोकेश्वराः पूज्यास्तदस्त्राणि ततो बहिः रिति ॥ अथ प्रयोगः ॥ प्रातःकृत्यादियो
गपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि ॐ गणकाय ऋषये नमः ॥ मुखे विराट्छंद० हृदये श्रीक्षिप्रसादनाय गणपतये
दे० इति विन्यस्य गांगींमित्यादिना करषडंगन्यासं विधाय ध्यानादि मानसपूजांते चतुर्द्वारयुक्तं चतुरस्रत्रयवीतमष्टदलकमलमं
त्पीठनिर्मायार्घादिपुष्पोपचारांते केसरेषु षडंगानि पूज्याष्टदलेषु देवाग्रादिप्रादक्षिण्येन ॥ ॐ विघ्नाय नमः ॐ विनायकाय ० ॐ
शूराय ० ॐ वीराय ० ॐ वरदाय ० ॐ इभवक्त्राय ० ॐ एकदंताय ० ॐ लंबोदराय नमः ॥ इति संपूज्य दलाग्रे मातृश्चतुरस्रे लोकपालास्त
दस्त्राणि च संपूज्य प्राग्वद्धूपं समापयेत् । तथा मूलमेकं जपेन्मत्री तदंतेन तद्दशांशतः ॥ त्रिस्वाद्वक्तैस्तिलैर्होमं कुर्यात्पूर्वोदिताष्टभि

॥शि॰च॥
॥१६९॥

वीदिग्प्रादक्षिण्येन॥ ह्रींक्रौंङंगंनमःसद्वितीयदलेसर्वविघ्नाधिपायसतृतीयेदलेसर्वार्थसिद्धिदायसचतुर्थदलेर्वदुःखप्रशमनायपंचमदलेयषष्ठे
हिमगवन्ष्ठदलेसर्वांतस्वादयस्तंभसप्तमेदलेयंस्तंभयह्रींगंगांअष्टमेदलेनमस्वाहाक्रौंइतिविलिख्यपश्चाद्बहिर्वृत्तद्वयेकृत्वावीथीद्वयंनिष्पाद्यतत्र
प्रथमवीथ्यांस्वाग्रमारभ्यप्रादक्षिण्येननिरंतरंशक्तिवीजेनवेष्टयद्वितीयवीथ्यांतथैवविंदुमकारेणावेष्ट्यगुलिकीकृत्यस्वेतसूत्रेणासंवेष्ट्यपुनःस्व
र्णारजतताम्रैरग्निसंवेष्टमकुर्वन्नावेष्ट्ययथाविधिधृतमुक्तफलदंनभवति॥ अत्रयंत्रालिखितमालामंत्रस्यपूजाजपादिकंसर्वहेरंववत्कार्यं अ
मितंद्धदमितिशेषः॥ तथासारसंग्रहे॥ प्रणवःपतृतीयश्चवामवाहोश्चमूलकं॥ स्वरहीनस्तवर्गादिविसुहृज्जानुवर्णकः॥ सुवुंसरणमनुप्रोक्तोभजतो
सर्वकामदः॥ इतिपतृतीयोवकारःवामवाहुमूलचकारःतवर्गादिस्तकाद्दशनकारःस्वरहीनः॥ सुवस्वरूपहृन्नमः॥ जानुवर्णसप्ताक्षरं॥ शारदाति
लकेत्वंतस्यावकारउक्तः॥ प्रयोगसारेतु॥ प्रशस्तःप्रणवाद्यंतशक्तिपूर्वंयजेद्गुरुरिति॥ प्रणवांतश्चेदयंमंत्रस्तदाष्टवर्णकंभवतिप्रणवादौशक्तिवी
जंतस्योवकारान्योयमष्टाक्षरोभवति॥ एवंत्रिविधोयंमंतव्यं॥ ऋषिरग्निःसमाख्यातोगायत्रीछंदउच्यतेसुवुसरणाख्यमंत्रस्यदेवतापरिकी
र्तिता॥ दीर्घभाजाग्निवीजेनषडंगानिसमाचरेत्॥ पायाद्वोरुणविग्रहःशशिसुख॥ सम्यग्ध्यानानोपूजेपस्त्रंभीतिहरंरिपुक्षयकरीश
क्तिंशुभंकुक्कुटं॥ रक्तालेपनवस्त्रदामरुचिरोनानाविभूषान्वितासुवुसरणपगणाधिपःशुभकरोभक्तोघविध्वंसकः॥ दक्षाधःकर
योरन्यइत्यायुधध्यानम्॥ वह्न्यंतेपूजितेपीठेपूर्वोक्तेभजयेदिमं॥ उक्तोपचारसहितंविधिनाभक्तवत्सलम्॥ वह्न्यांतेइत्यनेनसत्वा

169

॥राम॥
॥१६९॥

दलंकृत्वा चतुरस्रत्रयावृतं ॥ चतुर्द्वारसमायुक्तं तत्रादावासनं यजेत् ॥ ऋवांते हुंद्वयं प्रोक्ता महासिंह्चवेदयुते ॥ गोवहेरंवशब्दः स्यादासनायनमोंततः
श्रासनाख्योमनुं ॥ प्रोक्तो दत्वानेतामनं विभाः ॥ क्रवयुक्तेनवीजेन कुर्यान्मुक्तिप्रकल्पनं ॥ आदावंगानि संपूज्य लोकपालान्यजेद्बुधः ॥ तेषामस्त्राणि त
द्वाह्येहेरवार्वासमीरितेति ॥ अथप्रयोगः ॥ तत्रप्राग्वद्योगपीठन्यासांते सिरसि ॐ गणकाय ऋषयेनमः मुखेगायत्रीछंदसेनमः ॥ हृदये श्रीहेरंवायदे
वतायैनमः ॥ इतिविन्यस्यगां गीमित्यादिनाकरषडंगन्यासंविधाय ध्यानादिमानसपूजांते प्रोक्तमष्टदलकमलं कृत्वार्घादियोगपीठनवशक्तीपूजांते ॐ
हुंहुंमहासिंहाय गांहेरंवासनायनमः इत्यासनंसंपूज्य ॐ गूं गणपतिमूर्त्तिं क--मीति तत्रमूर्त्तिंपरिकल्प्यावाहनादिपुष्पोपचारांते केसरेषु षडंगानि संपूज्य
लोकेशावीदि प्राग्वत्समापयेत् ॥ इति ॥ लक्षंचजपित्वांतेतिलैर्हुत्वादशांशतः मधुरत्रयसंयुक्तैस्तर्पणादिसमाचरेत ॥ एवंसिद्धमनुर्मंत्री प्रयोगानाचरेत्त
तः आत्रायमेवकलिप्रगजप ॥ चतुर्दश्यष्टमीषष्ठांक्षेकेकंजुहुयाद्बुधः अपूपैःपूरैर्मंत्रीमोदकैश्चेष्टसिद्धये ॥ पूर्वोक्तैर्जुहुयाद्द्रव्यैः पर्वस्वपिचमंत्रवित् ॥
मयदिष्टंतत्सर्वं साधकस्तेनसाधयेत् ॥ अथयंत्रंप्रवक्ष्यामी हेरंवगणोशितुः ॥ भूर्जपत्रेलिखेमकुंमदघुसृणोर्मध्यवीजाद्यसंकिंजल्केष्वंगमंत्रान्वसुदल
विवरेसप्रधांसविभज्य ॥ मालांराशिष्टपत्रेविलिषनुषडपिप्रांतगानेववर्णान्दशान्त्यावीतंसकारावृतमपितदनुश्चेनसत्रावृतंस्यात् ॥ लोहैःसंवेष्टयंत्रंत्रिभि
रपिविधृतवाहुनाभिष्टदंस्यामिति ॥ अयमर्थः भूर्जपत्रेजमदसहितकुंकुमेनाष्टदलपद्मंविरच्य तन्मध्येहेरंववीजंविलिख्य तस्यविंदुस्थानेअमुकस्यउत्तरस्था
नेअमुकमध्येवशंकुरुकुरु ॥ इत्यादिस्वेष्टकर्मपदंविलिखेदित्येवसाधकसाध्यकर्माणिपालिख्य तत्केसरेषुषडंगमंत्रान्स्वस्थानमालिख्याष्टसुपत्रेसुपू

॥शि॰च॥
॥१७०॥

शः पञ्चन् ॥ एहिकामुष्मिका भोगान् लभते नात्र संशय ॥ ॥ सुंदराचार्यशिष्येन श्रीनिवासेन धीमता ॥ चंडिकायां प्रणीतायां प्रका
शः षोडशगमन् ॥ ॥ इति श्रीसुंदराचार्यचरणारविन्दद्वंद्वांतेवासिनाश्रीनिवासभट्टेन विरचितायां श्रीश्रीश्रीशिवार्चनचंडिकायां षो
डशः प्रकाशः ॥ ॥ मारसंग्रहे ॥ अथ प्रवक्ष्ये मनुवर्यमेनं महागणेशस्य समासतोत्र ॥ उपासनं मूढधियोपि सिद्धिं प्राप्नुः सुरैरप्य
भिवांछितां तो ॥ सिद्धर्षिसंघैर्विविधैस्तपास्यसुरासुरैः किंनरयक्षनागै ॥ गंधर्वसिद्धव्रजचारणाद्यैः संसेवितं चापि गणैः समस्तै ॥ नारीन
रणां वशकारकं तद्भूपालसंघातवसे प्रशस्तं ॥ तत्सुंदरीवश्यकरं ह्युःमात्यनृपौघवश्यप्रदमाशु लोके ॥ ॥ व्याघ्रद्विपव्याल
समूहचौरवेतालभूतादिकदुष्टजंतून् ॥ वशे विधातुं प्रथितं पृथिव्यां लोकौघजंतुव्रजमोहकं च ॥ तथाजनाकृष्टिकरं प्रसिद्धं पु
ष्टिप्रदं भक्तिजनस्य नित्यम् ॥ ॥ उच्चाटकर्मण्यपि शक्तमाद्यं लोके तथा मारणकर्मशक्तं ॥ कृशानुसंस्तंभनकारणं च विद्वेषि
वाणि वतिरोधकं च ॥ ॥ कृपाणधाराधाराशरसंचपाणां संस्तंभने विद्युदपस्तनीनां ॥ स्तस्तंभनं वानसमूहरूपे शुक्रादि
संस्तंभकरं परं च ॥ ॥ पातालल्लोके गतिप्रदं वरशायनाद्यंजनसिद्धिदं च ॥ सुपादुकापारदवेधसिद्धिखड्गादिसि
द्धिप्रदमुत्तमं च ॥ सुयक्षिणीसाधनशक्तमुच्चैः सम्यक् जनावेजकरं प्रसिद्धम् ॥ ॥ वेदादिपद्मनिलयाभुवनेश्व
री संकामाक्षमागणपमंत्रवराणि हाक्ताः ॥ कांतातनोदियतनयेवरणीरवह्रीमन्कादसर्वजनमर्कशिवौवशं च ॥ प्रोन्कानयेतिदहनस

170

॥ गणः॥
॥१७०॥

दिपूजानिषेधः॥ अन्यथोक्तिवैपर्य्यप्रसंगात॥ अंगान्यादौसमभ्यर्च्यकेसरेषुयथापुरा॥ पूर्वादिदलमध्येतुयजेद्देवाविमांक्रमा
त्॥ स्यातांजयंताग्निवेषौकृत्तिकापुत्रस्तथा॥ स्ताभूतपतिसेनान्योगुहाख्योहेमशूलकः॥ विशालाक्षश्चसंप्रोक्ताःशूलशक्तिक
राह्वये॥ दलाग्रेषुचपूर्वादियजेद्देवाननंतरं॥ देवसेनापतिंविप्रंशक्तिकुक्कुटमेवच॥ मधामयूरंवज्रंचद्वीपंलोकेश्वराननत्॥ व
ज्रादीनितनोवाह्यदेवमित्यंप्रपूजयेदिति॥ ॥अथप्रयोगः॥ तत्रप्रातस्नात्वानादियोगपीठन्यासांतेशिरसि ॐ ब्रह्मणे ऋ
षयेनमः॥ मुखेगायत्रीछंदसेनमः॥ हृदिसुब्रह्मण्यादिदेवतायेनमः॥ इतिविन्यस्यरांरीमित्यादिनाकरषडंगन्यासंविधायध्या
त्वादिमानसपूजांतेप्रागुक्तमर्चापीठमभ्यर्च्यार्घ्यादिपुष्पोपचारान्तेप्राग्वत्केसरेषुषडंगानिसंपूज्याष्टदलेषुदेवाग्रमारभ्य ॐ यजंताय
नमः॥ ॐ अग्निवेशाय॰ ॐ कृत्तिकापुत्राय॰ ॐ भूतपतये॰ ॐ सेनान्यै॰ ॐ गुहाय॰ ॐ हेमशूलाय॰ ॐ विशालाक्षायनमः॥ ततोष्टद
लेषुदेवाग्रमारभ्य ॐ देवसेनापतये ॐ शक्तये॰ ॐ विप्राय॰ ॐ कुक्कुटाय॰ ॐ मेधामै॰ ॐ मूराय॰ ॐ वज्राय॰ द्विपायनमः॥ इतिसं
पूज्यलोकेशावीदिसर्वंप्राग्वत्समापयेत्॥ तथा॥ लक्षमेकंजपेन्मंत्रंसर्पिषावापयोधसा॥ अयुतंजुहुयान्मंत्रीतर्प्पयेद्विजपुंगवान्
एवंसिद्धमनोमंत्रीकुर्यात्कार्याण्यथेप्सितान्॥ ॥अयंजपःकृतयुगपरःकलावेतच्चतुर्गुणमिति॥ षष्ठीदिनेसमधुरैर्भक्ष्यभोज्यैःप्र
तोषयेत् देवंदेवस्त्रियासम्यग्गर्वयेद्ब्रह्मचारिणः॥ सुब्रह्मण्यमनोःसम्यगुपास्तिंयेप्रकुर्वते॥ लक्ष्मीमायुधश्चतेजश्चपुत्रान्पौचान

शिवा
१७१

तलेकल्पपादपछायस्थषट्पदस्वनमंजुले॥ गरिजानंकल्पतरुंतस्यमध्येविचिंतयेत्॥ युगपदृतुषट्केनसेवितंउपशोभितं॥ नवरत्नमयं
तस्याधस्तात्सिंहासनंस्मरेत्॥ तन्मध्येलिपिपद्मंचषडरंतस्यमध्यतः॥ कर्णिकायांगणेशंचतन्त्रसंस्थंचमहागणं॥ नानारत्नविभूषाढ्यमेकद
न्तंगजाननं॥ चक्राब्जत्रिशिखानागोपजभूरक्तोत्पलंसकृदां॥ व्रीह्यग्रान्वितबीजपूररदनान्कुभंकरैर्विभ्रतं॥ पद्मोत्पलकरयानिजप्रमदया
श्लिष्टंजपासन्निभंसाधुड्व्रभजेमहागणपतिनेत्रत्रयोद्भासितं॥ इक्षुरोधतरलोद्यमपङ्कभ्रमरवस्कतान् मणिमुक्ताप्रवालादीन्वर्षन्तंधार
यामुहुः॥ सर्वतःसाधकस्याग्रेस्वदानजललोलुपां॥ षट्पदालीकर्णतालैर्वारयंतंमुहुर्मुहुः॥ अमरासुरसंसेव्यंसद्रत्नमुकुटोज्ज्वलं॥ उ
रुकरंराजमुखंनानाभरणाभूषितं॥ इतिध्यात्वागणपतिंयजेत्सर्वोपचारकैः॥ ऊर्ध्ववामदक्षयोश्चक्राब्जेनधशूलपाशौ॥ तदधोधनुरुत्प
ले॥ तदधोगदाव्रीह्यग्रे॥ तदधोबीजपूररदनौ॥ शुण्डाग्रेरत्नकुंभइत्यायुधध्यानं॥ अपरेतुवामोर्ध्वदिक्रमेणानदधतीतिवदंति। तदुक्तंप्रयोग
सारे॥ चक्रप्रासारसालकार्मुकगदासद्बीजपूरद्विजव्रीह्यग्रोत्पलपाशपंकजकरंशुण्डाग्रजायद्धटमिति॥ प्रासत्रिशूलमसालकार्मुकंइक्षुका
र्मुकद्विजोदनं॥ गणेशपरामर्शिन्यांतुः॥ इक्षार्धकरमारभ्यवामाधस्तकरावधि॥ गदाशूलाब्जकह्लादविषाणांदक्षिणौःकरै॥ शाल्यग्रपा
शचक्रेक्षुचापसंबीजपूरकान्॥ वामैर्दधानमित्युक्तं॥ अत्रयथागुरूपदेशंकार्यमिति॥ तथा॥ धर्मादिक्रमेनपूर्वोक्तेतीव्रादिनवशक्तिके॥ पी
ठेविघ्नेशमभ्यर्च्यसम्यक्सर्वोपचारकैः॥ त्रिकोणस्यविल्वादिधोविघ्नंलक्ष्म्यान्वितंजपेत्॥ पद्मद्वयकरापद्माशंखचक्रगदाधरोहरिः॥ दक्ष

171

राम
१७१

वंधुसमुत्कासं कीर्त्तितो मनुरयं मनुयुग्म वर्ण्णा ॥ शक्तो यच्चिंतितमनोरथकल्पशाखी भूतिप्रदश्च यतांवरसाधकानांमिति· वेदादिप्रणवः प
मनिलयाश्रीवीजं भुवनेशी तद्वीजं ॥ साममाकामवीजसहिता भुवनेशीवीजानंतरं कामवीजमित्यर्थः ॥ क्षमाभूवीजं ग्लौमिति ॥ गणाप मंत्रः गं
कां तोगवादिर्णाकार तपनयेस्वरूपं नीरंवकार ॥ मनुयुग्मवर्ण्णाः अष्टावरस्वरूपं नीरंचकारः सर्वजनस्वरूपं वह्निरेफः दस्वरूपं अकोन
कारः रुकारः तेनमेव शंस्वरूपं आनयस्वरूपं ॥ अत्र संधिज्ञेयः दहनस्य वधूः स्वाहांकार ॥ मनुयुग्मवर्ण्णाः अष्टाविंशत्यक्षरः तथा ॥ ऋषि
समुक्तो गणको निचृच्छंदोस्य गायत्रमदीरितं हि महागणेशो गादि तस्य देवः सुरासुरैः सेवितपादपद्म ॥ गंवीजं क्लीं शक्तिरिति पद्मपाद
चार्या ॥ तारादिषड्वीजसमन्वितेन षड्दीर्घभाजा निजवीजकेन ॥ कुर्यान्मडंगानि मनोर्यदावत्स्वजातियुक्तान्यथ मंत्रविज्ञः ॥ सद्वादशांतश्रु
ति नेत्रनामाक्षं ब्रास्यदोः पदयसंधिदेशे ॥ अनाहतेथो मणिपूरके त्वाधिस्थान आधारयदेषु वर्ण्णान् ॥ विन्यस्य शीर्षाननहृत्सगुह्यपदद्वत्तवी
जानि परिन्यसेच्च ॥ ततो वशिष्टैः खलु मंत्रवर्ण्णैः संव्यापयेत्त्वे सकले शरीरे ॥ सवङ्कहृदयपदेषु पश्चान्न्यसेत्तन्नाम्नामिथुनानि मंत्री ॥ तेष्वेव हृ
न्नानुयुतेषु भूयो न्यसेच्च षट्शक्तियुतान्गणेशान् ॥ इत्थं प्रविन्यस्य निजे शरीरे ध्यायेद्गणेशं निजहृत्सरोजे ॥ ऐक्षवे जलधौ द्वीपे नवरत्नमये
शुभे ॥ तत्ररंगलसत्कोयैर्धौतशांतलेमले ॥ तन्नोयकरामंदक्रगंधवाऊनिषेविते ॥ कल्पपादसंशोभिभूभागे समलंकृते ॥ नानाकुसुमसंकी
र्णे नानापक्षिविराजते ॥ अनेकफलसंकीर्णासेविते वापरोगणौ ॥ उद्यज्ज्वालानयज्योतवंद्रज्योत्स्नासमाकुले ॥ विलसत्पद्मरागोघकुदिमाहराभू

नासायां वं· वामनासायां रं· मुखे वं· दक्षवाहुमूले रं मध्ये दं· मणिमवंधे सं· अंगुलीमूले वं अंगुल्यग्रे जं· वामवाहुमूले नं तन्मध्ये मं· मणिवं
धे वं अंगुलीमूले शं अंगुल्यग्रे मां॥ अनाहते मणिपूरके यं· स्वाधिष्ठाने स्वां मूलाधारे हां नमः॥ शिरसि ॐ नमः मुखे श्रीं· हृदि ह्रीं· गुह्ये क्लीं पा
दयोः ग्लौं· हृदये गं नमः गणपतये इत्यादि द्वाविंशति वर्णों मूर्द्धादि पादांतं व्यापकविन्यस्य ध्यानादिमानसपूजांते प्रागुक्तमातृकापद्मं च
तुर्द्वारयुक्तं चतुरस्रत्रयवेष्टितं कृत्वा तत्कर्णिकायां षट्कोणं तदंतस्त्रिकोणं च कुर्यादिति पूजाचक्रं समुद्धृत्यार्घस्थापनादि विष्णोः पवारांते प्रो
त्समापयेदिति ॥ तथा ॥ सकललक्षं जपेन्मंत्रं जुहुयात्साधकोत्तमः ॥ तद्दशांशं पयोन्नेन सर्पिरक्तेन मंत्रवित् ॥ तर्पयेत्तद्दशांशेन सुगं
धिसलिलैः शुभैः ॥ आत्मानमभिषिंचाथ ब्राह्मणांस्तोषयेद्गुरुं ॥ एवं संसिद्धमंत्रस्तु प्रयोगान्कर्तुमर्हसि ॥ काम्यहोमविधिं वक्ष्ये
सम्यक्तं कल्पसिद्धिदं ॥ येनासौ वांछितं क्षिप्रमवाप्नोति सुनिश्चितं ॥ वश्याय हुनितां होमात्कुसुमैर्मधुमिश्रितैः ॥ नारिकेलफलाद्यैर्नै
र्हुतैर्लक्ष्मीमवाप्नुयात् ॥ उन्नागजैर्हुतैर्वस्त्राणाम्यैरिष्टमवाप्नुयात् ॥ माहिषैर्महिषीराज्ञेरज्ञा गव्यैश्च गास्तथा ॥ अवाप्नोति हुतैराज्ये
रत्नैरत्नानि साधकः ॥ शालिपिष्टमयीं कृत्वा पुत्तलीं सितसंयुतां ॥ हृद्देशान्यस्तसाध्याख्यां यजेत्तैलाज्ययोर्निशि ॥ तां मंत्री च दिवारात्रौ
विद्याज्ञानं तु भक्षयेत् ॥ सप्तरात्रप्रयोगेन नरो नारी नृपोथवा ॥ दासवद्वशमायाति वितप्राणादिकं चार्पयेत् ॥ हयारिपुष्पैररुणैः सि
तैर्वा जुहुयात्तथा ॥ त्रिसप्तरात्रान्महतीमवाप्नोति श्रियं नरः ॥ छागमांसैस्त्रिमध्वक्तैर्होमात्स्वर्गामवाप्नुयात् ॥ क्षीरोक्तैः सस्यसंपन्ना

हंसुरूइतिअंत्यःसकारः॥ अर्द्धचंद्रोविंदुः तेन हं· वर्म हुं· अंत्यक्षकार· दीर्घआकारः॥ विंदुरनुस्वारः॥ तेनक्षांइति हं· तं पंचाननाय हृन्नमः॥ अ
नेनमनुनाद्याद्यासनंमूर्तिकल्पना॥ मूलमंत्रेणाकर्त्तव्यात्वरितांपूजयेत्ततः॥ यथावत्केसरेष्वंगपूजाकार्याविपश्चिता॥ प्रणीतांचैवगाय
त्रीयजेत्तत्रैवमंत्रवित्॥ तत्रैवसप्तमाष्टमकेसरयोर्विपश्चितेत्यनेनषडंगपूजायांविशेषउक्तः॥ तथा॥ अत्रदेव्यग्रकेसरमारभ्यप्राद
क्षिण्येनषट्सुकेसरेषुषडंगानिसंपूज्यदलेपूर्वादिकक्रमात्॥ अंगंप्रणीतांगायत्रीमिति॥ तोतलामतेपि॥ यजेत्तत्राग्निपत्रेषुपू
र्वाद्याद्येगदेवताः॥ सोम्येप्रणीतामैशेवगायत्रीमभिपूजयेदिति॥ पद्मपादाचार्यापश्चिमपूर्वादिषट्सुकेसरेषुषडंगानिसंपूज्योत्त
रैशानयोरुभयंपूजयेदिति॥ प्रपंचसारे॥ हुंकार्याख्यांखेचरीवंसछेदिनीतथा॥ क्षेपणीभूयःस्त्रियाहुंकारीसक्षेमंकर्पश्चसंपू
ज्याः॥ सश्रीवीजालोकेशायुधभूषणान्विता दलाग्रेषुलोकेशवाहनमपिज्ञेयं॥ इंद्रादिलोकपालानांवर्णावाहायुधैःसमाः॥ इति
तोतलामतात्॥ तथा॥ फट्कारीचाप्यग्रेसचापशरधारिणीतद्वाह्ये· सस्वर्णवेत्रयष्ट्योद्वास्थेपूज्येपुनर्जयाविजये॥ कृष्णोवर्वरके
शोलगुडधरःकिंकरश्चतत्परतः॥ वर्वरउद्धूषितःकुटिलइतियावत्॥ सारसंग्रहे॥ किंकरायरक्षयुग्मंत्वरिताज्ञास्थितोभवःकवचांते
फट्चवदेदनेनमनुनाततः॥ लगुडःगदा॥ कृष्णवर्णोगदापाणिरितिसारसंग्रहात्॥ सारसंग्रहे॥ आरक्तैर्वनसंभूतैर्मनोज्ञैश्चसु
गंधिभिः॥ धूपदीपादिभिर्नित्यगीतैःसंपूजयेच्छिवां॥ एवंपूजांविधायाग्रेजपेद्विद्यांसहस्रकं॥ शतंवाकृतहोमस्तुपूजांप्राग्वत्समापये

पुरात्मकैः॥ विप्रक्षत्रियविट्शूद्रजातिभिर्भमविग्रहैः॥ द्विद्विक्रमादष्टनागः कल्पितोघन्तुभूषणां पद्मवांकुशासंभीतिशिखिपिछकृतैः
शुभैः॥ वलयैर्भूषितभुजां माधाकपमुकुटोज्वलां॥ वर्हिवर्हकृतबीजातछत्रांत्वांतत्पताकिनीं॥ गुंजाकफलसत्कारविलसत्कुचमंडलां
त्रिनेत्रांचारुवदनांमंदस्मितमुखांबुजां॥ वराभयकरांगंडद्वयीमुकुरशोभितां॥ तनुमध्यलतामुच्चपृथुलस्तनयुग्मकां॥ अरुणायत
सन्नेत्रांसुशोणाधरपल्लवां॥ विमलांमंदिरांदेवींतरुणींसंस्मरेत्सुधीः॥ अनन्तकुलिकौनागौविप्रौवह्निसमद्युती॥ फणासहस्रसंयुक्ताव
थसत्रेजुवासुकिः॥ शंखपालःस्वर्णावर्णौफणाष्टकशतावृतौ॥ तक्षकश्चमहापद्मःफणापंचशतान्वितः॥ नीलवर्णौवैश्यउक्तपद्मक
र्कोटकौउभौ॥ फणासनत्रयोपेतौकृष्णवर्णौविचिन्तयेत्॥ ततदाभरणोर्द्धकौध्येयौदेवीविलोकितौ॥ दक्षवामयोर्वराभयेविप्रनागाव
नंतकुलिकौवह्निवर्णौप्रत्येकंसहस्रफणालंकृतौनृपौवासुकिशंखपालौपीतवर्णौप्रत्येकमष्टशतेवैशौत्रिशतफणालंकृतौततदाभर
णभूतौध्येयौ॥ आसनेहेमरविनेत्वष्टसिंहधतेभितः॥ सरोजमष्टपत्रस्याद्दलयुग्मंततोभवेत्॥ तद्वहिर्भूपुरंद्वंद्वंपश्चिमेद्वारसंयुतं॥ माया
पीठोदिताअत्रनवशक्तीःप्रपूजयेत्॥ त्वरितांवक्ष्यमाणोनविधानानात्रसंयजेत्॥ अंत्यःसनेत्रार्द्धचंद्रौगुलुगर्जद्वयंवदेत्॥ उपांत्यस्वरयुग्धो
मवमांत्योदीर्घविंदुयुक्॥ हेंनंयंचाननेहृत्पीठमंत्रउदाहृतः॥ अंत्यंक्षकारःसदीर्घःसानुस्वारस्तेनक्षांवक्षः वर्मंहुं खंहकारःसदीर्घःसानु
स्वारस्तेनहंसुधावकारः॥ गुदेस्वरूपःवियदूकारःसोऽन्त्यःमकारःकर्णाउकारस्तेनमु अग्निःरेफः॥ अपिशब्दादुकारयुक्तस्तेनरुइतिपुनरेतद्

राभोजने ॥ एवं सिद्धे मनौ तस्मिन्नरनारी नराधिपाः ॥ नमस्क्रियां प्रकुर्वंति नात्र कार्या विचारणा ॥ देवदानवगंधर्वयक्षचारणयोषितः ॥
सिद्धविद्याधराणां च योषाह्यप्सरसस्तथा ॥ विस्पष्टजघनोरस्काः स्पष्टदोर्मूलमंजुलाः ॥ प्रस्खलन्मंदविन्यासाः प्रस्पंदिदशनांशुकाः ॥ रम्य
मीषदुन्मीलितनयनेंदीवराश्रिताः ॥ श्लथमानांगवसनाः श्लथाकुंचितमूर्द्धजाः ॥ मदास्खलितभाषिण्यः प्रसादाकाक्षया मुहुः ॥ सम्यकशिरो
विरचितनत्यंजलयउत्कटं ॥ पश्य वा त्वं प्रयच्छाशु ह्याश्लेषसुखमेधिनः ॥ एहि रम्यसुरोद्यानं रंस्यामोत्र निजेच्छया ॥ निरातंकाः सदेत्यादिवादि
नीभिरहर्निशं ॥ प्रलोभ्यमानो मंत्रज्ञो यदा विक्रियते न सः ॥ तदेत्यवांछितं तस्मै ददाति त्वरिताखिलं ॥ संजप्य कर्णयोर्विद्यां यस्यावा जपसिद्धया ॥ संता
पशीर्षं सहसा मृतमुत्थापयेदसौ ॥ काम्यहोमविधिं वक्ष्ये यथाविधिविधानवित ॥ कृत्वा योनिं कुण्डमध्ये समाधायाग्निमंत्रतो ॥ संपूज्य पूर्वविधिना दे
वतां विधिवत्सुधीः ॥ तिलसर्षपगोधूमशालिधान्ययवैर्हुनेत ॥ त्रिमध्वक्तैरेकशो वा समस्तैर्वा समृद्धये ॥ वकुलैश्चंपकै रक्तकह्लारैररुणोत्पलैः ॥
कैरवैर्मल्लिकाकुंदमधूकैरिंदिराप्तये ॥ अशोकैः पाटलैर्बिल्वैर्जातीविकसितैः सितैः ॥ नवैर्नीलोत्पलैरश्वरिपुजैः कर्णिकारजैः ॥ होमाल्ल
क्ष्मीं च सौभाग्यमायुर्नित्यं यशोनिधिं ॥ यद्यद्धि वांछितं सर्वं तदाप्नोति निश्चितं ॥ दूर्वागुडूचीमश्वत्थं वटमारग्वधं तथा ॥ सिताज्यलसकं हु
त्वा रोगान्मुक्तो नरोचिरात ॥ इक्षुजंबूनारिकेलमोचागुडसिताहुनेत ॥ अचलां लभते लक्ष्मीं भोक्ता च भवति ध्रुवं ॥ एतैरुदीरितै राज्यम
धुक्षीरघृतैर्हुनेत ॥ एकैकैर्वनिता वश्या यावज्जीवं धनादिभिः ॥ एते राज्यप्लुतैर्भूया वश्या सुहृद्वना तथा ॥ क्षीराक्तैस्तैर्हुनेमर्त्या वशे तिष्ठंत्य

296

राम
२९६

न ॥ अथप्रयोगः ॥ तत्रप्रातः कृत्यादियोगपीठन्यासांते मूलविद्यया प्राणायामत्रयं कृत्वा शिरसि अर्ज्जुनायऋषयेनमः ॥ मुखेविराजे
छंदसेनमः ॥ हृदये श्रीत्वरितानित्यायैदेवतायैनमः ॥ गुह्ये ॐबीजायनमः पादयोः क्लींशक्तयेनमः ॥ इतिविन्यस्य ममसकलपुरुषा
र्थसिद्धये विनियोगः ॥ इतिकृतांजलिरुक्त्वा वछे हृदयायनमः छेक्षः शिरसेस्वाहा क्षः स्त्रीं शिखायैवषट् स्त्रीं हुं कवचाय हुं क्षें नेत्रा
यवौषट् क्षेफट् अस्त्रायफट् इतिकृतषडंगन्यासं विधाय ध्यानाद्यात्मपूजांते भुवनेश्वरीपीठमभ्यर्च्यावाहनादिपुष्पोपचारांतेऽष्टद
लकेसरेषु देव्यग्रादिषु केसरेषु षडंगानि संपूज्यातिमकेसरयोः ॐप्रणीतायैनमः ॐगायत्र्यै इतिसंपूज्याष्टदलेषु ॥ ॐश्रींहुंकार्यै ए
वं खेचर्यै चण्डायै छेदन्यै क्षेपण्यै स्त्रियै हुंकार्यै क्षेमकर्यै इतिसंपूज्य देव्यग्रे ॐफट्कार्यै देव्यग्रद्वारे दक्षवामपार्श्वयोः ॥ ॐजयायै ॐवि
जयायै इतिसंपूज्य द्वाराग्रएव ॥ किंकरायरक्ष २ त्वरिताज्ञास्थिरोभव हुंफट् किंकरायनमः ॥ इतिसंपूज्य लोकेशादीन्प्राग्वत्समाप
येदिति ॥ अत्रहुंकार्यादिशक्तीनां लोकेशात्मकत्वाल्लोकपालार्चनानास्तीति केचित् ॥ तथा ॥ मृडानीतंत्रे ॥ त्वरितादेविशब्दनि विघ्नहेतू
र्निमुच्चरेत् ॥ विद्यायैधीमही प्रोक्ता तन्नोदेविप्रचोदयात् ॥ गायत्री त्वरितायाश्च जयात्सान्निध्यकारिणीति ॥ गायत्र्युक्ता ॥ प्रपंचसारे
दीक्षांप्राप्य गुरोरथ लक्षंजप्याद्दशांशकंजुहुयात् ॥ विल्वसमिद्भिस्त्रिमधुरसिक्ताभिः साधकः स्वयमिति ॥ सारसंग्रहेपि ॥ एवंसंस्मृत्य लक्षै
कंप्रजपेन्मंत्रवित्तमः ॥ मध्वक्तविल्वसमिधो जुहुयात्तद्दशांशतः ॥ सुगंधिसलिलैश्चैव तर्पयेत्त्वरितांपरां ॥ आत्मानमभिषिंच्याथ कुर्याद्ब्राह्म

श्रि·च
२९७

त्रभवेत्तस्यं न कदाचित॥ श्रीमत्रमेनं संप्रतिवक्ष्ये विविंदुकारमाथसावि पंचदीर्घसंयुतं॥ मरुद्वदीर्घसंयुतो विलोमगानिमान्वदेत्
भृगुश्चकांतिसंयुतस्तपंचमश्चसघयुक॥ अनंतयुग्मरुद्भवेज्ञमेयुतंयुनर्भवेत्॥ इमांविलोमगांस्ततश्चमामभृद्वदीर्घयुक॥ धराव
वामनेत्रयुग्वसुंधराद्यनंतयुक॥ इमान्विलोमगान्पठेत्ततश्चयाज्ञमेयुतं॥ पदेच्चलायदंचलीमुवैपरीत्यगानिमान्॥ वदेद्रमामत
र्नतः ससर्वकार्यसाधकः॥ विविंदुकारमाः॥ श्रीसास्वरूपंविषमकारः॥ दीर्घआकारस्तेनमाइति॥ मरुद्यकारः॥ दीर्घआकारस्तेन
याइति विलोमगा[redacted]त्यामासाश्रीइति॥ भृगुः सकारस्तेनसाइति॥ तपंचमः नकारः सघओकारस्तेननोइति अनंत आकारस्तयु
क्तोमरुद्यकारस्तेनयाइति॥ ज्ञस्वरूपंस्पश्चरूपं॥ तेनज्ञेइति इमान्विलोमगान्ज्ञेयोनोसाइति॥ मास्वरूपं मरुद्यकारः दीर्घआकार
स्तेनराइति धरालकारः॥ वामनेत्रमीकारस्तेनलीइति॥ वसुंधरालकार अनंत आकारस्तेनलाइति इमान्विलोमगान्लालीयामा
इति॥ यास्वरूपंज्ञस्वरूपंतेनज्ञेइति॥ लास्वरूपंलीस्वरूपं वैपरीत्यगान्लीलाज्ञयाइति॥ अथैतद्यंत्ररचनाप्रकारः॥ तत्रप्राक्प्रत्यग
यतान्नवरेखादक्षिणोत्तरायतान्नवरेखाश्चकृत्वाचतुःषष्टिकोष्ठयुतंचतुरस्रंपरिकल्प्य तत्रसर्वोपरिगतपंक्तेः प्रथमकोष्ठमारभ्यस्व
वामादिदक्षिणांतक्रमेणपंक्तिचतुष्टयगतेषुद्वात्रिंशत्कोष्ठेषुप्रोक्तसर्वतोभद्राख्यलक्ष्मीमंत्रस्यद्वात्रिंशदक्षराणिविलिख्यतद्बहिः प्राग
दिषुवतमः चतुर्दिक्षुईशानांतंवज्राकृतितद्बाह्येरेखास्पृष्टासृष्टांतरितानिविद्यामंगगनवर्षट्कारामालिख्यतद्बहिर्वभिन्नमृत्नवीजेनवेष्टये

297

राम
२९७

शोषतः ॥ सर्षपाज्यैर्हुनेन्मृत्युकाष्टाग्नौ वैरिमृत्यवे ॥ तदक्तवेरियोन्युत्थमांसैरपि च तत्कृते ॥ यक्षैधनाग्रौ योन्युत्थ्यक्षतजो न्यादि तं वरं ॥ आतङ्क
रघृतोपेतं फणिशीर्षभुवाहुनेत ॥ कृष्णांभुकशिरोवेष्टः खड्गपाणिश्चरोषवान् ॥ निशामध्ये हुनेत्तद्योनिहंतु वैरिणां हठात् ॥ मृत्युकालान
लेतस्य फलैः पञ्चैश्च होमतः ॥ सप्तरात्राद्दरातेस्तु गजाश्वारोगमाप्नुयुः ॥ चेत्तुरंगलजैर्होमात्तु रंगबलेनये ॥ सप्ताहाद्रोगदुःखान्निर्भवेत्त्वेव
न संशयः ॥ मंत्रदत्तोदकैः सेकात्स्वेडशांतिर्भविष्यति ॥ तज्ज्ञप्रयच्छियानाद्य तज्ज्ञप्रजुलुकोदकात् ॥ होमसंख्यायावती स्याज्जपसंख्या चतता
वती ॥ मृत्युकाष्टः कारस्करः ॥ तत्करारिंभ्रजापाद्य सयोनस्युर्विषग्रहाः ॥ तद्यंत्रस्थापने चैव विषभूतानि नाशनं ॥ एवमस्यास्तु विद्याया
वैभवं कोऽत्र वर्णयेत् ॥ तथाप्यनुग्रहात्तस्याः किंचिदुक्तं मयाखिदं ॥ वैरियोन्युत्थमांसैः वैरिजन्मनक्षत्रयोनिमांसैरित्यर्थः ॥ नक्षत्रयोनय
स्तु ॥ तोनलामते ॥ अश्वहस्त्यजसर्पाश्च सर्वश्वाखविडालकाः ॥ मेषो विडालकश्चाखुमूर्खको गोवृषस्तथा ॥ महिषी व्याघ्रमहिषो व्याघ्र
गो हरिणाः शुभाः ॥ वानरो नकुलश्चैव नकुलो वानरस्तथा ॥ सिंहा हयस्तथा सिंहः छागो हस्ती यथाक्रमं ॥ भानां तु योजयो देवि कथितास्तव
सुव्रते ॥ अभ्रिद्वितीयनकुलशब्दोभिजिदभिप्रायेणोक्तः ॥ अतएवाष्टाविंशतिरिति ॥ सारसंग्रहे ॥ अथातुग्रहयंत्राणि वक्ष्यं नेत्रसमास
सतः ॥ कोष्ठस्त्वत्र षष्ठिश्चलिखित्वा तेषु वसर्वोषधंकुशपादि ॥ श्रीमत्रमालिखच्छिखाषं मूलमन्त्रवाप्रेमृतबीजं ॥ कांचनपट्टे छेवसनेवा
संलिखितं वस्थापितमेतत् ॥ सस्यम्बुदापित्यः समये सुमत्रवृष्ट्यायाः मूलदाश्च ॥ यंत्रमिदं त्वानुग्रहसंज्ञयत्ननिखातममंगलवार्तात

शि॰ब
२९८

तथासमालिख्यप्रोक्तक्रमेणामनीषितेभिर्विनियोगाश्चोक्तफलानिभवंति॥ तथा॥ कुंकुमैर्लेखयावापिलिखितंस्वर्णपट्टके॥ धवलेव
सनेवापिलेखन्यास्वर्णजातया॥ संपूज्यजपसन्निद्धंस्थापयेद्यत्रतत्रवै॥ भवेल्लक्ष्मीर्वतिस्फीतानीरोगाश्चप्रजास्तथा॥ गजाश्वप
शवस्त्वन्येप्राणिनसुखिनोभृशं॥ भूतप्रेतपिशाचादिग्रहजातभुविभूयादिदं॥ अलक्ष्मीशांतयेवश्यसिद्धयेसर्वसंपदे॥ कृत्वामृत्युग्रहस्थे
उपरितेभ्योविमुक्तये॥ पुत्रपौत्रैश्वर्यदीर्घायुष्यसंसिद्धयेपिवा॥ तथा॥ पद्मेदलषट्केमायात्वाकृषसंहितांच॥ नाराद्यर्णाह्निरवदशपत्रेवह्ने
गास्थंक्षितिपुरसंस्थं॥ कृत्वाडोहग्रहशमनंतच्चोरव्यालादिकभयहारि॥ जप्तंदोषाविधूतमशेषंराज्ञांयुद्धेविजयदमुक्तं॥ ॥ अथैतद्यंत्ररचना
प्रकार॥ तत्रदशदलपद्मंकृत्वातत्कर्णिकायांमायाबीजस्योदरेसाध्यनामालिख्यतद्दलेषुमूलविद्यायाःप्रणवादिदशवर्णान्मायाबीजसहि
तान्विलिख्यतद्बहिःषट्कोणंकृत्वातद्बहिश्चतुरस्रंकुर्यात्॥ एतदुक्तफलदंभवति॥ ॥ तथा॥ विद्याद्यवर्णजठरेसाध्यमालिख्यतद्बहिः
अष्टच्छदेषुफट्दीर्घमालिखेदष्टवर्णकं॥ कर्णिकास्थंततोब्रह्ममाययावेष्टितंततः॥ बहिःकुंभंविदध्याच्चप्रोक्तलक्षणसंयुतं॥ एवम
न्यैश्चनवभिर्विद्यावर्णैर्यथाक्रमं॥ विदध्यान्नवयंत्राणिदशानांचफलंत्विदं॥ सर्वरक्षाजयंवश्यंक्ष्वेदहृद्रुहनाशनं॥ संभलक्ष्मीयशो
धान्यवासांसिवसमाप्नुयात्॥ ॥ एतद्रचनाप्रकारः॥ तत्राष्टदलंपद्मंविधायतत्कर्णिकामध्येविद्याप्रथमंहृल्लेखांतदुदरेविद्याद्य
भूतंप्रणवंतन्मध्येसाध्यनामवालिख्यशेषाणिपंचमंत्राक्षराणिहृल्लेखाद्वयफट्कारविधुराणिक्रमेणाग्न्यादिप्रादक्षिण्येनाष्टदलेषुसमा

298

राम
२९८

त्‌॥ एतद्यंत्रमुक्तफलदं भवति॥ तथा॥ इतः परं प्रवक्ष्यंते मनोज्ञयंत्रमुत्तमम्‌॥ प्राक्प्रत्यगायतैः सूत्रैस्तथा दक्षोत्तरायतैः॥ दशभिर्द
शभिः कुर्यादेकाशीतिपदानि वै॥ समांतरालकान्यत्र मध्यकोष्ठे समालिखेत्‌॥ समाध्याराटपरं मं श्रीविंदुयुक्तं च तद्बहिः॥ चतसृष्व
पि वीथीषु चतुःकोष्ठात्मिकासु च॥ दिगातासु क्रमाद्वर्णान्व समारान्समालिखेत्‌॥ उक्तवर्णविहीनेषु कोष्ठेषु मंत्रवित्तमः॥ ततस्त
र्णामृतार्णौ वेष्टयेद्बहिरुक्तवत्‌॥ मूलविद्याक्षराण्येव वषड्युक्तानि मंत्रिभिः॥ फट्काररहितानीह तानि प्रोक्तानि चागमे॥ वहिः कुं
भं विदध्याच्च तदधरोत्तरं॥ ॥ अथैतद्यंत्रलेखनाप्रकारः॥ तत्र प्राक्प्रत्यग्दक्षिणोदग्दश समांतरालानि दश सूत्राणि पात्यैकाशीतिप
दानि विधाय तत्र मध्यकोष्ठे सविंदुकठकारोदरे साध्यनामालिख्य तत्कोष्ठपार्श्वस्थपूर्वापरायतपंक्तिद्वये दक्षिणोत्तरायतपंक्तिद्वये
च संभूय चतसृषु पंक्तिषु चतुश्चतुःकोष्ठात्मिकासु स्वाग्रादिप्रादक्षिण्यक्रमेण जूं सः वषड् इति च कोष्ठप्रतिकोष्ठमेकैकमभ्यंतरा
निर्गमगत्या विलिख्य ततः ईशादिकं निर्ऋत्यादिकं च प्रागुक्तश्रीविद्याद्युक्तकुंभं मध्यवीथीवज्रद्वयवर्जमालिख्य सर्वबाह्यअभितः ई
शादीशांतं त्तृर्णामृताक्षराणि चतुरावृत्त्या प्राग्वत्समालिख्य सर्वमध्यकोष्ठमध्यममवष्टभ्य चतुःकोणस्पत्तृर्णामृताक्षरमानेन भ्रमेणा
वृत्तं निष्पादयन् द्वारचतुरंगलं कुंभत्रयाकारं यथा भवति तथा सप्तलूतमध्ये तत्कुंभत्ररेखानिर्यद्रेखाद्वयं प्रसार्य तत्कुंभवीथीमध्यम
मोत्पन्नस्पष्टवकारमालया शृंखलारूपयां तत्परिधियां समाकृष्य सर्वद्योपरि विंदुं समालिख्य कुंभावलाम्बमं कर्णिकास्थकुंभं यथा भवति

रः वह्निस्थं रेफोपरिस्थितं वामकर्णाद्युकारः इंदुरनुस्वारएतैः भूंसर्वतः क्षकारः ॥ अभ्यासनः रेफस्थः इंदुयुगनुस्वारयुक्तः सवामकर्णाद्यु
कारयुक्तः ॥ एतैः श्रूं ॥ कूर्मातः छकारः ॥ अवीद्युकारः इंदुरनुस्वारः ॥ वह्निरेफः एतैः छूंइति ॥ व्योमहकारः वह्नीरेफः ॥ अवीद्युकारः विंदुरनु
स्वारः एतैः ह्रूंइति ॥ तथा ॥ क्रोधीशः कांतिमनुशक्रोवामनेत्रसमन्वितः ॥ कालोनेत्रयुतोवह्निर्विपरीतान्विमान्वदेत् ॥ लोलाक्षीसहि
तः शक्रोमेषोभांतश्चसद्ययुक् ॥ सर्वतः पुनरेवैतान्विपरीतांस्तुउद्धरेत् ॥ कालोनेत्रयुतः सोथसद्ययुक्तस्तृतीयकः ॥ सिंटीयुतः
पूतनावसजलस्थावदेदिमान् ॥ विपरीतानियेप्रोक्ताकालीविद्यारिघातिनी ॥ क्रोधीशः ककारः कांतिराकारस्तेनका ः शक्रः ल
कारः वामनेत्रश्रीकारस्तेनलीकालोमकारः ॥ अनंतआकारस्तेनमा वह्निरेफोविपरीतगात्रमालीकाइति ॥ शक्रः लकारः सः लोलाक्ष्या
ईकारेणायुक्तस्तेनली ॥ मेषोनकारः ॥ भांतोमकारः सद्यउकारस्तेनमोसर्वतः क्षकारः ॥ विपरीतात्क्षमोनलीइति ॥ कामोमकारः ॥ अनंत
आकारस्तेनमा ॥ सः मकारः सद्ययुक्तः ॐयुक्तस्तेनमो ॥ ततृतीयोदकारः सिंटीएकारः ॥ तेनदे पूतनातकारोविपरीतांतदेमोमाइति ॥
वह्निः रेफः अंत्यक्षकारः पूतनातकारः ॥ जलेस्थितोवकारोपरिस्थितः तेनत्वविपरीतानृत्वतक्षरइति ॥ तथा ॥ वायुः कालोनेत्रयुक्तोज
लंकांतिसमन्वितं ॥ सोमश्चखेचरीतोयंकांतियुक्कालमानदे ॥ वायुः कालः कांतियुक्तः खेचरीसद्ययुग्विषंसोमेशः खेचरीविषं ॥ कांति
मज्जलकांतीचकालसद्ययुतः पुनः ॥ पतुरीयोवामकर्णयुतोग्निनेत्रवायुनः ॥ सएवतादृशोभूपः पतुरीयश्चपूर्ववत् ॥ कालः सद्ययुत

299

लिखेत्तत्पत्रं द्वितीयया हृल्लेखयाउक्तक्रमेणावेष्टयेद्बहिः प्राग्वत्सविंदुकभूंखलितं वकाराक्षरमालोयेतं ॐ भं च कुर्यादेतत्प्रथमयंत्रं
एवमस्यैव यंत्रस्य कर्णिकामध्ये हृल्लेखोदरे विद्यायास्तृतीयाक्षरादीनि शेषाक्षराणि क्रमेणैकमेकं नामगर्भं विन्यस्य तदनंतरादितत्पू
र्वांते प्राग्वदेभिरक्षरैर्दलस्थैः पूर्वोक्तेनसार्द्धं नवयंत्राणि हृल्लेखामध्ये सनामकं फट्कारं समालिख्य प्राग्वद्विधुरैस्तृतीयादिभिः शेषाक्षप्रा
ग्वद्दलस्थैर्दशमवेतेवं दशयंत्राणि कुर्यात्॥ साध्ययुतं तारकमिह मध्ये कोष्ठशते विंशतिसहिते तत्र॥ द्वादशधा मूलमिह शिवायंसंलिख्य
युगवसुशूलं॥ मूलजप्रयंत्रवर्यसंपातास्यभसंयुतं॥ क्ष्वेडग्रहार्तिहरति जयलक्ष्मीयशःप्रदं॥ ॥अस्यार्थः॥ प्राक्प्रत्यगायता दक्षिणो
त्तरायताश्च द्वादश द्वादश रेखा विलिख्यैकविंशत्युत्तरशतकोष्ठानि कृत्वा रेखाग्रेषु सर्वेषु त्रिशूलानि विरच्य तन्मध्यकोष्ठे ससाध्यं प्रणवं
विलिख्येशानकोष्ठमारभ्य प्रादक्षिण्येन प्रवेशगत्या त्वरिताविद्यां प्रणवद्वितीयहृल्लेखाविधुरां द्वादशावृत्तिं लेखेत्॥ एतद्यंत्रं शुभफ
लदं भवति॥ ॥ तथा॥ एकादशीतिपदं चक्रं तन्मध्यकोष्ठके॥ रेफोदरे समालिख्य साध्यनाम यथाविधि॥ लिखेद्बीजचतुष्कं तद्वीथीषु
च तथापरां॥ वक्ष्यमाणां ततः प्राग्वत्कालीविद्यां समालिखेत्॥ चतुःषष्टिपदे षष्ठीशादिषु वज्रायादिषु॥ यमंत्रावृतं वप्रे वह्निवायुस
मावृतं॥ निग्रहाख्यमिदं यंत्रं सर्वशत्रुनिवर्हणं॥ वह्निस्थं यत्तुरीयस्या वामकर्णानुभूषितं॥ प्रथमं बीजमुदितं संवर्ताख्यासनेनयुक्॥ स
वामकर्णाग्रपर्यंकं मांतो बिंदुवह्नियुक्॥ तृतीयं व्योमवत्स्फूर्जद्बिंदुभिपरिमीरितं। एतद्बीजचतुष्कं तु शत्रुसंहारकारकं॥ यत्तुरीयं भक्ता

ज्यात् ॥ एतन्निक्षेपे चाभिचार्यः पुरुषश्चेत्कालाद्दिशाक्रेरापतनेस्त्रीचक्राकारायतनएव वामाग्रभागेधस्तान्निखनेत् ॥ इति संप्रदायः तथा
सीसकृते नवपद्देशावपटेकर्पटयटेवा ॥ प्रस्तरकेवाविषमप्यासंलिख्यकाकमुपत्रैश्च ॥ चत्वरकेवाकलिहृत्संस्थापितमेतदरारांहि
मृत्युकरंव्याधिकरंस्यात्सुत्रस्त्रीविद्युतत्वकरंच ॥ तथा ॥ प्राक्प्रत्यग्दक्षिणशोदक्क्रमवसूत्राणिपातयेत् ॥ जायतेचचतुःषष्टिकोष्ठानिपु
समानिव ॥ मेघीनेषीशानेऽन्यदिगाद्यंकालिकामतं ॥ विलिख्ययममंत्रेणप्रोक्तवीजद्वयेनच ॥ वेष्टयित्वावहिश्चक्रंविषेरोचवले
पयेत् ॥ व्रलदेध्याचमर्कधालिप्तेजप्रमधोत्तरवं ॥ क्षिप्रदेशादिकेपत्रेतत्वाललक्ष्मीगर्दैःसमं ॥ मारीतुतुस्थिरासाध्याभवेद्देवासुरैरपि
यंत्रविरखनाक्रमोयथा ॥ तत्रप्राग्वत्तवभिर्नवभिःसूत्रैश्चतुःषष्टिकोष्ठानिकृत्वानेषीदिकंनिर्ऋत्यादिकंचाभिचार्यःपुरुषश्चेदतःका
लीविद्यांवहिर्यममंत्रंवस्त्रीवेदंतर्यममंत्रंवहिःकालीविद्यांचप्राग्वत्तमालिख्यप्राग्वन्तसविंदुयकाररेफाभ्यांसंवेष्ट्यप्रोक्तक्रमेणाप्रोक्ते
भस्थानेभस्थापनात्प्रोक्तफलसिद्धिर्भवति ॥ तथा ॥ अत्रकेष्वपिनामाभियोजयेत्कोष्ठमध्यतः ॥ लवणोघरामेषांउष्टहधूमाग्निसंयुतं
श्मशानांगारनिंवोत्थंनिर्यासोविषमीरितं ॥ डुम्बरांडुम्बरश्चैभिर्मनोरमाकारैर्व्याख्यानं ॥ मेहांउप्रस्त्रवः अग्निश्चित्रकमितिच ॥ ॥ सारसं
ग्रहे ॥ खोरवेत्यांत्यकलायुक्तंत्रिवर्णायंत्रिकंटकी ॥ खेहकारः उंस्वरूपंतेनऊँइति ॥ स्वेस्वरूपंअंतः अकारः अंत्यकलाविसर्गस्तेनअः इति
तथा ॥ ऋष्यादिकंपुराप्रोक्तंत्रिरुक्तारौः षडंगकं ॥ नाभेनीलनिभामधोरुरागरुविकंगास्तितामानतोजुंदलिंविभिरानतैर्युगमितैर्गराणांक

300

स्तोयंकांतिमन्तेखचरीद्वय पृथग्वह्निर्वामनेत्रयुतस्तोयाढ्य पूतना तथाविपायुनः सेववह्निर्वामाक्षिसंयुत॥ सोमेशः खेचरीचेतियममंत्रउदाहृ
तः॥ सर्वशत्रुक्षयकरो मंत्रविन्यासतः सदा॥ वायुः यकारः कालमकारः॥ अनंतआकारस्तनमाइति॥ जलंधकारः कांतिराकारस्तेनधा॥ सोमः खे
चरीटतोयव॥ कांतिआतेनवा॥ कालःसमानदाआतेनमाइति वायुः पकारः मकांतिः आतेनमाखेचरीटसयुॐतेनदोविषंमसोमेशः टखेच
रीटकालः मसयुॐतेनमोखेचरीटविषमकांति आतेनमाजलेवकांतिआतेनवा॥ कालः मसयुःॐतेनमोपतुरीयः भवामकर्णाडुनेनभूअ
ग्निः रनेत्रइतेनरिसअग्निः तादृशः नेत्रयुतः इकारयुक्तइत्यर्थस्तेनरियतुरीयः भपूर्ववन्उकारयुक्तस्तेनभूकालः मसयुः॥ ॐतेनमोतोयं
वकांतिआतेनवा· खेचरीद्वयंपृथक ठठइति॥ वह्निः रवामनेत्रंईतेनदी॥ तोयंवपूतनानतेनत्वसेवपूतनातथाविधातकारएवव
कारयुतइत्यर्थः तेनत्वइतिवह्नीरवामाक्षिईतेनरी॥ सोमेशटखेचरीटइति॥ अथैतंन्निग्रहयंत्ररचनाप्रकारः॥ तत्रप्राग्वदेकाशीतिपदेपे
तेचक्रंविरच्यतन्मध्यकोष्ठेसविंदुकरेफोदरेसाध्यनामालिख्यप्राग्वत्पार्श्वयंक्षिप्रचतस्रुचतुःकोष्ठेषुप्राक्क्रमेण॥ भूंक्षूंह्रूंक्रूंइत्यक्ष
रचतुष्टयंअभ्यंतराग्निगमगत्याभितः समालिख्यअभिवार्यःप्रत्यर्थेदंतः काल्पउष· मंवहिर्यममंत्रवहिः कालीविद्यांचसमालिखेत्त
लेखनेतुईशानादिकंनिर्ऋत्यादिकंचकालीविद्यांत्र्यगादातथायममंत्रंविलिख्यअभ्यंतरंवहिरीशादिनिर्ऋत्यं। तंनिर्ऋत्यादीशांतंचनिरं
तरंद्विरालिख्यतद्बहिस्तद्बहिर्निरंतरंविंदुयुक्तंयकारंरेफंचईशादीशांतंयथाक्रमंमंतर्वहिर्विभागेनसमालिख्यप्रयोजनेषुविनियु

शि॰च
३०१

प्रतीकाशांशुकस्रक्मूर्द्धजलंबिनी ॥ चलत्कांचनसंभूतकुण्डलोज्वलशालिनी ॥ वंधूकदंतवसनांशिरीषप्रभनाशिकां । कंबुग्रीवांविशाला
शींसूर्यकोटीसमप्रभां ॥ चतुर्भुजांविवसनांपीनोन्नतपयोधरां ॥ दक्षिणार्द्धेननिस्त्रिंशखड्गपरेणासिद्धस्रुवं ॥ जपमालांविभ्रतींवामह
स्ताभ्यामभीतिवरदायिनीं ॥ पंचाननंपुरःसंस्थंनिरीक्षंतीस्ववाहनं ॥ ईदृशीमम्बिकांध्यात्वाॐनमःफडितिनमस्तके ॥ स्वकीयस्वम
नोदप्यात्स्वाहमेवविचिंत्यच ॥ पंचाननंमण्डलस्थंमध्यवश्यंप्रपूजयेत् ॥ आवाहनंनतकुर्यात्कायव्याशिरसरस ॥ महामायायैविद्म
हेचण्डिकायैधीमहि ॥ एवमुक्त्वाततःपश्चात्तन्नादेविप्रचोदयात् ॥ ततस्तुमूलमंत्रेणगंधपुष्पंसधूपकं ॥ दीपादिकंचदद्यात्तुमो
दकेपायसंतथा ॥ पुष्पांजलित्रयंदद्यान्मूलमंत्रेणशोभनं ॥ एवंसंपूज्यमध्येतुमंत्रेणांगानिपूजयेत् ॥ शैलपुत्रींचघण्टांस्कंद
मातरमेवच ॥ कालरात्रिंचदिक्पत्रेषुवर्यच्चंदनादिभि ॥ चण्डिकामथकूष्माण्डींतथाकात्यायनींशुभां ॥ महागौरींचाग्निकोणानैऋत्यादि
षुपूजयेत् ॥ ततःसंपूज्यलोकेशांस्तदस्त्राणिचमंत्रवित् ॥ माहामायांनमामीतिमूलमंत्रेणचाष्टधा ॥ पूजयेत्पममध्येतुमनोज
लिभिस्तथा ॥ सर्वमंगलमांगल्येशिवेसर्वार्थसाधके ॥ शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते ॥ सप्तधावर्त्तनंकृत्वास्तुतिमेतांतुसा
धकः ॥ पंचप्रणामान्कुर्वीतऐंह्रींश्रींमितिमंत्रकैः ॥ योनिमुद्रांततःपश्चाद्दर्शयित्वाविसर्जयेत् ॥ ॥ अथप्रयोगः ॥ तत्रप्रातःकृत्यादि
योगपीठन्यासांतेमूलेनप्राणायामंचयंकृत्वाशिरसिनारदायऋषयेनमः ॥ मुखेअनुष्टुप्छंदसेनमः ॥ हृदयश्रीवैष्णव्यैमहामायैदेवता

राम
३०१

302

दैभीवराणं ॥ दीपद्वंद्वदरारिहस्तकमलांचंद्रोल्लसच्छेखराउद्यज्ज्वालविलोचनांभयहरांदेवींसदाभावयेत् ॥ उगनितै चतुर्भिः दरः शंखः ॥ अरिश्चक्रंवामापूर्वयोः शंखचक्रे अन्ययोरन्यत् इत्यायुधध्यानं ॥ ततः पूर्वोदितेनाथवर्त्मनातंभजेत्सुधीः ॥ वर्णलक्षंजपेदंते दशांशेन घृतं ऊनेन् ॥ आत्मानंदेवतारूपंध्यात्वाकृत्वाकरद्वये ॥ मूलमुंडाग्रहग्रस्तस्पृष्ट्वे नंप्रजपेन्मतं ॥ आज्यग्रहान्मनुर्च्चंते नरोमंत्रप्रभावतः ॥ तथा ॥ ईशाद्यकूर्वमंत्रान्तोमध्येयोषिद्भवेदियं ॥ वश्यत्रिकंटकी ॥ विद्याच्चर्णामंत्रिभिरीरिता ॥ पूर्वमंत्रान्त्योरवेक्षः इतिवर्णौ ईशाद्यकोणकारस्तु क्रोमस्तयोर्मध्ययोषिन्ह्रीं इत्यक्षरं यदि भवेदित्यर्थः ॥ पूर्वोक्तवर्णमंत्रस्य कुर्यान्मंत्री यथाविधि ॥ पूर्ववत्स्वरितावदेतन्मंत्रद्वययस्यापि ज्ञेयं ॥ ॥ उत्तरतंत्रे ॥ हांतांतपूर्वोमांतस्थनांतोणांतस्तथैव च ॥ केकादशआदिषष्ठः स्वांतोविंदुपरः स्वरः ॥ एभिरष्टाक्षरैर्मंत्रः शोणापद्मसमप्रभ ॥ ॐकारं पूर्वतः कृत्वा जप्यः सर्वैस्तु साधकैः ॥ हांतांतपूर्वः शकारः ॥ मांतः पकारः ॥ नांतः धकारः णांतः तकारः केकादशः टकारः ॥ आदिषष्ठः ॥ वकारः स्वांतः ककारः विंदुः अकारः विंदुपरस्स्वर इत्यनेनाकादिशकारांतो मंत्रउक्तः ॥ तथा ॥ नारदोस्यऋषिः प्रोक्तश्छंदस्तुष्टुप्प्रवैस्मवी ॥ देवतामुनिभिः प्रोक्ता सर्वसिद्धिप्रदा तथा ॥ मूलमंत्राक्षरैः कुर्यात्त्रिभिस्त्रिभिरनुक्रमात् ॥ एकैकंवर्जयन् पश्चादंगानि षडनुक्रमात् ॥ अवकेल्न् कवटशिरः ॥ इत्यादिप्रणावपूर्वंकुर्यात् ॥ अकवैनेसप्रणावाइति हयशीर्षवचनात् ॥ ततस्तु मूलमंत्रस्य वक्रपृष्ठे नथादरे ॥ वाहौ गुह्ये पादयोश्च जंघयोर्जघने क्रमात् ॥ विन्यसेदक्षराण्यष्टौ ॐकारं च तथा स्मरेत् ॥ शोणापद्म

शि॰चं
३०२

ने॥ धूमोद्गारे तथा चान्ते नित्यकर्माणि संत्यजेत्॥ उच्छुक्ते त्वजीर्णे च नैव शुक्ता वकिंचन॥ कर्म कुर्यान्नरो नित्यं सूतके मृतके तथा॥ जलस्यापि
नरश्रेष्ठ भोषजङ्घजाहृते॥ नित्यक्रियानिवर्त्तेत सह नैमित्तिकैः सदा॥ जलौकां गूढपादांच कृमिगंडुपदादिकं॥ कामादृष्टेन संस्पृश्य नि
जकर्माणि संत्यजेत्॥ विशेषतः शिवापूजां प्रमीतिपितृको नरः॥ यावद्वत्सरपर्यंतं मनसापि न वाचरेत्॥ महागुरुनिपाते च काम्यं किं
चिन्न वाचरेत्॥ आर्त्विज्यं ब्रह्मयज्ञं च श्राद्धं देवक्रियां तथा॥ गुरुमाक्षिप्य विप्रं वा प्रहृत्यैव च पाणिना॥ न कुर्यान्नित्यकर्माणि रेतःपाते
च भैरवः॥ स्मरेद्ध्यायेत् मनसा जपेदित्यर्थः॥ क्वचिदिति वर्त्तमानमविवक्षितं॥ नाभेरूर्द्ध्वमधो वापि यस्य क्षरति शोणितं॥ अशुधिस्त
दहः कर्म कुर्वन्नरकमाप्नुयात्॥ इति भविष्यपुराणवचनात्॥ नकधः जत्रुजः नित्यं कुर्याद्विदेत्यर्थः॥ लोतंके अश्रुजले लोतमश्रुणि
चारितेति विश्वप्रकाशकोशात्॥ इच्छ्रे अन्नादौ गूढपादः सर्पः गराद्रूपदः किंचिलिकः॥ आर्त्विज्यं ऋत्विक्कं आक्षिप्य तिरस्कृत्य पाणिने
त्युपलक्षणं॥ ॥ योगार्णवे॥ वांतोद्गारे च स्नातजलोतके च समुद्भवे॥ गूढपादस्पर्शने च उपस्थस्पर्शने तथा॥ रेतःपाते तथा क्षौरे प्रमीत
पितृके तथा॥ नित्यं नैमित्तिकं काम्यं मनसापि न वाचरेत्॥ उद्गारे धूमोद्गारे लोतके क्रंदनादेव क्रंदनादश्रुपाते नित्यनैमित्तिकं त्यजेत्
तदेव हर्षात्ते जातं कर्म कुर्वन्न हृष्यतीति मत्स्यपुराणवचनाच्च॥ उपस्थस्य स्पर्शे कामतः॥ शौचे गृहीतशिश्नश्चोन्यायेति तत्स्पर्शकेः
प्रभीतपितृकः इत्युपलक्षणं तेन मातर्यपि प्रमीतायां॥ प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्॥ नपिदैवं न चापैत्रं यावत्पूर्णो न वत्स

302

राम
३०२

यै नमइति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृतांजलिहृत्वा ॐ अक हृदयाय नमः ॥ ॐ कवट शिरसे· ॐ वटन शिखायै· ॐ न
पयक कवचा· ॐ नपय नेत्राय· ॐ पयश अस्त्राय फट् इति मंत्रैः करषडंगन्यासं कृत्वा ध्यानानंतरं ॐ नमः फडिति स्वशिरसि पुष्पं दत्वा मानस
पूजादि परतत्वपूजांते ॐ· पंचाननाय नमइति पीठमध्ये संपूज्य ॐ महामायायै विद्महे चण्डिकायै धीमहि तन्नो देवि प्रचोदयात्· स्वाहा
इत्यंते श्री वैष्णवि इहागच्छागच्छेत्यावाह्य मूलेन स्थापनादि परमीकरणानंतरं कृत्वा प्राणस्थापनादि पुष्पोपचारांते मूलमंत्रेण पुष्पांजलि
त्रयं दत्वा प्राग्वदंगानि संपूज्य ॐ सिद्धसूत्राय नमः क्रांक्रींमुखवक्त्राय नमइति देव्या दक्षिणाधः करोर्द्ध्ववामकरयोः संपूज्याष्टदलेषु देव्य
ग्रादि चतुर्दलेषु ॐ शैलपुत्र्यै नमः ॥ ॐ चंद्रघण्टायै· ॐ स्कंदमात्रे· ॐ कालरात्र्यै· आग्नेयादिदलेषु· ॐ चण्डिकायै· ॐ कूष्माण्ड्यै· ॐ
कात्यायन्यै· ॐ महागौर्यै नमः ॥ इति प्रादक्षिण्येन संपूज्येन्द्रादि पूजानंतरं मूलांते महामायां नमामीति पुष्पांजल्यष्टकं देव्यै समर्प्य धू
पादि सर्वं प्राग्वत्समापयेदिति ॥ तथा ॥ लक्षद्वयं भवेदस्य पुरश्चरणकर्म वै ॥ दशांशहोमथाज्येन कर्तव्यस्तर्पणादिकं ॥ ॐ नमोते महामा
यायै मनुर्वसुवर्णकः ॥ ॐ नमोतेववैष्णव्यै मंत्रः प्रोक्तः षडक्षरः ॥ एतन्मंत्रद्वयस्यापि सर्वौ पूर्वोक्तमाचरेत् ॥ ॥ कालिकापुराणे ॥ अशुचि
र्न महामायां पूजयेत्तु कदाचन ॥ अवश्यं तु स्मरेन्मंत्रं याति भक्तियुतो नरः ॥ दंतरत्ले समुत्पन्ने स्मरणं नच विद्यते ॥ सर्वेषामेव मंत्राणां स्मर
णान्नरकं व्रजेत् ॥ जातके मृतके जाते नित्यकर्माणि संत्यजेत् ॥ नैमित्तिकं तु न दधः स्वयङ्को न चाचरेत् ॥ लोतके तु समुत्पन्ने शुद्धकर्माणि मेषु

शि.च
३०२

गजानांचरथानांचदुर्जनानांनृणांप्रकारिता ।। स्तंभयेच्चमहावायुंबृहस्पतिमुखोद्धतां ।। महापर्वतवृक्षाणांसरितांसागरस्यजां ।। चतुष्पदांपक्षिणांच
सर्पाग्निवायुविद्युतां ।। स्तंभयेत्सर्वदिव्यानिमानुषेषुचकाकथा ।। त्रैलोक्यस्तंभनीविद्यादेविश्रीवगलामुखी ।। तारंप्रणवः स्थिरमायाह्लींइतिवी
जं ।। संबोधनपदंवगलामुखिइति ।। सर्वदुष्टानांस्वरूपंवाचस्वरूपंमुखस्वरूपं·पदस्वरूपं·स्तंभयस्वरूपंजिह्वाकीलयस्वरूपं ।। बुद्धिंविना
शयस्वरूपंस्थिरमायांप्राग्वबीजं ।। ॐकारस्वरूपंस्वाहास्वरूपं ।। तथा ।। नारायणाऋषिस्त्रिष्टुप्छंदश्चवगलामुखी ।। देवतागदितादेवित्रैलो
क्यस्तंभकारिणी ।। स्थिरमायाभवेद्बीजंशक्तिःस्वाहासमीरिता ।। विनियोगस्तुविख्यातः पुरुषार्थचतुष्टये ।। स्थिरमायांचहृदयेशिरश्च
वगलामुखी ।। सर्वदुष्टशिखान्यस्यकवचंस्तंभयांतिकं ।। जिह्वांकीलयनेत्रंचबुद्धिंविनाशयास्त्रकं ।। सर्वदुष्टइतिसर्वस्यपदस्यग्रह
णांतेनसर्वदुष्टानांशिखायैइति ।। स्तंभयतिकमित्यनेनवाचंमुखपदंस्तंभइतिपदचतुष्टयंप्रोक्तंतुगममन्यत ।। मूर्ध्निभालेभ्रुवोर्म
ध्येनेत्रयोःश्रोत्रयोर्नसोः ।। गंडयोरोष्ठयोर्वक्त्रेचिबुकेवगलेप्रिये ।। दोःपत्संधिषुसाग्रेषुमंत्रवर्णान्न्यसेत्क्रमात् ।। एवंन्यासविधिंप्रो
च्यसत्तोध्यानंशृणुप्रिये ।। यस्याःस्मरणमात्रेणत्रैलोक्यंस्तंभयेत्क्षणात् ।। गंभीरांचमदोन्मत्तांतप्तकांचनसंनिभां ।। चतुर्भुजांत्रिनय
नांकमलासनसंस्थितां ।। मुद्गरंदक्षिणेपाशंवामेजिह्वांचवज्रकं ।। पीतांबरधरांसांद्रदृढपीनपयोधरां ।। हेमकुंडलभूषांचपीतचंद्रार्द्ध
शेखरां ।। पीतभूषणभूषांचस्वर्णसिंहासनस्थितां ।। एवंध्यात्वावदेद्देविशत्रुस्तंभनकारिणी ।। महाविद्यांमहामायांसाधकस्यफलप्रदा द

303

राम
३०३

रः ॥ इति देवीपुराणवचनात् ॥ एतत्सर्वं महामायोपासकं यंत्रं प्रकरणादिति ॥ अथवा सकाममपरं ॥ अथ मूतकीनः पूजां वदाम्यागमबोधितामित्यादि ॥ प्राक्पूजाप्रकरणोक्तं तत्वसारसंहितावचनादिति ॥ अन्यथा पुरश्चरणप्रकरणोलिखितवचनानां वैयर्थ्यापत्तेः ॥ सुंदराचार्यशिष्येण श्रीनिवासेन धीमता चंडीकायां प्रणीतायांमूनत्रिंशः प्रकाशकः ॥ ॥ इति श्रीसुंदराचार्यचरणारविंदद्वंद्वांतेवासिना श्री श्रीनिवासभट्टेन विरचितायां श्रीशिवार्चनचंडिकायांमेकोनत्रिंशः प्रकाशः ॥ ॥ श्रीगुरुर्जयति ॥ अथ ब्रह्मास्त्रविद्या ॥ तत्र श्रीभैरवयामले ॥ ॥ श्रीदेव्युवाच ॥ प्रभो त्वं भैरवश्रेष्ठ सर्वतंत्रार्थजीवकः ॥ नानारहस्यसारं च त्वत्प्रसादाच्छ्रुणोम्यहं ॥ दिव्यं तंत्रं महातंत्रं पूर्वपश्चिमसंज्ञकं ॥ दक्षिणोत्तरपूर्वाद्यं बहुपायाः कथिताः प्रभो ॥ वश्याकर्षणादिव्यं च मारणोच्चाटनादिकं ॥ विद्वेषं मोहनं चान्यद्विविधं कामनादिकं ॥ विस्तारपूर्वकं कधितं ज्ञानं व्यासेन तन्मया ॥ इदानीं स्तंभनं देव कथयस्व प्रसादतः ॥ कथयस्व सुरश्रेष्ठ त्वमहं तव वल्लभा ॥ ॥ श्रीभैरव उवाच ॥ साधु साधु महाप्राज्ञे सर्वतंत्रार्थसाधिके ॥ न कस्यचिन्मया ख्यातं दृष्टो वापि न केनचित् ॥ गुह्याद्गुह्यतरं देवि त्वत्स्नेहात्प्रकटीकृतं ॥ अथातः संप्रवक्ष्यामि शृणुष्वैकाग्रमानसा ॥ विद्याया परमा गुप्ता महास्तंभनकारिणी ॥ तारं प्रथममुच्चार्य स्थिरमायामथोच्चरेत् ॥ सवंधेनपदं देवि वदेच्च वगलामुखि ॥ तदग्रे सर्वदुष्टानां ततो वाचं मुखपदं ॥ स्तंभयेति पदं जिह्वां कीलयेति ततः परं ॥ बुद्धिं विनाशयेत्पश्चात्स्थिरमायां पुनर्लिखेत् ॥ लिखेच्च पुनरोंकारं स्वाहेति परमेततः ॥ षट्त्रिंशदक्षरा विद्या महास्तंभनकारिणी

नुमानकाः॥लोकेशांश्चतदस्त्राणिपूजयेदाहृतःप्रिये॥योनिमध्येमूलदेवीत्रिरंजलिभिरर्चयेत्॥धूपदीपसुनेवद्यैगंधताम्बूलदीपकै
नीराज्यविधिवत्पश्चाज्जपसंख्यानिवेदयेत्॥पवित्रारोपणंदेविदमनेनचपूजयेत्॥वलित्रयंततोदद्यात्त्रिशितान्नेनसाधकैः॥वलित्र
यमित्युपलक्षणंवलिर्यंवकंदद्यादित्यर्थः॥अथप्रयोगः॥तत्रप्रातःकृत्यादियोगपीठन्यासांतेमूलमंत्रेणप्राणायामत्रयंकृत्वाशिरसि
नारायणायऋषयेनमःमुखेत्रिष्टुप्छंदसेनमःहृदयेश्रीवगलामुख्यैदेवतायैनमः॥गुह्येह्लींवीजायनमःपादयोःस्वाहाशक्तयेनमः
इतिविन्यस्यप्राग्वद्विनियोगमुक्त्वा॥ॐह्लींहृदयायनमः॥वगलामुखिशिरसेस्वाहा॥सर्वदुष्टानांशिखायैवषट्॥वाचंमुखंपदंस्तंभ
यकवचायहुं॥जिह्वांकीलयनेत्रायवौषट्॥वुद्धिविनाशयअस्त्रायफट्इतिकरषडंगन्यासंकृत्वाशिरसिॐनमःललाटेह्लींनमः
भ्रूमध्येवंदक्षनेत्रेगं·वामेलां·दक्षश्रोत्रेमुं·वामेखिं·दक्षनासिसं·वामेवं·दक्षगंडेदुं·वामेष्टां·ओष्ठेनां·अधरेवां·मुखेचं·चिवुकेमुं
गलेखं·दक्षवाहुमूलेपं·मध्येदं॥मणिवंधेस्तं·अंगुलिमूलेभं·अग्रेयं·वामदोर्मूलेजिं·मध्येह्वां·मणिवंधेकीं·अंगुलिमूलेलं॥अ
ग्रेयं·दक्षोरुमूलेवुं·जानुनिद्धिं·गुल्फेविं·अंगुलिमूलेनां·अग्रेशं·वामोरुमूलेयं·जानुनिह्लीं·गुल्फेॐ·अंगुलिमूलेस्वां·अग्रेहांनमः॥
इतिविन्यस्यध्यानाद्यात्मपूजांतेपूर्वोक्तभुवनेश्वरीपीठंसंपूज्यतत्रनवशक्तिपूजांतेह्लींसर्वशक्तिकमलासनायनमइतिसमस्तपी
ठंसंपूज्यावाहनादिषडंगपूजांतेदेव्यग्रद्वारमारभ्यप्रादक्षिण्येनचतुर्द्वारेषु॥गणेशायनमः॥वटुकायनमः॥योगिनिभ्योनमः॥क्षे

304

राम
३०४

दक्षिणोर्द्धेन्नरयोर्म्मुद्गरपाशौ वामाधरोन्नरयोर्जिह्वावज्रकौ ॥ जिह्वां साधकविपक्षजनस्येति ॥ धनञ्जयरवैरिजिह्वामिति वचनात् ॥ श्रीदेव्यु
वाच ॥ पूजनं शृणु देवेशि साधके सिद्धिदायकं ॥ नित्यं नैमित्तिकं काम्यं पूजनं त्रिविधं प्रिये ॥ भूप्रदेशे मनोरम्ये पुष्पामोदसुधूपिते ॥ गोमये
नाथ संलिप्ते पुष्पप्रकरशोभिते ॥ मण्डपे विधिवत्तत्र आसनं तु समर्चयेत् ॥ सौवर्णे वाथ रूप्ये वा पैत्तले वाथ भूर्जके ॥ कर्पूरागरुकस्तूरी
श्रीखण्डकुङ्कुमैरपि ॥ लिखेद्यन्त्रं प्रयत्नेन लेखन्या हेमतारया ॥ मध्ये योनिं समालिख्य तद्बाह्ये तु षडस्रकं ॥ तद्बाह्येष्टदलं पद्मं तद्बाह्ये षोडश
च्छदं ॥ चतुरस्रत्रयं बाह्ये चतुर्द्वारोपशोभितं ॥ अत्र तु यच्च नोक्तं महादेवीपीठं वा पीठशक्तयः ॥ तत्र मायोदितं पीठं ज्ञेयं तास्वेव शक्तयः ॥ त
न्त्रराजेन पीठं च यजेन्मायाराजनाथवत् ॥ श्रीशिवयामलवचनाद्भुवनेश्वरीपीठमभ्यर्च्य तत्र श्रीबगलाभैरवीमन्यां वा देवीमनुक्तपीठा
मायाराजनाभुवनेशीबीजेन पूजयेत् ॥ तथा ॥ तत्रावाह्य यजेद्देवीं सुपीतैरुपचारकैः ॥ अङ्गानि पूर्वमभ्यर्च्य यथास्थानं महेश्वरि ॥ पूर्वद्वारे
गणेशं च दक्षिणे वटुकं यजेत् ॥ पश्चिमे योगिनीसङ्घान्क्षेत्रपालं तथोत्तरे ॥ इशानादिर्निऋतं तं तु गुरुपंक्तिं समर्चयेत् ॥ बगलां पूर्वयन्त्रे तु स्तं
भिनीं च ततः परं ॥ जृम्भिणी मोहिनी वश्या अचला चबला तथा ॥ कुर्द्धा कल्मषा धीरा कल्पना कालकर्षिणी ॥ भ्रामिका मन्दगमना भोगाख्या
चैव योगदा ॥ एताः षोडश पत्रेषु गन्धपुष्पाक्षतैर्यजेत् ॥ षोडशस्वरसंयुक्ताः संप्रदायात्कुलागमे ॥ यजेच्च पत्रमध्ये तु कल्पिते चाष्टपत्र
के ॥ ब्रह्माण्याद्यष्टौ पूर्वादौ वाहनाद्यैर्वाहनाद्यैश्च संयुताः ॥ स्थिरमायाबीजपूर्वाः परिपूज्याः कुलागमे ॥ आदिहान्ताः षडस्रेषु पूज्याः बहु

श्रि·चं
३०५

रेत॥ मधुरत्रिभिराज्येनवश्यंलाभानिसाधयेत्॥ तथाकर्षणाकामरक्तलोणांत्रिमधुरान्वितं॥ निम्बपत्रंतैलयुक्तंविद्वेषणाकरंपरं॥ हरि
तालेहरिद्रांचलवणेनैवसंयुतं॥ स्तंभनेहोमयेद्देविप्रज्ञांचैवगतिमतिं॥ स्तंभयेदितिशेषः॥ राजिकाष्टस्यस्तरेणामाहिष्यरुधिरेणा
च॥ राजिकाष्टसारः आसुरीस्नेहः॥ रिपूणांमारणेदेविश्मशानाग्नौहुनेन्निशिं॥ गृध्राणामपिकाकानांगृहधूमयुतेनवै॥ पक्षेणाजुहुयाद्देवि
शत्रोरुच्चाटनामयै॥ दूर्वांकुरामृतावल्लीरषराङाश्चतुरंगुला॥ लाजांस्त्रिमधुयुक्तांश्चसर्वरोगोपशान्तये॥ लक्षमेकंजपेद्देविब्रह्मचारीदृढ
व्रतः॥ पर्वताग्रेमहारण्येशिवशैवालयेगृहे॥ संगमेवमहानद्योर्निशायामपिसाधयेत्॥ श्वेतब्रह्मतरोर्मूलपादुकांचैवकारयेत्॥ अल
क्तेनतुरागेणारंजितांवहरिद्रया॥ षड्विंशदक्षराविद्यायालक्षैकेनमंत्रिता॥ शतयोजनमात्रेतुमनश्चिंतितमात्रतः॥ गच्छेदितिशेष
रसेमनः शिलातारंमाक्षिकेनसमन्वितं॥ पिष्ट्वाभिमंत्र्यलक्षैकंसर्वांगेलेपनंकृतं॥ अदृश्यकारकंदेविलोकेवमहदद्भुतं॥ एकवर्णा
याश्चरंभेर्धारोष्णंक्षीरमाहरेत्॥ शर्करामधुरसंयुक्तंत्रिशतेर्मंत्रितंप्रिये॥ पापयित्वातुहरतेविषंस्थावरजंगमं॥ दारिद्र्यमोचनंदेविल
क्षमेकंजपेन्नरः॥ दशांशेनकृतोहोमस्त्रिभिर्द्रव्यैःपृथकपृथक्॥ लक्ष्मीयुक्तोभवेद्देविदारिद्र्यंनाशयेद्ध्रुवं॥ त्रिभिर्धारोष्णक्षीरशर्करामधुभि
र्मिलितैः॥ ॥ अथन्यासंप्रवक्ष्यामिकामनायंत्रततःपरं॥ पट्टेवाप्यथपाषाणेसाध्यसंज्ञांतुकारयेत्॥ आद्यंतेश्चिरमायांवहरिद्राताल
केर्लिखेत्॥ उन्मत्तरससंयुक्तैर्गाढंत्रिवलयंलिखेत्॥ गर्भस्तंभंगतिस्तंभंचमत्कारकरीपरा॥ करोतीतिशेषः॥ भूर्जपत्रेसमालिख्यतारो

305

राम
३०५

त्रपालाय नम इति संपूज्य स्ववामभागे ईशानादि नैर्ऋत्यंतं गुरुभ्यो नमः परमेष्ठिगुरुभ्यो· परापरगुरुभ्यो· अस्मद्गुरुभ्यो नमः इति गुरुपंक्तिं स
मभ्यर्च्य षोडशदलेषु देव्यग्रादि प्रादक्षिण्येन ॥ अं वगलायै नमः ॥ आं स्तंभिन्यै· इं जंभिन्यै· ईं मोहिन्यै· उं वश्यायै· ऊं अचलायै· ऋं चलायै· ॠं
दुर्धरायै· ऌं कल्मषायै· ॡं वीरायै· एं कल्पनायै· ऐं कालकर्षिण्यै· ओं भ्रामिकायै· औं मदगमनायै· अं भोगायै· अः योगायै ॥ अष्टदलेषु ॥ क्रीं
व्रह्माण्यै· ह्रीं माहेश्वर्यै· इत्यादि स्थिरमायावीजाद्याः पूर्वोक्ता अष्टमातृः संपूज्य ततः षट्कोणेषु देव्यग्रादि प्रादक्षिण्येन ॥ डं डाकिन्यै· रां राकिन्यै
लां लाकिन्यै· कां काकिन्यै· सां साकिन्यै· हां हाकिन्यै· इति संपूज्य मध्ये देवीं गुनाम्नि मूलविद्यया संपूज्य लोकेशादि सर्वं नित्यहोमांतं कृत्वा
वालाप्रकरणोक्तवलिपंचकं दत्वा शेषं प्राग्वत् समापयेदिति ॥ तथा ॥ साधनं संप्रवक्ष्यामि साधकानां हिताय वै ॥ सर्वपीतोपचारेणापी
तपुष्पार्चनं नित्यमयुतं जपमाचरेत् ॥ दशांशेन कृतो होमः पीतद्रव्यैः शुभानने ॥ तर्पणादि ततः कुर्यान्मंत्रः सिध्यति मे प्रिया ॥ साध्यसंज्ञां
समुच्चार्य स्तंभयेन्नित ततः परं ॥ गतिस्तंभकरी विद्या अरिस्तंभनकारिणी ॥ मेधां प्रज्ञां च शस्त्रादीन् देवमानवपन्नगान् ॥ स्तंभयेच्च महावि
द्यां सत्यं सत्यं वरानने ॥ ॥ श्रीदेव्युवाच ॥ अधुना साधनं देव शीघ्रप्रत्ययकारकं ॥ यंत्रमंत्रौषधं जापं कृताद्यैः कथयस्व मे ॥ साधनं कामि
तार्थस्य मंत्रं साधनस्य प्रागेवोक्तवान् ॥ ॥ श्रीभैरव उवाच ॥ शृणु प्राज्ञे महागुप्तं प्रकटीक्रियतेधुना ॥ एकांते निर्जने रम्ये शुचौ देशे थ
वा गृहे ॥ अंडस्य लक्षणां कृत्वा मेखलात्रयशोभितं ॥ योनिर्वितस्तिमात्रा तु षट्कर्माणि प्रसाधयेत् ॥ नानाविधा सर्वे देवि कर्मादिष्टं समाच

ततंतुभिः॥ शय्यायास्तुनसमस्थंचखनेनखातप्रयत्नतः॥ वामहस्तेन्यसेघत्रंपीतपुष्पैस्तुपूजयेत्॥ हृदाश्चर्यदंभद्रेरेतस्तंभनमुत्तमं॥ श्म
शानखर्परंग्राह्यंश्मशानांगारमालिखेत्॥ मध्यबीजंत्रिधालिख्यसाध्यसंज्ञांचमध्यतः॥ असव्येनवलनारेष्टृत्रिवलयानयावामहस्तेन(
निखनेत्खर्परंतदधोमुखं॥ छादयेद्वामपादेनमलोत्सर्गततोपरि॥ स्तंभनंचैवदेवेशिरिपूणांमुखबंधनं॥ ताटंकपत्रमादायलि
खित्वाध्यंतुनामतः॥ आद्यंतेविलिखेद्बीजंत्रिविधोत्तरकंलिखेत्॥ वामहस्तपुटंकृत्वाकरपिष्टीयकंटकान्॥ सप्तसंख्यकंटकानिभित्वा
चैवपुटीकृतं॥ पृथग्विद्यावबोच्चार्यनामसाध्यकसाधकः॥ नाराचमध्येक्षिपेत्तत्रैःसौवीरेणाचपूरयेत्॥ स्वगृहेवाद्यदेशेतुवायव्ये(
चैवकोणकेवामहस्तेखनेनखातंवामपादेनपूरयेत्॥ गतिमतिस्तंभकरःप्रयोगःप्रत्ययावहः॥ दिव्यस्तंभकरंदेविनान्यग्रंथे
प्रधीरितं॥ त्वत्प्रीत्याकथयाम्यद्यमृगाक्षित्वंप्रियमुत्तमं॥ यत्रस्थानेभवेद्दिव्यंदेशेवाथगृहेपिवा॥ तत्रस्थानेलिखेद्विद्यासाध
कःसाध्यनामतः॥ आठरूपंस्वयंत्राणिपरिमुज्यततोपरि॥ स्तंभयेत्तत्प्रदिव्यानिकृतदोषोविनश्यति॥ उत्तरावारुणीमूलंसप्त
विद्याभिमंत्रितं॥ जलमध्येतुनिक्षिप्तातेनैवस्नानमाचरेत्॥ महाकृतस्यदोषस्यकृतदिव्योविनश्यति॥ अथदीपमार्गेणारात्रौकृत्वा
तुमंडलं॥ भूर्जेयंत्रेसमालिख्यपूर्वोक्तद्रव्यकेनवा॥ दीपंप्रज्वालयेद्यत्नात्कापिलाज्येनपूरितं॥ तावत्तुदीपयेद्दीपंप्रशाम्यति॥ सकां
तेकथितंभद्रेकामनाप्रत्ययावहं॥ इयंतुपरमाविद्याकिमन्यत्परिपृच्छसि॥ श्रीजयद्रथयामलेपीतांबरधरोभूत्वापूर्वाशाभिमु

306

न्मन्त्रशिखारसैः ॥ षट्कोणं तस्य मध्ये तु विधां वलयनो लिखेत् ॥ साध्यसंज्ञां ततो देवि पीतसूत्रेण वेष्टयेत् ॥ चक्रं भ्राम्य कुलालस्य विपरीतं तु म
न्त्रिकां ॥ वृषभं कारयेत्तस्याः विलिप्तं तालकेन च ॥ तन्मध्ये विक्षिपेद्यन्त्रमारुह्य वृषभोपरि ॥ नासायां निक्षिपेद्रज्जुं पीतवस्त्रेण वेष्टयेत् ॥
वाह्योपवारस्पृज्जास्त्रीकाले स्वगृहे र्वंयत् ॥ जपविधानवेलायां तां रज्जुं भ्रामयेत्ततः ॥ उष्ट्राणां स्तंभयेच्चक्रं साक्षाद्धावस्य नेरपि ॥ अधोमुख
श्मशानस्थं दृढं खर्परमानयेत् ॥ गृहीत्वा वामहस्तेन श्मशानाङ्गारकेलिखेत् ॥ दक्षहस्तेन देवेशि लिखेन्नाम प्रयत्नतः ॥ सप्तधा तु छ
कारेणाङ्कुशेनाभिमंत्रयेत् ॥ तन्मध्ये च लिखेद्वीजं त्रिवलीकारतः प्रिये ॥ षट्स्वंतसाध्यनामानं मुखं स्तंभय वा लिखेत् ॥ वाह्ये व्यस्तं मही
वीजं वसुःसंख्यसमालिखेत् ॥ साध्यनामाक्षरं देवि चाभिमंत्र्य स्वविधया ॥ षष्ठं तं साधकं चोक्त्वा साध्यं संवोधनं वदेत् ॥ मांसं क्ष्वेति य
देयश्चाहदेदाश्रेङ्गितान्वितं ॥ पीतोपचारैः संपूज्य मुखस्तंभनमुत्तमं ॥ एतद्यन्त्रं वरारोहे श्मशानवमने लिखेत् ॥ भेकस्य वदने क्षिप्त्वा (
पीतसूत्रेणाविष्टयेत् ॥ भूमिष्ठं मण्डलं कृत्वा पीतपुष्पैः समर्चयेत् ॥ उच्चारीन्त्सर्गमंत्रस्य पदमुच्चारयेत्स्फुटं ॥ वामपादेन संस्पृश्य कुला
लोद्भवमृत्तिकां ॥ पूरकस्य प्रयोगेण प्रयोगः प्रत्ययावहः ॥ आलिख्य पुरयादानृभयन्त्वान्कुञ्जतागतान् ॥ अन्योन्यमिलितत्वेन कृत्वा सर्वा
धः समंततः ॥ वामदक्षिणासंवंधावौ दोःपादौ प्रकल्पयेत् ॥ नामसाध्यस्य षष्ठ्यन्तं गतिं स्तंभयेति च ॥ पूर्ववन्मध्यमालिख्य भूवीजं तस्य
चालिखेत् ॥ पादशाखासु दक्षेषु तन्मध्ये वीजमालिखेत् ॥ पूर्वोक्तैर्वस्तुभिर्लेख्यं पाषाणो वाथ पट्टके ॥ पूर्वोक्तैः संपुटीकृत्य वेष्टयेत्पी

वस्पतेरपि ॥ अथैतद्यंत्ररचनाप्रकारः ॥ ॥ तत्रऊर्ध्वाधोमस्तकं ॐकारमालिख्य तत्पार्श्वगतमन्योन्यसंमुखमोकारचतुष्टयं विलिख्य त
न्मध्ये साध्यनामालिख्योंकारयोन्यसंमुखयोः पार्श्वद्वये ग्लौ इति धराबीजं विलिख्य तद्बहिरष्टकारां कृत्वा तत्राग्नेयादिविदिक्स्थकोणच
तुष्टयगतरेखाष्टके प्रतिरेखामेकमेकं वज्रमिति वज्राष्टकं विधाय दिग्गतकोणचतुष्टयस्थरेखाष्टके त्रिशूलाष्टकं कृत्वा त्रिकोणोदरे
षु त्रिशूलमध्यरेखासु ॥ त्रिशूलपार्श्वेषु च प्रागुक्तं धराबीजं विलिख्य वज्रयुक्तचतुरस्रकोणपार्श्वेषु तदेव बीजं विलिख्याष्टकोणाद्बहिर्वृ
त्तचतुष्टयं कृत्वा तदंतरालवी ॥ थीत्रये सर्वाभ्यंतरवीथ्यां मातृकया संवेष्ट्य तद्बाह्यवीथ्यां स्थिरमायाबीजेन ह्रींकारात्मकेन तद्बाह्यवीथ्यां को
मिथं ऊशाबीजेन वसंवेष्टयेदिति प्रोक्तविधिना प्रोक्तद्रव्यैर्विलिख्य विनियोगतः प्रोक्तमूलसिद्धिर्भवति ॥ तथा ॥ दृढं खर्परमादाय
श्मशानस्थमधोमुखं ॥ वामहस्तं समावेश्य तदंगारं तु दक्षिणो ॥ अंगारं कोइला न चाग्निः ॥ अभिमंत्र्य ठकारेण सप्रधाकृतपूरकः ॥ तस्यो
दरगतं बीजं बलमाकारमालिखेत् ॥ साध्यमाध्येयषष्ठं तत्तन्मुखे स्तंभयेति च ॥ पृथ्वीजानी चत्वारि व्यस्तशीर्षाणि संलिखेत् ॥ ततः प
रं प्रकुर्वीत यंत्रं देवेशि पूर्ववत् ॥ साध्यसंबोधनं कृत्वा बध्यंतं साधकं लिखेत् ॥ माभुंक्ष्वेति पदं पश्चात्तद्दाग्रेउतान्वितं ॥ पूजयेत्पीत
पुष्पाद्यैर्मुखस्तंभोयमुत्तमः ॥ पूर्वद्रव्यैः श्मशानोत्थवसने वाक्तमालिखेत् ॥ भेकस्य वदने क्षिप्त्वा कीलयेत्पीततंतुभिः ॥ क्षिप्त्वा शोणापायजे
त्पद्यैः पीतवर्णाभमंडले ॥ पूर्वोक्तपूजामंडले ॥ भ्रष्टचारोत्थमंत्रस्य स्फुटमुच्चारमाचरेत् ॥ पूरकस्य प्रयोगेण प्रयोगः प्रत्ययावहः ॥ चत्वारि

रवस्थितः॥ लक्षमेकं जपेन्मंत्रं हरिद्राग्रंथिमालया॥ ब्रह्मचर्यरतो नित्यं जपतो ध्यानतत्परः॥ प्रियंगुपायसैर्वापि पीतपुष्पैश्च होमयेत्
कृते होमे दशांशेन सिध्यते वगलामुखी॥ कृते वागातिस्तंभउष्टानां छिनाशनं॥ जपहोमप्रयोगेषु मंत्रं चाप्युक्तं जपेत्॥ हरिद्राहरि
तालाभ्यां जुकुयाद्वरवर्णां निशि॥ स्तंभयेत्त्वं वदिव्यानि नात्र कार्याविचारणा॥ स्तंभनेषु च सर्वेषु प्रयोगः प्रत्यया वहः॥ अथवा पीतपुष्पै
र्वाथि मध्वक्तैश्च होमयेत्॥ ॐकारयोः संपुटयोः रूर्ध्वाधःशिरसोर्लिखेत्॥ मध्यगं नाम साध्यस्य तद्वाह्ये चाक्षरद्वयं॥ वीजं द्वितीयं वर्ग
स्य तृतीयं विदुभूषितं॥ चतुर्दशस्वरोपेतं संलिखेन्मध्यवीगतं॥ ॐकारेणामनावेष्ट्य चतुःकोणोपुटं वहिः॥ तत्कोणारे रवसंस्क्रभूल
वज्रास्त्रकं लिखेत्॥ त्रिशूलमध्यरेखासु पृथ्वीजानि पार्श्वयो॥ अष्टस्वपि च कोणेषु नदैकैकसमालिखेत्॥ पृथिव्यानरपार्श्वे च मातृकापरि
मण्डलं॥ आवेष्ट्य च ततः पश्चात्तद्वाह्ये स्थिरमायया॥ तिसेधांकुशवीजेनाहसंसिलितांघ्रियां॥ लिखेत्पूर्वोक्तउकारं वगलामुखीं॥ वगलामुखीं
तद्विद्यां॥ पाषाणपट्टे वाथ पटे हरिद्रोन्मत्तनारके॥ गर्भस्तंगतिस्तंभं लिखित्वा गाढमाक्रमात्॥ विवादव्यतिरिक्तेषु स्तंभनकृत्येषु प्रोक्तं यं
त्रं पटे वा पाषाणे वा विलिख्य अधउर्ध्वपाखाणो नविस्तृस्थापयित्वा तत्र देवीं पूजयेत्॥ विवादन्तु वक्ष्यमाणविधिं कुर्यात्॥ विवादे यंत्र
मालिख्य भूर्जे तैरेव वक्तभिः॥ कुंभकारस्य चक्रस्थाप्रमंतीविपरीतगां॥ मृत्तिकां समुपादाय यंत्रं वृषभं कारयेत्ततः॥ यंत्रं तदुदरे न्यस्य लो
लकेन विलिख्य च॥ तस्मात्तायां विनिक्षिप्य पीतरज्जुना निजे गृहे॥ अर्चयित्वा चतुष्कालं नित्यं पीतोपचारकैः॥ उष्टस्य स्तंभयत्येव मुखं वा

चिन् गुरुभक्तायदातव्यंवंचकाराद्वेषितायच॥ दृढमित्यादिरुक्तमइत्यतेः पंचभिश्लोकैर्व्यक्तै॥ तरमाह॥ तत्रश्मशानस्थमधोमुखंखर्प
रमादायतद्वामहस्तेनिधायदक्षिणाहस्तेतश्मशानांगारंगृहीत्वातद्वयकारेणासप्तधाभिमंत्र्यतस्मिनवर्परतेनांगारेणाष्टपत्रंकृत्वातन्मध्ये
स्थिरमायाबीजंविलिख्यतन्मध्येअमुकस्यमुखस्तंभयेतिविलिख्यबीजंपरितःपूर्वोक्तभूबीजंचतुर्दिक्षुमध्यबीजसंलग्नशिरस्कंविलिख्य
तद्बहिरष्टकोणादिसर्वंपूर्वोक्तंयंत्रंकृत्वा छ्रवित्तःसस्थाप्यमूलविद्यायांसर्वदुष्टपदस्थानेअमुकअमुकस्यमभूंस्येतिपदंदत्वापंचोप
चारैस्तस्मिन्यंत्रंदेवीमावाह्यपूजयेत्॥ मुखस्तंभोभवतिइदमेतिपंचपूर्वोक्तहरिद्रादिद्रव्यैः श्मशानवस्त्रेविलिख्यगुलिंकीकृत्यमंडूक
स्यसजीवस्यमुखेविन्यस्यपीतसूत्रेणातन्मुखंदृढंबद्धांतमण्डुकंभूमौखनित्वातदुपरिपीतवर्णापूजामण्डलंकृत्वातत्रदेवींपीतपुष्पा
दिभिः॥ पूजयेदुक्तफलसिद्धिर्भवतिचत्वारित्यादिप्रभावतइत्यतेयंत्रांतरमाह॥ तत्रवराणीतिद्व्यन्त्वाशत॥ ॥अथयंत्ररचनाप्रकारः॥
तत्रचतुर्द्वारयुक्तचतुरस्रंकृत्वातन्मध्येअमुकस्यगतिंमतिंमुखंस्तंभयस्तंभयेतिविलिख्यमूलविद्याचतुर्द्धाविभज्यप्रथमपादंमूर्द्ध
गत्वापूर्वद्वारांतंद्वितीयपादमधोगत्वापश्चिमद्वारांतंतृतीयपादंतिर्यग्गाम्योत्तरद्वारांतंचतुर्थंतृतीयगत्वादक्षिणद्वारांतमितिमध्य
लिखित्वाक्षरसमुदायस्यचतुर्दिक्षुविलिख्यपादाग्रेषुचतुरस्रस्यचतुष्कोणेषुचपूर्वोक्तभूबीजंविलिख्यचतुःपादाग्रेलिखेदितिपूर्वो
क्तद्रव्यंतत्रविलिख्यपीतरज्जुभिर्वेष्टयित्वोपर्यधः॥ पाषाणेननिरुध्यस्थापनात्पूजनात्पूर्वोक्तफलसिद्धिर्भवति· शिलेत्यादि· श्लोका(

पादनालिखभमत्वाङ्कुश्नं नो गतान् । त्रुटितत्वात्त्रुटितत्वाच्चतुर्विधा विभक्तत्वादित्यर्थः ॥ अन्योन्यमिलितत्वे नखत्वेर्ध्रौधसमं ततः ॥ वाम
दक्षिणांसं वद्धो द्वौ यादै तस्य कल्पयेत् ॥ आलिखेन्नाम षष्ठ्यन्तं गर्भे च तत्त्वभयेति च ॥ मध्ये लिखित्वा संलिख्य पृथ्वीबीजानि चाष्टसु ॥ अगतः पा
दशाखां ते परं मध्ये तु संलिखेत् ॥ अग्रतः पादयोरित्यर्थः ॥ अष्टसु शाखास्विति च पादाभ्यां चतुरस्रं प्राप्यते इति सांप्रदायिका ॥ पटे पाषाणे या
पदे वा प्रोक्तैर्वै वर्णैस्त्रिभिस्त्रिभिः ॥ प्राग्वत्तत्कण्टयोगेन वक्ष्यापीनतरोन्नरैः ॥ गतिस्तंभो भवत्येवं यंत्रस्यास्य प्रभावतः ॥ शिलातालहरिद्राभिर्भे
षसत्वसमन्विते ॥ मोकिलाख्यलेखिन्यां निजरक्तपटे लिखेत् ॥ साध्यस्य नाम षष्ठ्यन्तं कुंभकेन च वाग्भुना ॥ स्तंभनं नात्र संदेहं सत्यं हाम्नाय
तेऽध्रुवं ॥ शिलातालहरिद्राभिः करयंत्र त्रुगेलिखेत् ॥ कोकिलस्य च लेखिन्या स्तंभने रिपूनां भवति ॥ ठकारैश्च समावेष्ट्य तद्बाह्ये पार्थिवं
पुरे ॥ वज्राष्टकैः समायेतेरेकषोडशसंयुतं ॥ मायाबीजेन संवेष्ट्य त्रिधाकुंह्निरोधितं ॥ तद्योगं योजयित्वा तु कंटकैः वलयेन्न ते ॥ क्षिप्त्वा
वल्मीकमध्ये तु पाषाणैस्तत्र पूजयेत् ॥ पश्चात्समारभेद्युद्धं विवादं वाप्यकारयेत् ॥ गतिस्तंभो मनस्तंभो वाचास्तंभस्तथैव च ॥ जिह्वास्तंभो
विवादे च स्वच्छेन तन्मध्ये नाम विद्याविदर्भितं ॥ तद्बाह्ये वापि बीजेन भावशत्रोपि यो नरः ॥ विषरक्तेन संलिख्य कर्पटं तु श्मशानके ॥ विद
र्भितं यस्य नाम तु नाखिलं गृहीत्वा वाकृतिं कृत्वा यत्रं तद्धृदि संक्षिपेत् ॥ कंटकैर्वेधयेत्साज्ञः स्मरन्विद्यां च नःपुनः ॥ वेदितेपु भवत्यस्य दुः
खं स्यादतिवेदनां ॥ सर्वांगैर्म्रियते विद्धः शूले श्वेव ग्रुदाहृगाः ॥ ब्रह्मास्त्रं त्रिषु लोकेषु दुर्लभं त्रिदशैरपि ॥ गोपनीयं प्रयत्नेन न देयं यस्य कस्य

शि·व
३०८

स्पश्रीः सर्वतोमुखी ॥ लज्जावीजेन चाद्येन वश्यतां यान्ति मानवाः ॥ मायावीजेन चाद्येन महापातकनाशनं ॥ मात्राद्वादशिकावीजमाद्यस्यान्भु
क्तिदायकं ॥ अनादिवीजमाद्यन्तु कीर्तयेन्मनुरुत्तमः ॥ वज्रवैरोचनीये च मायायुग्ममतः परं ॥ फ्स्वाह्यासमायुक्तं मंत्रमाहुरनुत्तमं भु
क्तिमुक्तिप्रदं प्राणां सर्वसिद्धिफलप्रदं ॥ लक्ष्मीवीजश्री लज्जाभुवनेशीवीजं माया ह्रूं माया लज्जा च हूंकारो ह्रींकारश्चैवेति करांकिराणां तंत्रवच
नात् ॥ मात्राद्वादशिका ऐं माये हूं वीजद्वयं ॥ अनादिवीजं प्रणवः षोडशाक्षरमेकोविशिष्टो मंत्रसारादिस्कत्रयोदशाक्षरमेव ॥ श्रीदेव्युवाच
मंत्रवर्णाश्च ये देवाः छंदांसि ऋषयश्च ये ॥ तान्सर्वान्श्रोतुमिच्छामि कथयस्व प्रसादतः ॥ ॥ श्रीभैरव उवाच ॥ प्रणवे तु त्रयो देवा ब्रह्मविष्णु
महेश्वराः ॥ वकारे वरुणः साक्षाज्जंकारे च सुधाधिपः ॥ रेफे हुताशनो देवो वकारे वसुधाधिपः ॥ ऐकारे त्रिपुरादेवी रेफे त्रिपुरभैर
वी ॥ त्रैलोक्यवीजया देवी सदेवोकारसंस्थिता ॥ चकारे चंद्रमा देवो नकारे गिरिनायका ईकारे कमला साक्षाद्येकारे च सरस्वती ॥ माया
युग्मे सदा देवी प्रकृत्या सह संगता ॥ प्रकृतिश्चैव फट्कारे स्वाकारे कुसुमायुधः ॥ हाकारे च रतिस्तिष्ठेदेवं समुच्चयः छंदः सम्राडिति प्रो
क्तं मंत्रे त्रैलोक्यसुंदरि ॥ ब्रह्मा मुनिः समुद्दिष्टो महेश्वरि महामनोः ॥ चतुर्णामयवीजानां शृणु देवी वदाम्यहं ॥ लक्ष्मीप्रथमवीजं स्याल्ल
ज्जावीजे मनोभवः ॥ तृतीयेस्मिन्महादेवी महापातकनाशिनी ॥ स्थूलदेवीत्यर्थः ॥ चतुर्थे सरस्वती इति ॥ चतुर्थे तु गुणातीता भुक्तिवि
द्याप्रदायिका ॥ मंत्रोद्धार इति प्रोक्तो ध्यानं च कथयाम्यहं ॥ षडंगमत्रात्मप्रागेव नित्य इजाप्रमाणानि निरुपणो करन्यासप्रसंगेन प्रमाणा

309

राम
३०८

भ्यांपूर्वोक्तस्यैवयंत्रस्यलेखनद्रव्यविशेषणंविषमसमाशेषमाह॥अयमर्थः॥तच्चपूर्वोक्तैरेवद्रव्यैःपूर्वोक्तमेवयन्त्रंकरपत्रद
येविलिख्यमध्येस्वमनीषितं·साध्यनामविलिख्यतत्पत्रंहृन्मन्त्रयेणावेष्ट्यतद्बहिश्चतुरस्ररेखाचतुष्कोणाग्रष्टकंकृत्वाप्रतिवज्रपा
र्श्वयोरेफद्वयामितिसंभूयरेफषोडशकंसंविडुविलिख्यतद्बहिर्हृन्त्रपत्रकंकृत्वातदंतरालंचतुरस्रचतुष्टयाभ्यंतरास्थिरमायावी
जेनसर्वंवेष्ट्यबहिरंतरालत्रयकृत्स्नेत्यादिश्लोकाभ्यासेनउक्तंभवति॥व्यंकुशजीवैस्तन्मध्येमूलविद्ययाविदर्भितः॥साध्यनामलिख्यवे
ष्टयित्वावल्मीकमध्येनिक्षिप्यपाषाणैःपूरयित्वाप्रत्यहंपूजांकारन्नाजास्वकटकैः॥शत्रुशैन्यंसंवेष्ट्यस्तंभमारभेत्॥विवादकर्त्तावविवा
दंकुर्यात्॥एतद्यंत्रमुक्तफलदंभवति॥तत्रस्यतदेवयंत्रंकृत्स्नवस्त्रेविषरक्तमिलितैःपूर्वोक्तद्रव्यैर्विलिख्यमन्मध्येमूलविद्ययाविद
र्भितःसाध्यनामविलिख्यमधूच्छिष्टेनदृढंसंवेष्ट्यजलमध्येनिक्षिप्यतत्रादिव्यंकारयेत्॥कृतदोषोपिविशुद्धोभवति॥विषरक्तेने(
त्यादिभिःश्लोकैःपूर्वोक्तस्यैवयंत्रस्यप्रयोगविशेषमाह॥तत्रश्मशानवस्त्रेपूर्वोक्तंयंत्रंमूलविद्याविदर्भितसाध्यनामगर्भितंविष
युक्तरक्तेनविलिख्यश्मशानभस्ममृज्जांपुत्तलींनिर्मायतस्याहृदिनिक्षिप्यविद्यांस्मरन्कंठकैस्तांसर्वांगवेधयेदुक्तफलसिद्धिर्भवति
योगिनीतंत्रे॥अथातःसंप्रवक्ष्यामिदेव्याःसंक्षेपतोविधिं॥येनविज्ञानमात्रेणसर्वसिद्धिर्भवेद्ध्रुवं॥मंत्रोद्धारंप्रवक्ष्यामियथाध्या
नमतन्त्रमं॥लक्ष्मीलज्जातथामायामात्राद्वादशिकात्वथ॥वज्रवैरोचनीयेचमायेचमायेकस्वाहयाउते॥लक्ष्मीबीजंयदाद्यस्यात्तस्य

श्री·चं
३१०

ध्यानं॥ अपरं च प्रवक्ष्यामि शृणु देवि यथाक्रमं॥ स्वनाभौ नीरजं शुद्धं भानुमण्डलमण्डितं॥ योनिचक्रसमायुक्तं गुणत्रितयसंयुतं॥ तत्र
मध्ये महादेवीं चिन्तयेत् सूक्ष्मरूपिणीं॥ प्रदीपकलिकाकारामद्वितीयां व्यवस्थिता॥ करकच्छपिकायुक्तां बद्धपद्मासनस्थितां॥ योनिमुद्रां
समायुक्तां हृदयस्थितलोचनां॥ पीनवक्षोजयुगलां ध्यानं चातिकलस्मृतं॥ ध्येयमेतद्धि हृत्स्थानां यतीनां तु निशामय॥ अन्तरे स्वशरीरस्य
नाभिनीरजसंगतां॥ निर्लेपां निर्गुणां सौम्यां बालचन्द्रप्रभामिव॥ समाधित्रयगम्यां च गुणत्रितयवेष्टितां॥ कलातीतां गुणातीतां मुक्ति
मार्गप्रदायिनीं॥ अथास्या मण्डलं वक्ष्ये यथावदनुपूर्वशः॥ पद्ममष्टदलं कुर्यात्कर्णिकाकेशरोज्वला॥ तस्य मध्ये प्रकुर्वीत मंडलं च
गुणरोचिषः मण्डलवर्त्तुलरज॥ सत्वतमोरेखात्रयं योनिं तु मध्यतः॥ मायायुग्मं तथा तस्य फडु भरसमन्वितं॥ योनिस्वामिमुखाग्रत्रि
कोणां तस्य त्रिकोणमध्ये विलिख्य सितं कुर्याद्दलं रक्तमाग्नेयं रक्तवर्णकं॥ याम्यकृष्णमत॥ पीतं शुक्लं रक्तमतः क्रमात्॥ कृष्णपीत
प्रकुर्वीत कर्णिकां चैव मध्यमां॥ चकारात्पीतामेव कर्णिकां कुर्यादित्यर्थः रजः सत्वतमोरेखा रक्तशुक्लासिताः क्रमात्॥ चतुर्द्वारसमा
युक्तं क्षेत्रपालैरधिष्ठितं॥ पूर्वद्वारे कलालं च विकरालं च दक्षिणे॥ पश्चिमे चातिकालं च महाकालं तथोत्तरे॥ प्रणवादिनमोन्तेन पू
जामेषां समाचरेत्॥ प्रकाशनाभिधां देवी योगिनीडाकिनी तथा॥ भैरवी च महापूर्वा भैरवी तदनन्तरं॥ इन्द्राणी च शताक्षी च ततः सं
हारिणी क्रमात्॥ पूर्वादिके दले शक्तीः पूजयेत्क्रमयोगतः॥ प्रणवादिनमोन्तेन शक्तिपूजां समाचरेत्॥ ततो देव्यासनमध्ये देवीमूर्त्तिम

310

राम
३१०

न्वेनोद्धृता ।। न्यासप्रयोगेलिख्यन्तेच ।। ध्यानमस्याद्विधाप्रोक्तंसकलंनिष्कलंतथा ।। कलाभीतमितिप्राज्ञेकथयामियथातथं ।। स्वनाभौनीरजंध्यायेत्कुन्द्रविकस्मितंस्मितं ।। रजसत्वतमोरेखायोनिमुण्डलमुज्वलं ।। तस्यमध्येतुतांदेवींसूर्यकोटिसमप्रभां ।। खड्गछिन्नंकरेवामेधारयन्तीस्वमस्तकप्रसारितमुखीभीमांलेलिहानोग्रजिह्विकां ।। पिवंतीरोधरीधारांनिजघण्ठसमुद्भवां ।। विकीर्णकेशपाशांचनानापुष्पसमन्वितां ।। दक्षिणोवरेवज्रामुण्डमालाविभूषितां ।। दिगंवरांमहारूपांप्रत्यालीढपदस्थितां ।। अस्थिमालाधरादेवींनागयज्ञोपवीतिनी ।। षोडशवर्षदेशीयांपीनोत्तुंगकुचद्वयां ।। इतिकामोपरिस्थितांकेचिद्ध्यायन्तिमन्त्रिणः ।। विपरीतरतस्थोतुध्यायेदितिमनोभवो ।। वर्णिनीडाकिन्युक्तावामदक्षिणपार्श्वयो ।। दक्षिणेवर्णिनींध्यायेद्वामपार्श्वेचडाकिनी ।। वर्णिनीलोहितांसौम्यांमुक्तकेशींदिगंवरां ।। कपालकर्तृकाहस्तावामदक्षिणयोगतः ।। दवीकण्ठोछलद्रक्तधारापानंप्रकुर्वती ।। अस्थिमालाधरांदेवींनागयज्ञोपवितिनी ।। डाकिनींवामपार्श्वेचकल्पान्तजलदोपमां ।। विद्युच्छटाभनयनांदंतपंक्तिवलाकिनी ।। दंष्ट्राकरालवदनांपीनोत्तुंगकुचद्वयां ।। महादेवीमुक्तकेशींमहाघोरांदिगंवरां ।। लेलिहानमहाजिह्वामुण्डमालाविभूषितां ।। कपालकर्तृकाहस्तावामदक्षिणयोगतः ।। देवीगलोछलद्रक्तधारापानंप्रकुर्वती ।। करस्थनृकपालेनभीषणेनातिभीषणा ।। आभ्यांनिषेव्यमाणांतांध्यायेद्देवींविचक्षणः ।। प्रत्यालीढपदस्थितांरतिकामयोनिर्भरयंत्रणाभिप्रायणासंकुचितवरणाभ्यांस्थितामित्यर्थः ।। इतिसकल

वैरोचनीये एह्येहि इह तिष्ठ २ क्रूं क्रूं फट् स्वाहेति मंत्रेणावाह्य संस्थाप्य श्री बीजेन पुष्पांजलित्रयं दत्वा मूलेनार्घादिपुष्पोपचारां नेगानि पू
जयित्वा पूर्वादिचतुर्द्दलेषु ॐ करालाय नमः ॐ विकलाय नमः ॐ महाकरालाय॰ ॐ अतिकरालाय॰ तदंतरष्टदलेषु ॐ प्रकाशना
यै ॥ ॐ योगिन्यै॰ ॐ डाकिन्यै॰ ॐ भैरव्यै॰ ॐ इन्द्राण्यै॰ ॐ शानाक्ष्यै॰ ॐ महारिण्यै॰ इति देव्याग्रादिप्रादक्षिण्येन संपूज्य त्रिकोणमध्ये देव्या द
क्षिणे ॐ वर्णिन्यै नमः ॥ वामे ॐ डाकिन्यै नमः देव्या दक्षिणहस्ते ॐ कर्त्र्यै नमः ॥ इति संपूज्य लोकपालार्चादि सर्वं प्राग्वत् कुर्यादिति ॥ त
था ॥ लक्षं जप्त्वास्य मंत्रस्य लभेत्सिद्धिं यथेप्सितां ॥ होमकर्म ततः कृत्वा ततः कुर्वीत कामनां ॥ समिद्भिः श्रीफलानां च घृताक्ताभिः
समाचरेत् ॥ तदभावे विधातव्यमपामार्गसमिद्वरैः ॥ तर्पणादि यथापूर्वं कृत्वा काम्यानि साधयेत् ॥ गुरवे दक्षिणां दद्यात् वस्त्राणि
विविधानि च ॥ धर्मार्थकाममोक्षाणां गुरुरेव समाश्रयेत् ॥ जायते नव वाप्नोति मन्त्रस्यैव प्रदापयेत् ॥ जायंते सिद्धयस्तेन साधक
स्येप्सितप्रदा ॥ साधितोयं महामंत्रः सर्वसिद्धिप्रदायकः ॥ तदात्वष्टौ महासिद्धीः किंपुनः क्षुद्रकाः क्रिया ॥ अर्चितव्या सदा भक्त्या
भुक्तिमुक्तिफलप्रदा ॥ भुक्तौ मुक्तौ वशानौ च श्वेतपुष्पं विनिर्दिशेत् ॥ स्तंभने मोहने चैव पीतपुष्पं विनिर्दिशेत् ॥ काम्यकर्मणि तास
र्वत्र ध्यानं स्यात् पुष्पवर्णकं ॥ रात्रौ विशेषतः पूजा कर्त्तव्या सिद्धिमिच्छता ॥ देवदानवगंधर्वयक्षराक्षसपन्नगाः ॥ सिद्धविद्याध
राश्चैव गुह्यकाश्चापि किन्नराः ॥ एतेनैते च वशमायांति किंपुनः क्षुद्रमानुषाः ॥ अथ किं बहुनोक्तेन ब्रह्महत्यादिकं चयेत् ॥ तत्क्षालय

311

नः परं ॥ मध्ये देव्यासनं पूजयेदिति शेषः ॥ तस्यामावाहनं कुर्यात् मंत्रेणानेन साधक ॥ प्रणावं प्रथमं कृत्वा सर्वबुद्धिप्रदे ततः ॥ वर्णिनीये ततो
वाच्यं सर्वसिद्धिप्रदे ततः ॥ डाकिनीये ततो वाच्यं देवीनाम ततः परं ॥ एह्येहीति ततो वाच्यमिहेति तदनंतरं ॥ तिष्ठतिष्ठेति च तथा माये
च तदनंतरं ॥ इत्यावाहनमुद्दिष्टं स्थापनेन समन्वितं ॥ देवीनाम वज्रवैरोचनीयें वज्रवैरोचनीये च एह्येहीति ततो वदेत् ॥ इति करं
किणीतंत्रवचनात् ॥ पुष्पांजलित्रयं कृत्वा यजेन्मंत्रमनुत्तमं ॥ श्रियामंत्रेणा संपूज्यं मंडलस्था महेश्वरी ॥ संपूजयेत्ततो गाणि ततो
स्त्रं मनुवित्तमः ॥ अस्त्रं कर्त्री अगार्चनात्पूर्वं देवीं प्रपूज्य ॥ वर्णिनीं डाकिनीं स्पृष्ट्वा ततो गानि समर्चयेत् ॥ इति करंकिणीतंत्रवचनात्
अथ प्रयोगः ॥ तत्र प्रातः कृत्यादि योगपीठन्यासांतं प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः ॥ मुखे सम्राजे छंदसे नमः ॥ हृद
ये श्रीछिन्नमस्तकायै देवतायै नमः ॥ इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा ॐ आं खड्गाय हृदयाय नमः ॥ इत्यंगुष्ठाभ्यां कनिष्ठयोर्न्यसेत्
ॐ ईं सुखड्गाय शिरसे स्वाहा तर्जनीभ्यां मध्यमयोः ॥ ॐ ऊं श्रीवज्राय शिखायै वषट् मध्यमाभ्यां मध्यमयोः ॥ ॐ ऐं पाशाय कवचाय हुं
अनामाभ्यां तर्जन्योः ॐ औं अंकुशाय नेत्राय वौषट् कनिष्ठाभ्यां मंगुष्ठयोः ॐ अः अभुरमपाय क्रूं हूं अस्त्राय फट् करतलपृष्ठयोः इ
ति करयोर्विन्यस्य हृदयादिषडंगेष्वप्येतानेव मंत्राविन्यस्य ध्यानमानपूजांते प्रमाणोक्तं पूजाचक्रमुद्धृतमस्थार्घस्थापनाद्यात्मपूजां
ते भुवनेशीपीठमभ्यर्च्य मूर्तिकल्पनांते ॥ ॐ देव्यासनाय नमः ॥ इति संपूज्य ॥ ॐ सर्वबुद्धिप्रदे वर्णिनीये सर्वसिद्धिप्रदे डाकिनीये वज्र

तस्यस्थिराभवेत्॥ छागस्यमांसंरक्तंचघृतेनह्याविनंतथा॥ योजुहोत्ययुतंदेविजातस्यवशीभवेत्॥ श्वेतेनकरवीरेणहोमस्यकु
र्वतः॥ लक्षमात्रंविधानेनजीवयेत्कालदष्टकं॥ कुकुयान्निलपुष्पाणिमधुनोक्तानिसाधकः॥ राक्षसंख्यानियोदेविसिद्धिस्तस्यतुसं
पदः॥ कर्णिकारसहस्राणिजुहोतियस्तिलैःसह॥ प्राप्नोतिपरमांसिद्धिमीप्सितांवरसुंदरी॥ बंधूककुसुमंहुत्वाघृतेनायुतसंख्यतं
तस्यप्रीताभवेद्देवीसर्वसौभाग्यदायिनी॥ तिलतंडुलहोमेनबंधूककुसुमेनच॥ जगंतितस्यमित्राणिजायतेवरसुंदरी॥ आरक्त
करवीराणिसरक्तचदनानिच॥ हुत्वान्नृपंवशीकृत्यप्राप्नोतिमहतींश्रियं॥ पायसेनवरेहोमंघृतेनसहसुंदरी॥ त्रिमध्यंमास
मात्रेणाभावेद्वागीशसन्निभः॥ ॥ फेत्कारिणीतंत्रे॥ कैलाशशिखरासीनंचंद्रखंडविराजितं॥ वक्षस्थलेसुखासीनापृच्छतिस्म
नगात्मजा॥ कथमीशानसर्वज्ञमभवन्नेतपोधनाः॥ काविद्यांप्राप्यकवयोभारतादीन्प्रचक्रिरे॥ श्रुत्वानगात्मजावाक्यंविहस्य
परमेश्वरः॥ प्राहप्रियांपरिष्वज्यसाधुसाध्वितिपूजयेत्॥ शृणुस्वाधिमहाविद्यामज्ञानेधनदाहिनी॥ यामवाप्यमहात्मानोधर्म
कामार्थमुक्तिषु॥ नासाध्यंमेनिरेकिंचित्कवयःशुद्धबुद्धयः॥ वादेशदसिवाक्येस्तंभिनीप्रतिवादिनः॥ विद्याहानिकरीवैरिविद्रु
षांवलिदानतः॥ हास्यायायासदस्यानामशब्दमपिजल्पवेत्॥ वादिनंवाथराजानंमंत्रिणंवशमानयेत्॥ ज्ञातपात्रेणमंत्रस्यम
तिह्याप्रजायते॥ जयादेवरतुसर्वज्ञोजायतेनात्रसंशयः॥ जिह्वायांन्यसनादेवमूकोपिसुकविर्भवेत्॥ अव्याहतागतिःशास्त्रेअ

तिमंत्रोयंलक्षजापान्नसंशयः॥ अगम्यागमनंचैवतथाभक्ष्यस्यभक्षणं॥ सकृदुच्चरितोमंत्रोदहत्यग्निरिवेधनं॥ एषमंत्रःसदागोप्यो
नप्रकाश्यःकदाचनः॥ अश्रद्धानायदातव्यमितिशास्त्रस्यनिश्चयः॥ नारिदोषोनविघ्नोवानाशौचंनियमोपिवा॥ सिद्धमंत्रजपानात्र
पूर्वसेवापरिश्रमः॥ जाग्रच्छयानउच्छिष्टोज्ञानोमैथुनेपिवा॥ सदाकालंजपन्मंत्रंमारकस्यनविद्यते॥ लिखित्वास्वकरेमंत्रमुष्टिवंधं
समाचरेत्॥ स्तंभयत्यायुधशस्त्राणियावन्मुष्टिंनमुंचति॥ मुष्टिंबध्वारणाद्यूतंविशेज्जनककुलंनरः॥ उग्रदायुधहस्ताश्चभवंतियदि
वैरिणः॥ नैवमुविशस्त्राणियावन्मुष्टिंनमुंचति॥ लिखित्वास्वकरेमंत्रमातुरंसंस्पृश्यनजपेत्॥ विमुच्यतेहठाद्रोगान्मुक्तरोगःसुखी
भवेत्॥ शुक्लेनध्यानमात्रेणमंत्रमेनंजपेद्बुधः॥ महोरगशतैर्दष्टंमृतमुत्थापयेन्नरं॥ रक्तेनवशमायांतिसर्वभूतलवासिनः॥
पीतेनस्तंभयत्सर्वनौकावाजिगजादिकं॥ लिखित्वात्वकरेमंत्रंयावन्मुष्टिंनमुंचति॥ कृष्णेनध्यानमात्रेणारिमुच्चाटयेन्नरः॥ मा
रयेदप्ययत्नेनकृष्णध्यानान्नसंशयः॥ तर्पणंचप्रकुर्वीतपयसापायसेनवा॥ घृतेनमधुनावापिसुरयामंत्रसाधकः ब्राह्मणाक्षत्रि
योवैश्यःशूद्रश्चेतियथाक्रमं॥ तर्पणस्यविधानेनहठात्सिद्धिःप्रवर्त्तते॥ ततोहोमंप्रकुर्वीतसमिद्भिःकुसुमैस्तथा॥ श्रीफलानांप
लाशानांतथैवोडुंवरस्यच॥ सर्वसिद्धिप्रदोहोमोविधातव्यःप्रयत्नतः॥ शतमष्टोत्तरंकृत्वाजुहुयाच्चततःपरं॥ मालतीकुसुमैहोमोक
र्त्तव्योमधुसंयुतः॥ घृतेनसहितोवापिनागेश्वर्यप्रदायकः॥ आज्ययुक्तोवलिर्देयश्चण्डिकायैमहामिषः॥ षण्मासंदधिसंयोगाल्लक्ष्मी

लाभतः॥ विद्याब्राह्मणमित्याह शेवधिस्तेस्मि रक्ष मां सेवधिर्निधि॥ असूयकाय मां मादा यथा स्यां वीर्यवत्तरा॥ यमेव तु शुचिं विद्यान्नियतं
ब्रह्मवादिनं॥ तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने॥ यद्यदृष्टवत्वाल्लाभो मंत्रस्यास्य भवेदुमे॥ स्वगोत्रपौरुषं नैत्वदन्यगोत्रं नयेत्सु
धीः॥ विद्याविदानवाप्नोति कीर्तिमायुः सुतान्वसून्॥ सवासः श्रीसरस्वत्यायत्र सारस्वतो मनुः॥ ॥ उत्तरतंत्रे॥ भूतशुद्धिं समाचरेत्
मायां नाभौ रक्तवर्णां ध्यात्वा तज्ज्ञानवह्निना॥ षट्कं पाशात्मकं देहं दग्ध्वा संचिंतयेत्ततः॥ ह्रीकारं हृदि पीताभं तदुद्भूतेन वायुना॥ भ
स्मप्रोत्सारितं कृत्वा ललाटे चिंतयेत्ततः॥ कूर्चं तुषारवर्णाभं तदुद्भूतामृतेन तु॥ कूर्चं ॐकारं॥ तदस्थिप्लावनं कृत्वा ततश्चात्मानं वि
चिंतयेत्॥ समस्तदोषनिर्मुक्तं निर्मलं देवतात्मकं॥ अत्र ब्रह्मणा कथितं वक्ष्ये मया तुभ्यं नगात्मजे॥ शक्तिफेत्कारिणीतंत्रे॥ देवी
प्रति श्रीशिववचनाद्ब्रह्मा ऋषिरस्य प्रथमोपासकत्वात्॥ गायत्री छंदः श्रीमदुग्रतारा देवता हूंकारबीजोद्भवामित्युक्ते हूंकारबी
जमिति वदंति॥ षड्दीर्घाद्यबीजेन षडंगन्यासमाचरेत्॥ प्रत्यालीढपदार्पितांघ्रिशवहृद्घोराट्टहासा वरा खड्गेंदीवरकर्तिख
र्परभुजां हूंकारबीजोद्भवां॥ खर्वा नीरविशालपिंगलजटाजूटोग्रनागैर्युता जाड्यं न्यस्य कपालके त्रिजगतां हंत्युक्तता स्वयं॥ प्रत्या
लीढपदा शवहृदयनिर्भरणाभिप्रायेणासंकुचितचरणा॥ ऊर्ध्वादिदक्षकरयोराद्येन तदादिवामयोरन्ये॥ खड्गं दक्षिणहस्तेन बिभ्रती
दीवरं वधं॥ कर्तिं च खर्परं चैव क्रमाद्वामेन बिभ्रतीमित्युत्तरतंत्रवचनात्॥ उग्राद्भयाज्जंतूंस्तारयतीत्युग्रतारा॥ उक्तं चोत्तरतंत्रे॥ उ

313

ताम
३१३

जयो वाक्पतेरपि ॥ अस्योद्धारमहं वक्ष्ये मम सार्वज्ञकारणं ॥ प्रथमं सप्तमपदं दत्वा चतुर्थस्वरभूषितं ॥ दीर्घाकारसमायुक्तं हकारं योजयेत्ततः ॥ फट्कारं च ततो दद्यात्सर्वार्थसिद्धमंत्रकं ॥ पवरश्मिसमायुक्तो हृज्ज्ञाने धनपावकः ॥ सपरं हकारश्चतुर्थस्वर इकारः ॥ त्रंकारमिति आद्यपंचमवर्गस्य वह्नि वर्णसमागतं ॥ मायावर्णसमाक्रान्तमिंदुबिंदुकलान्वितमिति कुब्जिकातंत्रवचनात् · केवलतकार इति वह्वः लज्जाबीजं वधूबीजं सदीर्घव नतुच्छदमिति करंकिणीतंत्रवचनात्सकारयुक्तं सकारमिति केन ॥ स्वराध्यमतन्मत्रप्रमाणं ॥ दीर्घाकारयुकारः पंचरश्मिप्रणवः ॥ तथा कल्पयेत्स्थिरचित्तेन मणितोहं कविः ॥ अजस्वभावनाभ्यासाद्भवेदेव न संशयः ॥ अविमलनखपाणिपादद्वंतोशुद्धिमनः परब्रह्मपरो भुमौनी ॥ हरिहरकमलोद्भवांघ्रिभक्तो भवति विरायसरस्वतीनिवासः ॥ कृतसुकृतसहस्रनेकजन्मप्रभावैर्भवति यदि मनुष्यो गर्वधीनचिराय ॥ कथमपि मनुमेनं प्राप्यशिष्याय तस्मै निजकुतिलकाज्येष्ठपुत्राय दद्यात् ॥ नयापरनये दद्यान्नाभक्ताय कदाचन ॥ गुरुभक्ताय शांताय दद्याद्दात्त्वे हयात्मने ॥ मनुर्विमृश्य दातव्या ज्येष्ठस्यापि विनीततां ॥ पुत्रस्य किंपुनरन्यस्मै विगोप्यायश्चपौरुषं ॥ गुरुचरणासरोजे सर्वदा भक्तिभावात्परिचरति विधेयाचास्य सर्वात्मनास्यात् ॥ कथमपि मनुमेनं मानयन्मानवो सौ भवति जगति चाधिदेवतासिद्धांतेहता ॥ सर्वदा गोपयेदेनं मनुं च गुरुमेव च ॥ तेन वीर्यवती विद्या निर्वीर्या स्यात्प्रकाशनात् ॥ उत्पादकब्रह्मदात्रोवगरीमंत्रदः पिता ॥ तस्मान्मन्येत मततं पितुरप्यधिकं गुरुं ॥ उपदेशादंगमंत्रो वलिमंत्रस्तथैव च ॥ कर्त्तव्यो विदुषा सिद्धिरस्य मंत्रस्य

जनकालेर्द्धरात्रेचवलिर्देय ॥ भोजनावसरेदेवि मध्यरात्रेचसाधक ॥ वलिंदद्यादनेनैवसर्वकार्येषुसर्वदेतिकुब्जिकामतात ॥ सर्वदा
प्रत्यहंभोजनकालेकार्येषुमध्यरात्राविसर्थः ॥ ॥ अथप्रयोगः ॥ ततःप्राग्वत्कृत्वाभूतशुसमयेनाभौरंवीजस्थानेह्रींकारंरक्तवर्णावि
चिंत्यतज्जताग्निनायायपुरूषंसंदह्यहृदिञींकारंयवीजस्थानेसंचिंत्यतदुत्थवायुभस्मप्रोत्सर्यः ललाटेवंवीजस्थानेहूंवीजशुक्लव
र्णंविचिंत्यतदुत्थामृतदृष्ट्यास्वदेहमाप्लाव्यशेषंपूर्ववत्कृत्वाप्राणप्रतिष्ठादियोगपीठन्यासांतेमूलेनप्राणायामंत्रयंकृत्वा ॥ शिरसिउ
लरोग्रऋषयेनमः मुखेगायत्रीछंदसेनमः ॥ हृदयेउग्रतारायैदेवतायैनमः ॥ गुह्येहूंवीजायइनमः ॥ इतिविन्यस्यह्रींमित्यादिषडंगं
विधायध्यानादिपरतत्त्वांतंप्राग्वत्पीठंसंपूज्याष्टदलकेसरेषु ॥ महाकाल्यैनमः ॥ रुद्राण्यै॰उग्रायै॰भीमायै॰घोरायै॰भ्रामर्यै॰महारा
त्र्यै॰भैरव्यैनमः इतिदेव्याग्रादिप्रदक्षिणाकारेणसंपूज्यमूर्त्तिकल्पनांतेदेवीमावाह्यस्थापनादिमुद्रादर्शनांतेमूलमुच्चार्य ॥ श्रीमदेक
जटेवज्रपुष्पंप्रतीछस्वाहेतिआसनादिपुष्पोपचारांतंकृत्वाप्राग्वदंगानिसंपूज्यदेवीशिरसिअक्षोभ्यवज्रपुष्पंप्रतीछस्वाहेतित्रिःसंपू
ज्यदेव्येग्रादिचतुर्दलेषु ॥ ॐविरोचनाय· ॐशंखपाराउराय· ॐपद्मनाभाय· ॐअमिताभाय· कोणदलेषु· ॐलामकै· ॐपाण्डुरायै
ॐतारायै· देव्यग्रादिद्वारेषु· ॐपद्मान्तकाय·ॐयमान्तकाय· ॐविघ्नान्तकाय· ॐनरकान्तकायनमइतिसंपूज्यलोकेशार्चादिदीपांतं ॥ ॐ
पद्मे२महापद्मेपद्मावतिहुंस्वाहेतिमंत्रेणवलिंनिवेद्य· नित्यहोमादिपूजाशेषंप्राग्वत्कृत्वासमापयेदिति ॥ प्रत्यहंभोजनकाले ॥ ॐह्रीं

314

राम
३१४

यादपि भयात्त्राति यस्माद्भक्तान्सदांबिका ॥ ताश्चग्रतारामृषयो वदंतीह मनीषिणः ॥ इति ॥ तथा सुयोगिचंदनेनाष्टपत्रमब्जं उशोभनं ॥ भूपुरं वज्र
वज्राढ्यं यंत्रमेकजटात्मकं ॥ उत्तरतंत्रे ॥ महाकाल्यथ रुद्राणी उग्रा भीमा तथैव च ॥ घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी ॥ भैरवी चाष्टमी
प्रोक्ता शक्तीस्तारि पूजयेत् ॥ मध्ये देव्यास नपूज्यमिति ॥ ॥ फेत्कारिणीतंत्रे ॥ आवाह्य स्थापयित्वा तावद्यावद्धृतं नमं ॥ श्रीमदेकजटे वज्रपु
ष्यमित्यभिधाय च ॥ प्रतीच्छाग्निप्रियांतेन मंत्रेणार्चयेत्ततः ॥ दत्वा गंधादिकं सर्वं बलिपुष्पं निवेदयेत् ॥ बलिं नैवेद्यं ॥ प्रणवं पूर्वमुच्चा
र्यपश्चेदगलमेव वा ॥ महापश्चे पदं ब्रूयात्त्वयावतिपदं ततः ॥ ॐ स्वाहेति च मंत्रोयं यथा पूर्वं बलिं हरेत् ॥ ॥ मंत्रप्रयोगे वक्ष्यते ॥ अक्षोभ्य
वज्रमाद्येन तारिणीं मूर्ध्नि पूजयेत् ॥ प्रणवाद्यग्निजायांतं उष्णप्रतिष्ठ चेत्यपि ॥ वैरोचनं तथा शंखं पाण्डरं यम्नाभकं ॥ अमितभयन्
मेशीदिक्ष्वेडादि चतुर्दले ॥ लामकीं मामकीं चैव पाण्डरां तारया सह ॥ वह्न्यादिषु तु कोणेषु मंत्रैः स्वैस्वैः पुगैः क्रमात् ॥ द्वारे पूर्वादि तथा
थपद्मांतकमयांतकौ ॥ विघ्नांतकं समभ्यर्च्य पूजयेन्नरकांतकं ॥ नात्युच्चं नातिनीचं च ध्यात्वा देवीं जपेन्मनुं ॥ बलिं दत्वा नमस्कृत्य
स्कृत्वा देवीं विसर्जयेत् ॥ प्रणवं पूर्वमुच्चार्य ह्रस्वेरवां च ततः परं ॥ एकजटे पदांते तु महाशब्दमुदीरयेत् ॥ पक्षाधिपदमाभाष्य पतये पद
नोमया ॥ उपनीतं पदं प्राज्ञ बलिं गृह्णेति वद्विधा ॥ गृह्णापय द्विधा चोक्त्वा मम सर्वं पदं ततः ॥ शांतिकुरु द्वयं चैव परविघ्नामनंतरं ॥ द्वि
धाक्रमेति ब्रूयाच्छिंधि छिंधीति च द्विधा ॥ मायास्वाहेति मंत्रोयं बल्यादौ बुद्धिसिद्धिदः ॥ परसैन्यग्रहारिष्टरोगकृत्यादिनाशनः ॥ अनेन भो

गुरुं ॥ गोभूहिरण्यवस्त्राद्यैर्यथाविभवविस्तरैः ॥ मृदुचूडकमासीनोप्यस्मेषुकोमले शुभे ॥ विष्टरे शुभ समाश्रित्य साधयेत्सिद्धिमुत्तमां ॥ भूतशुद्धिं विधायाथ भूत्वं विश्वं विचिंतयेत् ॥ निर्लेपं निर्मलं शुद्धमात्मानं तारिणीमयं ॥ प्रत्यालीढपदां घोरां मुण्डमालाविभूषितां ॥ खर्वां लंबोदरीं भीमां व्याघ्रचर्मावृतां कटौ ॥ नवयौवनसंपन्नां पंचमुद्राविभूषितां ॥ पंचमुद्रा इति जटाग्रंथिरचनाविशेष उक्तः ॥ चतुर्भुजां ललज्जिह्वां भीमरूपां वरप्रदां ॥ खड्गकर्त्रिधरां दक्षे कपालोत्पलधारिणीं ॥ पिंगोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषितां ॥ प्रज्वलत्पितृभूमध्यगतां दंष्ट्रावराननां ॥ सावेशस्मेरवदनां ह्यलंकारविभूषितां ॥ विश्वव्यापकतोयांतः श्वेतपद्मोपरिस्थितां ॥ भावनाभावसंपन्नो भवेद्योगी महाकविः ॥ जडोपि यदि वा मूर्खो भावनावशतत्परः ॥ लभतेभिमतां वाणीं मंत्रस्य लक्षजापतः ॥ एकलक्षजपोस्य मंत्रस्य पुरश्चरणं ॥ एकलिंगे श्मशाने चेत्यादिस्थानविशेषाभिधानात् ॥ एषः कृतयुगजपः कलौ चतुर्गुणो जपः कार्यः ॥ तर्पणादिकमपि प्राग्वत्कर्तव्यमिति ॥ होमस्तु घृतेनैव ॥ डयाभक्तो घृतं होम इति कपिलवचनात् ॥ तथा ॥ मधुनात्रिदिनादर्वागर्भकजिह्वायां न्यसेदमुं मंत्री ॥ यदि पठति पठितोसौ न पठति चेन्नास्य मूर्खता भवति ॥ न कदापि भवति मूर्खो मनुमेनं वेत्ति यो मनुजः ॥ अचिरादिहितां सिद्धिर्महाशंखस्य मालया ॥ यस्मिन्नम्नेय आचाररस्तत्र धर्मस्तु नाइशः ॥ कृतार्थस्से न जाये न स्वर्गं वा मोक्षमेव वा ॥ भ्रांतिस्तत्र न कर्तव्या सिद्धिहानिः प्रजायते ॥ शुद्धविद्यस्य नित्यं हि सिद्धिः स्यादपवर्गजा ॥ उपचारविशेषेण राजपत्नीं वशं नयेत्

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

एकजटे महायक्षाधिपतये मयोपनीतं बलिं गृह्ण २ गृह्णापय मम शांतिकुरु २ परविघ्नांछिंधि धाकृत्यत्रुट २ छिंधि २ ह्रीं स्वाहा ॥ इति मंत्रे
णादिभिर्बलिं दद्यात् ॥ फेत्कारिणीतंत्रे ॥ त्वानमाहात्म्यक्रमः स्त्रिनरांतात्रिवनाणां ॥ ध्येनधिंमावधवितः कर्मसामरसाज्ञम ॥ लःव
भर्वकाएभसर्विवितेभ्रक्ष भंयना ॥ त्रोषोवाचरात्रोदिनशिपांहा संनिधामन ॥ हननस्वागेसस्यावराणांशावाहरिस्पदिगे ॥ त्रवयछिंद
नर्चभ्ररेनल्पं नर्विश्वकमनि ॥ सिद्धापेत्रकाराउयता ॥ रांत्राहूवाषमिरिन ॥ त्रेचित्तयेयतत्मंतंजप सर्वकाममसमृद्धिदं ॥ गद्यपद्यमयी
वाणीसभायांतस्यजायते ॥ तस्यदर्शनमात्रेणराजानोनिष्प्रभामताः राजानोपिवशदातस्यभजंतेकिंपरेजना ॥ वापूर्यवदेशजनसम
क्षभोस्त्राजनः ॥ नमशेइपचौहार्देनि भ्रमयेत्रेदालिंपमंराववोनैकद्वैर्न्नषोवस्त्री ॥ तान्नयछेत्तचषाजवि ॥ रवनेहापशंस्थामजा ॥ रेनध्व
पंवेवश्योजनि ॥ स्त्रियंगछन्स्पशान्मृस्यपत्रतत्रापिकूउके ॥ भक्ष्यनाकूलमन्याश्वडव्यान्यथारुचि ॥ डत्त्वविसक्षोमदमांपयःशाका
यमक्षवं ॥ भक्ताद्यशेषभक्षणिरेतभ्यपंत्वावभनृजंद ॥ स्तिनिमोज्ञ्वानालपदिचदिमोत्मादिपस्थि ॥ जपेनकालनियमोपिभ्रलि
चाषादिवना ॥ त्रयएछावानिमस्वेमहामंत्रस्यसाधने ॥ नजातेध ॥ ॥ तेर्मोयनावेव्योहोचहृधमकिं ॥ तःरोगछादिवात्रस्वेसप्र
माचनराष्टप्रकृतार्थमन्यमानस्कसंतुष्टनिजमानसः ॥ भ्रुगंधिश्वेतलौहित्यकुसुमैरर्चयेद्दलैः ॥ वेल्वैर्मरुवकाद्यैश्चतुलसीवर्जितैः
शुभैः ॥ एकलिंगेश्मशानेवाशून्यागारेचतुष्पथे ॥ तत्रस्थःसाधयेद्योगीतारांत्रिभुवनतारिणीं ॥ अवाप्यमंत्रंविधिवत्परितोष्यतथ

शि॰ चं॰
२९६

स्वापिकादीन्वर्णान्यथाक्रमं ॥ अष्टवर्गसमायुक्तं यंत्रमेतत्प्रयोजयेत् ॥ वेष्टितं पीतवस्त्रेण राजतेनापि वेष्टयेत् ॥ वध्नीयात्पट्टसूत्रेण शि
शूनां कंठभूषणं ॥ स्त्रीणां वामभुजे बद्धमन्येषां दक्षिणे भुजे ॥ वंध्यापि लभते पुत्रं निर्धनो धनवान्भवेत् ॥ इयं रक्षा पुरा वत्स रक्षार्थं गो
तमादिभिः ॥ कीलार्थं कार्थिवैरन्यैः संग्रामे जयकांक्षिभिः ॥ ॥ अस्यार्थः ॥ भूर्जपत्रे षट्कोणं कृत्वा तन्मध्ये साध्यं मूलमंत्रं विलिख्य
क्रमस्वरैरावेष्ट्य बहिरष्टदले कवर्गाद्यष्टवर्गान्लिखेत् ॥ उक्तफलदमिति नीलसरस्वत्याः प्रपंचोयं निदर्शितस्त्वल्लक्षणा पूर्वमस्मभ्यं
मया तुभ्यं नगात्मजे ॥ इति निगदितमेतज्ज्ञानमाद्यैर्युक्तं सकलजनहितार्थं मंत्रस्वरूपं ॥ अहमधिगमवशास्यां वाछिताशेषसिद्धि
उत नरकवितायै यत्नमन्यन्त्यजेच्च ॥ ॥ सुंदराचार्यशिष्येण श्रीनिवासेन धीमता ॥ चंडिकायां प्रणीतायां मंत्रेत्रिंशप्रकाशकः
इति सुंदराचार्यचरणा॰ श्रीनिवासभट्टेन विरचितायां श्रीशिवार्चनचंडिकायां त्रिंशः ॥ ॥ फेत्कारिणीतंत्रे ॥ अथातः संप्रवक्ष्यामि
दुरापं वै दक्षिणाविधिं ॥ सर्वसिद्धिप्रदं साक्षान्महापातकनाशनं ॥ देवैर्दैवत्वविधये सिद्धैः खेचरसिद्धये ॥ पन्नगैराक्षसैर्मर्त्यैर्मुनि
भिश्च मुमुक्षुभिः ॥ कामिभिर्धनिभिश्चार्थिनिष्पुभिः सेवितं सदा ॥ न विघ्नं व्ययबाहुल्यं कायक्लेशकरं न च ॥ यत्नेन चिंतयेन्मंत्रं सर्वका
मसमृद्धिदं ॥ तस्य हस्ते सदैवास्ते सर्वसिद्धिर्न संशयः ॥ गद्यपद्यमयी वाणी सभायां तस्य जायते ॥ तस्य दर्शनमात्रेण वादिनो निष्प्रभाम
ताः ॥ राजानोपि च दासत्वं भजंते किं परे जनाः ॥ वह्नौ शैत्यं जलस्तंभं गतिस्तंभं विवस्वतः ॥ दिवारात्रिव्यत्ययश्च सर्वकर्मक्षमो भवेत् ३

326

राम
२९६

राजानं जपमात्रेण वलिनाम कलं जगत् ॥ सिद्धमंत्रो यदा मंत्री वालिशस्यापि मूर्द्धनि ॥ करं दत्वा दिशत्याशु सोवि: श्लोकं करोत्पुनः ॥ नी
लसारस्वते मंत्रे कविताविघ्नकारकं ॥ क्षिप्रप्रसादाज्जनतां सदा नीलसरस्वती ॥ विशेषतः कलियुगे मत्प्रसादाद्भविष्यति ॥ अल्पज्ञ
मपि विद्वांसो मानयिष्यति वाग्मिनः ॥ वाचस्पतिरिवाश्चर्य यस्य मंत्रज्ञमातनत ॥ मंत्रस्य ज्ञानमात्रेण चानुभावद्वयं भवेत् ॥ तात्कालि
कीच कवितापरैरनंभिभाषिता ॥ पुष्करिण्या जले गाधे यष्टिकाष्टं नमोत्रहे ॥ दंतेनानीय तं तुर्याकीलकं तेन कारयेत् ॥ तेनक्षोडघृता
क्तेन पद्मिनीपत्रमात्रके ॥ लिखेद्वर्णावलीमध्ये मूलमंत्रमुसिद्धिदं ॥ तत्कुराउच्चतुरस्रे तु निक्षिप्य जुहुयादपि ॥ सहस्रक्षीरमीराक्तं प
द्मानां लोहितत्विषां ॥ पूर्वोक्तवलिमंत्रेण यथापूर्वं वलिं हरेत् ॥ वलिमंत्रेणापश्चेयश्चेत्यादिमंत्रणा ॥ एवं यः कुरुते सस्याद्रुतं कविर्ध्रु
वं ॥ अर्द्धरात्रे ततो नित्यं वलिं दद्यात्तज्जुव्यथे · ॐ ह्रीं स्यकजेटत्यादि पूर्वोक्तमंत्रे अथवा मधुलाजाभ्यां जिह्वायां वालकस्य तु ॥ नादच्छेदा
यथापूर्वं लिखेद्धेमशलाकया ॥ मूलमंत्रं लिखेन्मंत्री यस्योष्ठेष्वेतदूर्वया ॥ वाक्योयं मंत्रितं कुर्याद्वासवद्रुशे ॥ श्मशानांगारमादाय मं
गलेवासरेनिशि ॥ कृष्णवस्त्रेणासंवेष्ट्य वध्रीयाङ्कृतेतु ताशताभिमंत्रितं तत्र प्रक्षिपेद्वैरिमंदिरे ॥ सप्ताहाभ्यंतरे तेषामुच्चाटनमिदं मह
त् ॥ नरास्थिनिलिखेन्मंत्रं रक्षायुक्तहरिद्रया ॥ सहस्रं परिजप्येतन्मंत्रं तु रविवासरे ॥ क्षिप्यते यस्य गेहे तु मृत्युस्तस्य त्रिमासतः ॥ क्षेत्रेपश
स्यःहानिः स्यान्नवनिस्त्ररंगमे ॥ योनियुग्मं लिखेद्भूर्जे लाक्षारसेन मंत्रवित् ॥ तन्मध्ये साध्यसंयुक्तं मूलमंत्रं लिखेत्ततः ॥ हृस्वहृस्वगतां

णां॥ मद्यश्छिन्नशिरःखड्गवामोर्द्ध्वाधःकरांबुजां॥ अभयंवरदंचैवदक्षिणोर्द्ध्वाधःपाणिकां॥ महामेघप्रभाश्यामांतथाचैवदिगंवरीं॥ कण्ठावश
क्तमुण्डालीगलद्रुधिरचर्चिता॥ कर्णावतंसतांनीतशवयुग्मविराजितां॥ घोरदंष्ट्रांकरालास्यांपीनोन्नतपयोधरां॥ शवानांकरसंघातैःकृत
कांचीहसन्मुखीं॥ सृक्कद्वयगलद्रक्तधाराविस्फुरिताननां॥ घोररूपांमहारौद्रीश्मशानालयवासिनी॥ त्रिकोणंविलिखेत्पूर्वंतत्रापित्रि
कोणकं॥ एवंषट्कोणकंकृत्वावहिःषट्कोणकंतथा॥ पुनस्त्रिकोणंतस्यान्तस्तन्मध्येस्थापयेछिरं॥ तस्मान्तषट्कोणद्वयात्मकचक्रस्यम
ध्ये॥ वहिरष्टदलंकुर्याच्चतुर्द्वारोपशोभितं। चतुरस्रंकुर्यादितिशेषः॥ ततोमध्यत्रिकोणान्तर्यसंहृद्देवींचदक्षिणां॥ महाकालंचतत्रैवन्यसे
देषविधिस्मृतः॥ ततःपूर्वादिकोणेषुवामावर्त्तेनपूजयेत्॥ कालिकपालिनीकुल्लाप्रथमेतुत्रिकोणके॥ नीलाघनावलाकांचतथैवा
परेकत्रिके॥ कुरुकुल्लाविरोधिन्यौविप्रचित्तांतथापरे॥ उग्रामुग्रप्रभांदीप्तांतुरीयेतुत्रिकोणके॥ मात्रांमुद्रांमितांचैवतथापंचम
केत्रिके॥ सर्वाःश्यामाअसिकरामुण्डमालाविभूषणाः॥ तर्जनीवामहस्तेनधारयंत्यश्चसंस्मिता॥ वहिर्मण्डलतश्चापिब्राह्मीनारायणी
तथा॥ माहेश्वरीचचामुंडाकौमारीचापराजिता॥ वाराहीचतथापूज्यानारसिंहीतथैवच॥ संपूज्ययत्नतश्चापिवलिसंप्रतिपादये
त्॥ वलिमुत्थाप्यनैवेद्यंनैर्ऋत्यांचापिधारयेत्॥ हृदयेचैवदेवेशींसमर्थविचिवबुधः॥ निर्माल्यंचैवशुचौदेशेधारणीयंसदैवहि॥
अथप्रयोग॥ तत्रप्रातःकृत्यादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वाशिरसिभैरवायनमः॥ मुखेत्रिष्टुप्छंदसेनमः॥ हृदयश्रीद

317

सहत्यासुरापानमगम्यागमनंतथा ॥ सर्वाशुभातरत्येव दक्षिणामेवचिंतयेत् ॥ वागीश्वरसमोवादेधनेनधनदोपमः ॥ कामतुल्य
सनारीणांशत्रूणांसयमोपमः ॥ सर्वस्यैवजनस्येहवल्लभकीर्त्तिवर्द्धनः ॥ अंत्येवलभतेदेव्यासुदुर्ल्लभंलोकमच्चदै ॥ चंद्रसूर्यप्रभो
भूत्वावसेत्कल्पायुतंदिवि ॥ इत्येवमादिकंचैवबहुकिंकथ्यतेप्रिये ॥ ततस्सुदुर्ल्लभंकिंचिद्विघ्नःस्मरेत्कालिदक्षिणां ॥ देवीदक्षिणासं
ज्ञातांप्रवक्ष्यामियथाविधि ॥ ॥ उत्तरतंत्रे ॥ वर्गाद्यंवह्नियुक्तंरतिविंदुसमन्वितां ॥ त्रिगुणांचततःकूर्च्चयुग्मंलज्जायुगंततः ॥
दक्षिणेकालिकेचेतिपूर्व्ववच्चततःपुनः ॥ ठद्वयेनसमायुक्तंमंत्रमेनंविदुर्बुधाः ॥ वर्गाद्यंवर्गः ॥ तदाद्यंककारःवह्निरेफःरतिःईका
रःविंदुरनुस्वारस्तेनक्रींइति ॥ त्रिगुणांएतद्वीजंत्रिरुच्चरेदित्यर्थः ॥ कूर्च्चयुग्मंहूंकारद्वयंलज्जायुगंह्रींकारद्वयं ॥ दक्षिणेकालिकेस्वरूपं
ततःपुनःपूर्व्ववच्चेतिचकाराद्वीजसप्तकंपूर्व्वोक्तक्रमेणैवपुनःपुनरुच्चरेदित्यर्थःठद्वयंस्वाहाकारः ॥ द्वाविंशत्यक्षरात्मायंमंत्रःसर्व्वसि
द्धिदः ॥ ॥ फेत्कारिणीतंत्रे ॥ नात्रशुध्याद्यपेक्षास्तिनवामित्रादिदूषणं ॥ नवाप्रयासवाहुल्यंसमयासमयादिकं ॥ भैरवोस्यऋषिःप्रो
क्तस्त्रिष्टुप्छंदउदाहृतं ॥ देवताकालिकादेवीक्रूंवीजंह्रींचशक्तिका ॥ दीर्घषट्कयुजाद्येनरतिविंदुयुतेनच ॥ षडंगानिन्यसेन्मंत्रीसम्य
ग्यथाविधिः ॥ पंचाशल्लिमातृकार्णोहृदयंचैभुजौतथा ॥ तथाजंघाद्वयंचैवयोजनीयंदशांदश ॥ पंचधापंचधाचैवपुनश्चैवचस
प्तधा ॥ समस्तांगंप्रकुर्वीतशोधितंमंत्रवित्तमः ॥ करालवदनांघोरांमुक्तकेशींचतुर्भुजां ॥ कालिकांदक्षिणांदिव्यांमुंडमालाविभूष

शि.च
३१८

घृतंहोमेइतिकपिलवचनात्॥नागयज्ञोपवीतांचचंद्रार्द्धकृतशेखरां॥जटाजूटांचसंचिंत्यमहाकालसमप्रभां॥कूर्चंलज्जाभुगंवीजंद्वयं
चांतेनियोज्यच॥एवंसंचिंत्यदेवींतुरक्तपुष्पैःसमर्चयेत्॥कामवाणासमाविद्धानिर्लज्जाविह्वलांस्त्रियः॥स्वस्वसंत्यज्यभर्त्तारमालिंगंतिस
देवतं॥अत्रवशेयथास्थितद्वाविंशत्यक्षरमूलमंत्रस्यांतिहूंहूंक्रींक्रींइतिवीजपंचकंनियोज्यजपपूजादिकंकुर्यादिति॥श्रीमदाराध्य
चरणाआकर्षणेतुप्रोक्तवीजपंचकेयत्रवीजद्वयंतत्रैकैकमेवआद्यंतद्वीजत्रयंमूलमंत्रसाद्यंतयोर्योजयेत्॥केचित्तुदक्षिणेकालिके॰
स्वाहाइत्येवमूलमंत्रस्यचाद्यंतवीजानिप्रयोगेषुयोज्यानि॥अन्यानित्याज्यानीतिवदंतियथोपदेशंकार्यमिति॥लोहितांवूलहस्तांतामेक
शूलहस्तांतामेकशूलधरांतथा॥महाकालाग्रतस्थावध्यात्वापुष्पैःसुपीनकैः॥अभ्यर्च्यकेकशस्त्वाद्येनथैवानेपियोजयेत्॥आकर्षणं
भवत्येवसदास्थावरजंगमे॥स्वर्गपातालगंवापिकिमन्यद्भूतलेस्थितं॥आकर्षयतिसर्वंचमहाकालवचोयथा॥कपिलांद्विभुजांक
र्त्रिकपालसव्यदक्षिणांध्यात्वैवंसर्ववशास्यशेषेठद्वयमेवहि॥एवंप्रजप्यपुष्पैराकृष्णेनैवप्रपूजयेत्॥मारणंतुभवेत्तस्ययमुद्दिश्यकृ
तात्क्रिया॥उच्चाटयतिपिंगाक्षीसंत्रासयतिकेकरा॥विद्रावयतिभुक्तास्यान्मोन्मत्तयतिघूर्णिता॥विक्षोभयतिसंक्षुब्धासंपादयतिसम
ता॥संकोचयतिसंरुद्धाविप्ररूढाविरोधयेत्॥योयोभावोननोनपलज्ञावस्थांस्मरेदिति॥अत्रसर्वत्रकर्त्तव्यंभावमात्रस्यचिंतनं॥उच्चा
टनंविनान्यत्रसर्वत्रसुरतंमतं॥सुरतंदेवदेव्याध्येयमिति॥स्नातःशुक्लांवरधरःकृतनित्यक्रियोदिवा॥रात्रौनग्नःशयानश्चमैथुनेवव्यव

318

राम
३१८

क्षिणाकालिकायैदेवतायैनमः॥ गुह्येक्रंबीजायनमः पादयोः ह्रींशक्तयेनमः इतिविन्यस्यममेष्टार्थसिद्धयेविनियोगइतिकृतांजलिरुन्का॥ क्रांहृदयायनमः॥ क्रींशिरसेस्वाहा॥ क्रूंशिखायैवषट्॥ क्रैंकवचायहुं· क्रौंनेत्रत्रयायवौषट्॥ क्रः अस्त्रायफट्· इतिकरषडंगन्यासंकृत्वा॥ हृदि॥ ॥अंआंइंईंउंऊंऋंॠंलृंलॄंनमः॥ दक्षभुजेएंऐंओंऔंअंअः कंखंगंघंनमः वामेचंछंजंझंञंटंठंडंढंणं॥ दक्षजंघायातंथंदंधंनंपंफंबंभं· वामायांमंयंरंलंवंशंषंसंहंक्षंनमः इतिविन्यस्यमूलमंत्रेणपंचधापुनः पंचधापुनः सप्तधाव्यापकंन्यसेत्॥ ततोध्यानमानसपूजांतेत्रिकोणगर्भितषट्कोणाष्टयकर्णिकमष्टदलंकमलंकृत्वातद्बहिश्चतुर्द्वारोपेतंचतुरस्रत्रयंकुर्यादितिपूजाचक्रंनिर्मायपुरतः संस्थाप्याभ्यर्च्यार्घस्थापनादिस्वात्मपूजांतेभुवनेशीपीठमभ्यर्च्यावाहनाद्यंगावंतिप्रथमत्रिकोणेवामावर्त्तेनस्वाग्रादि· ॐकाल्यैनम ॐकपाल्यैनमः ॐकुल्लायैनम॥ द्वितीस्वाग्रादि· ॐकुरुकुल्लायै· विरोधिन्यैः ॐविप्रचित्तायै· तृतीयस्ववामाग्रादि ॐउग्रायै· ॐउग्रप्रभायै· ॐदीप्तायै· चतुर्थेस्वाग्रादिनीलायै· ॐघनायै· करालायै· पंचमेस्ववामाग्रादि· ॐमात्रायै· ॐमुद्रायै· ॐमितायै· अष्टदलेषु ॐब्राह्मण्यै· ॐनारायण्यै· ॐमाहेश्वर्यै· ॐचामुण्डायै· ॐकौमार्यै· अपराजितायै· ॐवाराह्यै· ॐनारसिंह्यै· इतिवामावर्त्तेन· संप्रादक्षिण्येनप्रदीप्तदक्षिणाचसंपूज्यधूपदीपादिशेषंप्राग्वत्कुर्यादिति॥ तथालमेकंजपेन्मंत्रंहविष्याशीतिवाशुचिः॥ अशुचिश्चतथारात्रौलक्षमेकंजपेत्प्रिये॥ होमेचतर्पणेचैवपूजावत्कथितोविधिः॥ दशांशंहोमयेन्मंत्रीतर्पयेदभिषेचयेत्॥ होमस्तुघृतेनैवद्रव्यामुक्तो

त्वायोतंशान्निनेषिद्रमः मंत्रैरर्च्यसहस्रकं ॥ रक्तचंदनदिग्धांगीरक्तपुष्पैरलंकृतां ॥ तावन्तुष्यैर्मतंग्यार्च्य ततो ध्यायेच्च चंडिकां ॥ ततो
गत्वा लभेद्राज्यं यद्यसौ न भयायते ॥ वश्यानेशोच्चेन पश्यननतः वासुसंगशः ॥ असकृन्तु जपेन्मंत्रं सर्वसिद्धिप्रदं भवेत् ॥ चतुश्च
रार्यस्य येश्नवासाभिकृक्तस्त्रिमंदिरः ॥ त्रिस्त्रिमंत्रमुदीर्यैवं सर्वसिद्धिर्भवेन्नतः ॥ तर्पयेच्च पयोभिस्तु रक्तधारायुतेस्तथा ॥ दृश्च
थानोनभिरेत्त्वकीयेनकवेनव ॥ यायापोशुखानानमेवस्रानेगनप्रलभः ॥ नहिरषक्रेमाषमेहिक्रेचैरषस्तेचेरवरनन ॥ नर्ग
रषक्रेमारमृत्वाग्मित्वं तस्य जायते ॥ धनित्वं जायते तस्य सर्वसिद्धिश्च जायते ॥ ववसासभवेज्जीवोधनेनवधनाधिपः ॥ आज्ञया
देवराजासौ रूपेणाव मनोभवः ॥ वलेनयवनोह्येष सर्वतन्त्वार्थसाधकः ॥ ससांतेधिमांताधिसालिंग्यादाश्थिवदत्तसदावलि ॥ संसं
पषमांमांमेमुवहिमेगवमाषछ्रा ॥ वास्थिदार्वतसाप्रसतंममदान्विलोमस ॥ वेछिमनजीरवन्नस्वतंमानीशंगसर्जके ॥ तपेशावेने
दनइमनित्तसर्वसिद्धिप्रदं भवेत् ॥ त्वाजोनेरीक्रूरपुनायराणांमांशतमुन्नमं ॥ प्रत्येकं प्रजपेन्मंत्रं ततस्तद्धोमयेद्बुधः ॥ युगानामयुतं
तेन पूजितादक्षिणाभवेत् ॥ सर्वसिद्धिर्भवेत्तस्य वाग्मी धीरश्च जायते ॥ न तस्य दुर्लभं किंचित्पृथिव्यां जातु जायते ॥ योनिरूपं हि कुंडं
वै कृत्वा वितस्यरत्नतः ॥ हस्तविस्तारतो वापि कृत्वा चैव यथाविधि ॥ तत्र कार्या हि मंत्रेण वह्निस्थापनिका क्रिया ॥ महाकालाय देवा
यदद्यात्प्रथममाहुतिं ॥ तद्येमांवेसेशानस्तचरुरक्तेराधिभ ॥ तद्येसाछन्मपुनैकृतः तशेरषक्रेविसः ॥ आदिष्यादिभिरप्येवं यछुना

319

स्थितः॥ अथवा मुक्तकेशश्च तेन स्युः सर्व्वसिद्धयः॥ स्तंभनं मोहनश्चैव वशीकारो विशेषतः॥ स्मरयुग्मं वीपास्त्रिनं प्रजपेदयुतं नरः॥ स भवेत्सर्व्वसिद्धिनां पारगः सर्वदैवहि॥ तस्य दर्शनमात्रेण वादिनो निष्प्रभा मताः॥ गंद्यपद्यमयी वाणी तस्य सर्वविधा भवेत्॥ अथवा मुक्तकेशश्च हविष्यं भक्षयन्नरः॥ प्रजपेदयुतं तावदेषः प्रतिनिधिः स्मृतः॥ अष्टोत्तरशतं जप्त्वा तन्मपगतन्मात्रभा॥ षयःयायुतेनं प्रमै धनधान्यसुतान्वित॥ सर्वविद्यावतां श्रेष्ठो भवेन्नैवात्र संशय॥ श्पतागं तपमयक्रन्त्रयुतं प्रजपेन्नरः॥ अनर्घ्यकवितानगद्यपद्यमयी भवेत्॥ छंदो वज्रापरं तस्य वाणी वक्त्रात्प्रजायते॥ वपुरजप्रतेवमुसरापापविशुद्धये॥ गयोत्संदिसनवीयततः पदाव्ररेप्रत॥ सप्तुत्सार्य्यतत्तोजप्यं सर्वकामार्थसिद्धये॥ त्पलमाशागनायस्मरः शोगंक्रवकेदिमु॥ जपेदयुतसंख्यं तु सर्वकामार्थसिद्धये॥ ऐंप्रेमात्रैरुवतत्तयोजपेन्मंत्रविन्नमः॥ अयुतं वाग्यतो भूत्वा विभीसत्वपरायणः॥ स याति परमां सिद्धिं देवैरपि सुदुर्ल्लभां॥ आकर्षणं वशीकारो मारणोच्चाटनादिकं॥ स्तंभनं मोहनं चैव त्रासनं हासनं तथा॥ वाग्मित्वं च धनित्वं च बहुपुत्रत्वमेव च नजरा न च बालो वा न च मृत्युर्न वा भवं॥ नवाशीतिर्मनुष्येषु नववाकायपाटनं॥ अथवा स भवेन्नित्यं चतुर्विंशतिसिद्धिभाक्॥ स्वदेहरुधिराक्तैश्च बिल्वपत्रैः सहस्रशः॥ श्मशानेभ्यर्व्वयेद्देवीं वागीशासमतां व्रजेत्॥ राणाभ्यं परत्रेतोक्तस्वर्णां तस्पे सहस्रशः॥ श्मशानेभ्यर्च्चयेद्देवीं सर्वसिद्धिसविंदति॥ धनवान्बलवान्वाग्मी सर्वयोषित्प्रियो भवेत्॥ मुखीस्यान्नात्रसंदेहो महाकालवचो यथा

श्रि·चं
३२०

घृताक्तमालतीपुष्पैर्होमाद्रुतकपिर्भवेत् ॥ नासाध्यं विद्यते किंचिदेतन्मंत्रविदः सदा ॥ देव्या आराधने सक्तो गुरुभक्तिपरायणः ॥
वाञ्छितं लभते मंत्री नान्यथा जायते फलं ॥ ॥ फेत्कारिणीतंत्रे ॥ धूमावतीप्रयोगोयमधुना कथ्यते मया ॥ दान्ताववीशाविद्वंतो वी
जे धूमावती द्विठः ॥ धूमावती मन्त्रप्रोक्तः सर्वनिग्रहकारकः ॥ दान्तो धकारद्वयं अवीशाविद्वंतो पृथक् ऊकारसंयुक्तौ विंदुक्तौ च ॥ धूमा
वतीस्वरूपं ॥ ठद्वयं स्वाहाकारः ॥ तथा ॥ पिप्पलादो मुनिश्छंदो निचृत् ज्येष्ठा स्यद्देवता ॥ चतुर्थेन च वर्णेन विंदुनादयुतेन च ॥ षड्दीर्घ
जातियुक्तेन कुर्याद् अंगानि मंत्रवित् ॥ धां हृदयाय नमः ॥ धीं शिरसे स्वाहा इत्यादि करषडंगन्यासः ॥ तथा ॥ विवर्णा चंचला कृष्णा दी
र्घा च मलिनांबरा ॥ विमुक्तकुंतला दीर्घा विधवा विरलद्विजा ॥ काकध्वजरथारूढा विलंबितपयोधरा ॥ शूर्पहस्तातिरूक्षाक्षी धू
तहस्ता वरान्विता ॥ प्रवृद्धलोमा तु भृशं जटिला कुटिला कुटिलेक्षणा ॥ क्षुत्पिपासार्दिता नित्यं सदा कलहतत्परा ॥ एवंविधां सदा ध्या
येत् ततः कर्म समाचरेत् ॥ जपेल्लक्षचतुर्दशं पुरश्चरणसिद्धये ॥ उपवासपरो मंत्री शून्यागारे दिवानिशं ॥ अयं जपः पूर्वसेवा
र्थ लक्षजपः पुरश्चरणं ॥ श्मशाने विपिने चैव जपेल्लक्षं तु वाग्यतः ॥ सोप्पीच आईवासश्च पुरश्चरणकर्मणि ॥ होमोपि घृतेनैव
तर्पणादिकं च प्राग्वदिति ॥ आख्यापर्यंतमालिख्य तस्मिन्स्थाप्य शिवं जपेत् ॥ अवष्टभ्य शिवं शत्रुनाम ततः परं ॥ द्वितीयां तं मनो
शत्रोर्नामैव मंत्रमालिखेत् ॥ रणोद्युतजपाच्छत्रोर्निश्चितं मरणं भवेत् ॥ कृत्वा यंत्रं रिपोराख्यां मरणापेयामिनीदले ॥ उन्मादो जाय

320

राम
३२०

कुलयागाज्ञ ॥ स्नातःशुक्लांवरधरःशुचिःप्रयतमानसः ॥ दिवासर्वंप्रकर्त्तव्यंसर्वकामार्थसिद्धये ॥ शोन्योक्तंत्रौकेनपुरातः ॥ नात्रशुत्व
त्रेपिमे ॥ प्रकर्त्तव्यंप्रयत्नेनसर्वकामार्थसिद्धये ॥ द्विजानामेवसर्वेषांविधिरत्रप्रदर्शितः ॥ शूद्राणांचैवसंप्रोक्तंरात्रौदृष्टंमहामतं
महाकालंयजेद्यत्नात्पश्चाद्देवींप्रपूजयेत ॥ त्रिधाविभज्यमंत्राद्यैर्यत्नात्साधकसत्तम ॥ शक्तंलंसंकेरतिमांसक्तंपारवंयभवनः ॥ आ
ज्ञंवेतिप्रयत्नेनहोतव्यंसर्वसिद्धये ॥ एवंकृत्वाविधानेनभजतेसिद्धिमुत्तमां ॥ यद्यत्प्रार्थयतेजंतुस्तत्तत्प्राप्नोतिनित्यशः ॥ देवत्वंदानवत्व
चसिद्धचारणतांतथा ॥ सकृत्कृत्वासमाप्नोतिनित्यमेवमतंद्रितः ॥ ॥ तत्रांतरेतु ॥ पुरश्चरणाउदिष्टंदशसाहस्रकंबुधैः ॥ तथाहोमंचकुरु
त्तेभवेत्तेनपुरस्क्रिया ॥ कलौचतुर्गुणासंख्यातेनशीघ्रंफलप्रदा ॥ होममस्करक्तपुष्पेणाकरोकुर्याद्यथाविधि ॥ एतन्मंत्रीजयान्मंत्रीजु
चतेत्रसहस्रया ॥ पितृमातृवधाद्यैश्चकिमन्यैःक्षुद्रपातके ॥ कपिलारत्नसंपूर्णापृथ्वीदानस्ययत्फलं ॥ कोटिहोमसहस्रैश्चदे
व्याध्यानेनतत्फलं ॥ तथानियमसंयुक्तोलभतेसाधकः ॥ स्पृष्ट्वास्पृष्ट्वाजपेन्मंत्रंयंयंतंतंवशंनयेत् ॥ शतमष्टोत्तरंजप्त्वारक्तपुष्पे
णाहोमतः ॥ कुर्यान्नृपवशंमंत्रीनासाध्यंभुवनत्रयं ॥ शून्यागारेदेवगृहेस्वयंभूस्थानमेवच ॥ हविष्याशीब्रह्मचारिभवेदिंद्रसमो
जपात् ॥ कुंडेत्रिकोणसंज्ञंतुशांतोपुष्टौतथैवच ॥ अयुतंजुहुयान्मंत्रीसहस्रस्यत्रयपुनः ॥ कामेसहस्रमारक्तैःपुष्पैर्हुत्वादशां
शतः ॥ तर्पणंचपुनस्तद्वद्देवींध्यात्वाहुताशने ॥ संपूज्यमूलमंत्रेणविल्वपत्रैर्घृतान्वितैः ॥ सहस्रंप्रत्यहंहुत्वाप्राप्नोतिपरमांगतिं

शि॰ चं
३२१

नाममेधयोः॥आनीयशर्करामंत्री दिग्वासादक्षिणामुखः॥ श्मशानेलोष्टेनिक्षिप्यचिताग्नौभजयेत्तथा॥ वर्णांतंजपेल्लक्षंनिक्षिपेच्छत्रुवे
श्मनि॥मेनामध्येवसर्वेषालभाडुच्चाटनेभवेत्॥गर्भेपिपीलिकानुपादधूलिप्तताल्करणात्॥सघृतान्मप्रवारंतजुऊयान्मंत्रविल्लि
शि॥ भ्रमनेकाकवत्सर्वांमहीमावरणादिषु॥कृत्वाप्रतिकृतिंकृतिंशत्रोर्जन्मक्षेणमंत्रवित्॥कृत्वाप्रतिष्ठाप्राणास्यविध्यामर्मसुकंटकै
आयसैर्मंत्रमावर्त्यविध्यमारोःप्रवेशयेत्॥पूर्वोक्तशर्कराभिस्तुजस्थानितंप्रतापयेत्॥सप्तरात्रेणातस्यापिभवेदुच्चाटनंध्रुवं॥उ
रवेशल्यद्वयेलेख्योसारमेयवराहयोः॥ मंत्रेणादर्पितोसाध्योभोमवारोदयादिदं॥धत्तूररसंसयुक्तंचितांगारेमंत्रिणा॥व्याप्तस्पृष्ट
ष्टतोवस्त्राकेशपाशेननेजपेत्॥श्मशानेशत्रुमार्गेवातद्गृहेन्निखनेन्निशि॥ विद्वेषणंभवेत्तस्योगौरीशंकरयोरपि॥अश्वत्थत्व
चिमंत्रारौद्रभिर्तसाध्यमालिखेत्॥अन्यद्विषतरोस्तुकृष्णप्राडुदेस्ययाम्यसेत्॥पूर्वोक्तकंटकैर्विध्वाजपेत्तस्यशाशतंशतं॥विद्वि
ष्टोभवतस्तौतुनाम्नामपिवतत्क्षणा॥वर्णास्तान्विलिख्यभितःकोणेषुमंत्राक्षरैःसंरूद्धान्परितः॥प्रभंजनगृहमध्येवसाध्य
पृथक्ः॥ अंगारैःकनकोत्तरैरापपदेमंत्रंजपंताडयेत्कार्पासिनवनेकजाकदिवसेभूलोकविद्वेषता॥आपाद्यवपुर्वम
त्रिंशत्रोर्णालिख्यशोधयेत्॥आनयोश्चितांजघ्नावह्निरूपेविलंवयेत्॥ एवंसप्तदिनंराज्ञावोजप्यलिप्यशौर्लिखेत्॥व्याघ्रा
ग्निलग्नोमन्त्रंहिंगुसिद्धार्थसर्षपोः॥पिराउर्लवणासंभूतैस्तन्मंत्रउवसंयुतैः॥पेषयित्वानेनसम्यक्लिखेन्मंत्रीमंतंजपेत्॥व

321

राम
३२१

तेष्टात्रोमनोरथुतनापतः ॥ दग्ध्वाकाकं श्म ॥ शानभस्म नाद्यौ तद्भस्मादाय मंत्रितं ॥ विरोधिनाम्नाष्टाशाखेसप उच्चाटनं रिपोः ॥ श्मशा
नस्मनाकृत्वाशिवतस्योपरिन्यसेत् ॥ विरोधिनामसंहृष्टं कृष्णपक्षे समर्चयेत् ॥ महिषीक्षीरधूपं दद्याद्धत्तूरविषत्करं ॥ महिषी
रूपेणागत्य स्वप्ने शत्रुं नियामयेत् ॥ मंत्रेणानेन निखनेत्तद्भस्मारिपुमंदिरे ॥ शत्रुमुच्चाटयेत्क्रूरां नात्र कार्या विचारणा ॥ न्यस्य
पाणितले शत्रोराख्यां नचितिभस्मन ॥ वहूवधोमुखवक्त्रुहस्तापयेदयुतं जपेत् ॥ धूमावतीमनुं मंत्री शत्रुं परपुरं नयेत् ॥ भ
गवन्निति संभाष्य मनसा कर्म चिंतयन् ॥ निंबकाकछदानेकीकृत्वा वाष्टशतं जपेत् ॥ दद्याद्धूपं साध्यनाम्ना सद्यो विद्वेषयेद
रीन् ॥ चिताकाष्ठानले क्षीरहोमांछातिः प्रजायते ॥ रजोधूपप्रदाने न गृहरूपेण कालिका ॥ मारयत्यरिमागत्य शांतिनिर्माल्यधूपतः
वराहवालधूपेन हन्यात्मकररूपिणी ॥ अश्वत्थयंत्रधूपेन शांतिर्भवति नान्यथा ॥ शांतिः सर्वाभिचारस्य पंचगव्येन जायते ॥ क्षीरेणाथवापि दे
वेशि मधुरात्रितयेन वा ॥ कीलेश्वेउतरोर्द्दे विशत्रोर्नामससमालिखेत् ॥ विदर्भमूलमंत्रेण साध्यनामाक्षराणि वे ॥ जप्त्वा पदद्वये मंत्री खनेदु
च्चाटनं रिपोः ॥ तत्पादद्वयधूलिकीर्णाहविषादत्वारिजेभ्यो वलि तज्जधाचितिभस्मकीर्तितमरेगेहे वनतद्भवेत् ॥ वायवोविलिखेन्नरदर्शा
सहितं वाग्यत्परास्थेशिवान्यस्ते त्वपाविमाक्षवर्गराः कृत्वैव तत्रोद्धृतं ॥ उराणतस्य तु पत्रवेनिहितं जप्त्वा सहस्राक्षरं कातंपुत्रगृहे पतत्छि
रसि वा तेषां कुलोच्चाटनं ॥ जेहावासे श्मशाने निर्माल्ये यावद्गोचरे ॥ गरदभावासभूमौ वाप्रेतस्थाने वतुव्यथे ॥ डुषरेमेहनोद्भमोऽपष्पिता

शि॰ चं
३२२

मपटले प्रोक्तः ॥ ॥ फेत्कारिणीतंत्रे ॥ अथातः संप्रवक्ष्यामि महाकालीमहामनुं ॥ यस्याविज्ञानमात्रेण नासाध्यं विद्यते भुवि ॥ प्रल
याग्नीरक्तगताहूर्ध्वकेशपासन्विता ॥ नादविंदुसमायुक्ता वेवक्रोधीश्वपंडनः ॥ पष्ठं गृहाणापदतो वर्मास्त्रानलवल्लभा ॥ चतुर्दशाक्ष
री प्रोक्ता महाकाली ध्रुवादिका ॥ प्रलयाग्नी क्षकारद्वयं रक्तो रेफ ऊर्द्ध्वकेशी एकार ॥ नादविंदु प्राग्वत् ॥ तेन भें क्षें इति वीजद्वयं ॥ क्रोधी
ककारः तद्वयं स्ववामनयनेन रेफगतएकारनादिविंदुयुक्तं चैत्यवगंतव्यं ॥ वर्म हुं अस्त्र फट् अनलवल्लभा स्वाहाकारः ॥ न्यासं कृत्वा
नक्षत्रादि नात्र किंचिद्विचारणा ॥ कृतन्यासो येन संपूर्णो ह्यं भेचैवाथ कालिकां ॥ ब्राह्म्यादिभिश्च शक्तीभिर्युक्तां संपूज्य भक्तितः ॥ पंचव
क्त्रां महारौद्रीं प्रतिवक्त्रं त्रिलोचनां ॥ शक्तिशूलधनुर्वाणखेटखड्गवराभयान् ॥ दशादशभुजैर्देवीं विभ्राणां भोगिभूषितां ॥ ध्यात्वै
वं सिद्धकं साध्यं साधयेन्मासिस्थितं ॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही च तथेंद्राणी चामुण्डा चण्डी काष्टमी
पूर्वादिशानपर्यंतं कुंभं कुशास्थितादृमा ॥ कर्णिकायां तमो देवी महाकालीभयापहां ॥ नामोच्चारेण संरुध्ये रज्वा प्रज्वलितेखरे
जुहुयाद्वैरिणो हृष्टो देवीमंत्रं जपन्नथा ॥ समिधः पिहुमंदस्य विभीतवितिकाष्टकाः ॥ हरेद्विषं राजिकां च कंठजालवलान्विता ॥
गृहधूमश्मशानास्थिविभीतांगारहोमतः ॥ महाहाहेरिणां हंति कालिकामंत्रयोगतः ॥ उच्चाटमपराह्नेतु संध्यायां मारणां तथा ॥ दक्षि
णास्यां दिशि स्थित्वा ग्रामादे दक्षिणामुखः ॥ फेत्कारिणीतंत्रे ॥ ष्टध्रकर्णीयदं प्रोक्ता विरूपाक्षिपदं ततः ॥ लंबस्तनिपदं पश्चान्महोदरिप

322

राम
३२२

ल्लिमध्येखनेत्कीलंशुक्ररूपंततोपरा ॥ वह्निप्रज्वाल्यतत्काष्ठैद्रव्यगन्धैर्हुनेज्जपेत ॥ निःक्षिप्यप्रतिमांतत्रज्वरेनित्यंजपेन्मनुं ॥ सप्तरात्रं
ततःकुंडंशून्यागारेथवाकुनेत ॥ ॥ त्रिकोणंशूलदीप्ताग्रमेरकायतनान्वितं ॥ तत्रापिनिखनेत्कीलंवह्निंप्रज्वाल्यसर्ववत ॥ ततःप्र
कृतिमंत्रीवह्नेरुपरिलंवयेत ॥ उक्तद्रव्यैरासंलिप्ताउर्द्धपादमधोमुखी ॥ रक्तद्रव्यैःसमाराध्यप्रज्वाल्यविघ्नहस्तके ॥ इधंनैःप्रति
मायाश्वसमित्संजनिभांकुनेत ॥ अनिरादिभिरामृत्योर्वशंयातिनसंशयः ॥ ॥ फेत्कारिणीतंत्रे ॥ प्रासादवीजमुद्धृत्यकालीतिपदमु
द्धरेत ॥ महाकालिपदंप्रोक्ताकिणियुग्ममतःपरः ॥ अस्त्रंमग्निप्रियांतोयभद्रकालीमहामनुः ॥ प्रासादवीजंवस्पते ॥ अन्यत्पदञ्च
यंस्वरूपंयुग्ममितिद्विरुच्चरेदित्यर्थः ॥ अस्त्रंफडग्निप्रियास्वाहाकारः ॥ पदैःषड्भिःषडंगानिजातियुक्तानिकल्पयेत ॥ हौंहृन् कालि
शिरः ॥ महाकालिशिखा ॥ किणि२कवच फट्नेत्र ॥ स्वाहाअस्त्रं ॥ ध्यातव्येयसदादेवीभद्रकालीभयापहा ॥ क्षुत्क्षामाकोटराक्षीम
षिमलिनमुखीमुक्तकेशीरुदंतीनाहंतृप्तावदंतीजगदखिलमिदंग्रासमेकंकरोमि ॥ हस्ताभ्यांधारयंतीज्वलदनलशिखासन्निभं
पाशमुग्रंदंतैर्जंबूफलाभैःपरिहरतुभयंपातुमांभद्रकाली ॥ आराध्यप्रजपेन्मंत्रंनित्यमष्टोत्तरंशतंरिष्टमालाविधानव्याशनेनाष्टो
त्तरेणाव ॥ प्रयोगश्चात्रकर्त्तव्यःसामान्यपटलोदितः ॥ अशेषंकालिकातंत्रेकथितंकार्यसिद्धये ॥ कालिकातंत्रकथितंश्मशानकालि
कानथा ॥ इयंदेवीमहादेवीशत्रुनिग्रहकारिणी ॥ यथेष्टयाचिताधर्मकामार्थसिद्धिदा ॥ सामान्यपटलोदितःफेत्कारिणीतंत्रेसामा

शि॰चं
३२३

ध्यातचित्रंसुघोरंशत्रूणांसयमुद्यैः करविधृतशिलादारुणनिर्घोषघोषं ॥ भावयित्वाकरेणोत्कादक्षिणेनरियोर्उरवंगत्वादूरेराविमजेत्र
दन्तुज्ञाननास्थितः सुसहायस्थितः ॥ सुसहायस्थितस्तीर्थगच्छेत्सश्चान्नुवाग्यतः ॥ स्नात्वानश्यंछुचिर्भूत्वाकराठमौनोदकेस्थितः ॥ जपे
त्सुदर्शनंदुर्गासावित्रीञ्चसमाहितः ॥ अष्टोत्तरसहस्रंतुजपेदन्यच्छतंशतं ॥ उत्थीषवासाआछायमहायः सुरालयं ॥ गत्वातुमहतींपू
जांकृत्वादेवस्यचक्रिणा ॥ पादयुग्मंसमालेव्यवर्णालक्षंजपेद्बुधः ॥ तावज्जस्नाघटेसज्जिरभिषिंचेत्स्वकंवपुः ॥ दक्षिणांविधिवद्दत्वाशां
तिहोमंचकारयेत् ॥ यद्वादुर्गांजपेल्लक्षंसावित्रींचतथैवच ॥ कृत्वाभिषेकंताभ्यांतुशक्तितोभोजयेद्द्विजान् ॥ दक्षिणांशक्तितोदत्वा
सिद्धोभवतिसाधकः ॥ रुद्रदेवप्रयोगोयंदारुणोरणसूदनः ॥ पुरादेवासुरेयुद्धेहडेराकिलनिर्मितः ॥ तत्प्रयोगमहंवक्तुंनक्रोमित
थापिवेत् ॥ प्रयोगमंत्रतद्धश्चोविद्वेषोच्चाटनादिकं ॥ विभीतफलकेशाखोलिखेन्नामविदर्भितं ॥ मंत्रंजप्त्वासहस्रंतत्तवनेनिखनेव
नेबुधः ॥ उच्चाटनंभवेत्क्षिप्रमचलस्यापिकिंपुनः ॥ मानवानांद्विजश्रेष्ठनकर्त्तव्यमनीषिभिः ॥ तथैवकिलतस्मैवत्रिकोरोधोसुरवं
लभेत् ॥ धत्तूरवीजकर्णीनजप्त्वाचालिप्यतत्पदे ॥ रवनेडुच्चाटयेच्छत्रून्वाताहततरजोयथा ॥ फेत्कारिणीतंत्रे ॥ ॥ श्रीदेव्युवाच ॥ स
चितामेपुराशंभोमंत्रानेकविधास्त्वया ॥ इदानींश्रोतुमिच्छामिदेवीमुच्छिष्टपूर्विकां ॥ ॥ ईश्वरउवाच ॥ शृणुदेविवरारोहेदेवींतां
कथयाम्यहं ॥ ययाविज्ञातयादेविक्षयंगच्छतिचापदः ॥ स्थावरंजंगमंचैवकृत्रिमंचागजंतथा ॥ विषंजयतिदेवेशिस्वयरागंसमा

323

राम
३२३

देवदेत् ॥ उत्पादयपदं भूयस्तथैवो परिवेन्निच ॥ पदान्यतानि वीप्साथवदेद्वर्मास्त्रमेवच ॥ वह्निजायापदं चोक्ते निवीप्सादिरुद्धार्यवर्महुं ॥ अस्त्रफट् वह्निजायास्वाहाकारः ॥ तथा ॥ पिप्पलादो मुनिः प्रोक्तो निवृच्छंदउदाहृतं ॥ भद्रकाली देवताख्या त्ववांगं स्वयमेव तु ॥ स्वयमेव मूलमंत्रस्यवमूलमंत्रेणेत्यर्थः ॥ वीप्सितेनाद्यपदद्वये नहृत् ॥ तदूर्द्ध पदद्वये नशिखा वर्मास्त्राभ्यां कवचं स्वाहयास्त्रमिति ॥ तथा ॥ अतिरौद्रा महादंष्ट्रमहांशदीर्घकृशोदरी ॥ ज्वलन्नयनाभूरादीर्घघोणामहाजरा ॥ स्निग्धगंभीरनिर्घोषान्नीलजीमूतसन्निभा ॥ जुभुहुघण्टाहसंदीप्ताम हारदनभीषणा ॥ दंष्ट्रोष्ठा कोपनाद्याभीरक्तदीर्घशिरोरुहा ॥ त्रिशूलव्यग्रदोर्दण्डापिशाचस्कंधमारुह्यप्रमंतीवसुधानलं ॥ शंकरस्यमुखोत्पन्नायोगिनीयोगवल्लभा ॥ इत्थंभूता भद्रकाली मातृभिः परिवारिता ॥ ध्यात्वा सम्यक्तमाराध्य ततो मंत्रं जपेद्बुध ॥ अयुतं मंत्रसिद्ध्यर्थमानकान्यासतत्परः ॥ ततो होमादिकमपि कार्य ॥ होमस्तु घृतेनैवप्रायुक्तवचनादिति ॥ तथा ॥ धूमावत्यांच ये प्रोक्तमनयापि तदाचरेत् ॥ उक्तप्रयोगस्यान्यविधिरुच्यते ॥ मज्वायं तनुनिर्दोषमेकमूलं वनांतरात् ॥ विषवृक्षं समादाय ततो होमं समाचरेत् ॥ शून्यागारे कुंडं कृत्वा त्रिकोणकं ॥ विषवृक्षेधनेनाग्निं प्रज्वाल्य धारयेत्सुधीः ॥ ततो दशांशजपन्मंत्री विषवृक्षभस्म साधकः ॥ अष्टोत्तरशतं वह्नौ तं दशांशं निक्षिपेद्बुधः ॥ सविनीतद्विजं वीरं कृत्वा वोत्तरसाधकं ॥ दिक्षु सर्वासु संस्थाप्य स्वभयान्खड्गहस्तकान् ॥ कृतरक्षः समाराध्य वह्निं बलिदानपूर्वं ध्यायेद्देव्याः स्वरूपं प्रलयघननिभं रक्तवर्णोग्रनेत्रं शूलाग्रप्रोतसिंहं तरुणनरशिरःस्रग्धरं तीक्ष्णदंष्ट्रं ॥ उन्कायं व्यग्रहस्तं रुधिरमधुमद

नारिदोषोनवाद्धिः नाशौचोनियमोनव ॥ यस्यातिष्ठतिमंत्रोयंनसविघ्नैस्तुवाध्यते ॥ ध्यानमस्याःप्रवक्ष्यामियथावज्जगदीश्वरी ॥ श्वा
वोपरिसमासीनांरक्तांवरपरिछदां ॥ रक्तालंकारसंयुक्तांगुंजाहारविराजितां ॥ रक्तांषोडशवर्षांचपीनोन्नतघनस्तनी ॥ उछिष्टेनव
लिंगत्वाजपेन्नक्तंतमानस ॥ उछिष्टेनैवकर्त्तव्योजपास्याःसिद्धिमिछता ॥ उछिष्टजपमानस्यजायतेसर्वसिद्धयः ॥ स्थण्डिलेम
ण्डलंकृत्वाचतुरस्रंसमाहितः ॥ पूजयेन्मण्डलेदेविमूलमंत्रेणमंत्रवित् ॥ तत्रचाग्निंसमाधायवह्निरूपांव्यवस्थितां ॥ देवींध्या
त्वाचरेद्धोमंदधिसिद्धार्थतंडुलैः ॥ सहस्रैकंविधानेनराजाभवतिवश्यग ॥ मार्जारस्यतुमासेनयोदेव्यैहोममाचरेत् ॥ मप्राप्नोति
परोविद्यांशस्त्रशास्त्रवशीकर्त्ता ॥ कुर्याछागस्यमासेनहोमंमधुसमन्वितं ॥ सहस्रैकंविधानेनभवंति[illegible]नसिद्धय ॥ विद्याका
मश्चरेद्धोमंशर्कराघृतपायसैः ॥ मासान्तस्यभवन्त्येवसिद्धाविद्याश्चतुर्दशः ॥ पालावजस्त्रेस्वपारंमधुनापायसेनव ॥ होमंकृत्वा
महादेवित्रैलोक्यंवशमानयेत् ॥ नागवल्यावरेद्धोममधुनासहसर्पिषा ॥ अयुतैकंविधानेनसिद्धिरिष्टाभवेध्रुवं ॥ नजोमोद्योसे
मारसघृतेनमधुनासह ॥ चण्डालकेशयुक्तेनभवेदाकर्षणंध्रुवं ॥ शशकस्यतुमांसेनमधुनालोलितेनव ॥ कृत्वाहोममवाप्नो
तिविद्यावित्तवरास्त्रियः ॥ धत्तूरार्कस्यहोमेनविनावह्नौमंत्रवित् ॥ कोकिलाकाकपक्षैश्चहोमाछत्रून्विनाशयेत् ॥ उच्चाटनायशत्रू
णांहोमंकुर्याच्चमंत्रवित् ॥ पूर्वोक्तेनविधानेनचिताकाष्ठहुताशनं ॥ उलूककाकपक्षाभ्यांकृत्वाहोमंनिरंतरं ॥ शत्रून्विद्वेषयेदिष्टा

भितं ॥ इयं विद्या परा विद्या सर्वपापहारिणी ॥ स्वर्गदा मोक्षदा चैव सौख्यफलप्रदा ॥ इयं देवी मया पूर्वं साधिता विघ्ननिर्जये ॥ सकृदु
च्चरिता विद्या ब्रह्महत्याविशोधिनी ॥ सर्वपापापहं त्रीयं वश्यसौभाग्यदायिनी ॥ य उच्छिष्टमुखो भूत्वा स्मरेद्देवीं कदाचन ॥ तदा चातो
देवि विनैवाचमने कृते ॥ दुर्भगा सुभगा नूनं दुःखिता सुखिता भवेत् ॥ वंध्यापि लभते पुत्रं शतहायनजीवितं ॥ निर्धनो धनमाप्नोति स
र्वविद्या अवाप्नुयात् ॥ यां यां प्रार्थयते सिद्धिं हृद्गतां तामवाप्नुयात् ॥ ॥ श्रीदेव्युवाच ॥ को विधिः किं फलं वास्या मपि विद्यास्वरूपत
कथ्यतां देवदेवेन रहस्यं न निवेदितं ॥ ॥ ईश्वर उवाच ॥ विधानं ते प्रवक्ष्यामि शृणु देवि मनोरमे ॥ भोजनानंतरं देवि विनैवाचम
नेकृते ॥ बलिं कृत्वा प्रथमतो मूलमंत्रेण साधकः ॥ ततो मंत्रं जपेध्यात्वा देवीं तामिष्टसिद्धये ॥ मंत्रं शृणु महादेवीं तामिष्टसिद्धये
मंत्रं शृणु महादेवि यथावत्कथयामि ते ॥ दयाउच्छिष्टशब्दं तु तथा चण्डालिनीति च ॥ सुमुखीति ततो देवी कीर्तयेत्तदनंतरं ॥ म
हापिशाचिनीत्यस्मात्लज्जाबीजमतः परं ॥ नादबिंदुसमायुक्तं ठकारत्रितयं ततः ॥ सविसर्गं महादेवि सर्वसिद्धिप्रदायकं ॥ अत्रापि
पदे चकारोऽत्र स्वस्वसारसंग्रहे लघुमातंगीमंत्रोद्धारे तथैवोद्धृतत्वात् ॥ केचित्तु चंडालिन्यादिपदत्रयं सदीर्घमिकारवदंत्ति न
न तत्तु संगृह्यतमेव ॥ अत एव सारसंग्रहे शाक्तोक्तमंत्रे चण्डालिपदादीनां संगृह्यं तदर्शनादेतन्मंत्रयोः स्वल्परूपत्वादत्रापि तथैव
ति निर्णीतोऽस्माभिरिति ॥ लज्जाबीजं भुवनेश्वरीबीजं ॥ ठकारत्रितयमिति ठः ठः ठः इति ॥ तथा ॥ न तिथिर्न च नक्षत्रं न चांगन्यासमंत्रच

देत्॥ भुवनभयंकरि त्रिवर्मांत मुच्चरेन्मनुं॥ रुद्रजा मायाबीजं॥ महायोगिनीस्वरूपं॰ गौरिस्वरूपं॥ भुवनभयकरिस्वरूपं वर्म ॐकार॥ तथा॥ अंगिराश्च ऋषिर्देवी गायत्री छंद ईरितं॥ सिंहवक्त्रा च भूतानां भयकारिणि ततः परं॥ महाकृत्यादेवताचें मुक्त्वान्यासान्समावरेत्॥ षड्दीर्घयुक्तबीजेन मंत्रार्धेनास्त्रयोगिना॥ हृदयं वततोर्द्धेन मंत्रार्द्धेन शिरः क्रमात्॥ शिखाकवचनेत्रास्त्रमेव न्यासक्रमस्ततः॥ सिंहासनारूढमुखी लंबमानपयोधरां॥ दंष्ट्राकरालवदनां त्रिनेत्रां सर्वतोज्ज्वलां॥ कृष्णकंचुकसंवीतां विमाग्निसमप्रभां॥ त्रिशूलचवक्रचषकखद्वांगकरपंकजां॥ लेलिहानमहाजिह्वां विद्युन्नेत्रेक्षणा भीषणां॥ ध्यात्वा कृत्यां विधानेन पूजयेन्मंत्रवित्तमः॥ ध्यात्वा कृत्वामर्चयीत रक्तैः पुष्पैश्च वश्यके॥ कृष्णां मारणकृत्येषु तथाज्ञा वै समस्तरसमाकृष्णदा मोदनां सर्वकृत्यागन्यादिनीतथा॥ भाषिणी श्रीमती चैव प्रतिष्ठा च ततः परं॥ विद्यामभ्यर्चयेद्दृष्टपत्रेषु क्रमशः सुधीः॥ पूर्वे तु शंकरी नाम शुभ्रवर्णाविराजिता॥ द्विभुजां सौम्यवदनां पाशांकुशधराशिवां॥ दक्षिणे भारिकां नाम लंबजिह्वामधोमुखी॥ कृष्णवर्णा रक्तकेशा रक्तमाल्यानुलेपनां॥ चतुर्भुजां सिंहनादज्वलत्शूलकपालिनी॥ खड्गहस्ता शिरोमालां सर्वाभरणभूषितां॥ पश्चिमे वारुणी नाम स्वर्णवर्णा हंमुखीं॥ शुभ्रवर्णा मालिकां शुभ्रदंष्ट्रामभयदा सदा॥ उत्तरे भाषिका नाम चतुर्वक्त्रा भयंकरी॥ पूजयित्वा जपेन्मंत्रं नित्यमष्टोत्तरशतं॥

अथ प्रयोग॥ तत्र प्रातः कृत्यादियोगपीठन्यासांते मूलमंत्रेणायामंत्रयं कृत्वा शिरसि अंगिरसे ऋषये नमः॥ मुखे देवीगायत्रीछंदसे

वन्योन्यं कलहाकुले ॥ उलूकपक्षहोमेन गर्भपातो भवेत्स्त्रिया ॥ सहस्रैकं विधानेन कुर्याद्धोमं समाहितः ॥ विल्वपत्रैः समध्वाज्यैर्मास
मेकनिरंतरं ॥ वंध्यापि लभते पुत्रं चिरंजीविनमुत्तमं ॥ वंधूककुसुमं हुत्वा रक्तं मधुसमन्वितं ॥ दुर्भगाया महादेवि सोभाग्यसुख
दायकं ॥ प्रातरुत्थाय यः कश्चित्कुर्याद्धोमं दिने दिने ॥ जपापुष्पै राज्ययुतै रष्टोत्तरशतं प्रिये ॥ षण्मासस्य प्रयोगेन भवेदाकर्षणं
ध्रुवं ॥ देवगंधर्वकन्याश्च कन्या नागांगनाजनाः ॥ हठादागत्य कामार्त्ता वलादालिंगयंति तं ॥ विद्यायै क्रियते होमस्तिलैः पायस
मिश्रितैः ॥ स प्राप्नोति महाविद्यां शास्त्रौघपदशालिनी ॥ मधुना रुद्रमांसेन होमं कुर्यात्प्रयत्नतः ॥ विद्यावान् धनवान् द्विश
ष्टशास्त्रवशीकृतः ॥ वीविहायं देदे मद्दारलमापुचापुवा ॥ नवाप्योक्षिगेराणारदनीन्क्ष्फभयिवेलन ॥ भोजनानंतरं वास्यांव
लिं कृत्वा दिने दिने ॥ उच्छिष्टेन जपेन्मंत्रं शतमष्टोत्तरं प्रिये ॥ उज्जटे वा श्मशाने वा शून्यागारे चतुष्पथ ॥ वलिप्रदानतो देवी प्रत्य
क्षा भवति ध्रुवं ॥ एषा देवी मया जप्ता भैरवाकारमिष्टुता ॥ इत्येषा कथिता देवी सर्वपापविवर्जितः ॥ उच्छिष्टरूपरां हित्वा सर्वेप
विघ्नो भवेद्ध्रुवं ॥ इत्युच्छिष्टचाण्डाली देवी भुवनेविश्रुता ॥ गोप्तव्येयं प्रयत्नेन कथनीया न कस्यचित् ॥ गुरुभक्तिश्च कर्त्तव्या कायेन
च धनेन च ॥ नोकायकदानवदेवि पापं नैवापरातिष्ठति मर्त्यलोके ॥ मोक्षैकसाराधनदैकरा विद्यैकसारा भुवि सिद्धविद्या ॥॥॥ फेत्का
रिणीतंत्रे ॥ अथातः संप्रवक्ष्यामि मंत्रं परिमलात्मकं ॥ येन विज्ञानमात्रेण नानासाध्यं भुवनत्रये ॥ हृड्जायामहायोगिन्यतो गौरि यदेव

दी॰ चं
३२६

ड्डिपुं वज्रमूलमितिध्यात्वाङ्गिलस्योपरिनिक्षिपेत्॥ नवरात्रांतरे शत्रुर्म्रियते नात्र संशयः॥ हरिमिद्धेचिता वह्नौ तैलसिक्तैर्विभीतकै॥ जुहुतो म्रियते शत्रुः सत्यमोशानसोदितां॥ रिपोः प्रतिकृति कृत्वा साध्यर्क्ष मूलके मले॥ अर्कक्षीरेणामरिचं पिष्ट्वा तच्चैव लेपयेत्॥ फट्कारं हृदये सिंहमुद्रया॥ षण्मासान्म्रियते शत्रुः संध्ययोरुभयोरपि॥ वायासमुद्धृतं पत्रं श्रेष्ठं वैश्रांतकं ततः॥ गृहीत्वा विलिखेन्मंत्री कृष्णसर्पस्य शोणितैः॥ नामधेयं रिपोरंते वायुबीजं नियोजयेत्॥ निखनेत्तस्य गेहे तु काकवद्भ्रमते ध्रुवं॥ वातोद्धूतैः शुष्कपत्रैः काष्ठैरशनिपातितैः डुश्मास्थिनाशंगारैः शत्रोरुच्चाटनं भवेत्॥ दूर्वागुडूचीं गव्येन सर्पिषा तिलतण्डुलैः॥ अन्नैः समिद्भिः पालाशैः शांतिकुर्याद्विचक्षणाः लक्ष्मी बिल्वफलैः पत्रैर्नंद्यावर्तैः श्रिये तथा॥ रक्तपुष्पैरपामार्गैरंगारैश्च शुभद्रके॥ मधुरत्रयसंमिश्रैरेभिः कुर्यात्तु वश्यकं॥ उक्तमोशानसे तंत्रे वनस्यापि कथ्यते॥ शांतिं कृत्वा विधानेन जपेत्परिमलं त्विदं॥ महाव्याधिप्रशमनं नित्यमष्टाधिकं शतं॥ जपेदेकाग्रचित्तस्तु लोके वश्यकरं परं॥ मनसा चिंतयेत्कृत्यागजारूढां विचड्मां॥ तस्या वश्या भवेत्क्षिप्रमश्वारूढां तथा भवेत्॥ चौरव्याघ्रमृगादीनां सलिलादिभयापहं॥ सकृच्छ्रवणमात्रेण सर्वपापविनाशनं॥ सप्ताभिमंत्रितं तोयं पीत्वा मंत्रं समाहितः॥ मेधावी च भवेद्वाग्मी वज्रस्याभिषेकतः॥ सप्ताभिमंत्रितं कृत्वा विषमप्यमृतं भवेत्॥ रक्षमासं द्विमासं वा षण्मासं वत्सरं तु वा॥ एवं यः कुरुते मर्त्यः सपुराणां गतिमाप्नुयात्॥ अथ वक्ष्ये विशेषेणाशमाशांतिविधिक्रमं॥ सर्वसिद्धिकरं पुण्यं सर्वपापविनाशनं॥ योगिनीभू

328

राम
३२६

नमः हृदयमहाकृत्यायै देवतायै नमः इति विन्यस्य ममाभीष्टसिद्धय विनियोगानि फट् हृदयाय नमः॥ ह्रीं ह्रीं भुवनभयंकरी ॐ फट्
शिरसे स्वाहा॥ क्रूं द्रीं महायोगिनि गोरि फट् शिखायै वषट्॥ ह्रुं ह्रीं भुवनभयंकरी हुं फट् कवचाय हुं क्रुं ह्रीं महायोगिनी गोरि फट् नेत्रा
यवौषट् क्रः द्रीं भुवनभयंकरी ॐ फट् अस्त्राय फट्॥ इति षडंगमंत्रैः करषडंगन्यासं कृत्वा ध्यानात्मपूजां ते भुवनेशी पीठं संपूज्यत
त्रावाह्यांगपूजां तत्प्रान्तविधाय देव्याः पुरोभागे ॐ शाकंर्यै नमः॥ दक्षिणे भागे कायै नमः पश्चिमे वारुण्यै नमः॥ उत्तरे भाषिकायै
नमः॥ इति संपूज्य अष्टदले पुरो देव्यग्रमारभ्यः ॐ कृत्यायै नमः॥ स्थंभनायै नमः सर्वकृत्यायै नमः॥ भीषण्यै नमः॥ ग्रीमत्यै नमः प्रति
ष्ठायै नमः विद्यायै॥ इति संपूज्य लोकपालार्चादिकं कुर्वन्कुर्यादिति॥ तथा॥ अथास्या विनियोगस्तु कर्तव्यो मंत्रिणा सदा॥ काला
विदित्वा प्रतिमान धूम्ममधोमुखीं॥ तस्यांधो मेखलां कुर्यात्रिकोणां वह्निकुण्डकं॥ वेडंगोरं विधायाग्निं परिस्तीर्य शरैस्तृणैः॥ विभी
तकपरिध्यावकल्पयेद्यस्य मारणं॥ जुहुयान्निवतैलाक्तैः काकोलूकैश्च पिच्छकैः॥ दारयेन शोषयेनं मारयेत्त्वभिधार्याग्निं परिस्ती
र्य शरैस्तृणैः च अष्टोत्तरशतेनैवमनया जुहुयाद्बुधः॥ होमांते विधिवत्कृत्वा माराध्याग्रे श्वसन्निधौ॥ यामेकरछ्यहोरात्रिहरस्थो
वोतिकेपिच॥ विवज्रयममस्तस्यत्वेवम्भक्ता निवेदयेत्॥ संख्याग्निं विधानेन नवरात्रं समापयेत्॥ नूनंसिद्धिनितेनांशस्तावदस्यरि
पोमृतिः॥ अर्कक्षीरे रामरिचपिष्टपक्षि स्वार्थः मेवच॥ जलेसंलोड्य मंत्रेणारिं संध्यात्वा निरुद्धकृत॥ कृत्स्नां वरोत्तरीयोग्रः पादेनाक्रम्यत

श्री॰च
३२७

दारिद्र्यसंहंत्री यक्षिणी पापखण्डिनी ॥ तेनतांतुसमादाय माराधिता सुरेश्वरि ॥ तस्मान्निधिवराणांतु नायकोतिष्ठितो भवेत् ॥ निर्धनेन
महीयेनविद्यासा त्वल्लणोत्सुखान् ॥ श्रुत्वाकुवेरवक्रेणा सोभवत्परमेश्वरं ॥ तच्छ्रुत्वा गिरिजा देवी पुनः प्राह शंकरं ॥ कृपातेविद्यतेचि
त्ते तदा त्वं मां प्रवोधय ॥ श्रुत्वा पुनश्च पार्वत्या वाक्यमेवं प्रहस्य च ॥ शंभुः प्राह न जानासि भवत्या मूर्तिरेव सा ॥ यां स्मृत्वा याति रंकोपि
भूपालत्वं न संशयः ॥ विद्याधरत्वमाप्नोति किं पुनर्वक्तुभाषितैः ॥ याति लक्षेश्वरत्वं च तज्ज्ञो देवि सर्वथा ॥ नद्विद्याधारको लोके यस्मि
न्नेकेपि भाषते ॥ भवत्त्वं विन्नवानेवं सोपि लक्षेश्वरो भवेत् ॥ वर्षेणापि हि यो मंत्रं स्मरे ॥ हऊधनेश्वरः नोपसर्पति दारिद्र्यतार्क्ष्य भोगि
ऊलेय ॥ अस्य मंत्रस्य चोद्धारं प्रवक्ष्ये शृणु पार्वति ॥ यस्यैव ज्ञानमात्रेण महादारिद्र्यनाशनं ॥ भगुरीयं विडुयुतं लज्जावीजमनंतरं
लक्ष्मीवीजं ततः प्रोक्ता संवोध्य च रतिप्रियां ॥ वह्निजायावधिः प्रोक्तो मंत्रराजोत्तमोत्तमः ॥ भगुरीयः रेफः ॥ लज्जावीजं संवोध्य र
तिप्रिये इति वदेत् ॥ वह्निजाया स्वाहाकारः ॥ नागकरांगन्यासो नच्छंदो नास्य देवता ॥ ध्यानमस्याः प्रवक्ष्यामि शृणु त्वं शैलसंभवे
हेमप्राकारमध्ये सुरविटपितटे हेमपीठाधिरूढा यक्षी वाला विसर्जत्परिमलवहलोज्जासिधम्मिल्लभारा ॥ पीनोत्तुंगस्तनाढ्याकुव
लयनयनारक्तवर्णा कराभ्यां भ्राम्यरक्तोत्पलासा नवरविवसनारक्तभूषांगरागा ॥ इति ध्यानं विधानवच्चंदनेनानुलेपितो पीनोत्तुंग
ल्लनो· ताम्रपात्रे विधानवत्मंडसुमनोहरं ॥ तत्पूजाप्रकर्तव्या देव्यास्ववमनीषिणा ॥ कुवेरस्य मतेनास्याः पूजे वक्रियते सदा ॥ अथास्य प्र

327

राम
३२७

नवेतालाः प्रेतकूष्मांडपन्नगा । तत्र स्थाने न तिष्ठन्ति डाकिन्याद्या विशेषतः ॥ कृत्वामभ्यर्चयेद्वत्से यथाविधिपुरःसरं ॥ षोडशारं लिखे
त्यग्रं योनिकूणं सविंदुकं ॥ तन्मध्येष्टदलं लिख्य यकारादिन्यसेत्क्रमात् ॥ तन्मध्ये रसकोणांतु लिखेन्मूलमनुं स्मरन् ॥ चंद्रविंवं लिखे
न्मध्ये तस्योर्द्धप्रनमालिखेत् ॥ तस्य मध्ये न्यसेत्कुंभं वस्त्रस्त्रग्रत्नभूषितं ॥ कुंभमध्ये न्यसेल्लक्ष्मीं त्वां सर्वलक्षणासंयुतां ॥ अर्च्चयेच्च यथा
न्यायं पायसंतु निवेदयेत् ॥ परितोष्टघटान्न्यस्येदसितांगादिभैरवान् ॥ गंधपुष्पादिनाभ्यर्च्य तद्वाह्ये क्षेत्रपालकान् ॥ लोकेशांतं य
जेद्देवीं तदग्रे होममाचरेत् ॥ जुहुयादाज्यसंसिक्तायामार्गातित्रसर्षपान् ॥ दूर्वाश्चस्वदिराश्वत्थैः प्रत्यकंतुशताष्टकं ॥ कुंडे वास्थंडि
ले वापि होमकर्म समचरेत् ॥ तस्य दक्षिणपार्श्वे तु लक्ष्मीं ध्यायेद्यथाविधि ॥ कुंभमध्ये न्यसेद्देवीं दक्षिणे तु श्रियं स्मरेत् ॥ वामपार्श्वे
यजेद्देवीं हृद्वस्थां परमेश्वरीं ॥ तस्यैव वामपार्श्वे तु पूजयेद्गणनायके ॥ अयुतं मूलमंत्रं तु जपेन्मन्त्रविनाशन ॥ नियुतं भ्रूणहत्यां
तु जपेत्परिमलं विदु ॥ महाव्याधिप्रशमनं तावज्जप्ताभिषेकतः ॥ एवं यः कुरुते मर्त्यः सपरापागतिमाप्नुयात् ॥ येन ज्ञानं परिम
लं यस्य वक्त्रे स्थितं सदा ॥ तस्यासाध्यं सविघ्नं ते व्याध्यरित्योभयं नहि ॥ इत्यादि राखुले तन्त्रे ख्यातः परिमलो मनुः ॥ महाशान्तिकरः पुं
सां दुःखदारिद्र्यनाशनः ॥ करंकिनी तंत्रे ॥ प्रणम्य शिरसा गौरी वभाषे सर्ववित्प्रभो ॥ येन कल्पेन दारिद्र्यं विनश्यति च तद्वद ॥ श्रु
त्वा गौरीवचः शंभुः स्मितचारुशुभाननः ॥ शृणु त्वं देवदेवेशि दारिद्र्यस्य विनाशनं ॥ पुरा विश्वसृजा प्रोक्ता कुवेराय महात्मने ॥ विद्या

श्रि·वं
३२८

सुगोपनीयंसदाबुधै॥अज्ञानतिमिराधानंज्ञानदृष्टिप्रदायकं॥वागैश्वर्यप्रदंसर्वपापविध्वंसकारकं॥अपमृत्युहरंपुंसांरोगदारिद्र
नाशन॥क्षुद्रग्रहहरंश्वेदनाशनंश्रीजयप्रदं॥दुर्गकांतारमार्गादौभयनाशकरंपरं॥नदीनदसमुद्रादौतरिध्वंसिषुतारणं॥नराश्वर
थगोहस्तिपुत्रमित्रकलत्रदं॥क्षेत्रग्रामप्रदंवीर्यशौर्यधैर्यप्रभाकर॥स्मृतिकांतिकवित्वादिकरंसौभाग्यदायकं॥ब्रह्माण्डकोटिसौ
भिसिद्ध्यष्टकगुणप्रदं॥बहुनाकिमिहोक्तेनसर्वदंनात्रसंशय॥तेष्वष्टाक्षरोमंत्रोयथावदभिधीयते॥पापौघनाशनःश्रीदोभु
क्तिमुक्तिप्रदायकः॥ध्रुवोदीर्घाविषःसयोदीर्घावाननष्टन्नयुक॥अग्न्यंतोसमीरश्चसदीर्घस्ताद्दिरीरयुक्॥अष्टाक्षरोमनुः
प्रोक्तोनारायणासमाह्वयः॥ध्रुवःप्रणवःदीर्घानकारःविषःमकारःसयउँकारः॥नाम्नांराइति॥समीरःपकारःसदीर्घस्तादि
कारयुक्तोणाकारस्तेनणाइति॥इश्वरोपकारः मंत्रनिरुक्तिश्चतत्रैव॥प्रणवःपरमात्माणाकवावकोवश्यतेननतः॥नकारश्चनि
षधार्थोयमर्थमोयदंततः॥नाजलंराबह्निरुक्तोयोवायुर्णोधरामता॥अत्यंश्चतुर्थ्यर्थस्यादेवंव्याख्यानमीरितं॥तथा॥गदितो
मुनिरस्याराणः साध्यनारायणाह्वयः॥प्रोक्तछंदस्तदेव्यार्यगायत्रंदेवतामतो॥परमात्मासमुद्दिष्टःपंचांगानिततोन्यसेत॥क्रुद्धो
ल्कश्चामहोल्कश्चवीरोल्कोधूल्कसंज्ञकः॥सहस्रोल्कस्ततुर्थ्यंतैरभिरंगुलिषुन्यसेत॥चतुर्थ्यंते॥चतुर्थ्यंतेःस्वाहांतैश्चक्रुद्धोल्कादिप
दैवह्निजायातेजातिसंयुतैरितित्रैलोक्यसंमोहनतंत्रवचनात॥एषांविनक्तियुक्तानांभवेदंतेग्निवल्लभेतिमंत्रतंत्रप्रकाशवचना

328

राम
३२९

प्रयोगः ॥ तत्र प्राग्वन्मातृकान्यासांतं कृत्वा मूलमंत्रेण प्राणानायम्य देवीं ध्यात्वा मानसपूजां विधाय शङ्खस्थापनादि स्थापनीयात्मपूजांते चं
दनोपलिप्तेन ताम्रादिपात्रे वज्रं रक्तवेष्टितं वृत्तमंडले कृत्वा ॥ तत्र देवीमावाहणावाहनादिपरमीकरणांतं तन्मुद्रया विधायामनादिषो
डशोपचारैः संपूज्य दुग्धदधिखण्डपायसशर्करानैवेद्यं तांबूलं समर्प्य मूलमंत्रं यथाशक्ति जपित्वा देव्या हस्ते समर्प्य प्रदक्षिणानमस्का
रैः परितोष्य विसृजेत् ॥ तथा ॥ सहस्रसप्ततिस्तावत्पुरश्चरणमिष्यते ॥ तथा घृतेन खंडेन मधुना च दशांशकं ॥ होमोपि च विधातव्यो
ऽमुना दारिद्र्यमुक्तये ॥ रात्रौ च जप्यते चाष्टसहस्रं सप्तवासरान् ॥ अर्के वाप्यथवा भौमे पायसान्नं प्रदापयेत् ॥ एतेनापि च सिद्धिः स्या
त्पुरश्चर्याधिका भवेत् ॥ बहु किं कथ्यते विनिशायां जप्यते सदात्रातं वा दशकृतो वा सकृद्ददात्येव सदैव तद्विधाय च ॥ अष्टशतमष्टो
त्तरशतमित्यर्थः ॥ तद्विधाय तादृशाय दरिद्रायेति यावत् ॥ यद्ययं जप्यते मंत्रः श्वेतपुष्पैश्च पूजयेत् ॥ दरिद्राय स्वयं दत्तं गृहमानी
य हेम च ॥ येनासौ जप्यते मंत्रः सदा भक्तिपरः सरं ॥ तस्य पुत्रश्च पौत्रश्च प्रपौत्रश्चापि नत्तुनः ॥ दारिद्र्याभिभवं यान्ति न कदाचिन्न
संशयः ॥ स्वयं प्राहेति सा यक्षी यो मां स्मरति नित्यशः ॥ तस्य दारिद्र्यशमनं दासीव करवाण्यहं ॥ इति धनप्रदायक्षिणीविधिः ॥ मुंद
राचार्यशिष्येण श्रीनिवासेन धीमता ॥ चंडिकायां प्रणीतायां मेकत्रिंशः प्रकाशः ॥ ॥ अथ वैष्णवमंत्रा उच्यन्ते ॥ श्रीसारसंग्रहे ॥ अथ वै
ष्णवमंत्राणां विधानमभिधीयते ॥ त्रिषु लोकेषु विख्यातं मुनिपुंगवसेवितं ॥ धर्मार्थकाममोक्षाणां निदानं सर्वसंमतं ॥ षट्कर्मकरणांश्च

शीर्षाननायनद्वयकर्णद्वयनासिकापुटेषुन्य ॥ बाहुद्वयपादद्वयसंधिचित्रितयशारमितांगुलिषु ॥ हृदिसप्रधानुपायुषुककुद्गास्यहृदुद
रसोरुजंघासुपदयोश्च तथा ॥ योगराजसो वैविधिष्व न्यसेत् ॥ चक्रात्वः शंखसगदापद्मस्थानेषु विन्यसेद्वर्णान् ॥ तत्त्वमुद्रापूर्वकमुक्ता
स्ववदशान्यासाः व्योमादिः ॥ ॥ प्रपंचसारे ॥ विन्यस्तैर्यैर्भवेन्मंत्री मंत्रवर्णात्मको हरिः ॥ पद्मपादाचार्याः ॥ मंत्री मंत्रवर्णैरितरेन न्यासेन मंत्र
वर्णानां प्रणवपुटितत्वं प्रतिपर्यायं व्यापकंन्यासश्चोक्त इति ॥ मंत्रतंत्रप्रकाशे वा ॥ विन्यसेद्वर्णमेकैकं बिंदुतंकुववेष्टितमिति ॥ अंगुलीनि
यमश्च तत्रैव ॥ तत्रांगुलीभिर्न्यासस्याच्छिरस्येकैवमध्यमा ॥ तर्जनीमध्यमाभ्यां तु चक्षुषोर्न्यासइष्यते ॥ अंगुष्ठानामिकाभ्यां तु मुखे न्यासः प्र
कीर्तितः ॥ हृदये ज्ञानमुद्रास्यादंगुष्ठश्च कनिष्ठिका ॥ नाभौ प्रकर्तिता गुह्ये अनंगुष्ठाः प्रकीर्तिता ॥ सर्वनाभौ च पादे च पंचापि परिकी
र्तिता इति ॥ तथाक्षितिसलिलानलपवनव्योमाहंकृतिमहत्प्रकृत्याख्यैः ॥ पुंक्रमगदितैरेतैः क्रमगतमेतारासंयुतैर्मंत्री च
रणांडहृदयवक्त्रकंठहृदयव्यापके च विन्यसेत् ॥ संहारोयगदितो विपरीतास्सृष्टिरस्याभिर्दृष्टा ॥ ॥ सारसंग्रहे ॥ बिंदुनादश
क्तिशांतिरूपपंचतुष्टयं ॥ न्यसेत्सर्वतनौ मंत्री देवताभावसिद्धये ॥ द्वादशाक्षरमंत्राया अक्लीं वस्वरबीजका ॥ केशवाद्याधात
पूर्वस्तूर्यस्यस्यानमोतिकाः ॥ सारसंग्रहे ॥ मूर्तिपंजरनामानं कुर्यान्न्यासांतरं शुभ ॥ ग्रहक्ष्वेदहरं श्रीदं यशःपुष्टिसुखावहं ॥ अ
ष्टवर्णास्यास्यमनोः प्रणवाद्यार्कवर्णकः ॥ स्मरणीयो मनुःसस्यान्मंत्रशास्त्रविशारदैः ॥ अष्टप्रकृतिरूपोयमष्टवर्णो मनुर्मतः ॥

329

राम
३२९

त्त्व॥ ॥नारायणीये॥ कनिष्ठादिनदंतानां मंगुलीनां च॥ ऊर्ध्वमुज्येष्ठाग्रेणाक्रमान्त्रोक्तरुद्धाणपक्षरान्न्यसेत्॥ ॥प्रपंचसारे॥ अष्टाक्षरेणान्यस्तेनकुर्यादष्टांगकः सुधीः॥ ममृद्धिरःशिखावर्मनेत्रास्त्रोदपृष्ठके॥ ॥तथासारसंग्रहे॥ मंत्राणीनगवकेषुजठरेपृष्ठकेतनदिग्वंधमस्त्रमंत्रेणाविदध्यान्मंत्रविन्नमः॥ ॐहृदयायनमइत्यादिउदरेणानमः पृष्ठेयनमइतिप्रयोग॥ केचित्तुणांउदरायनमः॥ यं पृष्ठायनमः॥ इतिन्यासंवदंति॥ तन्नेष्टानानामधिकरणात्वान्नेषुवर्णानामेवन्यासः॥ अन्यथा अंशिरसेनमः॥ इत्यादिन्यासान्ने॥ अतएवसारदातिलकेपि॥ भूयोवर्णौमनोःषड्भिःषडंगानिसमाचरेत्॥ अवशिष्टौपुनर्वर्णौविन्यसेत्कुक्षिपृष्ठयोरित्यधिकरणात्वनैवोक्तमितितथा॥ नहिसर्वेषामपिवर्णानां नमोतेनैवन्यासोक्तनतुषडंगवक्रमेनेतिचेतनउक्तशारदादिवचनेननिर्णीतत्वात्॥ वचनात्प्रवृत्तिरितिन्यायाच्च॥ अष्टाक्षरेणाविंउयुक्तेनइशानशिरः॥ अनस्याहृदयंतारःशिरोणार्णःशिखाचमाः॥ नावर्णाःकवचंशस्त्रंरावर्णौनयनंपरं॥ उदरंपृष्ठंमन्योचवर्णाविंउसमायुताः॥ इति॥ ॥प्रपंचसारे॥ अस्त्रमंत्रेणावध्नाशोमंत्रवर्णास्तनौन्यसेत्॥ अस्त्रंववकं॥ वह्नदिक्कंमंत्रेणोतिशारदातिलकात्॥ चक्रमंत्रोवक्ष्यते॥ दिग्बंधानंतरंहयशीर्षपंचरात्रे॥ मूर्द्धाक्षिमुखहृन्नाभिगुह्यजानुपदेषुच॥ सृष्टिन्यासोयमुद्दिष्टःसंहारश्चरणादिकः॥ मूर्द्धांतंस्थितिरणुक्ककारादिदयांतिकः॥ सारसंग्रहे॥ स्थानेषुवक्ष्यमाणेषुमनोवर्णान्न्यसेत्सुधीः॥ विन्यस्तमात्रैर्यैर्देहेभवन्नारायणःस्वयं॥ आधारहृदयायनमः॥ भुजपदमूलकानाभिषुप्रथमः॥ गलनाभिहृत्कुववयपार्श्वदयपृष्ठकेषपरः

त्रतंत्रप्रकाशे च ॥ अष्टाक्षरेण समहितं विन्यसेद्द्वादशाक्षरमिति ॥ न्यासप्रकारमाह ॐ संभवः ॥ प्रणवश्च स्वरस्तद्वद्वासुदेवाक्षरस्ततः
श्रीराममंत्र वर्णाश्च ततः स्युकेशवादयः ॥ धात्रादयो नमोन्ताश्च स्तव्यान्यासयोगतः ॥ इति ॥ श्रीराममंत्रवर्णा इति तत्प्रकरणे ॥ प्र
पंचसारे ॥ पुनस्तत्राप्ति यत्पर्थं किरीटादिमनुं जपेत् ॥ किरीटकेयूरहाररपदावपदान्याभाष्य मंत्रवित् ॥ मकरांते कुंडले च शंख
चक्रगदादिकं ॥ अब्जहस्तपदं प्रोक्त्वा पीताम्बरधरेति च ॥ श्रीवत्सांकितमाभाष्य वक्षस्थलमथो वदेत् ॥ श्रीभूमिसंहितं स्वात्म
तज्ज्योतिर्द्वयपदं वदेत् ॥ दीप्रिमुक्त्वाकरायेति सहस्रादित्यतेजसे ॥ हृदंतः प्रणवादिः स्यात्किरीटादिमनुस्त्वयं ॥ जपेत्सर्वदे
हस्यशान्निति ॥ ततः किरीटमंत्रेण सर्वांगव्यापकं न्यसेदिति संकर्षणवचनात् ॥ मंत्रे सर्वाणि पदानि संबुध्यंतानि ज्ञेयानि
मंत्रविदित्यनेन मकरांते कुंडलमित्यलंकृतपदाध्याहारः सूचित इति पद्मपादाचार्या ॥ ॥ मंत्रतंत्रप्रकाशेपि ॥ तारः कि
रीटकेयूरहारांते मकरं पदं ॥ कुंडलालंकृतेभ्यंते शंखचक्रगदापदमिति ॥ सारसंग्रहे ॥ अतः परं प्रवक्ष्यामि तत्त्वन्यासमनुत्तमं
यतत्त्वन्यासमनुत्तमं ॥ यत्त्वन्यासमात्रेण तत्त्वात्मा संप्रजायते ॥ कवांत्यमादिकान्वर्णान्कोन्नारूढ्वा हृदंतिकान् ॥ परायेतिपदं
तत्त्वान्मां ते तत्त्वशब्दतः ॥ आत्मनेन समायुक्तांस्तत्त्वमंत्रान्समुद्धरेत् ॥ जीवं प्राणं तत सर्वं ततोन्यस्य बुद्धिं ततः परं ॥ अहंकारमनश्चै
वहृद्योतानि प्रविन्यसेत् ॥ मस्तकानन हृद्गुह्यपाददेशेष्वतः परं ॥ शब्दस्पर्शौ रूपरसं गंधाख्यं क्रमतो न्यसेत् ॥ श्रोत्रत्वगक्षिजिह्वाख्य

राम
३३०

330

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

नासात्मकचतुष्कस्यमेलनाद्विधिवद्बुधैः॥ उदितोमत्र्यवर्योयसर्कसंख्याभरःक्रमात्॥ अतस्तेनैवतद्वर्णान्विधंदूस्वरपूर्वकान्॥
द्वादशार्कन्यसेत्प्रोक्तान्द्वादशकेशवान्॥ प्रोक्तान्केशवादिमानकान्न्यासेअकारादिद्वादशस्वरेशात्वेन॥ नालेकुक्षौहृदिगलेपा
र्श्वसकगलेषुच॥ दक्षिणेषुचवामेषुपृष्ठेककुदिचक्रमात्॥ इत्यगस्त्यवचनात्॥ स्वायंभुवेनारसिंहेच॥ केशवंविन्यसेन्नक्ष्यमू
र्द्धदेशेथविष्णुना॥ नाभौनारायणंदेवंविष्णुतेनसमन्वितं॥ माधवंहृदिविन्यस्येन्मन्मथेनसमन्वितं॥ मन्मथातेनसंयुक्तंगलेगो
विंदसंज्ञकं॥ विष्णुभूतस्वरेणाथदक्षपार्श्वप्रविन्यसेत्॥ तदंसेमातृतीयेनसूदनंमधुपूर्वकं॥ विष्णुनाशिवयुक्तेनदक्षकरौत्रि
विक्रमं॥ वामनंश्रीधरंचैवहृषीकेशमतःपरं॥ वामेष्वैकारमाकारमौकारंविंदुनासह॥ विंदुनापद्मनाभंचपृष्ठदेशेनदंतयु
क्॥ अनंतंककुदिवामेनद्वादशांगमितिस्मृतं॥ द्वादशमानिवीजानिनादविंदुयुतानिच॥ आदित्याद्वादशाक्षरवर्णकाइति॥ वि
ष्णु॥ अविष्णुंतः आमन्मथः इमन्मथाः इभूतस्वर॥ उमालक्ष्मीः ईकारः तत्तृतीयः उशिवः ऊतदंतः ओकारांतः अं अंत्यः अः॥ इति
आदित्यास्तु॥ धातार्यमाचमित्रश्चवरुणांशुर्भगस्तथा॥ विवस्वदिंद्रौपूषाचपर्जन्योदशमःस्मृतः॥ त्वष्टाचविष्णुरित्यंतेइति
अंभसंभवोक्ताः अंशुः अंशुमत्वात्॥ अंशुस्त्वमंशुधारत्वादितिविष्णुधर्मोत्तरवचनात्॥ ॥प्रपंचसारे॥ द्वादशाक्षरमंत्रंतुमंत्र
विन्मूर्ध्निविन्यसेत्॥ मूर्ध्निस्थोवादेवस्तुव्याप्नोतिसकलांतनुं॥ मंत्रविन्मूर्ध्नीत्यष्टाक्षरेणासार्द्धमित्यर्थइतिपद्मपादाचार्याः॥ मं

शुद्धमनाः महाद्वादशाक्षरां तंप्रपूज्य विधिवत्करीटमंत्रेण ॥ कुर्यात्पुष्पांजलिमपि निजदेहे पंचशोथवा द्विजः ॥ सारसंग्रहे ॥ नवशक्तिस
माधुक्ते पीठे देवं यजेन्नत ॥ विमलासोत्कर्षणी वज्ञा नास्याद्व क्रियान्विता ॥ योगाप्रह्वी तथा सत्यासेनाशानानुग्रहा मता ॥ तारो हृद्दे नभ
वत्पदं विष्णंवङे युतं ॥ सर्वभूतात्मने शब्दं ववेद्धात्सुपदं नतः ॥ ङे तं देवं वसर्वात्मसंयोगपदमुच्चरेत् ॥ योगपद्मं पदं प्रोक्त्वा पीठा(
त्मादे प्रतो नमः ॥ अयमासनमंत्रस्यात्प्रदद्यादसुनासनं ॥ तारः प्रणवः हृन्नमः ङे तं भगवत्पदं भगवते विष्णु ङे युतं विष्णवे सर्वे
त्मादिपदद्वयं स्वरूपं ॥ ङे देवं देवाय सर्वात्मसंयोस्वरूपं योगपद्मस्वरूपं ॥ मूलेन मनुना मूर्तिं कल्पयेद्देवमर्चयेत् ॥ ॥ नारदपं
चरात्रे ॥ पीठपूजां विनिष्पाद्य गंधपुष्पादिभिः क्रमात् ॥ पश्चावाह्य तत्र विधिवदुपचारैर्यथोदितै ॥ कर्णिकायां स्थानं यजेदंगानि पू
र्ववत् ॥ केशरेषु यजेश्चाश्चा मंत्रवर्णान्समाहितः ॥ वासुदेवादिका मूर्तिश्चतस्रो विधिपूर्वकं ॥ दिपत्रेषु समभ्यर्च्यास्तासां नामान्य
मूनि हि ॥ वासुदेवस्तथा प्रोक्तः सकर्षणासह्वयः ॥ प्रद्युम्नश्चानिरुद्धश्च पीतवस्त्रैरलंकृता ॥ गौरहारिद्रकृष्णाख्यशक्रनीलनिभाक्रमा
त् ॥ दरचक्रगदापद्मधारिणश्चतुर्भुजा ॥ कोणपत्रस्थिताः शान्तिश्रीश्च सरस्वती ॥ रतिसंज्ञास्तथैवान्या पूज्या वै च यथाक्रमं ॥ शु
क्लस्वर्णापयः श्यामसंकाशाश्चारुभूषिताः ॥ दलाग्रेषु ततः पूज्या यथावद्धरिहेतवे ॥ अरिरक्तं दरं स्वच्छं गदां पीतां च पंकजं ॥ स्वर्णाभं
कौस्तुभं श्यामं कृष्णाभं मुसलस्मृतं ॥ शुवर्णा वनमाला वभ्रुआया वक्रमाद्यजेत् ॥ दिग्गताश्च ततो बाह्ये पूज्यास्तेन यथाक्रमं ॥ ध्वजः कृष्णो

321

रोतुश्रोत्रपूर्वकान् ॥ स्वस्वस्थाने तु वागादिकर्मेन्द्रियगणान्न्यसेत् ॥ मूर्ध्नि वक्त्रे हृदि शिवे पादयोर्विषयादिकान् ॥ हृत्पुंडरीकसंज्ञे हि हृदये मंडलानि च ॥ अर्कषोडशादिकलास्वकलायुक्तानि वै क्रमात् ॥ सूर्यसोमकृशानूनां स्वेनाकाशे तु वा हृमि: ॥ अथाकाशादिभूतानां स्वामस्थाने तु विसेत् ॥ परायं मेष्ठिनं चैव पुमांसं विश्वसंज्ञकं ॥ निर्वृत्तिं सर्वनामानं घोयरावलवर्णकैः ॥ नारायणान्तकान्वासुदेवाद्यान्विनियोजयेत् ॥ परमेष्ठ्यादिभिः पश्चान्नृसिंहं बीजपूरकं ॥ कोपतत्त्वं च मूर्द्धादिपादान्तं व्यापयेत्ततः ॥ एवं विन्यस्य विधिवत्साक्षान्नारायणो भवेत् ॥ ज्वररोगाभिचाराद्याः प्रलयं यान्ति नान्यथा ॥ भूतप्रेतपिशाचाश्च तथैव ब्रह्मराक्षसाः ॥ कूष्मांडाश्चैव डाकिन्यो नैव द्रष्टुमपिक्षमा ॥ एवं न्यस्तशरीरे सौ स्मरेद्विष्णुमनन्यधीः ॥ हस्तैश्चक्रदरौ गदासरसिजे विभ्राणमर्कौघसत्कान्तिं श्रीधरणीविभूषितलसत्पार्श्वं कीरीटान्वितं ॥ श्रीवत्सांकमकौस्तुभोरुपदकं केयूरहारोज्वलं राजत्कुण्डलमण्डितं हृदि भजे पीतावरं शार्ङ्गिणं ॥ वामाधः करयोराद्ये तदापूर्वयोरन्येऽन्यायुधध्यानं ॥ पंकजं दक्षिणो यस्य पांचजन्यं तथोपरि ॥ वामाधश्च गदा यस्य चक्रं चोर्द्ध्वं व्यवस्थितमिति केशवलमुक्ता ॥ अधरोत्तरभावेन कृतमेतत्तु यत्र वै ॥ नारायणाख्यासा ज्ञेया स्थापिता भुक्तिमुक्तिदा ॥ इति हयशीर्षपंचरात्रवचनात् ॥ सव्यापारेणोपुद्यमेनुयथं विभ्राणमब्जं तदनंतरेण ॥ आद्ये गदा वामकरेऽथ चक्रं विराजयंतं भुवनानि भान्या ॥ इति मंत्रप्रकाशवचनात्र सव्यान्यपाणौ दक्षिणोऽब्जं शंखं ॥ तथा ॥ कृत्वा स्थण्डिलमस्मिन्विनिक्षिप्यानिजासनिकां समुपविश्य ॥ पीठादिकं निजांगेषु पूज्यगंधादिभि

दिपर्वमारभ्यतत्वनिष्ठाग्रयंवतिशुद्धादशस्थानेषु ॐरांॐ. ॐयंॐ: ॐराांॐ. ॐयंॐ. पुन॥ ॐॐॐॐनॐ. ॐमोॐ. ॐनांॐॐरां
ॐ. ॐयंॐ ॐराांॐ. ॐयंॐ: इतित्रिरावृत्त्यामूलमंत्राक्षराणिविन्यस्य ततोहृच्छिरःशिखाकवचास्त्रेषुप्रोक्तपंचागानिविन्यस्य॥ ॐहृ
दयायनमः॥ नंशिरसेस्वाहा॥ मोंशिखायैवषट्‌ नांकवचायहुं रांनेत्रायवौषट् यंअस्त्रायफट्॥ इतिषड्भिर्वर्णैः षडंगानिविन्यस्य
ॐमोंराांनमः पृष्ठेयंनमः॥ इतिविन्यस्य ऐंद्रींचक्रेशावध्नामिनमश्चक्रायस्वाहा॥ आग्नेयींचक्रेशावध्नामिनमश्चक्रायस्वाहा. हेत्या
दिनतन्त्रादिषूक्तेनदशदिग्बंधनंकृत्वा मूर्द्ध्नि॥ ॐॐॐनमः नेत्रयोः ॐनॐ मुखेॐमोॐ. हृदि. ॐनांॐनाभौ. ॐरांॐ. गुह्ये ॐ
यंॐजानुनोः ॐराांॐपादयोः ॐयंॐइतिसृष्ट्याविन्यसेत्॥ गुदयोः ॐॐॐजानुनोः॥ ॐनंॐ. गुह्ये गुह्ये ॐमोॐनाभौ. ॐनांॐ.
हृदिॐरांॐमुखेॐयंॐनेत्रयोः ॐराांॐ. मूर्द्ध्नि. ॐयंॐ. इतिसंहारेणाविन्यस्य नाभौॐरांॐ. गुह्येॐयंॐजानुनोॐराांॐ. पाद
योः ॐयंॐनमः॥ मूर्द्ध्नि ॐॐॐ. नेत्रयो ॐनंॐमुखेॐमोॐहृदिॐनांॐइतिस्थित्याविन्यस्य॥ मूलाधारे. ॐॐॐहृदिॐनंॐ
मुखेॐमोॐदक्षबाहुमूलेॐनांॐवामबाहुमूलेॐरांॐ. दक्षोरुमूलेॐयंॐवामोरुमूलेॐराांॐ. नाभौ. ॐयंॐ१ ततोमूलेनव्या
पकंकृत्वाकराठे ॐॐॐ नाभौॐनंॐ. हृदि. ॐमोॐदक्षस्तनेॐनांॐ. वामे. ॐरांॐ. दक्षपार्श्वे. ॐयंॐ. वामेॐराांॐपृष्ठे ॐयं
ॐन२पुनर्व्यापकंएवंत्र्यावृत्तिंकुर्यात्॥ मूर्द्ध्नि ॐॐॐमोॐदक्षस्तनेॐनांॐवामेॐनांॐ. दक्षकरेॐरांॐवामेॐयंॐदक्षना

वनैतेयोरक्ताभः शंखसंन्निभः ॥ शुक्लः पद्मनिधी रक्तो विघ्नो रक्तस्तथार्यकः ॥ श्यामः श्यामनिभादुर्गा विष्वक्सेनो निशानिभः ॥ आग्नेयादि
दलेष्वेतेसं पूज्याद्विधिवत्क्रमात् ॥ लोकपालास्ततो बाह्ये वज्रादीन्यायुधान्यपि ॥ विष्णोः पूजाविधानं तु षडावरणमीरितं ॥ ॥ कपि
लपंचरात्रे ॥ नारायणाय विद्महे वासुदेवाय धीमहि ॥ ततो विष्णुः एनस्तद्वदंते चैव प्रचोदयात् ॥ गायत्री वैष्णवी प्रोक्ता सर्वपाप
हरात्वियं ॥ अंगानि षड्थ मंत्र मूर्तिशक्तयः केशवादिका ॥ लोकेशा तद्धेतयश्च पूज्याः सर्वेष्टसिद्धये ॥ वासुदेवादिकान्षष्टो वक्राया
श्च ध्वजादिकान् ॥ केशवाद्याद्वादशाप्यशक्तवज्रादिकान्यजेत् ॥ वासुदेवाध्वजादीश्च लोकपालांस्तदायुधैः ॥ प्रोक्ते विधिवज्जुष्के वहरिमेकेनसं
यजेत् ॥ अत्रापि तृतीयवर्जर्थप्रकारयोरंगानि पूजान्येव ॥ ॥ अथ प्रयोग ॥ तत्र प्रातः कृत्यादियोगपीठन्यासांते मूलमंत्रेण प्राणायामत्र
यं कृत्वा ॥ शिरसि साध्यनारायणाय ऋषये नमः ॥ मुखे देव्यै गायत्र्यै छंदसे नमः ॥ हृदये श्री परमात्मने देवतायै नमः ॥ इति विन्यस्य ममेष्टा
र्थसिद्धये विनियोग इति कृतांजलिः कृत्वा मूलमंत्रं करयोर्व्याप्य ऊँ घोल्काय स्वाहा हृदयाय नमः ॥ महोल्काय स्वाहा शिरसे स्वाहा ॥ वी
रोल्काय स्वाहा शिखायै वषट् द्युल्काय स्वाहा कवचाय ऊँ सहस्रोल्काय स्वाहा अस्त्राय फडिति पंचांगमंत्रानंगुष्ठादिपंचांगुलिषु विन्य
स्य दक्षकनिष्ठिकामूलपर्वादि तर्जन्यग्रपर्यंतेषु द्वादशस्थानेषु ॥ ॐ ॐ ॐ नमः ॐ न ॐ नमः ॥ ॐ मो ॐ नमः ॥ ॐ ना ॐ नमः ॐ रा ॐ
नमः ॥ ॐ य ॐ नमः ॥ ॐ णा ॐ नमः ॐ य ॐ नमः ॥ पुनः ॐ ॐ ॐ ॐ नं ॐ नमः ॐ मो ॐ नमः ॐ ना ॐ नमः इति विन्यस्य वामतर्जनीमूला

भगाय· गलदक्षभागे नं त्रिविक्रमाय विवस्वते· वामपार्श्वे वां वामनाय वेडायत्वामांसेषु ॐ श्रीधराय पृष्ठे· गलवामभागे दें ॐ हृषीकेशा
यपर्जन्याय· पृष्ठे वां अं पद्मनाभाय त्वक्षु· ककुदि यं अ· दामोदराय विश्ववे नमः॥ शिरसि ॐ नमो नारायणाय· ॐ नमो भगवते नारायणा
यनम इति न्यसेत्॥ इति मूर्तिपंजरन्यासः॥ ॥ ततः ॐ किरीटहारकेयूरमकरकुण्डलालंकृतशंखचक्रगदापद्महस्तपीतांबरधरश्रीव
त्सालंकृतवक्षस्थलश्रीभूमिसहितः आत्मज्योतिर्द्वयदीप्तिकराय सहस्रादित्यतेजसे नम इति सर्वांगे व्यापकं न्यसेत्॥ सर्वांगे ॐ मं
नमः परायजीवतत्वात्मने नम॥ ॐ नमः परायजीवतत्वात्मने नम॥ ॐ नमः पद्माणातः हृदि वं नमः बुद्धित· ॐ फं न· अहंकारत· ॐ पं न
मनस॥ मूर्ध्नि ॐ नं नः शब्दतत्वात्मने· मुखे धं न· स्पर्शत· हृदि ॐ दं· रूपत· गुह्ये· ॐ थ· रस· पादयो· ॐ त· गंध· श्रोत्रयोः ॐ णा· श्रोत्र·
सर्वांगे॥ ॐ ठ· त्वक्· अक्ष्णो· ॐ डं· नेत्र· जिह्वायां· ॐ ठ· जिह्वा घ्राणयोः ॐ ट· घ्राणः मुखे ॐ ञं· वाक्· पाणो· ॐ ञ· पाणि· पादयोः ॐ
जं· पाद॥ पायौ ॐ छं· पायु गुह्ये· ॐ चं उपस्थ· मूर्ध्नि ॐ ङं· आकाश॥ मुखे ॐ घं· वायु· मुखे· ॐ गं तेज· लिंगे ॐ खं जल॥ पादयो· ॐ कं
पृथिवी॥ हृदि ॐ खं· हृत्पुण्डरीक· तत्रैव· ॐ हं सूर्यमण्डलत॥ ॐ सं सोममण्डलत॥ ॐ रं वह्निमंडलत॥ ॐ रं· वह्निमण्डल· मूर्ध्नि ॐ
षां परमेष्ठितं· वासुदेवत· मुखे ॐ यं पुरुषाय स्वकराणतः हृदि ॐ रं नमः परायविश्वाय प्रद्युम्नतत्वा· गुह्ये ॐ वं नमः॥ परायनिवृत्तये
अनिरुद्धतत्वात्मने नमः पादयो॥ ॐ लं नमः परायसर्वाय नारायणाय तत्वात्मने नम॥ ॐ क्ष्रौं नमः परायनृसिंहाय कोपतत्वात्मने

333

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

सि ॐ णां ॐ वामे ॐ यं ॐ २ दक्षवाहुमूले ॐ ॐ ॐ वाहुमध्ये ॐ नं ॐ मणिवंधे ॐ मो ॐ दक्षांगुष्ठाद्यंगुलिषु शिष्टान्यंच वर्णानेवं न्यसे
त॥४॥ एवं वामवाहौ ५ एवमेव दक्षोरुमूलजानुगुल्फांगुलिषु न्यसेत् ६॥ एवं वामेपि॥७॥ हृद्येव त्वगसृङ्मांसमेदोस्थिमज्जाशुक्रे
षु सप्तधातुषु सवर्णान्विन्यस्याष्टवायौ न्यसेत् ८॥ मूर्ध्नि ॐ ॐ ॐ नेत्रयोः ॐ न ॐ मुखे ॐ मो ॐ हृदि ॐ नां ॐ उदरे ॐ रां ॐ ः ऊर्वौ
ॐ मां ॐ पादयोः ॐ नां ॐ वामाधःकरे ॐ यं ॐ वामोर्ध्वकरे ॐ णां ॐ दक्षाधःकरे दक्षोर्ध्वे ॐ यं ॐ नमः॥१०॥ इति मूर्त्तिपंजरन्या
सः॥ पादयोः पृथिवीतत्त्वात्मने नमः॥ लिंगे नमम: परायजलतत्वात्मने हृदि मों नमः॥ परायै तेजस्तत्वा मुखे नां नमः॥ परा
यवायुतत्वा मूर्ध्नि रीं नमः॥ आकाशतत्वा हृदि यं नमः॥ अहंकारतत्वा सर्वांगे णां नमः॥ महत्तत्वाय नमः पपः पराप्रकृति
तत्वात्मने नमः॥ इति संहत्यान्यस्य सर्वांगे य नमः॥ पराप्रकृतितत्वा णां नमः॥ महत्तत्वा य नमः २॥ अहंकृतितत्वा मू
र्ध्नि रां नमः॥३॥ आकाशतत्वा मुखे नमः॥४॥ वायुतत्वा हृदि मां नः॥५॥ तेजस्तत्वा लिंगे नं नमः॥६॥ जलतत्वा पादयोः॥७॥
ॐ नमः परायपृथिवीतत्वात्मने नः ८ इति समस्याविन्यस्य ततः॥ सर्वांगे ॐ आविंदुरूपायात्मने नमः॥ ॐ अं नादरूपायांतरात्मने
ॐ पं शक्तिरूपाय परात्मने ॐ ह्रीं शांतिरूपाय ज्ञानात्मने नम इति विन्यस्य॥ ललाटे ॐ अं केशवाय नमः धात्रे नमः॥ उदरे नं आं ना
रायणायार्यम्णो हृदि मों इ माधवाय मित्राय कण्ठे मं ई गोविंदाय वरुणाय दक्षपार्श्वे गें उ विष्णवे अंशवे अं मे वं ऊं मधुसूदनाय

रेखायामिंद्रान्तृतीयायां वज्रादींश्च ध्वजादि पूर्ववत्समापयेदिति ॥ ॥ सारसंग्रहे ॥ द्वात्रिंशल्लक्षमात्रेणापादोनेनाथवा ॥ तदर्द्धेनाथ
वा मंत्री जपेन्मंत्रमनन्यधीः ॥ जुहुयाद्दशांशेन त्रिमध्वक्तैः सरोरुहैः ॥ तर्पयेच्चंद्रकाश्मीरमृगनाभिसुवासितैः ॥ सलिलैः स्वाभिकांते न त
र्पयेद्ब्राह्मणानपि ॥ सुकुलीनान्सदाचारान्विप्रभक्तानतंद्रितः ॥ एवंसिद्धमनुर्मंत्री प्रयोगान्साधयेत्सुधीः ॥ साध्यधाम्नि भुजंसौम्यं सर्वांग
धवलद्युति ॥ निर्विषीकरयोर्ध्यायेद्विहगरुडवाहनं ॥ एवमेव हरिं ध्यायेद्रोगसंहारकर्मणि ॥ दधिमध्वाज्यसंयुक्ताश्वगरेणुलसंमिता
गुडूचीरयुतं हुत्वा मृत्युमेवातिवर्त्तते ॥ शनैश्चरदिनेश्वत्थं सम्यगालभ्य पाणिना ॥ जपेदष्टशतं स्थो म्रियते नापमृत्युना ॥ पंचविंश
तिसंजप्तां मंत्री शुद्धाः पिबेदपः ॥ निरस्तपातको भूत्वा ह्यरोगी ज्ञानवान्भवेत् ॥ जप्तायुतेन कुंभाद्भिः सेचनं सर्वरोगनुत् ॥ भुंजा
नः सप्तसप्तान्नेधाह्यारोग्यवान्भवेत् ॥ चंद्रसूर्योपरागेषु त्रिदिनं सप्तमेव वा ॥ उपोष्याष्टसहस्रं तु स्पृष्ट्वा ब्राह्मीघृतं जपेत् ॥ यः पि
बेत्स भवेन्मेधाकवित्ववादितावशः ॥ विल्वैरयुतहोमेन सद्यो धनपतिर्भवेत् ॥ विल्वसंततफलैः पत्रैर्वा ॥ पद्मे तत्तमयं सूत्रमयुतेना
भिमंत्रितं ॥ धारयेद्दक्षिणे हस्ते सर्वत्र स्यात्सुरक्षितः षट्कोणे प्रणवं नरे प्रणवगं साध्यं लिखेन्मध्यतः षट्कोणेषु लिखेत्सुदर्शनमनं पद्मे
ष्टपत्रे ततः ॥ अष्टार्णावदलाग्रतः प्रविलिखेच्छ्रीकराष्टाक्षरं वाह्ये द्वादशमंत्रवर्णसहितं स्याद्द्वादशारं ततः ॥ द्वात्रिंशद्दलमालिखेन्नर
हरेरानुष्टुभार्णान्ततस्तद्बीजेन च वेष्टयेद्बहिरिदं यंत्रं हि विष्णोः परं ॥ पूजाहोमसुसाधितं करधृतं भूतादिरक्षाकरं लक्ष्मीकीर्त्तिविवर्द्धन

Nepal Sanskrit University ... Valmiki Campus, Kathmandu

नमः इति मूर्द्धादिपादपर्यंतं व्यापकत्वेन विन्यस्य श्रीनारायणात्मकं स्वात्मानं ध्यायेत् ॥ ततो वक्ष्यमाणा वैष्णवमुद्रा वध्वा ध्यानाद्यात्मपूजां
ते कुर्यात् ॥ आत्मपूजायां विशेषस्तु ॥ विभूतिपंजरन्यासक्रमेण न्यासस्थानेषु न्यासमंत्रेणा गंधपुष्पादिभिः संपूज्यादिभिः संपूज्य किरीट
मंत्रेणा पुष्पांजलिं पंचकत्त्रयं वा स्वदेहे दद्यादिति · ततो मंडूकादिपृथिव्यंते क्षीरसमुद्रं श्वेतद्वीपं च संपूज्य नंदनोद्यानादि परतत्त्वपूजां
ते अष्टदलकेशरेषु स्वाग्न्यादि मध्यांतं प्रादक्षिण्येन ॥ विमलायै नमः उत्कर्षिण्यै · ज्ञानायै · क्रियायै · योगायै · प्रह्व्यै · सत्यायै · ईशानायै · अनु
ग्रहायै नमः इति संपूज्य ॥ ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगः २ पद्मपीठात्मने नमः इति मंत्रेण समस्तं पीठं
संपूज्य मूलमुच्चार्य श्रीविष्णुमूर्तिं कल्पयामीति मध्ये मूर्तिं परिकल्प्य तन्मूलमुच्चार्य श्रीविष्णुमूर्तये नमः इति संपूज्य च चतुरायतन
देवता गणेशादिका · समभ्यर्च्य प्रमाणोक्तावाहनमंत्रेणावाह्य स्थापनाप्राणस्थापनांते वैष्णवमुद्राः प्रदर्श्यासनादिपुष्पोपचारांतेऽष्टद
लकेसरेषु प्राग्वत्संवरंगानि संपूज्याष्टदलकेसरेष्वेव स्वाग्न्यादिप्रादक्षिण्येन ॥ ॐ नमः ॐ नं · मों · नां · रां · यं · णां · यं नमः इति संपूज्याष्टदले
षु स्वाग्न्यादिदिक्पत्रचतुष्टये ॥ ॐ वासुदेवाय · एवं संकर्षणाय · प्रद्युम्नाय · अनिरुद्धाय · दिग्दलेषु ॥ शान्त्यै · श्रियै · सरस्वत्यै · रत्यै · ततो द
लाग्रेषु स्वाग्न्यादिप्रादक्षिण्येन चक्राय शंखाय · गदायै · पद्माय · कौस्तुभाय · मुशलाय · खड्गाय · वनमालायै ॥ ततश्चतुरस्रप्रथरेखायां दे
वयादिप्रादक्षिण्येन चतुर्दिक्षु ॥ ध्वजाय · गरुडाय · शंखनिधये · द्विविक्ष विघ्नाय · आर्याय · दुर्गायै · विष्वक्सेनाय · इति संपूज्य ॥ द्वितीय

तद्बहिश्चतुर्दलकमलंकृत्वातत्केसरेषुचतुरक्षरमंत्रस्यैकैकमक्षरंविलिख्यतत्पत्रेषुवासुदेवद्वादशाक्षरमंत्रस्यवर्णत्रयंप्रतिदलंविलि
ख्यतद्बहिरष्टदलकमलंकृत्वातत्केसरेषुनारायणाष्टाक्षरस्यैकैकमक्षरंविलिख्यतद्दलेषुद्वात्रिंशदक्षरनृसिंहमंत्रस्यचतुरश्चतुरो
वर्णान्प्रतिदलंविलिख्यतद्दलेषुपुरुषसूक्तस्यैकैकांऋचंविलिख्यतद्बहिर्वृत्तद्वयंकृत्वातदन्तरालवीथ्यांमातृकांसबिंदुकांविलि·
ख्यतद्बहिश्चतुरस्रंकृत्वातत्कोणेषुप्रणवंलिखेत्॥ एतद्यंत्रमुक्तफलदंभवति॥ अत्रपुरुषसूक्तेनसर्वैरपिऋग्वेदोक्तमेवग्राह्यं॥स
र्वेषांसूक्तानांतन्मूलकत्वात्॥ अन्यवेदेषुपाठभेददर्शनाच्च॥ सहस्रशीर्षाषोडशर्चस्यसूक्तस्यनारायणऋषिःपुरुषोदेवतापंचद
शानुष्टुभस्त्रिष्टुबेका॥ ॥सारसंग्रहे॥ अष्टवर्णाष्टकऋषिःपृथकमूर्तिभेदविभिन्नासोप्रोच्यन्तेसाधकेष्टदः॥ गोतमोथभरद्वा
जोविश्वामित्रकुत्सस्तथा॥ जमदग्निर्वसिष्ठश्चकश्यपश्चात्रिरेवच॥ अगस्त्यविज्ञेयाऋषयोष्टौयथाक्रमं॥ गायत्र्युष्णिगनुष्टुप्बृ
हतीपंक्तिरेवच॥ त्रिष्टुप्सजगतीचैवविराट्छंदांस्यनुक्रमात्॥ धरोध्रुवस्तथासोमआपोग्निर्वायुरेवच॥ प्रत्यूषश्चप्रभातश्चविज्ञेया
देवताःक्रमात्॥ अग्निर्भूर्वायुराकाशआदित्योगुर्विष्णुश्चभं॥ तत्वानिसप्तलोकास्त्वक्षत्राणिसपरात्मिका॥ अघ्रोहिरण्मयंकृत्स्नंरक्तं
कुंकुमसन्निभं॥ पद्मकिंजल्कनीलाभरक्तवर्णाष्टकंमता॥ षष्ठाद्यपोरुदात्तःस्यात्स्वरितोत्यद्वितीययोः॥ प्रचयोत्रिचतुर्णानिहतं
पंचमाक्षरं॥ उदात्तंसप्तमंबीजमितिमस्मत्यसंजपेत्॥ दरचक्रगदापद्मंकरेमूर्ध्निनमोर्णयोः॥ इतराःस्युश्चक्रशंखगदापद्मकरा

335

परमिदं मोक्षार्थिनां भुक्तिदं ॥ अस्यार्थः ॥ षट्कोणं कृत्वा तन्मध्ये प्रणवोदरे प्रणवं विलिख्य तन्मध्ये साध्यनामालिख्य षट्कोणेषु स्वाग्रादिप्रादक्षिण्येन वक्ष्यमाणषडक्षरमन्त्रस्यैकैकमक्षरं प्रतिकोणं विलिख्य तद्बहिरष्टदलपद्मं कृत्वा तद्दलेषु नारायण्याष्टाक्षरवर्णानालिख्य तद्दलाग्रेषु ॥ वक्ष्यमाणवासुदेवद्वादशाक्षराण्यालिख्य तद्बहिर्द्वात्रिंशद्दलं पद्मं विरच्य तद्दलेषु वक्ष्यमाणनृसिंहमन्त्रस्य द्वात्रिंशद्वर्णानेकैकशः समालिख्य तद्बहिर्वृत्तद्वयं कृत्वा वृत्तयोरन्तराले स्वाग्रादिप्रादक्षिण्येन मध्यस्याक्षरं संमुखं यथा भवति तथा निरन्तरं नृसिंहबीजेन वेष्टयेदित्येतद्यन्त्र भुक्तफलदं भवति ॥ ॥ श्रीयन्त्रसार ॥ षट्कोणकर्णिकामध्ये तारं साध्यं समन्वितं ॥ सुदर्शनं षडर्णं वषट्सु कोणेषु संक्षिपेत् ॥ तदग्रानिवउः पत्रे केसरेषु क्रमेण च ॥ गोपालकचतुर्वर्णमन्त्रस्यैकैकमक्षरं ॥ दलेषु द्वादशार्णस्य त्रीणि त्रीण्यक्षराणि च ॥ अथ पत्रपत्रकेसरोपदष्टार्णैकैकवर्णके ॥ नृसिंहानुष्टुभो वर्णांश्चतुरस्रन्ततः सुदर्शनाय हृ पत्रकेसरे षोडशच्छदे ॥ ऋचां पुरुषसूक्तस्य क्रमात्षोडशकं वहिः ॥ मातृकार्णैस्समावृतं भूपुराश्रिस्थतारवं ॥ यन्त्रं पुरुषसूक्तस्य पुत्रायुः कीर्त्तिकान्तिदं ॥ सर्वपापहरं श्रीधर्मार्थसुखमोक्षदं ॥ हय्यगवीने प्रविलिख्य यन्त्रं त्रिवारमेत्यतिजप्यसूक्तं ॥ प्रातः समश्नाद्वनिता विदग्धपुत्रं प्रसूते सकलागमज्ञं घोरे विषे घोरतरेभिचारे घोरे ज्वरे घोरतरे च शूले ॥ हय्यंगवीने प्रविलिख्य यन्त्रं प्रमक्षयेन्मन्त्रशमाय जप्त्वा ॥ अस्यार्थः षट्कोणं कृत्वा तत्कर्णिकामध्ये समाध्यप्रणवं विलिख्य तत्कोणेषु सुदर्शनमन्त्रस्यैकैकमक्षरं स्वाग्रादिप्रादक्षिण्येन विलिख्य तत्संधिषु सुदर्शनषडक्षरस्य षडङ्गमन्त्रानालिख्य

रमाद्यां द्वितीयां च पूजयेत् ॥ एवं तृतीयादिष्वप्यूहनीयं ॥ तत्र प्रणावमूर्त्तिपूजायां प्रथमांगावृति ॥ द्वितीयाष्टमूर्त्तिभिः तृतीया सशक्तिकैर्वासु
देवादिभि ॥ आत्मादिभिः शान्त्यादिश्चतुर्थी शक्रादिभिः पंचमी तदस्त्रैः षष्ठी ॥ नार्णमूर्त्यर्चायां तृतीयां वासुदेवादिभिः सशांत्यादिभिर्ध्वजादिभि
श्चतुश्चतुर्थी पंचमी षष्ठी चक्रादिभिस्तदस्त्रैश्च ॥ मोर्णमूर्त्तिपूजायां तृतीया रत्यादिभिर्ध्वजादिभिश्चतुर्थी ॥ नाकारजे विधाने रित्यादिभि
स्तृतीयार्णविधौ श्व्यादिभिस्तृतीयान माया ॥ महामाया ॥ योगमायेति शक्तित्रय नामजेयं ॥ पार्णविधौ तृतीयाशं रवादिभिः ॥ गाकारविधौ
तृतीयानंतादिभि ॥ यकारमूर्त्तिपूजायां प्रथमांगावृतिर्द्वितीया वासुदेवादिभिः स्तृतीया केशवाद्यैस्तुरीयाब्जादिभिः पंचमी मत्स्यादि
भि ॥ लोकेशैः षष्ठी तदस्त्रैः सप्तमीति ॥ ॥ सारसंग्रहे ॥ अवक्ष्ये द्वादशार्णं मंत्रं सर्वार्थसाधकं ॥ सर्वपापहरं पुंसां भुक्तिमुक्तिप्रदा
यकं ॥ ध्रुवं नमः पदं ब्रूयात् ङेंतं च भगवत्पदं ॥ वासुदेवपदं तद्वद् द्वादशार्णो मनुर्मतः ॥ ध्रुवः प्रणावः नमः स्वरूपं ङेंतं भगवत्पदं भग
वते तद्वद्वासुदेय ॥ तथा ॥ मुनिः प्रजापतिः प्रोक्तो गायत्री छंद ईरितं ॥ देवतास्या वासुदेवस्य द्वाभ्यां षडर्णकैः ॥ समस्तेन पंचांगमिति ॥
अस्त्रयश्चत्वारः शराः पंच ॥ तथा ॥ द्वादशांगं ततो न्यस्य हृदादिनेत्रजठरपृष्ठबाहूरुजानुषु ॥ सपादेषुनोरर्णान्नमोंतैः साधकोत्तमः ॥ अत्रा
स्त्रानंतरं तत्र न्यासः ॥ तथा ॥ मंत्रसंपुटलिप्यर्णान्यथास्थाने न्यसेन्नतः ॥ शिरस्तारप्रभृति मूलेन व्यापकं न्यसेत् ॥ मन्त्रार्णांस्त्रिविधन्यासं न्यसे
न्मंत्री समाहितः ॥ करालभालदृग्वक्त्रकंठदोर्हृज्जठरनाभिषु ॥ लिंगजान्वंघ्रिषु प्रोक्तः सृष्टिन्यासश्च मंत्रिभिः ॥ हृदादिकांतावधीमास्थितिन्यासं

क्रमात् ॥ यामूर्त्तिः पूज्यते पूर्वं तस्या अन्याः प्रयान्त्यथ ॥ अंगतामवशिष्टं शेखयं यान्त्यंगतां ऽनः ॥ वक्ष्यमाणाच्च तारस्य विधानादधि
कावृत्तिः ॥ इयमेवेतरत्सर्वं वक्ष्यमाणप्रकारवत् ॥ सर्वार्चायां पूर्वमंगमूर्त्यष्टकमतो विदुः ॥ लोकपालादिकं चान्यसमानं सर्वपूजने
नार्णाजे वासुदेवादिशक्तयो व्याध्वजाजिका ॥ तृतीयते रतिधृतिकान्तिस्तुष्टिः पुष्टि ॥ स्मृतिदीप्तिश्च कीर्तिश्च पूज्याः पश्चाद्ध्वजादिका
तुरीये वरत्यादि पूजा शेषं च पूर्ववत् ॥ पंचमावरजे श्रीभूर्मायाः स्याद्यमनोन्मनी ॥ ह्रीं श्रीं रतिः तुष्टिर्मोहिणी माया च महादिका ॥ यो
गाविका तथा पूज्या षष्ठावरणे भवेद्वलि ॥ शंखो गदा हलं शार्ङ्गो मुशलोसिः सश्रूलक ॥ सप्तमावरणे भवेनंतो वासुकिस्तक्षकस्तथा ॥ मत्स्या
दिभिः पंचम्यां स्यान्यष्टाने त्रादिभिर्मता ॥ अन्यत्पूर्ववदेव स्यात्तत्सर्वं मत्स्यश्च कूर्मकः ॥ वराहनृसिंहश्च कुब्जो रामत्रयं तथा ॥ कृष्ण
कल्कीत्वं ततात्मा चैव नामतः ॥ पूजाविधौ च पूर्वोक्ते यच्चोक्तं वाह्यमेव तत् ॥ अष्टाक्षराणां मंत्राणां विधानं सम्यगीरितं ॥ एतेन योभ
जेन्मंत्री भक्त्या परमया हरिं संवाछितार्थान्भते ह्ययत्नादेव साधकः ॥ अथाष्टाक्षरस्याष्टवर्णसंज्ञानामष्टमूर्तीनां विधानमाह ॥ अ
ष्टवर्णस्येति ॥ दऽ शंखः नमोर्णायोमूर्त्योः पूर्ववदाऽधध्यानं ॥ अन्यासां तु दक्षाधःकरमारभ्य प्रादक्षिण्येन दक्षोर्ध्वकरपर्यन्तं चक्रशं
खगदापद्मानि ध्येयानि ॥ यामूर्तीरिति ॥ यामूर्तिः प्राधान्येनार्चयितुरिष्टा सा मध्ये पूज्या इतराः सप्तमूर्तीः पूर्वादि सौम्यांतास्तु पूज्या
ईशानकोणात्तुऽनः प्रधानमूर्तिरेव पूज्या अवशिष्टे शेस्वयं पात्यंगतांऽ नरिस्मके ॥ अत्रछिनी मूर्तिपूजायां तृतियादिमूर्त्तीः संपूज्यानंत

शि॰च
३३७

निषेवितंदिव्यदितिजादिगंधर्वसंचयैः॥ सिद्धविद्याधरौघैश्चसेवितंचमहोरगैः॥वामोर्ध्वादितदधःकरांतमायुधध्यानं॥ वासुदेवंप्र
कुर्वीतचतुर्बाहुंसुरेश्वरं॥ दक्षिणोपरिचक्रंतुपद्मंवाधःप्रकल्पयेत्॥ वामोपरिगदागार्यशंखंचाधःसुशोभनमितिहयशीर्षपंचरात्र
वचनात्॥ तथा॥एवंध्यात्वावासुदेवंस्वाभेदेनगत्प्रभुं॥पूर्वोदितेयजेत्पीठेदेवमावाह्यमंत्रवित्॥ मूर्त्तिंमूलेनसंकल्प्यगंधाद्यैस्तत्रपूज
येत्॥पूर्वमंत्राणिसंपूज्यवासुदेवादिशक्तयः॥ दिग्विदिक्षुचसंपूज्यास्ततोद्वादशमूर्तयः॥केशवाद्यास्समभ्यर्च्यालोकेशाद्यायुधैःस
हः॥ ॥अथप्रयोगः॥तत्रप्रातःकृत्यादियोगपीठन्यासांतेमूलमंत्रेणप्राणायामत्रयंकृत्वाशिरसिप्रजापतयेऋषयेनमः॥मुखेगा
यत्रीछंदसेनमः॥ हृदयेश्रीवासुदेवायदेवतायैनमः॥ ममसर्वाभीष्टसिद्धयेविनियोगःइतिकृतांजलिरुक्त्वामूलेनकरयोर्व्याप
कंकृत्वाॐहृदयायनमः॥शिरसेस्वाहाभगवतेशिखायैवषट्॥ वासुदेवायकवचायहुं॥ॐनमोभगवतेवासुदेवायअस्त्रायफ
ट्॥इतिपंचांगमंत्रान्नष्टादिकनिष्ठांतेकरयोर्विन्यस्यनेत्रवर्जंहृदयाद्यस्त्रांतंवाविन्यस्य॥ॐपुरुषायहृदयायनमः॥ नंसत्यायशिर
सेस्वाहा॥मोंअच्युतायशिखा॰ भंवासुदेवायकवचाय॰ गंसंकर्षणायास्त्रायफट्॥वंप्रद्युम्नायनेत्रायवौषट्उदरेतेंअनिरुद्धायन
मः॥पृष्ठेवांनारायणाय॥बाह्वोःसुंब्रह्मणे॥उदरेदेंविष्णवे॥जानुनोःवांनृसिंहाय॥ पादयोःयंवराहायनमः॥ ॥ ततःशिरसि
ॐनमोभगवतेवासुदेवायअंउनर्मंत्र॥नमःएवंआ२२नमइत्यादिमूलमंत्रपठितात्मानकाराणांन्यातकास्थानेषुविन्यस्यप्रणवपुटि

337

राम
३३७

प्रचक्षते॥ पादादारभ्य शीर्षान्तं न्यासं संहारमूविरे॥ एष क्रमो यतीनां स्याद्विलोमेनोच्यते ह्यसौ॥ पूर्वाश्रमस्थुतानां वस्थित्यं तो गृहमेधिनां
संहारयो निगदितो मंत्रशास्त्रविशारदैः॥ संहृते दोषसंहारः सृष्टेश्च शुभसृष्टय॥ स्थितेश्च शांतिविन्यासस्तस्मात्कार्यस्त्रिधा बुधैः॥ व्यापक
त्वेन मंत्रार्णान्तनुन्यस्येन्ननौ सुधी॥ करास्तहृद्वक्त्रकंठदोर्युग्महृदयेषु च॥ ऊरुश्रोणिलिंगेपादयुग्मे मूलेन व्यापकं न्यसेत्॥ तत्वन्यासं
प्रविन्यस्य विन्यसेन्मूर्तिपंजरं॥ तत्वानि द्वादशावदन्॥ इति हयशीर्षपंचरात्रोक्तानि॥ पद्मपादाचार्यास्तु॥ पुरुषसत्याच्युतवासुदे
वसंकर्षणप्रद्युम्नानिरुद्धनारायणब्रह्मविष्णुनृसिंहवराहादीनां द्वादशांगयोगमाहुः॥ उक्तं च विष्णुयामले॥ आदौ तु पुरुषः सत्याच्यु
तौ पश्चान्महेश्वरि॥ वासुदेवादयो नारायणो ब्रह्मा ततः परं॥ विष्णुर्नृसिंहवाराहौ द्वादशांगेष्विमान्न्यसेदिति॥ ॥सारसंग्रहे॥ त
तः समाहितो भूत्वा वासुदेवं हृदि स्मरेत्॥ मध्ये दुग्धांबुधिद्वीपे दिव्ययोषानिषेविते॥ तत्र संचिंत्य विपिनमखिलर्तुनिषेवितं॥
तन्मध्ये कल्पवृक्षं च दिव्यमद्भुतदर्शनं॥ तस्याधस्तादनल्पं वेकलं विमलं प्रभं॥ हारत्नरौनुविलसत्प्रभापटलराजितं॥ तत्र संचिंत
येद्देवं वासुदेवं स्थिताननं॥ ऊद्ध्वाभगदाचक्रपद्मशंखलसत्करं॥ वंशायुतलसत्कांत्या मोहयंतं जगत्त्रयं॥ केयूरांगदसंराजद्दोर्दण्ड
रत्नभूषणं॥ श्रीवत्सांकलसद्रत्नकंठकौस्तुभान्वितं॥ अरविंददलाताम्रसुरम्यायतलोचनं॥ कुंडलप्राह्वसकुंडमण्डलं पीनवा
ससं॥ ग्रैवेयहारसंशोभिकंबुकंठं सुकंकणं॥ विशालवक्षःसंराजत्सुफुल्लवनमालकं॥ सनकादिमुनींद्रैश्च तत्वनिर्णयकांक्षया

श्री॰सं
३३८

ग्वत्समापयेदिति॥ ॥ सारसंग्रहे॥ एवं संपूज्य विधिवद्वर्णालक्षं मनुं जपेत्॥ वर्णालक्षं द्वादशलक्षं॥ तत्सहस्रं च कमलैक्षैर्जुहुयान्मधुरा
प्लुतैस्तिलैः शुद्धैरथेक्षुतिकेविदाज्यपरिप्लुतैः॥ तर्पणादि ततः कुर्याद्यथोक्तविधिना सुधीः॥ एवं सिद्धमनुर्मंत्री वांछितार्थान् प्रसाधये
त्॥ स्नानजडुमसंभूतसमिद्भिः पायजक्रये॥ पयोक्ताभिः प्रजुहुयात्साधकोर्कसहस्रकं॥ स्नानजडुः क्षीरवृक्षः॥ साज्येन हविषा चैव
जुहुयाच्चित्रशुद्धये॥ पायसेन तिलैः शुद्धैः समिदाज्यैर्हुनेत्तु यः॥ शालीभिश्चान्वहं मंत्री सोभिष्टफलभाग्भवेत्॥ अमुत्र लभते मुक्तिं नि
यतात्मा न संशयः॥ द्वादशाक्षरमंत्रस्य विधानं परिकीर्त्तितं॥ अशेषतः साधकानां भुक्तिमुक्तिप्रदायकं॥ मायाद्वयं रमाद्वंद्वं लक्ष्मीप
दमथो भवेत्॥ वासुदेवं चतुर्थ्यंतं नमोंतं च ध्रुवादिकं॥ मनुसंख्याक्षरप्रोक्तो मनुः सर्वः समृद्धिद॥ मायाद्वयं भुवनेश्वरीवीजद्वयं र
माद्वयं श्रीवीजद्वयं लक्ष्मी इति स्वरूपं वासुदेवं चतुर्थ्यंतं वासुदेवायेति॥ ध्रुवादिकः प्रणवाद्यः मनुसंख्याक्षरश्चतुर्दशाक्षरः॥ तथा॥ ऋ
षिः प्रजापतिश्छंदो गायत्री देवता मनो॥ मतो लक्ष्मीवासुदेवो देवदानववंदितः॥ द्वाभ्यां द्वाभ्यां तथा द्वाभ्यां पंचभिर्द्विनयेन च॥ पंचा
गानि मनोर्वर्णैः प्रणवाद्यैः प्रकल्पयेत्॥ उद्यत्सौदामिनीरुक्शशधररुचिरं भूषणैर्भूषितांगमेकीभूतं च श्रीकमलनयनयोः सम्यगा
श्लेषलोभात्। लक्ष्मीर्दिश्यात्सदा वो लिखितसरसिजे दर्पणं रत्नकुंभं सविभ्रद्वलपद्मैः सरसिरुहगदाशंखचक्राह्वयानि॥ वामभागस्थे
करेरुर्ध्वादिभिर्लिखितानादीनि दक्षिणास्थैः॥ सरसीरुहादीनि चत्वारि ध्येयानि॥ पुरोदिते यजे पीठे द्वादशाक्षरवर्त्मना॥ ॥ अथ प्रयोगः त

338

राम
३३८

नेनमूलमंत्रेणास्वदेहेत्रिर्व्यापकं कृत्वा पादयोः ॐ नमः॥ जानुनोः नं नमः॥ लिंगे मों॥ नाभौ भं॥ उदरे गं॥ हृदये वं· जिह्वायां ते· कंठे वा· मुखे
सुं· दृशोः दे भाले वां॥ शिरसि यं नमः इति संहारेण विन्यस्य॥ शिरसि· ॐ भाले नं· दृशो· मों मुखे भं· कंठे गं· बाह्वो· वं· हृदये तें· उदरे वां· नाभौ
सुं· लिंगे दें· जानुनोः वां· पादयोः य नमः॥ इति सृष्टिन्यासः॥ हृदि ॐ उदरे नं· नाभौ मों· लिंगे भं· जानुनो गं· पादयोर्वं बाह्वोः तें कंठे वां· मु
खे सुं· दृशो दें· भाले वां शिरसि यं नमः॥ इति स्थितिन्यासः॥ ॥ एवं गृहस्थैः कर्त्तव्यः॥ यतिभिस्तु सृष्टिस्थितिसंहारक्रमेण कार्यः वर्णि
भिस्तु स्थितिसंहारक्रमेण कर्त्तव्य इति॥ एते वर्णाः प्रणवपुटिता न्यस्तव्या इति॥ ततः पुनर्मंत्रवर्णान्मूर्द्धभालनेत्रकंठबाहुद्वयहृ
दयजठरलिंगपादयेषु द्वादशसुस्थानेषु प्राग्वद्विन्यस्य पुनमूलेन व्यापकं कृत्वा हृदये ॐ नमः पराय जीवतत्त्वात्मने नमः॥१॥ तत्रैव
नं प्राणतत्त्वात्मने नमः॥२॥ मों बुद्धित ३॥ भं चित्तत॥४॥ गंः हृत्पद्म॥५॥ वं· द्वादशकलाव्याप्तसूर्यमण्डलत ६ तें षोडशकलान्वितचं
द्रमंडलतः॥७॥ वां· दशकलान्वितवह्निमंडलतः॥८॥ शिरसि सुं· वासुदेवत मुखे दें· संकर्षणात॥ हृदि वां· प्रद्युम्नतः॥ गुह्ये यं नमः
परायानिरुद्धतत्त्वात्मने नमः इति द्वादशतत्त्वानि विन्यस्य प्राग्वन्मूर्तिपंजरन्यासं विधाय॥ ध्यानादिपंचोपचारांतेगानि संपूज्याष्टदले
प्राग्वद्वासुदेवादिमूर्तिशक्तीः संपूज्य तद्बहिर्द्वादशदलेषु॥ ॐ केशवाय· एवं नारायणाय· माधवाय· गोविंदाय· विस्नवे· मधुसूदनाय·
त्रिविक्रमाय· वामनाय· श्रीधराय॥ हृषीकेशाय॥ पद्मनाभाय· दामोदराय नमः इति संपूज्य देवाग्रादिप्रादक्षिण्येन संपूज्येंद्राद्यर्चा नंप्रा

त्राय·फ्ः अस्त्राय फट् इति षडंगमंत्रानंगुष्ठादितलांतं करयोर्विन्यस्य हृदादिषु विन्यस्य ध्यानाद्यंगपूजानेष्टदलेषु॥ लक्ष्म्यै नमः॥ नारायण्यै
भूम्यै· धरायै॥ अंबिकायै· त्र्यंबिकायै· गौर्यै॥ गंगाधर्यै नमः इति देव्यग्रादिप्रादक्षिण्येन संपूज्य अंगार्चादि सर्वं समापयेदिति॥ सारसंग्र
हे॥ ॥अथोच्यते मंत्रवरो दधिवामनसंज्ञक॥ येन प्रजप्तमात्रेण सिद्ध्यंते च मनोरथाः॥ ॐ नमो विष्णवे ब्रूयात्सुरांते पतये महाब
लायाग्निवधूर्मंत्रोष्टादशाक्षर ईरितः॥ अग्निवधूः स्वाहा· अन्यानि पदानि स्वरूपाणि॥ तथा॥ मुनिरिंदुः समाख्यातो विराट्छंद उदाहृतं॥ दधि
वामनसंज्ञास्य विष्णुर्देवः समीरितः॥ हृदयं प्रणवेन स्यान्नमो मंत्रेण वै शिरः॥ विष्णवे च शिखा वर्म सुरांत्यं पतये मतं॥ महाबलाय नेत्रं
स्यात्स्वाहास्त्रं ह्यंगकल्पनं॥ भ्रूमध्यकंठहृदयनाभ्यंध्वारकेषु च॥ षट्पदानि मनोर्न्यस्य वर्णान्न्यसेन्न तत्सुधीः॥ मूर्द्धि दृक्श्रवणद्वंद्वे नासा
यां मुखमध्यतः॥ कंठहृद्बाहुयुग्मे च नाभौ पृष्ठे च गुह्यके॥ जान्वोश्च पादयोस्तद्वत्स्थानेष्वेषु यथाक्रमं॥ सारदातिलके तु॥ मूर्द्धि भाले हृक्श्रो
त्रयुग्मे कर्णनासोष्ठतालुषु॥ कंठे बाहुद्वये पश्चाद्धृदयोदरनाभिषु॥ गुह्योरुजानुयुग्मेषु जंघयोः पादयोर्न्यसेत॥ पश्चान्न्यसेदनुक्रं॥ ॥अत्र य
थोपदेशन्यास॥ राकेंद्वाभसितांगस्रवदमृतमणिछत्रनोथोनिविष्टः श्रीभूम्याश्लिष्टपार्श्वः स्फटिकमणिनिभोशेषभूषाविशेषः॥ वामे दध्य
न्नपूर्णं कनकजनवषकं स्वर्णपीयूषकुंभं श्रीमद्बीवामनाख्यः सततनमवतुवो विष्णुरिष्टार्थदायी॥ वामेन्नपात्रमित्युक्ते दक्षिणे कुंभं ज्ञेयं॥ पू
जां तु वैष्णवे पीठे कर्त्तव्या साधकोत्तमैः॥ आदावंगानि संपूज्य पश्चाच्छक्तीः प्रपूजयेत॥ अभ्रवर्णाः सुभूषाढ्या वराभयकराः शुभाः॥ सुधासुमन

339

त्रप्रातःकृत्वादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वाशिरसिप्रजापतयेऋषयेनमः ॥ मुखेगायत्रीछंदसेनमः ॥ हृदिश्रीलक्ष्मी
वासुदेवायदेवतायैनमः ॥ इतिविन्यस्यममसर्वेष्टसिद्धयेविनियोगःकृतांजलिःकृत्वा ॥ ॐह्रींह्रींहृदयायनमः ॥ ॐश्रींश्रींशिरसेस्वाहा
ॐलक्ष्मीशिखायैवषट् ॥ ॐवासुदेवायकवचायहुं ॥ ॐनमःअस्त्रायफट् ॥ इतिपंचांगमंत्रान्मूलाभिरुक्तयोः पाणयोरंगुलिषुविन्यस्यने
त्ररहितेषुहृदयादिषुचविन्यस्ययथोक्तरूपंध्यात्वामानसंपूजादिसर्वंद्वादशाक्षरवत्कुर्यादिति ॥ ॥ सुंदराचार्यशिष्येणश्रीनिवासेनधीमता
चंडिकायांप्रणीतायांद्वात्रिंशत्प्रकाशकः ॥ ॥ इतिश्रीसुंदराचार्यशिष्य·श्रीनिवासभट्टविरचितायांश्रीशिवार्चनचंडिकायांद्वात्रिंशत्प्रका
शकः ॥ सर्वसंपत्प्रदोनित्यंषोडशाक्षरईरितं ॥ वेदादिःप्रणवोमायाभुवनेश्वरीबीजंह्रौंस्वरूपंशंकरस्वरूपंडतंनारायणंनारायणायहृन्नम
हृल्लेखाभुवनेशीबीजं ॥ तथा ॥ ऋषिर्नारायणश्छंदोप्यनुष्टुबुदाहृतं ॥ देवतास्याहरिहरःसर्वाभीष्टप्रदायकः ॥ षड्दीर्घयुग्मायया च षडंगा
निप्रकल्पयेत् ॥ शूलंचक्रंपांचजन्यमभीतिंदधतंकरैः ॥ स्वस्वरूपाढ्यनीलार्धदेहंहरिहरंभजे ॥ दक्षोर्द्धादितदर्द्धांतमायुधविकांतथागौ
रीगंगार्धयष्टमीमता ॥ लोकेशास्तवहिपूज्यावज्रादीन्यपि ॥ एवंसम्यक्प्रकारेणपूजितेभीष्टमाप्नुयात् ॥ ॥ अथप्रयोगः ॥ तत्रप्रातः
कृत्वादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वा ॥ शिरसिनारायणायऋषयेनमः ॥ मुखेअनुष्टुप्छंदसेनमः ॥ हृदयेश्रीहरिहराय
देवतायदेवतायैनमः ॥ इतिविन्यस्यममसर्वाभीष्टसिद्धयेविनियोगइतिकृतांजलिःकृत्वाह्रांहृदयाय० ॥ ह्रींशिरसे·ह्रूंशिखा·ह्रैंकवचा·ह्रौंने

शि·चं
३४०

नमः॥ मूर्द्धि ॐ नमः॥ दक्षनेत्रे नं· वामे मों· दक्षश्रोत्रे विं· वामे षं नासायां रें॥ मुखे वं· कंठे वं· हृदि यं· दक्षबाहौ तं· वामे यं· नाभौ मं· पृष्ठे
ह्रां· गुह्ये वं· दक्षजानुनि लां वामे यं· दक्षपादे स्वां· वामे हां नमः॥ इति विन्यस्य ध्यानाद्यात्मपूजान्ते योगपीठं संपूज्य॥ ॐ नमो विष्णवे सद
सोमाय त्रैलोक्याप्यायनाय स्वाहा इति॥ योगपीठमध्ये वृत्तमंडलमभ्यर्च्यावाहनाद्यर्घ्यगार्चितं षोडशदलेषु देवाग्रादिप्रादक्षिण्येन
पूषायैः सुमनसायै· प्रीत्यै· तुष्ट्यै· पुष्ट्यै· ऋद्ध्यै· द्युत्यै· सौम्यायै· मरीचिन्यै· अंशुमालिन्यै· शशिन्यै· दुर्भगायै· लक्ष्म्यै· छायायै· संपूर्ण
मण्डलायै· अमृतायै नमः इति संपूज्याष्टदलेषु दिक्षु विदिक्षु प्राग्वद्वासुदेवादिमूर्त्तीः शान्त्यादिशक्तीश्च संपूज्य तद्बहिर्द्वादशदलेषु
प्रागुक्तकेशवादिद्वादशमूर्त्ती· संपूज्याष्टदलेषु· कुमुदाय· कुमुदाक्षाय· पुण्डरीकाय· वामनाय· शंकुकर्णाय· सर्वनेत्राय· सु
मुखाय· सुप्रतिष्ठिताय॥ इति संपूज्य प्रथमचतुरस्रे इन्द्रादीन् द्वितीयवज्रादीन् तृतीयलक्ष्मीप्रकरणोक्तानष्टगजांश्च संपूज्य धू
पादिः सर्वं प्राग्वत्कुर्यादिति॥ तथा॥ दीक्षां प्राप्य शुचिर्भूत्वा जपेद्वादशलक्षकं॥ तदर्द्धं वा तदर्द्धं वा जपेन्मंत्रमनन्यधीः· तदंते जुहुया
द्विवान्नायसेन दशांशकं तर्प्पणादि ततः कुर्यान्मंत्री मंत्रस्य सिद्धये॥ एवं सिद्धमनो मंत्री वांछितार्थान् प्रसाधयेत्॥ श्रीमंदिरे मंड
लमध्यभागे मायावटुवामनमर्चयित्वा॥ दध्योदनं निर्मलं शर्कराढ्यं निवेदयेत्तस्य सदा विभूत्यै॥ अन्नकामो हुनेन्नित्यमष्टाविंश
तिसंख्यया॥ सितान्नं घृतमिश्रं तु प्राप्नुयादन्नमक्षयं॥ अपूपं षड्रसोपेतं हुनेदष्टसहस्रकं॥ अलक्ष्मिनाशमायाति महतीं श्रियमा

340

राम
३४०

साप्रीतिस्तुष्टिःपुष्टिस्तथैवच॥ऋद्धिर्धृतिश्चसौम्याचमरीचिन्यंशुमालिनी॥शशिनीउर्गभाचैवलक्ष्मीश्छायातथैवच॥संपूर्णामण्डलाचै
वममृताषोडशीकला॥सशक्तिकान्वासुदेवान्नतीयावरणोर्चयेत्॥केशवाद्यैश्चतुर्थस्यात्पंचमंकुमुदादिभिः॥शुभ्रवर्णाः शंखचक्रगदा
पंकजपाणिभिः॥कुमुदःकुमुदाक्षश्चपुंडरीकोथवामन॥शंकुकर्णाःसर्वनेत्रःसुमुखःसुप्रतिष्ठित॥यजेत्षष्ठेलोकपालान्सप्तमेदिग्ग
जानपि॥अपिशब्देनवज्रादिपूजानंतरंदिग्गजपूजनमुक्तं॥वज्रादीन्दिग्गजानष्टौसप्तावरयामीरितमितिशारदातिलकात्॥सूर्यवह्नि
मण्डलेसममभ्यर्च्यपश्चात्सोममंडलंसमर्चयेदित्यर्थः॥चंद्रासनत्वाभिधानादतदंतैरैवासनार्चेतिकेचित्॥तत्र॥धर्मज्ञानमयेपीठेपूज
येच्चंद्रमंडले॥विश्ववेसहसोमायत्रैलोक्याप्यायनायच॥स्वाहांतस्तारहृत्सर्वोमंत्रेशोर्वावयेन्नतः॥इतिमंत्रतंत्रप्रकाशवचना
त्॥ ॥तत्रचंद्रमंडलं॥एतेनपीठमंत्रांतेयोगपीठंसंपूज्यतदेवचंद्रमंडलेनध्यात्वोक्तमंत्रेणाभ्यर्च्यतत्रदेवंपूजयेदिति॥पीठेत्युक्ते
पीठेयोगपीठत्वंतुमण्डूकादिपीठमंत्रांतमभ्यर्चितस्यैवअन्यथानवशाक्यर्चनाभावात्पीठत्वानुपपत्ते॥अथप्रयोग॥ ॥तत्रप्रातःकृ
त्यादियोगपीठन्यासांतेमूलमंत्रेणप्राणायामत्रयंकृत्वाशिरसिइंदवेऋषयेनमः॥मुखेविराट्छंदसेनमः॥हृदयेश्रीदधिवामना
यदेवतायैनमः॥इतिविन्यस्यप्राग्वद्विनियोगमुक्त्वा॥ॐहृदयायनमः॥नमःशिरसे·विश्ववेशिखायै·सुरपतयेकवचाय·महाबला
य·नेत्राय·स्वाहाअस्त्राय·भ्रूमध्यॐनमः॥कंठेनमोनमः॥हृदयेश्रीविश्ववेनमः॥नाभौसुरपतये·लिंगमहाबलाय·मूलाधारेस्वा

शि·वं
३४१

पितयैवश्रीवीजद्वयेनवेष्टयेदेतद्यंत्रमुक्तफलदंभवति॥ तथा॥ ससाध्यनामप्रणावाद्यमध्यमष्टाक्षरैरुज्ज्वलपत्रमूलं॥ मंत्राक्षराणिद्विशआलिखेच्चपत्रेषुशिष्टद्वयमन्यपत्रे॥ वहिर्वृतंद्वादशवर्णकेनतेनोवहिर्मातृकयाववीतं॥ संपूजितंचंदनपुष्पवैर्ययंत्रमिदंश्रीकृदभीष्टदंच॥ ॥अस्यार्थ॥ अष्टदलपद्मंकृत्वातन्मध्येसाध्यसहितंप्रणावंविलिखेत्तत्वे॥ सरेषुनारायणाष्टाक्षरवर्णानेकैकशः॥ समालिख्यतत्पत्रेषुमूलमंत्रवर्णान्द्विशोद्विशोविलिख्यपद्माद्वहिर्वृत्तत्रयंकृत्वाभ्यंतरवीथ्यांवासुदेवद्वादशार्णैनिरंवेष्टयित्वावाह्यवीथ्यांमातृकार्णैस्तथैववेष्टयेत्॥ एतद्यंत्रमुक्तफलदं॥ तथा॥ तारकामरमासौधवीजैर्युक्तोमनुर्मतः॥ पूर्वमंत्रस्यादौप्रणावकामवीजंवंवीजानीयोजयेदित्यर्थः॥ तथा॥ वामनोमुनिराख्यातोगायत्रीछंदईरितं॥ --तावास्यसंप्रोक्तसन्यज्ञेश्वरवामनः॥ षड्दीर्घकामवीजेनषडंगानिप्रविन्यसेत्॥ कर्पूरधवलंदेवंनिविष्टंसरसीरुहे॥ सुप्रसन्नंसुनेत्रंचचारुस्मितमनोहरं॥ दराउवामृतकुंभवंशारच्चन्द्रसमप्रभं॥ दधिभक्तसोपदंशवसुपात्रंचविभ्रतं॥ चिंतयेज्जगतामाद्यंजगदार्तिहरंहरिं॥ अस्यपूजादिकंसर्वंपूर्वोक्तेनैववर्त्मना॥ ॥अथप्रयोगः॥ तत्रयोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वाशिरसिच्यवनामऋषयेनमः॥ मुखेगायत्रीछंदसेनमः॥ हृदयेश्रीयज्ञेश्वरवामनायदेवतायैनमः॥ इतिविन्यस्यह्लींक्लींमित्यादिनाषडंगन्यासंकृत्वाध्यानमानसपूजादिप्राग्वत्सर्वंकुर्यादिति॥ कुर्यात्ततोमंत्रसिद्धःकाम्यानर्थानभीष्टदायकान्॥ सहस्रंहविषाहोमोलक्ष्मीदोध्यन्यमायुया

342

राम
३४१

प्नुयात् ॥ अयुतंमंत्रविद्धुत्वादध्यन्नंशर्करान्वितं ॥ अन्नपर्वतमाप्नोतियत्रसगछति ॥ हुनेद्विल्वसमीपस्थःपद्माक्षेरयुतंनरः
वसुधारामहालक्ष्मीर्वसुवर्षतितत्रवः ॥ विद्यार्थीप्रजपेल्लक्षं·ध्यायेद्देवंजनार्दनं ॥ जुहुयात्पायसंमंत्रीसाक्षाद्वागीश्वरोभवेत्
पुत्रकामोजपेल्लक्षंपुत्रजीवफलैर्हुनेत् ॥ तत्काष्ठैरपितेवह्नौउत्तमंपुत्रमाप्नुयात् ॥ ध्यात्वात्रिविक्रमंदेवंरक्तासंकरवीरकैः हुनेद
युतनसरव्वैष्टासर्वत्रविजयीभवेत् ॥ राज्यकामोपिपद्मानामयुतंजुहुयान्नर ॥ ध्यात्वावेंडपदेराज्यंलभेताप्यकंटकं ॥ अपामार्गद
लैर्हुत्वालवंगैर्वामधुप्लुतै ॥ अयुतंसाध्यनामाढ्यंसवश्योभवतिध्रुवं ॥ आरोग्यकामोजुहुयादपामार्गैःशतं ॥ तप्राहान्मुच्यतेरो
गैस्तावद्देवजपेत्सुधी ॥ आयुकाःमस्त्रिमध्वक्तैस्तिलदुर्वाहुशाक्षतैः ॥ अयुतंजुहुयात्तावज्जपेदायुर्लभेच्चिरं ॥ स्मृत्वात्रिविक्रमं
देवंजपेदष्टसहस्रकं ॥ मुक्तबंधोभयेत्सद्योनात्रकार्याविचारणा ॥ अष्टसहस्र अष्टोत्तरसहस्रमितमर्थ ॥ ॥ एवंसत्रज्ञेयं
पद्मसप्तदशासरेतुकर्णिकायांध्रुवंलिखेत् ॥ स्वरैःसंवेष्टितंतत्रकेसरेषुवकादिकान् ॥ क्षांतांद्विशोलवर्गांश्चमंत्रवर्णान्दलेलि
खेत् ॥ शिष्टान्वाह्येचसंवेष्ट्यप्रणवाभ्यांततोवहिः ॥ श्रीवीजभ्यांवेष्टयेद्वायंत्रंश्रीपुत्रमित्रदं ॥ अस्यार्थ ॥ सप्तदशदलंपद्मंविरच्य
तन्मध्येस्वरषोडशकवेष्टितंप्रणवंसाध्यंविलिख्यतत्केसरेषुकादिक्षांतान्द्वितीयदलवर्जितान् ॥ वर्णान्द्विशद्विशोविलिख्यदले
षुमंत्रवर्णानवशिष्टसप्तदशप्रतिदलमेकैकशोविलिख्यसंपुटाकारेणप्रणवद्वयेनमध्ययंत्रंतथाभवतितथासंवेष्ट्यतद्बहिर

गगनं वामकर्णाविंदुसमन्वितं ॥ एकाक्षरो मंत्रः प्रोक्तो हयग्रीवस्य मंत्रिभिः ॥ चंद्रः सकारः गगनं हकारः ॥ वामकर्णः ऊकारः विंदुरनुस्वारः ॥ एतैः ह्सूं
इति वीजमुद्धृतं ॥ ॥शांकरकल्पे तु ॥ शून्यं शून्यसमायुक्तं जीवस्योपरि संस्थितं ॥ अनुग्रहयुतं कृत्वा वागीशं सर्वकामदं ॥ इति ॥ शून्यं हकारः
शून्ययुक्तं विंदुयुक्तं जीवस्य सकारस्योपरि स्थितं अनुग्रहेणा औकारेणा युक्तं तेन ॥ ह्सौं इति वीजमुद्धृतं ॥ केचिदस्मिन्नेव श्लोके अनुग्रहेणो
सित्ररुद्रेणेति पठंति ॥ रुद्र एकारः ॥ तेन ह्सैं इति वीजं वदंति ॥ एवं त्रिविधमिदं वीजं ॥ सारसंग्रहे ॥ ऋषिर्ब्रह्मा समुद्दिष्टस्त्रिष्टुप् छंद
उदाहृतं ॥ देवता च हयग्रीवो भुक्तिमुक्तिप्रदायकः ॥ षड्दीर्घयुक्तमूलेन षडंगविधिरीरितः ॥ धवलनलिननिष्ठं क्षीरगौरं कराग्रे
र्जयवलयसरोजे पुस्तकाभीतिदाने ॥ दधतममलवस्त्राकल्पजालाभिरामं तुरगवदनविष्णुं नौमि देवारिजिष्णुं ॥ दक्षोर्ध्वादितदधो
तमायुदध्यानं ॥ परोक्ते प्रयजेत्पीठे गायत्र्यावाह्य मंत्रवित् ॥ ठं तं वागीश्वरं यद्विद्महे यदमुच्चरेत् ॥ हयग्रीवश्च ठं तन्नस्याद्धीमही
ति ततो वदेत् ॥ ततो वदेव मंत्रस्तन्नो हंसः प्रचोदयात् ॥ प्रथमा षड्भिरंगैः स्याद्द्वितीया चाष्टभिर्हयेत् ॥ प्रज्ञा हयस्तथा मेधा हय
स्मृतिर्हयस्तथा ॥ विद्या हयघ्नी हयश्च वागीशी हय एव वा ॥ विद्याविलासहयो हयानां नादमर्दनः ॥ लक्ष्म्यादिभिस्तृतीया स्यात्ताश्च ल
क्ष्मीः सरस्वती ॥ रतिः प्रीतिः कीर्तिकांती तुष्टिः पुष्टिस्तथाष्टमी ॥ चतुर्थीभूतदायैः स्याल्लोकपालैस्तु पंचमी ॥ तदायुधैश्च षष्ठी स्यादेवं पू
जा समीरिता ॥ ॥अथ प्रयोगः ॥ तत्र प्रातः कृत्यादियोगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः ॥ मुखे त्रि

342

त् ॥ धान्यहोमेन वीजैश्च शतपत्रसमुद्भवैः ॥ सहस्रहोमाज्जीतीनां नाशो भवति निश्चितं ॥ दध्यक्तान्नेन जुहुयाद्दुर्गते मुच्यते नरः ॥ त्रैविक्र
मं वामनस्य रूपं ध्यायन्मंत्रं जपेत् ॥ घोराद्भयान्मुच्यते सो देवेशं वपटे लिखेत् ॥ भित्तौ वा लिखितं गंधाद्यैर्महतीं श्रियमाप्नुयात् ॥ ॥ ॐ न
मः पदमुक्त्वा ततो भगवपदं ॥ विष्णवे पदमारभ्य पूर्वमंत्रं समुच्चरेत् ॥ ऋषिः कपिल आख्यातो गायत्रं छंद उच्यते ॥ उदीरितः सर्वव
ग्यो देवता भोगवामनः ॥ षड्भिर्मंत्रपदैर्देहन्तः षडंगविधिरुत्तमः ॥ नीलवर्णश्चतुर्वाहुः शंखचक्रगदाब्जधृक् ॥ सर्वान्भोगान्ददात्येष
भक्तानां भोगवामन ॥ अस्य पूजादिकं सर्वं मंत्री पूर्ववदाचरेत् ॥ ॐ नमः हृत् भगवते शिरः ॥ विष्णवे शिखा ॥ सुरपतये कवचं ॥ महाब
लाय नेत्रं ॥ स्वाहा अस्त्रं ॥ अन्यत्पूर्ववत् ॥ ॥ तथा ॥ तारो हृदयमायवालंकांते विष्णवे पदं ॥ आरभ्योक्ताराक्षरस्यर्षिर्ब्रह्मा गायत्रमुच्य
ते ॥ छंदश्च देवता मायाबालकवामनः ॥ षडंगानि मंत्रस्य पदैः षड्भिः समाचरेत् ॥ पीताम्बरोत्तरीयोसौ मौंजीकौपीनधृग्घरिः ॥ कमण्डलुं
च दध्यन्नं दण्डशक्तिं वरैर्दधत् ॥ यज्ञोपवीती नीलाभो ध्यातव्याश्छंदवामनः ॥ पूर्वादिकं पूर्ववच्च कुर्यान्मंत्री यथाविधि ॥ अन्नविद्या
भूमिदोयं भक्तानामभयप्रदः ॥ एतन्मंत्रोपासकानां नियमानाह महाकपिलपंचरात्रे ॥ नाश्नीयात्तुण्डलीशाकं तथा चोदुंबरं फलं ॥ सिंघा
नं करकं चैव भक्षयन्न कदाचनः ॥ पद्मपत्रे न भुंजीत तथा वार्कदलेष्वपि ॥ उपकार्यासंवीजामीन स्पृशेच्च कदाचन ॥ वल्मीकं गोमयं वि
प्रच्छायामपि न लंघयेत् ॥ देवाग्निगुरुपूजां च कुर्याद्भक्तिसमन्वितः ॥ ॥ सारसंग्रहे ॥ अथोच्यते हयग्रीवमंत्रः सर्वसमृद्धिदः ॥ वंद्रस्य

दीनो न संशयः ॥ जलमण्डलमध्यस्थं ध्यात्वा चन्द्रांशुनिर्मलं ॥ अथा नयकारं ह्येतत्सर्वरोगविनाशनं ॥ शून्यगर्भगतं यन्त्रं हिमगोक्षीरसंनि
मे ॥ ध्यायधत्पद्ममध्यस्थं निर्विषीकरणं परं ॥ लिखद्रोचनया भूर्ये मंत्रं वाहौ विधारयेत् ॥ महारक्षा भवेदेषा सर्वदोषविनाशिनी
वीजं रेफसमायुक्तं हुंकारद्वयमध्यगं ॥ यस्य नाम्ना जपेन्मंत्रं मारयेत्तं न संशय ॥ वीजं रेफसमायुक्तं सकारहकारयोर्वध ॥ हंकारद्व
यमध्यस्थ वीजराजं मनूत्तमं ॥ विद्वेषयेज्जगत्सर्वं मासजप्तं न संशयः ॥ ॥ तथा ॥ पूर्ववदङ्गिरवत्प्रणवोद्गीथपदं वदेत् ॥ स
र्ववागीश्वरशब्दं तु ततोरेश्वरशब्दत ॥ सर्ववेदपदं प्रोक्ता मयाविं त्वपदं वदेत् ॥ सर्वस्माद्वोधयद्वंद्वस्वाहांतके च नो विरे ॥ स्ववीज
प्रणवाभ्यां वसंपुटः परिकीर्त्तित ॥ षड्त्रिंशदक्षरो मंत्रो हयग्रीवहरेः शुभे ॥ स्ववीजं हयग्रीववीजं पूर्वोद्धृतं अन्यत्सुगमं ॥ षड्त्रिंशद
क्षरः स्वाहारहितेयशभो ॥ तद्योगे त्वष्टत्रिंशदक्षरः ॥ तथा ॥ ऋषिर्ब्रह्मानुष्टुबुक्तं छंदो देवो स कीर्तित ॥ वागेश्वर्यप्रदानित्वं हयग्री
वहरिस्वयं ॥ पंचांगानि मनोस्तारमंत्रयादैर्भवंति हि ॥ हयग्रीवं चतुर्वाऊशारदांभोधरद्युतिं ॥ शंखारियरिणामस्त्रास्यजानुन्यस्तक
रं भजे ॥ वामदक्षोर्द्वयोः शंखचक्रे ॥ पूर्वादितो यजेत्पीठे देवमावाह्य मंत्रवित् ॥ एकाक्षरेणामूर्तिं तु कल्पयित्वा विधानतः ॥ दिग्गतां
श्चतुरो वेदान्यजेत्केसरगांस्ततः ॥ कोणकेसरगानंदस्मृतिमायांस्तथार्चयेत् ॥ सर्वशास्त्रं च पत्रेषु षडंगानि समर्चयेत् ॥ लोकपा
लान्यजेद्वाह्ये तेषां मंत्रेणितद्धि ॥ विधानेनामुनादेवं भजन्वाचस्पतिर्भवेत् ॥ ॥ अथ प्रयोग ॥ तत्र प्रातःकृत्यादियोगपीठन्यासांते

343

ष्टुप्छंदसे नमः॥ हृदये हयग्रीवाय देवतायै नमः॥ इति विन्यस्य प्राग्वद्विनियोगं कृत्वा॥ ह्लां हृदयाय नमः॥ ह्लीं सिरसे स्वाहा ह्लूं शिखायै वष
ट्॥ ह्लैं कवचाय हुं॥ ह्लौं नेत्राय वौषट्॥ ह्लः अस्त्राय फट् इति करषडंगन्यासं कृत्वा ध्यानादिपीठपूजांते॥ ॐ वागीश्वराय विद्महे हयग्री
वाय धीमहि तन्नो हंसः प्रचोदयात्॥ इत्यनयावाह्य मूलेन स्थापनाद्यंगपूजांतेष्टदलेषु॥ प्रज्ञाहयाय नमः॥ मेधा हं स्मृति विद्या
श्री वागीशी विद्याविलास॥ नादमर्दन हयाय दलाग्रेषु लक्ष्म्यै सरस्वत्यै रत्यै प्रीत्यै कीर्त्यै कान्त्यै तुष्ट्यै पुष्ट्यै इति संपूज्य द्वितीया
ष्टदलेषु दधिवामनपूजोक्तकुमुदाद्यष्टमूर्त्तीः संपूज्येंद्रादिपूजादिकं प्राग्वत्कुर्यादिति॥ तथा॥ वेदलक्षं जपित्वांते तद्दशांशं हुनेद्घृतैः
तर्पयित्वा च लिखेत्सुभ्रुदैश्च सुगंधिभिः॥ आत्माभिषेकं कृत्वा च तर्पयेद्गुरानपि॥ ततः सिद्धमनुर्मंत्री प्रयोगान्विदधीत वै॥ शशि
मण्डलमध्यस्थं हिमकुंदनिभं मनुं॥ करे ध्यात्वा न्यसेद्वक्त्रे सभापूज्यः सजायते॥ अथवा तत्करं कुंभे न्यस्य तज्जलसेवनात्॥ प्रातरह
रिलूतादिदोषभाग्यपि पंचधा विषं॥ योन्मस्त्रिमसप्रजप्तं तु प्रभाते प्रत्यहं पिबेत्॥ स प्राज्ञो जायते तस्य दिव्या वाणी मनोरमा॥ इंदुमंडलम
ध्यस्थं लकारे न्यस्य मंत्रकं॥ पीतं वादीमुखे ध्यात्वा स्तंभयेत्तस्य भारतीं॥ प्रणवद्वयमध्यस्थ हकारद्वयमध्यगं॥ वादिनाम लिखेत्कुंभे
भूर्जपत्रे हरिद्रया॥ यंत्रं प्रतिष्ठितप्राणांशरानद्वयसंपुटे॥ वेष्टितं पीतसूत्रेण मूकत्वं कुरुते चिरात्॥ भृंगारपुरमध्यस्थं रेफाक्रांतं तु
बीजकं॥ ज्वालामालाकुलं ध्यायेत्स्तंभनं परमं मतं॥ भृगारं त्रिकोणं वायुमंडलमध्यस्थं वायुबीजसमन्वितं॥ संहारकमिदं ध्यानं विद्या

वित् ॥ कुर्याद्दानं तु भोक्तेन विधानेन विधानवित् ॥ पंचांगानि प्रणवमंत्रप्रदैः पुरश्चरणांच षड्विंशल्लक्षणां ॥ तथा ॥ स्वबीजं पूर्वमुद्धृत्य
ङें तं हयशिरो वदेत् ॥ हृदंतोष्टाक्षरो मंत्रो हयग्रीवस्य चेरितः ॥ ङें तं हयशिरः हयशिरसे हृन्नमः ॥ अथान्यांगविधिर्न्यासजपपूजा यथावि
धि ॥ सकाक्षरोक्तमार्गेणाद्धं दोर्नुतुर्वदाहृतं ॥ पद्माक्षमालालिखिते पुस्तकानि दधानमंभोरुहसंपुटस्थं ॥ कर्पूरभंगाधिकशुभ्रकांतिं ह
याननं सौम्यमिह स्मरामि ॥ दक्षिणाध ॥ करमारभ्य वामाधः करपर्यंतमायुधध्यानं ॥ कवितार्थी प्रदोनित्यमस्मान्मान्यो न कुर्वीवि ॥
सारसंग्रहे ॥ अथोच्यते विधिध्यानं वराहस्य मनोक्रमात् ॥ सांगहोमाभिषेकं च सप्रयोगं सजापकं ॥ भगवत्पदमाभाष्य ङें तं स्यादुद्धव
रावदं ॥ ङें तं हरूपमाभाष्य व्याहृतीश्च ततो वदेत् ॥ ङें तं पतिं भूपतित्वं मे देहि पदं वदेत् ॥ दापय स्वापदं प्रोक्ता हांतस्मारहृदादिक ॥
त्र्ययस्त्रिंवर्णसंख्योयं वराहमनुरीरितं ॥ भगवत्पदं ङें तं भगवते वरास्वरूपं ङें तं हरूपं हरूपाय ॥ व्याहृतीभूर्भुवस्वः ङें तं पतिं पत
ये ॥ भूपतित्वं मे देहि स्वरूपं ॥ हांतस्मार हृदादिकः ॥ तारः प्रणवः हृन्नमः ॥ अत्र संधि ॥ ॐ नमो इत्यादिक ॥ तथा ॥ ऋष्यादयो भार्गवा
नुष्टुब्वराहाः समीरिताः ॥ ङें तो हृद्देवभृंगस्याद्यो मोक्तस्याद्दशःशिरः ॥ शिखा नेजो धियन्तये विश्वरूपाय वर्म च ॥ महाद्रूष्णाय चास्त्रं स्या
त्संवांगविधिरीरितः ॥ ॥ प्रपंचसारे तु ॥ सप्तभीश्चपुनः षड्भिः सप्तभिश्चाथ पंचभिः ॥ अष्टभिमूलमंत्रार्णैर्विदध्यादंगकल्पनमित्यु
क्तं ॥ ॥ सारसंग्रहेपि ॥ अथवा मंत्रवर्णौक्तसप्तषड्सप्तपंचकैः ॥ वसुभिश्चापि पंचांगं विदध्यान्मनुविन्नमः ॥ अनयः सप्त ॥ साय

मूलेनप्राणायामत्रयंकृत्वाशिरसिब्रह्मणेऋषयेनमः॥ मुखेअनुष्टुप्छंदसेनमः॥ हृदयेश्रीहयग्रीवायदेवतायेनमः॥ इतिविन्यस्यप्राग्वद्विनि
योगमुद्रा॥ ॐहृदयायनमः॥ उद्गिरत्प्रणवोद्गीथसिरसेस्वाहा सर्ववागीश्वरेश्वरशिखायैवषट्॥ सर्ववेदमयाचिंत्यकवचायहुं सर्वंबोधय३
अस्त्रायफट्॥ इतिपंचांगमंत्रान्मूलमंत्राभिमृष्टकरांगुलिषुविन्यस्यनेत्रवर्जंहृदयादिषुविन्यस्यध्यानादियोगपीठपूजांतेएकाक्षरेणमूर्ति
कल्पयित्वावाहनादिषुध्योपचारांतेष्टदलकेशरेषुदेवाग्रादिचतुर्दिक्षुऋग्वेदायनमः यजुर्वेदायनमः॥ सामवेदाय· अथर्ववेदाय· अस्मा
ग्नेयादिकोणेषु॥ षडंगेभ्यो· स्मृति· भ्योन्यायशास्त्राय· सर्वशास्त्रेभ्योनमइतिसंपूज्याष्टदलेषुप्राग्वदंगानिसंपूज्यलोकेशाद्यादिसर्वंकुर्यादि
ति॥ तथा॥ षड्विंशत्यक्षकेनजप्तानदंतेजुहुयात्सुधीः॥ ऊंदेहित्वाउसंपुक्तैःसर्पशादिनतनश्वरेत्॥ लक्ष्मीकामः प्रजुहुयाद्बिल्वपत्रैःशु
शोभनैः॥ वाक्कामोजुहुयान्नित्यंऊंदेहिमधुराप्लुतैः॥ आज्यंब्राह्मीरसेपक्वंमंत्रेणानेनसाधितं॥ सेवितंविधिनाप्रातरनगलकवित्वदं
साधितामंत्रवर्णायवचामनुदिनंसुधीः॥ भक्षयेत्सर्वशास्त्राणांवाख्याताभवतिध्रुवं॥ ऋग्यजुःसामरूपंचवेदाभरणाकर्मच॥ प्रणा
वोद्गीथवपुषेमहाश्वशिरसेपदं॥ ठं·तंपदद्वयंपूर्वंनमोनः मोहमंतकः॥ हंसादिरश्वचक्रस्यप्रोक्तःषड्विंशदक्षरः॥ ठं·तंपूर्वपदद्वयं·ऋ
ग्यजुःसामरूपायवेदाभरणाकर्मणे॥ अन्यत्सुगमं॥ ॥ विश्वार्त्तीशापदंप्रोक्तास्वात्मरूपायविन्मया॥ नंदांतेरूपिणोतुभ्यंपदंप्रोक्तान
मोवदेत्॥ हयग्रीवपदंपश्चाद्विद्याराजायविद्महे॥ स्वाहांतोहंचहंसादिरष्टत्रिंशाक्षरोमनुः॥ अथास्यांगविधिध्यानपूजाकाम्यानिमंत्र

शि॰चं
३४५

तांजलिंकृत्वा ॥ एवंशृंगायहृदयायनमः ॥ ज्वोमोल्कायशिरसे· तेजाधिपतयेशिखायै· विश्वरूपायकवचा· महादंष्ट्रायअस्त्रायफट्
इत्यंगमंत्रान्मूलव्याप्तकरांगुलिषुविन्यस्यनेत्ररहितपंचांगेचविन्यस्यध्यानादिपुष्पोपचारांतेकोलदंष्ट्रायांवसुधायैनमः ॥ अष्टद
लकेसरेषुदेवाग्न्यादिचतुर्दिक्षुहृदयादिकवचांतंसंपूज्यग्न्यादिकोणेषुरंडेशानयोर्मध्येनिर्ऋतिवरुणयोर्मध्येचास्त्रंसंपूज्याष्टदले
षु ॥ चक्राय· शंखाय· खड्गाय· खेटाय· गदायै· वराय· अभयायनमः ॥ ततोलोकेशावीदिपूर्ववत् ॥ तथा ॥ एकलक्षंजपेन्मंत्रंनिय
मेनजितेंद्रियः ॥ तद्दशांशंप्रजुहुयात्पद्मैःस्वादुपरिप्लुतैः ॥ तर्पणादिततःकुर्याद्ब्राह्मणाराधनावधि ॥ विल्वप्लक्षंस्यशान्तिंस्यंजपे
न्मासंसहस्रकं ॥ दशांशंजुहुयादग्नौपुरश्चरणवान्भवेत् ॥ अर्थीध्यानाज्जपाद्भूमिर्जपपूजाहुतेक्रमात् ॥ धनधान्यधरालभ्यांभ
वेत्सेवनसंशयः ॥ भूमंडलेसदाध्यानंप्रयच्छतिध्रुवंशुभं ॥ वारुणातूच्चकैःशांतिमाग्नेयेवप्रयच्छति ॥ वश्यंज्वरादिकंसम्यग्ज्वा
ट्वायुमंडले ॥ पुमंडलेशत्रुभूतग्रहक्ष्वेडादिरक्षणां ॥ सिंहगेशुक्लपक्षेहिरवौश्वेतशिलांशुभां ॥ पंचगव्यविनिक्षिप्तांसंजप्तामयु
तेनवा ॥ उदङ्मुखोजपेन्मंत्रंक्षेत्रेतांनिखनेत्ततः ॥ शत्रूणांसंनिरोधोहिक्षेत्रस्यास्यविनश्यति ॥ अर्कोदयेगारवारेजपेन्मंत्रंसमाहि
तः ॥ वैरिरूपादपिक्षेत्रान्मृदमानीययत्नतः ॥ तांचत्रिधाविभज्यासंवृणामेकंविलिखेच्च ॥ पाकपात्रेपरांशंचपयस्यन्नंसतोयके
संस्कृतेहव्यवाहेचतराउलेष्वपचेच्चरुं ॥ ततदेवंयथावस्त्रधूपदीपादिभिर्यजेत् ॥ साज्येनतेनहविषाहुनेद्दशाधिकंशतं ॥ एवंमो

345

राम
३४५

का: पंच ॥ वसवोष्टौ ॥ जान्वोपठंधिसुवर्णानिभं च नाभेराजानु वंडधवलं वगलाद्धृदंतं ॥ वह्निप्रभं शशिनिभं शिरसागलांतं मौलिस्थ
लाद्वयदमंदनिभं च कांतं ॥ संविभ्रतं करतलेररिसंखरखड्गान्खेटं गदां तदनु शक्ति वराभयानि ॥ सर्वं महाधरराशोभितमेकदंष्ट्र·
माद्यं वराहमनिशं प्रभजस्वचित्ते ॥ दक्षामूर्द्धयोराद्येन तदाद्यधस्थयोरन्येन तदाद्यधस्थयोरपरेन तदाद्यधस्थयोरितेन ॥ तथा ॥ धराधर
शरीरं वानीलजीमूतसन्निभं ॥ घटे परिघं ध्यायेत्सिद्धदेष्टधनावलं ॥ हेमाभ पार्थिवे ध्यानं मण्डले हिमसन्निभां ॥ वारुणो मण्डले व
ह्नेः कृशानुभमथानिले ॥ कृष्णं वियद्गुप्रभं स्याद्देवे ध्यायेच्चसूकरं ॥ दंष्ट्रायां वसुधा ध्यायेत्सशैलवनकाननं ॥ वागीशाहुं कृतो ध्याय
त्पवनं श्वसिते तथा ॥ वाह्वोर्विमानयोश्चंद्रसूर्यौ तु दरगान्वसून् ॥ ब्रह्माणं पादयोर्ध्याय हृदये च हरिं तथा ॥ शंकरं च मुखे ध्यायेदि
ति ॥ तथा ॥ पद्ममष्टदलोपेतमष्टहस्तकर्णिकं शुभं ॥ मण्डलं विरचय्यैवं सूर्यकोटिसमप्रभं ॥ तत्र संपूजयेत्कोलं वक्ष्यमाणविधा
नतः ॥ मूलेन मूर्त्तिं संकल्प्य कोलमावाहयेत्ततः ॥ तत्र गंधादिभिः सम्यक्त्वं संपूज्य सूकरं ॥ कोलडुष्ट्राग्येगतरन्वसुधादीन्प्रपूज
येत् ॥ विष्वगूर्ध्वमधश्चापि पूजयेदस्त्रमन्त्रमः ॥ वक्रकादीनि तद्वाह्ये यजेच्चक्रं दरस्यसिं ॥ गदां शक्तिं वराभीति लोकपालांस्ततो जयेत्
तदायुधानि तद्वाह्ये कोलपूजा समीरिता ॥ ॥ अथ प्रयोगः ॥ तत्र प्रातः कृत्यादियोगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि भा
र्गवायऋषये नमः ॥ मुखेअनुष्टुप्छंदसे नमः ॥ हृदये श्रीवराहाय देवतायै नमः ॥ इति विन्यस्य मयसर्वाभीष्टसिद्धये विनियोग इति कृ

गुडूचीरष्टसाहस्रं हुनेद्व्याधिविनश्यति ॥ आम्रपर्णौ हुनेन्नित्यज्वरसांतिर्भविष्यति ॥ गृहीत्वा हस्तयोनीरं जपेदक्षरसंख्यया ॥ ससाध्यं
षट्कोणो भूरावगतवीजं हरिमनुं षडश्रिष्ठांगानि प्रविलिखतु संधिष्वथ सुधा ॥ दिशोऽष्टार्णाञ्जं निगमदलमूले दलगतान्मनोवर्णा
नष्टौ समधिकमथांत्ये वहिरथो ॥ वसुमितदले किंजल्केषु स्वरान्द्विशआलिखेद्दलमनुमोवर्णान्वेर्मितानधिकोमिते ॥ विकृतिविवरे
किंजल्केष्वालिपिविंशआलिखेद्दलमनुमनोर्वर्णानंतेन्निमं वहिराद्यतं ॥ वेदाहितिकोलवीजमनुभिः साध्याख्यया संपुटेस्तद्बाह्येस्व
तुवर्णादिभिंतसलसाध्याख्यया वाह्यतं ॥ भूविवाह्यतमश्रिगर्भविलसत्साध्याख्यभूवीजशूलेषुभितिकोलवीजलसितं ॥ यंत्रं वराह
स्यतत् ॥ लाक्षाकर्पूरकृष्णागुरुमलयजसद्रोचनाकुंकुमैस्तत्संपिष्टैर्गोमयाद्भिः शुभतरदिवसे संलिखेच्चारुहैम्या ॥ लेखन्यास्वर्णा
पट्टेरजतफलकेराज्यमायामलाभस्ताम्रेस्वर्णानिजोष्टंपित्तलगजदले भूफले भौमपट्टे ॥ भूर्जे संसारयात्रा भवति वनितरां साध्य
जन्मेव यंत्रं सेपाताद्याभिषिक्तं निजहितफलदं राशिवर्जैर्धृतं तत् ॥ स्वध्यात्वा कोलरूपं तदपि च निखनेत्साध्यदेशे वराहं त्वावाद्यां
गानि दस्युप्रजपतु समवेतश्शुद्धरोगैर्विमुक्तः ॥ ॥अस्या~~र्थम~~र्थः॥ आदौ षट्कोणं कृत्वा तन्मध्ये प्रणवं विलिख्य तस्योदरे हमिति व
राहवीजं तत्र साध्यनाम चालिख्य तस्य षट्सु कोणेषु वश्यमाणाशुदर्शनषडक्षरमंत्रस्यैकैकमक्षरमालिख्य षट्कोणसंधिषु सुदर्शनषड
र्णस्य षडंगमंत्राणालिख्य तद्बहिश्चतुर्दलकमलं कृत्वा तत्केसरेषु दिक्षु नारायणाष्टाक्षरमंत्राणां नालिख्य वराहानुष्टुभमंत्रस्य वर्णाश्च

माष्टवारेषु कुर्यान्नियतधीः क्रमात् ॥ ततः शत्रु गृहीतं तत्क्षेत्रं संतप्य वादिरात् ॥ अहोमुखे भौमवारे मृदं गृह्य च पूर्ववत् ॥ पूर्ववच्च चरूंकृत्वा जुहुयात्प्रोक्तवर्त्मना ॥ वलिं च दद्यात्क्षेत्रस्य विरोधो नश्यति ध्रुवं ॥ वलिं देवस्य हुतसेषेण नैवेद्यं तयदित्यर्थ ॥ सप्तभिर्दिवसेश्चाथ डाकिनीविकृतिं हरेत् ॥ तावेममृत्तिकं दुग्धैर्विलोड्याज्येन संहुनेत् ॥ अष्टाधिकं सहस्रं च मंडले द्वितपाततः ॥ निःसपत्नासमृद्धास्या महार्थाच मही भवेत् ॥ आरग्वधसमिद्भिश्च जुहुयादयुतं सुधीः ॥ तस्य सर्वसमृद्धिः स्यात्क्षेमे क्षेत्रादिकं वहु ॥ अष्टाधिकं शतं मंत्री शालीभिर्दिनशो हुनेत् ॥ सतु संवत्सरात्तस्य व्रीहिपूर्णा गृहो भवेत् ॥ अनेन जुहुयादाज्यं सहस्रं प्रत्यहं बुधः ॥ तेन स्वर्णासमृद्धिः स्यादंजलिन्याः प्रसूनकैः ॥ सहस्रं स्वादुसंयुक्तैर्वा समां वृद्धिरिष्यते ॥ लाजाहोमाच्च कन्याप्तिरुत्पलैः श्रीभगवत्पलं ॥ विवादक्षेत्रमासाद्य तस्य जन्मदिने शुभे ॥ ॥ तत्रासीनो जपन्मंत्रमष्टोत्तरसहस्रकं ॥ एवं कृते वत तस्य भूविवादो विनश्यति ॥ तस्य वादिनः जन्मदिने जन्मनक्षत्रदिने ॥ आत्मानं मेरुसदृशं वाराहं चिंतयेद्बुधः ॥ अंगारवारये ः क्षेत्रं जपन्स प्रदक्षिणां ॥ कृत्वा मृदं च गृह्णीयात्तस्य क्षेत्रं भविष्यति ॥ नित्यं भूमिं स्पृशन्मंत्री जपेदष्टसहस्रकं ॥ विंदते महतीं भूमिं शमयेत्सर्वकंटकं ॥ भृगुवारे तथा प्रोक्तं भौमवारे विशेषत् ॥ जपेत्प्रतिष्ठाकामस्तु महतीं भूमिमाप्नुयात् ॥ नित्यमष्टसहस्रं तु यो जयेच्छ्रिमर्चयेत् ॥ महतीं श्रियमाप्नोति महाराजो भवत्मल ॥ तत्सहोमो जपांते स्याद्गुडैश्चैव सपायसैः ॥ सप्तद्वीपान्वा प्राप्नोति नात्र कार्या विचारणा ॥ दधिमध्वाज्यसिक्ताश्चतुरंगुलसंमिता

शि॰च
३४७

दयंती विभवैरन्नैश्वर्यात्तदागमा ॥ अस्यार्थः ॥ अष्टदलकर्णिकायां षट्कोणमध्यप्रचोदरे रमाधं वह्निबीजं विलिख्य षट्सु कोणेषु सुदर्शनष
डर्णीं न तत्संधिषु सुदर्शनमंत्रस्य षडंगमंत्रान् दलकेसरेषु नारायणाष्टाक्षरस्य वक्ष्यमाणवाराहाष्टाक्षरस्य चैकैकमक्षरं तलेषु वराहमंत्र
स्य चत्वारि चत्वार्यक्षराणि सर्वांत्यदले पंचाक्षराणि वहिः षोडशदलेषु क्षेत्रस्यपतिनेत्यादिसूक्तस्यर्चामर्द्धमर्द्धं वहिर्वृत्तत्रयांतराल
पारभ्यंतराले वेष्टनत्वेन धरामेवे वाह्यांतराले मातृकाचतुरस्रकोणेषु भूवीजं दिक्षु वराहवीजं च विलिख्य देतयंत्रमुक्तफलदमिति ॥ क्षे
त्रस्य पते मधुमंतमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ॥ मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृडयंतु ॥ मधुमतीरोषधीर्यो वंना
यो मधुमन्नो भवत्वंरिक्षं ॥ क्षेत्रस्य पतिर्मधुमान्नो अस्त्वसरिष्यंते ॥ अन्वेनं चरेम शुनं वाहः शुनं नरः ॥ शुनं कृषतु लांगलं शुनं वर
त्रा वध्यंतां शुनमष्ट्रामुदिंगय ॥ शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः ॥ पयस्तेनेमामुपसिंचतं ॥ अर्वाची सुभगे भव सीते वंदामहे
त्वा यथा नः सुभगाससि यथा नः सुफलाससि ॥ इंद्रः सीतां गृह्णातु तां पूषानियच्छतु सा नः ॥ पयश्वती दुहामुत्तरामुत्तरां समां ॥ शुनं नः
फाला वि कृषंतु भूमिं शुनं कीनाशा अभि यंतु वाहैः ॥ शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तं ॥ यदद्य कच्च वृत्रहन्नुदगा
अभि सूर्य सर्वं तदिंद्र ते वशे ॥ क्षेत्रस्य पतिनेति सूक्तस्य वामदेव ऋषिः पुरउष्णिगनुष्टुप्त्रिष्टुप्छंदांसि क्षेत्रस्यपतिर्देवता ॥ वैहायसं
पंचरात्रे ॥ त्रिविस्वरयुतं व्योमवामकर्णविभूषितं ॥ वराहवीजं उदितं सर्वसंपत्प्रदायकं ॥ ॥सारसंग्रहे॥ हयग्रीव ऋषिः प्रोक्तश्छं

राम
३४७

347

तुः पत्रेषु प्रतिपत्रमष्टावष्टौ वा लिख्यांतिमदले त्य वर्णं विलिख्य तद्बहिरष्टदलकमलं कृत्वा तत्केशरस्थाने स्वरान्द्वंद्वशो विलिख्याष्टदले
षु वराहमंत्रस्य वर्णांश्चतुरो विलिख्यांटले त्य मर्णं विलिख्य तद्बहिः षोदशादलं पद्मं विलिख्य तत्केशरेषु द्विशः कादिशांतान्वर्णानालिख्य
दलमध्येषु मूलमंत्रार्णान्द्वंद्वशः संलिख्यांत्यवर्णमंत्यदले विलिख्य तद्बहिर्वृत्तनव॥ ॥तुष्टयं कृत्वा वीथीत्रयं विरच्य सर्वाभितं तद्वीरथ्यां साध्या
क्षरेणासंपुटितप्रणवेन संवेष्ट्य द्वितीयवीथ्यां ग्लामिति धराबीजेन तथैव संवेष्ट्य तृतीयवीथ्यां हूमिति वराहबीजेन साध्यसंपुटिते
न संवेष्ट्य तद्बहिर्वृत्तं कृत्वा तद्वीथ्यां मूलमंत्रार्णविदर्भितसाध्याख्यया वेष्ट्य तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु ग्लौमिति भूबीजं
साध्याख्यागर्भितं विलिख्य चतुरस्रस्य रेखाचतुष्ककोणाष्टके कृत्वा तेषु त्रिशूलाष्टकं कृत्वा तेषु शूलेषु वाराहबीजं वसुधाबीजं वा लिखे
त्॥ एतद्यंत्रमुक्तफलदं भवति॥ ॥श्रीकेरलीये यंत्रसारे॥ कर्णिकायां कोलगर्भं तारसाध्यसमन्वितं॥ वक्त्रमंत्रं कोणषट्के तदङ्
गानि च संधिषु॥ अष्टपत्रे केशरोपदष्टार्णाद्वयवर्णकैः॥ चतुरश्चतुरो वर्णान्कोलमंत्रस्य वाष्टमो॥ पंच वा लिख्य बाह्ये च पत्रे षोड
शसंज्ञके॥ भत्रस्येत्यादिसूक्तस्याद्य ईमर्द्धमृचा लिखेत्॥ धरामंत्रेण संवेष्ट्य बाह्ये मातृकयापि च॥ भूपुराश्रिषु भूबीजं दिक्षु क्रौंबीजमा
लिखेत्॥ क्षेत्रस्येत्यादिसूक्तस्य यंत्रमेतत्कुभे दिने॥ ताम्रपट्टे समालिख्य स्वर्णास्त्रा वा यथाविधि॥ स्थापितं भवने यद्वा क्षेत्रे वा नगरेपि
वा॥ देशे वा तत्र तद्भर्तोर्दिनेश॥ सर्वसंपदः॥ गजाश्वधेनुमहीषिहूषमेषरादिभिः॥ धनधान्यधरासस्यवारोरत्नविभूषणैः॥ आपू

वीसर्वजननीदृष्टादृष्टफलप्रदा ॥ त्रिभिर्वेदैस्त्रिभिर्भूतैर्द्वाभ्यांद्वाभ्यांतथाभवेत् ॥ मूलमंत्रभवैर्वर्णैः षडंगानिसजातिभिः ॥ इंदिवरयु
गंशालिमंजरीदधतीशुकं ॥ धरापद्मासनाध्येयाश्यामातन्वीसुभूषिता ॥ वामोर्ध्वादितदधोंतमायुधध्यानं ॥ पूजांतुवैष्णवेपीठेतद्वि
धानमुदिर्यते ॥ आदावंगानिसंपूज्यदिग्दलेषु ततोजयेत् ॥ अवंवह्निजलंवायुंतत्कलाः कोणपत्रगा ॥ इन्द्रादीन्पूजयेद्वाह्येव
ज्रादीनिततःपरं ॥ ॥अथप्रयोगः ॥ तत्रयातः कृत्वादियोगपीठन्यासांतेमूलेनप्राणायामत्रयंकृत्वाशिरसिवराहायऋषये
नमः ॥ मुखेनिवृच्छंदसेनमः ॥ हृदयेश्रीधरारूपदेवतायैनमः ॥ इतिविन्यस्यममसर्वाभीष्टसिद्धयविनियोग इतिकृतांजलिरु
क्त्वाॐ नमः हृदियोगपीठपूजानवशक्तिपूजांतेवैष्णवपीठमंत्रस्थानेसोम्यसुंधरायोगपीठायनमः इतिपीठंसंपूज्यावाहना
द्यंगार्चनेदिग्दलेषुध्रुवेनमः ॥ वह्नयेजलाय वायवे विदिग्दलेषुनिवृत्यै विद्यायै प्रतिष्ठायै ॥ शांत्यैनमः इतिसंपूज्येंद्राद्यर्च
दिप्राग्वत्कुर्यादिति ॥ तथा ॥ दशायुतंजपेन्मंत्रंजुहुयात्तद्दशांशतः ॥ हविषाघृतसिक्तेनतर्पयेदभिषेचयेत् ॥ ब्राह्मणान्भोजयेत्प
श्चान्मंत्रीमंत्रस्यसिद्धये ॥ विधिनानेनसंसिद्धेमनोकाम्यानिसाधयेत् ॥ रक्तोत्पलानिजुहुयात्स्वादुक्तानिसहस्रकं ॥ अवमिष्टाम ... रा॰म ३४८
वाप्नोतिनीलोत्पलहुत्वातथा ॥ प्रियंगुपुष्पहोमेनमधुराक्तेनमंत्रवित् ॥ वसुधान्यधराश्रीणांसततंभवतिभाजनं ॥ मधुराईनरांहुत्वा
रक्तनांशालिमंजरी ॥ धरापतिर्भवेन्मंत्री मराउलेनसंशयः ॥ प्रगेभ्युदिनेमंत्रीसाध्यस्येत्रान्मदंहरेत् ॥ ष्ठद्गतोयेसमालोक्यतांवत

348

पेउष्णुदेवता॥ वराहोदीर्घयुक्तेनवीजेनैवांगकल्पनं॥ ध्यानपूजादिकंसर्वमस्यपूर्ववदाचरेत्॥ महासंमोहनेज॥ नाभिर्वामश्रवाःसगीतस्यवीजमिहोच्यते॥ इत्युक्तंनाभिर्मकार॥ वामश्रवाउकार॥ सर्गोविसर्गस्तेनभूइत्युद्धृतं॥ यथासंप्रदायजपः॥ तथाअष्टाक्षरेमहामंत्रेवेदादिःप्रथमाक्षरं॥ द्वितीयंव्याहृतिस्तस्माद्वराहायहृदंततः॥ वेदादिःप्रणवःव्याहृतिर्भूःहृन्नमः॥ ऋषिर्ब्रह्माचजगतीछंदोवराहएवच॥ देवतांगानिचपदैःसमस्तेनचकल्पयेत्॥ कृष्णांगंत्वतिनीलवक्त्रनलिनंपद्मस्थितंस्वांकगक्षोणीशक्तिमुदारखाउभिरथोशंखंगदामंबुजं॥ चक्रंविभ्रतमग्र्यकांतिमनिशंदेवंवराहंभजेभूलक्ष्मीकृतिकांतिभिःपरिवृतंवर्मासिसंदीप्तिभि॥ वामार्ध्वमारभ्यदक्षिणोर्ध्वपर्यंतमायुधध्यानं॥ जपपूजादिकंसर्वमस्यवाराहवद्भवेत्॥ अथप्रयोगः॥ तत्रमूलेनप्राणायामत्रयंकृत्वाशिरसिब्रह्मणेऋषयेनमः मुखेजगतीछंदसेनमः॥ हृदयेश्रीवराहायदेवतायैनमः इतिविन्यस्य॥ ॐहृन्नभूःशिरः॥ वराहायशिखानमः कवचंॐभूःवराहायनमः अस्त्रं॥ इतिपंचांगंप्राग्वद्विन्यस्यध्यानादिशेषंसर्वंप्रागुक्तवराहानु[illegible]विधिनाकुर्यादिति॥ एवंमंत्रंयःप्रजपेत्सभवेच्चधरापतिः॥ अंतेविष्णोःपरंनित्यंपदमाप्नोत्यसंशयः॥ सारसंग्रहे॥ ॐवंनमःपदंब्रूयाद्भगवत्येवदेत्ततः॥ धरणीपदमुच्चार्यधरणिस्याद्धराधरे॥ एकोनविंशत्यर्णात्मास्वाहांतोमनुरादितः॥ धराहृदयसंज्ञोयंभूपतित्वप्रदायकः॥ ॐवप्रणवअन्यादिपदानिस्वरूपाणिअनंतसंधिस्तेनॐनमोभगवत्यैइति॥ तथा॥ ऋषिर्वराहआख्यातोनिचृच्छंदश्चदेवता॥ पृथि

वाय ॥ तथा ॥ ऋषिः प्रोक्तो ऽहिर्बुध्न्योनुष्टुप्छन्दस्य देवता सुदर्शनात्मा वमहाविष्णुर्मुनिभिरीरितः ॥ चक्रायांतैराविभुधीसंज्वालाशाद्य
कैः पृथक ॥ षडंगमनवो ह्यस्य जातियुक्ताद्वितानकाः ॥ रुन्ध्याद्यर्ध्वक्रमशस्त्र कैरोतिततो वदेत ॥ वदेद्धाभि हृदयं हं· तेवक्रपदंशि
र ॥ दिशामपि दशानां स्याद्बन्धो नेनाराफनात्र च ॥ त्रैलोक्यं प्रशावाघं वरक्षणुग्मं तनुत्रकं ॥ अस्त्रशीर्षेणुतो मंत्रो ह्यग्निप्राकारसंज्ञक
अनेन मनुना स्वस्य परितो ग्निमयं बुधः ॥ प्राकारं परिकल्प्याथ न्यासान्न्यान्समाचरेत ॥ दिग्बंधादि मंत्राः प्रयोगतः स्पष्टीक्रियंते ॥ भुभ्ररक्ता
सिताभं तु प्रणावं शिरसि न्यसेत ॥ भ्रूमध्यानन हृत्कुह्यजानूरु द्वंद्वसंधिषु ॥ इतराद्वह्नि तुल्यामान्वर्णान्मंत्री प्रविन्यसेत ॥ पदद्वंद्वसंधिगुल्फ
जानुगुल्फेषु विन्यसेदिति कपिलवचनात ॥ रथांगदरसद्गदाब्जमुसलं धनुः पाशांकुशौ सागिंद्रधनमर्ककोटिसमभं करांभोरुहे ॥ स्वदेहरु
चिभिर्जगन्मन्तसि भासयंतं स्मरेद्वह्निरथ पदाह्वनिकट भीमदंष्ट्राननं ॥ रथांगं चक्रं दरः शंखः सृणिरंकुशः दक्षावूर्द्ध्वयोराद्ये तदाद्य
धस्थयोरन्ये तदाद्यधस्थयोरपरे तदाद्यधस्थयोरन्येष्वास्त्रध्यानं ॥ पूजयेद्वैष्णवपीठे गंधपुष्पादिभिस्ततः ॥ मूलेन मूर्त्तिं संकल्प्य त
त्रावाह्य वपुर्वत ॥ अंगानि चक्राद्यस्त्राणि लक्ष्म्याद्यालोकपालकान् ॥ तदस्त्राणि च यजेत ॥ क्रमादेशिकसत्तमा ॥ रथांगं च दरश्चैव
वगदाब्जे मुसलं तथा ॥ धनुः पाशांकुशौ प्रोक्ताः पीतरक्तासितासिताः ॥ द्विशाशक्ताय अभ्यर्च्याः विघ्नसान्निध्यकारिका ॥ दर्शयेद्व
क्तगायत्र्यान्ततो मुद्रां च मंत्रवित ॥ मुद्रा चक्राराज्ञे क्रमुद्रां ॥ सुदर्शनाय विद्महे न्नश्चविघ्नहे महा ॥ ज्वालाय धीमहि तन्नस्तनश्चक्रः प्र

349

त्रयवेवरं ।। अग्नौदुग्धघृताभ्यक्तंजुहुयान्नयथाविधि ।। मासषट्कप्रयोगेणवारिष्ठवकृत्वालभेद्धरां ।। वाराहंभजतिमंत्रयुतंधराया
मेत्रेणाप्रजयहुतार्चनादिभिर्मा ।। तस्यप्रजाकलकलमहिपतित्वमुच्चैरैश्वर्यभवतिवधान्यवीर्यवृद्धि ।। मध्यतारंवसुपुरुयुगाश्रिब
थोकोलवीरंपत्रेष्टष्टस्वपिग्रराणितान्मंत्रवर्णान्क्रमेण ।। आवेष्ट्यार्णौः क्रिरिमत्रुर्भवेमातृकार्णौश्चयंत्रं ।। भूगेहस्थंवितरतिध
रास्वर्णधान्यादिवृद्धिं ।। ।।अस्यार्थ ।। अष्टकोणगर्भमष्टदलपद्मंकृत्वाष्टकोणमध्येसमाध्यंप्रणवंविलिख्याष्टकोणेषुवरा
हवीजंविलिख्याष्टदलेषुधरामंत्रस्यत्रीणि त्रीणयक्षराणिविलिख्यतद्बहिर्वृत्तत्रयंकृत्वाभ्यंतरवीथ्यांपूर्वोक्तवराहमंत्रेणा
वेष्ट्यवहिस्थमातृकस्तंकुर्यादनेनयंत्रमुक्तफलदंभवति ।। ।।यंत्रसारेधरामंत्रेविशेषउक्त ।। यथा ।। हृदयंभगवत्तेवधरणीपतेवध
ररापथ ।।धरेद्वयंवह्निवधूमंत्रस्तकोखिलार्थदः ।। तारमायाधरावीजैःपुटितस्तत्ववर्णकः ।। मायाह्रींधराग्लौंप्रणवनामानंतरंवीज
द्वयंपश्चादुक्तमंत्रःपुनर्वैपरित्येनवीजद्वयंअंतेप्रणवस्तत्ववर्णाश्चतुर्विंशत्यर्णा ।। ।।सारसंग्रहे ।।अथसम्यक्प्रवक्ष्यामिसुदर्श
नमनूत्तमं ।।येनसिध्यंतिसकलाःसाधकानांमनोरथा ।।यान्तप्रयंतदंतंचभृग्वग्नीदीर्घसंयुतौ ।। यांतंव्योमादक्तसकर्णायुक्तांत
केवलम्वरः ।।वेदाद्याद्यश्चक्रमंत्राःसप्तवर्णाउदाहृतः ।।यान्तप्रमसकारस्तदंत्यहकारःभृगुसकारः ।।अग्निःरेफःदिर्घआकारः ।।
एतैःस्राइतियांतंरेफः ।।व्योमहकारः अंअनुस्वारः दक्षकर्णाउकारः ।।एतैर्हुइतियोन्तफकारःकेवलःटःतेनफ्इतिवेदाद्याद्यःप्रणा

शि॰चं
३५०

त्सुराणं वं मध्ये षट्कोणे षराणं वर्णकान्॥ पीताभां कर्णिकां कुर्याड्ङकारं श्यामं नरं॥ सितां नेमिं शिखिशिखां परितं पार्थिवात्मतां॥ न त्रसोम्ये
च कलशं शोणाभः पूर्णमित्र च॥ चक्राहृयं समावाह्य हरिसम्यक्सुपूज्य च॥ याम्ये कुर्याद्धोमकर्म षड्विंशच्छतसंमितैः॥ अज्यायामार्ग
कसमिदक्षताराजिकान्तिलैः॥ हविषापंचगव्येश्च हुनेदाज्यप्लुतैः क्रमात्॥ प्रतिद्रव्यस्य संपातान् कुंभतोये विनिःक्षिपेत्॥ प्रस्थान्न
न्नकृतपिंडं सम्यक् कुंभोदके सुधीः॥ याम्याशायामुपावेश्य साध्यं नीराज्यते नव॥ सद्रव्यं दद्याद्द्राडाशावष्टमकेभिपेत्॥ साम्प्रत्या
दिकमपिक्षिपेत्त्र दक्षभागके॥ ततो वलिं हरेद्धीमान् हुतशिष्टान्नकेनव॥ मंत्रेणानेन हृदयं वदेद्विघ्नगणो नत॥ वदेद्योते सर्व
शांतिकरेभ्यो ते वलिं वदेत्॥ प्रतिगृह्णंतु शान्त्यै च हृदयं तदनंतरं॥ विप्रान्संभोज्य गुरवे दक्षिणां च प्रकल्पयेत्॥ ज्वरादिरोगसंघा
तान् प्रयोगोयं विनाशयेत्॥ अपस्माररुजं वै च पिशाचग्रहवैकृतां॥ रक्षोभूतादिपीडां च नाशयन्मंक्षुयं विधि॥ ॥अस्यार्थ मु
भे स्थाने गोमयोपलिप्ते दक्षिणोत्तरविभागेन हस्तांतराले षट्कोणाद्वयं कृत्त्वा वेष्टितं॥ वहिश्चतुरस्रात्रं च कृत्वा तन्मध्यं दीक्षोक्तपीत
रजसापूर्य कोणाय षट्कोणदरं रक्तेनापूर्य तदंतरालं षट्कं श्यामरजसापूर्य रेखाः सर्वाः श्वेतेनापूर्य तन्मध्ये प्रणवं विलिख्य स्वाद्यादि को ५
णषट्के मूलमंत्रस्य द्वितीयाक्षरादि वर्णषट्कं विलिख्य तद्बोत्तरादिक्रमात् वक्ष्ये कुंकुमादिमिश्रारक्तजलपूर्णकुंभं दीक्षाविधानोक्तप्रकारे
णा संस्थाप्य तत्र पीठपूजापुरः सरस्तदर्शनं सम्यगावाह्य सर्वोपचारैः सांगावरणां संपूज्य दक्षिणादिग्गत वक्ष्ये दीक्षोक्तविधानेन नित्य होमो

350

राम
३५०

चोदयात्॥ ॥अथप्रयोगः॥ ततः प्रातःकृत्यादियोगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा सिरशि अहिर्बुध्न्यायऋषयेनमः॥ मुखे
अनुष्टुप्छंदसेनमः॥ हृदयश्रीसुदर्शनायदेवतायनमः॥ इतिविन्यस्यममेष्टार्थेविनियोगइतिप्राग्वदुक्त्वा॥ अचक्रायस्वाहा हृदयाय
नमः विचक्रायस्वाहा शिरसेस्वाहा· सुचक्रायस्वाहा· शिखायैवषट्· धीचक्रायस्वाहा· कवचायहुं· संचक्रायस्वाहा· नेत्रायवौषट्· ज्वा(
लाचक्रायस्वाहा॥ अस्त्रायफट् इति मंत्रैः करषडंगन्यासं कृत्वा ऐंद्रीं चक्रेणावभ्रामिन मध्यचक्रायस्वाहा· आग्नेयीं चक्रेणावभ्रामिन
मध्यचक्रायस्वाहेत्यादियुक्त्वा दशदिग्बंधनं दक्षकरतर्जन्यंगुष्ठोत्थशब्देन विधाय॥ ॐत्रैलोक्यंरक्षरक्षहुंफट्स्वाहेति मंत्रेण प्राग्वदग्नि
प्राकारं कृत्वा शिरसि ॐ नमः· भ्रूमध्ये सं· उरसे हः· हृदि स्त्रां· उदरं· जानुनोः हुं· गुल्फयोः फट् नम इति विन्यसेत्॥ इति गायत्र्या चक्रमु(
द्रां प्रदर्श्यासनायं गागां तेष्टदलेषु॥ चक्राय नमः· शंखाय· गदायै· पद्माय· मुसलाय· धनुषे· पाशाय· अंकुशाय· इति संपूज्य दला
ग्रेषु हयग्रीवपूजोक्तलक्ष्म्याद्यष्टशक्तीः संपूज्य लोकेशादि प्राग्वत्सर्वं कुर्यादिति॥ तथा॥ जपेद्द्वादशलक्षं तु तत्सहस्रं हुनेत्तिलैः॥ सर्ष
पैर्विल्वदेग्धान्नघृतैर्मंत्री यथाविधि॥ विल्वैर्विल्वपत्रैः॥ सर्षपैर्विल्वपत्रैश्चेति प्रयोगसारवचनात्॥ एकैकद्रव्येणावृत्तः शताधिकस
हस्रं संख्याको होमस्तिलादिद्रव्यचतुष्टये त्रिमधयोगः॥ कार्यस्त्रिमधसंयुतैरिति प्रयोगसारात्॥ तथा॥ तर्पणादि ततः कृत्वा कुर्याद्ग्राम
गान्तर्पणां ततो मंत्री विदध्यात्स्वप्रयोगानिष्टदायकान्॥ चक्रयुग्मं लिखेन्मंत्री सौम्ययाम्यगतं क्रमात्॥ चक्रयुग्मं षट्कोणाद्वयं॥ आलिखे

हुत्वकुंदनेशगुग्गुलुंतथा॥ घुसृणांचहरिद्राचरोचनंविल्वराजिकां॥ अपामार्गतिलादूर्वाविष्णुक्रांतातुलस्यपि॥ कृस्नावतु
लसिप्रोक्तायवार्कडुमयवच॥ सहदेवीतथालक्ष्मीःकुशगोमयसद्वचा॥ कमलंरोचनापंचगव्यंसंक्वाथयेन्गुरुः॥ सि
द्धैश्यो भस्मयावत्स्यादेतत्सर्वेश्वदायकं॥ सिद्धेसंस्कृते॥ संजप्तमनुनानेनसम्यक्कुशिरसाधृतं॥ सर्वभूतग्रहव्याधिकृत्या
दुःस्वादिवारणं॥ डोहोन्मादरिपुत्रासससर्वपापहरंमतं॥ आपन्नाशकमेतत्स्याद्वश्यदंशिवदंपरं॥ फलपत्रयुते कल्के
पंचगव्यैःपचेद्घृतं॥ प्रस्थवल्कंडव्याणिघनभद्रीनिशातथा॥ घनसम्ताचित्रकैलामधोर्यष्टिर्वचापाठावृषातथा॥ मा
क्षीकावचित्रगंधमंजिष्ठादारुरोहिणी॥ मनुनानेनसंजप्तंवंध्यापुत्रप्रदायकं॥ भूतप्रेतपिभयघ्नंनात्रसंशयः॥ पं
चगव्याह्यमेतत्स्याद्गर्भरक्षाकरंपरं॥ गुलिकांवपुरोःकृत्वासहस्रार्धंहुनेत्ततः॥ पुरोर्गुग्गुलो॥ त्रिवसचितयंवापिवत्
र्दिवसमेववा॥ भवेत्सर्वोपद्रवानांशोमंत्रगदस्यच॥ अपामार्गसमिद्भिश्चहुनेदयुतसंख्यया॥ भूतज्वरभयव्याधिकृत्याप
स्मारनाशनं॥ घृताक्तैःकमलैर्हुत्वाश्रीवृद्धिंलभतेनरः॥ आज्याक्तानिश्चदूर्वाभिर्होमादीर्घायुषोभवेत्॥ पराशत्कृत्वसमिद्भि
र्मेधावृद्धिर्भवेत्किल॥ वश्यार्थश्वेतकुसुमैराज्याक्तैर्जुहुयान्नरः॥ पशूनांवृद्धिमिच्छेतसहुनेत्केवलैर्घृतैः॥ उदुम्बरसमिद्धोमा
त्पुत्रलाभोभवेत्फलं॥ अष्टोत्तरंसहस्रंचहुनेदश्वत्थजैस्तथा॥ समिद्भिरेवकर्षयुक्तयेयंविधिःस्मृतः॥ चक्रमध्यस्थितंस्वंच

क्तविधिनावावैष्णवाग्निंसंस्थाप्यप्रोक्तद्रव्यैः इतिद्रव्यषड्विंशदधिकसतशतंप्रत्याहुतिप्रतिद्रव्यहुतशेषंस्रुवलग्नंकुंभतोये
संपातयन्जुहुयात् ॥ ततोहोमंसमाप्य कुंभेप्रस्थार्द्धान्नकृतपिंडंनिधायसाध्यंस्वदक्षभागेसमुपवेश्यतंकुंभमुद्धृत्यसाध्य
स्योपरित्रिःपरिभ्रामयित्वैकस्थानेदूरेतंघटंनिक्षिप्यअन्नादिसर्वंतदक्षभागेनिःक्षिप्यहुतशिष्टान्नेनमोविघ्नगणेभ्योसर्व
शांतिकरेभ्योवलिंप्रतिगृह्णंतुशांत्यैनमः इतिवलिंदत्वागृहमागछेत् ॥ ततोयजमानोब्राह्मणानन्नादिभिःपरितोष्यस्वगु
रुंप्रयोगकर्तारंगोभूमिहिरण्यवस्त्रादिभिःसम्यक्परितोषयेत् ॥ उक्तफलभाग्भवेत् ॥ तथा ॥ स्तनजद्रुमसंभूतैःफलकैःपंजरं
शुभं ॥ कृत्वामंत्रीपंचगव्यैःपूरयेत्साध्यतत्रवित् ॥ विप्रवर्यैःकारयेच्चहोमंपूर्वोदितैःक्रमात् ॥ द्रव्यैस्तास्तोषयेद्विप्रान्य
जमानोगुरुंतथा ॥ धनधान्यादिकैर्नत्वासंतोष्यप्रीणयेत्तथा ॥ एषयोगःसर्वरोगापमृत्युग्रहनाशकः ॥ गव्यैःसमस्तैःक्षी
रद्रुवर्मोत्थैश्चकषायकैः ॥ एभिःसंपूरितैःकुंभैर्यत्रैःसंपातसेचितैः ॥ साध्यंग्रहाविष्टमनेनसिंचेदुग्राभिचारार्तरक्षोग्रपी
डं ॥ स्वस्थोभवतेननरोतिमंक्षभानोर्दिनेसाधुसुसाधितैस्तैः ॥ योषांसंताडयन्नैश्चसुखेनप्रसवोभवेत् ॥ घृतंपक्वंपंचग
व्येसंजप्तमनुनांडना ॥ ग्रहपीडानिरूढानांगर्भिणीनांहितावहं ॥ मनुंजपेद्दशशतंपंचगव्यंस्पृशंत्सुधी ॥ पद्मपत्रेब्रह्म
वृक्षपत्रेविल्वफलेपिवा ॥ तत्पस्पतत्स्वीयगृहेनिखनेत्तुपरस्यवा ॥ रक्षाभवतितद्गेहेसंपद्वृद्धिश्चजायते ॥ पलाशस्तनजं

लिखेदेतदुक्तफलदं ॥ तथा ॥ कृशानुग्रहयुग्मके लिख समाध्य नारं लिखेन्मउभिश्च मनुं च संधिविवरे नथांगानि च ॥ स्वरद्वयस्य केशरं
वसुदलं लिख्वाग्राणां युग्ले द्विपयस्य केशरं विकृतिवर्णांयुक्तहलं ॥ दस्राभ्यां स्वाख्ययावीतं पाशांकुशास्त्रं त्रिधा ॥ चक्रयंत्रमिदं प्रोक्तं
सर्वामयनिवारणं ॥ सर्वभीतिप्रशमनं भुडवैरिविनाशनं ॥ ॥ अस्यार्थ ॥ षट्कोणं विलिख्य तन्मध्ये ससाध्यं प्रणवं विलिख्य षट्को-
णेषु मंत्रार्णान् तत्संधिषु षडंगमंत्रांश्च लिख्य तद्बहिरष्टदलकमलं कृत्वा तत्केशरेषु षोदशस्वरान् सविंदुकान् लिख्य तद्दलेषु
नारायणाष्टाक्षरवर्णान्सविंदुकानेकैकशो विलिख्य तद्बहिः षोदशदलं पद्मं कृत्वा तत्केसरेषु कादिशांतान्सविंदुकानेकैकशो वि-
लिख्य तत्पत्रेषु वक्ष्यमाणास्तु दर्शनषोदशाक्षरमंत्रस्यैकैकमक्षरं विलिख्य पद्माद्बहिः सप्तसप्तानि कृत्वा वीथीं परिकल्प्य तास्वभ्यंत-
रगतासु त्रिसप्तहकारश्चोर्मध्ये साध्यनामाक्षराणि कृत्वा संवेष्ट्य वाह्यात्सृतिमनुपाशांकुशबीजाभ्यां वेष्टयेत् ॥ एतद्यंत्रमुक्तफ-
लदं ॥ तथा ॥ तारं हृद्भगवन्प्रोक्तान्ते महासुयदं ॥ वदेत् ॥ दर्शनायहुमंत्रान्तः षोडशार्णो मनूत्तमः ॥ यंत्रेषु लिखितो ह्येषः सर्वाभीष्ट-
फलप्रद ॥ तारः प्रणवः ॥ हृन्नमः ॥ अस्त्रं फट् अन्यानि स्वरूपाणि ॥ अत्र संधि ॥ नमो भगवते इति ॥ तथा ॥ अष्टारेषु लिखेन्नाश्चयुग-
शः युगशः संप्रवर्द्धयेत् ॥ अष्टार्णान्तरितान्यादान् हृषिकेशमनोर्लिखेत् ॥ चतुःकोष्ठमध्ये कोष्ठत्रितये साध्यनामयुक् ॥ चक्रमेत्र
लिखेन्मंत्री भवेत्तत्सप्रकोष्ठकं ॥ यत्र भूर्जे भौमपदे कोमले कर्पटेथवा ॥ सम्यक्गुलीकीकृतलाक्षाभिः सम्यगावृतं ॥ कृतसंपातया

352

चिंतयंश्चमनुंजपेत्॥एकोपिदुर्जयोयुद्धेमर्त्योभवतिमंत्रवित्॥ कल्पांताग्निनिभंचक्रंवैरिणोयस्यमूर्द्धनि ॥स्मरेत्सप्रदिनान्नस्यज्व
लेनप्रतिमोज्वरः॥भवेद्भिंशद्दिनैश्चाथप्राप्नोतिमरणंध्रुवं ॥सकारंस्वरसंवीतंयाहीनिपदवेष्टितं॥ संस्मरेद्यस्यशीर्षेवतस्योच्चाये
द्दशाहतः॥मण्डलान्मरणंयातिसोतंकाकनिभंरिपो॥मूर्ध्निस्मरेद्वसप्ताहादुच्चाटोवामृतिर्भवेत्॥शरच्छशांकप्रतिमंसुधाधाराभि
वर्षिणं॥संकारंसंस्मरन्मूर्ध्निसजीवेच्छरदांशतं॥वह्निगेहद्वगेडयान्तस्त्रमध्यषडश्रिषु॥मंत्रार्णानथतत्त्वलिखेद्यंत्रमिदंशुभं
आपन्निवारणंसम्यग्भूतप्रेतामयापहं॥ ॥अस्यार्थ॥षट्कोणंविलिख्यतन्मध्यषट्कोणेष्वपिटकारमालिख्यतेषुटकारेषुमंत्रव
र्णानेकैकशोलिखेत्॥मध्येसाध्यनामवेतिसंप्रदाय॥एतदुक्तफलदं॥वह्निगेहद्वगेसाध्यंलिखेन्नारगडायगं॥षट्सुकोणेषुमं
त्राणांतत्संधिष्वंगमंत्रकान्॥ततषोडशपत्रेस्यात्षोडशार्णार्णात्संपुतं॥वेष्टितंभूपुरेणाथकृतसंपातमुत्तमं॥गर्भिणीगर्भरक्षार्थंहि
तमपरंदुर्लभं॥उन्मादग्रहभूतादीनभिचारांश्चनाशयेत्॥ ॥अस्यार्थ॥षट्कोणमध्येठकारंतन्मध्यप्रणवंससाध्यमालिख्यषट्सु
कोणेषुशिष्टवर्णानालिख्यषट्कोणंविष्वंगमंत्राणालिख्यतद्बहिः षोडशदलपद्मंकृत्वातद्दलेषुषोडशाक्षरमंत्रस्यैकैकमक्षरमालि
ख्यबहिश्चतुरस्रेणवेष्टयेत्॥उक्तफलदं॥तथा॥षट्कोणेप्रणवगतंचकर्ममध्येमंत्रार्णान्दहनयुगस्यकोणकेषु॥अंगगमन्विलिख
जुसंधिषुक्रमेणशोणादिग्रहभयनाशकंवयंसं॥ ॥अस्यार्थ॥षट्कोणमध्येससाध्यंप्रणवंविलिख्यकोणेषुशिष्टार्णान्संधिष्वंगमंत्रांश्च

त॥ रक्षयुग्मंमांपदांतेमहानेचवलायच॥स्वाहांतश्चक्रमंत्रोयंगदितःसर्वकर्मसु॥अस्यचर्ष्यादिकंसर्वंमंत्रीपूर्ववदाचरेत्॥तारःप्रणवहृ
न्नमःभगवतेइत्यनेनसंधिः॥नमोभगवतेइतिहे॰युतंसुदर्शनपदंसुदर्शनायइतिअन्यानिपदानिस्वरूपाणि॥ ॥सुंदराचार्यशिष्येणश्रीनि
वासेनधीमता॥चंडिकायांपुराणीतायांत्रयस्त्रिंशप्रकाशकः॥ ॥इतिश्रीश्रीनिवासभट्टेनविरचितायांशिवार्चनचंडिकायांत्रयस्त्रिंशःप्रका
शः॥ ॥श्रीसारसंग्रहे॥अथप्रवक्ष्यामिमंत्रंश्रीकरंसार्थनामकं॥येनप्रजप्तमात्रेणशक्रोलेभेक्षितिंपरां॥धृतिःअग्नियुगंतुष्टियुगंयुतंप्र
तोयंतयुक॥रमाविंदुविद्युक्ताच्चजपाग्निर्भृगुलांतकौ॥सदीर्घौकांतिमद्यौमेत्यष्टार्णाश्रीकरोमंत्र॥प्रणवाद्यंरमाद्यंवाकेचनेछंतिसू
रय॥धृतिःउकारःअग्नियुगंनकारद्वयंतत्तुष्टियुतंइकारयुक्तंतेनत्रिइति॥प्रज्ञाषकार॥तेनयुक्तठकारयुक्तस्तेनष्टइति॥विविंदुर
माश्राइति॥जपाककारःअग्निःरेफःभृगुलांतकौशकारवकारौतौसदीर्घौआकारयुक्तौतेनस्वाइतिकांतिमद्योमआकारयुक्तोहकारस्ते
नहाइति॥तथा॥वामदेवऋषिःपंक्तिछंदोनुष्टुप्देवताहृद्बीजयुगंहुंचहुमंत्रंन्यासयद्वयां॥शिरःशिखाचवर्मांतंप्रमर्दययुगंमतं
वर्मप्रध्वंसययुतंवर्मांतंरक्षयद्वयं॥हुमंतंमत्रमंप्रोक्तंपंचांगानिमनोःक्रमात्॥अष्टांगानिन्यसेन्मंत्रवर्णैर्मंत्रीयथाविधि॥पंचांगने
त्रजठरपृष्ठेषुक्रमतोन्यसेत्॥विदध्यात्करयोर्न्यासंमंत्रार्णैरष्टभिःसुधी॥दक्षतर्जन्यादिकावयावत्स्याद्वामतर्जनी॥सृष्टिरेतद्वैपरीत्य
संहारोगदितास्थितिः॥दक्षान्यतर्जनीपूर्वाकनिष्ठायुग्मकांतिका॥कामवाणानंगुलिषष्वंगुष्ठादिषंनंगकान्॥न्यसेत्ताराणार्कपुटितमातृकां

नं च सर्वा पन्चाशकं स्मृतं ॥ ॥ अस्यार्थः । प्राक्प्रत्यगायता अष्टौ रेखाः कृत्वा त्रितयमंतरित्वा रेखाग्राणि बध्नीयात् ॥ एवं कृते कोष्ठसप्तकं जायते तन्
त्राभ्यंतरे कोष्ठत्रयं विहाय पार्श्वद्वयवर्त्तिकोष्ठचतुष्टये नारायणाष्टाक्षरमंत्रवर्णद्वयमध्यसंस्थाने हृषिकेश इति श्लोकचरणचतुष्टयं दक्षि
णार्णानमालिख्य मध्यकोष्ठत्रये साध्याख्यां कर्मणाहितां सुदर्शनमंत्रवर्णद्वयांतस्थितामालिखेत् ॥ यथा ॥ सं देवदत्तं यज्ञदत्तस्य वसं कुरु हं
इत्याद्यूह्य लिखेत् ॥ एतं यंत्रमुक्तफलदं ॥ तथा ॥ स्थाने हृषीकेश तव प्रकीर्त्यथ जगन्नभवेत् ॥ हृष्यत्यनुरशाकांने हे नेच पदमुच्चरेत् ॥ रक्षां
सि भीतानि दिशो द्रवंतीति पदं वदेत् ॥ सर्वे नमस्यंति चेति सिद्धसंघः प्रकीर्तयेत् ॥ हृषीकेशमनुः प्रोक्तः सर्वरक्षाकरः शुभः ॥ मंत्रोधा
रः सुगमः ॥ ॥ यंत्रसारे ॥ षट्कोणकर्णिकामध्ये तारं कोणेषु षट्स्वपि ॥ चक्रमंत्रं षडंगानि तत्संधिषु दलेष्वथ ॥ ऋतुपंचर्तुपंचर्तुषंचष
घंचसंख्यकान् ॥ स्थाने हृषीकेश मनोर्वर्णानष्टस्वकेसरे ॥ अष्टाक्षरमनोर्वर्णानेकमेकं विलिख्य च ॥ मातृकार्णैः समावेष्ट्य भूपुरेण
च वेष्टयेत् ॥ गीतात्तष्टमंत्रमिदं सर्वरक्षाकरं परं ॥ अस्यार्थः ॥ षट्कोणं कृत्वा तन्मध्ये समाध्यं तारं विलिख्य षट्कोणेषु सुदर्शनषडक्षराणि व
कोणसंधिषु अचक्रादीन् षडंगमंत्रान्तद्वहिरष्टदलकेसरेषु नारायणाष्टाक्षरवर्णाष्टदलेषु स्थाने हृषिकेश तवेति श्लोकमंत्रस्य षट्
पंच षट्पंच षट्पंच षट्पंचक्रमेण वर्णान्विभज्य विलिख्य वहिर्वृत्तत्रयोरंतराले मातृकार्णैरावेष्ट्य वहिश्चतुरस्रं कुर्यात् उक्तफलदं भव
तीति ॥ तथा ॥ तारं हृत्स्याद्भगवते महाप्रोक्ता च ङे-युतं ॥ सुदर्शनपदं तद्वन्महाचक्राय वै महा ॥ ज्वालायोक्ता महादीप्तरूपायेति च सर्व

क्रमयं श्वेतद्वीपं ॥ हेमस्थलीकमाकीर्णां नानामणिगणैः शुभम् ॥ वनसंचिंतयेत्तत्र सकलर्त्तुनिषेवितं ॥ कल्पद्रुमसमूहैश्च वारितातपमु
त्तमं ॥ षट्पदालीकरावाससंकुलं लोलपल्लवं ॥ पुष्पव्रजपरागौघतुषारपरिपूरितं ॥ हिरण्मयानां वृक्षाणां मणिपुष्पेषु चंचलां ॥ इं
दिरालीचक्रमणाशीलशक्रमणीरुचं ॥ अंगीकरोति यत्रापि रमंतैकरसःपुरैः ॥ औदार्यशोभनैश्वर्यसौभाग्यादिगुणोर्जितैः ॥ रूपाभि
राममधुराकल्पिभिः सुकुमारकैः ॥ मंदस्मितलसद्दंतमरीचिद्योतिताननाः ॥ मनोज्ञाजितवंशाभामदस्फुरितलोचनाः ॥ जल्पाकनूपुरक्कोकि
लायद्देवहंसैर्निरंतरं ॥ उन्निद्रितोद्यन्मदनाः पीनस्तनघटालसाः ॥ सुश्रोणिभारादत्यर्थमंदगामिन्यउन्नमां ॥ एवंभूताश्चाप्सरसः क्रीडं
ते यत्र चामरैः ॥ मारसेनापतिमिव वनलक्ष्म्या गृहं यथा ॥ तन्मध्यस्थानमनूनं वा कल्पवृक्षं स्मरेद्बुधः ॥ इतिरायाः सोदरस्य नवरत्नमयस्य च ॥ शि
खावलिसमुद्योतिशीतलं तस्य तले शुभे ॥ स्वर्णकुट्टिमसंशोभिमहातलमनोरमे ॥ उद्यदर्कप्रभाभ्यस्वत्सुवर्णपीठसंन्निभं ॥ रत्नोद्यन्मकरा
कारवारुकुंडलमंडितं ॥ किरीटमणिसंदीप्तदिव्यकंचारुभूषणं ॥ शशिखंडलसत्सुभ्रूलग्नामलविशेषकं ॥ अतिवंकमसृणस्निग्धमुकुरो
ज्ज्वलगण्डकं ॥ स्मितसंशोभिवक्त्रेंदुकपोलफलकोज्ज्वलं ॥ दशनावलिमध्योद्यद्विराजितशुभाधरं ॥ रक्तबिम्बाधरं रम्यं रक्तपद्मपलाशवत्
आयतारुणनेत्रं च समपक्ष्मविराजितं ॥ वक्षसा सुविराजंतं त्रैलोक्यनिलयेन च ॥ त्रिवलीशोभिना सम्यग्रोमराजिलसद्भुवा ॥ उदरे
णाविराजंतं रम्यं कटितटेन च ॥ पीतपट्टांशुकं युञ्जाविलसन्मणिमेखलं ॥ शारत्नसहवीनरम्योरुपरिभूषितं ॥ कोककंठलसत्त्वां

354

राम
३५४

विन्यसेत्सुधी ॥ अष्टौ तत्वानि विन्यस्येच्छरीरे देशिकोत्तमः ॥ प्रकृतिमहदहंकृत्याकाशानिलवह्निनीरभूम्यात्मकै मंत्रार्णैस्तैः पदांधुहृदास्यक
हृद्दयसकलतनुषु ॥ न्यसेत्संहार उक्तोयं सर्गस्तद्विपरीतकः ॥ तारसंपुटमूले नविंशो न्यसेन्नेत्रौ उधकाश्यास्यहृन्नाभिगुह्यजानुयादेषु
विन्यसेत् ॥ एषा सृष्टिश्च नाभ्याद्याहृदंता स्थितिरीरिता ॥ सर्गव्युत्क्रमतश्चापि संहारो मंत्रिभिर्मत ॥ मूर्द्धि मध्या तर्जनीस्यान्नेत्रेंगुष्ठ
स्त्वनामया ॥ वक्त्रेंगुष्ठतर्जनी वहस्यंगुष्ठकनिष्ठिके ॥ नाभावंगुष्ठवर्जाश्चांगुलयो गुह्यजानुषु ॥ सांगुष्ठाः पादयुग्मे च न्यसेन्मंत्रार्णा
कांस्ततो ॥ न्यासेष्वयमंगुलिनियमो वैष्णवमंत्रेषु यत्र यत्र सृष्टिस्थितिसंहारन्यास उक्तस्तत्र सर्वत्र वर्जयः ॥ अष्टारं समाहृत्यादे
शिको यतमानसः ॥ मूलाधारसहश्चक्रकरादीन्मूलनाभिषु ॥ गलतुंदहृदिक्रुवपार्श्वद्वंद्वेसपृष्ठके ॥ आस्यनेत्रश्रोत्रघ्राणाहस्ताग्रे
मणिबंधके ॥ कूर्परांसौ तृतीयः स्याच्चतुर्थोच तथाभवेत् ॥ मूर्द्धाक्षिकराठहृदयजठरोरुपदद्वये ॥ हृदि न्यसेत्सानिलेषु धातुषु
क्रमतः सुधी ॥ गरांसस्तनपार्श्वस्फिगूरुजंघांघ्रिषु द्वयं ॥ प्रथमार्णां पादतले परं पादाग्रजानुषु ॥ गुदाधारगुह्यकंदेन्यपार्श्वना
भौ चतुर्थकं ॥ वक्षः पृष्ठः हृदंसेष्वं कंठवक्त्रतसीतरं ॥ श्रोत्रनेत्रद्वयं वामललाटेष्टममीरितं ॥ शिरोनेत्रादिगदितस्थाने षष्ठपदं
न्यसेत् ॥ ततस्तत्तौ मूलमंत्रं व्यापयेन्मूर्तिपंजरं ॥ विश्वादिकाश्चतुर्वर्णा नास्यहस्तोसयासुचे ॥ न्यसेदाभरणानीहत्वायुधानि च देशि
कः ॥ ततः संचिंतयेद्विष्णुं श्रीकरं हृदयांबुजे ॥ लोलकल्लोलजालेन फेनिले सोर्मिमालके दुग्धांबुधावत्र मध्ये द्वीपं रुक्ममयं शुभं सु

शि·वं
३५५

षष्टिः वामतर्जन्यां · ॐ मध्यमायांग्निं ॥ अनामायाष्टं · कनिष्ठायां श्री · दक्षकनिष्ठायांकं · अनामायारं · मध्यमायांस्वां · तर्जन्यां हां · इति
संहार ॥ दक्षतर्जन्यां ॥ ॐ मध्यमायाग्निं · अनामायाष्टं · कनिष्ठायाश्री · वामतर्जन्याकं · मध्यमायारं · अनामायास्वां · कनिष्ठायां हां · इ
तिस्थिति ॥ अत्र प्रथमतः संहारन्यासं कृत्वा पुनः सृष्टिस्थितिन्यासौ कार्यौ · अंगुष्ठयो · ड्रांड्राविन्मैनमः ॥ तर्जन्यां: ड्रींक्षोभणाय शोषन
मः मध्यमयो क्लीं वसीकरणाय ॥ अनामिकयो · ब्लूं आकर्षणाय · कनिष्ठयोः सः संमोहन्यै नमः ॥ अंगुष्ठयो ह्रीं कामाय: तर्जन्योः क्लीं मन्म
थायः मध्यमयो · ऐं कंदर्पाय अनामिकयो · ब्लूं मकरध्वजाय ॥ कनिष्ठिकयोः स्त्रीं मिनकेतवे ॥ ततः ड्रांड्रींक्लींब्लूं · अंसः ब्लूंक्लींड्रींड्रांन
मः ॥ एवंपुन्नामातृकां विन्यस्य: पादयोः हां पृथिवीतत्वात्मने नमः ॥ लिंगे स्वां जलतत्वात्मने हृदि रं अग्नितः मुखे कं वायुत · शिरसि
श्री आकाशांतः हृदिस्थे अहंकारतत्वात्मने · हृदि ग्निं महत्तः सर्वांगे ॐ प्रकृतितत्वात्मने नमः ॥ इति संहारन्यास ॥ ॥ ततः सर्वांगे ॐ
प्रकृतितः हृदि ग्निं महत्त · हृदिष्टं अहंकारत · शिरसि श्रीं आकाशतः मुखे कं वायुत · हृदि रं अग्नित ॥ लिंगे स्वां जलत · पादयो · हां पृ
थिवीतत्वात्मने नमः ॥ इति सृष्टिन्यास ॥ ॥ अत्रापि ॐ नमः परायइत्यादिवामान्यसं प्राग्वद्योजनीयं ॥ ततः प्रणावसंपुटितमूल
मंत्रेणत्रिर्व्यापकं कृत्वा ॥ ततः पादयोः ॐ नमः जानुनोः ग्निं · गुह्ये ष्टं · नाभौ श्रीं · हृदि कं · मुखे रं · नेत्रयोः स्वां · शिरसे हां ॥ शिरसि ॐ नेत्र
यो · ग्निं · मुखे ष्टं · हृदि श्री · नाभौ कं · गुह्ये रं · जानुनो · स्वां पादयोः हां नाभौ ॐ गुह्ये ग्निं जानुनो ष्टं पादयोः श्रीं · शिरसि कं · नेत्रयोः रं · मुखे स्वां ·

365

राम
३५५

त्तिजंघायुगमनोहरं॥ रक्तोत्पलाभचरणां पादन्याजितकछपं॥ शशारक्तसहस्कांतिध्वजजांकिः तपन्नलं॥ करसडक्तकमलेर मपालिंगितंसदा॥ भ्रम
याचोपगूढंतं नवमाणिक्यशोभितं। नवयौवनकांत्यौघसंशोभिसकलांगकं॥ सुरासुरर्षिप्रमुखैः सेवितं चाप्सरोगणैः॥ पूर्णेंदुबिंबसदृशवितान
समलंकृतं॥ सुरयोषकराज्वालिलसच्चामरराजितं॥ विशुद्धतासविलसेलवैजयंतीसुशोभितं॥ यक्षविद्याधरव्यूहवाररणादिनिषेवितं वा
माघधस्थयोर्गदाकमलेनदशूर्ध्वयोः शंखचक्रे इति हेति ध्यानं॥ एवंध्यात्वागुरुंदेवंपीठेपूर्वोदितेजयेत्॥ मूर्त्तिंमूलेनसंकल्प्यतस्यामावाह्य
मंत्रवित्॥ अंगानि कर्णिकायां च पूजयेन्मंत्रवित्तम॥ दिग्दलकेषु श्रीरतिधृतिकांतीः पीनरक्तशितनीलाः॥ मूर्त्तीर्यजेद्विदिक्पत्रेष्विं
द्रादींस्तद्बहिः क्रमात्॥ वज्रादींश्च यजेत्पश्चात्कीकरार्वा समीरिता॥ ॥ अथ प्रयोगः॥ तत्र प्रातःकृत्यादि योगपीठन्यासांते मूलेन प्राणा
यामत्रयं कृत्वा शिरसि वामदेवऋषये नमः॥ मुखे पंक्तिश्छंदसे नमः॥ हृदये श्रीकराय देवतायै नमः॥ इति विन्यस्य ममेष्टसिद्ध
ये विनियोगः॥ इति प्राग्वदुक्त्वा॥ भीषय ३ हुं हृदयाय नमः॥ त्रासय ३ हुं शिरसे स्वाहा॥ प्रमर्दय ४ हुं शिखायै वषट्॥ प्रध्वंसय ४
ऊँ कवचाय हुं॥ रक्षय २ हुं अस्त्राय फट् इति पंचांगमंत्रान् प्राग्वद्विन्यस्य॥ ॐ हृदयाय नमः॥ ह्रिं शिरसे स्वाहा ह्रूं शिखायै वषट् श्रीं क
वचाय ऊं अस्त्राय फट् रं नेत्राय वौषट् इति नेत्रांत षडंगेषु विन्यस्य उदरे स्वां नमः॥ इत्यष्टांगं विन्यस्य दक्षकरतर्जन्यां ॐ मध्यमायां त्रिं
अनामायां लं· कनिष्ठायां श्री· दक्षकनिष्ठायां कं· अनामायां रं· मध्यमायां स्वां· तर्जन्यां हों· इति संहारः· दक्षतर्जन्यां· ॐ मध्यमायां त्रिं· अ

अंगदेभ्यो केयूरेभ्यो · कंकणेभ्यो · कट्यां मणिमेखलायै · पीतांबराय नमः ॥ इति विन्यस्य वामदक्षोर्ध्वहस्तयोः संखाय नमः ॥ चक्राय नमः
वामदक्षाधोहस्तयोः गदायै · पद्माय नमः इति विन्यस्य ध्यानादिषोडशोपचारांते कर्णिकायामेवांगानि संपूज्य दिग्दलेषु श्रियै · रत्यै · धृत्यै · इति
विन्यस्य ध्यानादिषोडशोपचारांते कर्णिकायामेवांगानि संपूज्य लोकपालार्चादि शास्त्रवत्कुर्यादिति ॥ तथा ॥ अष्टदलक्षं जपेन्मंत्रं नियमस्थो जितेंद्रि-
य ॥ जुहुयात्तद्दशांशेन विल्वदुग्धद्रुतर्पणै ॥ तर्पणैः समिद्भिः ॥ अजैर्दुग्धान्नयुघृतैस्तर्पणादि ततश्चरेत् ॥ गुरुं संतोष्य विप्राद्यैः सिद्धमंत्रो भ-
वेद्ध्रुवं ॥ ततः कुर्वीत मंत्रज्ञः प्रयोगानिष्टसिद्धये ॥ दुग्धाप्लुतैः सरसिजैरयुतेन जुहुयाच्छ्रिये ॥ अयुते अयुतनद्वयं ॥ मधुरत्रयसंयुक्तैः प-
लाशकुसुमैर्हुनेत् ॥ मेधावी जायते शीघ्रं यशसे च तिलैर्हुनेत् ॥ कांत्यै प्रजुहुयाद्धीमान् केवलाज्येन मंत्रवित् ॥ पयःप्लुतयष्ट्याह्व-
खंडैः प्रजुहुयाद्बुधः ॥ दीर्घमायुरवाप्नोति ह्यरोगी मंत्रवित्तमः ॥ त्रिस्वादुयुक्तं लवणां हुनेन्निशि सहस्रकं ॥ अष्टाधिकं च मासेन सो मर-
स्त्रीवशं नयेत् ॥ का कथा मर्त्ययोषासु वाघाच वशगा भवः ॥ दशपुष्पदाहभस्मासे जप्तं मनुनामुना ॥ त्रिसहस्रं घृतं मूर्ध्नियापरोगह-
रंपरं ॥ जनताव वशं देह्येतस्मार्थिमं सर्वकामदं ॥ घृताक्तदूर्वा वरुण्यां हुनेदयुतसंख्यया ॥ भजी ॥ याच्छुतशिष्टं च चरुं दद्याच्च दक्षि- राम
णां ॥ गुरवे तर्पयेद्विप्रान्वस्त्रालंकारगोःशुभैः ॥ सा पापमृत्युरोगादियास्यत्यायुश्च विंदति ॥ उक्तिप्रवाहः पुरुषः प्रत्यहं रविबिंबके ३५६
नष्टदृष्टिश्चाष्टशतं जपेत्प्राप्नोत्यतंद्रितः ॥ महाधनाढ्यमचिरादन्नाद्यं पशुकादिकं ॥ दुग्धमध्ये प्रातरमुं रमेशं तर्पयेत्तु ॥ अष्टाधिकंस

356.

हृदि ह्रां ॥ अत्र न्यासे प्रमाणोक्तांगुलयो बोद्धव्याः मूलाधारे ॐ हृदि न्निं उरवे ष्टं · दक्षबाहुमूले श्रीं · वामे कं · दक्षोरुमूले रं · वामे स्वां · नाभौ हां ॥ गले उं · उदरे न्निं · हृदि ष्टं · दक्षस्तने श्रीं · वामे कं · दक्षपार्श्वे रं · वामे स्वां · पृष्ठे हां ॥ २ ॥ मुखे उं · नेत्रयोः न्निं · श्रोतयोः ष्टं नासयोः श्रीं हस्ताग्रयोः कं मणिबंधयोः रं · कूर्परयोः स्वां · अंसयोः हां ॥ ३ ॥ दक्षपादाग्रे · वामे न्निं दक्षगुल्फे ष्टं · वामे श्रीं · दक्षजानुनि कं दक्षनितंबे स्वां · वामे हां ॥ ४ ॥ दक्षदोर्मूले उं · मणिबंधे ष्टं ॥ अंगुष्ठादिपंचांगुलीषु पंचवर्णान्न्यसेत् ॥ ५ ॥ एवं वामदोर्मूलादिषु न्यसेत् ॥ ६ ॥ एवं दक्षोरूमूलजानुगुल्फे पंचांगुलीषु न्यस्य ॥ ७ ॥ एवं वामोरूमूलादि ॥ ८ ॥ दक्षकरांगुष्ठतर्जन्यो मध्यमारभ्य वामांगुष्ठतर्जन्योर्मध्यावधि षडंगुल्यानेषु न्यसेत् ॥ ९ ॥ एवं पादयोरंगुल्यंतरालेषु ॥ १० ॥ मूर्ध्नि उं · नेत्रयोः न्निं · करो ष्टं · हृदि श्रीं · उदरे कं · उरुद्वये रं जानुनोः स्वां · पादयोः हां ॥ ११ ॥ हृदये च त्वचि उं रक्ते न्निं · मांसे ष्टं · मेदसि श्रीं · अस्थ्नि कं · मज्जायां रं · शुक्रे स्वां · वायौ हां ॥ १२ ॥ दक्षगंडे उं · दक्षांसेति दक्षस्तने ष्टं · दक्षपार्श्वके श्रीं · उपुन्निं · गुदवृषणगुह्यमूलेषु ष्टं · पार्श्वद्वयनाभिषु श्रीं वक्ष · पृष्ठहृदंसेषु कं · करांघ्रिवक्त्रनासासु रं · श्रोत्रनेत्रेषु स्वां ललाटे हां ॥ १५ ॥ शिरसि · ॐ नेत्रयोः न्निं · मुखे ष्टं · हृदये श्रीं नाभौ कं · गुह्ये रं · जानुनोः स्वां · पादयोः हां नमः ॥ १६ ॥ इति षोडशधा मूलमंत्राक्षराणि विन्यस्य मूलेन व्यापकं कृत्वा प्रागुक्तमूर्त्तिपंजरन्यासं कृत्वा मुखे ब्राह्मणवर्णाय नमः हस्तयोः क्षत्रियवर्णाय नमः उर्वोर्वैश्यवर्णाय · पादयोः शूद्रवर्णाय · इति विन्यस्य शिरसि किरीटाय कर्णयोः · मकरकुंडलाय ॥ गले कौस्तुभाय · ग्रैवेयाय · वक्षसि श्रीवत्साय · हाराय · वहुषु

शि॰ चं
३५७

नंमिच ॥ तापयेदितिरुच्चार्य्य वदेद्दीपयशोषये ॥ मारयंस्तंभयद्रावयाकर्षयपदद्विस ॥ आवेशयंवपरमंसुभगंसर्वमुच्चरेत ॥ सौभा
ग्यंनेकरपदंसर्वकामप्रदेति च ॥ अलक्ष्मीर्हनयुग्मं च चक्रे रागदयाप्युनः ॥ खड्गेनसर्ववारोश्च भिंदयुग्मंततो वदेत ॥ पाशनेवंध
छिनयमंकुशेनछिनाडया ॥ तुरुयुग्मं च किंतिष्ठसितावद्यावदीरयेत ॥ समीहितंवमेसिद्धंभवतिक्लींसर्वमव ॥ अस्त्रहृंछक्तिमामा
रप्रणवांश्चसमुच्चरेत ॥ इत्युक्तोमममंत्रोयंप्रोक्तः सर्वसमृद्धिदः ॥ पूर्ववीजेनमायांत्यनान्यवीजानिवोचिरे ॥ आचार्यकेवनेन्यक्का
सावेशयपदद्वयं ॥ मोहयछिनयंद्रुद्रुः स्तंभयद्वयंततः परं ॥ कुमादौक्लींचनेछंतितथापरमपूर्वतः ॥ समस्तशाब्दंप्रोक्तश्चालक्ष्मी(
स्यानेकपदं ॥ मायाह्रीरमाश्रींतारःप्रणवःमारःक्लींहृदयंनमः लोहितःपःकर्णाउनेनसु ॥ वह्निरेफःउनाउकारेणातेनरूःषोन्त
माप्रतिरूपश्चरूपं ॥ लक्ष्मीस्वरूपंनिवाशसकलस्वरूपं ॥ जगत्क्षोभणस्वरूपं॰ सर्वस्त्रीहृदयस्वरूपं ॥ विदारणात्रिभुवनोन्मादक
रस्वरूपं ॥ सुस्वरूपं॰ आनीरेफःअनंतआतेनरा ॥ असुरस्वरूपंमउजसुंदरीस्वरूपं ॥ जनस्वरूपंमनासिस्वरूपंतापयेतिद्विः ॥ ताप
यतापय ॥ दीपयशोषयमारयस्तंभयद्रावयाकर्षयद्विशः ॥ एतत्पदषट्कंद्विरुच्चरेदित्यर्थः ॥ आवेशयस्वरूपंवकाद्वि ॥ परमसुभ
गसर्वस्वयं॰ सौभाग्यस्वरूपं॰ सर्वकामप्रदस्वरूपंः अलक्ष्मीःस्वरूपं॰ हनयुग्महनहनचक्रेरागदयास्वरूपं ॥ खड्गेनसर्ववारोस्वरू
पं ॥ छिंतादय॰ताडयताडय ॥ तुरुयुग्मंतुरुतुरु॰ किंतिष्ठसितावद्यावदितिस्वरूपंसमीहितंमेसिद्धंभवतिस्वरूपंक्लींस्वरूपंवर्महुंअस्त्रं

357

राम
३५७

हस्तंनुसलभेदविराड्रमां॥तुमिष्टमन्त्रंववनेलभन्तेभूत्यवर्गयुक्॥वश्याकर्षणसंमोहस्तंभोच्चाटमारणं॥कुर्यादनेनमनुनायथाऽवै
सुशोभनै॥किंवऊक्तेनवऊनानिखिलंसाधयेत्सुधी॥यस्त्वंश्रीकरंविष्णुंभजेद्भक्तिहुतोनरः॥भुक्तेहसकलान्भोगान्यातिविष्णोःपरं
पदं॥तथा॥श्रीमन्नसयणस्यान्तेदद्यच्चरणौशरणंस्यात्प्रपद्ये॥ठःतंश्रीमच्चनारायणमपिचनमस्तत्ववर्णाययुक्तः॥तत्ववर्णाश्च
तुर्विंशतिवर्णा॥न्यास्याद्याःपूर्वमुक्ताःसमस्तारमनुनापंचवाणानिकुर्यात्तत्रजाहोमादिसर्वंसमुदितविधिनामुक्तिदोमंत्रएषः॥अ
समनुनाकामवीजेनक्लांक्लींक्लूंक्लैंक्लौः इत्याद्ये॥॥श्रीसंमोहनतंत्रे॥अथवक्ष्येमहादेविमंत्रंश्रीयोरुखोत्तमः॥धर्मार्थसुखमोक्षा
पिफलदंयोषितांनृणां॥प्रवरमंत्ररत्नंसर्वतंत्रेषुगोपितं॥अतिगुह्यतमंदेविदौर्भाग्यव्याधिनाशनं॥दारिद्र्यनाशकंदेविजरामरणा
नाशकं॥शोकभीतिहरंदेविमंत्रंत्रैलोक्यमोहनं॥वश्याकर्षणविद्वेषमारणोच्चाटकारकं॥स्तंभकारकंमंत्रर्धिवीरसिद्धिकरंपरं॥शत्रु
भिःपरिभूतैश्चसर्वविघ्नैरुपद्रुतैः॥हतार्थैःक्लिष्टसंसारवासिभिर्दुःखितैर्जनैः॥भर्तृराजाभिभूतैश्चविघ्नातैःपुत्रकांक्षिभिः॥भृत्यादि
भिश्चसंग्रामेविजयाकांक्षितैर्जनैः॥योषाभिश्चैवसंसेव्यंमंत्रंश्रीसुखमोक्षदं॥भूरातसम्यक्तमासेनसर्वलोकहितप्रदं॥मयारमानार
मारवीजानिहृदयंवदेत्॥लोहितंकर्णायुक्तंचवदेद्वह्निमुनासह॥घोत्रमाप्रतिरूपंचलक्ष्मीपदमतःपरं॥निवाससकलोभूत्वाज
गत्क्षोभनमुच्चरेत्॥सर्वस्त्रीहृदयांतेविदारणत्रिमुतोवनं॥मनोन्मादकरांतेचमस्यनंतीसुखवदेत्॥मनुजसुंदरीचेवजननमुन्काम

शि॰चं
३५८

उ॥ कौमोदकी महाशंखं बले सर्वासुरांतकि॥ प्रसीद ॐ फट्स्वाहांतः सवर्नकपदं वदेत्॥ मुशले पोथयद्वंद्वं हुं फट्स्वाहांतको मनु॥ मुशलस्यांकु
शस्याशफरं ॐ शंखयुग्मकं॥ हुं फट्स्वाहांतिकः शोक्तः पाशांबंधयुगं वदेत्॥ आकर्षययुगं हुं फट्स्वाहांतः पाशमंत्रक॥ एवमायुधमंत्रास्ते मयाप्रो
क्ता महेस्वरी॥ पक्षिराजायाग्निवधूः पक्षिराजमनुर्मतः॥ त्रैलोक्यमोहनायाथ विद्महे तेस्मरायचा॥ धीमहीति वदेत्तन्नो वदेविष्णुः प्रचोदया
त्॥ पुरुषोत्तमगायत्र्या जपार्चासु विशिष्यते॥ ततः परांजलिबद्ध्वा तान्वाणान्कामाश्च विन्यसेत्॥ द्रामाद्यां द्राविणीं देवि ड्रीमाद्यां क्षोभिणी
मपि॥ क्लीं वशीकरणीं भद्रे ब्लूं बीजाद्यां महेश्वरि॥ आकर्षणीं महेशानि सर्गांत भृगुउर्विकां॥ संमोहनीं क्रमादेवं वाणान्न्यासे यमीरितं
कामं मन्मथ कंदर्प मकरध्वजसंज्ञका॥ मीनकेतुर्महेशानि येवमयपरिकीर्तितः॥ पराबीजं मध्यवाणां वाग्भवं परमेश्वरी॥ तुर्य्यवाणा
न्तनश्चैव स्त्रीबीजं चक्रमात् प्रिये॥ कामबीजप्रपुटितां मातृकां विन्यसेत्प्रिये॥ विन्यस्यन्मारमालाराफवर्णानानाभिमंत्रवित्॥ च
त्वारिंशन्मातृकाच ततः पंचन्यसेत्सुधीः॥ जठरे हृदये कंठे वक्त्रे नासि ततः प्रिये॥ त्रीन्वर्णान्व्यापयदेहे समस्ते न सकृत्तथा॥ व्या
पकं विन्यसेद्देहे कामाश्चैव सशक्तिकान्॥ कंदर्पमातृकापूर्वान्मातृकावस्तुविन्यसेत्॥ दाडिमीकुसुमाभांश्च वामीके शक्तिसंयुता
न्॥ सौम्यानक्तांवरान्कापुष्पवाणेक्षुकार्मुके॥ विभ्राणान्सर्वभूषाढ्यान्मंत्री कामांस्मरेत्प्रिये॥ शक्तयः कुंकुमनिभाः सर्वाभरणभू
षिता॥ नीलोत्पलकराध्येयास्त्रैलोक्याकर्षणाक्षमाः॥ न्यसेत्कामरतीपश्चात्कामदश्च सुरेश्वरि॥ प्रीतिं च कामिनीं कांतोकालिमान्मोहि

358

राम
३५८

फट्हृन्नमः शक्तिः ह्रीं मायाश्रीं मारः क्लीं प्रणवः ॐ ॥ जैमिनिर्ऋनिरस्योक्तः छंदोमितमितिनिरितं ॥ त्रैलोक्यमोहनं तनुर्देवता पुरुषोत्तमः ॥ षडं
गानि मनोदेवि नेत्रांतानि प्रकल्पयेत् ॥ हुं फट् हृदंतानि शिवे तार मारादिकानि व ॥ वदेत्सर्वं वपुरुषोत्तम मत्रिभुवनं वदेत् ॥ मनोन्मा
दकरं हृद्यसकलां नेजगत्पदं ॥ श्रोभरां प्रवदेद्वश्यस्त्रीदयिते तिमिरोमतं ॥ मन्मथोत्र वदेन्मांगाजकां मां ने वदीपिनि ॥ शिखामंत्रश्च प
रमं देत्तु भगशब्दतः ॥ सर्वसौभाग्यकर तो वदेद्प्रतिरूपक ॥ केशवस्मारपुष्पर्मसुरापुरयपदं वदेत् ॥ मनाभिहनयुग्मं वदारयद्व
द्वनश्च मे ॥ वशमानययुग्मं वनेत्रमंत्रउदाहृत ॥ विन्यसेत्र षडंगानि द्वादशांगानि विन्यसेत् ॥ हृदास्युदरपृष्ठेषु करयुग्मोरुजानु
षु ॥ पादेवकुर्यान्मंत्रस्य पदानि द्वादशैवतु ॥ शक्तिश्री मारबीजानि संयुध्यंतान्यर्णार्णवे ॥ तारादीनि हृदाध्यानि परायत्नस्य चो ईगं
मूर्तयो द्वादश तथा व्यापकं विन्यसेततो ॥ त्रैलोक्यमोहनपदं हृषीकेश प्रतीति व ॥ रूपमन्मथसर्वस्त्री हृदयाकर्षणां वदेत् ॥ आगछ
हृदयचैव व्यापकाराणः समीरितः ॥ अथ ध्यानं ब्रवनवो वक्ष्ये नैकमतः शिवे ॥ वेदादमारबीजाद्याः सर्वेमंत्रामहेश्वरी ॥ सुदर्शनम
हावक्रराजा ने हनयुग्मकं ॥ सर्वदुष्टपदं ब्रूयात्तत्र छिंद द्विभिंदयुक ॥ भयो विदारय द्वंद्वं परमंत्रान्ग्रस द्वयं ॥ भक्षय द्वय भूतानि
त्रासय द्वि हुमस्त्रकं ॥ स्वाहा वक्राय हृदयं चक्रमेत्र उदाहृतं ॥ अस्त्रफट्हृदयनमः युगं ममन्मत् ॥ वदेन लक्ष्य रायेति द्विः ठसंखमनु
प्रिय ॥ ॐ फट्डेंतः खड्गस्त्रीक्ष्णाभिदेयुग्मं वदेन्नतः ॥ स्वक्रमंत्रोमहेश्वानि धनुर्मंत्रं शृणु प्रिये ॥ शांगाय सशरायाथ ॐ फट् डेंत्सोगहाम

श्री·चं
३५८

विन्यसेत् ॥ श्रीस्वांश्रीये नमस्त्वेषः श्रियो मंत्र उदाहृतं ॥ सर्व्वारौ विन्यसेदेनं मंत्रं देवेशि मंत्रवित् ॥ लक्ष्म्यायाः पुष्टिपर्यंताउद्धृताथ हृदंति
का ॥ ह्रस्वत्रयक्लीववर्विंदुवर्जस्वरयुतो भृगुः ॥ लोनयुक्तोउरवराउस्वविजान्यासां महेश्वरी ॥ न्यसम्व्यावीजपूर्वास्ताः कास्यकंठगुह्यके ॥ क
ऊरुद्वन्नाभि सर्व्वांगेव्यापकाराद्दव मे प्रिये ॥ अव्यादिकं च विन्यस्य भूषणानि न्यसेत्प्रिये ॥ आयुधान्यन्यथास्थानं तत्तन्मुद्राभिरद्रिजे ॥ वि
न्यसेन्मंत्री वर्य्यासो श्रीवत्सं कौस्तुभं तथा ॥ वनमालां मालवीर्य यथास्थानं न्यसेत्प्रिये ॥ उर्द्धगुष्टौ मिथः श्लिष्टौ मुष्टिमुद्रां नियोजयेत्
त्रैलोक्यमोहनाख्येयं मुद्रैनां मूर्द्ध्नि विन्यसेत् ॥ एवं न्यस्तशरीरोसौ ध्यायद्धीपुरुषोत्तमं ॥ उद्यानं संस्मरेदादौ सर्व्वर्त्तुव्याप्यशोभितं ॥ अ
नल्पकल्पविटपिमंजरीराजितं ॥ मंजरीसुरजःपूरपूरितानाशासुखं प्रिये ॥ निरंतरपरिभ्रांतमधुव्रतकदंबकं ॥ आमोदयरापस्याना
भमिंद्रियानांसुखप्रद ॥ आलयोनेखिलप्रायो मनोज्ञं जननस्थलं ॥ शृंगारं लक्ष्म्याइने मत्केलिसद्म मनोरमं ॥ रतेरतिसुखप्रायमृ
तूनां जन्मभूरिव ॥ उपमानं मनोज्ञानां नैवसाफल्यकारकं ॥ आश्चर्यभूतं वस्तूनां दृष्टानां केवलं प्रिये ॥ अस्मिन्कल्पद्रुमे देवि विस्मरेन्मं
त्रीसमाहितः ॥ लसन्महानीलमणिमयमूलमनोरमं ॥ प्रत्यग्रवज्राश्ममयप्रकाराउविलसत्तनुं ॥ प्रोद्यच्छिलांकूनदवद्दीर्घशाख
मत्कांतिमं ॥ हरिन्मणिप्रोढदललसद्विद्रुमपल्लवं ॥ अनर्घमणिपुष्पं वज्रकारुविरकेशरं ॥ निपीयपीयूषनिभमधुपव्याप्तोदरोज्झ
तं ॥ रागाज्वरामनीतैस्तैः षट्पदानां समूहकैः ॥ निजयोषित्सहायैश्च गीयमानां विलासिभिः ॥ शाखाग्रजैरर्थिजनव्रजायाप्तधनव्रजं ॥

359

राम
३५८

नियुतः॥ कामगः कमलानन्दस्त्वकामवारोविलासिनी॥ कामिकल्पलतेनद्वत्काउकश्यामलेतथा॥ कामवर्द्धनसंयुक्ताविज्ञेयाचउविस्मि
ता॥ रामश्चविस्मिताक्षीचविशालाक्षीयुतोरम॥ रमणोलेलिहानावरतिनाथदिगंवरे॥ रतिप्रियश्चरामाचरात्रिनाथश्चकुब्जिका॥ र
माकांतयुताकांतारमणाश्चनित्यया॥ निशाचरश्चकल्याणीनंदकोभोगिनीयुत॥ नंदनःकामदायुक्तोनदीवापीसुलोचना॥ सुलाधि
न्यायुतोदेविनथानंदपितायुतः॥ पंचवाणाश्चमर्द्दिन्याकलहप्रिययायुतः॥ विश्वेशश्चमहादेविरतिपूर्वःसखप्रिये॥ पुष्पधन्वाच
राक्षीचसुमुखाचमहाधनु॥ भ्रामणोनलिनीयुक्तोभ्रमणोजपिनीयुत॥ भ्रममाणाश्चपालिन्याभ्रमश्चशिवयायुत॥ भ्रांतउश्चनतो
देविभ्रामकोरमयायुतः॥ भृंगोभ्रमातनःपश्चात्तुनचारश्चलोलया॥ भ्रमावहश्चंचलाचमोहनोदीर्घजीह्वया॥ रतिप्रियामोहको
चलोलाक्षीमोहयंवच॥ मोहवर्द्धनभृंगिणापोमदनःपाटलायुत॥ भृंगनायकहंसिन्यौगायकोविश्वतोमुखी॥ जगदानंदिनीयुक्तो
गीतिज्ञस्सदनंतरं॥ नर्तकोरमणीयुक्तःखेलकःशांतिसंयुत॥ उन्मत्तःकलकंठीचमत्तकश्चकृकोदरी॥ विलासिमेघश्यामेचसो
त्रमोलोभवर्द्धनः॥ तत्वन्यासंततः॥ कुर्यात्पार्श्वयुतेषुच॥ नाभिगुह्यगुदेषुस्यात्पादसंधिंगुलीषुच॥ अर्कोभमारवीजस्यन्यासः
सर्वसमृद्धिदः॥ द्वादशाक्षरमंत्रस्यन्यासत्रयमथोच्यध॥ कुर्यात्संहारसृष्टिञ्चस्थितिचैवप्रकीर्त्तिता॥ मूर्तिपंजरविन्यासंकुर्यान्मंत्री
समाहित॥ पूर्वोदितायागायत्र्यावर्णान्न्यसेत्ततोवुध॥ कलभादष्टदले॥ पत्संध्येग्रेषुततोवस॥ षडंगंद्वादशांगेचवाणानंगानत्र

वनमालास्वलंकृतं॥ गंभीरदक्षिणावर्त्तनाभिमंडलमण्डितं॥ हेमाभपीतवस्त्रेणसंशोभिजघनंस्मरेत्॥ आरक्तनखरत्नैश्चस्वंगुलियैर्वि-
राजितैः॥ रक्तोत्पलनिभौपादौविह्नितौध्वजवारिजैः॥ सुनूपुरौहरेर्ध्यायेज्ज्ञानैश्वर्यप्रदायकै॥ वामोरोसंस्थितांध्यायल्लक्ष्मीस्वर्णासमप्रभां
कृशान्नुदरमादाग्नांबृहज्जनितंविनीं॥ तनुमध्यांघनोत्तुंगचारुपीनपयोधरां॥ कृशात्कंकनवाहुभ्यांनानारत्नांगुलीयकां॥ विद्रुमा-
धराविंवोष्ठिनिलोत्पलविलोचनां॥ दीर्घांतिकांतिमत्स्निग्धनीलकंचितमूर्द्धजां॥ मुक्तामालांशिरोभागाद्दधानांलोलकुंडलां॥ कंठा-
त्स्तनयुगंयावन्मुक्तादामविराजितं॥ क्षीराब्धिफेनरुचिरेवमानंश्वेतवाससा॥ दक्षेणावाहुनादेवंगाढमालिंग्यसंस्थितां॥ प्रियांगेस-
गमान्नेक्षजातरोमांचकंचुकाः॥ देवस्यास्यसमावीक्ष्यस्मरराविमोहितां॥ दक्षिणोदेवदेवस्यगद्यपद्यमयीगिरं॥ वदंतीभारतींध्याय-
द्वीनापुस्तकधारिणी॥ सिद्धचंदनलिप्तांगींपीनोन्नतपयोधरां॥ विशाललोचनांदेवींमुक्ताहारविभूषितां॥ सृजंतींलोचनैर्भरा-
न्विश्मोदेविश्वविस्मिता॥ विद्यासौभाग्यलाभायध्यायदेवंपरांगिरं॥ परितोवासुदेवाद्याध्यातव्यामूर्त्तयोहरे॥ श्यामशुक्लांरुणापीता-
क्रमशःसर्वभूषणा॥ तथाष्टौदेवदेवस्यपरितसर्वभूषणा॥ लक्ष्म्याद्याःशक्तयोध्येयाररात्कंकनवाहुकाः॥ सितवामरधारिण्योमुक्ता-
हाराःसुमध्यमा॥ कृशान्नुरपादाब्जाःपीनोन्नगपयोधराः॥ त्रैलोक्यमोहनंदेवंवीक्ष्यमाणास्मरार्द्दि॥ गौरीलक्ष्मीसरस्वत्यौरतिप्रीति-
तथारुणा॥ शशांकधवलेज्ञेयेकांतिकीर्त्तीहरिप्रिये॥ तुष्टिपुष्टीतथाश्यामेध्यातव्येहरिवल्लभे॥ नरेन्द्रदेवदैत्यानांप्रमदाःस्मरविह्वलाः

360

प्रयछंतंस्ववंत्सोमीधाराःपुष्परसोद्भवा॥दानांबुधाराश्रियस्रवहंतीववपस्पतं॥विवर्तमानरुचिरभ्रमराल्यक्षमालकं॥मूर्द्धाघोरात
पोद्योतसेवितंस्तमनोजले॥ स्वांतंतथानपस्यंतेनेत्रंप्रत्यक्षतामिव॥ श्रीमंतंमंडुजाक्षंतंतस्यमूलेमनोहरौ॥ माणिक्यकुट्टिमोद्भूत
भूतलेपीठमुत्तमं॥ अरुणांबुजमध्यस्थमस्मिन्प्रद्योतनप्रभं॥ गरुडंपक्षिराजंतंस्कंधारूढमथास्यतं॥ स्मरेदुथांगयाणिंजंसुर्य
कोटिसमप्रभं॥ लावण्यपरिपुष्पन्नवयौवनकोमलं॥ अंगसौंदर्यशोभौघधिक्कृतांजगदर्पकं॥ मदालोलितरक्तासकामवारणो
पजिह्वलं॥ माणिभूषणादीप्रांगंदिव्यगंधावराह्वतं॥ प्रभयारुणयाविश्वंरंजयंतंमहेश्वरि॥ यक्षगंधर्वदेवौघकामिनीशतसे
वितं॥ नीलकुंचितकेशाधीकलोलुपालीनीर्घनादमनोरमं॥ कंदर्पचापविलसच्चडुलालिसहध्रुवं॥ पद्मपत्रविशालाक्षंलोक
नैःकामिनीजनं॥ मोहयंतंमदारत्नमौलिद्युतिविराजितं॥ उद्यत्सविद्रुमशिलाशकलारुणितावरा॥ पक्वबिंबाधरंदेविनाशाव
शंमनोरमं॥ आलोलकुंडलोल्लासद्युतिकपोलकं॥ विलसत्कल्पपुष्पोद्यद्दामभूषितसत्कुलं॥ बाहुष्टकंसदाध्यायेत्करात्कं
कनमंडितं॥ अशोकपल्लवाकारविलसद्विद्रुमोपमं॥ कराग्रंगुलयोध्येयानानारत्नांगुलीयकाः॥ दक्षिणाधःकरेचक्रंचिंतयेदर्कभा
स्वरं॥ खड्गंतथोपरितनेमुसलंचतदुत्तरे॥ तथोर्द्ध्वदक्षिणेहस्तेचिंतयेदुविरांकुशं॥ वामोर्द्धेचिंतयेत्पाशंतदधःशंखमेवच॥ सशारंच
धनुर्वामेगदांध्यायेदधःकरे॥ वक्षस्थलहरेध्यायेल्लक्ष्मीकुचविमर्दितं॥ श्रीवत्सकौस्तुभोद्भासिविविशालकमनीयकं॥ मनोरममसमद्युति

नये ऋषये नमः मुखे अनितायछंदसे नमः हृदये श्रीपुरुषोत्तमायदेवतायै नमः॥ इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा॥ ॐ क्लीं पुरुषोत्तम
त्रिभुवनोन्मादकर हुं फट् नमः हृदयायनमः॥ ॐ क्लीं सकलजगत्क्षोभरालक्ष्मीदयित हुं फट् नमः॥ शिरसेस्वाहा॥ ॐ क्लीं मन्मथोन्माग
जेकामदीय हुं फट् नमः॥ शिखायै वषट्॥ ॐ क्लीं परमसुभगसर्वसौभाग्यकराप्रतिरूपायकेशवस्मर हुं फट् नमः॥ कवचाय हुं॥ ॐ क्लीं सु
रासुरमनुजसुंदरीहृदयविदारणासर्वप्रहरणाधारसर्वकामिक हन हन दारय दारय वेवसामानय नेत्रायवौषट् इति नेत्रांतषडंगमंत्रा
तेंगुष्ठादितलांतनारयोर्विन्यस्य नेत्रमंत्रं कनिष्ठयोर्न्यसेद्रदाघरत्रातं विन्यस्य पश्चान्नेत्रं न्यसेदिति नेत्रांतषडंगानि विन्यस्य॥ ॐ नमः
क्लीं पराय पुरुषात्मने नमो हृदयाय नमः॥ ॐ नमः श्री परायत्यात्मने शिरसे स्वाहा॥ ॐ नमः क्लीं परायाच्युतात्मने नमः शिखायै व
षट्॥ ॐ नमः पुरुषोत्तमायपरायवासुदेवात्मने नमः कवचाय हुं॥ ॐ नमोप्रतिरूपायसंकर्षणात्मने नमः॥ अस्त्रायफट्॥ ॐ
नमो लक्ष्मीनिवासायपरायप्रद्युम्नात्मने नमः नेत्रायवौषट्॥ उदरे ॐ नमः॥ सकलजगत्क्षोभणापरायानिरुद्धात्मने नमः॥ पृष्ठे॥ ॐ
नमः सर्वस्त्रीहृदयविदारणापरायनारायणात्मने नमः॥ बाह्वोः ॐ नमः त्रिभुवनमनोन्मादकरायब्रह्मणो नमः॥ ऊर्वोः ॐ नमः परमसु
भगपरायविष्ण्वात्मने नमः॥ जानुनोः॥ ॐ नमः सौभाग्यकरायनृसिंहात्मने नमः॥ पादयोः॥ ॐ नमः सर्वकामप्रदपरायवराहात्मने नमः
सर्वांगे॰ त्रैलोक्यमोहन हृषीकेशायप्रतिरूपमन्मथसर्वस्त्रीहृदयविदारणाय गच्छ इति व्यापकं विन्यस्य। श्रीकरोक्तवत्पंचबाणान्पंच

गृहीत्वा चंदनादीनि हेमरत्नस्रजः शिवे॥ आयांत्यः परितोष्येयादेवदर्शनलालसा॥ हेमप्रसूनमालाभिश्चंदनैर्विविधैः शुभैः॥ त्रैलोक्यमो
हनं देव पूजयेत्योनिरं नरं॥ कोटियोजनविस्तीर्णो हेमरत्नविनिर्मिते॥ मनःप्रीतिकरे देवि साधकाभीष्टदायके॥ धनाद्यैर्निर्मिते देवि मंड
लत्रितयान्विते॥ विमलादिसुशक्तिस्थे योगपीठे महाप्रभे॥ आसीनं चिंतयेद्देवं सर्वसत्त्वविमोहनं॥ भुवनानि भासयंतं निजत्विषा
किन्नरोरगगंधर्वचारणैः खेचरव्रजै॥ गीयमानागुरागान्तं सर्ववांछितसिद्धिदं॥ सुपर्णाय पदं प्रोक्ता विघ्नहे पदमीरयेत्॥ पक्षिरा
जाय धीशब्दं महि तन्नो पदं वदेत्॥ गरुडः शब्दसंज्ञार्थ प्रवदेच्च प्रचोदयात्॥ गायत्र्येषा समाख्याता सिद्धिदा मूलमंत्रतः॥ मूर्तिप्र
कल्पादेवेशं पूजयेच्चंदनादिभि॥ अर्घादिकं च भूषांतमर्पयित्वा रमोत्तम॥ उरोदह्येनस्वैष्यंगानि प्रयजेन्नतः॥ वर्मांतकानि चाशासु
विदिक्ष्वस्त्रं पुरो हरे॥ दक्षे तु लक्ष्म्यादिकाश्च पूर्वाद्याशासु संयजेत्॥ दरचक्रगदाचारुमुसलानि विदिक्ष्वथ॥ शार्ङ्गं खड्गं कशोयो
नियाशानाशाधियांस्ततः॥ वज्रादिनीन ततो वाह्ये कुमुदाद्यान्वहिर्यजेत्॥ ततो दत्वा धूपदीपौ पूजयेच्च मनोपरे॥ देवि द्वादशभिः पुष्पैः मार
बीजस्य चोर्ध्वगं॥ त्रैलोक्यमोहनायेति सुते ऊं हृदयांतिके॥ पंचभिश्चाथ पुरुषोत्तमाद्यैः पूजयेत् क्रमात्॥ शक्तिश्रीमारबीजाद्ये सुतेश्वन
मोतिकैः॥ पुरुषोत्तमसंज्ञश्च हृषीकेशाह्वयः प्रियो॥ विष्णुश्रीधररामाश्च ज्ञेयाः पंचापि ते क्रमात्॥ षडावरणसंयुक्तं पुरुषोत्तमपूजनं
करोति भवेत्तोष्य — जनं सर्वदायकं॥ ॥ अथ प्रयोग॥ ॥ तत्र प्रातः कृत्यादि योगपीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि जैमि

गुरवे || वं गीतज्ञाय जगदानंदिन्यै || शं नर्तकाय परमशोभे || षं खेचराय कान्त्यै || सं उन्मनाय कलकंठ्यै || हं मन्त्रकाय पृकोदर्यै || लं विलासिने
मेघश्यामायै || क्षं लोभवर्द्धनाय सर्वोन्नमायै नमः || इति मातृकास्थानेषु विन्यस्य || ततः श्रीकरप्रकरणोक्त द्वादशतत्त्वानि संहारसृष्टिक्र
मेण विन्यस्य || पार्श्वद्वयनाभिजठरोरुमूलद्वयजानुद्वयगुल्फद्वयांगुलीक्लीं नमः || || इति कामबीजप्रतिष्ठापनं विन्यस्य पूर्ववन्मुद्रर्शि
न मंत्रप्रकरणोक्तप्रकाशानंदमंत्राक्षरन्यासान्सृष्टिस्थितिसंहारक्रमेण विन्यस्य साक्षरप्रकरणोक्तमूर्त्तिपंजरन्यासं कृत्वा || त्रैं नमः ल
लाटे || लों दक्षनेत्रे || कां वामे || मों दक्षदोर्मूले || हं दोर्मध्ये || नों मणिबंधे || न्यं अंगुलिमूले || विं अंगुल्यग्रे || यं वामदोर्मूले || हें वामदो
र्मध्ये || म्यां मणिबंधे || मं अंगुलिमूले || यं अंगुल्यग्रे || धां दक्षोरुमूले || मे जानुनि || हिं गुल्फे || नं अंगुलिमूले || नों अंगुल्यग्रे || विं वामो
रुमूले || सं जानुनि || पं गुल्फे · वों अंगुलिमूले || दें अंगुल्यग्रे · यानमः || ततः प्राग्वत्क्रमषडंगद्वादशांगवामकामन्यासान्विधाय || वामोरे
रावो श्रीप्रियनमः || इति विन्यस्य || शिरसि · श्यां लक्ष्म्यै नमः || गुरवे श्रीसरस्वत्यै नमः || कराठेः श्वं तन्यै || उहे श्वं प्रीत्यै || ककुदि · श्वैं कन्त्यै
हृदि श्वां कान्त्यै || नाभौ: श्वों तुष्ट्यै: सर्वांगेभ्यः पुष्ट्यै नमः || ततः प्राग्वद्व्यापकमंत्रेण व्यापकं विन्यस्य || ततः पुनरपि ऋष्यादिन्यासं विधा
धाय || वक्षसि · श्रीं श्रीवत्साय || कण्ठे क्लीं कौस्तुभाय || स्कंधादिपादांतं क्लीं वनमालायै || दक्षिणाधः करे ॐ सुदर्शन महाचक्रराज दह २
सर्वदुष्टभयं कुरु २ छिंद २ भिंद २ विदारय ४ सर्वमंत्रान्ग्रस २ भूतानि त्रासय २ हुं फट् स्वाहा चक्राय नमः || इति विन्यस्य || पूर्वहस्ते · ॐ

362

कामांश्च विन्यस्य ॥ क्लीँ अं क्लीँ नमः ॥ तथैव ॥ क्लीँ आं क्लीँ नमः ॥ इत्यादिमानृकां विन्यस्य ॥ अग्रे वक्ष्यमाणकाममालामंत्रस्य वर्णांश्च चत्वारिंशाणि ना-
दितः शिरोवदनदंते इत्यादिमानृकावर्णान्यासस्थानेषु नाभिपर्यंतेषु विन्यस्यावशिष्टाष्टाक्षरेषु पंच वर्णान् उदरहृदयकंठमुखनासिकासु वि-
न्यस्याभरत्रयं पृथक्पृथक्सर्वांगे व्यापकत्वेन विन्यस्य संपूर्णमालामंत्रेण समक्रूव्यापकं विन्यस्य ॥ ॥ क्लीँ अं गामाय रम्यै नमः ॥ क्लीँ आं
कामदाय ह्रीन्यै नमः ॥ एवं ॥ इं कान्ताय कामिन्यै ॥ ईं कान्तिमते मोहिन्यै ॥ उं कामकाय कमलायै ॥ ऊं कामचाराय विलासिन्यै ॥ ऋं कामिने
कल्पलतायै ॥ ॠं कामुकाय श्यामलायै ॥ ऌं कामवर्द्धनाय विक्षितायै ॥ ॡं रामाय विस्मितास्यै ॥ एं रमाय विशालाक्ष्यै ॥ ऐं रमणाय
लेलिहानायै ॥ ओं रतिनाथाय दिगम्बरायै ॥ औं रतिप्रियाय वरामायै ॥ अं रात्रिनाथाय कुब्जिकायै ॥ अः रमाकान्ताय कान्तायै ॥ कं रम-
मानाय नित्यायै ॥ खं निशाचराय कल्याण्यै ॥ गं वशकाय भोगिन्यै ॥ घं नंदनाय कामदायै ॥ ङं मंदिने सुलोचनायै ॥ चं लपित्रे सुराणि-
ण्यै ॥ छं पंचबाणाय मर्दिन्यै ॥ जं रतिसखाय कलिंकप्रियायै ॥ झं पुष्पधन्वने वराज्यै ॥ ञं महाधनुषे सुमुख्यै ॥ टं भ्रामणाय ज्वलि-
न्यै ॥ ठं भ्रमणाय जयिन्यै ॥ डं भ्रममाणाय पालिन्यै ॥ ढं भ्रमाय शिवायै ॥ णं भ्रान्ताय सुख्यायै ॥ तं भ्रामकाय रमायै ॥ थं भृगाय अभ्रमायै
दं भ्रान्तचाराय लोलायै ॥ धं भ्रमावहाय चलायै ॥ नं मोदनाय दीर्घजिह्वायै ॥ पं मोहनाय रतिप्रियायै ॥ फं मोहाय लोलाक्ष्यै ॥ बं मोदवर्द्ध-
नाय भंगिने नमः ॥ भं मदनाय पाटलायै ॥ मं मन्मथाय मदनायै ॥ यं मातंगाय मालायै ॥ रं भृंगिनायकाय दंसिन्यै ॥ लं गायकाय विनोद

शिवं
३६३

नेनमः ॥ ततः ओँ श्रीँ क्लीँ धरायनमः ॥ ह्रीँ श्रीँ क्लीँ रागायनमः ॥ इति देवसंपूज्यं नैवेद्यादिशेषं समापयेत् ॥ तथा ॥ एवं संपूज्य विधिव
च्छक्तसेव्यं मंत्रं जपेत् ॥ तद्दशांशं हुनेत्कुंडे त्वर्द्धराकेशसंन्निभे ॥ पलाशपुष्पैर्मंत्रेना नन्द्याय्याथवाप्रिये ॥ तर्पणं मार्जनं कृत्वा ब्राह्मणा
न्भोजयेत्ततः ॥ एवं सिद्धमंत्रैर्मंत्री काम्यकर्माणि साधयेत् ॥ लक्षजपः कृतेपुगपरा ॥ एवं ध्यात्वा चतुर्लक्षं जपेन्मंत्री समाहितः ॥ सार
सेग्रहे ॥ श्रीफलैश्चमलैर्वापि हुनेदर्कसहस्रकं ॥ अकिंचनोपि मंत्रज्ञो धनाधिपसमो भवेत् ॥ योजपेदयुतं प्रातस्तस्याधिर्नाशमेति
च ॥ ज्योतिष्मतीतैलवरं हुजुया व्याधिमुक्तये ॥ अष्टाधिकसहस्रं च भवेद्दीर्घबलं ततः ॥ सौभाग्यमतुलं चैव लभेत सुमनोज्ञतां ॥ अ
ष्टाधिकशतं जप्त्वा सम्यगंजलिनिर्भमां ॥ मंत्रकारणशिरसा धारयेन्मंत्रवित्तम ॥ सर्वलोकप्रियतमो भवेल्लियतमात्मना ॥ अपस्मार
प्रसूनैश्च संपूज्य पुरुषोत्तमं ॥ अष्टधाकसहस्रं च कुमुदे जुहुयात्ततः ॥ राजानो वशगास्सर्वे भवंत्येव सुनिश्चितं ॥ दिवसैश्चत्रिद
शभिः किंकरा एव नान्यथा ॥ मालतीपुष्पहोमेन वैश्यान् वशयेत्तिचिरात् ॥ पलाशकुसुमैर्हुत्वा विप्रान्शीघ्रं वसं नयेत् ॥ अभि
कांक्षति यां यो यां तस्य नामयुतं मंत्रं ॥ जपेल्लक्षं प्रतिदिनं चाष्टाधिकसहस्रकं ॥ दिनादेव वशगो भूत्वा सन्नायत्येव नान्यथा ॥ चोराप
हृतविप्रस्त अष्टाधिकसहस्रकं ॥ अश्वत्थोत्थसमिद्भिश्चानिशिनि स्यात्रिपक्षकं ॥ अथवा कटुतैलेन त्रिपक्षं तं हुनेत्क्रमात् ॥ अथवा
रात्रं दशशतं प्रजपेन्मंत्रं ॥ चोर एनं धनं दत्वा प्रणम्य प्रतिगच्छति ॥ सहस्रजप्तमंत्रेना घ्रसुनामंत्रजास्थिवा ॥ निखानं शत्रुदहने शत्रु

राम
३६३

363

ह्रीं खड्गनीभ्याभीद २ ह्रूं फट् खड्गाय ॥ तद्दक्षे ॐ ह्रीं संवर्तकमुसलपोथय ह्रूं फट् स्वाहा मुशलाय ॥ ॐ ह्रीं अंकुश ह्रूं फट् स्वाहा ॥ अं-
कुशाय ॥ वामोर्ध्वे ॐ ह्रीं पाश बंध २ आकर्षय २ ह्रूं फट् स्वाहा पाशाय ॥ तदध ॥ ॐ ह्रीं जलवराय स्वाहा ॥ शंखाय नमः ॥ तदधः ॥ ॐ ह्रीं
कौमोदकी महाबले सर्वासुरान्तकि प्रसीद २ ह्रूं फट् गदायै नमः ॥ ततस्त्रैलोक्यमोहिनीमुद्रां कामवजिमुच्चरन् मूर्द्धि विन्यस्योक्तविधिना
ध्यात्वा मानसपूजादियोगपीठावर्त्तेपिठमध्ये पक्षिराजाय स्वाहा पक्षिराजाय नमः ॥ इति गरुडं संपूज्य वाहनादिपूर्व्योपचारान्ते दे-
वस्य वामोरौ · श्री श्रियै नमः ॥ इति लक्ष्मीं संपूज्याष्टदलकेसरेषु देवाग्रादि चतुर्द्दिक्षु हृदा अंगचतुष्टयं कोणेष्वस्त्रं पुरतो नेत्रं ॥ इति
षडंगानि संपूज्याष्टदलेषु लक्ष्म्याद्यष्टशक्तीः प्रागुक्ताः ॥ संपूज्य विदिग्दिलाग्रेषु · शंखाय चक्राय · गदायै · मुसलाय ॥ कोणादलाग्रे-
षु · शांगाय · खड्गाय · अंकुशाय · पाशाय · इति संपूज्य लोकपालान् वज्रादीनि च संपूज्य बहिः पूर्वोक्तान् कुमुदादीनभ्यर्च्य धूपदीपौ सम-
र्प्य ॥ क्लीं त्रैलोक्यमोहनाय ह्रीं पराय पुरुषात्मने नमः ॥ क्लीं त्रैलोक्यमोहनाय क्लीं पराय सन्यात्मने नमः ॥ क्लीं त्रैलोक्यमोहनाय क्लीं परा-
यच्युतात्मने नमः ॥ क्लीं त्रैलोक्यमोहनाय लक्ष्मीनिवासाय पराय प्रद्युम्नात्मने नम ॥ क्लीं त्रैलोक्यमोहनाय सकलजगत्क्षोभणाय नि-
रुद्धात्मने नमः ॥ क्लीं त्रैलोक्यमोहनाय सर्वस्त्रीहृदयविदारणाय परायरात्मने नमः ॥ क्लीं त्रैलोक्यमोहनाय परमसुभगाय पराय वि-
ष्ण्वात्मने नमः ॥ क्लीं त्रैलोक्यमोहनाय सर्वसौभाग्यकराय पराय नृसिंहात्मने नमः ॥ क्लीं त्रैलोक्यमोहनाय सर्वकामप्रदपराय वराहात्म-

हूः रेफ ॥ उत्थितस्तेन रु ॥ ङेंतुरूक्मयोन्नमो नमः ॥ षोत्तमाय ॥ वर्म हुं अस्त्रं फट् ॥ अग्निवधूस्वाहा ॥ तथा ॥ ऋषिर्ब्रह्मा च गायत्री छंदः प्रोक्त
च देवता ॥ पुरुषोत्तमसंज्ञश्च विष्णुस्त्रैलोक्यमोहनं ॥ अंगत्रयं पूर्वबीजैः षड्दीर्घाणिस्तथा वयं ॥ ॐ हृत् ॥ क्लीं शिरः ॥ श्रीं शिखा ॥ पुरु
षोत्तमाय कवचं ॥ हुं फट् नेत्रं ॥ स्वाहा अस्त्रं ॥ स्वाहा अस्त्रं ॥ स्वाहास्त्रमिति ॥ संस्मरेत्परमं विष्णुं रक्तवर्णं चतुर्भुजं ॥ शंखचक्रगदा
पद्मधारिणं पुरुषोत्तमं ॥ वामायूर्ईयोराधे तस्या अधस्य योरसो ॥ पूर्वादिने ततः ॥ पीठे देवमावाह्य मंत्रवित् ॥ अंगानि सर्वतो दिक्षु
वासुदेवादिकान्यजेत् ॥ शक्तयः कोणगा पूज्या शंखादीनि ततो यजेत् ॥ कुमुदाद्यान् लोकपालान् वज्रादिनि ततो यजेत् ॥ प्रयो
गः सुगमः ॥ तथा ॥ जपेन्मंत्रं वर्णलक्षं तत्सहस्रं हुनेत्तथा ॥ प्रफुल्लैः कमलैः पश्चात्तर्पणादि समाचरेत् ॥ एवं सिद्धमंत्रः कुर्या
त्प्रयोगान् पूर्वं मंत्रवित् ॥ सुंदराचार्यशिष्येण श्रीनिवासेन धीमता ॥ चंद्रिकायां प्रणीतायां चतुस्त्रिंशः प्रकाशकः ॥ ॥ श्रीशि
वार्चनचंद्रिकायां चतुस्त्रिंशत्प्रकाशः ॥ ॥ सारसंग्रहे ॥ अथोच्यते हृषीकेशमंत्रः सर्वार्थसाधकः ॥ कामस्ततो ऋषिकेशो वायुर्न
स्तत ईरितः ॥ अष्टाक्षरो मनुः प्रोक्तो हृषीकेशस्य शोभन ॥ कामं कामबीजं ॥ हृषीकेशाय स्वरूपं ॥ वायुर्यं नत्यंतः नमो नं ॥ तथा ॥
ऋषिर्ब्रह्मा समुद्दिष्टो नुष्टुप्छंद उदाहृतं ॥ देवता च हृषिकेशः सुरासुरनमस्कृतः ॥ षड्दीर्घयुक्तमारेण षडंगानि प्रकल्पयेत् ॥ शं
खचक्रगदापद्मधारिणं संस्मरेद्विभुं ॥ गरुडोपरि संविष्टं शुद्धवर्णाद्भूषणां ॥ पूर्ववदायुधध्यानं ॥ ततः पूर्वादिने पीठे मंत्री देवं

उच्चाटयेद्ध्रुवं ॥ राजिकाष्टशतं सम्यग्निखाता शत्रुमंदिरे ॥ हयारिकुसुमं वापि पक्षयोरुभयोरपि ॥ गुंजारक्तं केशयुक्तं रिपुमुच्चाटयद्ध्रुवं ॥ षण्मासं जुहुयाद्रात्रौ कलिद्रुमसमिद्वरैः ॥ रिपुर्निर्धनमायाति अष्टाधिकसहस्रकं ॥ मासषट्कं हुनेद्वेत्र समिद्भिश्च सहस्रकं ॥ तेजोवत्यास्तथा तैले हुनेदष्टसहस्रकं ॥ शत्रुर्मरणमाप्नोति अर्वाकमासचतुष्टयात् ॥ तेजोवत्या ज्योतिष्मत्या ॥ मंत्री विविक्ते भूदेशे जपहोमार्चनेरतः ॥ अंकोलाख्ये सहस्रं तु हुनेन्मासत्रयावधि ॥ ततः कुर्वस्त्वमध्याह्ने पावकाञ्चडसन्निभा ॥ प्रादुर्भवेच्च घुटिकां तां जग्ध्वाभ्यर्च्य धारयेत् ॥ आनने वाथ शिरसि स भवेत्खेचरस्तथा ॥ अदृश्यः सिद्धसंघैश्च भवेत्साधकसत्तमः ॥ आज्याहुतिश्चतुर्वाभिर्होमो भयविनाशनं ॥ यस्य नामयुतं मंत्रं जपेदयुतसंख्यया ॥ शमयेद्दापदस्तस्य नात्र कार्या विचारणा ॥ इमं मंत्रं जपेद्भूयः समस्तैश्वर्यवान् भवेत् ॥ ॥ महासंमोहनतंत्रे ॥ दारिद्र्यशोकादिशमनो भयकरोगायमृत्युहृत् ॥ दौभाग्यशापपरिभूतिहरः परिकीर्तिदश्रीकीर्तिकांतिधनदो धर्मकामार्थमोक्षद ॥ किंचिदुक्तं नमच्चार्थकामधेनरिवोत्तमा ॥ इति ॥ सुरासुरश्चनतरोनरोरगसुवाररो ॥ सिद्धगंधर्वयक्षैश्च सकलैश्च महर्षिभिः ॥ सेवितं मंत्रवर्यश्च संक्षेपाद्विधानकं ॥ पुरुषोत्तमदेवस्य गदितं तु मयापिये ॥ गोपनीयं प्रयत्नेन भुक्तिमुक्तिफलप्रदं ॥ ॥ सारसंग्रहे ॥ तारमाररमान्यतः कर्णासुग्वह्निउत्थितः ॥ हे पुरुषोत्तमयथा दर्शित्वाग्निवधूयुतः ॥ त्रयोदशाक्षरो मंत्रः कीर्तितः पौरुषोत्तमः ॥ तारः प्रणवः मारः क्लीं रमा श्रीं ॥ तांतः यः कर्णः उ ॥ तेनपु ॥ व

अनेनदीपवर्येणपश्चिमाभिमुखेनच॥ मांरक्षचवदेद्देविदेवदत्तपदंपुनः॥ वरप्रदानायपदंव्योमयुग्मंवदेत्ततः॥ ताररसांदुसमायुक्तं
नादेनचपुनःप्रिये॥ व्योमाग्निमायासंयुक्तंनदयुक्तंपुनर्वदेत॥ तारमारंद्वितीयंचवीजंप्राक्कावदेत्तत॥ वह्निजायांततोदेविजलंभुविविनि
क्षिपेत॥ मंत्राप्रयोगेस्मरयितव्याः॥ तथा॥ तपवर्गासनादीचवेदादिर्वह्निवल्लभा॥ पश्चिमाभिमुखोभूत्वाहुत्वाचकरसंयुतं॥ सकृज्जप्त्वाप्रपुन
र्मत्रीजपेन्मंत्रंसमाहितः॥ तारंनारायणासेन्दुंव्योमाग्निनादसंयुतं॥ मायाप्रयुक्तंसमुद्धृत्यप्रथमंमाययायुतं॥ उद्धरेच्चद्वितीयंतुवीजंस्या
द्वह्निवल्लभा॥ चक्रिणंवह्निसंयुक्तंतारंनादयुतंप्रिये॥ तारमुद्धृत्यचजपेद्दीपाग्रेवैसहस्रकं॥ अनेनविधिनादेवीकार्त्तवीर्यस्यगोपते॥ दी
पोदेयः प्रयत्नेनसर्वकार्यमभीप्सता॥ गुरोराज्ञांपुरस्कृत्यकुर्याद्दिविप्रयत्नतः॥ अन्यथाहिकृतंलोकेविपरीतफलंभवेत॥ विधानंदीप
दानस्यकृतघ्नेपिशुनायच॥ ब्रह्मकर्मविहीनायनवक्तव्यंकथंचन॥ शुभक्तायसुशिष्यायसाधकायविशेषत॥ विधिर्देवीवक्तव्यममप्री
तिकरंशिवे॥ किंवहूक्तेनभोदेविकल्पोयमखिलार्थदः॥ अथाभिधीयतेमानवाद्यस्यवरवर्णिनि॥ साधकानांहितार्थायसर्वार्थस्य
चसिद्धये॥ पत्तानांपंचविंशत्यादीपोदेयोर्थसिद्धये॥ पंचाशतावारशांत्यैशत्रुवश्याययेष्यते॥ पंचसप्ततिभिर्देविशत्रूणांस्यात्प
राजय॥ शतेनशत्रुनाशः स्यात्सहस्रेणाखिलाक्रियाः॥ सिद्ध्यंतिसाधकानांहिप्रयोगायेपिदुःकराः॥ नित्यदीपेनमानेनहिकार्य

सोपि स्वशक्तितः॥ यथाकथंचिद्देवेशि नित्यदीपं प्रकल्पयेत् ॥ कार्तवीर्याय देवाय सर्वकल्याणसिद्धये॥ गुरुकार्येधिकं मानं कर्त्तव्यं देवि सर्वदा॥ सहस्रादपीति॥ अल्पद्रव्यैः प्रकर्त्तव्यस्तैलेप्यकार्यवराननेः॥ विनामानेन न कुर्वीत कार्तवीर्यस्य भूपतेः॥ दीपं देवेशि कार्यार्थी कुर्वन्नेष्टमवाप्नुयात्॥ अथ दीपदानप्रयोगः॥ तत्र साधकः॥ कृतानित्यक्रीयः शुभे स्थाने रहसि वितानादिभिरलंकृते गृहे गोमयेनोपलिप्ते स्थाने कपिलागोमयेन षट्कोणमण्डलं कृत्वा तन्मध्ये कुंकुमचंदनादिभिः कामबीजं विलिख्य षट्कोणेषु मूलविंशत्यक्षरमंत्रस्य प्रणवादिकामबीजरहितं बीजषट्कं विलिख्य षट्कोणस्य चतुर्दिक्षु स्वाग्रादिशि एंबीजचतुष्टयं विलिख्य कार्त्तादिनवभिर्वर्णैः षट्कोणं संवेष्ट्य तत्र कार्यानुरूपेण प्रोक्तदीपमात्रे प्रोक्तवर्त्तीं निक्षिप्य प्रज्वाल्य षट्कोणमध्ये पाश्चिमाभिमुखं दीपं निधाय मूलमंत्रेण प्राणायामत्रयं कृत्वा ऋष्यादिन्यासजातं विधाताम्रपात्रे वेष्ठवगंधाष्टकैः कार्त्तवीर्यस्य पूजायंत्रं प्रागुक्तं विलिख्य दीपस्य पूर्वभागे गोमयोपलिप्ते स्वाभिमुखं संस्थाप्य॥ ॐ अद्येत्यादितिथ्युल्लेखनांते स्वगोत्रनामाद्युच्चार्यमुककार्यसिद्ध्यर्थं दीपदानमहं करिष्ये इति संकल्पं विधाय तस्मीं यंत्रे देवमावाह्य सर्वोपचारैः सांगसावरणं संपूज्य दक्षिणहस्ते जलमादाय ॐ स्रां ह्रीं वषट् कार्त्तवीर्यार्जुनाय माहिष्मतीनाथाय सहस्रबाहवे सहस्रतुदीक्षिताय दत्तात्रेयप्रियाय आत्रेयाय अनुसूयागर्भरत्नाय ह्रूं क्रूं इमं दीपं गृहाण अमुकं रक्ष २ दुष्टान्नाशय २ पातय २ घातय २ शत्रून् जहि २ ह्रीं ॐ फ्रों क्लीं इं स्वाहा

अनेन दीपवर्त्यं पश्चिमाभिमुखेन मां रक्ष २ देवदत्त वर प्रधानाय ह्रां ह्रीं ॐ क्लीं ब्रीं स्वाहा ॥ इमं मंत्रं जपित्वा तज्जलं भूमौ निक्षिप्य प
श्चिमाभिमुखो भूत्वा कृतांजलिः ॐ स्वाहा इति सकृज्जपित्वा ॥ ॐ श्रां ह्रीं क्रीं ब्रीं स्वाहा क्रौं इति मंत्रं सप्तावृत्तिर्जपित्वा देवाय जपसम
र्प्य स्तुत्वा प्रसादयेदिथ प्रत्यहं यावत्सृतसमाप्तिर्यावत्कार्यसिद्धिस्तावत्कुर्यादितिपदानविधिः ॥ ततो यावद्दीपस्थितिस्तावत्प्रत्य
हं तस्मिन् यंत्रे देवं पूजयेत् ॥ दीपनिर्वाणे देवं विसर्जयेदिति ॥ ॥ मुंदराचार्यशिष्येण श्रीनिवासेन धीमता ॥ प्रणीतायां गतो ह्येक
चत्वारिंशः प्रकाशकः ॥ ॥ इति श्रीशिवार्चनचंद्रिकायामेकचत्वारिंशः प्रकाशः ॥ ॥ इति वैष्णवप्रकरणं समाप्तं ॥ ॥
अथ सौरमंत्रा उच्यंते ॥ तत्र श्रीसारसंग्रहे ॥ अथोच्यंते सौरमंत्राः सर्वागमसुगोपिता ॥ आयुरारोग्यधनदाः कीर्तिदाः पुत्रपौत्रदाः
सर्वसौभाग्यजनकाः सर्वपन्नाशकाः सदा ॥ अष्टादश त्वचो रोगास्तेषां नाशकरा श्रुये ॥ त्रिलोकाविश्रुता नित्यं नारदाद्यैश्च सेविता
स्तथा गंधर्वसिद्धौघविद्याधरनिषेविताः ॥ सर्वरोगहराः सर्वेसर्वोपद्रवनाशकाः ॥ धर्मार्थकाममोक्षाप्तितीर्थभूताः शुभोदयाः ॥ व
श्याकर्षणसंस्तंभविद्वेषोच्चाटमारणे ॥ शक्ताः स्मरणमात्रेणासाधकेन सुसाधिता ॥ अज्ञानतिमिरांधानां ज्ञानदृष्टिप्रदायकाः ॥
वाक्सिद्धिखेचरीसिद्धिपादुकासिद्धिदायकाः ॥ किं बहूक्तेन विधिना साधिताः सर्वसिद्धिदाः ॥ प्रोच्यंतेभीष्टफलदास्तेषामाद्योष्टाक्ष
रो मनुः ॥ प्रणवो घृणिशब्दांते चंद्रोविंशसमन्वित ॥ ईशोग्निशिखरोनेतोदः ससूक्ष्मस्त्वसंयुत ॥ अष्टवर्णो मनुर्भानोरिष्टदः परि

कीर्तिदः॥ घृणिस्वरूपसर्गो विसर्गः॥ तेन घृणिश्चंद्रः सत्त्वधीशः तुतेन सू॥ ईरः यत्त्वग्निरः तेनर्य॥ अनेन आदस्वरूपं सूक्ष्म इतेन दि-
भ्यः स्वरूपं॥ अत्र यकार आरयाणसंधिः एवं श्रुतिदर्शनात्॥ तथा च श्रुतिः॥ घृणिरिति द्वे अक्षरे सूर्य इति त्रीणि आदित्य इति त्री-
णि एतद्वै सावित्रस्याष्टाक्षरं परमं पदं श्रियाभिषिक्तं य एवं वेद श्रिया हैवाभिषिंच्यत इति॥ तथा॥ ऋषिस्तु देवभागाख्यः छंदो गाय-
त्रमिष्यते॥ श्रीसूर्यदेवता प्रोक्ता ऐहिकामुष्मिकप्रदः॥ तेजो वदेत्ततो ज्वालामणिहुंफट् दिठांतकः॥ हृन्मंत्रमनत्यपूर्वोयं ब्रह्मपू-
र्वः शिरोमनुः॥ विष्णुपूर्वः शिखामंत्रो वर्मारुद्रपूर्वकः॥ अग्निपूर्वो नेत्रमनुः सर्वपूर्वोस्त्रमंत्रकः॥ सत्याद्यांश्च चतुर्थ्यंतान्
केचिदिच्छंति सूरयः॥ सत्यतेजः पदं केचिच्चतुर्थ्यंतं प्रचक्षते॥ सत्यतेजोज्वालामणि हुंफट् स्वाहा हृदयाय नमः॥ इत्यादि केचि-
दिति॥ शारदातिलके॥ सत्याद्य हृदयं प्रोक्तं ब्रह्मणोशिर ईरितं॥ इत्यादि॥ अत्र चतुर्थी विवक्षिते त्वपेक्षितार्थद्योतनिका-
कारादयः॥ प्रपंचसारे तु॥ सत्यब्रह्मविष्णुरुद्रैः साग्निभिः सर्वसंयुतैः तेजोज्वालामणि हुंफट् स्वाहांतैरंगमाचरेदित्येवोक्तं॥ ब्र-
ह्मेत्यत्राकारचतुर्थी निवार्या॥ सारसंग्रहे॥ विधायैवं षडंगानि मूर्ध्नि न्यस्येद्यथाक्रमं॥ मस्तकाननहृद्गुह्यपाददेशेषु देशिकः
पंचह्रस्वैः सहादित्यो रविर्भानुश्च भास्करः॥ तर्यस्तनश्च मंत्रार्णान् प्रणवाद्यान्न्यसेद्बुधः॥ पार्श्वास्यकंठहृत्कुक्षिनाभिलिंगांघ्रि-
युक्क्रमात्॥ ह्रस्वैः॥ अक्लीवैरोकाराद्यकारांतैः पंचभिः सद्यादिपंचभिरितिलकोक्ते॥ भास्करमंगदकुण्डलेभूषचाहतताररूणपंच

जं संस्थ॥ अक्षगुणाभयदानवरं तं रक्तनतनुं प्रभजे युगनेत्रं॥ दानवरं॥ अयुगनेत्रमिति पदच्छेदः॥ ऊर्ध्वकरयोः पद्मे वामाधस्थयोर
भयदाने इत्याद्युक्तध्याने॥ तथा॥ अग्निकोणे प्रभूतं च विमलं नैऋत्ये यजेत्॥ सारं वायव्यकोणे च समाराध्यं न थैशके॥ सुखं परमं पूर्वं
च यजेन्मध्ये तु मंत्रवित्॥ अग्न्यादिति प्रथमं मंडूकादिसिंहासनं तं मुक्तरित्याम्प्यार्थाग्न्यादिकोणेषु प्रभूतादीन्धर्माधर्मादिस्थानेषु पूज
येत्।॥ पीठं प्रीन्कल्पयेदेतान् हृदा मध्ये विदिक्षु चेति नारायणीयवचनात्॥ ईशानो च मध्येपि विश्वेतानः ५ पूजयेदिति प्रयोगसारवच
नाश्चेति वदंतिनन्न॥ प्रयजेदथ प्रभूतां विमलां सारां क्रयां समाराध्यां॥ परमसुखमग्न्यादिष्वष्टसु मध्ये च पीक्रमेः प्रागिति शंकराचार्यच
रणोक्तत्वात्॥ पीठकल्पनं तु। सर्वत्र धर्मादिभिरेव॥ धर्माकल्पिपते पीठधर्मादिकल्पिते पीठे इति श्रवणाधर्मादिभिर्युक्तस्य च योग
पीठत्वात्॥ तदर्चनात्वागेनान्तःपूज्यपश्चाद्धर्मादिन्सपूज्यानेनादिकमर्चयेत्॥ तथा॥ स्वविंवपश्चिमे इति सामाग्निमण्डलं संपूज्य पश्चात्सू
र्यमण्डलं संपूज्य सत्वादिपरतत्त्वांतमभ्यर्च्य पीठशक्तीः पूजयेदित्यर्थः॥ तथा॥ दलमूलेषु पूर्वादिमध्ये च विधिपूर्वकं॥ दीप्ता सूक्ष्मा जया भ
द्रा विभूतिर्विमलान्विता॥ अमोघा विद्युता विद्यान वमी सर्वतोमुखी॥ पीठशक्तिक्रमादेता ह्यग्निवर्णाः सुभूषिताः॥ ह्रस्वत्रयक्लीववर्
ज्जा अच्चो वह्निबिंदुभूषणाः बीजन्यासक्रमादाहुर्मंत्रविशारदाः॥ ह्रस्वत्रयं अइउ क्लीवाः ऋॠलॡ इति॥ अचः स्वराः वह्नीरेफः इंद्रवि
डस्तेन रां रीं रूं रें रों रौं रं इति नवबीजानि स्युः॥ उक्तं च महाकपिलपंचरात्रे आद्योपांत्यं तृतीयं च त्यक्त्वा चैव नपुंसकं॥ भेदयेत्तत्त्ववधा

यांतस्वरैरैर्भिर्यथाक्रमं ॥ बिंदुयुक्तानि बीजानि शक्तीनां मुद्धृतानि वै ॥ इति ॥ प्रयोगसारनारायणीयोक्तं आद्यं मंत्रं तत्तीयंच त्य-
क्त्वा वैव नपुंसकमित्युक्तं यथागुरूपदेशं ग्राह्यमिति ॐ वदेद्रूलनिघ्नुशिवात्मकपदं नत ॥ सौराय योगपीठाय । हृदंत समुदीरितः
पीठमंत्रो दिनेशस्य यजेत्पीठमनेन ही ॥ खखोल्कादित्यमंत्रेण मूर्त्तिमस्य प्रकल्पयेत् ॥ तस्यामावाह्य देवेशं सूर्यं सम्यक्समर्चयेत्
ऽंगपूजां पुरा कृत्वा प्रपूज्या दिंगलस्थिताः ॥ आदित्याद्याः पुरा प्रोक्ता मूर्त्तयो वेदसंख्यया ॥ उषायाः कोणगणाः पूज्याश्चतस्रः शक्तयः
शुभाः स्वनामाद्यर्णसंयुक्ताः कथंतेनायथाक्रमं ॥ उषा प्रज्ञे तथा प्रोक्ते प्रभा संध्येम नीषिभिः ततो दलाग्रे ब्राह्म्याद्या अर्चयेदग्रतोरुतां सो
मपूर्वान्ग्रहान्नवैः पूजयेत्तद्वहिः सुधी ॥ लोकपालान् स्ववज्रादीन्पूर्ववत्तंजयेत्ततः ॥ अथप्रयोगः ॥ ततः प्रातःकृत्यादियोगपीठन्यासांते
मूलमंत्रेण प्राणायामत्रयं कृत्वा शिरसि देवभागाय ऋषये नमः ॥ मुखे गायत्री छंदसे नमः ॥ हृदये नमः ॥ ब्रह्मतेजोज्वालामणे हुं फट् स्वा
हा विष्णुतेजोज्वालामणि हुं फट् स्वाहा शिखायै वषट् रुद्रतेजोज्वालामणि हुं फट् स्वाहा कवचाय हुं अग्नितेजोज्वालामणि हुं फट् स्वाहा अस्त्रा
य फट् इति करषडंगन्यासं कृत्वा शिरसि आदित्याय नमः मुखे यं रवये । हृदि ॐ भानवे गुह्ये ॐ भास्कराय । पादयोः ॐ सूर्याय सिरसि ॐ ॐ नम नेत्र
यो । ॐ घृं । कंठे ॐ णिं हृदि ॐ सं । कुक्षौ र्यं । नाभौ आं । लिंगे दिं । पादयोः । त्यं नमः ॥ इति विन्यस्यासनाद्यात्मपूजांते मंडूकादिपृथिव्यंतं योगपी
ठमभ्यर्च्य क्षीरसमुद्रं संपूज्यानंतरं धर्मादिपरतत्वांतं प्राग्वत्संपूज्याष्टदले केसरेषु रं दीप्तायै । रीं सूक्ष्मायै । रूं जयायै । रें भद्रायै । रैं विभूत्यै । रों

विमलायै· रैं अमोघायै· रं विद्युतायै रः सर्वतोमुख्यै नमः मध्यांतं संपूज्य ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः॥ इति समस्तपीठं संपूज्य· खखोल्काय स्वाहेति मंत्रेण श्रीसूर्यमूर्त्तिं कल्पयामीति परिकल्प्यावाहनादि पुष्पापसारांतं प्राग्वदंगानि संपूज्य दिग्दलेषु आं आदित्याय नमः॥ रवये इं भानवे· ईं भास्कराय· विदिग्दलेषु· उं उषायै· प्रं प्रभायै: सं संध्यै· इति संपूज्याष्टदलाग्रेषु प्राग्वद्दीप्ताद्यष्टशक्तीः संपूज्य देवस्याग्रे अरुणाय· ततश्चतुरस्रस्य प्रथमरेखायां देवादीन् दक्षिणेन सोमाय· भौमाय· बृहस्पतये· शुक्राय· शनैश्चराय· राहवे· केतुभ्यो नमः इति संपूज्य लोकपालार्चादि सर्वं प्राग्वत्कुर्यादिति ॥ तथा ॥ अष्टलक्षं जपित्वांते दुग्धवृक्षसमिद्वरैः ॥ जुहुयात्तत्सहस्राणि दुग्धाक्तैः साधकोत्तमः ॥ तर्पयेद्दुग्धसलिलैश्चंद्रचंदनमासितैः ॥ साभिषेकं ततः कृत्वा ब्राह्मणान्भोजयेत्ततः ॥ प्रयोगसारे ॥ रक्तांवरधरो रक्तगंधमाल्यार्चितः सदा ॥ घृतक्षीरसमायुक्तगुडभक्ताशनो निशि ॥ भिक्षाहारोथवा चीर्णसंगः संतोषवान्सदा ॥ मंत्रमावर्त्तयेन्नित्यमाराधनपरायणः ॥ इत्थमभ्यर्च्य भास्वंतमर्घं तस्मै निवेदयेत् ॥ प्रत्यहं रविवारे वा तद्विधानमुदीर्यते ॥ भूरेमण्डलमालिख्य यजेत्पीठं यथाविधि ॥ तत्र संस्थाप्य पात्रे हि शुद्धं ताम्रसमुद्भवे ॥ रम्यप्रस्थजलग्राहि स्वमंत्रं समुच्चरन् ॥ शुद्धोदकेन संपूर्य प्रक्षिपेत्तत्र कुंकुमं ॥ रोचनारजिकारक्तचंदनं वंशतंडुलान् ॥ श्यामाकतंडुलान् शालीन्करवीरजपांकुशान् ॥ सिंचित्य देवतात्मैक्यं भास्करं सागमर्चयेत् ॥ उद्धृत्यामस्तकं पात्रं जानुस्पृष्टमहीतलः दृष्टिं निधाय व्योम्नकेस्थे कं सावरणां यजेत् ॥ ततो जपन्मूलमंत्रं धियादद्यात्तु भानवे ॥ अर्घः प्रसन्नचित्तः सदद्यात्तु सुमनोञ्जलि ॥ पुनर्विपन्नधीस्तावज्जानुर्निजे

॥शि०चं॥
॥५३९॥

करेः॥ अर्घोदकंसमादत्तेजपदष्टोत्तरंशतं॥ ततःप्रसन्नोभगवान्प्रयच्छेदिष्टमात्मन॥ नृणामनेनभवतीहनितांनमा-रारोग्यपुत्रध
नमित्रकलत्रवृद्धि॥ तेजश्चवीर्यमतुलंपशुकांतिसंविद्धिद्यापशोविभवतोगसमृद्धयःस्युः॥ तन्मंत्रसहितांभोगिःसप्तधांजलिसेचनं॥
दारिद्र्यपापांधकारनाशनंश्रीकरंपरं॥ स्थण्डिलेसुतलेकुंभंतीर्थोदकसुपूरितं॥ हिरण्यपरत्नगंधादितत्रनिक्षिप्यपूजयेत्॥ देवंसपरिवारं
तुषाशुक्तविधिनाततः॥ स्थण्डिलेग्निसमाधायकपिलायमाचकं॥ पक्त्वाचौतेनजुहुयान्तदाह्यसहितेनच॥ सहस्त्रमभिमत्रितैः॥ अभि
षिचेत्कुंभजलेद्ध्यात्तस्मैसुमंत्रवित्॥ सहस्त्रमंत्रितहोमसंपातान्नंततोनिशि॥ भर्त्तापिसूर्यमेवाहमितिध्यात्वातयासह॥ संभोगमाचरेत्तसु
पुत्रोगुणवान्भवेत्॥ यंत्रसारेकर्णिकायांसाध्यंगर्भंतारंपत्रचतुष्टये॥ सौरस्यचतुर्वर्णस्यक्रमादेकैकमक्षरं॥ अष्टाक्षरमनोर्वर्णान्व
वेष्वस्तुतद्बहिः॥ आवेष्टमातृकावर्णैर्भूपराश्रिचतुष्टये॥ प्रयोजतानातिलकंनारायंचसमालिखेत्॥ सौरयंत्रमिदंनृणांसर्वमपवि
नाशनं॥ तेजःप्रतापसौभाग्यपुत्रायुःकीर्त्तिवर्द्धनं॥ धनधान्यप्रदंवश्यंसर्वरक्षाकरं॥ इदमेवयंत्रमभिलिख्यजप्त्वाप्रतिमज्जतांशिशि
यादिनमः॥ ज्वलकुष्ठशूलमुखरोगसंकटाविलयंप्रयान्तिनचिरादिवध्रुवं॥ अस्यार्थः॥ चतुःपत्रकमलकर्णिकायांससाध्यंप्रणवंवि
लिख्यपत्रेषुॐह्रींहंसइतिचतुरक्षरमंत्रस्यैकैकमक्षरंविलिख्यतद्बहिरष्टपत्रेषुमूलमंत्रस्यैकैकमक्षरमालिख्यतद्बहिर्वृत्तयोरंतराले
मविडुभिर्मातृकावर्णैरावेष्ट्यबहिश्चतुरस्रकोणेषुॐह्रींह्रींसइतिवर्णचतुष्टयंप्रतिकोणमेकंलिखेदेतदुक्तफलदं॥ तथाप्रणवंसा

॥राम॥
॥५३९॥

ध्वंसमेतंविलिख्यषट्कोणकर्णिकामध्ये॥ तारंप्रयोजनानांतिलकहंसचषट्सुकोणेषु॥ केसरविलसत्सोरचतुर्वर्गौर्दलचतुष्टयेचापि॥ उद्यन्
द्याण्यायापादचतुष्कंसचोष्टयंत्रच॥ केसरराजन्मैरवसुवर्णकेदलेषुचोःपादान्॥ आलिप्योरवावहिर्लिप्यालेवेस्यकुगृहकोणेषु॥ चतु
रक्षरस्यचमनोःसैरस्यैकैकक्षरंसम्यक॥ विलिखेदेतद्यंत्रंविनाशयकुष्ठान्विधूत॥ प्रथमयतितेजोलक्ष्मीमोगान्धृतिप्रतापाद्यान्
स्वंगणभूमावेनद्विलिख्यसंपूज्य॥ ॥दिननाथ॥ दद्याद्दर्घकान्येलक्ष्मीकुष्ठज्वरादिशांत्यैच॥ रोगप्रयत्रमिदमेवविलिख्यताम्रसंस्थं
धनंनिजगृहेविधिवत्प्रपूज्य॥ हन्याच्चकुष्ठमुखरोगपरंपरांवी॥ विस्मृत्यपस्मृतिमवानथवर्णकान्॥ आलिख्यचैतान्॥ कलधौतपत्रेतलेवि
निक्षिप्यसहस्रसंख्यं॥ जप्यानदत्यक्तमनोर्नरस्यकुष्ठादिरोगाविलयंप्रयाति॥ इदमेवनवेविलिख्ययंत्रंनवनीतेत्रितयंप्रजप्यचर्च्या॥ परिपक्ष
यतांदैवभूलंविषमामयमतनुनाशं॥ ॥अस्यार्थः॥ षट्कोणमध्येससाध्यंप्रणवविलिख्यतत्कोणेषुॐह्रींहंसःहंसइत्यक्षरषट्कमेकमेकं
विलितद्बहिश्चतुर्दलकेसरेषुॐह्रींहंसइतिमंत्रस्यैकैकमक्षरंविलिख्यचतुर्दलेषुउद्यन्नद्यमित्रमित्यर्द्धपादमेकैकमालिख्यतद्बहिरष्टदल
केसरेषुमूलमंत्रस्याष्टार्णानालिख्याष्टदलेषुएतन्मन्त्रस्यद्वितीयतृतीयाश्चोःपादाष्टकंप्रतिदलमेकमेकंपादमालिख्यतद्बहिर्वृत्तद्वयांत
रालेमातृकावर्णैःसंवेष्ट्यचतुरस्रकोणेषुॐह्रींहंसइतिमंत्रस्यैकैकमक्षरंलिखेत्॥ एतद्यंत्रमुक्तफलदं॥ उद्यन्नद्यमित्रमहआरोह
न्नुत्तरांदिवंहृद्रोगंममसूर्यहरिमाणंचनाशसुकेषुमेहरिमाणंचनाशसुके॥ षुमेहरिमाणंरोपणाकासुदध्मसिअथोआरिद्रवेषुमे

हरिमाणोनिध्यमसि उदगादयमादित्योविश्वेनसहसासह ॥ द्विषंतंमह्यंरंधयन्मो अहंद्विषतेरधं ॥ प्रच्छनादःसर्षोनुष्टुप् ॥ ॥श्रीसा
रसंग्रहे ॥ वदेत्पदंचतुर्थ्यंतं खगोल्काख्यंद्विठांतकं ॥ षडर्णोमंत्रराख्यातोदिनेशस्यजगत्पतेः ॥ खगोल्कं चतुर्थ्यंतंखगोल्कायद्विठ
स्वाहा ॥ अस्मिन्मंत्रेभेदमाहमहाकपिलपंचरात्रे ॥ पाष्ठमंविंदुनायुक्तंकद्वितीयंतथैवच ॥ तदेवकेवलंभूयउभिन्नंसविलोम
कं ॥ द्यविलोमाच्चतुर्थंतुमांसक्रांतंसमीरणं ॥ सप्तदुह्नतोविलः स्मृतोमंत्रः षडक्षरः ॥ पाष्ठमहः विंदुरनुस्वारस्तेनहकद्वितीयं
खनथैवविंदुयुक्तंतेनखं ॥ तदेवखएवकेवलंविंदुरहितंतेनख ॥ सविलोमकंखन ॥ ॐभिन्नं ॐकारयुक्तंतेनखाद्यविलोमा
च्चतुर्थः द्यकाराद्विमलोमेनचतुर्थंककारमांसेनलकारेण आकारेणच आक्रांतंउपरिस्थितंतेनल्कासमीरणाय ॥ ॥तथानारायणी
येच ॥ खकारोदण्डिनोवर्णोमज्जादशनसंयुतः ॥ मांसदीर्घोजवत्वायुरतंतस्योपकृद्विभुः ॥ खंहकारांतःखदंडीअनुस्वारस्तद्युक्तोतेनहंखं
चंडः खमज्जाषद्दशन ॐतेनषोमांसंलकारदीर्घआकार ॥ ॥वायुजः ककारः तेनल्कावायुर्यकार ॥ ॥सारसंग्रहे ॥ ऋषिब्रह्मासमुद्दिष्टा
गायत्रीछंदईरितं ॥ देवतासविताचास्यसर्वसौख्यफलप्रदः ॥ सूक्ष्मरूपायाग्निवधूःस्वाहांतंसूक्ष्मतेजसे ॥ सूक्ष्माकारायाग्निवधूः
सूक्ष्मवालायठद्वयं ॥ सूक्ष्मकायसहुंफट्चजातियुक्ताःसमीरिताः ॥ पंचांगमंत्रामंत्रार्णैः षडंगंवासमाचरेत् ॥ रक्तपद्मद्वयंहस्तेविभ्रा
णोवरदाभये ॥ वंधूकामंत्रिनेत्रंचरविंध्यायन्सुभूषितं ॥ पूर्वोक्तेपूजयेत्पीठेदेवमावाह्यपूर्ववत् ॥ लक्षमेकंजपेन्मंत्रीनियतात्माजिते

न्द्रिय॥जुहुयात्तद्दशांशेनविल्वाश्वत्थपलाशजैः उडुंवरसमुद्भूतैस्त्रिमध्वक्तैः समिद्वरैः तर्पणादिततः कुर्यात्प्राक्प्रोक्तविधिनासु
धी॥अर्घ्यादिकंचकुर्वीतपूर्ववद्वांछिताप्तये॥यतन्तेवमान्तस्यखेचरीसिद्धिरीरिता॥तथा॥सदण्डिकान्तवीजाद्यःसप्तार्णोयंमनुर्म
तः॥कांतःखकारःदण्डीअस्वारस्तेखं॥इतिवीजादिपूर्वमन्त्रःसप्ताइत्यर्थः॥तथा॥ऋष्याद्यंगविधिध्यानंजपपूजादिपूर्ववत्॥ ॥
तथा॥ऊंतसप्ततुरंगंतुविद्महेपदमुच्चरेत्॥सहस्र·किरणायेतिधीमहीतिपदंततः॥तन्नोरविरितिप्राच्यान्तेचोदयादितिसंगिरेत्
तेनसप्ततुरंगायविद्महेसहस्रकिरणायधीमहितन्नोरविः प्रचोदयात्॥ इति॥जप्यासर्वार्कमन्त्रादौगायत्र्येषादिनेशितुः॥तथा
अथवक्ष्येसमासेनचतुर्वर्णमनुंरवेः तारोमायादण्डिवियत्सविर्गस्यपूर्वगः तारप्रणवमायाभुवनेशीवीजंवियधकारः॥दण्डीअ
नुस्वारः॥तेनहंअस्यपूर्वगः॥हकारस्यपूर्वगःसकारःसविसर्गःविसर्गसहितस्तेननमः॥तथा॥ऋषिर्ब्रह्मागायत्रीछन्दःसूर्यात्मिका
न्त॥देवताभुवनाधीशाषडंगानितेनान्यसेत्॥तानिप्रणवशक्तिभ्यांत्रिभिरावर्तनैरथा॥तारादिश्चषड्दीर्घमायावीजैर्भवंतिवा॥भास्वद्रत्न
सहस्रमौलिविलसच्चण्डार्द्धमुद्योतयद्धस्ताब्जैर्दधदंकुशंकुशवराभीतिःसुतुंगस्तनी॥पायाज्वालितकांचनाबुजजयाविशुज्ज्वल
त्कांतिभिर्विश्वंद्योतयदार्कमाश्वसिशिरंविश्वेशिकायावपुः॥दक्षाद्युर्द्धयोरश्चैतदाद्यधस्थयोरस्येइत्यायुधध्यानं॥नवश
क्तिसमायुक्तेपीठेपूर्वादिनेयजेत्॥मूलेनमूर्तिसंकल्पतत्रावाह्यदिनेश्वरं॥संपूज्यतस्यावरणान्यर्चयेत्क्रमतःसुधी॥हृल्लेखा

चगगनापरारक्तातृतीयका॥ करालिकाचतुर्थीस्यान्महोच्छुष्मातुपंचमी॥ प्रथमावृत्तिरणभिः स्याद्द्वितीयांगे·समीरिताः॥ तृतीयामा
तृभिः प्रोक्ताचतुर्थीवग्रहैर्मता॥ दिक्स्थैः सोमज्ञगुरुभिः सशुक्रैरपरैस्तथा॥ विदिग्गतैर्भौमसौरिराहुकेतुभिरादरात्॥ ॥
प्रयोगसारे॥ स्वनामाद्यक्षरैर्विंदुभूषितैर्यजेत्॥ भूपस्ततोलोकपालैः पंचमीच्चनदायुधैः॥ षष्ठीप्रोक्तैवमभ्यर्च्यादिनेशादिनतान्यर्कं
॥ ॥अथप्रयोगः॥ तत्रः प्रातःकृत्यादियोगपीठन्यासांते शिरसिब्रह्मणेऋषयेनमः मुखेगायत्रीछंदसेनमः॥ हृदिश्रीसूर्यरूपिणी
भुवनेश्वर्यैदेवतायैनमः॥ इतिविन्यस्यप्राग्वद्द्वितीयोगमुक्त्वार्यं हृदयाय· ह्रीं शिरसे· ॐ शिखायै· ह्रीं कवचाय· ॐ नेत्राय· ह्रीं अस्त्राय·
इतिषडंगन्यासंकृत्वाध्यानादिपुष्पोपचारांते कर्णिकायामेवदेवदेवस्यमूर्तौ देवायदक्षोत्तरदेवाग्रदक्षोत्तरपश्चिमेषु॥ हृल्लेखायैः गं
गगनायै· रंरक्तायै· महाच्छुष्मायै· इतिसंपूज्यप्राग्वत्केसरेषु षडंगानिसंपूज्याष्टदलेषुप्राग्वत्तुल्याश्राः संपूज्याष्टदलाग्रेषुदिग्विदिक्क्रमेण
सौं सोमाय· बुं बुधाय· बृं बृहस्पतये· शुं शुक्राय· मं मंगलाय: शं शनैश्चरां· रां राहवे· कें केतवे· इतिसंपूज्यलोकेशार्चादिसर्वंप्राग्वत्कुर्यादि
ति॥ तथा॥ चतुर्लक्षंजपेन्मंत्रंजुहुयात्तद्दशांशतं॥ ब्रह्मवृक्षसमुद्भूतैः पुष्पैस्त्रिमधुराप्लुतैः॥ सरोजैर्वाततोदेवंतर्पयेदभिषेचयेत्॥ ब्राह्मणा
राधनंकुर्यात्ततः सिद्धोभवेन्मनु॥ एवंसाधितमंत्रस्तुकाम्यकर्माणिसाधयेत्॥ यजेद्देवंप्रतिदिनंरविवारेथवासुधीः॥ दद्यादर्घद्वयमपि
भवेत्तस्येप्सितंफलं॥ तथा॥ वह्निर्दीर्घेंदुमद्व्योममायासांगत्विताभृगुः॥ प्रयोजनानांतिलकंत्र्यक्षरःकथितोमनुः॥ वह्निरेफ·दीर्घआ

कारः विंदुरनुस्वारः॥ एतिर्युतं व्योम हकारः॥ तेन ह्रौं इति मायया ह्रीं सर्गो विसर्गः भृगुः सकारस्तेन नम इति॥ तथा॥ अतोस्य मुनिरुद्दिष्टो
गायच्छंद उच्यते॥ देवतास्य मनोः ख्यातः सविता सेवितः सुरैः॥ गुह्यादनलं यावज्ज्वलादिगुल्फकं तथा॥ कांताष्ठगलपर्यंतं मंत्रार्णान्वितं से
त्सुधीः॥ मायाबीजेन षड्दीर्घप्रजांगानि प्रविन्यसेत्॥ अरुणकमलसंस्थं त्रीक्षणं भूरिभूषं धरुणाकमलयुग्मभीष्टदाभीतिहस्तं॥ अरुणा
तरशरीरं भावयामो दिनेशं घरुणाकलसुसेव्यं सर्वदो बोधवंद्यं॥ पूर्वोदिते यजेत्पीठे नवशक्तिसमन्विते॥ देवमावाह्य संपूज्य पुरो
गानि समर्चयेत्॥ इत्यादिभिर्ग्रहैरन्यादिगीशैर परावृत्तिः॥ तदायुधैश्चतुर्थी स्याद्देवपूजासमीरिता॥ ततः श्वेतजश्चंडाय निर्मा
ल्यं विनिक्षिपेत्॥ ॥ अथ प्रयोगः॥ ततः प्रातःकृत्यादियोगपीठन्यासांते मूलमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋ
षये नमः मुखे गायत्रीछंदसे॰ हृदये श्रीसूर्यदेवतायै इति विन्यस्य विनियोगमुक्त्वा गुह्यादिपादपर्यंतं ह्रां नमः कंठाद्गुह्यपर्यंतं सः न
म इति विन्यस्य॥ ह्रां हृदयाय ह्रीं शिरसे॰ ह्रूं शिखायै॰ ह्रैं नेत्राय॰ ह्रः॰ अस्त्राय इति करषडंगन्यासं कृत्वा ध्यानाद्यंगपूजांते प्राग्वज्जुहु
त्संपूज्य लोकेशपूजादि सर्वं प्राग्वत्समापयेदिति॥ तथा॥ जपेद्द्वादशलक्षं वत्तत्सहस्रं हुनेत्तिलैः॥ घृतक्तैर्मधुरत्नैश्वाथवाज्यैश्च पिता
दरौ॥ तर्पणादि ततः कृत्वा प्रयोगान्साधयेदथ॥ दद्यात्पूर्वोदिते चार्घं दिने शायसमाधकः॥ सोथास्य धनधान्यादि पुत्रपौत्रविवर्द्धनं॥
करोति रत्नवस्त्रादिभूषणादिविवर्द्धनं॥ अष्टपत्रांबुजं कुर्यात्तत्र कुंभान्नवन्यसेत्॥ पत्रमध्यकर्णिकायां तांश्चैव नाभिपूरयेत्॥ नवग्रह

न्समावाह्य तेषु कुंभेषु मंत्रवित्॥ कर्णिकाकलशं मूलमंत्रेण च सहस्रकं॥ प्रजप्यान्येषु तन्मंत्रान्दशांनकृत्वा जपेत्सुधीः॥ तन्नेतेर
भिषिंचेत साधको ग्रहदोषगा॥ रोगा नश्यंति सततं लक्ष्मीश्चापि स्थिरा भवेत्॥ ग्रहहोमः प्रकर्तव्यो ग्रहाणां वै कृतेन तथा॥ चन्द्रभान्वो श्री
परागे निजर्क्षं वाथ मंत्रवित्॥ रिपुजे च भये वाथ घोररूपे देथवा॥ पूर्ववन्मण्डलं कृत्वा ग्रहान्संपूज्य तत्र च॥ स्वदिक्षु चाग्नीन्संस्था
प्य जुहुयात्स्वसमिधैरैः॥ अर्कद्विजद्रुमापूराश्वत्थोडुंबरखादिरैः॥ शमीदूर्वाकुशोभूतैः क्रमात्सोमसमीरितः॥ द्विजद्रुः पलाशमा
पूरः॥ अपामार्गः॥ अष्टादिकं सहस्रं च समादीनां स्याहुती॥ अंते चाष्टैर्वाहृदिभिर्हुत्वा होमं समापयेत्॥ गुरुं संतोष्य ऋषिकम्यो
यथाशक्ति च दक्षिणां॥ दद्याच्च भोजयेद्विप्रान्संग्रामे विजयी भवेत्॥ रोगाः शांतिं व्रजंत्यापुदीर्घमायुश्च विंदति॥ कृत्वाज्ञोहृदिकानां च
शांतिरेव प्रजायते॥ सर्वेषां च ग्रहाणां च होम एवात्र चा भवेत्॥ एवं प्रतिदिनं मंत्रीदिननाथं समर्चयेत्॥ धनधान्यैश्वर्यपूर्णमायुर्दीर्घ
वह्निरेफः मस्तकः अनुस्वारस्तनरो इति वर्म हुंकारः॥ तथा॥ ऋष्याद्या मंत्रिभिः प्रोक्ता अजगाच्च मानव॥ ह्रां माद्यैरंगमुद्दिष्टं मनोर
स्य दिनेशितु॥ पद्मयुग्मं वराभीति दधानं करपंकजे॥ रक्तपद्मस्थितं भानुं रक्तं ध्यायेत्त्रिलोचनं॥ अस्य पूजादिकं सर्वमष्टाक्षरोक्तवि
धानवत्॥ अर्घपूर्वोदितं कृत्वा संग्रामे विजयी भवेत्॥ तथा॥ शिरोयुक्तं विष्णुपदं चंद्राजिह्वान्वितो मनुः॥ आत्मनो युग्मवर्णोयम
जपाख्यो विषापहं॥ शिरोयुक्तो विष्णुपदं विडयुक्तो नकारश्चंद्राजिह्वान्वितः विसर्गयुक्तः सकारः॥ तथा॥ त्रुसामुनिः समुद्दिष्टो गा

यत्रहृद्दउच्यते ॥ देवीपूर्वादेवतास्यपरमात्मासमीरितः ॥ षडूर्ध्वभाजाचहंसाविदध्यादंगमस्यवै ॥ रक्ताजिकांचननिभेगुणादेकयु
क्तैर्हस्तैरभीतिवरदेवधदंवुजस्थं ॥ गौरीहरांककलितंवपुराश्रयामः सौम्याग्निरूपमतिशं गिरिजार्द्धभागं ॥ उपरिकरयोः पद्मयुग्मंवा
माश्रयः करयोरभीतिवरौपूर्वोदितेयजेत्पीठेदीप्तादिपरिकल्पिते ॥ तत्रदेवंयजन्मूर्तिमूलेनाकल्पमंत्रवित ॥ पूर्वमंगैर्यजेन्मंत्रीदिग्द
लेषुप्रपूजयेत ॥ कमादनंवसुतद्वन्नरेपश्चाद्वरंतथाविदिग्दलेषुचाभ्यर्च्यानन्तजाख्याततः परं ॥ गोजाअद्रिजाचापिपीठलोकेश्वराव
हि ॥ वज्राद्यानिततः पश्चाद्यजेदनुदिनंसुधीः ॥ ॥ अथप्रयोगः ॥ तत्रप्रातःकृत्यादियोगपीठन्यासांतेलमंत्रेणप्राणायामत्रयंकृत्वाशिरसि
ब्रह्मणेऋषयेनमः ॥ मुखेगायत्रीछंदः हृदयेश्रीपरमात्मनेदेवतायैनमः इतिविन्यस्यममभोक्षार्थेविनियोगः ॥ इतिकृतांजलिकृत्वास्त्रां
हृदयाय. स्त्रीं शिरसे ॥ स्त्रूं शिखायै. स्त्रैं कवचाय. स्त्रौं नेत्राय ॥ स्त्रः अस्त्राय. इतिकरषडंगन्यासंकृत्वाध्यानाद्यंगार्चनेदिग्दलेषुदेवाग्रा
दिप्रादक्षिण्येनअनंताय. वसवे. वराय ॥ विदिग्दलेषुअजायै. गोगायै: अनंतायै: अद्रिजायै. इतिसंपूज्यलोकेशार्चादितेदिग्दलेषुदेवाग्रा
दिप्रादक्षिण्येनअनंताय. वसवे. वराय. विदिग्दलेषु. अजायै. गोगायै: अनंतायै. अद्रिजायै. इतिसंपूज्य. लोकेशार्चादिप्राग्वत्कुर्या
दिति ॥ जपेद्द्वादशलक्षंतुतद्दशांशंहुनेत्तथा सर्पिरक्तेनहविषातर्पणादिततश्चरेत ॥ पूर्वोदितेनविधिनासूर्यायार्घ्यंनिवेदयेत् कृत्वा
मद्विपिवपश्चंत्वचभवेन्मध्येमनुर्मगोन्यस्यास्यापरितोयपूर्णकलशंसम्पड्भिधायास्पच ॥ वक्त्रेवामकरेणमूलमनुनाजप्तेनचाप्तोन

रं संजप्याथ शं तं सुधामयमिति स्मृत्वाभिषिंचेच्च तं ॥ साध्यस्तेन भवेन्नरो विगतभीः सर्वज्वरावीनामयो दीर्घायुश्च विषद्वयेन रहितो योपि
च्च सौभाग्ययुक् ॥ तेनैव प्रजपेत्करेण करकं सम्पूर्य विधायामृताते नैविषिंणं निषिंचति विषं वा कालकूटं हरेत् ॥ अथवा मनुमप्रजपेत्स्वक
रं विषिमूर्द्धनि सुधायततः ॥ सतु क्षतेहस्तमपीह नरं प्रतिमावपतेद्यविराम्मनुना ॥ सविताप्तसुधाकरद्वयगलत्पीयूषधाराप्लुतं वीजं प्रांत
गतं ततः ॥ सुतसुधासंभाविते चादिमं ॥ मन्त्रस्यास्य कृती जपेन्मनुमिमं क्ष्वेडामयध्वंपरं भूतायस्मृतिसर्पजातविकृतीर्हित्वा सुखं जीवति ॥ शी
र्षे चन्द्रविनिःसृतस्फुतसुधं हंसांऽरूपं मनुं तत्स्रोपूत्रपथं सदा विमलधीर्नीत्वा ततः स्वांततुं ॥ व्याप्ताते न विचित्यतां मनुमिमं संजप्य धीमान्
कृती ॥ सेरायस्मृतिकालकूतदुरितोन्मादं जरां संहरेत् ॥ आकारानुराचन्द्रखंडविसरत्पीयूषधाराचितं मेचाप्यं सगतोर्द्धचंद्रयुगलं प्रो
द्भूतभासाप्रुद्भः ॥ एवं साधकसत्तम ॥ स्पसततं दाहाज्जिमृतामयाः ॥ कृत्याः शत्रुकृताः प्रयांति विलयं योगः परोयं मतः ॥ ॥ तथा ॥ वि
यत्कृशानुसांताभ्यां मनुर्षष्ठेन्दुभिर्युतं मार्तंडभैरवो मंत्रो भजतां सर्वसिद्धिदः ॥ वियद्धकारः ॥ कृशानुरेफः मांतो यकारः मनुरौका
रः षष्ठस्तु ऊकारः ॥ इन्दुर्विन्दुः ॥ एभिः पिण्डितं वीजं ह्रयभ्रौं इति भवति ॥ मध्येगोविवमन्त्रोप्यसर्वेष्टफलदायकः दांतान्यक्षु नमागेस्तु
विषवीजमुदाहृतं ॥ दांतधकारः ॥ अग्निरेफः अक्षिइकारः उत्तमांग विंदुः तेनाध्रिं इति ॥ दांतं दहननेत्रेंदुसहितं तदुदीरितमित्युक्तं ॥ दांते
ठकारः दहनरेफः नेत्रइकारः इंदुरनुस्वारः ॥ तेनविड्रुरिति वीजमुद्धृतं ॥ यथोपदेशं जपः ॥ अस्याऋषिः निवृच्छंदः मार्तंडभैरवो देवता

॥ राम ॥
॥ ४४३ ॥

हंवीजविंदुःशक्तिरितिवदंति॥ तथा॥ मूर्त्तिर्पंचसमुद्दिष्टाःसूर्यभास्करभानवः॥ रविदिवाकरश्चापि न्यस्तव्यांगुलीषुताः मध्यमांगुलि
मारभ्यकनिष्ठांतंन्यसेत्सुधीः॥ मूलाद्यर्णनापंचह्रस्वैर्युक्तेनानेनसंयुता॥ शिरोवदनहृद्गुह्यपादेष्वेताःक्रमान्न्यसेत् मध्यमांगुलिमितिमध्यमा
र्त्तन्यंगुष्ठानामाकनिष्ठासुमध्यमाद्यनुजातोरिवतिनारायणीयवचनात्॥ पंचह्रस्वैअकारोद्योकारांतैःषड्विंदुरैः मूर्त्तीःसद्यावसानिकाइ
तिनारायणीयोक्तेः॥ ततःषडंगानेत्रांतेकुर्यायुजा राणना॥ ततस्तैनैवकुर्वीतव्यापकंमंत्रवित्तमः॥ अस्त्रास्त्रन्यासांनंतरंनेत्रन्यासःकार्यः॥
अत्रकेचित्॥ दीर्घयुक्तेनवीजेननेत्रांतांगानिविन्यसेदितिशारदादिवचनाच्च॥ तथा॥ स्वर्णपीतजपानिभंत्रिनयनंमुक्तालसच्चारिणांख
ट्वांगादिंस्तथाजपंवटीपद्मंचशक्त्यंकुशौ॥ हस्ताब्जैर्दधतंकपालममलंमद्धह्मालिंगितंमार्त्तण्डंमणिवद्धरत्नमुकुटंध्यायेच्चवेदाननं
दक्षोर्ध्वादिखट्वांगादिचत्वारिवामाधोदिपद्मादीनिचत्वारिध्येयानि वेदाननंचतुर्वक्त्रंत्रिनयंप्रतिवक्त्रमितिशेषः॥ अथवाङ्कविषकाक्ष
मितिनारायणीयोक्तेः॥ स्वर्णपीतंजपापुष्पनिभंचनेनरक्तमित्युक्तं॥ सिंदूरारुणमीशानंवामार्द्धदयितंरविमितिनारायणीवचनात् तथा
नवशक्तिसमायुक्तेपीठेचोपाद्यकर्णिकावाहयेत्ततः॥ इतितथा॥ पूजयेच्चग्रहगणैर्लोकेशाश्चतदायुधैः॥ ॥ अथप्रयोगः॥ तत्रप्रातः
कृत्यादियोगपीठन्यासांतेमूलमंत्रेणायामत्रयंकृत्वाशिरसिव्रह्मणेऋषयेनमः॥ मुखेनिचृद्छंदसेनमः॥ हृदिश्रीमार्त्तण्डभैरवायदेवता
यैनमः॥ गुह्येहवीजायेनमः॥ पादयोःविंदवेशक्तयेनमः॥ नाभौरंकीलकायनमः॥ इतिविन्यस्यप्राग्वद्विनियोगमुक्त्वा॥ मध्यमयोः अंस्

र्यायनमः ॥ तर्जन्योः भास्कराय: अंगुष्ठयोः रवये· पादयोः ॐ दिवाकरायनमः ॥ ह्रांहृदय ॥ ह्रींशिरसे: ह्रूंशिखा· ह्रैंकवचा· ह्रौंने
त्राय· इतिकरयोः· कनिष्ठांतं हृदादिषु चनेत्रांतेच विन्यस्य मूलमंत्रेण व्यापकं ध्यानादिपुष्पोपचारांते प्राग्वदंगानि यथास्थानं संपू
ज्यनेत्रमीशानकोणे संपूज्य लोकेशार्चादि सर्वं प्राग्वत्कुर्यादिति ॥ तथा ॥ लक्षाणां त्रितयं मंत्री जपेद्बीजश्च विंवयोः ॥ मध्यगंज्रुकुर्या
त्तस्य दशांशेनोत्पलैः शुभैः ॥ त्रिमधक्तैस्तर्पणादि कुर्यात्सिद्ध्यति मंत्रराट् ॥ एवं सिद्धे मनौ मंत्री काम्यकर्माणि साधयेत् ॥ पूर्ववद्धार्य
दानेच कुर्यान्मंत्री समाहितः ॥ चतुरंगुलसंभूतैः सुमनोभिः श्रियं लभेत् ॥ लक्षं हुतेच्च शाल्याज्यतिलविल्वैर्निदानं भाक् ॥ रा
ज्ञानवश्यये ह्रीपुंजपाकुसुमहेमतः ॥ ज्रुकुपान्मातुलिंगैश्च लभतेर्थं सवांछितं ॥ एवं यः साधयेन्मंत्रं तस्य विद्या यशोवलं ॥ पु
त्रांलक्ष्मीश्च सौभाग्यं सर्वदा विजयो भवेत् ॥ वृत्तत्रयस्तपुनर्वृत्त षट्दलं वृत्तयुग्मकं ॥ अष्टास्वकं कलाश्चैव विधानेन लिखेत् ॥
क्रमात् ॥ वृत्तस्य मध्ये प्रणवं त्रिकोणे गारुडं न्यसेत् ॥ गारुडं च पुनर्वृत्ते लिखेत्पंचाक्षरं ॥ षट्कोणे चक्रराजं च वर्गाष्टकं लिखेत्क्रमात्
वृत्तद्वये महासौरं गायत्रीं शिरसा महत् ॥ अष्टस्वष्टाक्षरं न्यस्य दिंद्रादीन् देवतानपि ॥ कलाग्रेषु स्वराः ॥ ओं क्रां श्रीं ह्रीं च विलिखेत् ॥ राम ॥
क्रमात् ॥ सौरचक्रमिदं पुंसामायुरारोग्यवर्द्धनम् ॥ वंध्यानां पुत्रजनकं स्त्रीणां सौभाग्यदायकं ॥ राज्ञां विजयदं सम्यक् रोगीणां ॥ ४४४ ॥
रोगनाशकृत् ॥ किं वहुक्तेन विधिना धृतं हस्ते खिलप्रदं ॥ उपवक्ष्यामि च्चमह आरोहंनु नरांदिवं ॥ हृद्रोगं मम शद्वांते सूर्यांते हरिमाप

दं॥ गां च नाशाय शर्वांतो महासौरमनुर्मतः॥ वृत्तमित्यादीनां श्लोकानामियमर्थः॥ वृत्तं कृत्वा तन्मध्ये ससाध्यं प्रणवं विलिख्य तदहिस्वप्रमेगारकरामिति विलिख्य पुनर्वृत्ते द्विपे श्रों स्वाहा इति गारुडं पंचाक्षरमालिख्य षट्कोणेषु सौरं षडक्षरमालिख्य तदग्रेषु शुक्रादिबीजान्यालिख्य षोडशकोणेषु स्वरांस्तदग्रेषु श्रीं ह्रीं मिति बीजद्वयं प्रत्ययलिखेदेतद्यंत्रं मुक्तापलदं फवेत्॥ महासौरमंत्रस्तउद्यन्नद्यमित्रमह आरोहन्नुत्तरामिति प्रोक्तवैदिकमंत्र॥ ॥अथ श्रीसारसंग्रहे॥ चंद्रमंत्रं प्रवक्ष्यामि मंत्रिणां हितकाम्यया॥ सम्यक्सुदं चतुर्वर्गफलदं सर्वसिद्धिदं॥ व्योमादिर्मनुपूर्वस्थो विंदुयुक्भृगुसंयुतः॥ रविराननवृत्ताढ्यो मनुदीर्घो विषस्तथा॥ कलान्त्ययुक्षडर्णोयं सोममंत्र उदाहृत॥ भृग्वंवुमान्विंदुस्वराणमपरे बीजमूचिरे॥ व्योमादिः सकारः मनुपूर्वे उकारः॥ विंदुरनुस्वारस्तेन सोमिति॥ भृगुः सकारस्तेन सो इति रविर्मकार आननवृत्तमाकारस्तेन माः मरुत्यकारः दीर्घो नकारः विषमेकारः अंत्यकला विसर्गस्तेन म इति प्रकारांतरेणमुद्धरंति भृगुः॥ सकारः अंवुवकारमनुरौकारः विंदुस्वराणः अनुस्वारः एते सोमिति बीजं वदंति॥ ऋषिर्भृगुः पंक्तिश्छंदो देवता चद्रमा मत॥ सदीर्घनिजेन षडंगानि मनोः क्रमात्॥ स्वच्छिवास्य मंत्रज्ञो द्विजराजं विचिंतयेत्॥ श्वेताब्जस्यस्फटिकरजतप्रोद्यत्सत्कांतिरुच्चैर्मुक्ताहारप्रलसिततनुर्नीलकेशोदारस्य॥ ॥ हस्ताब्जाभ्यां कुमुदवरदे वारयन्नः शशांको भूत्यै भूयादभिमतरमांसुचकोघात्कलंक॥ दक्षाभ्यां कुमुदवरदे॰ पी

॥शि·चं॥
॥४४५॥

ठेधर्मादिभिर्युक्तो गद्दिनेपरिपूज्य च ॥ चंद्रमंडलंपर्यंतंततः संपूजयेद्विभुं ॥ पद्मपादार्घायास्तु ॥ राकांकुमुद्वतीनंदासुधासंजीक्षमा
आप्यायनीचंड्रिह्लानवशक्तये ॥ पूर्वादिक्रमतो मंत्री नत्वेताः पूजयेदिमाः ॥ इतिपीठशक्तीराहुः ॥ स्वायंभुवे तु ॥ अमृतातारकाज्यो
त्स्नाविमलाव्यापिनीतथा ॥ चित्राचकृत्तिकास्वातीः श्रवणानवशक्तये ॥ अतांतेकलात्मनेसंवित्पीठायवैनम ॥ ॥ सारसं
ग्रहे ॥ किंजल्केषुषडंगानि तद्वक्त्रोः पत्रगा यजेत् ॥ तास्वाद्यारोहिणीप्रोक्ताकृत्तिकारोहिणीएनः ॥ भरणीराज्ञिरार्द्रा च ज्योत्स्नाख्या
चकलामता ॥ सुश्वेताश्वेतवसनाश्वेतमाल्यानुलेपनाः ॥ रक्ताहारालंकृतांगाः पाराजलिपुताः शुभाः ॥ आपीनोन्नतवक्षोजाभा
राक्रांतावलग्नकाः ॥ मदेनमदगामिन्यः प्राणनाथाहृमानसाः ॥ प्रसन्नचंद्रवदनाः फुल्लेदीवरलोचनाः ॥ ग्रहानष्टौदलाग्रेषुलो
केशांश्चततोयजेत् ॥ वज्रादीनिततोबाह्येस्वंपूजासमीरिता ॥ ॥ अथप्रयोगः ॥ ततः प्रातः कृत्यादियोगपीठन्यासांते मूल
मंत्रेण प्राणायामत्रयंकृत्वा शिरसि भृगुऋषयेनमः ॥ मुखेगायत्रीछंदसे · हृदये श्रीचंद्रमसेदेवतायै · गुह्ये सौंबीजाय पादयो
र्नमः शक्तये इति विन्यस्य प्राग्वद्विनियोगमुक्त्वा ॥ ॥ ध्यात्मपूजांते मण्डुकादिकर्णिकांते योगपीठं संपूज्यार्कमण्डलव
ह्निमण्डलायसंपूज्य पश्चात्सोममण्डलमभ्यर्च्य सत्वादिपरतत्वार्चांतेष्टदलकेसरेषु स्वाग्रादिमध्यांते ॥ ॥ कायै · कुमु
द्वत्यै · नंदायै : सुधायै संजीवन्यै · क्षमायै · आप्यायन्यै · चन्द्रिकायै · ह्लादिन्यै · इति संपूज्य अमृतकलात्मने संवीत्पीठाय न

॥रामः॥
॥४४५॥

म इति पीठं संपूज्य दिग्दलाग्रेषु रं रवये· बुंबुधाः गुंगुरवे · शुंशुक्राः कोणदलाग्रेषु · भौं भौमाय· मंमंदाय · रां राहवे · कें केतवे · इति संपू
ज्य लोकेशांश्चापि सर्वं प्राग्वत्कुर्यादिति ॥ तथा ॥ वर्णलक्षं जपेन्मंत्रं त्रेजुहुयात्तत्सहस्रकं ॥ हविषा घृतसिक्तेन तर्पणादि ततश्चरेत् ॥ ततः
सिद्धो भवेन्मंत्रः साधकस्य न संशयः ॥ एवमुक्तप्रकारेण संसिद्धे मंत्रवित्तमः ॥ चंद्रं शिरसि संचिंत्य जपेन्मंत्रमनन्यधीः ॥ त्रिसहस्रं
तेन लभेद्राज्यैश्वर्यमकिंचनः ॥ लघुमिष्टहविष्याशी जलस्थो विजितेंद्रियः ॥ वेदलक्षं मनुं मंत्री प्रजपेद्यतमानसः धरागते विधानेन सर्
वं प्राप्नोति तत्क्षणात् ॥ घोरज्वले महत्क्लेशे शिरोरोगे च दारुणे ॥ शत्रून्मादीनकृत्यासु कमलाद्यामलेषु च ॥ अयुतं प्रजपेन्मंत्रं
तच्छांतिरचिराद्भवेत् ॥ पूर्णिमायां यथाशक्तिजपेन्मंत्रं जितेंद्रिय ॥ सौभाग्यारोग्यसंपत्तिभाजनं मनुजो भवेत् ॥ ऐंद्रवारुणावि
स्तीर्णमंडलांत्रयेद्बुधः ॥ लिखेद्भूमंडले हुत्वा निपीदेत्पश्चिमे स्वयं ॥ मध्यस्थे मंडले न्यस्य पूजोपकरणानि च ॥ अन्यस्थमं
डले पद्मसंयुते पूर्ववद्यजेत् ॥ किंकं कटोरीप्पजातं पत्रं संस्थाप्य पूरयेत्सुद्धगोपयसा मंत्री स्पृशन्पात्रे मनुं जपेत् ॥ अष्टाधिकं श
तं पश्चाद्राकायामुदयो विधो ॥ राकायां पूर्णमास्यां चंद्रेपि विद्यामनुना दद्यादर्घ्यं यथावि ॥ एवमर्घविधानं यः करोति प्रतिमासकं
परामासादीप्सितानर्थान्स लभेन्नात्र संशयः ॥ लक्ष्मीश्च महतीश्चान्सौभाग्यारोग्यसंपदः ॥ कोर्त्तिपद्मेप्सितां कन्यां संकान्तिं लभते नरः
तथा विश्वविद्यालिनीयुक्चंद्रिणपते वचंद्रयुक् ॥ मुखशिरोन्यस्तारात्रोविद्यामनुरयंमतः ॥ विघविद्यामालिनीस्वरूपं चंद्रिणीस्वरू

पं॥ चडस्वरूपंमुखिविशिरोंत्य: स्वाहान्त॥ तथा॥ अथभौममन्त्रं वक्षेसर्वरोगनिवारणं॥ सविर्वाद्यहृदयंप्रोक्तामरकायहृदंतकः॥ अष्ठ
वर्णोमः प्रोक्तोगारकस्यमनीषिभिः सविद्यात्रहृदयं स्वच्च इतिनीरकायस्वरूपंहृन्मम:॥ ऋष्याद्याव्रूस्सगायत्रीभूमिपुत्रः समीरिता॥ त्र्यंग
षड्भंचास्यमनोनिजवीजेनसंमतं॥ नमाम्यंगारकंतुष्टुरक्ताम्बरविभूषणं॥ जानुस्थवामहस्ताग्रेसाभयेतरपाणिकं॥ स्त्रांईमित्यादिस्फुरत्डेन
वुद्धशार्ङ्गवहृद्यांत· षडर्णकः ऐंतेबुद्धशंबुद्धायहृदयंनमः वुद्धमंत्रोस्यपुन्याद्यावुस्रपंक्तिबुधामताः षडंगानिस्ववीजेनविन्यस्यैवंविचिंतयेत॥ वंदेबुधंस
दादेवपीतांवरसभूषणं॥ जानुस्थवामहस्ताग्रंसाभयेतरपाणिकं प्रजपेद्वर्णसाहस्रंदशांशंजुहुयात्सुते॥ अर्चनंपूर्ववदितंज्ञातव्यमनुविन्नमे
वृंवृहस्पतयेहृद्वसुवर्णोगुरोर्मनुः॥ ऋष्याद्याव्रूलसानुष्टुप्गुरवोस्यप्रकीर्तिता· अंगषट्कंदीर्घयुक्तस्वीयवीजेनकल्पयेत॥ रत्नस्वर्णाप्तु
कादीनिदक्षपाणौरुजान्विरत्॥ अन्यादन्नावस्मरा शौनिंध्येयोमासस्फुरत्॥ जपेद्वसुसहस्रंतुतत्कृतंहविषाहुनेत॥ घृताक्तेनषडंगेष्वग्रहशा
यायुधैर्यजेत॥ ध्यात्वापूर्वोक्तमार्गेणसमासीनेनवायते॥ यजेत्स्तदादिनंवृह्णोपीतपुष्पैघृतंडुते॥ एवंदिनानांत्रितयंवाहुनेन्मंत्रविन्नम·॥ स्वर्णावस्त्रा
दिसंसिद्धिर्भवत्यस्यनसंशयः॥ वस्त्रमेदेहिशुक्रायशुभमाद्याहृद्यांतिकं॥ शुभमाद्यःसुवस्त्रमेइत्यादिहृदयंनमः·ऋष्याद्याव्रूस्सविराट्शुक्रामंत्रिभिरिता
पदैःषड्भिःषडंगानिततोदेवंविचिंतयेत॥ शुक्लंनमाम्यायतस्थंशुक्लाभंवरणभूषणंस्वर्णनासौरत्नधाराविन्दुजातकरद्वयं॥ अयुतंप्रजपेन्मं
त्रसहस्रंजुहुयात्घृते॥ अंगारस्याग्निदिहेतिश्वनुराव्वरणमनो॥ शनैश्चरायदशमाद्यश्चाष्टवर्णकः॥ मुनाद्याव्रूसगायत्रशनैश्चरसमाहूया

॥ बीजैनैव षडंगानि विदध्यान्न विचक्षणः ॥ विचक्षण इत्युक्तेः षड्दीर्घयुक्तत्वं सूचयति ॥ वंदे शनैश्चरं वक्रं दंष्ट्रं नीलविभूषणं ॥ वाम
जानुस्थतद्धस्तं भामयान्यकरं बुजं ॥ जपेदक्षरसाहस्त्रं तद्दशांशं हुनेद्घृतैः ॥ षडंगग्रहदिक्पालमातृभिः परिपूजयेत् ॥ रां राहवे नमो त्तोयं
राहुमंत्रः समीरितः ॥ षडर्णाः स्वीयबीजेन षडंगानि प्रकल्पयेत् ॥ मुनाश्चाब्रह्मगायत्त्रा राहवः समुदाहृता ॥ वंदे राहुं धूम्रवर्णं सर्वका
र्यैककृतांजलिं ॥ विकृतास्यरक्ताक्षं धूम्रालंकारमन्वहं ॥ जपहोमार्चनाद्यं च पूर्ववत्परिकीर्तितं ॥ पूर्ववद्दशीसाहस्त्रं घृतदशांशं ग्रहग्र
हाराधिपतत्पुधैरिति केचित् ॥ कें केतवे हृदि न्येवं केतुमंत्रः षडर्णकः ॥ ब्रह्मामुनिमनत्श्छंदः पंक्तिः केतुश्च देवता ॥ पूर्ववत्स्यादंगष
ट्कं ततः केतुं विचिंतयेत् ॥ पूर्ववत्षड्दीर्घाढ्यबीजेन वंदे केतुं कृष्णवस्त्रादिभूषितं ॥ वामोरुन्यस्तसाभयान्यकरांबुजे ॥ जपहोमार्चनादी
नि पूर्ववत्परिकल्पयेत् ॥ इति स्वत्रभौमादीनां पूजायां मध्ये तं तं ग्रहं संपूज्य ततस्तु तत्तद्ग्रहावसानिकानन्योग्रहान्यादिप्रादक्षिण्ये
न पूजयेत् ॥ अत्रैते ग्रहमंत्राः पुरस्तात्तानामेवप्रकरयोवकृत्व्याश्चापि सर्पमंत्रप्रयोगोपयोगितया शेक्ताः सौकर्यार्थेन
नुपंचायतनांतर्गतत्वेनेति ॥ ॥सुंदराचार्यशिष्येण श्रीनिवासेन धीमता ॥ चंडिकायां प्रणीतायां चत्वारिंशत्प्रकाशकः ॥
इति श्रीशिवार्चनचंद्रिकायां चत्वारिंश ॥ ॥वेदांतोपरिषद्वेद्यं श्रीसदानंदरूपिणं ॥ ललितां वासनायुक्तं परमेश्वरम
हं श्रये ॥ ॥देव्यै नमः ॥ ॥श्रीजयति ॥ अथ शैवमंत्रा उद्धीयंते ॥ ॥नंदिकेश्वर मन्ने कैलासशिखरासीनमर्धनारीश्व

रंप्रभुं ॥ प्रसोयेंद्रमहेन्द्राद्यैर्देवैर्विद्याधरोरगैः न ॥ ॥ वैर्मुनिभिः सिद्धैरक्षोभीरप्सरोगणै ॥ हेरंबस्कंदपूर्वादिगणैर्भक्त्यास्तुसेवि
तं ॥ अक्षक्रीडार——— दलालसं परमेश्वरं ॥ क्रीडतो भुवनेशस्य जगदंबिकया सह ॥ अक्षपाताधिकारेतु देव्या नंदी नियोजितः ॥ क्री
डतो भुवनेशस्य जगदंबिकया सह ॥ अक्षपाताधिकारेतु देव्यानंदी नियोजितः ॥ क्रीडताक्रमयोगेन जितं देवेन शंभुना ॥ अक्षप
पाता देवेन प्रोक्तं नंदि क्षितं मया ॥ तव सत्या—— योगेन तुष्टोहं वरभक्तितः ॥ वद किं क्रियतां वत्स यन्ने मनसि वर्त्तते ॥ वदाम्यन्तसंदेहः
प्रीतेन मनसा प्रभुना ॥ ॥ श्रीनंदिकेश्वर उवाच ॥ तुष्टोसि यदि देवेश जगतामीश्वर प्रभो ॥ वद मंत्रान् जगन्नाथ शैवान् त्रैलोक्यदुर्लभान्
षडंगन्याससहितान् पूजाकर्मसमन्वितान् ॥ दीक्षाभिषेकसहितानधिकारपदान्वितान् ॥ ॥ श्रीमहादेव उवाच ॥ कथयामि महाभा
ग त्रैलोक्येष्वपि दुर्लभान् ॥ शैवान् सर्वमनुश्रेष्ठान् सर्वतंत्रेषु गोपितान् ॥ भक्तोसीति न मे किंचिदवाच्यं त्वयि सुव्रत ॥ मूलमंत्रांगविन्या
सपूजाकर्मसमन्वितान् ॥ दीक्षाभिषेकसहितानधिकारपदान्वितान् ॥ उद्धारक्रमयोगेन सर्वकामफलप्रदान् ॥ शुसमेम्———
गोमयेनोपलेपिते ॥ पुष्पप्रकारशोभाढ्ये गंधधूपतरंगिते ॥ विलिखेन्मातृकां तत्र वर्गाष्टः———— स्वरैः षोडशभिर्वर्गः प्रथमः प
रिकीर्त्तितः ॥ पंचपंचाक्षराश्चान्ये सप्तावंत्योचतुरक्षरौ ॥ वर्गा———— देवं नेतो मंत्रान् समुद्धरेत् ॥ पंचमस्यतु वर्गस्य पंचमं प्रथमं भ
वेत् ॥ दुर्गास्यां ति मे वर्गाः प्रथ———— न्वितः ॥ द्वितीयं वर्गमारव्यातमष्टमस्याद्यमक्षरं ॥ प्रथमस्यतृतीयार्णसमेतं तत्तृती

यके ---- सप्तमस्याद्यद्वितीयार्णसमन्वितं ॥ चतुर्थवर्णमंत्रस्य सप्तमाद्येनुपंचमं ॥ एवं पंचा -------- वाच्यः षडक्षरः ॥ यस्माधनान्तुम
तुजाः शिवसायुज्यमाप्नुयुः ॥ प्रणावस्त्य परंब्रह्म ---- समुदीरितं ॥ पंचाक्षरमयानि स्युः पंचभूतानि सुव्रत ॥ भूतात्मकं जगदिदं तेनास्य
------ ॥ ऋषिरुक्तो वामदेवः पंक्तिश्छंद उदाहृतं ॥ सदाशिवो देवतास्य मंत्रस्य परिकीर्तितः ----- मनोवर्णोजानिमुक्तानिक
ल्पयेत् ॥ ततस्तत्पुरुषाघोरसद्योवामेशसंज्ञकाः ॥ तलव ---- न्यसे त्रिषु स्थानेष्वतंद्रितः ॥ ततर्जनीमध्यमात्वानामांगुष्ठेष्वथापरः ॥
आस्यहृन्मूर्ध्वमङ्घ्रिपचवक्त्रेषु चापरः ॥ आग्याम्यवारुणोदीच्यमध्यवक्त्रेषु पंचसु ॥ ततः षडंगं विन्यस्य वक्ष्यमाणं यथाविधि ॥ सर्वज्ञो नि
त्यतृप्तश्च बोधानानादिकीर्तितः ॥ स्वतंत्रशक्तिश्चालुप्तशक्तिश्चानंतशक्तियुक् ॥ मूलमंत्रार्णपूर्वैश्च धाम्नेशब्दांतिकैः क्रमात् ॥ षडं
गानि मनोरस्य ‾ निमुक्तानि मंत्रवित् ॥ कुर्वीत गोलन्यासं च रक्षायै नंदिकेश्वर ॥ हृदि वक्त्रांसयोरूर्वोः कंठे नाभौ द्विपार्श्वयोः ॥ पृष्ठे हृदि
ततो मूर्ध्नि वरदे नेत्रयोर्नसो ॥ दोःपत्सन्धिषु साग्रेषु विन्यसेत्तदनंतरं ॥ शिरोवदनहृत्कुक्षिसोरुपादद्वयेषु तः ॥ हृदि वक्त्रांबुजं वक्त्रे मृगाभय
वरेष्वथ ॥ वक्त्रांसहृत्सुपादोरुजठरेषु क्रमान्न्यसेत् ॥ मूलमंत्रस्य षड्वर्णान्तथा वै देशिकोत्तम ॥ मूर्ध्नि भाले दरांसेषु हृद्येनाः पुनन्यसेत्
पश्चादनेन मंत्रेण कुर्याच्च व्यापकं सुधीः ॥ नमोस्तु स्थाणुभूताय ज्योतिर्लिंगामृतात्मने ॥ चतुर्मूर्तिवपुश्छायाभासितांगाय शंभवे ॥ एवं
न्यस्ततनुर्मंत्री ध्यायेद्देवमनन्यधीः ॥ गोक्षीरेकनधवलं रजताद्रिसमप्रभं ॥ चारुचंद्रकलाराजज्जटामुकुटमंडितं पंचवक्त्रधरं शंभुभ्र

त्रिवक्त्रं त्रिलोचनं ॥ शार्द्दूलचर्मवसनं रत्नाभरणभूषितं ॥ दक्षोर्द्धहस्ते परशुं वरं च दधतः करे ॥ वामोर्द्ध्वहस्ते हरिणं दधानमभयं परे ॥ सुप्रसन्नमुखां
म्भोजं निविष्टं कुशविष्टरे ॥ ब्रह्मविष्णुमहेंद्राद्यैः स्तूतं भक्त्या सुरासुरैः ॥ विश्वाद्यं विश्ववपुषं भवभीतिहरं भवं ॥ इति ध्यात्वा गणाध्यक्ष मानसैः
स्वैर्येष्ट्वा ॥ उपचारैः षोडशभिर्वा हि पीठे समर्च्चयेत् -------- लं कृत्वा कर्णिकाकेसरोज्ज्वलं ॥ वहिरष्टदलं वं वेचतुरस्रत्रयावृतं चतुर्द्वा
रसमायुक्तं ----- प्रपूजयेत् ॥ इति ॥ देवं संपूजयेत्पीठे वामादिनवशक्तिके ॥ वामा ज्येष्ठा ततो रौद्री काली कलविकरणिका ॥ ततो वलवि
करणी च वलप्रमथनी तथा ॥ सर्वभूतदमन्यानंतः प्रोक्ता मनोन्मनी ॥ ताहिरणपाहुयाः प्रोक्ताः शैवपीठस्य शक्तय ॥ अत्रमाननसपूजादि
पीठपूजांतस्य प्रागेव लिखित्वाङ्गुष्ठगोरत्नमयाच्चना ऽलिख्यते ॥ स्वं पीठं समभ्यर्च्य मूर्त्तिं मूलेन तत्र वै ॥ संस्थाप्य देवमावाह्य तस्यां
संपूजयेच्छिवं ॥ सर्वोपचारैराराध्य मध्ये वन्हि ततो र्च्चयेत् ॥ प्रथमेष्टदले मूर्त्तिर्यजेत्तत्स्वरूपादिकाः ॥ दिक्पत्रेषु गणाध्यक्ष षडीशं मध्ये सम
र्च्चयेत् ॥ पीताशितश्वेतरक्तश्वेताभाश्चतुराननाः ॥ वराभयमृगान्वत्सपरशुं विभ्रता करेः ॥ कोणपत्रेषु मध्ये च निवृत्याद्याः कला
यजेत् ॥ निवृत्तिश्च प्रतिष्ठा च विद्याशांतिस्ततः परं ॥ शांत्यतीता च ताः प्रोक्तास्तेजोरूपाः कलाः क्रमात् ॥ अग्नीशासुरवायव्यमध्ये
दिक्षु च पूजयेत् ॥ केसरेषु षडंगानि द्वितीयेष्टदले ततः ॥ अनंताद्यान्यजेद्वत्स देवायाग्रादिप्रदक्षिणं ॥ अनंतं सूक्ष्मनामानं शिवोत्त
ममनंतरं ॥ एकनेत्रमेकरुद्रं त्रिमूर्त्तिं तदनंतरं ॥ श्रीकंठं च गणोश्रेष्ठ शिखंडिनमपि क्रमात् ॥ रक्तपीतासितारक्तकेसरकांजनासि

तान् ॥ किरीटार्पितवालेन्दुरूपप्रस्थोश्वारूढपरागान् ॥ त्रिनेत्रांश्च लवज्रेषुचापहस्तामनोहरान् ॥ ततोर्च्चयेद्गणाश्रेष्ठतृतीयेष्टद
लेषु नः ॥ उमा चंडेश्वरो नंदी महाकालो गणेश्वरः ॥ वृषभो भृंगिरिट्याह्वः स्कंदश्चैतान्यथाक्रमं ॥ उत्तरं दलमारभ्य पीतनीलारुणा
सितान् ॥ चित्रान्विशाकश्वेतपाटलाङ्कमतः सुधीः ॥ चतुरस्त्रे गणाध्यक्षपूर्वादिक्रमतो यजेत् ॥ इंद्रं सुराधिपं पीतं वज्रहस्तं स
वाहनं ॥ अग्निं तेजोधिपं रक्तं शक्तिहस्तं सुभूषितं ॥ यमं प्रेताधिपं कृष्णं दण्डहस्तं समर्चयेत् ॥ रक्षोधिपं निर्ऋतिं च खड्गहस्तं सुधू
मकं ॥ पाशहस्तं सुरुआगं तुदितं यादसां पतिं ॥ वायुं प्राणाधिपं धूम्रं मंकुशाढ्यकरं यजेत् ॥ यक्षंपतिं कुवेरं च सुरूपावर्णलसत्करे
विद्याधिपं तथैशानं स्वच्छं शूलकरं यजेत् ॥ नागाधिपं तथानंतं गौरं चक्रकरं यजेत् ॥ लोकाधिपं विधातारं रक्तपद्मकरं जपेत्
ऐरावतस्तथा मेषं महिषं नृतपूरुषं ॥ मकरं मृगं मत्स्यौ च वृषं चैव विपं हंसको ॥ इत्यादि लोकपालानामासनानि गणाधिपं ॥ ततो व
हिरादस्त्राणि तत्पार्श्वे समर्चयेत् ॥ खड्गमाकाशसंकाशं विद्युन्निभयं जेत् ॥ अंकुशं रक्तवर्णं च प्रुक्रवर्णगदां यजेत् ॥ त्रिशूल
नीलवर्णं त्रयजेदस्त्रसमाहितः ॥ रथांगं कुरुविंदाभं पद्मं रक्तं समर्चयेत् ॥ लोकपालायुधान्येवं कथितानि तवानघ ॥ य एवं पूजे
येद्देवं स सद्यः शिवतां व्रजेत् ॥ ॥ अथैषमेव ॥ तत्र केलाशेत्यादि फलप्रदानीत्यं नैकादश श्लोका स्तेत्रावतारक्रमकथनपराउक्तोच्च
मानविषयत्वात् स्पष्टार्थाः ॥ सुसमित्यादिभिरुद्धरेदित्यंतैस्त्रिभिः श्लोकैर्मंत्रोद्धारकथनार्थं मातृकाप्रस्तारस्थानसरूपं तत्स्ववर्गी

ष्टकविभेदंचोपदिशति ॥ तत्रपंचमस्यवर्गस्यपंचममक्षरमितिशेष ॥ तेन·नकारः प्रथममक्षरंमंत्रस्येतिशेष ॥ मंत्रस्याद्यक्षर
मित्यर्थः ॥ षष्ठवर्गांतिमोवर्णः षष्ठवर्गः पवर्गस्तस्यांत्यंतिमः मकारः प्रथमांत्यसमपंमंत्रस्यतृतीयमक्षरं ॥ सप्तमपवर्गस्येतिशेषः
चतुर्थंवकारस्त्र्यक्षरमितिशेषः ॥ तेनपमिति· मंत्रनिरूपणेनः प्रणवादिस्त्वित्यादिस्यऽर्थः ॥ ॥अथप्रयोगः॥ तत्रप्रागुक्तवि
धिनादीक्षितस्नातः ॥ स्नानादिकर्मप्रकारेणप्रातःकृत्यानादियोगपीठन्यासांतंकर्मकृत्वामूलमंत्रेणप्राणायामत्रयंकृत्वाशि
रसिवामदेवायऋषयेनमः मुखेपंक्तिश्छंदसेनमः ॥ हृदयेसदाशिवायदेवतायैनमइतिविन्यस्यचतुर्विधपुरुषार्थसिद्धयेवि
नियोगः इतिकृतांजलिर्वदेत् ॥ ततस्तर्जन्योः ॐ नंतत्पुरुषायनमः ॥ मध्यमयोः ॐ मंअघोरायनमः ॥ कनिष्ठिकयोः ॥ ॐ
शिंसद्योजातायनमः ॥ अनामिकयोः ॥ ॐ वामदेवायनमः ॥ अंगुष्ठयोः ॐ यंईशानायनमः ॥ इतिकरयोर्विन्यस्यमुखेहृद
येपादयोर्गुह्येमूर्ध्नि चैतामूर्तीर्विन्यस्य ॥ पुनर्मुखेनंतत्पुरुषायप्राग्वक्त्रायनमः ॥ दक्षकर्णेमंअघोरायदक्षिणावक्त्रायनमः
वामकर्णेवांवामदेवायोत्तरवक्त्रायनमः ॥ चूडाधः शिंसद्योजातायपश्चिमवक्त्रायनमः ॥ मूर्ध्नियंईशानायोर्ध्ववक्त्रायनमः ॥
इतिपंचमूर्तीर्विन्यस्य ॥ ॐ सर्वशक्तिधाम्नेहृदयायनमः ॥ ननित्यतृप्तशक्तिधाम्नेशिरसेस्वाहा ॥ मंअनादिबोधशक्तिधा
म्नेशिखायैवषट् ॥ शिंस्वतंत्रशक्तिधाम्नेकवचायहुं ॥ वांअलुप्तशक्तिधाम्नेनेत्रायवौषट् ॥ यंअनंतशक्तिधाम्नेअस्त्रायफट् ॥ इति

मंत्रैः षडंगानि यथास्थानं विन्यस्य गोलकन्यासं कुर्यात् ॥ तत्र हृदि ॐ नमः ॥ वक्त्रे नं दक्षिणांशे मं नमः ॥ वामांशे शिं दक्षिणोरौ वा ॥ वामो
रौ यं · कंठे ॐ नमः ॥ नाभौ नं · दक्षिणपार्श्वे मं वामे शिं · पृष्ठे वां हृदि यं · मूर्ध्नि ॐ मुखे नं · दक्षनेत्रे मं · वामे शिं · दक्षनासि वा · वामे यं ·
दक्षदोर्मूले ॐ मध्ये नं · मणिवंधे मं · अंगुलीमूले शिं · अंगुलिमध्ये वां · अंगुल्यग्रे · वादोर्मूले ॐ मध्ये नं · मणिवंधे ॐ · अंगुलि
मूले शिं · मध्ये वां · अग्रे यं दक्षोरुमूले ॐ · मध्ये नं · गुल्फे मं · अंगुलिमूले शिं · मध्ये वां अग्रे यं ॥ एवं वामपादे पि शिरसि ॐ मुखे
न हृदि मं · जठरे शिं · दक्षोरुमूलादिपादाग्रपर्यंतं वा · वामोरुमूलादिपादाग्रपर्यन्तं यं हृदि ॐ वक्त्रे नं · टके दक्षोर्द्ध्वहस्ते मं · मृगे वामोर्द्ध्व
हस्ते शिं · वामाधःकरे अभये वां · दक्षाधःकरे वरे यं ॥ वक्त्रे ॐ · अंसद्वये नं · हृदि मं · पादयोः शिं · ऊर्वोः वा · जठरे यं नमः ॥ इति वि
न्यस्य · नमास्कस्यारामूर्त्ताय ज्योतिर्लिंगामृतात्मने ॥ चतुर्मूर्तिं च पंचध्या या भासितां गायत्र्यं भवे ॥ इति मंत्राणां मूर्द्धादिपा
दपर्यंतं व्यापकं न्यसेत् इति विन्यस्य यथोक्तरूपं देवं ध्यात्वा मानसपूजादि ॥ वामायै · ज्येष्ठायै · रौद्रायै · काल्यैकलविकरिणै ·
वलविकरणै · वलप्रमथिन्यै · सर्वभूतदमन्यै · मनोन्मन्यै · ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानंताय योगपीठा
त्मने नमः ॥ इति योगपीठपूजां तेयथाविधि देवमावाह्यासनादिपुष्पांतैरुपचारैः संपूज्य भगवन्तावरणपूजार्थमनुज्ञां देहि
प्रार्थ्य प्रथमे षट्दलेषु नं तत्पुरुषाय एवं अघोराय · शिं सद्योजाताय · वां वामदेवाय · मध्ये यं ईशानाय · इति वाय्वादीशादक्षि

ण्येन संपूज्याग्नेयादिदलेषु प्रादक्षिण्येन· ॐ निवृत्यै· ॐ प्रतिष्ठायै· ॐ विद्यायै ॐ शान्त्यै· मध्ये· ॥ ॐ शान्त्यतीतायै नमः॥ इति संपूज्या
द्वितीयाष्टदलान्त· केसरेषु देवाय दक्षाग्नेयकेसरे॥ ॐ हृदयाय नमः॥ वामाग्ने· ईशाने नं शिरसे नमः पृष्ठदक्षिणे मं शिखायै· वामे शिं
कवचाय नमः॥ अग्रे वौं नेत्राय नमः॥ अग्न्यादिचतुर्दिक्षु फं अस्त्राय नमः इति संपूज्य द्वितीयषष्ठदले देवाग्रदलमारभ्य प्रादक्षिण्ये
न उमायै नः॥ चंडेश्वराय· नंदिने· महाकालाय· गणेश्वराय· वृषभाय· भृंगरिटये· स्कंदाय नमः॥ इति संपूज्य चतुरस्रे रेखात्रयां
तरालगतवीथीद्वये अंतरदेवस्याग्रमारभ्य· लं इंद्राय सुराधिपतये पीतवर्णाय वज्रहस्ताय ऐरावतवाहनाय नमः॥ रं अग्नये
तेजोधिपतये रक्तवर्णाय शक्तिहस्ताय· जलाधिपतये· श्वेतवर्णाय पाशहस्ताय· मकरवाहनाय नमः॥ यं वायवे प्राणाधिप
तये धूम्रवर्णाय अंकुशहस्ताय मृगवाह· सं कुबेराय यक्षाधिपतये मौक्तिकवर्णाय गदाहस्ताय नरवाहनाय नमः॥ हं ईशानाय रु
द्राधिपतये स्फटिकवर्णाय शूलहस्ताय वृषवाहनाय नमः इति संपूज्यैंद्रेशानयोर्मध्ये आं ब्रह्मणे सत्यलोकाधिपतये रक्तवर्णाय पद्महस्ता
य हंसवा· नैऋतिवरुणयोर्मध्ये ह्रीं अनंताय नागाधिपतये गौरवर्णाय चक्रहस्ताय गरुडवाहनाय नमः॥ इति संपूज्य द्वितीयवी
थ्यां वज्राय॥ शक्त्यै· दंडाय· खड्गाय· पाशाय· गदायै· त्रिशूलाय· पद्माय· इति लोकपालायुधानि संपूज्य तत्समीपस्थाने त॥
द्वाहनानीति इत्थं लोकपालपूजायां विस्ताराशक्तौ प्राक्प्रयोग उक्ताशेषप्रकारेण वा पूजयेत्॥ इत्थं षडंगपूजाविधानं तं देवं सं

पूज्यमूलमंत्रमुच्चार्यसांगायपरिवारायश्रीसदाशिवायनमः॥ इतिपुष्पांजलिंदत्वामध्येदेवंसंपूज्यधूपदीपादिपूजाशेषंप्रागुक्तविधिना
समापयेदिति॥ तथा॥ लक्षषट्कंजपेद्वत्सनियमस्थोजितेन्द्रियः॥ तावत्सहस्रंजुहुयात्तिलैःशुद्धैर्घृतप्लुतैः॥ पायसैःक्षीरवृक्षोत्थ
समिद्भिर्वागणेश्वर॥ तावत्संख्यैस्तिलैःशुद्धैस्तर्पयेच्चसुवासितैः॥ मार्जयेच्चगणश्रेष्ठस्वात्मानंमूलमंत्रतः॥ तर्पणस्यदशांशेन
तद्दशांशेनभोजयेत्॥ शिवभक्तान्द्विजश्रेष्ठान्सदाचारानतंद्रितः॥ पंचांगमेवंविधिवत्पुरश्चरणमाचरेत्॥ एवंसिद्धमंत्रस्तुसर्वा
न्कामान्प्रयच्छति॥ एषषट्लक्षजपःकृतयुगपरःकलावेतच्चतुर्गुणजपःकार्यः॥ ॥लिंगपुराणेविनियोगंप्रवक्ष्यामिसिद्ध
मंत्रप्रयोजनं॥ येर्वत्संयातितन्मंत्रंविनियोगमजानतां॥ यस्ययेनवियुंजीतकार्येणचविशेषतः॥ विनियोगःसविज्ञेयऐहिका
मुष्मिकफलं॥ विनियोगजमायुष्यमारोग्यंतनुनित्यता॥ राजैश्वर्यंचविज्ञानंस्वर्गोनिर्वाणमेवच॥ प्रोक्षणंचाभिषेकंचत्त्रपेमर्ष
णामेवच॥ स्नानंचसंध्ययोश्चैववकुर्यात्पादकादशेनवै॥ शुद्धःपर्वतमारुह्यजपेल्लक्षमतंद्रितः॥ महानद्यादिलक्षंतुतीर्थेष्वभिर
वाप्नुयात्॥ दूर्वांकुरैस्तिलैर्वापिशुद्धैर्द्रव्यैस्तथैवच॥ तेषांदशसहस्राणांहोममायुष्यवर्द्धनं॥ अश्वत्थवृक्षमाश्रित्यजपेल्लक्षद्व
यंसुधीः॥ शनैश्चरदिनेस्पृष्ट्वादीर्घमायुर्लभेन्नरः॥ जपेदमावैहुयात्सोपिशुद्धोयुवाभवेत्॥ आदित्याभिमुखोभूत्वाजपेल्ल
क्षमनन्यधीः॥ अर्कैरष्टशतंनित्यंहुत्वाव्याधेर्विमुच्यते॥ समस्तव्याधिशांत्यर्थंपालाशसमिधोनरः॥ हुत्वादससहस्रंतुनीरोगोम

तुजो भवेत् ॥ जपेल्लक्षं तु पूर्वाह्णे हुत्वा चाष्टशतेन वै ॥ सूर्ये नित्यमुपस्थाय यः स आरोग्यमाप्नुयात् ॥ नवनीयेन संपूर्णं घटं संस्थाप्य शोभने ॥ जप्यायुतं तु तैः स्नायाद्रोगाणां भेषजं भवेत् ॥ अष्टाविंशं जपित्वान्नमश्नीयान्त्वन्वहं शुचिः ॥ हुत्वा च तालपालाशैरेतैरारोग्यमश्नुते ॥ नित्यमष्टशतस्मृ पिवेदापोर्कसन्निधौ ॥ औदरैर्व्याधिभिः सर्वैर्मासेनैकेन मुच्यते ॥ एकादशेन भुंजीयादन्नं चैवाभिमंत्रितं ॥ भक्ष्यं वान्नं तथा पेयं विषमप्यमृतं भवेत् ॥ चंद्रसूर्यग्रहे पूर्वमुपोष्य विनाशुचिः ॥ यावद्ग्रहणमोक्षं तु तावन्नद्यां समाहितः जपेत्समुद्रगामिन्यां मोक्षे ग्रहणस्य तु ॥ स्वष्टोत्तरसहस्रेण पिवेद्ब्राह्मीरसं वुधः ॥ सेहि कीलभंते मेधां सर्वश्रुतिवहां शुभां ॥ सारस्वती भवेद्दिव्यतस्य वागतिमानुषी ॥ ग्रहनक्षत्रपीडासु जपेद्रत्नपायुतं नरः ॥ हुत्वा चाष्टसहस्रं तु ग्रहपीडा विनश्यति ॥ दुःस्वप्नदर्शने स्नात्वा जपेच्चैवायुतं नरः ॥ घृतेनाष्टशतं हुत्वा सद्यः शांतिर्भविष्यति ॥ चंद्रसूर्यग्रहे लिंगसमनभ्यर्च्य यथाविधि ॥ यत्किंचित्प्रार्थयेद्देवि जपेदयुतमादरात् ॥ सन्निधौ तस्य देवस्य शुचिः संयतमानसः ॥ सर्वान्कामानवाप्नोति पुरुषो नात्र संशयः ॥ गजानां तुरगानां तु गोतीनां तथैव च ॥ व्याध्यागमे शुचिर्भूत्वा जुहुयात्समिदाहुतिं ॥ मासमनभ्यर्च्य विधिवद्युतं भक्तिसंयुतः तेन कांतिश्च शांतिश्च भविष्यति न संशयः ॥ उत्पाते शत्रुवाधायां जुहुयादयुतं शुचिः ॥ पलाशसमिधां यस्तु तस्य शांतिर्भविष्यति ॥ अभिचारिकं संध्यायासेनद्वेवि समाचरेत् ॥ यज्ञं शयति तच्छक्तिं शात्रुस्तस्य मरिष्यति ॥ विद्वेषणार्थं जुहुयाद्विभीतसमिधाष्टकं ॥ प्रायश्चित्तं

चवक्ष्यामिसर्वपापविनाशनं॥ तस्यशुद्धिंयथाशक्त्यसंपम्यकर्तुमशुद्ध्यतोनरः॥ पापशुद्धिर्नचेत्तस्यसः क्रियाःसर्वाश्चनिःफलाः
तन्नसाधयतेयस्मात्कर्तव्यंपापनाशनं॥ विद्यालक्ष्मीविशुद्ध्यर्थंमाध्यात्वांजलिनाशुभे॥ शिवेनैकाग्रचित्तः सन्नभिषिंचेत्स
मंततः॥ अष्टोत्तरशतेश्चैवस्नायात्पापविशुद्धये॥ सर्वतीर्थफलंतच्चसर्वपापहरंपरं॥ संध्यापानविद्धेदीजपेद्दशशतंबुध॥ वि
ड्वराहैश्चचाण्डालैर्माजीरैः कुक्कुटैरपिस्पृष्टमत्वेतमंत्रंजीयान्तत्रचाष्टशतंजपेत्॥ ब्रह्महत्याविशुद्ध्यर्थंजपेल्लक्षायुतंनरः॥ पा स३
तकानांतदर्धंस्यान्नात्रकार्याविचारणा॥ उपपातकयुक्तानांतदुर्धंपरिकिर्त्तितं॥ शेषाणामपिपापानांजपेत्तचसहस्रकं
आत्मावबोधपरमः शिवरूपप्रसाधक॥ जिन॥ श्वासोजयेत्मंत्रंयंचलक्षमनाकुलः॥ पंचवायुजयंभद्रेप्राप्नोतिमनुजःस
खी॥ योजपेत्तंचलक्षंतुनिगृहीतेंद्रियःशुचिः॥ पंचेन्द्रियाणांविजयोभविष्यतिवरानने॥ पंचविंशतितत्वानांविजयंमनुजो
लभेत्॥ मध्यरात्रेनिवातेतुजपेद्युःतमादरात्॥ सद्वस्रसिद्धिमाप्नोतिइहैवानेनसुंदरि॥ जपेल्लक्षमनालस्योविवादेषुनिव
र्जितं॥ मध्यरात्रेशिवज्योत्स्नापश्यत्येवनसंशयः॥ सर्वसंपत्समृद्ध्यर्थंजपेद्युत्रमात्मवान्॥ सजीवसंपुटंमंत्रंशतेलक्षंजपेच्छु
चिः॥ मत्सायुज्यमवाप्नोतिभक्तिमात्मत्परःपरं॥ ॥लिंगपुराणे॥ अथमंत्रस्यवक्ष्यामिऋषिश्छंदोधिदेवतं॥ बीजंशक्तिंस्वरवर्णा
स्थानेचैवाक्षरंप्रति॥ वामदेवानामऋषिःपंक्तिश्छंदउदाहृतं॥ देवताशिवस्वाहंमंत्रस्यास्यवरानने॥ नकारादीनिवीजानि

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

पंचभूतात्मकानि च ॥ आत्मानं चरणं विद्धि सर्वव्यापिनमव्ययं ॥ शक्तिस्त्वमेव देवेशि सर्वदेवनमस्कृता ॥ त्वदीयं चरणं चैके चिन्म
दीयं चरणं तथा ॥ त्वदीयं देवि मंत्राणां शक्तिभूतं न संशयः ॥ ॐकारस्य स्वरोदात्तो ऋषिर्ब्रह्मासिताभिधं ॥ छंदो देवी च गायत्री पर
मात्माधिदेवता ॥ उदात्तः प्रथमस्तावच्चतुर्थश्च द्वितीयकः ॥ पंचमः सप्तमश्चैव मध्यमो निषधस्तथा ॥ नकारः पीतवर्णोस्य
स्थानं पूर्वमुखं स्मृतं ॥ इंद्राधिदैवतं छंदो गायत्री गौतमो ऋषिः ॥ मकारः कृष्णवर्णोस्य स्थानं वै दक्षिणामुखं ॥ छंदो नुष्टुप् ऋषि
श्चात्री रुद्रो दैवतमुच्यते ॥ शिकारो धूम्रवर्णोस्य स्थानं वै पश्चिमं मुखं ॥ विश्वामित्रो ऋषिस्त्रिष्टुप्छंदो विष्णुश्च दैवतं ॥ वाकारो
धूम्रवर्णोस्य स्थानं वै चोत्तरं मुखं ॥ ब्रह्मा च दैवतं छंदो बृहती वांगिरा ऋषिः ॥ यकारो रक्तवर्णोस्य स्थानमूर्ध्वमुखं विराट् ॥ छंदो ऋ
षिर्भरद्वाजः स्कंदो दैवतमुच्यत इति ॥ ॥ तथा सारसंग्रहे ॥ इत्थं शिवं समभ्यर्च्य सहस्रं नित्यशो जपेत् ॥ सर्वपापविनिर्मुक्तः
प्राप्नुवांछितां रमां ॥ सहस्रद्वयजापेन महारोगैः प्रमुच्यते ॥ सहस्रत्रयजापेन दीर्घमायुर्लभेन्नरः ॥ चतुःसहस्रजापेन वांछि
तार्थं न वाप्नुयात् ॥ तिलैश्चैव घृतान्यक्तैर्हुनेदुत्पात्तसंभवात् ॥ रोगा विनश्यंत्यचिरान्नात्र कार्या विचारणा ॥ प्रजपेत्तच्चल
क्षं यः स शिवो नात्र संशयः ॥ नादीनां पंचवर्णानां ऋषयोमी मताः क्रमात् ॥ गौतमोत्रि द्वितीयः स्याद्विश्वामित्रोंगिरास्त
था ॥ भरद्वाजश्च गायत्री सानुष्टुप्त्रिष्टुवेव च ॥ बृहती स विराट् छंदांसीहमतानि वै ॥ इन्द्ररुद्रहरिब्रह्मस्कंदा देवाः प्रकीर्त्तिता

एषामाद्यः पूर्ववत्स्याद्वर्णः पीतोसितस्तथा ॥ धूम्रपीतारुणाज्ञेयाएवंपंचानवोमताः ॥ एषामाद्यः तादीनामाद्यः प्रणवः सः पूर्ववस्या
त्पुरुषस्यबोधकः ॥ इत्यर्थ ॥ अथ च पूर्वोक्तमुन्यादिकथ्यस्यात् तथाचऋषिर्ब्रह्मासमुद्दिष्टोगायत्रीछंदईरितं ॥ देव्यादिकेदेवता
स्यपरमात्मासमीरितः ॥ ज्योतिवर्णः समाख्यातोमोक्षार्थेविनियुज्यतेइत्यादि ॥ ॥इतिपंचाक्षरविधिः॥ अथनंदिकेश्वरमंत्र
श्वराणांनंदिन्प्रवक्ष्यामिमंत्रांतरमुमापते ॥ अष्टमांत्यंसप्तमस्यद्वितीयार्णंसमेलिखेत् ॥ आद्यवर्गतृतीयार्णोयान्त्यार्णपरिमंडि
तं ॥ मायाबीजमिदंवत्सत्रिषुलोकेषुदुर्लभं ॥ अनेनाद्यंतयोर्युक्तः पंचार्णः सप्तवर्णकः ॥ षडर्णश्चाष्टवर्णः स्यादेवंमंत्रद्वयंभवेत् ॥
अष्टमांत्यंहकारः सप्तमद्वितीयार्णस्तेनोपरिस्थितं आद्यवर्गतृतीयवर्णइकारस्तस्योपांत्योविंदुस्ताभ्यांयुक्तंलिखेत् ॥ तेनमायाबी
जसिद्धं ॥ ॥तथाऋषिरुक्तोवामदेवः पंक्तिश्छंदउदाहृतं ॥ उमापतिर्देवतास्यान्मंत्रयोर्जगदीश्वरः ॥ तारषड्दीर्घमायाद्यपूर्वैमं
त्रार्णकैः क्रमात् ॥ षडंगानिगणाश्चैवजातियुक्तानिकल्पयेत् ॥ वंधूककुसुमारक्तंचंद्रार्द्धकृतशेखरं ॥ दक्षिणोर्द्धकरेशूलंतद
धोवरमुद्रिका ॥ वामार्द्धेनकपालंतदधोहस्तेनचाभयं ॥ दधानंनिजवामोरुपीठस्थायागणेश्वर ॥ रक्तोत्पलकरायाश्चश्लिष्टेनवाम
वाहुना ॥ सर्वाभरणसंदीप्तंदेवंदेव्यामुदान्वितं ॥ स्मेरवक्त्रंत्रिनयनंसर्वाभरणभूषितं ॥ एवंध्यात्वायजेद्देवंप्राक्प्रोक्तेशैवविष्टरे ॥ पद्मंच
दलंकृत्वातद्बहिश्चाष्टपत्रकं ॥ बहिरष्टच्छदाम्भोजंचतुरस्रत्रयंबहिः ॥ वीथीद्वयसमोपेतंचतुर्द्वारोपशोभितं ॥ अस्मिन्पीठेयजेद्

वेमन्त्रिसंकल्पा मूलेन ॥ सर्वोपचारैराराध्यब्राग्वदंगानि पूजयेत् ॥ रुद्रेखांगगनांरक्तां महोछुष्मांकरालिकां ॥ पूजयेन्नवपत्रेषु वहिर
ष्टदलेपुनः वृषभंक्षेत्रपालंचचण्डेश्वरमनंतरं दुर्गांचषण्मुखपश्चान्नंदिनंविघ्ननायकं ॥ सेनापतिंततोवाप्यजेदष्टदलेष्विमाः
ब्राह्म्याद्यामातरस्तासुब्राह्मी माहेश्वरीततः ॥ कौमारीवैष्णवीचैववाराहीतदनंतरं ॥ ऐंद्रीचषष्ठीचामुण्डा महालक्ष्मीरितिक्रमा
त् ॥ लोकपालानदशाशास्वनुरस्तांततरालये ॥ एवंसंपूज्यदेवेशंनियमेनजितेंद्रियः ॥ लक्षत्रयंजपेन्मन्त्रार्द्धंतत्सहस्रंसमिद्वरैः
आरग्वधतरूद्भूतैस्तत्पुष्पैर्वाहुनेत्ततः ॥ मधुरत्रयसंसिक्तैस्तर्पणादिततश्चरेत् ॥ प्रागुक्तेनविधानेनततः सिद्धोभवेन्मनुः
सौभाग्यसंपत्पुष्यपुत्रपौत्रादिवर्द्धनः ॥ देहांतेचगणश्रेष्ठशिवमाप्नुत्सभवेत् ॥ अथप्रयोगः ॥ तत्रप्रातः कृत्यादियो
गपीठन्यासांतंप्रागवत्कृत्वाशिरसिवामदेवायऋषयेनमः ॥ मुखेपंक्तिश्छंदसेनमः ॥ हृदयेउमापतयेदेवतायनमइति
विन्यस्यममसर्वाभिष्टसिद्धयेविनियोगः ॥ इतिकृतांजलिर्वदेत् ॥ ततः ॐ ह्रांॐहृदयाय ॥ ॐ ह्रींतंशिरसे ॥ ॐ ह्रूंमं
शिखायै ॥ ॐ ह्रैंशिंकवचाय ॐ ह्रौंवंनेत्राय ॐ ह्रः यंअस्त्रायफट् ॥ इतिषडंगमंत्रानंगुष्ठादितलांतकरयोर्विन्यस्यहृ
दयादिषडंगेष्वपिन्यसेत् ॥ ततोध्यानादिमानसपूजांतेप्रमारोक्तपूजाचक्रेतिर्मापार्घादिषष्पोपचारांतेप्रागवदंगा
निसंपूज्यपंचदलेषुदेवाग्रमारभ्यप्रादक्षिण्येन ॐ रुद्रेखायैनमः ॥ खंगगनायै रक्तायै महोछुष्मायै करालिका

ये॰ इतिसंपूज्याष्टदलेषुदेवाग्रमारभ्य॥ वृषभायनमः क्षेत्रपालाय॰ चण्डेश्वराय॰ दुर्गायै॰ षण्मुखायः नंदिने॰ विघ्ननायकाय॥
सेनापतये॥ इतिप्रादक्षिण्येनसंपूज्यततः बहिरष्टदलेषुदेवाग्रमारभ्यप्रादक्षिण्येन॰॥ ब्रांब्राह्म्यै॰ इंमाहेश्वर्यै॰ हुंकौमार्यै॰ ॠं
वैष्णव्यै॰ ऌंवाराह्यै॥ ॡंइन्द्राण्यै॰ औंचामुण्डायै॰ अः॰ महालक्ष्म्यै॥ इतिसंपूज्यततः प्राग्वल्लोकपालार्चादिसर्वंसमापयेदिति
तथा॥ शृणुनंदिन्प्रवक्ष्यामिप्रासादाख्यंमहामनुं॥ यस्यस्मरणमात्रेणजनःसाक्षाच्छिवोभवेत्॥ अष्टमस्यांत्यवर्णा
स्तुप्रथमांत्यादिसंयुतः॥ तदादिस्वरसंयुक्तः कथितोवैमहामनुः॥ धर्मार्थकाममोक्षाणांसाधनेमुनिसेवितः॥ अष्टमांत्य
वर्णोहः प्रथमांत्यादिरनुस्वारस्तदादिस्वरऔकारस्ताभ्यांयुक्तस्तेनप्रासादबीजमुद्धृतं॥ प्रमादकरणाच्छीघ्रमस्यप्रासादना
मता॥ वामदेवोमुनिर्वृत्तंपंक्तिश्छंदउदाहृतं॥ सदाशिवोदेवतास्यमंत्रस्यपरिकीर्त्तितः॥ षट्कलाढ्येनबीजेनषडंगानिप्रविन्य
सेत्॥ प्रथमाद्यन्ततीयेनरुद्रादित्योत्तरस्वरैः॥ अष्टमांतानुसंभेद्यप्रथमोपांत्यसंयुतैः॥ विलोमगैः पंचबीजैरीशानाद्याःप्रवि
न्यसेत्॥ प्रथमाद्यमित्यादिप्रथमाद्यंस्वरान्तीयंह॥ इउऊ॰ रुद्रए॰। आदित्योत्तरस्वरोऽभिर्वैदितमष्टमांत्यंहकार॥ प्रथमोपांत्या
विंदुस्तेनहंहिंहुंहेंहोंइतिविलोमगैः होंहें॥ इत्यादिभिः मूर्त्तीरीशानश्चाद्यः स्यात्ततस्तत्पुरुषाह्वयः॥ अघोरोवामदेवश्चसद्यो
जातश्चपंचमः॥ अंगुष्ठादिष्वंगुलीषुमूर्द्धिवक्त्रेहृदिन्यसेत्॥ गुह्येचपादयोश्चाथपंचवक्त्रेषुतान्पुनः॥ उर्द्धादिषुगणाश्चेष

ततोदेवंविचिंतयेत्तत्रमुक्ताविद्रुमघनस्वच्छारुणावर्णैस्तुपंचभिः॥ वदनैःशोभितंवत्सघ्रनिवद्धंत्रिलोचनं॥ चंद्रावतंसविल
सज्जटामुकुटमंडितं॥ शुद्धस्फटिकसंकाशंममासीनंसरोरुहे॥ प्रसन्नवदनंध्यायेद्धानंकुरपंकजैः॥ दक्षिणैस्त्रिशिखंटंकंव
ज्रखड्गंतथानलं॥ सर्प्पंघंटांसृणिंपाशमभयंवामवाहुभिः॥ नानाभरणसंदीप्तंध्यायेद्देवंसदाशिवं॥ इत्थंध्यात्वागणश्रेष्ठ
पूर्वोक्तेयोगविस्तरे॥ पंचाक्षरोक्तवत्कृत्वापूजामण्डलसंचच॥ मूलेनमूर्त्तिंसंकल्प्यतस्यामावाह्यपूजयेत्॥ उपचारैःसम
भ्यर्च्ययजेदावृत्तिदेवताः॥ प्रथमेष्टदलेवत्समघोरादीन्पंचपूजयेत्॥ वेदाक्षमालाभीतीष्टहस्तंकुंदेंदुसंन्निभं॥ चतुर्वक्त्रंत्रिनय
नंसद्यंपश्चिमतोयजेत्॥ काश्मीरवर्णाभीतीष्टकंकाक्षस्त्रक्करःशुभः॥ त्रीक्षणश्चतुरास्यश्चविलासीचोत्तरेस्थितः॥ पूज
नीयोवामदेवश्चाघोरंदक्षिणायजेत्॥ अक्षमालांवेदपाशौसांकुशांडमरुंकरैः॥ खट्वांगंत्रिशिखंचैवकपालंदधतंक्रमात्
अंजनाभंभीमदंष्ट्रंत्रिनेत्रंचतुराननं॥ प्रदीप्तविद्युद्धेमाभंपूर्वेतत्पुरुषंयजेत्॥ हस्तैर्विद्यावराभीतिकुठारान्दधतंक्रमात्
चतुर्वक्त्रंत्रिनयनंनागयज्ञोपवीतिनं॥ ईशानंपूजयेन्मध्येपंचवक्त्रंगणेश्वर॥ मुक्तागौरंत्रिनयनंबाहुभिर्दशभिर्न्निजैः॥ ध्यान
मक्षस्रस्रुक्पाशांकुशसमाह्वयान्॥ डमरुंचैवखट्वांगंत्रिशूलंवज्रकपालकं॥ अभयंवरदंचैवकोणपत्रेषुपूजयेत्॥ ततोरूपा
णिहन्नाद्यास्त्वास्तत्यांमध्यतोयजेत्॥ पुरोक्तवत्षडंगानिपूजयेन्नंदिकेश्वर॥ अनंताद्यानुमाद्यायजेदष्टदलद्वये॥ पूर्ववत्

लोकपालांश्च तदस्त्राणि च पूजयेत्॥ यस्त्वेवं पूजयेद्देवं स साधकस्थिरमानस॥ भुंक्ते सं भोगानखिलान्ते ह्यांते शिवतां व्रजेत्॥ ॥अथ प्रयो
गः॥ तत्र प्रातःस्नानहृन्यानादियोगपीठन्यासांते मूलमंत्रेण प्राणायामं त्र्यं कृत्वा शिरसि वामदेवऋषये नमः मुखे पंक्तिश्छन्दसे नमः॥ हृदये
श्रीसदाशिवाय देवतायै नमः॥ गुह्ये हं बीजाय पादयोः औं शक्तये नमः॥ इति विन्यस्य मम सर्वाभीष्टसिद्धये जपे विनियोग इति कृतां
जलिवदेत्॥ ततः हां हृदयाय नमः॥ ह्रीं शिरसे· हूं शिखायै· हैं कवचाय· हौं नेत्राय· हः अस्त्राय फट्॥ इति मंत्रानंगुष्ठादिकरतलांतं कर
योर्विन्यस्य हृदयादिनेत्रांतं विन्यस्तास्त्रमंत्रेण तालत्रयं तर्जन्यंगुष्ठोत्थशब्देन दशदिग्बंधं च कृत्वांगुष्ठयोः हों ईशानाय नमः॥ तर्ज
न्योः हें तत्पुरुषाय॥ मध्यमयोः हुं अघोराय· अनामिकयोः॥ ह्रिं वामदेवा· हं सद्योजाताय· इति विन्यस्यैव शिरोवदनहृद्गुह्यपादेष्वपि वि
न्यशिरसि हों ईशानायोर्ध्ववक्त्राय· मुखे हें तत्पुरुषाय पूर्वपश्चिमवक्त्राय नम इति॥ दक्षकर्णे हुं अघोराय· दक्षिणवक्त्राय· वामकर्णे· ह्रिं वा
मदेवायोत्तर॥ चूडाधः हं सद्योजाताय पश्चिमवक्त्राय नमः॥ इति विन्यस्य ध्यानादि मानसपूजांते पंचाक्षरोक्तं पूजां विधाय चक्रं
विधाय अर्घस्थापनादि पुष्पोपचारांते॥ अथ मेष्टदले हं सद्योजाताय वामदले हिं वामदेवाय॥ दक्षिणदले हुं अघोराय· अग्रद
ले हें तत्पुरुषाय· कर्णिकायां देवस्याग्रे· हों ईशानाय नम इति संपूज्याग्नेयादिदलेषु मध्ये च निवृत्त्याद्याः संपूज्य ततः प्राग्वत्षडंगानि

संपूज्यानेनादिपूजामारभ्यपंचाक्षरोक्तवत्सर्वंसमापयेदिति ॥ तथा ॥ लक्षद्वयंजपेन्मंत्रंहविष्याशीजितेन्द्रियः ॥ पंचविंशतिसाह
स्रंसमेतंकरवीरजैः ॥ जवापुष्पैस्तुपद्मैर्वातर्पणादिततश्चरेत् ॥ इति ॥ अथनंदिन्यवक्ष्यामिमंत्रमष्टाक्षरंशुभं ॥ प्रथमस्य
तुवर्गस्यांत्यवर्णसमन्वितं ॥ तद्वयोदशवर्णेतुप्रथमार्णमिदंभवेत् ॥ मायाबीजंद्वितीयंस्यात्प्रासादाख्यंतृतीयकं ॥ पंचा
क्षरस्ततःपश्चादेवमष्टाक्षरोमनुः ॥ प्रथमवर्गीयांत्योनुस्वारस्तत्त्रयोदशाउँकारस्तेनत्रराघवउद्धृतः ॥ प्रथमार्णमंत्रस्येति ॥ वा
मदेवऋषिःपंक्तिश्छंदःसदाशिवोदेवता ॥ मायाप्रासादबीजाभ्यांभेदितान्यांस्वरैरथ ॥ षड्भिःकुर्यात्षडंगानिमंत्रवर्णैःसज्ञानिभि
ध्यायेदेवंततोवत्सहृदिचैकाग्रमानसः ॥ सिंदूरपुंजशोणांगंस्मेरवक्त्रंत्रिलोचनं ॥ मणिमौलिलसच्चंद्रकलालंकृतमस्तकं ॥ द
क्षिणोर्द्धकरेटंकंदधानंतदधोवरं ॥ वामोर्द्धहस्तेहरिणंतदधःकरमादरात् ॥ पीनस्तनद्वयेनोत्तुंगस्तनाग्रेविनिवेश्यच ॥ वामांकेसं
निविष्टायाःप्रियायारक्तपंकजं ॥ दधत्यादक्षिणेहस्तेवासीनंरक्तपंकजे ॥ नानाभरणसंदीप्तंदिव्यगंधस्रगंबरं ॥ एवंध्यात्वाग
राश्रेष्ठपूर्वोक्तेपूजयेद्विभुं ॥ योगपीठेसमावाह्यगंधपुष्पाक्षतादिभिः ॥ पंचाक्षरोक्तविधिनापूजायंत्रंप्रकल्प्यच ॥ तत्रोक्ते
नविधानेनयजेन्मूर्तीःकलाश्चताः ॥ ततोंगानिसमभ्यर्च्यानंतादीनष्टमादिकान् ॥ लोकेशांश्चततस्त्राणिपूजयेद्वत्सपूर्ववत् ॥
अनेनविधिनायस्तुशिवमाराधयेत्सदा ॥ पुत्रपौत्रधनैश्वर्यभोगमोक्षान्सविंदति ॥ ॥ अथप्रयोग ॥ तत्रप्राग्वद्योगपीठस्था

सांतेपंचाक्षरोक्तन्यासादिकंविन्यस्यह्रांह्रांॐहृदयायनमः॥ह्रींह्रींनेंशिरसे·हूंहूंसंशिखा·इत्यादिषडंगन्यासंविधाययथोक्तरूपंदेवं
ध्यात्वामानसयज्ञादिपंचाक्षरोक्तवत्सर्वंकुर्यादिति॥ ॥तथा॥दक्षिणामूर्तिमंत्रस्यविधानंनंदिकेश्वर॥प्रवक्ष्यामिगणश्रेष्ठमं
त्रोद्धारउरःसरं॥पंचमस्यतृतीयार्णःप्रथमःप्रथमस्यतु॥तृतीयार्णयुतोवत्सद्वितीयाद्योष्टमस्यच॥द्वितीयार्णयुतश्चाथच
तुर्थस्योगणाधिप॥प्रथमस्यद्वितीयार्णयुतोन्त्यःषष्ठवर्गजः॥आद्यषष्ठसमायुक्तःपंचमाद्यस्ततःपरे॥सप्तमस्याद्विती
यार्णोरूढस्तस्यादिमस्ततः॥आद्यैकादशसंयुक्तःप्रथमोप्यंत्यसंपंचामाद्यस्ततःपुनः॥आद्यपंचमसंयुक्तस्तृतीयाषष्ठवर्गजः
सप्तमाद्यःसमायुक्तःप्रथमोप्यंत्यसंयुतः॥सप्तमोन्त्यस्ततोवत्सचतुर्थाद्यस्ततःपरं॥षष्ठस्यपंचमस्त्वाद्यषष्ठवर्णसमन्वितः॥
सप्तमस्यतृतीयोथपंचमान्त्यस्ततपरं॥आद्यवर्गतृतीयार्णसमेत्यःसप्तमांत्यक॥आद्यद्वितीयसंयुक्तस्त्वष्टमस्यतृतीयकः॥प्र
थमस्यतृतीयार्णसमेतस्तदनंतरं॥आद्यैकादशसंयुक्तःपंचमस्यतुपंचम॥सप्तमाद्यसमायुक्तःपंचमस्यचतुर्थकः॥आद्य
द्वितीयसंयुक्तंपंचमान्त्यस्ततःपरे॥आद्यद्वादशसंयुक्तोद्वितीयाद्यस्ततःपुनः॥पंचमान्त्यस्ततोवत्सआद्यस्तृतीयसंयुतः॥सप्तम
स्यद्वितीयोथपंचमाद्यस्ततःपरे॥आद्यद्वितीयसंयुक्तस्तस्यपंचदशान्वितं॥द्वितीयस्यतृतीयोथप्रथमस्यद्वितीययुक्॥
सप्तमाद्यस्ततोवत्सपंचमान्त्यस्ततःपरे॥षष्ठांतिमोथनेशिशाद्याद्यत्रयोदशान्वितः॥सप्तमस्यद्वितीयोथआद्यपंचमसंयुतः

नाज्ञातैरक्षिप्तकुसुमद्रुमे· शिलाविरनिर्गछन्निर्झरानिलशीतले ॥ गायद्भृंगांगनाशब्दैर्निनदद्भिः कदंबकैः ॥ कूजत्कोकिलसंघातैर्मुख
रीकृतदिङ्मुखे ॥ परस्परविनिर्मुक्तमात्सर्यमृगसेविते ॥ आद्यैः शुकाद्यैर्मुनिभिः रजस्रं समुपास्थिते ॥ पुरंदरमुखैर्देवैः सेवायातैरलंकृते
जलजैः स्थलजैः पुष्पैरामोदितैरलंकृतं शरणाङ्घ्रिर्वेदशास्त्राणि शुकवेदैर्निषेविते ॥ संसारतापविच्छेदकुशलच्छायमद्भुतं ॥ विचित्रस्य
मूलस्थं रत्नसिंहासने शुभे ॥ आसीनममलाकल्पं शरच्चन्द्रनिभाननं ॥ स्तूयमानमुनिगणौर्दिव्यज्ञानाभिलाषिभिः ॥ संस्मरेज्जगतामाद्यं
दक्षिणामूर्तिमव्ययं ॥ रजताद्रिप्रतीकाशंशुद्धस्फनामलच्छवि ॥ चंद्रखंडराजलसज्जटामकुटमंडितं ॥ वीरासनेसमासीनंनासालो
कनतत्परं ॥ सुप्रसन्नमुखाम्भोजंनयनत्रयशोभितं ॥ दक्षिणोर्द्ध्वकरे टंकं व्याख्यामुद्रामधः करे ॥ वामोर्द्ध्वहस्ते हरिणं दधानं तदधः क
रं ॥ वामजानुनि विन्यस्य निविष्टंशुभ्रपंकजे ॥ कक्षाबंधविशेषोर्ज्जस्फुरिणाथैरलंकृतं ॥ ध्यात्वैवं दक्षिणामूर्त्तिं मुनिवृंदसमन्वितं ॥
प्राक्प्रोक्ते पूजयेत्पीठे देवमावाह्य पूर्ववत् ॥ लिखेदष्टदलंपद्मंसर्वलक्षणसंयुतं ॥ अन्तर्वहिःस्वभावेन कर्णिकाकेसरोज्वलं ॥ चतुर्द्वा
रसमायुक्तं चतुरस्रत्रयावृतं ॥ अस्मिन्पीठे यदेद्देवप्राग्वदंगानि पूजयेत् ॥ प्रथमेष्टदलेवत्ससनकंचसनंदनं ॥ सनातनंचाथसनत्कु
मारंशुकमेवच ॥ जाबालिनंनारदंचव्यासमेतान्प्रपूजयेत् ॥ द्वितीयेनसूक्ष्मादीन्तृतीयेवृषभादिकान् ॥ वीथीद्वयेलोकपालांस्तद
स्त्राणिप्रपूजयेत् ॥ ॥अथप्रयोगः॥ तत्रप्राग्वद्योगपीठन्यासान्तेप्राणायामत्रयःपूर्वकं शिरसिशुकायऋषयेनमः मुखेऽनुष्टुप्छ

छंदसेनमः॥हृदयेश्रीदक्षिणामूर्त्तयेगुरवे·ॐवीजाय·पादयोह्रींशक्तये·इतिविन्यस्यममचतुर्विधपुरुषार्थसिद्धयेविनियोग॥इति
कृतांजलिर्वदेत्॥ततोमूलमंत्रेणाकरशुद्धिकृत्वाॐह्रींदक्षिणामूर्त्तयेह्रांहृदयायनमः॥ॐह्रींतुभ्यंह्रींशिरसे·ॐह्रींवटमूलनिवासि
ने·ह्रूंशिखा·ॐह्रांध्यानैकनिरतांगायह्रैंकवचा·ॐह्रींनमोरुद्रायह्रौंनेत्रा·ॐह्रींशंभवेह्रः अस्त्राय·इतिषडंगमंत्रानुच्चारिततलांतकर
योर्विन्यस्यहृदयादिषडंगेष्वपिन्यसेत्॥ततःशिरसिदंनमः भालेक्षिंनमः॥दक्षनेत्रेणां·वामेमूं·दक्षश्रोत्रेर्त्तं·वामेयं·दक्षगंडेतुं·
वामेभ्यं·आस्येटं·दक्षवाहुमूलेमूं·मध्येलं·मणिवंधेनिं·अंगुलीमूलेवा·वामवाहुमूलेसिं·मध्येनें·मणिवंधेध्या·अंगुलीमूलेनैं·गलेकं·
स्तनयोर्निं·हृदिरं·नाभौतां·कट्यांगां·गुह्येयं·दक्षोरुमूलेनंजानौमोंगुल्फेरुं·अंगुलिद्रांवामोरुमूलेयंजानुनिशं·गुल्फेभं·अंगुलिमूलेवें
नमः॥इतिविन्यस्यततोध्यानादिषडंगपूजांतेप्रथमाष्टदलमारभ्यप्रादक्षिण्येनसनकायनमः सनंदायनमः॥सनातनायनमः॥
सनत्कुमाराय·शुकाय·जावालये·नारक्षय·व्यासाय·द्वितीयेनताद्यान्·तृतीयेवृषभादिकानभ्यर्च्यब्राह्मल्लाकपालाद्यौदिसर्वसमाय
योदिति॥तथा॥इत्थंदेवंसमभ्यर्च्यप्रजपेद्पुनाष्टकं॥पुरश्चरणसिद्ध्यर्थंयथोक्तनियमान्वितः जुहुयाद्दशांशेनतिलैः·क्षीरपरि
प्लुतैः॥पायसेनाथवानंदितत्सघृतेनद्रव्येनता॥तर्पणादिततःकुर्याद्यथोक्तनियमान्वितः॥जुहुयात्दृतैर्विधानविधानवित्॥एवंसिद्धे
मंत्रोमंत्रीप्रयोगान्वाचरेद्यथा॥मासमेकंत्रिभिक्षाशीसहस्रंसाष्टकंजपेत्॥मंत्रप्रतिदिनंमंत्रीवैष्णवानश्नतेध्रुवं॥मूलमंत्रेणपुष्टितामान्तका

Nepal Sanskrit University, Balmiki Campus, Kathmandu

॥शिव॥
॥४२८॥

मंत्रवित्तमः॥ जलंस्पृष्ट्वाविधाजप्यपिवेदशाङ्गवेदकृवं॥ अखिलानांचशास्त्राणांव्याख्याताचमहाकवि॥ रोगपिप्पलिकाब्राह्मीवचासर्षपसैधवै॥ सुगधिड्वमसयुक्तैर्नंदिकेश्वरकल्कितै॥ ततकलकमहितैब्राह्मीरसेपक्कंवगोघृतं॥ अनेमंत्रवर्येणाप्रजप्तसपृताविधि॥ एतत्संसेवितकीर्तितकविताश्रीधृतिप्रदं॥ कांतिरक्षापुष्यदंवगदिनसर्वसिद्धिकृत॥ तथा॥ त्रयोदशार्णामुख्यत्यप्रथमस्यगणाधिपः॥ तस्यतृतीयवर्णेनसंयुक्तंपंचमस्यच॥ पंचमार्णाततोवत्सषष्ठस्याभंततोवदेत आद्यत्रयोदशार्णेनसंयुक्तंतदनंतरंषष्ठस्यचतुर्थार्णोद्वितीयस्यतृतीयकं॥ सप्तमांत्योतथोच्चार्यपमाघेतथोच्चरेत्॥ आद्येकाशरसंयुक्तंपूर्वमंत्रादिवर्णतः षडक्षराणिचोच्चार्यषष्ठम्यांत्यंततोच्चरेत्॥ अष्टमांत्यसप्तमाद्यसमेवनंदिकेश्वर॥ ॥प्रथमोपांत्यसहितंततःषष्ठस्यमंत्रमं॥ आद्यैकादशसंयुक्तंपंचमस्यचतुर्थकं॥ ॥आद्यद्वितीयोपांत्याभ्यासंयुक्तंतदनंतरंषष्ठम्याद्यंसप्तमस्यद्वितीयेनसमन्वितं॥ ॥सर्वमाद्यंततोवत्सतृतीयस्यद्वितीयकं॥ सद्यंतवाष्टमस्याथतृतीयसप्तमात्ययुक्॥ ॥आद्यद्वितीययुक्तंचततोत्यस्यांत्यमक्षरं॥ आद्यद्वितीयसंयुक्तंमंत्रोद्वाविंशदक्षरम॥ प्रथमस्यत्रयोदशार्णाॐकारस्तस्यप्रथमस्यत्रयोदशार्णोनुस्वारः॥ तद्युक्तस्तेनमोइति॥ षष्ठस्यचतुर्थेर्णोमकारः॥ द्वितीयस्यतृतीयंगकारः॥ सप्तमांत्यंवकारः॥ पंचमांत्यंतकारः॥ आद्यैकादशएकारस्तद्युक्तस्तेननतेइति॥ ॥पूर्वमंत्रा

॥राम॥
॥४२८॥

दितः षडक्षराणि ॥ पूर्वोद्धृतद्वात्रिंशदक्षरमंत्रस्य प्रणवमायाविधुरस्यादितः दकारमारभ्य षडक्षराणि दक्षिणामूर्त्तये इत्येवंरूपाणि ॥ षष्ठ
स्यांत्यं मकारः ॥ अष्टमांत्यं हकारः सप्तमाद्यं यकारः ॥ अथमोपान्त्यो विंदुः ताभ्यां युक्तस्तेन मह्य इति षष्ठपंचमो मकारः ॥ अथैकादश एका
रस्तद्युक्तस्तेन मे इति ॥ पंचमस्य चतुर्थो धकारः ॥ आद्यद्वितीयोपान्त्याभ्यां आकारविंदुभ्यां युक्त ॥ तेन धामिति ॥ षष्ठस्याद्यं पकारः सप्तमद्विती
यो रेफः ॥ तद्युक्तस्तेन प्र इति ॥ सप्तमाद्यं यकारः ॥ तृतीयस्य द्वितीयं छकारः ॥ सप्तमे सप्रयात्नोच्चारं द्वित्वं घातकोच्चार्यमित्यर्थः ॥ अष्टमस्य तृती
यसकारः ॥ आद्यद्वितीयं आकारस्तद्युक्तस्तेन स्वा इति ॥ अंत्यस्यांत्यं दकारः ॥ आद्यद्वितीय आकारस्तद्युक्तस्तेन हा इति ॥ अत्र केचिदस्मि
न्मंत्रे मेधामिति पदं त्यक्त्वा तत्स्थाने प्रज्ञामिति पदं वदंति ॥ मेधास्थाने स्त्ररयोस्य प्रज्ञापदमथो विरेमं वतत्रप्रकाशवचनादिति तथा ॥ ऋषि
र्ब्रह्मा समुद्दिष्टो गायत्री छंद ईरितं ॥ देवता श्री महादेवो दक्षिणामूर्त्तिसंज्ञकः ॥ प्रणवं प्रोच्यते वीजं स्वाहा शक्तिरिति स्मृता ॥ मेधापदं कीलकं
स्यात्पुरुषार्थे नियोज्यते ॥ तारं रुद्रैः स्वरैर्दीर्घैः षड्भिरंगानि कल्पयेत ॥ शिरोभ्रूमध्यदेशेषु हृदि नाभौ च गुह्यके ॥ जान्वोश्चरणयोर्न्यसेत्पद
निक्रमशः सुधीः ॥ मूर्ध्नि पश्चाल्ललाटे च चक्षुषोः श्रोत्रयोस्तथा ॥ नासापुटद्वये पश्चादोष्ठयोर्दन्तयोरपि ॥ जिह्वायां चिबुकाये च अंशयोर्युग
ले गले ॥ बाह्वोश्च हृदये चैव नाभौ गुह्यपदे तथा ॥ ऊर्वोर्जान्वोश्च जंघायां पादपाणियुगे तथा ॥ सर्वांगेषु च विन्यस्येन्मंत्रवर्णानतंद्रितः ॥ एवं
न्यस्ततनं मंत्री ध्यायेद्देवं मनन्यधीः ॥ ध्यानं ॥ अकलंकं शरच्चंद्रनिभमंभोजमध्यगं ॥ गंगाधरं लसच्चंद्रकलेखासितशेषरं ॥ प्रसन्नवद

नाभोजं सुस्मृताननं दिव्याम्बरधरं दिव्यगन्धमाल्यैरलंकृतं ॥ नानारत्नमयाकल्पमहिकक्षाविभूषितं ॥ मुक्ताक्षमालां दक्षोर्द्ध ज्ञानमुद्राम
धःकरे ॥ दधानं चिये त्वं दिग्मुनिवृंदनिषेवितं ॥ अपस्मारशिरःपीठमलवामांघ्रिपंकजं ॥ एवं ध्यात्वा गणश्रेष्ठ पूर्वोक्ते शैवपीठके ॥ रत्नत्रयसंमो
पेते भूगृहत्रितयान्विते ॥ चतुर्द्वारसमायुक्ते देवमावाह्य पूजयेत् ॥ आसादवगानि संपूज्य केसरेषु यथाक्रम ॥ स्वराण्षोडशानं दिशान्द्वंद्वशः केशः के
सरस्थितान् ॥ यजेद्दुर्गाष्टकं पश्चादष्टपत्रेषु मंत्रवित् ॥ द्वितीयेष्टदले वत्ससरस्वत्यादिकान्यजेत् ॥ सरस्वती चतुर्वक्त्रः सनकश्च सनंद
नं ॥ सनातनस्ततो वत्ससनपूर्वकुमारकः ॥ शुको व्यासश्च संपूज्य तृतीयेष्टदले पुन ॥ पार्वती शुभगा भद्रा क्रिया शांतिस्तथैव च ॥ रौद्री काली
वह्वभेति दक्षिणामुत्त्रशक्तये ॥ चतुरस्त्रचतुष्कोणेष्वग्न्यादीशांतमर्चयेत् ॥ सिद्धगंधर्वयोगींद्रविद्याधरगणानपि ॥ इन्द्रादींश्चनदस्त्राणी
प्राग्वद्वीथीद्वये यजेदिति ॥ ॥ अथयोग ॥ तत्र प्राग्वत्स्नातकृत्यादीयोगपीठन्यासांते मूलेन प्राणायामं त्रयं कृत्वा शिरसि ब्रह्मणोऋषये
नमः ॥ मुखे गायत्रीछंदसे नमः हृदये श्रीदक्षिणामूर्त्तये देवतायै नमः ॥ गुह्ये प्रणवाय बीजाय नमः ॥ पादयोः स्वाहा शक्तये नमः ॥ नाभौ मेधा
कीलकाय ॥ इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनियोगः ॥ इति कृतांजलिर्वदेत् ॥ ततः ॐ आं ॐ हृदयाय ॐ ईं ईं शिरसे। ॐ ऊ
ऊं शिखा। ॐ ऐं ॐ कवचा ॐ औं ॐ नेत्राय। ॐ अः। ॐ अस्त्राय। ॥ इति षडंगमंत्रानंगुष्ठादितरनलांते विन्यस्य हृदयादिषडंगेष्वविन्यसेत् ॥
ततः शिरसि ॐ नमः ॥ भ्रूमध्ये नमो नमः ॥ वक्त्रे भगवते। हृदि दक्षिणामूर्त्तये। नाभौ गुह्यं। गुह्ये मेधा। जान्वोः प्रयच्छ। पादयोः स्वाहा ॥ शि

रसि ॐ भाले नं नेत्रयोः मो कर्णयोर्भं· नासापुटयो ॥ गं· ओष्ठयोः वं दंतपंक्त्योः ते· जिह्वायां दंः चिबुकाग्रे ॥ क्षि शंख्यो· णां गले मू बाह्वोर्त्तं हृदये
यं· नाभौ मं· गुह्ये ह्यं गुदे मः ऊर्वोः धां· जान्वोः प्रः जंघयोः य· पादयोः छं· पार्श्वयोः स्वा· सर्वांगे हा नम ॥ इति विन्यस्य प्राग्वद्ध्यानादि पुष्पोपचारांते प्रा
ग्वदंगानि संपूज्य प्रथमाष्टदलकेसरेषु ॥ अं आं नमः ईं ईं उं ऊं ऋं ॠं· लृं ॡं· एं ऐं· ओं औं ॥ अं अः नमः इति प्राग्वद्देवाग्रमारभ्य प्रादक्षिण्येन
संपूज्य ॥ तद्दलेषु तथैव· कं खं गं घं ङं नमः ॥ चंटंपंयं५ शं५ लं क्षं नम ॥ इति संपूज्य· द्वितीयाष्टदले तथैव· सरस्वत्यै· ब्रह्मणे· सनकाय· सनं
काय ॥ सनातनाः सनत्कुमाराः शुकायः व्यासाय ॥ तृतीयाष्टदले तथैव· पार्वत्यै· सुभगायै· भद्रायै· क्रियायै· शांत्यै· रौद्र्यैः काल्यै ब्राह्म्यै ॥ इति
संपूज्य· पद्मचतुष्कोणयोरंतरालस्थकोणचतुष्के आग्नेयादि ॥ सिद्धगणेभ्यो· गंधर्वगणेभ्यो ॥ योगिन्द्रगणेो विद्याधरगणो इति संपूज्य ॥ प्रा
ग्वल्लोकपालपूजादि सर्वं समापयेदीति तथा ॥ एकलक्षं जपेन्मंत्रं ततद्दशांशं हुनेदथ क्षीराभ्यक्तैस्तिलैः पद्मैः पायसैर्वा घृतप्लुतैः ॥ तर्प
णादितनः ॥ कुर्याद्यथोक्तविधिना सुधीः ॥ मंत्रवर्यप्रसाध्यैवं काम्यकर्माणि साधयेत् ॥ कंठमंत्रोदके स्थित्वा जपेन्मंत्रं सहस्रकं चैव सर्वरोग
विनाशनं ॥ त्रयोदश्यां प्रदोषेषु सोपवासः शिवालये ॥ सोगत्वार्चयेद्देवविद्यापूर्वं हृदयेन घृ ॥ आज्येन पायसान्नेन वा कामः सर्वदा हुनेत्
श्रीकामः पद्मबिल्वैर्वा नगावर्त्तैः ॥ सदा हुनेत् ॥ आज्यक्षीराक्तदूर्वाभिर्हुत्वा दद्याच्च दक्षिणां ॥ एवं गां च महिषीं तस्य मृत्युभयं कुतः ॥ आ
दित्याभिमुखो दद्यादंजलीनां जलैर्दश ॥ मूलमंत्रेण मंत्रज्ञः सर्वदोषैर्न बाध्यते ॥ प्रातः सायं च सप्तैव मध्याह्ने चैव विंशति ॥ दुग्धं तु ध्यात्

लैर्द्देवंतर्पयेच्चहुनेत्॥ ॥पलाशपुष्पैरचिरात्कविर्हेमादिभिर्भवेत्॥गौर्यापार्श्वस्थयासार्द्धंश्रीकामश्चिन्तयेत्सुभं॥अयुतं
प्रजपेन्मंत्रंभूयसीश्रियमाप्नुयात्॥मुंजानप्रयतामंत्रीगोमूत्रेपक्वमोदनं॥भिक्षान्नमथवामंत्रयुतद्वितयंजपेत्॥अक्षतान्वेदशा
स्त्रादीन्व्याचष्टेनात्रसंशयः॥पद्मंदशदलंकृत्वातारंतत्कर्णिकोदरे॥साध्याख्याकर्मसंयुक्तंविलिखेत्तंदिकेश्वरं॥पत्रेषुमंत्र
सम्भूतान्वर्णान्द्विद्विलिखेत्क्रमात्॥ अंत्यमंत्रेसमालिख्यवेष्टयेन्मातृकाक्षरैः॥यंत्रंश्रीदक्षिणामूर्त्तेः साधितंविधिवन्नृणां॥अप
स्मारग्रहादीनांनाशनंस्मरणाद्भवेत्॥ ॥अस्यार्थ॥दशदलंपद्मंकृत्वातत्कर्णिकायांप्रणं॥वंविलिख्यतन्मध्येरक्षरक्षेतिसाध्यना
मविलिख्यतत्पत्रेषुद्विद्विमंत्रवर्णांलिख्यतद्दलेवर्णत्रयंलिखित्वाबहिर्वृत्तद्वयंकृत्वामध्येसाध्यंसमालिखेत्॥किंजल्केषुस्वरानंदि
न्दिंघशक्तःसमालिखेत्॥नारमाद्यदलेनंदिवर्णत्रयविभागशः॥आलिख्यविलिखेत्पश्चाद्वर्णत्रयविभागतः॥शिष्टपत्रेषुमंत्रस्यशि
ष्टवर्णान्समालिखेत्॥प्रथमोयांत्यसंयुक्तंचतुर्थस्यद्वितीयकं॥कोणेषुविलिखेच्चैतद्यंत्रंसर्वार्थसिद्धिदं॥पुत्रपौत्रप्रदंनृणामायुः
श्रीविजयःप्रदं॥कृत्वापस्मारभूतादीनाशनंसर्वकामदं॥ ॥अस्यार्थ॥अष्टदलपद्मंकृत्वातत्कर्णिकायांसाध्यनामसमालिख्यकिं
ल्केषुद्विशः॥स्वरान्सबिंदून्समालिख्यप्रथमदलेप्रणवमकारउकारमकारभेदेनविभज्यविलिख्यसप्तदलेषुमंत्रस्यैकविंशतिव
र्णांस्त्रिंशतिवर्णांस्त्रिशस्त्रिशः॥समालिख्यवृत्तान्तरालवीथ्यांकादिवर्णानलिख्यभूपुरस्यदिक्षुवंकोणेषुठंइतिविलिखेदेतदुक्तंफ

॥रामः॥
॥४६०॥

लदे ॥ ॥सुंदराचार्यशिष्येण श्रीनिवासेन धीमता ॥ चन्द्रीकायां प्रणीतायां द्विचत्वारिंशसंख्यक ॥ ॥इति श्रीसुंदराचार्यचरणारविंदद्वंद्वांतेनिवासिना श्रीश्रीनिवासभट्टेन विरचितायां श्रीशिवार्चनचन्द्रिकायां द्विचत्वारिंः प्रकाशक ॥ ॥तथा श्रीनन्दीकेश्वरमते ॥ अथ मृत्युंजयमंत्रं कथयामि तवानघ ॥ आद्यत्रयोदशोपांत्यस्वरावुद्धृत्य नंदिकः ततस्तृतीयवर्गस्य तृतीयं चाषष्ठयुक ॥ तदुपांत्यस्वरारूढमष्टमस्य तृतीयकं ॥ आद्यांसवर्णसंयुक्तं तृतीयार्णं समुद्धरेत् ॥ एष मृत्युंजयो मंत्रः प्रोक्तो मृत्युभयापहः ॥ आद्यत्रयोदशौ उपान्त्यौ: बिंदुस्तेन प्रणवो जातः तृतीयवर्गस्य तृतीयं ज आद्यषष्ठस्तु उपांत्यो बिंदुस्ताभ्यां युक्तस्तेन जुमिति ॥ अष्टमस्य तृतीयं स आद्यो विसर्गस्तेन सः इति ॥ ऋषिकहोलो देव्यादिगायत्री छंद इरितं ॥ देवता·मनोप्रोक्ताः शिवो मृत्युंजयाभिधः ॥ प्रणवो बीजमित्युक्तं सः शक्तिरितिकीर्तिता ॥ षड्दीर्घयुक्तेनांत्येन षडंगानि प्रकल्पयेत् ॥ आधाररिद्धिरस्वैवंत्यसेद्वर्णत्रयं ततः ॥ ध्यायेद्देवं ततो वत्स समाहितमनाश्चिरं ॥ शुद्धस्फटिकसंकाशं शुभ्रपद्मासने स्थितं ॥ पकर्दमौलिविलसच्चन्द्रखंडस्रुतामृतैः ॥ अभिषिक्तः समस्तांगमर्केन्द्वनलत्वांचनं ॥ दक्षिणोर्द्धकरे मुद्रां ज्ञानाख्यां न दधः करे ॥ अक्षमालां च वामोर्द्धे पाशं वेदमधःकरे ॥ दधानं चिंतयेद्देवं मृत्युरोगभयापहं ॥ इति ध्यात्वार्चयेत्पीठे शैवे पूर्वसमीरिते ॥ अष्टपत्रांबुजे वत्स चतुरस्रत्रयावृते ॥ अर्चनागेंद्रवज्राद्यैरावृत्तित्रयसंयुता इति ॥ अथ प्रयोगः ॥ तत्र प्रातःकृत्यादी योगपीठन्यासांते शिरसि कहोलाय ऋषये नमः ॥ मुखे गायत्री छंदसे हृदये मृत्युंजयाय देवतायै ॥ गुह्ये ॐ बीजाय · पादयोः सः

शान्तये इति विन्यसमभेष्टसिद्धये विनियोगः ॥ इति कृतांजलिरुक्त्वा सां सीं सूं सैं सौं सः अनिकरषडंगन्यासादिकं ध्यानादिपुष्पान्ते प्राग्वद्
गानिसंपूज्य लोकपालपूजादि सर्वं समापयेदिति ॥ अपूमणालं चतुरस्रं त्रयावेष्टितमष्टदलं ज्ञेय ॥ तथा ॥ लक्षत्रयं जपेन्मंत्रममृता सकलेहुनेत् ॥
क्षीराप्लुतैस्तर्पणादिततो नंदिन्समाचरेत् ॥ एवं सिद्धे मनौ नंदिन्प्रयोगानाचरेन्ततं ॥ तालनालं मध्यपत्रमंत्यमध्यं च संपुटं ॥ पद्मयुग्मं त
दं तस्य मात्मानं चिंतयेद्धिवं ॥ सश्रवद्वरापीयूषधारासिक्तकरे करेवरं ॥ अन्येन योगेन भहेद्दीर्घायुश्च निरामयः ॥ ॥ अयमर्थ
ॐ अकारतालस्य जूंकारपत्राष्टकस्य सकर्णिकस्य संपुटितस्य पद्मद्वयस्य मध्यसमासीनं मंत्रवर्णत्रयनिर्गच्छदमृतधारयाप्लावितं
सर्वगात्रं शिरमात्मानं चिंतयेदित्यर्थ ॥ तथा वेदांगुलमनन्दिन्गुडूची सकलेर्हुनेत् ॥ पयपरिप्लुतैरर्कसहस्रं विजितेन्द्रियः ॥ आरोग्या
युर्यसोलक्ष्मीरविचाह्लमनेध्रुवं ॥ अमृताशकलैर्दुग्धसंप्लुतैश्चतुरंगुलैः ॥ सहस्रद्वादशमितं जुहुयाद्देवी तेनले ॥ यावत्संख्यं जुहोत्येवं सा
धको नन्दिकेश्वरः ॥ तावत्संख्यैः सुधाकुंभैरग्निः प्रीणातीशंकरं ॥ आप्यायितो भिनारुद्रः प्रदद्यात्साधकेप्सितान् ॥ गुडूचीशकलान्त्र
दिंसमिधो वटवृक्षजा ॥ तिलादूर्वाः पयः सर्पिः पयसं चगणाधिपः इत्युक्तैः ॥ सप्तभिर्द्रव्यैर्जुहुयात्सप्तवारं ॥ क्रमाद्दशाशांते नित्यमष्टोत्त
रमतंद्रियः ॥ सप्ताधिकान्द्विजान्नित्यं भोजयेन्मधुरान्वितैः ॥ विविधैः स्वादुभिर्भोज्यैरन्नपानादिकेर्गणा ॥ विकारानुगतं नंदिन्वर्द्धयेद्धोम
वासरान् ॥ होतृभ्यो दक्षिणां दद्याद्दरुणां गां पयस्विनीं ॥ गुरुसंप्रीणयेन्नंदिन्धनाद्यै देवताधिया ॥ अनेन विधिना साध्यः कृत्पाद्रोहज्व

रादिभि ॥ विमुक्तश्च चिरंजीवेद्धूर्दांशानमंजसा ॥ अभिचारे ज्वरे तीव्रे घोरे न्मादे शिरोगदे ॥ असाध्यरोगे क्ष्वेडार्त्तौ मोहे दाहे महाभये ॥ ते
मोयं शांतिदः प्रोक्तः सर्वसंपत्प्रदायकः ॥ अथ त्रिजन्मादिवसे द्वैधैः सप्तभिरादरात ॥ पृथक शतं हुनेन्मंत्री मधुरैर्मंजयेद्द्विजान ॥ दीर्घ
मायुरमाप्नोति नियमेन न संशयः ॥ अथ वा सप्तभिर्द्वैर्जन्मर्क्षे जुहुयात्सुधी ॥ पृथक सहस्रं तेन स्यान्तिरूपद्रवमुत्तमं दीर्घमायुरवाप्नोति
नात्र कार्या विचारणा ॥ यथोक्तद्रव्याभिस्त्रिनयै हुनेदेकादशाहुती ॥ दिनशोपमृत्युं च रोगान्जित्वा चिरादसौ ॥ दीर्घमायुश्चलभते मंत्रशा
स्त्रविशारदः ॥ त्रिजन्मसु सुधा वह्नी काश्मरी बहुलोद्भवैः समिद्वरैः ॥ हुतो होमः सहस्रेण पृथक पृथक ॥ अपमृत्युहरो नेदिन् सर्वरोगान्वि
नाशयेत् सिद्धार्थैर्विहितो होमो महाज्वरविनाशनः ॥ अपामार्गसमिद्धोमस्त्वपमृत्युगदापह ॥ लिखेदष्टदलं पद्मं तारं मध्ये ससाध्यकं
दिक्पत्रे द्वितीयार्णं विदिक्पत्रेषु तृतीयकं ॥ दिक्षु भूमंडलस्याथ सप्तमार्णं सविंदुकं ॥ विदिक्षु च चतुर्थस्य द्वितीयं विंदुभूषितं ॥ यंत्रं मृत्युं
जयसंपदं जपहोमादिसाधितं धृतं मूर्ध्न्यथवा कंठे वाहौ कर्णाग्र कोष्ठके ॥ ग्रहरोगविषादीनां नाशनं मृत्युभंजनं ॥ कीर्त्तिवागींदिरा का
न्तिपुत्रं दनात्र संशयं ॥ अष्टदलपद्मे विरच्य तन्कर्णिकायां प्रणवं तन्मध्ये साधनामच विलिख्य तत्पदिकादे नूरु इति विश्वकोणपत्रेषु
स इति लिखित्वा वहिश्चातुरंहत्वा न स्यादिक्षु वंकोणेषु इति लिखित्वोक्तवद्विमयाद्युक्तफलदं भवतीति ॥ ॥ अथ घोरास्त्रमंत्रः ॥ न
त्रश्रीकराठसहिताया ॥ अथाघोरं प्रवक्ष्यामि सर्वशत्रुनिशूदनं ॥ सर्वदुष्टग्रहव्याधिनाशनं जगदीश्वरी रेवतीनकुलाक्रांता लोलाक्षी

श्रीमुखीयुता ॥ मुखाकांताकुर्दिनीचवर्तुलाक्षीयुता प्रिये ॥ रेवतीचपुनश्चैवतद्वयंप्रादिचतद्वयं ॥ शिवोन्तमःसद्ययुक्तरेवतीतद्वयंतरं
तनुरूपदंदेवि चटयुग्मंप्रपूर्वितत् ॥ क्रोधीशोनकुलीशश्चपुनरेतद्वयंशिव ॥ वमद्वयंवेधयुग्मंघातयद्वितयंततः ॥ वर्मास्त्रान्तोमनुर्दे
वि एकपंचाशदक्षर ॥ इतिरेवतीरेफः ॥ नकुलाक्रांताहकाराधस्थितालोलाक्षीईकारः ॥ श्रीमुखिबिंदुस्ताभ्यांयुक्तातेनह्रीमितिभृगुः
सकारस्तदाक्रांताकुर्दिनीतदधस्थः फकारः वर्तुलाक्षाउकारेणयुतातेनस्फुइति ॥ रेवतीरेफपुनः श्चैतद्वयंस्फुरइतिः प्रादितद्वयंप्रस्फु
रत्यक्षरद्वयंप्रकादिचकाराद्वीप्सालभ्यते ॥ तेनप्रस्फुरप्रस्फुरेति शिवोन्तमोघकारः सद्यश्चोकारस्तेनयुक्तस्तेनघोइति ॥ रेवतीरेफ
पुनस्तद्वयंघोरइति ॥ तरइतिस्वरूपं ॥ तनुरूपस्वरूपं ॥ चटयुग्मंचटचटेति ॥ प्रपूर्वितत् ॥ चटयुग्मंप्रपूरकंचतेनप्रचटप्रचटेति ॥ क्रो
धीशः कनकुलीशोहः पुनरेतद्वयंकहेति वमद्वयंवमवमेति ॥ वेधयुग्मंवेधवधेति ॥ घातयद्वितयंघातय२इति ॥ वर्महुंअस्त्रंफट् ॥ तथा
अघोरस्यऋषिश्चोक्तोत्रिष्टुछंदसमीरितं ॥ अघोररुद्रोदेवतास्याहंबीजंदेवदेवीकीर्तितं ॥ शक्तीबीजंस्यात्तुरूपार्थचतुर्थ्यये ॥ विनियो
गोभवेद्धिषडंगंविनिसेत्ततः शरर्तुदशदिग्दंतिदिवाकरमितैः क्रमात् ॥ पदान्येकादशमघोरेषुस्थानेषुविन्यसेत् ॥ कानेत्रवक्त्र
गलहृन्नाभ्यंध्रुहस्तजानुषु ॥ मंजंघापादयोश्चैवपदानिपरमेश्वरि ॥ शरर्तुनेत्रवस्वब्धिरवेदाब्धिवेदकैः ॥ रसनेत्रमितैर्वर्णैः पदानि
स्युमहेश्वरीति ॥ षडंगन्यासेर्णविभागमाहशरइत्यादि ॥ शर५ऋतव६दिक्१०दंतिन८दिवाकराः१२पदेषुवर्णविभागमाहसरइत्या

दिशा ५ ऋतवः ६ नेत्रे २ वसवः ८ अब्धय ७ रसाः ६ वेदाः ४ ॥ तथा ॥ एवन्यस्ततनुं मैत्री ध्यायेद्देवमनन्यधीः कालमेघसमं देवं भीमदं
ष्टुं विलोचनं ॥ भुजंगभूषणं रक्तवसने लेपशोभिता ॥ परशुं करवालं च वाणांस्त्रिशिखमेव च ॥ दधाने दक्षिणौर्हस्तैरुर्द्ध्वादिक्रमतः परे ॥
डमरुं खेटकं चापं नृकपालं च पार्वती ॥ काम्यकर्मसु रक्ताभमसितं चाभिचारिके ॥ निग्रहे ग्रहभूतादिमुक्तो मुक्तानिभं स्मरेत् ॥ एवं संवि
न्त्य देवेशं शिवपीठे पुरोदितं ॥ षट्कोणान्तः स्थिते पद्मन्वितये भूपुरैर्वृते ॥ चतुर्वीरसमायुक्ते च सुपत्रे महेश्वरि ॥ पूजयेद्देवमावाह्य पूजाद्र
व्यैर्मनोहरं ॥ अंगानि पूर्वमभ्यर्च्य केशरेषु यथा पुरा ॥ प्रमषड्दले देवी पूजयेदायुधाष्टकं डमरुं परशुं खड्गं खेटं बाणां धनुस्तथा ॥ शूलं क
पालं चैतानि द्वितयेष्टदले पुनः ॥ वृत्ताग्रपामातरः पूज्याश्चतुरस्रत्रयान्तरं ॥ वीथीद्वये लोकपालास्तदस्त्राणि च पूजयेदिति ॥ ॥ अथ
प्रयोग ॥ ततः प्रातः स्नातकृत्यादियोगपीठन्यासान्ते प्राणायामत्रयं कृत्वा शिरसि अघोराय ऋषये नमः ॥ मुखे त्रिष्टुप्छन्दसे नमः ॥ हृद
ये श्रीअघोररुद्राय देवतायै नमः ॥ गुह्ये हुं बीजाय नमः ॥ पादयोः ह्रीं शक्तये नमः ॥ इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्धये विनि
योगः ॥ इति कृताञ्जलिर्वदेत् ॥ ततः ह्रीं स्फुर २ हृदयाय नमः ॥ प्रस्फुर ३ शिरसे स्वाहा ॥ घोर २ तरतनुरूप शिखायै ॥ चट २ प्रचट ३ कवचा
य हुं कवचाय हुं कह २ वम २ नेत्राय॰ वध २ घातय ३ हुं फट् ॥ इति षडंगमन्त्रानंगुष्ठादितलान्तं करयोर्विन्यस्य हृदयादिषडंगेष्वपि वि
न्यस्य ॥ शिरसि ह्रीं स्फुर २ नमः मुखे प्रस्फुर ३ नेत्रयो॰ घोर ॥ कण्ठे॰ घोरतरतनुरूप हृदि चट चट नाभौ ॥ प्रचट ३ लिंगे कह २ ऊर्वोः वम २

जान्वोः वं वं २ जंघयोः घातय २ पादयोः ह्रूं फट् नमः· इति विन्यस्य हृदयादि षडंगपूजांते प्रथमाष्टदलेषु देवाग्रदलमारभ्य प्रादक्षिण्ये
न परशवे नमः ॥ डमरुकाय नमः ॥ खड्ग·टंकाय· वाणेभ्यो· धनुषे· शूलाय· कपालाय· इति संपूज्य द्वितीयाष्टदले देवाग्रमारभ्य ब्राह्म्याद्यष्ट
मातॄः संपूज्य प्राग्वदिन्द्रादिवज्रादिपूजामारभ्य सर्वं समापयेदिति ॥ तथा ॥ लक्षमेकं जपेन्मंत्रं हविष्याशी यतव्रतः ॥ जुहुयात्तद्दशांशेन
तिलैः ॥ शुद्धैर्घृतप्लुतैः ॥ तर्पणं मार्जनं कृत्वा भोजयेन्मधुरैर्द्विजान् ॥ एवं सिद्धमंत्रवरे काम्यकर्माणि साधयेत् ॥ क्रमात्सर्पिरपामार्गतिलस
र्षपपायसैः ॥ साज्यैः सहस्रं प्रत्येकं यामिन्यां जुहुयात्सुधीः ॥ होमोयं नाशयेत्सद्यो भूतकृत्यामयादिकान् ॥ श्वेतकिंशुकनिर्गुण्डीहृमामार्गसे
भवैः ॥ समिद्भिः कृतो होमः पूर्ववद्भूतशांतिदः ॥ अपामार्गारग्वधयोः पंचगव्यसमुक्षिताः ॥ समिधो जुहुयात्सहस्रां पंचम्यां निशि संयतः
एथक्तहस्रहोमेन भूतानां निग्रहो भवेत् ॥ क्रमात्सर्पिरपामार्गपंचगव्यहविर्युतैः ॥ हुत्वा सहस्रं प्रत्येकं पात्रे संपातयेद्घृतं ॥ संपातसर्पि
षा साध्यं भोजयेद्भूतशांतये ॥ लिखेदष्टदलं पद्मं वह्निगेहयुगांतरे ॥ मायां तत्कर्णिकामध्ये साध्याख्याकसंयुतां ॥ स्वरैरावेष्टयां शक्तिं कि
ञ्जल्के षष्ठवर्गजान् ॥ ककारादिलकारांतानालिख्य दलशक्रके ॥ अष्टमे तु दले वादिक्षांतान्सप्तार्णिकां लिखेत् ॥ स्मरादिवर्गयुग्मांतांस्त्रि
वर्णान्वीशक्तिशः ॥ दलमध्ये पुंसं लिख्य दलाग्रेषु महेश्वरी ॥ प्रचटान्याटयांताश्च तथैव युगलाशे लिखेत् ॥ वह्निषट्कोणकोणेषु प्रणिकोसमालि
खेत् ॥ वर्मास्त्रबीजेन तद्बाह्ये भूपुरेणानुवेष्टयेत् ॥ दीक्षाक्रमविधिना कुंभमस्मिन्यंत्रे निधाय च ॥ तत्र देवं समाराध्य तज्जलैरभिषेकतः ॥ भू

नापस्मारकृत्याद्याः सर्वे नश्यंति ह्युपद्रवाः ॥ ॥ अयमर्थः ॥ क्वविद्भूतले सुमेसि हरादिना विपुले षट्कोणं विरच्य तन्मध्ये अष्टदलपद्मं कृत्वा तत्कर्णिकायां शक्तिबीजमालिख्य तस्य हकारोदरे देवदत्तस्य रेफास्थाने रोगं ईकारस्थाने नाशय नाशयेति साधकसाध्यकर्माणि लिख्य तद्बीजं सबिंदुभिः षोडशभिः स्वरैरावेष्ट्य दलकेसरेषु प्रथमदले केशरे ॥ कं खं गं घं ङं द्वितीयदले ङं चं छं जं तृतीयके झं टं ठं चतुर्थे डं ढं णं तं पंचमे थं दं धं नं ॥ षष्ठे पं फं बं भं सप्तमे मं यं रं लं अष्टमे वं शं षं सं हं क्षं ॥ स्वाद्यादिप्रादक्षिणेन वर्णानालिख्य पत्रमध्येषु स्वाग्रदलमारभ्य प्रादक्षिणेन स्फुर स्फु द्वितीये र प्रस्फु तृतीये र प्रस्फु चतुर्थे र घोर पंचमे घोर त षष्ठे र तनु सप्तमे रूपं च अष्टमे त चट इति विलिख्य ततः प्रथमदलाग्रे प्रचट द्वितीये प्रचट तृतीये र प्रस्फु चतुर्थे हवे पंचमे वमं वं षष्ठे धनं सप्तमे घातय अष्टमे ॥ ॥ घातय इति विलिख्य तद्बहिः षट्कोणं षट्कोणेषु हुं फडिति प्रतिकोणं विलिख्य तद्बहिश्चतुरस्रेणावेष्टयित्वा तत्र दीक्षोक्तविधिना कुंभं संस्थाप्य तत्र देवमावाह्य सम्यगभ्यर्च्य तेन जलेन साध्यमभिषेचयेत् ॥ यथोक्तफलसिद्धिर्भवति ॥ तथा ॥ अष्टपत्रं लिखेत्पद्मं षट्कोणं तस्य मध्यतः ॥ तन्मध्ये शक्तिमालिख्य साध्याख्याकर्मसंयुतं ॥ स्फुरद्द्वयेन तां शक्तिं वेष्टयेज्जगदीश्वरि ॥ षट्कोणस्य तु कोणेषु प्रस्फुरद्वितयं लिखेत् ॥ एकैकशो महेशानि शिष्टवर्णान्दलेष्वथ ॥ मूलमंत्रस्य देवेशि रसवेदचतुरसैः ॥ चतुश्चतुर्वेदरसैर्विभक्तास्तद्बहिस्ततः ॥ पुनः षट्कोणमालिख्य तत्कोणेषु महेश्वरी ॥ हुं फडित्यालिखेद्बाह्ये चतुरस्रेणावेष्टयेत् ॥ यंत्रमेतदघोरस्य कीर्तितं भुवि दुर्लभं ॥ क्षुद्रचोरग्रहव्यालभूतापस्मारनाशनं ॥ संसाधितं घृतं

न्द्राणां सर्वसिद्धिप्रदायकं ॥ ॥अस्यार्थः॥ विपुलं षट्कोणं कृत्वा तन्मध्ये अष्टदलं पद्मं विरच्य तत्कर्णिकायां पुनः षट्कोणमालिख्य तन्मध्ये समासाद्यं शक्तिमालिख्य तां स्फुर २ इत्यक्षरचतुष्टयेनावेष्ट्य ततः षट्कोणं कोणेषु प्रस्फुर २ इत्यक्षरचतुष्टयेनावेष्ट्य ततः षट्कोणेषु प्रस्फुर २ इति षडक्षराणि प्रतिकोणमेक २ मालिख्याष्टसु दलेषु स्वाग्रदलमारभ्य प्रादक्षिण्येन घोर इत्यादि घातय इत्यंतान्वर्णान् ३।२।५।६।४।५।४।६। इति क्रमेण विमज्यालिख्य बहिः षट्कोणेषु प्राग्वदन्याक्षरद्वयं लिखेत् ॥ तद्बहिश्चतुरस्रेणावेष्टयेदेतद्यंत्रं भुक्तिमुक्तिफलदं भवतीति ॥ ॥श्रीशिवरहस्ये॥ अथ वक्ष्ये महासेन मंत्रं पाशुपताह्वयं ॥ अस्त्रराजं समस्तापन्नारकं शत्रुनाशनं ॥ तारो वकेशः शांतीन्दुभूषितश्चन्द्रशेखरः ॥ शिखीशपूर्वो वांश्च पंचमस्वरसंयुतः ॥ वर्मास्त्रांतः षडर्णोयं षडाननसमीरितः ॥ तारः प्रणवः वकेशः शकारः शांतिरीकारः इंदो लकारः ॥ ताभ्यां भूषितश्चन्द्रशेखरो विंदुमस्तकः ॥ तेन श्लीमिति शिखीशपूर्वः पकारः ॥ वांतसकार ॥ पंचमस्वरउकारः ॥ तदुक्तं तेन पशु इति वर्म हुं अस्त्र फट् ॥ तथा ॥ ऋषिरस्या वामदेवोस्य पंक्तिश्छंदसमीरितं ॥ रुद्रः पशुपतिः प्रोक्तो देवता देवं वंदित ॥ मंत्रार्णैः षड्भिरंगानि हुंफडंतैः सविंदुकैः ॥ जातियुक्तानि विन्यस्य षडाननकरांगयो ॥ ध्यायेत्पशुपतिं सम्यक्स्वचीचैकाग्रमानसं ॥ पंचवक्त्रं दशभुजं प्रतिवक्त्रं त्रिलोचनं ॥ अग्निज्वालानिभश्मश्रुमूर्द्धजं भीमदंष्ट्रकं ॥ खड्गं बाणानतक्षस्त्रं शक्तिं परशुमेव च ॥ दधानं दक्षिणैर्हस्तैर्मूर्द्धादिक्रमतोयह् ॥ खट्वाचापो कुंडिकां च त्रिशूलं ब्रह्मसरराणयुक् ॥ वामहस्तैश्च बिभ्राणं मध्याह्नार्कसमप्रभं ॥ नानाभरणसंदीप्तपन्न

गंडेरलंकृतं ॥ स्फटिकौघनिभं शांतं सर्वरक्षाकरं स्मरेत् ॥ पूर्वोक्ते पूजयेत्पीठे शैवे गन्धादिभिः शिवं ॥ पद्ममष्टदलं कृत्वा कर्णिकाकेशरान्वि
तं ॥ चतुर्द्वारसमायुक्तं चतुरस्रत्रयावृतं ॥ एवं यंत्रं समालिख्य स्वर्णरौप्यादिके शुभे ॥ पट्टे वा फलके वापि श्रीखण्ड्यादिसमुद्भवे सर्वोपचारै
राराध्य यजेदंगानि पूर्ववत् ॥ दलेषु मातरः प्रपूज्या लोकशास्त्राणि तद्बहिः ॥ पूजयेद्विधिनानेन रुद्रं परमभक्तितः ॥ यः स सर्वानवाप्येह
कामांततः शिवो भवेत् ॥ ॥ अथ प्रयोगः ॥ तत्र प्रातः स्नातः कृत्वादियोग० पीठन्यासांते प्राणायामं त्रयं पूर्वकं शिरसि वामदेवाय ऋ
षये नमः ॥ मुखे पंक्तिश्छंदसे नमः ॥ हृदये श्रीपशुपतये देवतायै नमः ॥ इति विन्यस्य मम सर्वाभीष्टार्थसिद्धये विनियोग इति कृतांजलि
र्वदेत् ॥ ॐ हुं फट् हृदयाय नमः श्रीं हुं फट् शिरसे० पं हुं फट् शिखा शुं हुं फट् कवचा हुं हुं फट् नेत्राय फट् हुं फट् अस्त्राय फट् ॥ इति षडंगमंत्रानंगु
ष्ठादितलांतं करयोर्विन्यस्य हृदयादिषडंगेषु विन्यसेत् ॥ ततो ध्यानाद्यंगपूजांते ऽष्टदलेषु ब्राह्म्याद्याः संपूज्य बहिर्वीथीद्वये इन्द्राद्यास्तद
स्त्राणि च संपूज्य प्रार्थ्य तत्सर्वं समापयेदिति ॥ तथा वर्णलक्षं जपेन्मंत्रं हविष्याशी जितेंद्रियः ॥ तद्दशांशं हुनेद्दुग्धैर्घृतैः संस्कृतेनले तर्पणं मा
र्जनं कृत्वा ब्राह्मणान्भोजयेद्गुरुः ॥ ततः सिद्धमनुर्मंत्री प्रयोगान्वीदधीत वै ॥ अनेन मंत्री मंत्रोयं प्रस्तस्य वदने क्षिपेत् ॥ स यस्तत्त्वं वति
कदन् ग्रहो मंत्रप्रभावत ॥ अमुना मंत्रिणा त्वारणान्विसर्जेद्भुवि भूपति ॥ जपेल्लक्षेण सकलान् पिशाचून्स्वडाननः ॥ ॥ अथ श्रीकंठसंहि
तायां ॥ नीलकंठमनुर्वक्ष्ये क्ष्वेडत्रयविनाशनं ॥ यं स्वात्वा गिरिजा मंत्री दृष्ट्या नाशयते विषं ॥ भुजंगेशसमारूढो लोहितेशस्तु पार्वती सद्या

क्रूरसमायुक्तं प्रथमं वरवर्णिनि ॥ मेषेशोपि भुजंगस्थो लोलाक्षी श्रीमुखीयुतः ॥ लांगलीशो महासेनयुक्तस्तार्त्तियईरितः ॥ भुजंगेशो रोफ
स्तदुपरिस्थीनो लोहितेशः पकारः सद्यश्चौकारश्च क्रूरो विंदुस्ताभ्यां युक्तसेन प्रोमिति ॥ मेषेशो नकारः भुजंगस्थारेफोपरि स्थितः लो
लाक्षी ईकारः श्रीमुखी विंदुस्ताभ्यां युक्तस्तेन नीमिति ॥ लांगलीशः ठकारो महासेनो विसर्गस्तद्युक्तन ठइति ॥ तथा ॥ अरुणो मुनिरु
द्दिष्टोनुष्टुप्छंदस्तु देवता ॥ नीलकण्ठः शिवो देवी षडंगविधिरुच्यते ॥ हरयुग्म द्विठांते हृत्कपर्दाङ द्विठ शिरः ॥ नीलकण्ठसङ देवी स्वा
हांतश्च शिखा मता ॥ कवचं कवलकुटांते विषभक्षणाङयुतं ॥ वर्मास्त्रवीजयुगलं नीलकंठसङ शिर ॥ अस्त्रमेवन्यसेद्देवी पंचांगानि करां
गयोः ॥ मूर्ध्नि कंठे च हृदये न्यसेद्वीजत्रयं ततः ॥ ध्यायेद्देवं नीलकंठं वालार्कायुततेजसं ॥ जटाजूटलसच्चन्द्रसकलं फणिसन्नमेः ॥ कृता
कल्पकराभोजैर्दधानं जपमालिकां ॥ शूलवदक्षिणार्द्ध वामार्द्ध कपालकं । खट्वांगतदधोहस्ते पंचवक्त्रविराजितं ॥ प्रतिवक्त्रं त्रिनयनं
व्याघ्रवर्मांवरावृतं ॥ पद्ममध्ये समासीनं मतिसुंदरविग्रहं ॥ एवं ध्यात्वार्चयेत्पीठे शैवे सर्वोपचारके ॥ स्वमेवसुदले रम्ये चतुरस्रत्रयावृते
चतुर्द्वारसमायुक्ते पूर्वमंगानि पूजयेत् ॥ लोकेश्वरानथाभ्यर्च्य तदस्त्राणि वसंयजेत् ॥ एवं समर्चयन्मंत्री नीलकंठं महेश्वरं ॥ हृष्ट्वा विना
शयेत्क्ष्वेडं नीलकंठं इवापरं ॥ ॥ अथ प्रयोगः ॥ तत्र प्राग्वद्योगपीठन्यासांते मूलमंत्रेणप्राणायामंत्रयं कृत्वा शिरसि अरुणाय
ऋषये नमः ॥ मुखे त्रिष्टुप्छंदसे नमः ॥ हृदये श्रीनिलकंठाय देवतायै नमः ॥ इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोग इति कृतांज

लिर्वदेत् ॥ ततो मूलमंत्रेण करशुद्धिं कृत्वा ॥ हरः स्वाहा हृदयाय नमः ॥ कपर्दिने स्वाहा अस्त्राय फट् ॥ इति पंचांगमंत्रानंगुष्ठादिकनिष्ठांतं करयोर्विन्यस्य नेत्रवर्जं हृदयादि पंचांगेष्वपि न्यसेत् ॥ ततो शिरसि प्रों नमः ॥ कंठे न्त्रां नमः हृदये ठः इति विन्यस्य ध्यानादंगपूजांते लोकेशास्त्र दक्षिणे च प्राग्वद्वीथीद्वयं पूजयेत्ततः प्राग्वत्पूर्वं समर्पयेदिति ॥ तथा ॥ लक्षत्रयं जपेद्देवी दीक्षितो विजितेन्द्रियः ॥ हविषा सघृतेनाथ हुनेद्देवी दशांशतः ॥ तर्पणं मार्जनं कृत्वा भोजयेन्मधुरैर्द्विजान् ॥ एवं सिद्धमनौ देवी मंत्री हरति तत्क्षणात् ॥ क्ष्वेडत्रयं न संदेहो नीलकंठ इव स्वयं ॥ स्पृष्ट्वा त्यजेद्विषग्रस्तं तत्क्षणान्निर्विषो भवेत् ॥ बीजाभ्यां प्रथमोत्थाभ्यां पार्श्वयोर्विषमाहरेत् ॥ मध्येन मंध्यगं सर्वं मनुनानेन संहरेत् ॥ एतन्मंत्राभिसंजप्तकलशोदकसेचनात् ॥ तक्षकेनाथ संदष्टस्तत्क्षणान्निर्विषो भवेत् ॥ विलोक्य विषिणां मंत्रं प्रजपेत्सुसमाहितः ॥ विषद्वयान्मुच्यते सावचिरान्नात्र संशयः ॥ दृष्ट्वा क्ष्वेडग्रहग्रस्तस्य शिरः कंठहृत्सु च ॥ मंत्रवर्णत्रयं न्यस्य देवतारूपकं गुरुं ॥ स्मरेत्स्वदक्षिणानामामध्यमातर्जनीद्वयं ॥ मंत्राक्षरत्रयं देवी तदंगुलीभिरुत्तमां ॥ त्रिशूलमुद्रामाबद्ध्य ग्रस्तस्याभिमुखं ततः ॥ प्रदर्श्य मंत्रं प्रजपेत्पंचाशद्वारमाद्रिजे ॥ स्थावरं जंगमं चैव कृत्रिमं च तथा विषं ॥ रोगग्रहाद्युपस्मारानपमृत्युं च नाशयेत् ॥ पंचाशन्मनुनाजप्तमन्नमौषधमेव च ॥ भक्षितं क्ष्वेडरोगादिनाशनं परमं शिवे ॥ मंत्रान्तरमथो वक्ष्ये नीलकंठस्य पार्वती ॥ तारहृन्नीलकंठाय मनुरष्टाक्षरो मतः ॥ तारः प्रणवः हृन्नमः शब्दनीलकंठायस्वरूपे ॥ तथा ऋषिर्ब्रह्मा समुद्दिष्टो गायत्री छंद उच्यते देवता नीलकंठो

स्य विग्रह विनाशयः ॥ अंगध्यानादीनां जाप्यहोमौ द्यंगत्रयोक्तवत् ॥ तारं ॐ नीलकंठोग्निवधूरस्यार्णकोपरः ॥ तारः प्रणवः ॐ नीलकंठ नीलकंठायेति ॥ अग्निवधूः स्वाहाकारः ॥ तथा ॥ अरुणोस्य मुनिश्छंदो गायत्री देवता शिव ॥ नीलकण्ठो महापूर्वो विषसेगादिनाशनं ॥ नीलकंठायाग्निवधूस्तारं ॐ नीलकण्ठकेः ॥ स्वाहा चैभिर्हृदं तैस्तु पंचांगानि न्यसेत्क्रमात् ॥ दक्षतर्जनीकारं भागमर्ज्जनिकावधि ॥ वर्णाष्टकं न्यसेन्मंत्री पादोरुगुह्यनाभिषु ॥ हृत्कण्ठमुखशीर्षेषु न्यसेद्वर्णाष्टकं प्रिये ॥ पूर्वाघोराननैर्युक्तः पीतश्वेतारुणासितैः ॥ अभयं परशुं चापं चाशुकिं च दधद्भुजैः ॥ ध्येयो देवः सपार्श्वस्थे गौरीकश्चातिसुंदरः ॥ संहारनिर्विषस्तं भावेशानकुर्वन्क्रमान्मुखैः दक्षिणाधकरमारभ्य वामाधकरपर्यंतमायुधः ध्यानं ॥ तथा ॥ अक्षरोक्तविधानेन पूजयेत्परमेश्वरं ॥ पुरश्चरणमप्युक्तं वर्णलक्षमहेश्वरी ॥ ॥ अथ प्राग्वद्योगपीठन्यासांते प्राणायामं त्रयं पूर्वं शिरसि ऋषये नमः ॥ मुखे गायत्री छंदसे नमः ॥ हृदये श्रीनीलकंठाय देवतायै नमः इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोग ॥ ततो मूलमंत्रेण करशोधनं कृत्वा नीलकण्ठाय नमः ॥ हृदयाय नमः ॥ स्वाहा नमः शिरसे स्वाहा ॐ नमः शिखायै वषट् नीलकण्ठाय नमः ॥ कवचाय हुं स्वाहाः नमः ॥ अस्त्राय फट् इति पंचांगमंत्रामंगुष्ठादिकनिष्ठांतं करयोर्विन्यस्य नेत्रवर्ज हृदयादिष्वपि न्यसेत् ॥ तत्रोक्तरूपं ध्यात्वा न्यस्तं वै अक्षरोक्तवत्कुर्यादिति ॥ ॥ अथ चिंतामणिमंत्रः ॥ तत्र शिवरहस्ये ॥ कैलासशिखरे रम्ये नानारत्नविचित्रिते ॥ नानाद्रुमलताकीर्णे मंडमाप्तुतरंगिते

ने
नानाकुसुमसौभ्येरामोदितदिगंतरे॥ सिद्धकिन्नरगंधर्वैश्चारणाप्सरसांगणो॥ गीतवादीत्रनृत्यैश्चप्रीणायद्भिः॥ शिवंसदा॥ ब्रह्मविष्णुस
हस्राक्षप्रमुखैरमरैस्तथा॥ गजास्यनंदिभृंगाद्यैर्गणैर्मुनिगणैरपि॥ निषेवितेशिलाएष्टे वैडूर्यमणिनिर्मिते॥ सीहासनेसमासीन
मर्द्धनारिश्वरंहरं॥ सुप्रसन्नमुखंशंभुंगौरिपप्रच्छशंकरं॥ ॥स्कंदउवाच॥ भवन्सर्वसर्वज्ञगदाद्यनगत्पते॥ अनाद्यंताखिलाधीश
भक्तानुग्रविग्रह॥ रहस्यंकीचिदिक्षामिप्रभुस्त्वंभक्तवत्सल॥ भक्तोस्मीतवदेवेशदस्वकृपयान्विभो॥ चिंतामणिमनुर्देवसूचितोय
स्त्वयाप्रभो॥ इदानींतजगन्नाथश्रोतुमिच्छाकर॥ ॥श्रीमहादेवउवाच॥ साधुसाधुगुहप्राज्ञसर्वतन्त्रार्थपारग॥ रहस्यमपिवक्ष्या
मिभक्तोशीतिषडाननः॥ नकस्यापिमयाख्यातंस्त्वत्तेह्याद्यवदाम्यहं॥ गोपितव्यंत्वयाभद्रनप्रकाश्यंषडानन॥ सज्जनायसुशांताय
सुशीलायप्रदीयतं॥ मंत्रोद्धारंप्रवक्ष्यामीशृणुवत्ससमाहित॥ भुजंगेशसमुद्धत्यक्रोधीशांतंदधःकुरु॥ श्वेतेशंतदधः कृत्वामहा
कालंचषष्टमुखं पुनर्भुजंगमालिख्यवालीशंतदधःकुरु॥ ॥अनुग्रहेशमवीशंचयोजयेत्॥ गुरुपदेशविधिनावीजंचिंतामणे
रिदं मथित्वाज्ञानदंडेनवेदागममहार्णवं॥ उद्धृतोयंमहामंत्र॥ साक्षान्मंत्रैकसाधनं॥ तपस्तप्त्वाचिरंपूर्वंकस्यपस्तुप्रजापति॥ द
ष्टवान्तेजसांराशींप्रज्वलंतंमहाद्भुतं॥ मंत्ररत्नमहाद्भुतंचिनवस्तंश्चिरंप्रभुन॥ अस्माभूज्जगतोवत्सचिंतामणिरितोच्यते॥ इति॥
भुजंगेसारफः॥ क्रोधीशःककारः श्वेतेशःषकारः॥ महाकालोमहाकालः भुजंगेशोरेफः॥ वालीशोपकारः अनुग्रहेशऔकारं॥ अवी

॥ शिव ॥
॥ ४६ ॥

शउकारः ॥ अक्रूरेशो बिन्दुः ॥ एतैः संपिंडितं क्षुं इति कूटं भवति तथा ॥ ऋषिः कस्यप आख्यातो नुष्टुप्छंद उदाहृतं ॥ देवता जगतां वंदिः पा
र्वतीपतिरीरितः ॥ क्षेकारं बीजमाख्यातं रेफः शक्तिरितीरितं ॥ मकारं कीलवत्तरेफाद्यः षड्भिः राचयेत् ॥ षडंगानि मनोरस्य जातियुक्ता
नि षण्मुख ॥ ततः सचिंतये देवमर्द्धनारीश्वरं शिवं ॥ विद्रुमारक्तवामार्द्धदेहं नीलापरांगकं ॥ अहिगंगाशशांकार्द्धविलशत्तुंगमौलीकं
हावभावविलासाढ्यं नारीरूपं महेश्वरं ॥ भीषणोपरदेहार्द्धं वामोर्द्धपाशमङ्कुतं ॥ पद्मं च दधतो हस्ते दधानं दक्षिणार्द्धके ॥ करे त्रीशूलं तस्या
धान्कपालं वषरामुख ॥ प्रविभक्तांशुकाकल्पमालालेपविराजितं ॥ एवं ध्यात्वा यजेत्पीठे शैवसर्वोपचारके ॥ अष्टपत्रात्तुदद्वंचतुरस्त्र
यंततः ॥ चतुर्द्वारसमोपेतमस्मिन्रखरामुख पूजयेत् ॥ आदावंगानि संपूज्य केशरेषु यथाविधि ॥ अर्चयेदष्टपत्रेषु कार्तिकेय वृषादिकान्
ब्राह्म्याद्या मातरः पूज्या द्वितीयेष्टदलेषु नः ॥ लोकेश्वरांस्तदस्त्राणि प्राग्वद्वीथीद्वयजपेत् ॥ ॥ अथ प्रयोग ॥ प्राग्वद्योगपीठन्या
सांते मूलमंत्रेण प्राणायामत्रयं कृत्वा शिरसि कस्यपाय ऋषये नमः ॥ मुखे नुष्टुप्छंदसे नमः ॥ हृदये श्री अर्द्धनारीश्वराय देवतायै नमः
गुह्ये क्षें बीजाय पादयोः रशक्तये नाभौ मं कीलकाय इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोग इति कृतांजलिं वंदेत् ॥ ततः रं हृदयाय
कं शिरसे · पं शिखायै · सं कवचाय · अस्त्राय ॥ इति षडंगमंत्रानंगुष्ठादितलांतं करयोर्विन्यस्य हृदयादिनेत्रांतेषु पंचमंत्रान्विन्यस्य अस्त्रमंत्रे
णा तारत्रयदशदिग्वंधनं च कृत्वा ध्यानादिपुष्पोपचारांते अष्टदलकेसरेषु आग्नेये हृदयाय नम इति षडंगानि संपूज्य ईशाने कं शिरसे नम

॥ राम ॥
॥ ४६ ॥

नैर्ऋत्ये वं शिखायै ॥ वायव्ये मं कवचाय: देवाग्रे · रं नेत्राय · देवाग्रादि चतुर्दिक्षु यं अस्त्राय नमः इति षडंगा संपूज्य प्रथमाष्टदले देवाग्रदलमारभ्य आं ब्राह्म्यै: ईं माहेश्वर्यै · उं कौमार्यै : ऋं वैष्णव्यै · लृं वाराह्यै · ऐं ईन्द्राण्यै ॥ औं चामुण्डायै ॥ अः महालक्ष्म्यै नमः ॥ इति संपूज्ये ब्रादिपूजादि सर्वं प्राग्वत्समापयेदिति ॥ तथा ॥ एकलक्षं जपेन्मंत्री दीक्षितो विजितेंद्रिय ॥ तद्दशांशेन त्रिमध्वक्तैः सत्तण्डुलैः तिलैः संतर्पयेद्देवं शुद्धतोयैः षडाननः ॥ ततोभिषिंचेन्मूलेन स्वमूर्द्धनि समाहितः ॥ ब्राह्मणांतर्पयेश्चादन्नपानैः सदक्षिणैः ॥ एवं सिद्धमन्त्रर्वत्स प्रयोगान्विदधीत वै ॥ इति शिवशब्दावेतु शिवशक्त्याः पृथक्पृथग्ध्यानमुक्तं ॥ तथा ॥ अथवा देवदेवेशि ध्यायेदर्धमुज्ञशिवं दक्षिणार्धे करे देवी पुंतदधः क्रमात् ॥ खड्गं वह्निं शराश्चैव दधानं वाम बाहुभिः ॥ भुजंगत्रिशिखं चैव कपालं चापमेव च ॥ दुर्ध्वादिनः स्त्रीविलासं त्रीक्षणं त्रिदशार्चितं ॥ गंगातरंगविलसच्चन्द्रखण्डाहिशेखरं ॥ इति संचिन्त्य देवेशं तत्पार्श्वस्थं शिवामपि ॥ अरुणामरुणाकल्पामरुणांशुकधारिणी ॥ अरुणालेपमाल्याढ्यां त्रिनेत्रां महिभूषणां ॥ शूलै षोडशभिर्व्यग्रभुजषोडशमंडितां चिंतयेत्परमेशानि साधकाभीष्टदायिनीमिति ॥ प्रायशः काम्यमेवदिति चिंत्यं तित्पत्तु प्रागुक्तमेव शिवरहस्ये ॥ रिफं त्यक्त्वादिसंवर्त्तशिवशक्ति नियोज्य च ॥ प्रजपेत्तत्र सिद्धिः स्याच्छ्रुवमेव न संशय ॥ ॥ अयमर्थ ॥ बीजास्यादौ मरेफ सपास्य तत्स्थाने शिवशक्ति भकारसकारौ संयोज्य जपेदिति ॥ प्रासाद्य जपेन्मंत्रमद्भुतं मंत्रवित्तम तेनावेशो भवेत्सद्यो भक्तानां रुजामपि ॥ गतस्य शिरसि ध्यायेच्चन्द्रमण्डलमध्यगं ॥ स्वरैः षोड

शभिर्वीतं स्रवन्मीपूषसिंचितन् ॥ अपमृत्युज्वरक्ष्वेडभ्रांत्यपस्मारनाशनं ॥ शिरोरोगहरं वापीगादितं शिखिवाहन ॥ रेफादिवर्णषट्का
णं षट्कोणं त्रिकोणगं ॥ प्रतिलोमस्वरावीतं ग्रस्तस्य शिरस्यरेत् ॥ वीजमेतन्महासेनग्रहनिर्जितलक्षणाधरेत् ॥ त्रिकोणं चिंतयेन्मूर्ध्नि ग्रस्त
जंतोः षडानन ॥ तन्मध्ये चिंतयेद्वीजं ज्वलत्कालानलप्रभं ॥ क्षणादावेशयेन्मंत्री ग्रहान्रोगादिकानपि ॥ एतन्मंत्राभिजप्तं च वंधुवीप्रसू
नकं ॥ ग्रस्तस्य मूर्ध्नि क्षिप्तं क्षादावेशकारकं ॥ मोषिके शांतिके मंत्रे शृणु त्वं वर्णविधिं न्मच ॥ सकारमादौ संयोज्य जपेन्मंत्रं षडानन ॥ आ
कृष्टौ च वशीकारे रक्तौ रेफादिको भवेत् ॥ हकारादिश्च हेमाभः स्तंभने क्षोभरोगह ॥ धूम्रवर्णो पकारादौ विद्वेषोच्चाटयोरपि ॥ पीतवर्णो
लकारादौः स्तंभने शिखिवाहन ॥ शुद्धस्फटिकसंकाशो मंत्रो ध्येयो मुमुक्षुभिः ॥ अकारादिश्च जप्तव्यो देशिको देशितो गुरुः ॥ वायुमण्डलम
ध्यस्थं मंत्रं कृत्स्नं विचिंतयेत् ॥ नेत्रयोर्द्विषतो वक्त्राश्वमाशु प्रजायते ॥ वाधिर्यं कर्णयोर्वृ द्विवं वदने स्मृतं ॥ कुक्षौ शूलं करोत्याशु
वायेमर्मसु संस्मृतं ॥ दुःसहं च शिरोरोगं कुर्या---स्वमुख ॥ वायोर्धं ठ नालेव चतुरस्रस्य मध्यगं ॥ चंद्रमण्डलमध्यस्थं स्वरैः षोडशभिर्वृ
तं ॥ नेत्रे यांतं नेत्ररोगहरं स्याशु न संशयः ॥ रक्तस्नानं कृशांगीनां योनौ ध्यानं हरेत्क्षणात् ॥ कुक्षौ ध्यानं शूलं तु स्याद्धि स्फोटे विषमे ज्वरे ॥ त
थिरक्तामये वक्त्र भ्रमे दाहे शिरोगदे ॥ स्मरेन्मंत्रविभामं ॥ तत्तद्दोषशांतये ॥ अनुस्वारं त्रिकोणांते स्थितं वीजं स्मरेद्गुह ॥ यस्य मूर्ध्नि स
वश्यः स्यादचिराद्ध्रुवं ॥ आकृष्टौ गेनाहनं भोजे स्थितं मंत्रविधिं न्मच ॥ मंत्रवर्णौ हठं कृत्वा तेजोरूपं च संस्मरेत् ॥ तत्स्थौर्थं माशुपाशुपासे

नकर्षयेद्योषितां ध्रुवं ॥ स्वनामं गर्भितं वीजं योषायोनौ विचिंतयेत् ॥ वशयनत्क्षणां घोषां स्रावयेत्तु क्रमेव च ॥ निजलिंगलस्यतद्वीजं
संचिंतयेद्गुह् ॥ प्रवेशयेद्योनिमध्ये संपर्काद्योषितं वशे ॥ विदध्याज्जवयेच्चैव नात्र कार्यविचारणा ॥ कुलालं मृदमानीय तत्र वीजं समा-
लिखेत् ॥ तन्मकारस्थरेफेन तु साध्याख्यो कर्मसंयुता ॥ विलिख्यतत्रिकोणेन वेष्टयेत्तद्बहिस्तथा ॥ षट्कोणेन समावेष्ट्य षट्सु कोणेषु चालि-
खेत् ॥ रेफसंविंदुकं तच्च विलोमैर्वेष्टयेत्स्वरैः ॥ प्राणप्रतिष्ठां तस्याथ कृत्वा सम्यक् षडानन ॥ निषवेत्तुल्यधस्ताच्च तत्पाकं समाचरेत् ॥
तदन्नभक्षणात्तस्य श्रीवश्यो भवति निश्चितं ॥ पतिःस्त्रियापापदृक्कं नात्र कार्या विचारणा ॥ मधुरत्रययुक्तेन शालिपीष्टेन पराम्मुख ॥ कृ-
त्वा पुत्तलिकां सम्यक् स्पष्टांगीमतीमंजुलां ॥ प्रपदाभ्यां जंघाभ्यां जानुभ्यां मुरुयुग्मतः ॥ नाभेरधस्ताद्धृत्कंठादाशीर्घकं ततः ॥ एवं द्वाद-
शधाछित्वा तीक्ष्णशस्त्रेण साधकः ॥ मूलमंत्रेण जुहुयात् युदिस्य षडानन ॥ सवश्यो भवति क्षिप्रं नात्र कार्यी विचारणा ॥ चतुरस्रं
समं कृत्वा नागवल्लीदले यह ॥ तन्मध्ये तु वकारस्थं मध्ये समालिखेत् ॥ मंत्रमध्ये मकाराधःस्थितं रेफविचक्षण ॥ चतुरस्रे चतुष्कोणे
ठकारं विंदुसंयुतं ॥ विलिखेत्स्थापितं प्राणं मूलमंत्राभिमंत्रितं ॥ अष्टोत्तरसहस्रेण शिरोरोगी प्रभक्षयेत् ॥ श्राविकेयाचिरादेव
रोगान्मुक्तः ॥ सुखी भवेत् ॥ सरेफेण ककारेण कंठ साध्यस्य षण्मुख ॥ दक्षस्तनं षकारेण वामं चैव मकारतः ॥ दक्षोशे रेफतो वध्वा वामां
वापि यकारतः ॥ ओंकारेण मुखवत्स नाभिम्मू कारतो ग्रह ॥ वक्षोविदर्द्द चंजाभ्यां वध्वा कर्षन्स्मरेत् प्रिया ॥ मरणांतं शवश्यः स्यादचिरात्त्वा

त्वसशयः॥ वंधुजीवाख्यपुष्पेणा त्रिकोणं रचयेत्सुह॥ तन्मध्ये विलिखेद्वीजं चंदनागुरुकुंकुमैः॥ पुष्पेनतेन तन्मध्ये कार्त्तिकेयविधा
नतः॥ अग्निसंस्थाप्य तत्रैशं संपूज्य विधिवत्सुत॥ हुनेद्दशोत्तरशतं घृतैः संपातयेघृतं॥ त्रिलोहनिर्मितायांतु मुद्रिकायां विचक्षणः
संपातशिक्तां तां वत्स हस्तेणाभिमंत्रिता॥ साष्टकेनाथ तां हस्ते धारयेद्यस्तु भूपतिः॥ जपेत्सप्तधिषड्वक्त्रं पलाय्यानपितान्रिपून्॥ विष
वेतालभूतादिदुरितैर्वीयते नसः॥ वक्षे भागंत्रिलोहस्य शृणु षण्मुख सांप्रतं॥ सोमसूर्याग्नीरूपत्वान्मातृकायाः षडाननः॥ तन्मय
त्वात्त्रिलोहस्य भागस्तु वर्णासंख्यया॥ भवेद्रूप्यस्य सोम्यत्वाद्भागः षोडश उच्यते॥ कांचनस्यार्करूपत्वात्तु वर्णाः पंचविंशति॥ तेन भा
गस्तस्य तावांतासस्याग्निमयत्वत॥ तद्वर्णाश्च दशोतेन तस्य भागोपि तादृशः॥ अष्टपत्रं लिखेत्पद्मं कर्णिकायां षडस्त्रकं॥ तन्मध्ये व
त्रिकोणं स्यात्तन्मध्ये वीजमालिखेत्॥ साध्याख्याकर्मसंयुक्तं षट्कोणेषु षडंगकं॥ लिखेत्पूर्वादिपत्रेषु वीजवर्णान्विभज्य च॥ रं कं मं रं
षं इति श्रोमूर्भितिपचवपरामुख॥ वहिर्वृत्तचतुष्कं स्याद्दंतरालत्रयान्विते॥ स्वनामाद्यंतरालातु कादिमातां द्वितीयके॥ तृतीयेतु पका
रादीन्वै एतत्त्वेन संलिखेत्॥ चतुरस्रं वहिः कृत्वा तस्य कोणेषु संलिखेत्॥ वीजनरहरेर्वत्सं क्ष्म्रौमित्यक्षररूपकं॥ एतद्यंत्रं धृतं सर्वर
क्षाकरमनुत्तम॥ अस्मिन्यंत्रे समाधाय कलसं विधिवत्सुह॥ तत्र देवं समभ्यर्च्य साध्यं तेनाभिषेचयेत्॥ कृत्याद्रोहाविनश्यंति जीवेद्व
र्षसतं सुह॥ ततः पूर्णेनु विवाभं मंडलं वै समालिखेत्॥ तन्मध्ये साध्यसंयुक्तं लीखिद्वीजं षडाननः॥ त्वरैः षोडशीर्वीतं षडस्वपुरमांलि

खेत् ॥ अकारादिक्षकारान्तान्वर्णान्विंदुसमन्वितान् ॥ अष्टकाणं वहिः कृत्वा तत्कोणेषु लिखेद्गुरुः ॥ नृसिंहवीजं आग्नेयं यंत्रमेतत्षडा
ननः ॥ दुष्टग्रहविषव्याधिनाशनं सर्वसिद्धिदं ॥ आदौषट्कोणमालिख्य तन्मध्ये साध्यसंयुतं ॥ चिंतामणिं समालिखेत् षट्कोणेषु परामृष ॥
रं कं षं रं प मिति ओमिति वसधिषु ॥ विलिख्य वहिरावेष्ट्य समेतेन प्रणावेन च ॥ नद्बहिर्वेष्टयेद्वत्तत्र नर्वृतं समालिखेत् ॥ तद्बहिश्चतुरस्रेणावे
ष्टयित्वा विचक्षणः ॥ नृसींहवीजं विलिखेत्तत्कोणेषु चषणमुष ॥ एतद्यंत्रं रोचनया विलिखेज्जामयामसा ॥ लाक्षावीतसितं कृत्वा संजप्य विधिव
द्धृत्य मस्तके धारयेदेतत् लक्ष्मीसौभाग्यवर्द्धनं ॥ आयुरारोविजयवश्यप्रकृत्पुत्रपौत्रदं ॥ चौरव्याल महारोग भूतापस्मारनाशनं ॥ कारस्करतरोः शा
रस्वाशाग्रामानीय तत्र च ॥ अग्रदेशे महासेन पुरम्यकारयत्स्थलं ॥ षट्कोणं च लिखेद्वत्सनत्र साध्यसमान्वितं ॥ चिंतामणिं विलिख्याथ ष
ट्कोणेषु रं लिखेत् ॥ वह्निजाला इवारक्कारेषाः कार्याश्चतद्बहिः ॥ कार्तिकेयाथ संजप्तमष्टोत्तरसहस्रकं ॥ मूलमंत्रेण तत्सम्यक् स्थापयेत्तत्र वै
चौरव्याघ्रक्रोधसर्परिपुभूतपिशाचका ॥ नप्रजंति कदाचिच्च यंत्रस्यास्य प्रभावन ॥ ॥ अथ श्रीकंठसंहितायां ॥ शृणु देवी प्रवक्ष्यामी मंत्र
रत्नं महाद्भुतं ॥ तुंबुरोर्देवस्य शत्रुक्षयकरं ॥ संवर्त्तेशो महादेवी महाकालेसशंयुतः ॥ तदधश्च भुजंगेशो वालीशस्तदधः शिवे ॥ अर्वीशस्तद
धोदेवी सर्वोर्द्ध्वश्रीमुखीस्थीता वीजमेतन्समाख्यातं सर्वसिद्धिकरं परं ॥ संवर्त्तेशः क्षकार ॥ महाकालेशो मकार ॥ भुजंगेशो रेफ ॥ वालीशो
यकार ॥ अर्वीशः ऊकारः ॥ श्रीमुखी विंदुः ॥ एतैः संपीडितं क्ष्म्र्यूं इति वीजं भवति ऋषिर्ब्रह्मा समुद्दिष्टो गायत्री छंद ईरितं श्रीरुद्रो देवता प्रोक्तः

सर्वाभीष्टाप्तयेभवेत॥षड्दीर्घभाजावीजेनषडंगानीप्रकल्पयेत्॥क्षकाररहितंमूलवीजंमहसमन्वीतं॥चत्वारिदेवीवीजानीदद्यास्कगिरि
नंदीनि॥जयाख्याविजंयापश्चादजितावापराजिता॥वीजसंगुलीषुन्यस्यकरयोर्व्यापकंततनः॥कनिष्ठादिषुविन्यस्येषडंगानितलावधि
देवदेवीस्ववीजाद्याःकनिष्ठादिषुविन्यसेत॥पादान्मूर्द्धावधिन्यस्येन्मुष्टिनाजगदीश्वरी॥मूर्द्धादिपादपर्यंततलाभ्यांव्यापकंन्यसेत्॥ष
डंगानिपुनर्न्यसेदेवदेवीश्चपूर्ववत्॥शिरोवदनहृन्नाभिगुदेषुक्रमतोन्यसेत्॥एवंन्यस्ततनुर्देवीध्यायेद्देवंमनन्यधी॥उद्यदादित्यरुचिरं
चतुर्वक्त्रंत्रिलोचनं॥ ॥वेदाद्यईशेपरंहस्तैश्चतुर्भिर्दधतंक्रमात॥दक्षिणोर्द्धकरेदेवीशूलंखट्वांगमप्यधः॥पाशंमावोर्द्धहस्तेकपा
लंतदधोज्वलं॥रक्तांगरागाभरणांशुकंचिठंनाशिकं॥स्वनर्घ्यरत्नाकल्पाढ्यंध्यायेद्देवीशिवशिवे॥शैवंपीठंसमभ्यर्च्यवक्ष्यमाणेनव
र्त्मना॥तत्रावाह्ययजेद्देवंसम्यग्गंधादिभिःशिवे॥नपुंसकस्वरैर्विद्वाननुलोमविलोमगे॥धर्मादिकैरधर्माद्यैःपादगात्राणिकल्पयेत्
इकारेणन्यस्यदेवीतनुरूपान्गुणानथा॥चतुर्थपंचमाभ्यांतुस्वराभ्यांवरवर्णिनि॥ ॥मायाविद्यामयेदेवीअधऊर्द्धछदेन्यसेत॥पद्मस्व
रेणपद्मंचकल्पयित्वावरानने॥संध्यक्षरैर्महादेवीचतुर्दिक्षुयथाक्रमं॥वामाद्यापूजयेदेतावामाज्येष्ठाततःपरं॥रौद्रीचेद्वाचताध्येया
ज्वालारूपामहेश्वरी॥इत्थंसकल्पितेपीठेमूर्तिसंकल्प्यमूलत॥तस्यामावाह्यदेवेशंतंवुरुंदेवीपूजयेत॥चतुर्द्वारसमायुक्तंचतुरस्रत्रया
वृते॥अष्टपत्रांवुजेदेवीयजेदावरणैःसह॥आदावंगानिसंपूज्यकेशरेषुयथापुरादिकास्त्रेषुयजेद्देवीस्वस्ववीजादिकाःक्रमात्॥वा

मायाः पूर्वमुदिता रक्ता स्थूलेपना ॥ अरुणांशुकपुष्पाद्या ध्यातांबूलापूरितानना ॥ वल्लकीवादनरतामदविभ्रममंथरा ॥ कोणपत्रेषु वा
म्यर्च्या हूती वीजादिकाः क्रमात् ॥ दुर्भगा सुभगा चैव कराली मोहिनीति ता ॥ वद्धांजलिपुटाः किंचिदाननप्रवदनां पुजा ॥ देवीसदृशभूषा
द्यास्तासां नामानि पार्वति ॥ वकः श्वेतो मुगुश्चैव नकुली विंदुभूषिता ॥ वह्निपी थीद्वये देवी लोके शान्ता सुधान्यजेत् ॥ इत्थं यो भजते देवी
तुंवुरुं विधिवन्नर ॥ न तस्य दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ॥ ॥ अथ प्रयोग ॥ तत्र प्राग्वद्योगपीठन्यासांते प्राणायामं त्रयं कृत्वा शिर
सि वृस्लरो ऋषये नमः ॥ मुखे गायत्री छंदसे नमः ॥ हृदये श्रीतुंवुरुरुद्राय देवतायै इति विन्यस्य मम सर्वाभीष्टसिद्धये विनियोग इति कृ
तांजलिरुक्ता क्ष्म्रां हृदयाय ॥ क्ष्म्रीं शिरसे · क्ष्म्रूं शिखा · क्ष्म्रैं कवच · क्ष्म्रौं नेत्राय · क्ष्म्रः अस्त्राय इति विन्यस्य षडंगमंत्रान्कनिष्ठादितलांतेक
रयोर्विन्यस्य पुनः क्ष्म्रूं नम इति केवलवीजमेव कनिष्ठाद्यंगुलीषु विन्यस्य करयोश्च व्यापकं कृत्वा कनिष्ठिकयो ॥ क्ष्म्रूं श्रीतुंवुरुद्राय नमः ॥
अनामिकयो ॥ ॥ क्ष्म्रूं जयायै मध्यमयो ॥ क्ष्म्रूं विजयाः तर्जन्यो · क्ष्म्रूं अजिताः अंगुष्ठयो · क्ष्म्रूं अपराजितायै इति विन्यस्य पादादि मूर्द्धा
वधि क्ष्मरयूं नम इति मुष्टिना विन्यस्य पुनर्मूर्द्धादिपादपर्यंतं करतलाभ्यां वीजं विन्यस्य पुनः पूर्ववत्षडंगानि विन्यस्य शिरोवदनहृदयनाभि
गुदेषु प्राग्वद्देवं देवी श्च न्यस्य ध्यानाद्यात्मपूजांते पूजां च कं यथोक्तं कृत्वा संस्थाप्य तत्र मराऽवादि सिंहासनं प्राग्वत्पीठं संपूज्य सिंहासन
स्य पादेषु · ॐ धर्माय · क्ष्रं ज्ञानाय · लं वैराज्ञाय · लं ऐश्वर्या · तस्य गात्रेषु · लं अधर्माय ॥ लं अज्ञानाय · क्ष्रं अवैराग्याय · क्ष्रं अनैश्वर्याय इति मं

पूज्यतेतोनंतपद्मं आनंदकंदं संविन्नालं च संपूज्य प्रकृतिमयपत्रेभ्यो विकारमयकेशरेभ्यो · ॐ सर्वतत्त्वरूपायै · कर्णिकायै · इति संपूज
येन ॥ अत्र षट्स्वरेण · पद्ममध्ये स्वपाकर्णिकान्तस्थले ॥ पद्मस्य ज्ञागवपूरितत्वादिति ॥ ततः सूर्यादिमण्डलपूजांते : ह्रं प्रबोधात्मने सत्त्वाय · इ
त्यादिगुणात्रयेषु ॥ एं वामायै ॥ ऐं ज्येष्ठायै · ॐ रौद्रै · औं इच्छा · इति शक्तिचतुष्टयं पूजाजपेत् ॥ अत्र नवशक्तिपूजनं नास्तीति प्रतीयते विशिष्य च ·
सबीजशक्तीचतुष्टयमात्रस्योक्तत्वात् शैवपीठनवशक्तीवहभूते ह्ला शक्तेसंग्रहत्वेनो ॥ इत्थं पीठपूजां विधाय तत्र मूर्तिकल्पनादि षडंगपू
जांते अष्टदलेषु ॥ देवाद्यादिदलचतुष्टये प्रादक्षिणेन ॥ ऐं वामायै · ऐं ज्येष्ठायै · औं रौद्रै · औं इच्छायै अग्न्यादिकोणपत्रेषु ॥ शां दुर्भगायै · षं
सुभगा · सं करालै : हं मोहिनी · इति संपूज्येज्ञाघर्चनादि सर्वं समापयेदिति ॥ तथा ॥ लक्षमेकं जपेन्मंत्रं तद्दशांशं हुतेर्हुनेत् ॥ तर्पणं मा
र्जनं कृत्वा ब्राह्मणान्भोजयेत्तथा ॥ वायुवह्निपरांतस्थं बीजं स्मृत्वा जपेत्प्रिये ॥ ज्वलस्थूलमहारोगान्नश्यंति तेन तत्क्षणात् ॥ कुविनस्य हृदं
भोजे स्मृत्वा बीजमिदं जपेत् ॥ तत्कोपसमये ह्रीं घुं क्रं वं मंत्रप्रभावतः ॥ एवन्मंत्राभिजप्तं तु जलं प्रातः पिबेन्नरः ॥ हृद्रोगकामलाकाशश्वा
सविस्तंभकास्तथा ॥ नश्यंति तत्क्षणाद्देवनात्रकार्याविस्तंभकास्तथा ॥ नश्यंति तत्क्षणाद्देवनात्रकार्याविचारणा ॥ मण्डलेन वमाभारंभ
उत्कारम्यं महेश्वरी ॥ तत्र संस्थापयेद्रम्यान्कलशान् शान्तरूपमंत्रवित् ॥ देवं मध्यगस्तु तथा देवी हृति प्रपूजयेत् ॥ पुरोक्तवर्त्मना सिंचेत्कुल
जाप्याषितं शिवे ॥ स्तुवदंध्यापि सा सूते किमन्या कन्यका राजाभिषिक्ताविजयी भूयाद्देवी न संशयः ॥ भूतप्रेतादिकाः कृत्या रोगा नश्यंति से

वनात् ॥ अष्टपत्राम्बुजे मध्ये ससाध्यं वीजमालिखेत् ॥ केसरेषु स्वरान्देवी दिक्पत्रेषु लिखेत् ॥ पूर्वोक्तदेवीवीजानि विदिक्पत्रेषु पार्वति ॥ हृतीमं
त्रान्पूर्वमुक्तानालिखेत्तद्वहिः पुनः ॥ वृत्तद्वयं विधायाथ तयोर्मध्ये समालिखेत् ॥ ककारादिक्षकारान्तान्विंदुयुक्तान्महेश्वरि ॥ तद्वहि श्च
तुरस्रेण वेष्टयेज्जगदीश्वरि ॥ एतद्यन्त्रं महादेवी प्रोक्तं श्रीतुवरो महत् ॥ साधितं जपहोमाभ्यां भूतन्त्राशयनिक्षणान् ॥ रोगकृत्याग्रहान्सम्य
क्भूतापस्मारकादिकान् ॥ अथ श्रीकंठसंहितायां क्षेत्रपालमनुं वक्ष्ये शृणु देवी यथाविधि ॥ संवर्त्तोनुग्रहेन्द्वाद्यो रुद्रसंवर्त्तको पुन
आषाढीरेवतीयुक्तो लोहितोनंत संहितं ॥ पिनाकी चानंतयुतो वालीमेषस्तथा भवेत् ॥ महाकालेपि सर्गाद्यस्ताराद्याय: मनुः प्रिये ॥ संवर्त्तः
क्ष अनुग्रहः औः इंदुरनुस्वारः तेन क्षौमिति ॥ आषाधीन· तेन त्र इति लोहित ॥ प अनंत आ· तेन पा इति· पिनाकील· अनंत आ· तेन लाइ
ति· वालीय· मेखो न· महाकालो म: विसर्गः अ: तेन म इति· ताराद्य: प्रणवाद्य ॥ तथा ॥ मुनिर्व्रह्मा समुदिष्टो गायत्री छंद ईरितः क्षेत्रपालो
देवतास्य क्षवीजं परिकीर्त्तितं ॥ नमशक्तीरिति प्रोक्तमिष्टसिद्धिकरः परः ॥ षद्दीर्घभाजा वीजेन षडंगानि प्रकल्पयेत् ॥ ततः संचिंतयेद्देवं
क्षेत्रपालमनघी ॥ अंजनाद्रिप्रतीकाशमूर्द्धपिंगजटाधरं ॥ वर्त्तुलोग्रत्रिनयनभीमसर्पविभूषणं ॥ दंष्ट्राकरालवदनं भीमरूपं दिगंवरं ॥ द्वि
भुजं दक्षिणोहस्ते गदा वामे कपालकं ॥ दध्यनं चिंतयेद्देवी शैवपीठे समर्चयेत् ॥ पद्ममष्टदलं वाह्ये दिग्द्वारे भूगृहैर्वृतं ॥ कृत्वा तत्र समावाह्य गं
धाद्यैरर्चयेत्प्रभुं ॥ आदावंगानि संपूज्य पश्चाद्देवान्परमेश्वरी ॥ अर्चयेदष्टपत्रेषु किंकराष्टकमद्रिजे ॥ अनलश्चाग्निकेशश्च करालस्तदनंत

रं ॥ घण्टारवो महाकोपः पिशिताशन एव च ॥ पिंगाक्षश्चोर्द्धकेशश्च क्षेत्रपालस्य किंकरा ॥ तो केशाश्च तदस्त्राणि पूर्ववत्परिपूजयेत्
धूपदीपादिकं दत्वा नमस्तस्मै वलिं हरेत् ॥ वलिं नैवेद्यं तत्र नत्र एह्येहीति समुच्चावि दुष्यं तप्रहृदयं ॥ भंजये द्वितयं पश्चात्तर्नतर्नयद्वितयं ततः
विघ्नयुग्मं महातेस्याञ्जैरव क्षेत्रपालक ॥ वलिं वदे समुच्चार्य देवी गृह्ण द्वयं द्विठ ॥ वलिमंत्र समाख्यातं सर्वकामफलप्रदः ॥ द्विठः स्वाहाका
रः ॥ ~~अस्यानुगामं~~ ॥ ॥ अथप्रयोग ॥ तत्र प्राग्वद्योगपीठन्यासांते शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्री छंदसे नमः ॥ हृदये क्षेत्रपाल
यदेवतायै · गुह्ये क्षंवीजाय · पादयोर्नमः शक्तये इति विन्यस्य ममसर्वाभीष्टसिद्धये विनियोग ॥ इति कृतांजलिर्वदेत् ॥ ततः क्षां हृदयायः
क्षीं शिरसे · क्षूं शिखाः क्षैं कवचा · क्षौं नेत्राय · क्षः अस्त्राय फट् ॥ इति षडंगमंत्रानंगुष्ठादितलांतं करयोर्विन्यस्य हृदयादि षडंगेष्वविन्य
सेत् ॥ ततो ध्यानादि षडंगपूजांते अष्टदलेषु · अनलाय · अग्निकेशाय · करालायः घंटारवाय ॥ महाकोपाय · पिशिताशना · पिंगाक्षाय ऊर्द्धके
शाय - इति संपूज्य लोकेशार्चनादि सर्वं समापयेदिति ॥ तथा ॥ एकलक्षं जपेन्मंत्रं जुहुयात्तद्दशांशतः ॥ चरुणा घृतशिक्तेन तर्पणादि ततश्च
रेत् ॥ वलिनानेन संतुष्टः क्षेत्रपालो मुदान्वित ॥ ऐश्वर्यविजयारोग्यश्रीसौभाग्यादिसंपद ॥ ददाति रोडभूतार्तिकृत्याद्याश्च निवारयेत् ॥ अ
त्रराद्यौ वलिदानकाम्यं ॥ नित्यपूजामपि नैवेद्यं मंत्ररोवजपं ॥ ॥ सुंदराचार्यशिष्येणाश्रीनिवासेन धीमता ॥ चंडिकायां त्रिचत्वारिं
शंकोगाश्च प्रणीतायां प्रका ॥ ॥ इति श्रीशिवार्चनचंद्रिकायां त्रिचत्वारिंशः प्रकाशः ॥ ॥ कल्पे ॥ नवाक्षरे निविज्ञेयो यस्येशो वाग

मेस्फुटं ॥ तस्यास्य कथ्यते सम्यक् क्रमादिघ्यादिकं मया ॥ ऋषिरस्य शुकः प्रोक्तो विराट्छंद उदाहृतं ॥ दक्षिणामूर्त्ति रुद्रोस्य देवता समुदीरित ॥ दीर्घादियुक्तैर्मन्त्रार्णैराद्यैरंगानि कल्पयेत् ॥ स्वंगमंत्रयुतैः षड्भिरंगशुद्ध्यर्थमंजसा षडंगकरणादूर्द्धमक्षरन्यासमाचरेत् ॥ दृक्कर्णनाशिकाद्वंद्वमुखलिंगाग्रपायुषु ॥ शिरोललाटनयनघोणावक्त्रेषु च न्यसेत् ॥ हृत्पश्चोदरजान्वतःपद्मद्वंद्वेषु च क्रमात् ॥ हृत्कण्ठदोर्मूलककुद्वामदोर्मूलकेषु च ॥ नाशिकाक्षिश्रोत्रनासाद्वंद्ववक्त्रेषु च न्यसेत् ॥ कण्ठहृन्नाभिदोर्मूलपार्श्वयुग्मकरेषु च ॥ दोःपादमूलतन्मध्ये तदंतेषु च साधक ॥ ज्येष्ठादिकांगुलिद्वंद्वपर्वस्वपि च विन्यसेत् ॥ परिशिष्टांगुलीपर्वस्थानकेषु तथैव च ॥ एवमक्षरविन्यासं कृत्वा हंसारमाचरेत् ॥ प्रासादार्द्धपार्श्वेषु सर्वस्मिन्विन्यसेन्मुनि ॥ तारे माद्यस्वरं चैव ततः पंचाक्षरीं पठेत् ॥ आद्यश्वरं च तारे च दक्षिणामूर्त्तिरुच्यते ॥ विन्यस्तकरयोर्द्वत्राभिकघ्यादिकं क्रमात् ॥ हृत्कलानां तं न्यसेन्मंत्रैर्हृदाद्यामस्तकेषु च ॥ मस्तकादिचतुर्दिक्षु मूर्द्धन्यसेत् ॥ समस्तेनापि मंत्रेण व्यापकं न्यासमाचरेत् ॥ ज्योतिरिंगगतं देवं दक्षिणामूर्त्तिविग्रहं ॥ ध्यात्वा पंचोपचारेण मंत्री संपूजयेद्धिया ॥ आत्मानं च समर्प्यास्तेन तज्ज्ञावगतागत ॥ भावयित्वा पुनर्मंत्री देवध्यानं समाचरेत् ॥ शतयोजनोद्धृतशारिपं च समन्नति विस्मृते ॥ पटवृक्षमनुस्मृत्य तदधस्ताद्विचिंतयेत् ॥ मण्डपं रुचिरं सम्यक्तहस्तस्तंभसंयुत ॥ कथितं मण्डपं ध्येयं तन्मध्ये चापरं पुनः ॥ चतुस्तंभयुतं तत्र तत्र सिंहासनं परं ॥ तत्रासीनं देवदेवं दक्षिणामूर्त्तिविग्रहं ॥ शुद्धस्फटिकसंकाशं शशिखण्डविभूषितं ॥ व्याघ्रचर्मधरं शांतं जटामुकुटमण्डितं ॥ मुखपंकेरुहोद्धासिरविशोमग्नि

॥ शि·च ॥
॥ ४८३ ॥

लोचनं ॥ मुद्रापरश्वधमृगान्विभ्राणं वाहुभिस्त्रिभि ॥ ज्यान्वास्तकं दधानंतु वामवाहुस्तु शोभनं ॥ व्याकुर्वंतं समस्तानि ब्रह्मसंज्ञाणि साद
रं ॥ धूपन्नगलक्ष्मंतं सर्वमोहप्रणासनं ॥ शुकादिमुनिमुख्यैस्तु पुस्तकोज्वलपाणिभि ॥ उभयेदिरयावापि वाग्देव्या वापि वामन ब्रह्माणी
पद्मनाभेन नारदेन च संस्तुतः ॥ पूर्वादिदिक्षु प्रदासु दिक्षु वा न्यासु चक्रमात् ॥ वेदैर्वेदांतकैश्चैव वेष्टितं चिन्तयेद्ध्रुवं ॥ मीमांसा धर्म
शास्त्राभ्यां प्राच्यादिशिसुसेवितं ॥ इतिहासपुराणाभ्यां याम्यादिशिसुसेवितं ॥ पश्चिमे तर्कविद्याभिर्वेष्टितं परितोषिभि न्यासशास्त्रैस्त
थानित्यमुत्तरस्यामुपासितं ॥ त्रयस्त्रिंशद्भिरिंद्राद्यैर्देवैसंवेष्टितं विभुं ॥ यावंतो वेश्च देवस्य नीचिसं—वधिनःसुरा ॥ त्रीणि चैव सहस्राणि
षष्टित्रीणी शतानि च ॥ तावद्भिर्विबुधैः साक्षाद्गंधर्वाद्यैश्च संयुतं ॥ एवं भूतं महादेवं दक्षिणामूर्तिमादरात् ॥ भावयन्नपितज्ञावं सर्वज्ञश्च
भवेद्ध्रुवं ॥ एवं ध्यात्वा जपेन्मंत्रीपंचलक्षं समाहितः ॥ अष्टोत्तरशतं नित्यं यावज्जीवं जपेत्तुन ॥ पुष्पांजलीं तथा कुर्याद्देवस्य प्रीतयेत्सुधी
॥ ॥ इति श्रीनवाक्षरदक्षिणामूर्तिमंत्रकल्पसमाप्तः ॥ ॥ अथैतत्प्रयोग ॥ गुरुगणपदुर्गावटुकक्षेत्रपालसरस्वतीपरमात्मा
नस्ताणदिचतुर्थीनमोंता ॥ शिरोदक्षिणवामवाहुमूलदक्षवामकटिमूलाधारहृदयेषंजनिपुटंनिक्षिक्रमेणायजेत् ॥ पाशुपतास्त्रेण
दिग्बंधनाग्निप्राकारान्विधाय मूलेन प्राणायामत्रयं कृत्वा पाशुपतास्त्रेणापादिकेशांतं सदेहलोकं त्रपापकरं कृत्वा मूलेन केशा
दिपादांतं सदेहलोकयात्राकरं त्रयं विन्यस्य ऋष्यादिषडंगो विधाय ॥ दक्षिणवामनेत्रश्रोत्रनासिकास्यलिंगागुगुदेषु ॥ शिरो ललाट

॥ राम: ॥
॥ ४८३ ॥

नेत्रनासायास्यहृदुदरजान्वंतपादांतेषु॥ दक्षिणवामबाहुपादसंधिष्वंगुलीषु च मूलमंत्राक्षरैर्वेदद्वितैर्न्नमोन्तैः सृष्ट्या विन्यस्य॥ सकृन्मू
लेन केशादिपादांतं व्यापकं कृत्वा दक्षिणवामपार्श्वपृष्ठोदरहृत्कंठक्षबाहुमूलकक्षवामबाहुमूलेषु॥ शिरोललाटदक्षिणवाम
नेत्रनासिकाद्वयास्येषु॥ कण्ठहृन्नाभिदक्षिणबाहुमूलपार्श्वद्वयकटितटेषु॥ बाहुमूलदक्षिणवामबाहुसंध्यंगुल्याग्रेषु॥ पादमू
दक्षिणवामसंध्यंगुल्यग्रेषु॥ तर्जनीमध्यमाभ्यां ज्येष्ठादिकांगुलीद्वयद्वयसंधिषु विन्यस्य त्र्यवशिष्टै॥ सद्विरक्षरैर्वामदक्षिणकानि
ष्ठिकासंधिषु ततज्येष्ठामंगुल्यग्रेणाविन्यस्यनीयां सृष्ट्यनंतरमेतदंतं॥ क्रियमाणस्थितिन्यास॥ पुनरपि पूर्ववन्मस्त कृव्यापकं कृत्वा
वामपादतलतत्पृष्ठवामदक्षिणपार्श्वतत्समुदयजंघोरुवामदक्षिणपार्श्वेषु॥ एवं दक्षिणपादवामदक्षिणहस्तेषु च कर्त्तव्य नाभ्या
दिहृदंतं वामदक्षिणकक्षादितत्तत्स्थानांतेहृदयादिसमस्तकांतमस्तकादिचतुर्दिक्षुम्॥ ॥ व्यापिसंहारपिन्यस्यपुनपूर्ववद्व्या
पकं कृत्वा पुनरपि सृष्टिं विन्यस्य व्यापकं॥ पुनःस्थितिं विन्यस्य व्यापकं कुर्यात्॥ मूर्द्धास्यहृद्गुह्यपादेषु॥ ऊर्द्ध्वप्राग्दक्षिणपश्चिमोत्तर
वक्रेषु च ईशानादीविन्यस्य व्यापकं ऋष्यादिषडंगाविन्यस्य ध्यात्वा मानसैः॥ पंचोपचारैस्तन्मंत्रोच्चारपूर्वकं तन्मुद्राभिः संपू
ज्यप्राणप्रतिष्ठामूर्त्तिमूलमंत्रेण पुष्पांजलिभिः संपूज्य स्वात्मानं स्वकीयं च सर्वमीशानाय समर्पयेत्॥ ॐ अस्त्राहू० ॐ नं ईशि०
ॐ मं उं शिखो० ॥ ॐ पंकः ॐ वां अघो० ने ॐ यं ब्र॥ अस्त्र ध्यात्वा सांगं संपूज्य शेषं समापयेत्॥ ॥ अज्ञानेंधनदीप्ताय ज्ञानाग्निज्वा

॥शि·च॥
॥४७४॥

लरूपिणे ॥ आनंदाश्रहविः प्रीतसम्यकज्ञानं प्रयच्छमे ॥ ॥श्रीगुरुगणपतिवडुकेष्टदेवताभ्योनमः ॥ ॥अथवडुकपं
च ॥ तत्र श्रीकोले शाकारिप्रभेदे ॥ अथवक्ष्ये महामहादेवि भैरवस्येश्वरेश्वरि ॥ मंत्ररत्नं महागुप्तं दुष्टग्रहनिकृंतनं ॥ सर्वशत्रुक्ष
यंकरं सर्वव्याधिविनाशनं ॥ सर्वपन्नारकं देवी सर्वसौभाग्यदायकं वश्याकर्षणविद्वेषस्तंभनोच्चाटमारणं ॥ निग्रहे व्याधिकर
णे प्रसस्तमलिखेत्तकं ॥ उद्धरिष्यमहामंत्रं शृणष्वावहिता प्रिये ॥ व्योमाग्निशांतिथिरुद्धरेद्वीजमुत्तमं ॥ जलं च खेचराकर्णगता
कायनतः शिवे ॥ अनंतो लोहितश्वाक्षिः कर्णवामीनयुग्मकं ॥ अग्निष्पंचमोनंतयुतः पवनस्ववत्र ॥ क्रोधीकर्णयुतो वह्निः क
र्णीवामरमेश्वरी ॥ पुनरेतद्वयं देवि द्वितीयार्णाद्वतुष्टयं ॥ आद्यंबीजं महेशानि पुनरेवं समुद्धरेत् ॥ एतद्विंशतिवर्णात्मा मंत्रराजः
समुद्धृतः ॥ गोपनीयः प्रयत्नेन त्रैलोक्येष्वपि दुर्ल्लभं ॥ व्योमहः आग्निरेफ· शांतिई· तिथिर्विंदुस्तेनह्रीं इति लं वं च खेचरी टकउतेन ड
इति कायस्वरूपं अनंतः आः लोहितः पः अक्षिर्दः कर्णवान् उकारयुक्तस्तेन दु इति मीनयुग्मं धकारद्वयं तेन द्ध इतिः वह्निरेफः रपंच
मोणकारः अनंतश्चातेन णा इति : पवनोयः क्रोधीकः कर्णोउतेन कु ॥ वह्निः रः तेकर्णोउतेन रु ॥ पुनरेतद्वयं कुरु द्वितीयार्णादि चतुष्ट
यं वडुकाय इति ॥ तथा ॥ ऋषिरुक्तो महादेवी बृहदारण्यसंज्ञित ॥ अनुष्टुप्छंद इत्युक्तं भैरवो देवता शिवे ॥ शक्तीबीजं च शक्तिश्च आ
कीलकमुदाहृतं ॥ आद्याक्षरयुगं देवी चंडमस्वांतिकं कुरु ॥ सद्यादि प्रतिलोमेन नपुंसकविवर्जितं ॥ एतद्वीजद्वयाद्यास्तन्य

॥राम॥
॥४७४॥

स्तब्धाः पंचमूर्त्तय ॥ अंगुष्ठादिष्वंगुलीषु मूर्द्धास्य हृदयेषु च ॥ सगुह्यचरणे चैव मुर्द्धास्ये दक्षकर्णके ॥ वामकर्णे च चूलाधस्तूर्द्ध्वंतिकोत्त
रे ॥ पश्चिमेपि च वक्त्रेषु मूर्त्तयस्ता महेश्वरी ॥ ईशानाख्यस्तत्पुरुषो घोरो देवी तृतीयक ॥ वामदेवश्चतुर्थस्यात्सद्यो जातस्तु पंचम ॥ पुनराघ्रा
णायुगले षड्दीर्घस्वरभेदितं ॥ कृत्वा तैस्तु षडंगानि जातियुक्तानि कल्पयेत् ॥ श्रीरुद्रयामले ॥ श्रीदेव्युवाच ॥ देवदेव ॥ देवदेव जगन्नाथ
शंभो त्रैलोक्यनायक ॥ भैरवस्य विधिं भूयाममाचक्ष्व महामते ॥ येन कार्याणि सिद्ध्यन्ति साधकानां निरंतरं ॥ सुगोप्यमपि देवेश विधिं प्रब्रू
हि संकर ॥ यतोहं ते प्रिया देव सदा वर्त्ते निरंतरं ॥ ततः कृपां समाधाय विधिं कथय शोभनं ॥ श्रीभैरव उवाच ॥ शृणु देवी प्रवक्ष्यामि बडुक
स्य महात्मन विधानं परमं गोप्यं ब्रह्मादीनां सुदुर्ल्लभं ॥ सूत्रेणैव सुसंक्षेपात्कथयिष्यामि वल्लभे ॥ येन विज्ञानमात्रेण त्रैलोक्यं साधयेत्सु
धी ॥ एवं दासेन देवेशि तपसे मंदराचले ॥ गतोहपामानंदान्मूलप्रकृतिमीश्वरी ॥ चक्रे परमसंतुष्टा तपसा भाविता त्मना ॥ साकाशरूपीणी
देवी प्रोवाच वचनं मुदा ॥ तुष्टाहं संकर प्रीता वरं वरय दुर्ल्लभं ॥ इति वाक्यं च मे श्रुत्वा मूलभूता सनातनी ॥ उवाच यादृशं देवी विधानं शृणु वल्ल
भे ॥ बडुकाख्यस्य देवस्य भैरवस्य महात्मन ॥ ब्रह्मविष्णुमहेशाद्यैर्वंदितस्य दयानिधे ॥ न्यासा यके दश प्रोक्ता बडुकाराधने शिवे ॥ यान्विना
नैव सिद्धिः स्याद्वर्षाणामयुतैरपि ॥ आदौ न्यासं प्रेतबीजेन पश्चात्साक्षात्सिंहबीजेन देवी ॥ न्यासं कार्यं क्षान बीजेन तद्वन्मंत्रो बीजन्यासमध्ये
विदध्यात् ॥ महाश्रीबीजतो न्यासं प्राणबीजेन चापरं ॥ घंटाबीजस्य न्यासं विधाय स्वानीबीजतः ॥ मूलबीजेन पश्चाच्च न्यासं कृत्वा महामपि

॥ शि॰ व ॥
॥ ४७५ ॥

मति ॥ भ्रामरीवीजतो न्यासं विदध्यात्त्रीणि संयुतः ॥ एवं न्यासं सदा यैषु न करोति नरोपदे ॥ तां शापेहे वरारोहे तावन्मंत्रो न सिध्यति ॥ ॥
श्रीदेव्युवाच ॥ देवदेव जगन्नाथ शंभो संसारतारक ॥ कृपां कृत्वा न्यासविधिं प्रकथेन निरूपय ॥ कालेन हयव्याल्पेन साधकः सिद्धिमाप्नुया-
त ॥ गोमती योनमंत्रो यं वडकाख्या जगद्गुरो ॥ तथा निरूपय विभो बालकोपि यथा लभेत् ॥ ॥ श्रीशिव उवाच ॥ शृणु देवी जयत्पूज्ये न्यासं वी-
जानि शोभने ॥ एकयानि यथा शश्वत्कथयामि हिताय ते ॥ न्यासेषु येषु वीजानि न्यस्तव्यानि महात्मभि ॥ तथा तत्र प्रवक्ष्यामि शृणु मन्त्रा-
णामहक्रमे ॥ शिवचन्द्रशिवैः शक्रस्वरोपेतैः सविंदुभिः ॥ प्रेतवीजं समाख्यातं तेन गानि न्यसेच्च षट् ॥ हृच्छिरश्चशिखानेत्रकवचास्त्रेषु सुं-
दरि ॥ शिवोहंवेङः सशक्रस्वरः स्त्रौं तथा ॥ शिवचन्द्रोससंवर्त्तो कालवामाक्षिभूषितो ॥ विंदुनादयुतो देवी न्यासात्सान्निध्यकारकं ॥ सिंहवी-
जमिदं देवी विन्यसेत्सुरसुंदरि ॥ संवर्त्तः क्ष कालोम वामाक्षि ई विंदुरनुस्वार ॥ नादोर्द्धचन्द्रः ॥ तथा ॥ मूर्द्धि वाहोश्च लिंगे च नाभौ हस्तांगुली-
षु च ॥ पादांगुलीषु देवेशि विन्यसेत्परमेश्वरि ॥ अजेशोग्निसमारूढः शक्रस्वरशशीयुतः ॥ कारणवीजमिदं प्रोक्तं विन्यसेत्परमेश्वरि ॥ अ-
ज्येशः हस्त्रग्निरः शक्रस्वरस्त्रौः शशिविंदुतथा ॥ ब्रह्मरंध्रमुखे नेत्रयुगे ग्रीवानशोरपि ॥ कपोलयोश्च चिवुके ब्रह्मरंध्रे पुनर्न्यसेत् ॥ कालश-
क्र शिवाः सद्यो विंदुनादविभूषिता ॥ मन्मावीजं महेशानि पादयोर्हस्तयोस्तथा ॥ नेत्रयोः श्रोत्रयोः कुक्षौ मेढ्रे चैव प्रविन्यसेत् ॥ कालः सशक्रः
लशिवो हसयच्च स्त्रौ ॥ तथा ॥ अस्याग्निवामकर्णोंदुनादैर्विसमीरितं ॥ महालक्ष्मीवीजमीशानि चिवुके पादयोर्गले ॥ पादयोर्हृदयपादद्वयेना

॥ राम: ॥
॥ ४७५ ॥

मौच पादयो॥ अस्थिश· अग्निर· वामकर्णाउकार· इंदुनाभौ प्राग्वत्॥ तथा लोहितोग्न्यासनो वामकर्णाविंदुभिरड्डिजे॥ धाराणावीजं मुखे देवी
हृदये नाभिमण्डले॥ हृदये पायोर्देवी हृदये दक्षकुक्षिके॥ हृदये वामकुक्षौ च हृदये दक्षपत्तले॥ हृदये वामपादे च हृदये दक्षिणात्रके॥ हृ
दये वामश्रोणौ च हृदये दक्षकर्णिके॥ हृदये वामकर्णौ च हृदये विन्यसेत् प्रिये॥ लोहितेयः अग्निर वामकर्णाडु वक्रुवचनान्त्वादौपिज्ञेय॥
तथा॥ कन्तुरियोग्निमारूढो वामकर्णोनुनादवान्॥ घराणवीजं महादेवी विन्यसेत्परमेश्वरी कन्तुरीयः॥ घ· अन्यत्प्राग्वत्॥ घंटिकायां च
नाभौ च घंटिकायां हृदि न्यसेत्॥ पादयोर्हृदये कण्ठे मस्तके मस्तके कण्ठे॥ स्तनयोर्गुल्फयोश्चैव गुल्फयोस्तनयोर्न्यसेत्॥ चन्द्रेशो वायुव
र्णो वामकर्णोनुनादवान्॥ ख्यातिवीजमिति प्रोक्तं विन्यसेद्विघ्नाधकः॥ चण्डेश्वर· वायुयावद्धादि प्राग्वत्॥ मस्तके पादयोश्चैव जिह्वायां ना
भिमण्डले॥ गले च हृदि देवेशि जघयोस्त्वत्रपोस्तथा॥ कर्णयोर्वाहुयुग्मे च स्तनयोश्च न्यसेत् प्रिये॥ प्रणाया मूलवीजं स्याद्धृदये पादयोः
प्रिये॥ हस्तयोः कर्णयोर्नासापुटेश्चैव प्रविन्यसेत्॥ छिरण्डुरेवली शक्रु चण्डसत्रिमूर्त्तिभिः॥ सविंदुनाद्यैर्देवेशि भ्रामरीविजमीरितं॥ छि
रण्ड· भैरवभवती: र: शक्र· ल· चण्डस: हसौ ह त्रिमूर्त्तिः इ विंदुनादौ प्राग्वत्॥ मुखे नेत्रद्वयोः कर्णद्वये चैव कपोलयोः कराठदेशे च स्तन
योर्हृदि पादयो॥ चिवुके मस्तके वाह्वोः स्कन्धयोर्दन्तलेखयो॥ ब्रह्मरन्ध्रे तथाधारे भ्रूमध्ये च न्यसेत् प्रिये॥ इति न्यासान् समाधाय पुरश्चर
णाकारक॥ यथोक्तन्यासकारी च यदि नो वरमाप्नुयात्॥ तदा कन्या दूषणात्थं मम पापं प्रजायते॥ न्यासैरेतैर्वरारोहे ब्रह्महत्याः

॥शि·वं॥
॥४७८॥

विनश्यति॥ का कथान्यस्य पापस्य सत्यं सत्यं वदामि ते॥ मर्मन्यासानथो वक्ष्ये त्रीदेवस्य महात्मनः॥ यान्विधाय नरो विंदेत्सिद्धिं लोकेप्
सुदुर्लभां॥ श्याकूटबीजं विन्यस्य मस्तके गण्डयोर्मुखे॥ कालबीजं चक्षुषोश्च कर्णयोरपि विन्यसेत्॥ नाभौ लिंगे गुदे वापि विद्याबी
जं कपोलयो॥ ब्रह्मरंध्रे दंतपंक्तौ विन्यसेत्साधकोत्तमः॥ ॥श्रीदेव्युवाच॥ भगवन्करुणासिंधो दीनबंधो जगद्गुरो॥ कृपां कृत्वा समाख्या
हि सर्वेरेव पृथक्पृथक्॥ साधकस्तु यथा सिद्धिमचिरेणैव विंदति॥ ॥श्रीमहादेव उवाच॥ शृणु देव प्रवक्ष्यामि न्यासमत्र यथाविधि पृ
थक्॥ दीर्घाकालाग्निशक्रारणमधःकालानलात्मका॥ वह्निस्थिवह्निगगनचंद्रावामाक्षिमण्डिता॥ बिंदुनादसमाक्रांता विजमाकूटमु
ख्यं॥ दीर्घा न· कालो म· अग्निर· शक्र ल· कालो म· वह्नि र॥ वामाक्षि ई विंद्वादिश्चावत्॥ जनत्रिंशाद्धि वारांन्यदेवश्शैलकूनाग्रुना॥ विंदुनुर्य
स्वराभ्यां वे कालबीजमुदाहृतं॥ तथा॥ समवर्त्तीनलचंद्राग्निशिवचंद्रत्रिमूर्त्तिभि॥ सविंदुनादैर्देवेशि विद्याबीजं समुद्धृतं॥ संवर्त्तः क्ष· अ
नलः र चंद्र· सः अग्नीर· शिवो हः चंद्रः सत्रिमूर्त्ति· ईः विंद्वादिश्चावत्॥ तथा॥ एतन्न्यासत्रयं प्रोक्तं साधकाभिष्टसिद्धिदं॥ यस्य प्रसादमा
साद्य भैरवशीघ्रसिद्धिदः॥ शृणु देवी प्रवक्ष्यामी शृंखलान्यासमुत्तमं॥ यस्य प्रसादाच्च शिवे वटुकः सिद्धिदो भवेत्॥ मस्तके दक्षनेत्रे च वा
मनेत्रे तथैव च॥ दक्षकर्णे वामकर्णे कपोले दक्षिणे तथा॥ वामकपोले दक्षे च नासिके वामके पुन॥ चिवुके थगाले स्कंधे दक्षिणे वामके तथा
स्तने दक्षे च वामे च हृदये दक्षकुक्षिके॥ वामकुक्षौ च नाभौ च दक्षजंघे च वामके॥ लिंगे मेढ्रे दक्षिणे च वामे च करवर्णिनि॥ मधुशब्दो वृष

॥राम॥
॥४७८॥

गावाचीदक्षवामनिर्देशाल्लिंगस्योक्त्वान्यावेति ॥ मूलाधारंदक्षगुल्फे तथैवच ॥ दक्षपादेचवामेचदक्षपादांगुलीषुच ॥ वामपादांगुलीष्वेवं
ब्रह्मरंध्रेतथैवच ॥ दक्षपादेचवामेचदक्षपादांगुलीषुच ॥ वामपादांगुलीष्वेवंब्रह्मरंध्रेतथैवच ॥ मूलाधारेपुनश्चैवपुनर्वैब्रह्मरंध्रके ॥ मह
वराख्यवीजंचविन्यसेत्साधकोत्तम ॥ वंडस्र्यौं पुनस्तौ चमहीब्रह्मा महीप्रिये ॥ त्रिमूर्त्तिरस्थिवह्न्यंबुधरणीजलं ॥ षष्ठस्वरत्रिमूर्त्तींदुनादभूषित
मस्तकं ॥ महापराख्यवीजंतेकथितंसुरवंदिते ॥ वडस्र्यौंहस्तौपुनेस्तौवडस्र्यौंह्स्माविन्यर्थं ॥ महीलवस्नाकः महीलत्रीमूर्त्तिः इस्थिरा· वह्नी
रंबुवः धरणीलः जलंवः षष्ठस्वरडः त्रिमूर्त्तिः इविंदुनादेप्रास्वत् ॥ मासेनानेनसुश्रोणिसाक्षाच्छिवसमोभवेत् ॥ प्रोक्तमादेचस्थानेचतां
नेफांतेतथांतके ॥ वडुकस्यपरंपूज्यंमातृकान्याससुत्तमं विज्ञायसाधयेन्मात्रः समस्यः शिवतांव्रजेत् ॥ विनेमंमातृकान्यासंयोन्येनन्यासमा
चरेत् ॥ कडकस्तस्यकुपितः सद्यःस्तोप्रप्रयछति ॥ तस्मन्यासः प्रकर्तव्यः साधकेनविपश्चिता सर्वेषुमातृस्थानेषु· वपुपाविचहेतवे ॥ मातृका
न्यासमेवंहित्यक्त्वायोन्यसमाचरेत् ॥ वर्षकोटिप्रयत्नेनसासिद्धिर्नैवविंदति ॥ उकारमादौसंयोज्यसर्वंपूर्ववदाचरेत् ॥ अंयंमत्तमातृकाख्योन्या
न्यासश्रूडामणिर्भवेत् ॥ ध्यानानिपूर्ववद्देवीकथितानिमहामते ॥ अथान्यन्यासमाख्यास्येशृणुष्ववरवर्णिनि ॥ सरस्वतीमातृकाख्यःसद्यः
सिद्धिप्रदायकं ॥ न्यसेन्महामंत्रेवीजमातृकास्थानकेषुच ॥ सरस्वतीमहादेव्याः सद्यः सिद्धिप्रदायक ॥ क्रोधीसाधःपिनाकीशदारुकेशभुजं
गाकौ ॥ भृग्वीशनकुलीशोचभुजंगोनकुलीशको ॥ संवर्त्तवकरेवत्यस्त्रिमूर्त्तीन्दुविभूषिता ॥ महासरस्वतीवीजंकथितंदेवडर्लभं ॥ क्रोधीशः· क·

पिनाकीशः भदारुकेश·ङ भृग्वीश·स·नकुलीशो ह संवर्त्तः क्षवकः श·रेवतीर· त्रिमूर्त्तीईईन्तुर्विन्दुः॥ तथा॥ इति न्यासाः समाख्याता वड
काराधने शिवे॥ सद्यसिद्धिःकरा देवि भाग्यलभ्या न संशयः॥ न्यूनन्यासस्य कर्त्ता यः स घोरां हानिं सवाप्नुयात्॥ एतस्मादधिके न्यासान्निःस्वस्या
जन्मजन्मनि॥ ॥ तथा कौलेशकोटिप्रभेदे॥ एवंन्यस्ततनुर्देवी ध्याय षड्कभैरवं॥ शुद्धस्फटिकशंकाशं द्विनेत्रोत्पलशोभितं॥ कुटि
लालकसंवीतं चारुस्मेरमुखाम्बुजं॥ नानारत्नमयाकल्पैः किंकिणीजालनूपुरैः॥ दीप्तश्मश्रुभ्रावरावीतं द्विभुजं दक्षिणे करे॥ त्रिशिखं सव्य
हस्ते च दधानं दधानं दराणमद्भुतं॥ वडवेषधरं संभसात्विकं साधकस्मरेत्॥ ॥ रुद्रयामले॥ कपालं वामहस्ते तु सक्ष्मदराणं च दक्षिणे
इमुक्तं॥ सात्विके चतुर्भुजं ध्यानं तत्रैव॥ श्वेतवर्णां चतुर्वाहुं जटामुकुटधारिणं॥ त्रिशूलपाशहस्तं च दराणहस्तं कमण्डलुं॥ एवं ध्यात्वा य
जेद्देवं शैवे पीठे सुरेश्वरी॥ अष्टपत्रं महादेवी कर्णिकाकेसरोज्वलं॥ पद्मं विरच्य तन्मध्ये कर्णिकायां सुरेश्वरी॥ कृत्वा षट्कोणमस्यान्त
स्त्रिकोणोपरि कल्पयेत्॥ व्योमपद्मं च तन्मध्ये वसुपत्रविराजितं॥ कर्णिकाकेशरैर्युक्तं तन्मध्ये वडकं यजेत्॥ मूर्त्तिं मूलेन संकल्प्य तस्या
मावाहयेत्प्रभुं॥ सद्योजातेन मंत्रेण मूलाद्येन महेश्वरी॥ स्थापयेद्वामदेवेन मूलाद्येन च सुव्रते॥ संनिधाप्याथ मूलेन स्वमुद्रया॥ अघोरा
तेन मूलेन सन्निरोधनमाचरेत्॥ मूलेन संमुखीकुर्याद्देवपुराणथमूलत॥ षडंगैः सकलीकृत्वामृतिकृत्य च मूलतः॥ परमीकरणं चैव स्व
स्वमुद्राभिरुक्तवत्॥ एतत्सर्वं विधानं च ततो ध्यात्वा समाहितः॥ कृत्वा सुस्थापनं तस्य मुद्राः संदर्शयेदथ॥ लिंगाद्याः पूर्वमुद्दिष्टा योगितमु

डातुनत्त्वया ॥ तां दर्शयेन्नन्तुरूपमूलाभ्यां च महेश्वरी ॥ ईशानेन नमस्कुर्यान्मूलाद्येन महेश्वरी ॥ आसनं तोयैश्च पुष्पान्तैरुपचारैस्ततो वि
येत् ॥ ततो देवाज्ञया सम्यग्यजेदावृत्तिदेवताः ॥ न्यासस्थानेषु देवस्य देहेंगानि समर्चयेत् ॥ देवस्य देहे देवे ॥ शिवं च मूर्त्तीर्यजेत्क्रमात् ॥
अंगुली देहवक्त्रेषु त्रिविध न्यासमार्गत ॥ कर्णिकायां जयेत्पश्चात्पूर्वे दक्षोत्तरे च ॥ पश्चिमे देवमूर्त्तौ च व्योमपद्मदले यथ ॥ असितांगरु
रुचंडक्रोधमुन्मत्तभैरवं ॥ कपालिनं भीषणं च संहारं च समर्चयेत् ॥ देवायतोष्टपत्रेषु ॥ यजेत्कोणत्रये पुन ॥ दिशयामाधिपो स्थानाधि
पतिं संयजेत्पुनः ॥ त्रिकोणं भुजरेखासमे घनादभ्रचंडके ॥ कालदूमं च षट्कोणेषु षडंगानि यजेद्देवी यथाविधी ॥ ततोष्टदलपद्मान्तः
षट्कोणाद्बहिरद्रिये ॥ पूर्वादीशानपर्यन्त वक्ष्यमाणान्समर्चयेत् ॥ डाकिनीपुत्रकान्देवी राकिनीपुत्रकानपि ॥ लाकिनीपुत्रकान्पश्चा
त्काकिनीपुत्रकानथ ॥ शाकिनीपुत्रकान्भूयो हाकिनीपुत्रकांस्तत ॥ मालीनीपुत्रकान्देवी देवीपुत्राननतःपरं ॥ उमापुत्रान्द्रुद्रपुत्रान्मा
तृपुत्रानपीश्वरी ॥ वामभागे तु देवस्य यजेद्देतान्क्रमेन तु ॥ इन्द्रेशानदिशोर्मध्ये तु ऊर्ध्वमुख्याः सुतान्यसेत् ॥ अधोमुखा सुतान्देवी यजेद्र
क्षोजलेशयो ॥ अन्तराले महेशानि पुत्रवर्गास्त्रयोदश ॥ रुद्रयामले तु रुद्रपुत्रानंतरं ॥ दशग्रामाधिपाश्चैव स्थानाधिपमनुक्रमात् ॥
मेघनादप्रचंडायेकाल हन्तं तथैव च ॥ इत्युक्तं ॥ यथोपदेशमत्रापीति ॥ इत्थं संपूज्य तत्राद्यपद्मपत्रेषु पूजयेत् ॥ ब्रह्माणीपुत्रकं पूर्वे म
हेशीपुत्रमीश्वरे ॥ वैष्णवीपुत्रकं सौम्ये कौमारीपुत्रमीश्वरे ॥ वैष्णवीपुत्रकं सौम्ये कौमारीपुत्रमानिले ॥ इंद्राणीपुत्रकं देवी पश्चिमे पूजये

न्नैतः॥ देवेशि नैरृते पश्चान्महालक्ष्मीसुतं यजेत्॥ वाराही पुत्रकं देवि दक्षिणे वह्निकोणके॥ चामुण्डा पुत्र मध्ये लोकेश वडुकानु
मे॥ अष्टपत्राद्वहिर्देवि चतुरस्रान्तरे पुनः॥ अष्टदिक्षु यजेद्देवान् हेतुकं त्रिपुरान्तकं॥ वेतालमग्निजिह्वं च कालान्तकमतः परं॥ करा
लमेकपादं च भीमरूपं महेश्वरि॥ अष्टपत्रेन्द्रेशयोर्मध्ये यजेदचलमद्रिजे॥ हाटकेशं महेशानि याम्यराक्षसयोस्तथा॥ चतुरस्रादिरेखा
यां दिग्विदिक्षु सुरेश्वरि॥ अंतरालेषु चाष्टौ वै द्विकराठवीन्सुरेश्वरि॥ ततो द्वितीयरेखायां क्रोधीशादीन्महेश्वरि॥ आषाढ्यंतान्सम
भ्यर्च्य तृतीयायां समर्चयेत्॥ चण्डीश्वरादिभृग्वंतान्नकुलीशादिकान्शिवे॥ देवस्य वामभागे तु पूजयेत्परमेश्वरि॥ दिवंतरिक्ष
भूमीस्थान्योगीशान्शक्तीसंयुतान्॥ योगिनीश्च समभ्यर्च्य दीशानादिषु सुंदरी॥ कोणेषु देवदेवेशि दिगीशानायुधैः सह॥ चतुरस्रा
द्वहिर्देवि पूजयेदुक्तवर्त्मना॥ इति संपूजयेद्देवं वडुकं भक्तितत्परः धर्मार्थकाममोक्षाणां पतिर्भवति मानव॥ ॥ अथ प्रयोग
तत्र प्राग्वत्स्नानः कृत्यादि विंदुविसर्गमातृकान्यासानंतरं हकारादिक्षकारान्तान्वर्णान्वामकरांगुलिमूलादितत्पर्णि वंधांतेषु स्थाने
षु विन्यसेत् कलामातृकादि श्रीविजादिमातृकान्यासानंतरं पुनश्च श्री अं नम इत्यनंतरं आं नम इत्यादि क्षं नम इत्यंते केवलाक्षराणि शु
द्धमातृकादेव विन्यस्य पुनर्मकारादौ श्रीवीजं पुनः थकारादौ पुनः क्षकारांते॥ श्री नमः इति विन्यस्य ततः कामवीजादिमातृकादियोग
पीठन्यासांते मूलेन प्राणायामत्रयं कृत्वा शिरसि वृहदारण्यकऋषये नमः॥ मुखे अनुष्टुप्छंदसे नमः हृदये श्रीवडुकभैरवाय देवताये

नमः॥ गुह्ये ह्रीं वीजाय· पादयोः ह्रीं शक्तये नमो क्रां कीलकाय· इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्ध्यर्थे विनियोग ॥ इति कृतांजलि
र्वदेत्॥ ततः अंगुष्ठयोः ह्रों वों ईशानाय नमः॥ तर्ज्जन्योः हें वें तत्पुरुषाय॥ मध्यमयोः हुं वुं अघोराय अनामिकयोः॥ हिं विं वामदेवा· क
निष्ठिकयोः॥ हं वं सद्योजाताय ततः शिरसि मुखे हृदये गुह्ये पादयोश्चैताः एवं मूर्त्तीर्विन्यस्य पुनः शिरसि ह्रों वों ईशानायोर्ध्ववक्त्राय मुखे
हें वें तत्पुरुषाय· पूर्ववक्त्रा· दक्षः हुं वुं अघोराय· दक्षिणवक्त्रा॥ वामकर्णे· हिं विं वामदेवायोत्तरवक्त्रा॥ चूडाधः हं वं सद्योजाताय
पश्चिमवक्त्राय· इति विन्यस्य॥ ह्रां वां हृदयाय नमः॥ ह्रीं वीं शिरसे॥ ह्रूं वूं शिखायै॥ ह्रैं वैं कवचायै॥ ह्रौं वौं नेत्राय· ह्रः वः अस्त्राय फट्
इति षडंगमंत्रानंगुष्ठादितलांतं करयोर्विन्यस्य हृदयादिषु च विन्यस्यास्त्रमंत्रेण तालत्रयं छोटिकाभिर्दशदिग्बंधनं च कृत्वा॥ पुनः ह्स्फ्रौं
इति प्रेतवीजेन· प्राग्वत् षडंगन्यासं कृत्वा॥ शिरसि ह्स्ख्फ्रीं नमः· वाहुो॥ ह्स्ख्फ्रीं नमः॥ एवं लिंगनाभिहस्तांगुलीषु चेदमेव सिंहवीजं वि
न्यसेत्॥ ततो ब्रह्मरंध्रे ह्स्रौं नमः॥ एवं मुखनेत्रद्वयनासाकपोलद्वयचिवुकब्रह्मरंध्रेषु मेदमेव वीजं विन्यस्य पादयोः ह्स्लैं नमः॥ ए
वं हस्तद्वयनेत्रद्वयश्रोत्रद्वयकुक्षिद्वयलिंगेषु चेदमेव वीजं विन्यस्य॥ चिवुके श्रृं· एवं पादयुगलपादद्वयहृदयपादद्वयनाभिपा
दद्वयेषु विन्यस्य पुनर्मुखे ब्रुं नमः॥ एवं हृदयनाभिहृदयपादद्वयहृदय॥ दक्षकुक्षिहृदयदक्षपादगलहृदयवामपादतलहृदयद
क्षनेत्रहृदयवामनेत्रहृदयदक्षनासाहृदयवामनासाहृदयदक्षकर्णहृदयेषु विन्यस्य॥ पुनर्घंटिकायां घ्रूं नमः· एवं नाभिघंटि

काहृदयपादद्वयहृदयकटिमस्तककटिस्तनयद्वयगुल्फद्वयस्तनद्वये वेदमे ववीजं विन्यस्य॥ मस्तके खूं नमः॥ एवं पादद्वयग्रीवा-
नाभिगलहृदयजंघाद्वयनेत्रद्वयकर्णद्वयबाहुद्वयस्तनद्वयेषु विन्यस्य मुखे भ्रलस्हीं नमः॥ एवं नेत्रद्वयकर्णद्वय·कपोलद्वयकंठ-
स्तनद्वयहृदयपादद्वयचिवुकमस्तकबाहुद्वस्कंधद्वयदंतपंक्तिद्वयब्रह्मरंध्रमूलाधारभ्रूमध्येषु विन्यस्य॥ शिरसि नम्लमरक्षरञहसीं
नमः॥ एवं गराग्रद्वये मुखे वेदमे ववीजं विन्यस्य॥ नेत्रयोः क्रूलसरमंरीं नमः॥ एवं कर्णद्वयनाभिलिंगगुदेषु वेदमे ववीजं विन्यस्य॥ क-
पोलयोः॥ क्षरसरह सीं नमः॥ एवं ब्रह्मरंध्रे दंतपक्तौ श्वेदमे ववीजं वीन्यस्य मस्तके॥ सहसलकलइंशंखरुवटुईं नमः॥ एवं दक्षनेत्रवा-
मनेत्रदक्षकर्णदक्षकपोलवामकपोलदक्षगराग्रचिवुमलदक्षस्कंधवामस्कंधदक्षस्तनवामस्तनहृदयदक्षकुक्षिवामकुक्षिदक्षजंघा-
वामजंघालिंगदक्षवृषणवामवृषणमूलाधारदक्षगुल्फदक्षपादवामपादतद्वयांगुली ब्रह्मरंध्रमूलाधारब्रह्मरंध्रेषु न्यसेदित्येवं मासा-
न्यस्य॥ ततो ध्यानादि मूर्त्तिकल्पनांते मूलं सद्योजातायनमः इति प्रागुक्तविधिनावाह्य मूलमुच्चार्य वामदेवायनमः इति प्राग्वत्संस्थाप्य मू-
लेन सन्निधाप्य मूलं अघोरेभ्यो नमः· इति प्राग्वत्सन्निरुध्य संमुखीकरणादि प्राकुनिष्ठांते लिंगमुद्रानंतं मूलेन तत्पुरुषायनमः· इति योनि-
मुद्रां प्रदर्श्य त्रिशूलाख्यास्त्रमुद्रां यथापूर्वमेव प्रदर्श्य मूलं ईशानायनमः॥ इति नमस्कारमुद्रया प्रणम्यासनादिपुष्पांतानुपचारान्तु
पंवर्यदेवस्य देहे षडंगन्यासस्थानेषु ह्रां वां हृदयायनमः॥ ह्रीं वीं शिरसे नमः इत्यादि नमोंतान्येषडंगानि संपूज्य देवस्य देहे मूर्त्तिन्यास-

स्थानेषु पंचदशास्वपि न्यासोक्तप्रकारेणैव त्रिरावृत्य पंचमूर्त्तीः संपूज्य ततो व्योमपद्मकर्णिकायां पूर्वदक्षिणोत्तरपश्चिमेष्वीशानादिचतुर्मूर्त्तीः
संपूज्य पंचमीं देवस्य मूर्त्तौ पूजयेत्॥ ततोन्तरषट्दलेषु देवाग्रमारभ्य प्रादक्षिण्येन ॐ अं असितांगभैरवाय नमः एवं ईं रुरुभै· ऊं चण्डभै· ऋं क्रो
धभै॥ लृं उन्मत्तभै· एं कपालिभै॥ ॐ भीमाय कोणेषु हृदाद्यं चतुष्टयं देवाग्रकोणेनेत्रं तदादिचतुर्दिक्षु चास्त्रमिति षडंगानि प्राग्वत्संपूज्याष्टदल
पद्माभ्यन्तरेनेषु कोणाद्बहिर्देवाग्रमारभ्य प्रादक्षिण्येनाष्टदिक्षु ॐ डाकिनीपुत्रेभ्यो ॐ राकिनीपुत्रे॥ ॐ लाकिनीपु ॐ काकिनीपु· ॐ शाकि
नीपु· ॐ हाकिनीपु· ॐ मालिनीपु· ॐ देवीपुत्रेभ्यो· इत्यष्टदिक्षु संपूज्य देवस्य वामभागे· उमापुत्रेभ्यो· रुद्रपु: मातृपुत्रेभ्यो· इति संपूज्य· इंद्रेशा
नयोर्मध्ये· ॐ ऊर्द्धमुखीपु· निर्ऋतिवरुणयोर्मध्ये अधोमुखीपुत्रेभ्यो: इत्यूर्द्धाधो बुध्वा संपूज्य॥ वहिरष्टदलेषु देवाग्रे ॐ ब्रह्माणीपुत्रवडकाय
एवं माहेश्वरीपुत्रवडकाय· वैष्णवीपु· कौमारीपुत्र· इन्द्राणीपु· महालक्ष्मीपु· चामुण्डापुत्रवडकाय॥ इति संपूज्याष्टपत्राद्बहिश्चतुरस्राभ्यं
तरे देवाग्रमारभ्य प्रादक्षिण्येन॥ हेतुकाय· त्रिपुरान्तका· वेताला· अग्निजिह्वा· कालान्तका· कराला॥ एकपादा· भीमरूपाय· इत्यष्टदिक्षु
संपूज्येन्द्रेशानयोर्मध्ये अचलाय· निर्ऋतिवरुणयोर्मध्ये हाटकेशाय नमः॥ इति संपूज्य तद्बहिश्चतुरस्रत्रयात् चतुरस्रे देवाग्रादि प्रादक्षि
ण्येन संपूज्य श्रीकंठानंतसूक्ष्मेशत्रिमूर्त्तीशानन्त्यादि कोणेषु अमरेशवीरभारभूततिथीशादि कोणयोरन्तरालेषु॥ देवस्य दक्षिणाग्रादि प्राद
क्षिण्येनाष्टसु स्थानेषु महेशादीन्महासेनेशानान्पूजयेत्॥ द्वितीयरेखायामपि तथैव दण्डीशादीन्भृंगीशान्तान्संपूज्य नकुलीशशिवेशसंवर्त्ते

॥ शि॰व ॥
॥ ४८० ॥

शानदेवस्यवामभागेसंपूज्यतद्बहिर्देवस्यवामाग्राकोणमारभ्यप्रादक्षिणोनमशक्तीकेभ्योदिव्यसिद्धेभ्यःएवंमंतरिक्षयोगिभ्यः भूमिष्ठयो
गीभ्योनमः इतिसंपूज्यतद्बहिरिंद्रादीन्वज्रादीनपिप्रागुक्तविधिनासंपूज्यप्राग्वद्धूपादिदत्वाशेषंसमापयेदिति ॥ ॥ तथा ॥ जितेन्द्रियो
हविष्याशीजपेद्देवंमनुप्रिये ॥ पंचविंशत्सहस्राद्यंपंचलक्षंसमाहित ॥ हुनेत्तिलैस्त्रिमध्वक्तैःतर्पयेत्तद्दशांशतः ॥ अभिषिंचात्मनोमूर्द्धिमू
लमंत्रेणसाधक ॥ मार्जनस्यदशांशेनब्राह्मणान्भोजयेत्प्रिये ॥ अयंकृतयुगजपः कलावेतच्चतुर्गुणजपकार्य ॥ एवमक्षरलक्षंवातद्द्वि
र्गुणमेववेतियामलेप्रोक्तत्वात् ॥ अक्षरलक्षमेकविंशतिलक्षं ॥ एतत्संख्याकथनन्तुकलियुगमारभ्यकृतयुगपर्यंतपरमितिज्ञेयं ॥ ईश्व
रस्यस्वतंत्रेच्छत्वात्अनयैवकलियुगप्रतिपादकग्रंथेषुशारदातिलकादिषुवर्णलक्षमुक्तमिति ॥ ॥ रुद्रयामले श्रीदेव्युवाच ॥
भगवन्देवदेवेशरहस्यंवटुकस्यमे ॥ ब्रूहियेनवशाकुर्युःसाधकाभैरवंशिवं ॥ ॥ श्रीशिवउवाच ॥ शृणुदेवीपरंगोप्यंकथयामी
सुशोभने ॥ रहस्यंसिद्धिदंसाक्षाद्वटुकस्यमहात्मनः ॥ सर्वेवटुकदेवस्यसाधनेयेनिरूपिताः ॥ उपायानिष्फलाजाताविनैकंवीरसाधनं ॥
योवीरसाधनंहित्वातुमायवान्यमाश्रयेत् ॥ नमसीद्धिमाप्नोतिनरोवर्षशतैरपि ॥ माषान्मूजान्मसूरांश्चचनकानोदनंतथा ॥ क्षीरंतथापू
यमपिशङ्कुशीरपिशोभना ॥ माषवादीन्स्विन्नात्. सिद्धमाषवानितिस्वयमभिधानात् ॥ क्षीरंपायसं ॥ पायसंपात्रमारोप्येतिस्वयमभिधा
नात् ॥ शङ्कुलीःसुहारिइतिभाषाञ्चाद्याश्चत्रंकरासिकंन्यावर्जितमेवच ॥ कुंकुमेनापिसंरज्यकारपित्वाष्टकीलकान् ॥ स्तंभार्यमेकंकीले

॥ राम ॥
॥ ४८० ॥

व गृहीत्वा सुरसुंदरी ॥ गच्छेत् श्मशाननिकेटे सुधीः मान्नरसाधक ॥ पादप्रक्षालयं कृत्वा ततः स्मृत्वा स्वदेवता ॥ वस्त्रोजंरिलिदं वाक्यं प्रवदेत्सा
धको नमः ॥ अत्र श्मशाने या काश्चिद्देवता निवसंति हि ॥ ता प्रयच्छंतु मे सिद्धिं प्रसन्नाः संतु पातु मां पूर्वे मांसः पातु तथाग्नेय्यां च स्थलधृक ॥ कपा
ली दक्षिणे पातु नैरृत्ये जनिलावड ॥ पश्चिमे पार्वती त्राता वायव्ये प्रमथाधिप ॥ उत्तरे मरुणमालाढ्य ईशाने वृषभध्वजः ॥ ऊर्द्धे पातु तथा शंभुर्धस्ता
धूलीधूसरः ॥ अग्रतो भैरवः पातु पृष्ठतः पातु खेचर ॥ दक्षिणे भूधरः पातु वामे च पिशिताशनः केशान्पातु विशालाक्षो मूर्द्धानं च मरुत्प्रियः ॥
मस्तकं पातु भर्गश्ची शोनेत्रे पातु महात्मना ॥ कपोलो पातु वीरेसो गणेशो गणारिमर्दन ॥ उत्तरोष्ठे विरूपाक्षो ह्यधरे योगिनीप्रिय ॥ तंदेष दक्षविध्वं
सि चिबुके न कपालधृक ॥ कण्ठे रक्षतु मां देवो नीलकण्ठो जगद्गुरु ॥ दक्षस्कंधे गिरिंद्रेशो वामस्कंधे च सुंदर ॥ भुजे च दक्षिणे सर्वे मंत्रनाथः स
दावतु ॥ वामे भुजे सार्वभौमो मो हृदयं पातु पारणरः ॥ दक्षस्तनं पशुपतिर्वामे तु महेश्वर ॥ उदरे सर्वकल्याणकारको वतु मां सदा ॥ नाभौ कामप्र
विध्वंसि जंघे पातु दयामये ॥ जानुनी पातु जामीचौ गुल्फौ गौरीपतिः सदा ॥ पादपृष्ठे ज्ञानविधिस्तथा पादांगुली हर ॥ पादाधः पातु सततं
व्योमकेशो जगत्प्रिये ॥ इति रक्षां समाधाय मंत्ररक्षां ततश्चरेत् ॥ ॐ ह्रां हूं हूं हूं पूर्वे ॥ ॐ ह्रीं हूं ह्रौं आग्नेये ॥ ॐ ड्रीं ड्रीं श्रीं दक्षिणे ॥ ॐ ग्लूं ग्लूं
ग्लूं नगार ॥ नैरृत्ये ॥ ॐ प्रूं स्तूं प्रूं मंसः पश्चिमे ॥ ॐ भ्रां भ्रं वायव्ये ॥ ॐ भ्रां भ्रां भैरव उत्तरे ॐ वूं पूं स्तूं फट् ईशाने ॥ ॐ म्लौं ब्लूं ऊर्द्धे ॥ ॐ स्नां स्तूं स्नं स्न अधः
एवं रक्षां समाधाय दिक्कालार्चनमारभेत् ॥ ततो वाक्यं पुनर्ब्रूयात्साधकः प्रेमसंयुतः ॥ भां भैरव ३ भयंकर हर मां रक्ष २ हूं फट् ॥ इति प्रार्थ

यित्वा॥ एकस्मिन्भाजनेकृत्वापलाशस्यमहामना॥ सिद्धमाख्यान्तुव्रजेत्प्राच्यांदिशिपूजार्थमादरात्॥ तत्रस्थित्वातुपुटकंकरेकृत्वाविचक्ष
ण॥ मंत्रमेनंसुधीःप्रोक्तादद्यादिंद्रायवैवलिं॥ ॐ ह्रांह्रिंह्रूंसमुच्चार्यभोइन्द्रसुरनायक॥ प्रसन्नोभवमेशीघ्रंदेहिसिद्धिंसनातनीः॥ इमंवलिंग्र
हूरहूंफट्उच्चार्यसाधकः॥ वलिंदद्यान्महाभागेसिद्ध्यर्थंप्राणवल्लभे॥ ततोरंरांसमुच्चार्यरूरिंरीमपिप्रिये॥ अग्नेगृह्णमयादत्तंवलिंहुंफट्स
माचरेत्॥ पुजान्तान्तेसमाधायप्रदद्याद्वलिमादरात्॥ ततोदक्षिणदेशांशेसमागत्यविचक्षणः॥ ॐ प्रांप्रिंप्रूंसमुच्चार्यतथाप्रांप्रीमपित्रि
धप्रेतनाथपदस्यान्तेवलिंगृह्णेतिचोच्चरेत्॥ हुंफडंतोयमाख्यातोयममंत्रोवरानने॥ अनेनदक्षिणेदेशेपात्रंसंपुरिपूरितं॥ स्थापयित्वानम
स्कृत्यनैरृत्यांशंततोव्रजेत्॥ वलिंचराकपात्रस्यदद्यात्साधकसत्तमः॥ ॐ क्षंक्षिंक्षूंसमुच्चार्यततोहूंहूंतथैवच॥ रंखेंखेंखूंचततोव्रूया
त्ततोहूंहूंसमुच्चरेत्॥ रक्षोनाथपदंव्रूयाद्गृह्णहुंफट्॥ समन्वितं॥ अनेनमनुनादद्याद्रक्षोनाथवलिंवुधः॥ ततपश्चिमदेशस्थोभूत्वादे
शिकसत्तमः॥ जलनाथायसुवलिंदद्यात्स्वस्यार्थसिद्धये॥ ॐ व्रांव्रींव्रूंसमुच्चार्यततोवरुणमुच्चरेत्॥ वलिमेनंमयादत्तंगृह्णगृह्णपरमेश्वर
अनेनमंत्रवर्येणवरुणायोदनस्यच॥ वलिंदद्यात्महाभागःसर्वसिद्ध्यआदरात्॥ वायुदेशंसमासाद्यततोवायोर्वलिंहरेत्॥ पायसंपा
त्रमारोप्यपरमादरसंयुत॥ ॐ वांवींवूंसमुच्चार्यततः॥ क्रांक्रींसमुच्चरेत्॥ हुंफडन्तेनमनुनावलिंदद्याद्विचक्षणः॥ ऐशानींदिशिमाश्रित्यसा
धकप्रवरस्ततः॥ ईशानायवलिंदद्यात्सर्वकामार्थसिद्धये॥ ॐ श्रांश्रींश्रूंसमुच्चार्यश्रांश्रींश्रांश्रींमथोच्चरेत्॥ हुंफडंतःसमाख्यातोमंत्रोयं

लोकदुर्ल्लभ ॥ अनेनमन्त्रनादद्याद्धस्तुलीःपात्रसंस्थिता ॥ वल्यर्थसर्व्वकामार्थसिद्धयेसाधकोत्तम ॥ एवमष्टबलिन्दत्वासर्व्वकामार्थसिद्ध
येत्तमाधोभागमाश्रित्यकार्य्यमग्निसमाचरेत् ॥ पुष्पाक्षतान्समादायॐह्रांह्रींह्रूंह्रुंउच्चरेत् ॥ संभमंत्रोयमाख्यातःसर्व्वकामार्थसिद्धिद ॥ अने
नमन्त्रनाप्रात्तसंभंसंपूज्यनिर्भय ॥ ततपरेन्मन्त्रमयंकवचंकार्य्यसिद्धये ॥ यस्यप्रसादमासाद्यसाधकोनिर्भयोभवेत् ॥ ॐह्रांह्रींह्रूंह्रः·समुच्चा
र्य्यक्षांक्षींक्षूंक्षः·समुच्चयेत् ॥ खांखींखूंखः·समुच्चार्य्यघ्रांघ्रींघ्रूंघ्रस्ततोवदेत् ॥ ग्रांग्रींग्रूंग्रः·समुच्चार्य्यग्रंग्रेंग्रौंततोवदेत् ॥ ह्रांह्रैंह्रौंह्रंसमु
च्चार्य्यक्लोंक्लोंक्लोंचपुर्व्वदेत् ॥ श्रौंश्रौंश्रौंसाधकःप्रोक्ताग्रौंग्रौंग्रौंग्रौंसमुच्चरेत् ॥ हुंहुंहुंहुंसमुच्चार्य्य·हुंहुंहुंफडथोच्चरेत् ॥ सर्व्वतोरक्षर
क्षेतिरक्षरक्षेतिभैरव ॥ नाथनाथपदंप्रोक्ताफडंतोयंमहामनु ॥ सर्व्वरक्षाकरःप्रोक्तःसाधकाभीष्टदायक ॥ एवंविधायमतिमांस्ततोर
क्षाविशालधी ॥ वीरशांतिमतोकुर्य्यात्सर्व्वकार्य्यस्यसिद्धये ॥ययासिद्ध्यंतिकार्य्याणिसाधकानांमहेश्वरी ॥ यावत्कुर्यान्नवीराणांशांतिंसा
धकसत्तम ॥ तावन्नजायतेसिद्धिःसाधकस्यकथंचन ॥ श्मशानदेशेयेवीराःशिरसादायशासनं ॥ समस्थितानिहनंतिसाधकानां
मनोरथान् ॥ अपूजिताःपूजितास्तेसर्व्वकामफलप्रदा ॥ वीरशांतिमथोवक्ष्येसाधकानांहितायवै ॥ यस्याःप्रसादमासाद्यसाधकःसुख
मेधते ॥ पद्ममष्टदलंकृत्वातद्बाह्येषोडशच्छद ॥ तद्बाह्येष्टदलंचापिभूपुरंचततोलिखेत् ॥ एवंमण्डलमालिख्यसाधकोनिर्भयस्थित ॥ मू
लमंत्रेणनैवेद्यंभैरवायसमर्पयेत् ॥ आद्यपद्मस्यमध्येतुतत्रश्रीवाटुभैरवान् ॥ षोडशारेमहापद्मेततःसाधकसत्तमः ॥ संपूज्यप्रयतोदद्या

न्नैवेद्यपायसस्य च ॥ मित्राराधी षोडशप्राज्ञो भैरवस्य महात्मनः॥ क्लीं शंसुक्लीं शंचजामित्रं रामठरिमं॥ प्रवरांश्चरणकेशांश्च रागान्मा
नंचचामरं॥ वारित्रं चमत्कारं तु चलं वा रुक्मपरां॥ चामीकरं चारुवहं चकितं वेति षोडश॥ नत्वं नत्रामभिपूज्याः षोडशानन्दपूजिता॥
ततोऽष्टपत्रेश पूज्या ब्राह्म्याद्या मातरः सत्तमा॥ स्वस्वदिक्षु महेन्द्राद्यान्पूजयेत्साधकोत्तमः॥ ततोऽक्षतान्समादाय किंचिरंश्च क्रमराडले वी
रं शांतिं पठेत्तस्य साधकः प्रीतमानसः॥ ॐ वराणप्र॰ चराण्डकेशभीषणाभिधः॥ व्योमकेस व्योमवह व्योमव्यापक एव च॥ एतान्वी
रान्समाहूय पस्याद्दीनि समुच्चरेत्॥ मण्डले साधकः श्रेष्ठो नैवेद्यादिभिरर्चयेत्॥ एवमर्च्चासमाधाय साधको निर्भयः स्थितः॥ पूर्वप्रोक्ता
न्सुधीः कुर्यान्न्यासानत्यंतसिद्धिदान्॥ पश्चिमाभिमुखो भूत्वा मालामादाय प्राणिना उच्चैस्तरां जपं कुर्यादागताय महात्मने॥ भैरवा
य समीपे तु वामहस्तेन पायसं॥ समोजयन्जपं कुर्यान्निर्भयः प्रीतिमानसः॥ तुष्टो देवो पदा ब्रूयाद्वरं वरय वाञ्छितं॥ प्रणम्य दण्ड
वद्भूमौ वांछितं वरमुच्चरेत्॥ गृहे वागत्य प्रयत्नतः उत्सवं च समाचरेत्॥ अनेन मनुना देवी सिद्धेन जगतीतलो॥ असाध्यं नास्ति लोके
ष्ठ सत्यं सत्यं मयोदितं॥ ॥ अथास्य प्रयोगो लिख्यते॥ तत्र साधकेन्द्रः कृतनित्यकृत्यः पलाशपत्रकृतपुटके स्विन्नान्माषान्मुजा
न्मूरांश्च गाकानोदनं पायसपूयान्शवपुलीश्च पृथक्पृथक॥ कृत्वा कन्यकया कर्त्तितं कार्पाससूत्रं कुंकुमरंजितं क्षीरवृक्षभवा
न्सौ कीलान्कामार्थमेकं तेभ्य॥ स्थूलमिति नवकीलाश्च गृहीतो नरसाधकसहितः॥ श्मशाननिकटे गत्वा पादोप्रक्षाल्याचमेस्वेष्ट

देवस्मृत्वा कृतांजलिरत्र श्मशाने याः काश्चिदिति प्रणामोक्त श्लोकमंत्रपठित्वा पूर्वे मां शंकर॥ पानि त्वादिजगत्त्रिय इत्यंतं प्रणामोक्त
श्लोकैकादशकं पठित्वा पुर्वंघस्रदिक्षु श्मशाने व कीलाष्टकं स्तंभं निधाय॥ ॐ भ्रां भैरव २ भयंकर हर मां रक्ष २ हुं फट् स्वाहा॥ इति प्रार्थयि
त्वा सिद्धमाषभरितं पुटकमादाय सोदकपात्रहस्तो पूर्वकीलसमीपं गत्वा॥ ॐ लं इन्द्र सांग सपरिवार इहागच्छ गच्छेत्यावाह्यैरावता
रूढं वज्रहस्तं पीतवर्णं सहस्राक्षं सुरगणपरिवारं ध्यात्वा॥ ॐ लं इन्द्रायैतदासनं नमः॥ इति पुष्पादिकमासनं दत्वा लं इन्द्राय एष गं
धो नमः॥ एवं इमाणि पुष्पाणी वौषट् एष धूपो नमः॥ एष दीपो नमः॥ इति दीपान्तैरुपचारैः संपूज्य तत्पुरतश्चतुरस्रमण्डलं जलेन
कृत्वा तत्र माषपुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् ॐ ह्रां ह्रीं ह्रूं भो इन्द्र सुरनायक शीघ्रं मे प्रसन्नो भव सि
द्धिं मे देहि इमं माषवलिं गृह्न २ हुं फडिति मंत्रेणातस्मीन्पात्रे जलं मुचरन् वलिमुत्सृज्य प्रणम्याग्नेयगतकीलसमीपं गत्वा तत्र प्राग्व
त्॥ मण्डलं कृत्वा तत्र रं अग्ने इहागच्छागच्छेत्यावाह्य मेषरूढं शक्तिहस्तं त्रिनेत्रं तेजोनिधिं ध्यात्वा रंबीजेन प्राग्वद्दीपान्तैरुपचारैः सं
पूज्य तथैव मुद्गरितं पात्रं तदग्ने प्राग्वन्निधाय तथैव जलमादाय॥ ॐ रं रां रुं रूं रिं रीं अग्ने तेजोनायक मे शीघ्रं प्रसन्नो भव सिद्धिं मे देहि
इमं मुद्गवलिं गृह्न २ हुं फडिति प्राग्वद्वलिं दत्वा प्रण॥ दक्षिणकीलशमीपं गत्वा तत्र प्राग्वत् यं इति यवीजेन यममावाह्य तत्र यमं महिषा
रूढं दण्डहस्तं कृष्णवर्णं प्रेतगणपरिवेष्टितं ध्यात्वा संपूज्य तदग्रे प्राग्वन्मसूरपात्रं निधाय प्राग्वज्जलमादाय॥ ॐ प्रां प्रीं प्रूं प्रां प्रीं प्रूं भो भो

यमप्रेताधिपमेशीघ्रंप्रसन्नोभवइमंमेमसूरवलिंगृह्ण २ हुंफडिति प्राग्वद्वलिंदत्वा नत्वाग्निकृतिगतकीलसमीपंगत्वा तत्र प्राग्वत्
क्षंवीजेन निऋतिमावाह्य प्रेतारूढंधूम्रवर्णंषड्गहस्तंरक्षोभिः परिवृतंध्यात्वा क्षंवीजेन तं प्राग्वत्संपूज्य तदग्रे प्राग्वच्चणकपूरि
तंवलिपात्रंनिधाय प्राग्वज्जलमादाय ॥ ॐ क्रोंफ्रें फ्रें हूं हूं खुं खैं खुं ह्रौं ह्रौं भोभो रक्षनाथमेशीघ्रमित्यादि इमंचणकवलिं गृह्ण २ हुं
फडिति प्राग्वद्वलिंदत्वा प्रणम्य पश्चिमदिग्गतकीलसमीपंगत्वा तत्र प्राग्वत् वंवीजेनं संपूज्य तदग्रे ओदनपूरितपात्रं प्राग्वन्निधाय
जलमादाय ॥ वां वीं वूं भोभो वरुण जलनाथ मेशीघ्रमित्यादि इमंमोदनवलिंगृह्ण २ हुंफडिति प्राग्वद्वलिमुत्सृज्य प्रणम्य ॥ वायुकोणगतकी
लसमीपंगत्वा तत्र प्राग्वन्मण्डलं कृत्वा तत्र ॥ यंवीजेन वायुमावाह्य मृगवाहनं कृष्णवर्णमंकुशहस्तं सपरिवारं स्वगणादिवायुगणावेष्टितं
ध्यात्वा यंवीजेन प्राग्वत्संपूज्य तदग्रे पायसवलिं गृह्ण २ हुंफडिती प्राग्वद्वलिंदत्वा प्रणम्य ॥ उत्तरदिग्गतकीलसमीपंगत्वा प्राग्वत्कुं इति
कुवेरवीजं कुवेरमावाह्य तं नरवाहनं गदाहस्तं पुष्कवर्णं यक्षगणावेष्टितं ध्यात्वा कुंवीजेन प्राग्वत्संपूज्य तदग्रे अपूपपूरितंपात्रंनिधाय
प्राग्वज्जलमादाय ॐ क्रीं कूं कूं क्रौं क्रौं भो यक्षनाथ मे शीघ्रमीत्यादि इमंमपूपवलिं गृह्ण २ हुंफडिति मंत्रेण वलिंदत्वा प्रणम्य ॥ ईशा
नदिग्गतकीलसमीपंगत्वा तत्र प्राग्वत् हंवीजेन ईशानमावाह्य वृषमारूढं स्वच्छवर्णं शूलहस्तं विद्यागणावेष्टितं ईशानं ध्यात्वा हंवीजेन
प्राग्वदासनादिदीपान्तैरुपचारैः संपूज्य तदग्रे शष्कुलीपूरितं वलिपात्रं निधाय जलमादाय ॥ ॐ श्रां श्रीं श्रूं श्रां श्रीं श्रां भो ईशान विद्याधि

पनैशीघ्रुमीत्यादि इमंश्मश्रुक्लीं ग्रं फ्रूं हुं फडितीमंत्रेण बलिं दत्वा प्रणम्य ॥ मध्यास्थस्तंभसमीपं गत्वा पुष्पाक्षतानादाय ॥ ॐ ह्रां ह्रीं ह्रीं ह्रूं स्तंभा
यनमः ॥ इति स्तंभं संपूज्य निर्भयः सन् ॥ ॐ ह्रां ह्रीं ह्रः क्षां क्षीं क्षूं क्षः · खां खीं खूं खः · घ्रां घ्रीं घ्रूं घ्रः · स्रां स्रीं स्रूं स्रः · म्रें म्रैं म्रों म्रौं · ह्रौं ह्रें ह्रीं क्लों क्लों क्लों
श्रों श्रौं श्रां ज्रों ज्रों ज्रों हुं हुं हुं हुं हुं हुं हुं फट् सर्वतो रक्ष भैरवनाथ फट् इति स्वरक्षां कृत्वा स्तंभसमीपे स्थासने पूजिते पूर्वाभिमुख उपविश्य पुर
तः सुसमे भूतले अष्टदलपद्मं कृत्वा तद्बहिः षोडशदलं तद्बहिः ॥ पुनरष्टदलं तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रत्रयं च कृत्वा तन्मध्ये देवमावाह्य
प्राग्वत्सर्वोपचारैराराध्यांगानि संपूज्याष्टदलेषु प्राग्वदसितांगादिभैरवानभ्यर्च्य तद्बहिः षोडशदलेषु ॥ ॐ कलीशाय नमः ॥ ॐ सुकुली
शाय ॥ एवं नामित्राय ॥ रामथाय ॥ रिभायः प्रचराय · चराय केशाय ॥ वरानने ॥ चामरायः चारित्राय · चमत्काराय · चंचलाय ॥ वार
भूषणाय ॥ वारुवहाय चकितवाय नमः इति संपूज्य तद्बहिरष्टदले प्राग्वद्ब्राह्म्याद्यष्टमातॄः संपूज्य बहिश्चतुरस्रे प्राग्वदंतोकेशान्तदस्त्रा
णि च संपूज्य धूपदीपौ समर्प्य पद्ममध्ये श्रीभैरवायान्येभ्यो दलेषु पूजिते देवताभ्यश्च पृथक् पृथक् पात्रेषु पायसनैवेद्यं विधिवत्समर्प्याक्षता
न् हस्ताभ्यामादाय पूजामण्डले विकिर ॐ वरागच्छायाहि ॥ एवं तुर्द्धकेश · भीषणव्योमकेश · व्योमवह · व्योमव्यापक ॥ आयाहीत्याहूय पृ
थक् पृथक् नैवेद्यं समर्प्य निर्भयः सन् पश्चिमाभिमुखः प्राणायामं ऋष्यादीन्यासपूर्वकं पूर्वोक्तानखिलन्यासान् कृत्वा प्राग्वन्मालां संपूज्या
दायः मूलमंत्रं स्पष्टाक्षरपदोच्चारणपूर्वकमुच्चैस्तरां जप्त्वा वामहस्तेन पायसपात्रमादायागतं देवं भोजयेत् प्रसन्नजितो जपं कुर्यात् ॥ त

॥ शि॰व ॥
॥ ४८४ ॥

नस्तुष्टोदेवोयदावरंवरयेनिवृपानदाउंदवङ्मोप्रणम्यनिजेप्सितंवरंगृहीत्वामहेत्सर्वंकुर्यादितिवीरसाधनविधि ॥ ॥ एवंसिद्धम
न्तुर्मंत्रीनित्यनैमित्तिकेरतः ॥ विघ्नंदुर्गासमभ्यर्च्यवलिंदत्वाविधानतः ॥ काम्यानिसाधयेन्मंत्रीयथोक्तांसिद्धिमाप्नुयात् ॥ अत्रशालिसमुद्भू
तंमांसंपक्कंसशर्करं ॥ लाजाचूर्णगुडापूपमाक्षिकेक्षुरसान्वितं ॥ घृतप्लुतंसर्वमेतद्देकौहुन्यमहेश्वरी ॥ कृत्वायासंसमाराध्यकेशंमहेश्व
री ॥ प्रागुक्तेनविधानेनरक्तंचंदनसंयुतैः ॥ रक्तपुष्पाक्षतैर्दैविधूपैर्दीपैर्मनोहरैः ॥ नस्रायमण्डलकृत्वाचतुरस्रंसुरेश्वरी ॥ त्रिकोणगर्भि
तंतत्रपात्रेहेममहेशुभे ॥ राजतेवाथकांस्येवाविधायकमलंशुभं ॥ अर्जयित्वाथतत्पिंडंगंधाद्यैर्मूलमंत्रितं ॥ वलिंद्रव्यापदिन्युस्त्वानम
श्नर्च्चयेत्ततत् ॥ ततोजलंसमादायचुलुकेनमहेश्वरी ॥ मूलमंत्रंसमुच्चार्यसंवोध्यवडुकंप्रिये ॥ इमंवलिंगृह्णगृह्णस्वाहांतंसमुदीर्यच
जलंसमापयन्नत्रचिंतयेद्वटुकप्रिये ॥ स्वहस्तेवलिमादायभुंजानंवरदंप्रभुं ॥ राजसोयंवलिर्देवीकथितंसर्वसिद्धिद ॥ सात्विकोराजस
श्चेतिवलिःस्याद्विविधप्रिये ॥ राजसःकथितोदेवीसात्विकंशृणुवल्लभे ॥ पूर्वोक्तैःसकलैर्द्रव्यैर्मांसहीनैर्महेश्वरी ॥ मुद्गसूपसमायुक्तैःपा
यसेनसमन्वितैः ॥ मधुरत्रयसंयुक्तैःप्राग्वद्दद्याद्विचक्षणः ॥ ब्राह्मणोनियतःशुद्धःसात्विकंवलिमाहरेत् ॥ सात्वीकंध्यानमाख्यातंप्रागेव
नवसुव्रते ॥ इदानींराजसंध्यानंशृणुवक्ष्येसुरेश्वरी ॥ उद्यत्सूर्यसहस्राभंत्रिनेत्रंचंद्रशेखरं ॥ रक्तांगरागमारक्तमाल्यांवरविभूषितं ॥ स्मेरा
ननंनीलकंठंनानाभरणभूषितं ॥ दक्षिणोर्द्ध्वकरेशूलंतदधोवलिमंडिजे ॥ वामोर्द्ध्वहस्तेदेवेशिकपालंतदधोभयं ॥ दधानंस्मरेद्देवंस्म

॥ रामः ॥
॥ ४८४ ॥

नेत्राणामभयंप्रदं॥ काम्यकर्मसुदेवेशिदेवंप्रभुंप्रदं॥ ॥ रुद्रयामलेतुदक्षेत्रिशूलमभयंकपालंवामकेवमिन्मुक्तं॥ यथारुचिध्येये॥ क्रू-
रकर्मसुदेवेशिनामसंख्यानमुच्यते॥ अंजनाचलसंकाशंमुण्डमालाविभूषितं॥ चंडमत्तालसत्तुंगकेशभारंदिगम्बरं॥ त्रिनेत्रंदनैर्हस्तैर्ड-
मरुंचसृणींतथा॥ खड्गंमूलंचदेवेशिदधानमपरैस्करैः॥ अभयंनागपाशंचघंटांचनृकपालकं॥ ऊर्ध्वादिक्रमतोदेवीभीमदंष्ट्रभयान-
कं॥ सर्वाभरणसंदीप्तंमणिनूपुरमण्डितं॥ किंकिणीजालसंयुक्तंध्यायच्चण्डकभैरवं॥ ॥ यामलेतु॥ दक्षिणेत्वभयंवामेवरामनिवि-
शेषः॥ अन्यत्तुल्यं॥ सात्त्विकंध्यानमाख्यातंमहामृत्युनिवारणं॥ आयुरारोग्यजननंमपवर्गफलप्रदं॥ राजसंधर्मकामार्थसिद्धिदंता-
मसंप्रिये॥ शत्रुक्षयकरंभूतकृत्यापस्माररोगनुत्॥ एवंध्यानंसमाख्यातंसाधकाभीष्टसिद्धिदं॥ काम्यकर्मारंभदिनेतत्समाप्तिदिने
तथा॥ बलिर्देयोमहादेवीतत्तत्कर्मफलाप्तये॥ जितेन्द्रियःप्रजुहुयादाज्येनेष्टफलंभवेत्॥ इक्षुरसैर्हुतेदेविवशयेदखिलंजगत्॥ कै-
रवैःकुसुमैर्होमात्त्रैलाभोपवेद्ध्रुवं॥ तिलाद्यंतंडुलैर्होमाद्धनंधान्यंलभेद्बहु॥ पुष्पैःश्रीतरुसंभूतैर्हुत्वाप्राप्नोतिनाश्रियं॥ त्रिस्वादुयु-
क्तलवणोहोमःस्त्रीजनवश्यकृत्॥ होमोवेतससंभूतसमिद्भिर्वृष्टिदायकः॥ अन्नहोमाद्धान्यधनसंपत्तिर्जायतेचिरात्॥ दिनत्रयंचम-
धुनाहोमात्सर्ववशयेज्जगत्॥ रोगोक्तौषधहोमेनरोगान्मुंचतितत्क्षणात्॥ कृत्यापस्मारभूतादिभयेव्याघ्राजिनेशिवे॥ उपविश्यतिलैर्दे-
वीजुहुयादयुतंशुचै॥ कृत्यादयःपलायंतेनेक्षंतेनांदिसंभयात्॥ कृष्णाष्टमीसमारभ्ययावत्स्याच्चतुर्दशी॥ तिलैस्तंडुलसंमिश्रै-

॥ शि॰ चं ॥
॥ ४८५ ॥

र्मधुरत्रयलोलितै ॥ त्रिसहस्रं प्रतिदिनं जुहुयात्संस्कृतेनले ॥ वडुकेश्वरमभ्यर्च्य भक्ष्यभोज्यफलान्वितं ॥ नित्यं निवेद्य नैवेद्यं मध्यरात्रे वलिं
हरेत् ॥ त्रिसहस्रं प्रतिदिनं जपित्वा प्रयतो वशी ॥ सप्ताशीदिवसे रात्रावेवं हत्वा वलिं हरेत् ॥ ततः कारयित्वा राज्ञा तोषयेत्साधकं शनैः ॥ प्र
योगादिवशे नित्यं भक्ष्यभोज्यैः सदक्षिणैः ॥ विप्रान्संपूज्य महादेवी तोषयेद्वांछितां प्रये ॥ समाप्तिदिवसे विप्रान्सप्तसप्तसमाहित ॥ भोजयेद्व
स्ववित्ताद्यैस्तोषयेज्जगदीश्वरी ॥ विधिनानेन तुष्टो हि वडुकेशः प्रयच्छति ॥ तेजो वलं यशः पुत्रान् ॥ कीर्त्तिलक्ष्मीमनोगवां ॥ नश्यन्ती शत्रव
स्तस्य वर्द्धन्ते मित्रबांधवा ॥ अवग्रहो न जायेत राष्ट्रे तस्य महीपतेः ॥ केवलैर्लवणैर्हुत्वा स्तंभनं कुरुते ध्रुवं ॥ अनेनैव प्रयोगेन निगडान्मुच्यते नर
पलं वचाया देवेशि चूर्णीकृत्वातिसूक्ष्मकं ॥ मंत्रयेन्मनुनानेन देवी साष्टसहस्रकं ॥ विभजेद्धृतं पंचाशद्भागेन परमेश्वरी ॥ दिनशो भागमेकै
कं भक्षयेद्यो घृतान्वितं ॥ या नारी सा सुतं सूते मेधारोग्यवलान्वितं ॥ दीर्घायुषं च वंध्यापि किं पुनः कन्यकाप्रसूः ॥ प्रयोगस्य तथाद्यन्ते वडुक
स्य वलिं हरेत् ॥ ॥ रुद्रयामले तु ॥ वंध्याचिकित्सां कुर्वीत गोकालागर्भसमर्चयेत् ॥ हरिद्राद्वयपलं चैव यायावा देवसन्निधौ ॥ प्रणिपत्य
नमस्कृत्य यत्नैव चूर्णं तु तत्समं ॥ पेषयित्वा तु गोमूत्रे गोलकं घृतसंयुतं ॥ पद्मपत्रे विनिक्षिप्य स्थापयत्त्रसहस्रकं ॥ देवदेशप्रकारेण प्राश
येत्तु महौषधं ॥ श्रीमन्तमायुष्मन्तं च वलवन्तं सुदर्शनं ॥ विद्यावंतं पुत्रवंतं सद्यः पुत्रमवाप्नुयात् ॥ इत्युक्तं ॥ तथा ॥ साधयेद्विधिवद्धस्य मंत्रे
णानेन सुव्रते ॥ उशीरं चंदनं देवी कुष्ठं कर्पूर कुंकुमं ॥ क्षितार्कमूलवाराही श्रीलतां परमेश्वरी ॥ वचश्चदीरकृक्षाणां विल्वमूलं च शोषयेत्

॥ रामः ॥
॥ ४८५ ॥

सूक्ष्मचूर्णमिदं कृत्वा गोमयेन तु मेलयेत् ॥ अंतरीक्षे गृहीतेन कृत्वा पिण्डानि पार्वती ॥ शोषयीत्वा जपेन्नाथ विधिवंत्तं स्कृतेनले ॥ मूलमंत्रे
णादग्ध्वाथ भस्म गृह्वतत्क्षन ॥ शुद्धपात्रे विनिक्षिपेच्छोषयित्वा यथाविधि: ॥ मालतीकेतकीपुष्पैर्वासितं सस्पृशन्शिवे ॥ अयुतं प्रजपेन्मं
त्रं संपूज्य भैरवं ॥ भस्माधारे विनिप्य संस्थाप्य दिवसः शिरो ॥ त्रिपुंड्रेन तर्कवीन वेदोक्तविधिना द्विज ॥ मुजायै मूलमंत्रेण कर्त्तव्यं पर
मेश्वरी ॥ मूलेनैवाथवा सर्वैः कर्त्तव्यं भस्मधारणं ॥ यएवं कुरुते नित्यं विधिवद्भस्मधारणं ॥ तस्य रोगाः प्रणस्यंति कृत्याडोहमहाग्रहा
रिपुचौरमृगादिभ्यो भयं तस्य न जायते ॥ वर्द्धंते संपदः सर्वाः पूज्यते सकलैर्जनैः ॥ राजानो वशमायांति सामात्याः सपरिछदा ॥ वचचू
र्णपलस्यार्द्धतन्मान संयुतं ॥ पद्मपत्रे निक्षिप्य त्रिसहस्रं जपेद्बुद्ध ॥ प्राशयन्नियतो भूत्वा पुनर्लक्षत्रयं जपेत् ॥ तस्यैवं कुर्वतः प्रज्ञा
निःसीमा भवति ध्रुवं ॥ गद्यपद्यमयी वाणी श्रुतस्याप्यवधारणा ॥ भवेत्तस्य महादेवी भैरवणा प्रसाधने ॥ अत्र वा चूर्णभक्षं तु यावद्भिर्दिने
स्त्रिलक्षेण जपो भवति तावद्भागान् कृत्वा प्रत्यहमेकमेकं भागं ॥ प्राशयेदिति सा प्रसादायका ॥ अस्मिन्नयोगे विशेषमाह ॥ ॥
रुद्रयामले ॥ शुक्लपक्षे द्वितीयां तु शुक्रवारे समाहितः ॥ पूर्ववत्पूजयेद्देवं सिद्धान्नं च निवेदयेत् ॥ सिद्धोदनं तु प्रागेव हरिद्रागणोप्रोक्तं
पलार्द्धं वचाचूर्णं तन्मानघृतसंयुतं ॥ पद्मपत्रे विक्षिप्य त्रिशतं प्रजपेत् बुधः ॥ त्रिसहस्रजपे विशेषः ॥ अन्यात्सर्वं समानं ॥ ॥ रुद्रया
मले ॥ विवादे क्षत्रविषये चतुर्थ्यंगारवारके ॥ पूर्ववद्देवताराध्य नैवेद्यं चैव पूर्ववत् ॥ जपमानः स्वयं मंत्रं नमस्कृत्यैव बुद्धिमान् वि

॥शि॰च॥
॥४८६॥

वादेक्षत्रविषयेचतुर्थ्यंगारवारके॥ पूर्ववद्देवताराध्यनैवेद्यंचैवपुर्ववत॥ जपमानःस्वयंमंत्रंनग्नस्कन्धैवबुद्धिमान्॥ विवादक्षत्रम
ध्येतुदेवंध्यात्वातुतत्क्षणात्॥ अभिमंत्र्यमृदंशापथ्यो पाश्यस्वयप्रभुं॥ सप्ताहांतस्त्रीहकालेतुतत्क्षेत्रोनैवसिध्यति॥ मृत्युंजयमहंवक्ष्ये
यथावच्छृणुसुंदरि॥ उत्तरायणकालेतुदक्षिणायणाऽथवा॥ कालज्ञानमिदंज्ञात्वातत्क्षणोजपेत्क्रमात्॥ कृष्णाष्टम्यांचतुर्थ्यांवाऽप्य
गारकदिनेततः॥ स्नात्विकंवालरूपंचद्विभुजंचिंतयन्बुधः॥ अर्चयित्वाय ध्यात्वाचंसिद्धान्नंचनिवेदयेत॥ यद्रूपंकथितंपूर्वमादिमार्चन
मध्यगं॥ तुषारकणिकाभासंध्यात्वादेवंसमाहित॥ भूचरीमुद्रयायुक्तंखेचरीवहमेलकं॥ ध्यानयोगेनमंत्रंचमनसापिजपेद्बुधः॥ इत्येवंतुज
पेल्लक्षंतपामृत्युंजयोभवेत्॥ मृत्युभंगाभिकाक्षीचेत्तान्वीकंध्येतरूपकं॥ हृदयस्वासनंध्यात्वानन्मध्येदेवमासितं॥ नतस्यकालनिष्क्रां
तिर्मूर्ध्निमरणात्लमाप्नुयात॥ कृष्णपक्षेचतुर्दश्यांभूमिपुत्रस्यवासरे॥ आराध्यविधिवद्देवितस्याग्रेस्थापयेद्बुध॥ रोचनाहेमजेपात्रेसंपूज्यवि
धिनाथतं॥ गंधपुष्पादिनास्पृष्ट्वातंजपेदयुतत्रयं॥ नद्र्भवर्तिंप्रज्वाल्यकपिलाघृतसेचितां॥ सौवर्णेनकपालेपात्रेसंगृह्यचांजनं॥ संपू
ज्यचपुनर्जप्यान्त्यात्रंमंत्रसंग्रह॥ ध्यात्वादेवंदृशोरेनदाचरेर्दजनंबुद्धः॥ वश्याभवंतितेसर्वेयान्यान्पश्यतिसाधकः॥ अथमिरवेकंकुर्वी
तरणेविजयकांक्षया॥ पूर्वोक्तमरणेपेदेवीवितानध्वजशोभितं॥ शालिनामुपरिन्यस्यदूर्वाक्षतसमन्वितां॥ कुंभंहेमादिरचितंनवर
त्नसमन्वितां॥ संस्थाप्यविधिवद्देवीपुष्टैस्तोयैश्चपूरयेत॥ तस्मीन्क्षीरद्रुमोत्थानिपल्लवानिविनिक्षिपेततः॥ कर्पूरंचंदनंदेवीकंकोलम

॥रामः॥
॥४८६॥

गरु पुनः ॥ उशीरकुंकुमविंदूर्वा लक्ष्मीसहामपि ॥ चंपकंमल्लिकां जातिमुत्पलं दादिमं तथा ॥ गोमेदं च विनिक्षिप्य पट्टवस्त्रद्वयेन च ॥ संवेष्ट्य
तस्मीन्नावाह्य वटुकं देवी पूजयेत् ॥ राजसंध्यानरूपं तं ध्यात्वा सर्वोपचारकैः ॥ प्रथमास्य दलस्थेषु कुंभेष्वष्टसु भैरवान् ॥ असितांगादिकान्देवि
संपूज्य तदनंतरं ॥ त्रयोदशसु कुंभेषु बाह्यस्थेषु महेश्वरी ॥ त्रयोदशगणानिष्ट्वा न बाह्ये दशसु क्रमात् ॥ लोकेशवटुकान्देवी कुंभेषुपरि पू
जयेत् ॥ चतुरस्त्रत्रयस्थेषु घट घटेषु पार्वति ॥ कुंभेषु देवी प्रागुक्तान् श्रीकराद्यादीन्यजेत्क्रमात् ॥ प्रागुक्तक्रमयोगेन गंधाद्यैः समनोहरैः
स्तुयुतं प्रजपेन्मंत्रं घ— — — सुरेसुरी ॥ पृथक्सहस्रं जुहुयात्पायसैः सर्पिषान्वितै ॥ स्मशानकुंभान्प्रतिदिनेरात्रौ तस्मिन्बलिं हरेत् ॥ राज
सोक्तविधानेन मासत्रयसमन्वितं ॥ मेषकुक्कुटमीनानां मासत्रयमुदाहृतं ॥ सुदिने शुभलग्ने च स्वस्तिवाचनपूर्वकं ॥ वेदवेदांगवि
द्भिश्च विप्रैर्मंगलवादिभिः ॥ नदत्सु पंचवाद्येषु नमस्कृत्य च भैरवं ॥ भूपालं वाथवा विप्रं शुद्धदेहं जितेंद्रियं ॥ आस्तिकं सत्यसंधं तं तमभिषिं
चेन्मन्त्रधी ॥ अभिषेकात्परमसद्भूयसीं दक्षिणां प्रिये ॥ दद्यात्प्रसीदति यथा साधकस्तावदर्जयेत् ॥ अभिषिक्तो च नरपतिः शतक्र
तुरिवापर ॥ शत्रून्जयति संग्रामे बलाध्यां स्तूयते जनैः ॥ अभिषिक्तस्तु देवेश प्रतिमासं महेश्वरं ॥ षण्मासावधि शास्येच्चतुः ॥ सागरमे
खलां ॥ दुर्वीयुद्धेषु महती शक्तिस्यान्नपुर्वनोधिका ॥ शत्रुशैन्यविनाशाय राजा दद्याद्बलिं प्रिये ॥ पूर्वोक्तराजसं देवी बलीनिष्पाद्य मंत्र
वित् ॥ संपूज्य पूर्ववद्देवं मध्यरात्रे महेश्वरी ॥ अम्बूनागमजं देवी सर्वलक्षणसंयुतं ॥ आनीय मूलमंत्रेण स्नापयित्वा शुभैर्जलैः ॥ गंध

माल्यैरलंकृत्य देवस्याग्रे निधापयेत् ॥ मूलमंत्रेण संप्रोक्ष्य संरक्ष्यास्त्रेण तं प्रिये: ॥ कवचेन मइत्यर्चयेत्त्रिधा ॥ गंधाद्यैस्तं ततो देवी कर्णे तस्य
तु दक्षिणे ॥ पशुपाशाय इत्युक्त्वा विद्महे तदनंतरं ॥ विश्वकर्मणे यदेवेशि धीमहीति ततः परं ॥ तन्नोजीवः समुच्चार्य वदेद्देवीप्रचोदयात् ॥ इ
त्येतां पशुगायत्रीं त्रिर्जपित्वा महेश्वरि ॥ निधाय पुरतो खड्गं ॐ ह्रीं कालीति च द्विधा ॥ वज्रेश्वरी वलोहांते दंष्ट्रायैनमइत्यथा ॥ खड्गं त्रिः पू
जयेद्देवीमुष्टेन स्मततोर्चयेत् ॥ वागीश्वरीं च ब्रह्माणीं लक्ष्मीं नारायणीं ततः । मध्येग्रदेवेशि उमामहेश्वरीं यजेत् ॥ इत्यर्चितं समादाय खड्
हस्ते महेश्वरी ॥ आदाय मंत्रयेन्मंत्री मंत्रेणानेन सुव्रते ॥ खड्गायासुरनाशाय देवकार्याय तत्परः ॥ पशुच्छेदस्त्वयाशीघ्रं खड्गनाथ
नमोस्तुते ॥ ततश्चार्य विधिवन्निशुद्देरवावसानकं ॥ गोत्रनाम च संकीर्त्य नाम मनां समुदीर्य च ॥ श्रीभैरव इमं छागवलीं तुभ्य महं वदेत् ॥
प्रदद्देनि समुच्चार्य कुशपुष्पाक्षतान्वितं ॥ जलं पशोस्तु निक्षिप्य शिरसि श्रीशिवे ततः ॥ यज्ञार्थे पशवः सृष्टा यज्ञार्थे पशुघातनं ॥ अत
स्त्वाघातयित्वामि यस्माद्यज्ञे वधोवधः ॥ इति संबोधयेत्तस्य शिरः स्पृष्ट्वाथ तं पशुं ॥ अस्त्रमंत्रं समुच्चार्य छिंधियुग्मं ततो वदेत् ॥ स्वाहांतं तु
च्चार्य तं खड्गं तस्य स्कंधे नियोज्य च ॥ स्वात्मानं भैरवं ध्यायंस्तमेकेन महेश्वरी ॥ प्रहारेण समुच्छेद्य बलिमंत्रमिमं पठेत् ॥ शत्रुपक्षस्य रुधि
रं पिशितं च दिने दिने ॥ भक्षयस्व गणेः सार्द्धं सारयेपसमन्वितः ॥ शत्रुनामाक्षरैर्मंत्रं विदर्भ्य मनुमत्तमं ॥ शेषं शत्रो बलित्वेन कल्प
यित्वा महेश्वरी ॥ पशुनाशाहतं तस्मै मांसमप्यं तस्मै निवेदयेत् ॥ अनेन बलिदानेन संतुष्टो भैरवस्त्वय ॥ शत्रुशैन्यं विभज्याथ स्वगणेभ्यः प्रय

इति ॥ क्रुद्धः सन्नाशयेच्छीघ्रं नात्रकार्या विचारणा ॥ ॥ अथ गजाश्वादिरक्षाप्रयोगः ॥ तन्त्रसारसंग्रहे ॥ गजानां चतुरंगानां विशेषा
च्छान्तयेततः ॥ तच्छालायां पुराप्रोक्तं कुण्डं कृत्वा यथाविधि जुहुयान्मायशाख्यैश्च तिलैस्त्र्ययुतमुक्तवत् तदा विप्रान्भक्षभोज्यैस्तोषयेच्च
सदक्षिणैः ॥ पूर्वोक्तेन प्रकारेण कलशं स्थापयेत्ततः ॥ तत्र गंधादिभिः सम्यक् वटुकेशं समर्चयेत् ॥ अभिषिंचेज्जलैस्तैस्तान् गजानश्वांश्च
मंत्रवित् ॥ वर्द्धते प्रत्यहं चैतेषां गजाश्चापि तुरंगमाः ॥ तेषांश्च समरे शक्तीर्महती जायते ततः गजामजेयाश्च भवंति द्विषतां तथा ॥ अस्माद
न्या महारक्षा नास्ति भूमण्डले खिले ॥ अथ यंत्रं प्रवक्ष्यामी वटुकस्य सुरार्चिते ॥ आलिख्याष्टदलं पद्मं कर्णिकायां समालिखेत् ॥ श्रीं
ह्रीं क्लीं क्ष्रौं मिति तत्पत्रेषु परमेश्वरि ॥ वटुकायेत्यक्षराणि द्विराहृत्यालिखेत्प्रिये ॥ बहिः षोडशपत्राढ्यं पद्मं कृत्वा सुशोभनं ॥ तत्पत्रे
षु लिखेद्देवि शिववर्णास्तु षोडश ॥ मंत्रस्य तद्बहिश्चापि पद्मं षोडशपत्रकं ॥ तत्पत्रेषु लिखेद्देवि स्वरान्षोडश सुव्रते ॥ द्वात्रिंशत्पत्रसंयु
क्तपद्मं कृत्वाथ तद्बहिः ॥ कादिसान्तान् लिखेत्तस्य पत्रेषु परमेश्वरी ॥ वेष्टयेच्चतुरस्रेण यंत्रमेतद्वरानने ॥ जयंदं सुखदं पश्य मृत्युदा
रिद्रनाशनं ॥ भूतापस्मारकृत्यादिभयरक्षाकरं परं ॥ अस्मात्परतरो रक्षा नास्ति नास्ति न संशयं ॥ वटुकमंत्रसमाप्तः ॥ ॥ तथा ॥ शृ
णु देवि प्रवक्ष्यामि यंत्रं चण्डेश्वरस्य ते ॥ सर्वाभीष्टकरं देवि सर्वसिद्धिकरं प्रिये ॥ अर्घिसंतुसमस्त्वार्य–मीनेसंव जले स्थितं ॥ अग्नि
मूर्द्धिन मस्त्वांतस्त्र्यक्षरोमतुरीरितः ॥ घर्घीसत्कार ॥ मीनेशः धजलस्थितं वकारोपरिसंस्थितं अग्निमूर्द्धिन रेफोपरिसंस्थितं ॥ तेनहैर

तिसिद्धंः अस्त्रंफट् ॥ ऋषिस्त्रितोनुष्टुवच्छंदश्चंडोस्यदेवता ॥ आद्यंवीजंशक्तिरंत्यमिष्टार्थेविनीयुज्यते ॥ दीप्तफट्हृदयंप्रोक्तंज्वा
लाफट्शिरईरितं ॥ ज्वालिन्यस्त्रंशिखादेवीनरास्त्रंवनुच्छदं ॥ हनफट्नेत्रमुदितंसर्वज्वालिनिफट्स्वर ॥ एभिर्मंत्रैःषडंगानिजातियुक्ता
निकल्पयेत ॥ वरणेरक्तवर्णास्त्रिकोणारक्तवाससं ॥ फटिकाक्षस्रजंसूलंदक्षिणेचावधुर्द्धयोः ॥ करयोर्वामयोश्चापिटंकंचैवकमण्डलुं
दधतंचंडशकलंसद्धषरस्मरेत ॥ इतिध्यात्वायजेत्पीठेशैवेचंडेश्वरंशिवे ॥ वरणवरणायसंप्रोक्ताविघ्नहेतदनंतरं ॥ वरणेश्वराय इत्युक्ता
धीमहितिततोवदेत ॥ तन्नश्वरणः प्रशव्यातेचोदयादितिचोच्चरेत ॥ वरणस्यैषासमाख्यातागायत्रीवानयाचतं ॥ आवाह्यपूजयेद्विधा
ग्वत्सर्वोपचारकैः ॥ आधरक्षविंदुयुतंॐतंवरणेश्वरंसमाह्वत् ॥ अनेनचसमभ्यर्च्ययजेदंगानिपूर्ववत् ॥ दत्वेष्टमानरःपूज्यावीप्सालोकेश
हितव ॥ ॥ अथप्रयोग ॥ तत्रप्रावयोगपीठन्यासांतेप्राणानाचम्यशिरसित्रितऋषयेनमः मुखेनुष्टुप्छंदसेनमः ॥ हृदिवरणेश्वरा
यदेवतायैनमः ॥ गुह्ये ॐ वीजायनमः पादयोःफट्शक्तयेनमः इतिविन्यस्यममसर्वाभीष्टसिद्धयेविनियोगः ॥ इतिकृतांजलिर्वदेत्ः
ततप्रदीप्तफट्हृदयायज्वालाफट् ॥ शिरसेज्वालिनिफट्शिखायैननफट्कवचा· हनफट्· नेत्राय· सर्वज्वालिनिफट् ॥ अस्त्रायफट्
इतिषडंगमंत्रानंगुष्ठादितलांतंकरयोर्हृदयादिषडंगेष्वपिविन्यस्यध्यानादिपीठपूजांतेवशांतिवीजेनमूर्त्तीकल्पनंविधाय ॥ वरणवरणा
यविद्महेवरणेस्वरायधीमहीतन्नश्वरणःप्रचोदयात् ॥ इत्यनयावाह्यवरणेश्वरायनमइतिपुष्पांजलिंदत्वापुष्पानुपचारानुपर्यागानि

संपूज्याष्टदलेषुप्राग्वन्मातृः संपूज्यलोकपालपूजादिसर्व्वंसमापयेदिति ॥ तथा ॥ लक्षत्रयंजपेन्मंत्रंजुहुयातदशांशतं ॥ सतिलैस्त
ण्डुलैर्देवीं त्रिमध्वक्तैर्यथाविधि ॥ राजवृक्षसमिद्भिर्वातर्पणादिततश्चरेत् ॥ प्राप्तसिद्धेमनौमंत्रीप्रयोगानाचरेद्धिवै ॥ शालिपिष्टमयीं
कृत्वापुत्तलींप्राणसंयुतां ॥ देवीकायेरेखितेन्मौसम्पक्त्रिमधुरप्लुतां ॥ दक्षिणांगुष्ठमारभ्यपुंसिछित्वापृथक्पृथक् ॥ जुहुयाद्धामपा
दादियोषितश्चापिसंक्रुनेत् ॥ एवंहोमाद्विजादीनांवकृन्नात्रसंशय ॥ योमर्त्योनुदिनंपुष्पैर्दुनेदशोत्तरशतं ॥ तयादग्निर्दिनैःकेश्चि
त्तद्वर्णवसनंलभेत् ॥ प्रत्यहंमनुनानेनदेवीयस्तर्पयेद्धिवै ॥ चतुर्मासंतस्यलक्ष्मीर्भवत्येवनसंशय ॥ साध्यवृक्षत्वचालानेःसम्य
ग्विषैश्चकारयेत् ॥ तांसंस्थापितप्राणांप्रतिमांसंस्पृशन्जपेत् ॥ पूजितांचहुनेद्रात्रौवशमानयतेध्रुवं ॥ नरोनारीसदावश्योभवे
देवनसंशय ॥ ॥ सुन्दराचार्यशिष्येणश्रीनिवासेनधीमता: चतुश्चत्वारिंशप्रकोगास्त्रणीनायांतरंगकं ॥ ॥ इतिश्रीशिवार्च
नचंद्रिकायांचतुश्चत्वारिंशप्रकाशः ॥ ॥ शारदातिलके ॥ अथत्र्यम्बकमंत्रमभीधास्याम्यनुत्तमं ॥ यंभजंतेनरकालस्ववशीक्षि
तमक्षमः ॥ सारसंग्रहे ॥' ॥ भुजंगेशमारूढपूतनावसुदेवभुक् ॥ वकंयजामहेप्रोक्तासुगंधंपुष्टिवर्द्धनं ॥ दुर्वारुकमिवप्रोक्ता
वेधनान्मृपदंवदेत् ॥ न्योर्मुक्षीयपदंब्रूयान्मामृतादित्युदीरयेत् ॥ त्र्यम्बकमनुःप्रोक्तोभजतांमृत्युनाशनं ॥ भुजंगेशोरेफः ॥ तदारूढ
पूतनातकारः ॥ वसुधायकारइंदुरस्वाहा ॥ एतै ॥ ॐइतिॐन्यादिपदानिस्वरूपाणि ॥ शारदातिलके ॥ वशिष्ठोस्यमुनिःप्रोक्तोछंदो

त्रुष्टुबुदाहृतं ॥ देवतास्य समुदिष्टः त्र्यम्बकः पार्वतीपति ॥ विभक्तैर्मंत्रवर्णैः स्यात्षडंगानां प्रकल्पनात् ॥ हृदयं त्रिभिराख्यातं चतुर्भिः
शिवईरितं ॥ शिखाष्टाभिः समुदिष्टाभिः समुद्दिष्टानवःभिकवचं मतं ॥ पंचभिर्नेत्रमाख्यातमस्त्रं त्रिभिरुदाहृतं ॥ पूर्वपश्चिमयाम्येषु व
क्त्रेषु तदनंतरं ॥ उरोगलास्येषु पुनर्नाभिहृत्पृष्ठकुक्षिषु ॥ लिंगपायुरुमूलांतजानुयुग्मेषु तत्परं ॥ तद्वत्युग्मेस्तनयोः पार्श्वयोः पादयो
पुन ॥ पाण्योर्नाशिकयोः शीर्षे मंत्रवर्णान्न्यसेत्क्रमात् ॥ पदान्येकादशन्यस्येच्छिरोमूर्ध्नगलादिषु ॥ वक्त्रगण्डयुगे भूयो हृदये जठरे पुनः
गुह्योरुजानुपादेषु न्यासमेवं समाचरेत् ॥ हस्ताभ्यां कलशद्वयामृतरसैराप्लावयंतं शिरो द्वाभ्यां तौ दधं मृगाक्षवलये द्वाभ्यां महंतं परं
अंकन्यस्तकरद्वयामृतघटं कैलासकांतिं शिवं स्वच्छांभोजगतं नवेंदुमुकुटं देवं त्रिनेत्रं भजे ॥ पंचाक्षरोदिते पीठे पूजयेद्वृषभध्वजं ॥
मूर्त्तिं मूलेन कल्पवक्ष्यमाणेन वर्त्मना ॥ पूर्वमंगानि संपूज्य पश्चिमान्मूर्त्तिः प्रपूजयेत् ॥ अर्केन्दुवसुधातोयवह्नीरवियरात्मन ॥ आत्मा
यजमाज ॥ द्वितीयावरणे पूज्या मूर्त्तयोष्टाविमाः क्रमात् ॥ रमा राका प्रभा ज्योत्स्ना पूर्णोषा पूरणी सुधा ॥ अष्टाविमाः क्रमात्पूज्यास्तृ
तीयावरणे ततः ॥ विश्वा विद्यासि प्रह्वी सा संध्याच्च शिवा निशा ॥ चतुर्थ्यावरणे पूज्याः शक्तयोष्टौ क्रमादिमाः ॥ आर्या प्रज्ञा प्रभा मेधा शां
तिः कांतिर्धृतिर्मतिः पंचमावरणे पूज्याः क्रमादेतास्ततः परं ॥ धरोमा पावनी पद्मा शांता मोघा जया मला ॥ षष्ठावरणगाः पूज्या लोकपा
लास्ततः परं ॥ सप्तमावरणे पूज्यास्तदस्त्रैः स्यात्समावृति ॥ अथ प्रयोग ॥ तत्र प्रातःकृत्यस्नानादियोगपीठन्यासांते मूलमंत्रेण प्राणायामत्रयं

शात्वाशिरसिवसिष्ठायऋषयेनमः॥ मुखेनुष्टुप्छन्दसेनमः॥ हृदयेश्रीमृत्युंजयायरुद्रायनमः॥ इतिविन्यस्यममसर्वाभीष्टसिद्धयेवि
नियोगः॥ इतिकृतांजलिरुत्वा॥ त्र्यम्बकंहृदयाययजामहेशिरसेसुगंधिंपुष्टिवर्द्धनंशिखायैउर्वारुकमिववंधनात्कवचायमृत्योर्मुक्षीयनेत्रा
यमामृतात्॥ अस्त्रायफट्॥ इतिमंत्रैःकरषडंगन्यासंकृत्वामुखेपूर्ववक्त्रस्थानेत्र्यंनमः॥ चूडाधःपश्चिमवक्त्रस्थानेवंदक्षकर्णेदक्षिणा
वक्त्रस्थानेवामकर्णेउत्तरवक्त्रस्थानेयं·उरसिजा·गलेम·मुखेहें·नाभौसुं·हृदिगं·पृष्ठेधिं·कुक्षौपुं·लिंगेष्टिं·पायौवं·दक्षोरुमूलेर्द्धं·वामो
रुमूलेनं·दक्षोरौउं·वामोरौर्वा·दक्षजानुनिरुं·वामेकं·दक्षजानुनिरुः·वामेजानुवृत्तेमिं·वामेवं·दक्षस्तनेवं·वामेधं॥दक्षपार्श्वेनां·वामेन्मृं·द
क्षपार्श्वेनां·वामेन्मृं·दक्षपादेत्यों·वामेमुं·दक्षपाणितलेक्षिं॥वामेयं·दक्षनासिमां·वामनासिमृं·शिरसितात्नमः॥ इतिवर्णविन्यस्यशिर
सित्र्यंवकंभ्रूयुगलेयजामहे॥नेत्रयोःसुगंधिं·मुखेपुष्टिवर्द्धनं॥ गण्डद्वयेउर्वारुकं·हृदिस्तनजठरेवंधनात्॥ गुह्येमृत्यो·ऊरुद्वयेमुक्षीय·जानु
नो॥मा·पादयोरमृतान्नम इतिपदानिविन्यस्यध्यानाद्यात्मपूजान्तेप्रागुक्तशैवपीठंसंपूज्यतत्रदेवमावाह्यपुष्पान्तानुपचारान्कृत्वाप्राग्व
दगानिसंपूज्याष्टदलेषुदेवाग्रदलमारभ्यप्रादक्षिण्येनइशानायसुर्यमुर्त्तयेनम॥ महादेवायसोममूर्त्तये·भवायक्षितिमूर्त्ते॥शर्वायजलमूर्त्ते
रुद्रायाग्निमूर्त्तउग्रायवायुमू·भीमायाकाशमू·पशुपतयेयमानमूर्त्तये॥ इतिसंपूज्यदलाग्रेष्वमायै·राकायै·प्रभायै·ज्योत्स्नायै·पूर्णायै·उषा
यै·पूरण्यै·सुधायै इतिसंपूज्यद्वितीयाष्टदलेभास्वत्यादारभ्यः विश्वायै·सितायै·प्रह्वायै·सारायै॥संध्या·निशायै·इतिसंपूज्यप्राग्वच्चतुरस्रवीथी

घये॥ लोकपालांस्तदक्षारिणा च संपूज्य पुष्पधूपादिसर्वं प्राग्वत्कृत्वा समापयेत्॥ तथा॥ जपेन्मन्त्रमिमं लक्षमेवं ध्यायञ्जितेन्द्रियः॥ जुहुया
दशभिर्द्रव्यैरयुतं घृतसंप्लुतं॥ बिल्वपलाशखदिरवटेतिलजशर्षपौ॥ दौग्धं दुग्धं दधिपुनर्दूर्वानानिविंडर्णुधाः॥ सहस्रमेकैकद्रव्येणादौ गधया
वशं॥ तर्पयित्वाभिषिंच्याथ ब्राह्मणान्भोजयेद्गुरु॥ एवं कृते प्रयोगार्हो जायते यमहामनुः॥ अयुतं जुहुयाद्बिल्वसमिद्भिः संपदे सुधीः॥ जुहुया
द्रुल्मवृक्षस्य समिद्भिर्बुद्धिमान्नेसज्जे॥ खादिरैरयुतं हुत्वा कान्तिपुष्टिमवाप्नुयात्॥ वटवृक्षस्य समिधैर्जुहुयादयुतं विधिः॥ धनधान्यसमृद्धिः स्यादचि
रेणावसाधक॥ तिलैस्तावत्स्वयाहुत्वा सर्वपापैः प्रमुच्यते॥ सिद्धार्थैरयुतं हुत्वा शत्रून्विजयते नृप॥ अनेनैव विधानेन नरूपमृत्युरकारज
पायसेन कृतो होमो रक्षाश्रीकीर्तिकान्तिदः॥ गोदुग्धे नवमुद्रान्नं हुत्वा कृत्याविनाशयेत्॥ अयमेव मनोर्होमः शान्तिश्रीसंपदावहः॥ दधिहोमे
न संवादं कुर्याद्विद्वेषणो मिथः॥ प्रत्यहं जुहुयान्मन्त्री दूर्वामष्टोत्तरं शतं॥ आमयान्निखिलाञ्जित्वा दीर्घमायुरमाप्नुयात्॥ जुहुयाज्जन्मदीवे
सपायसान्नैर्घृतान्विते॥ इच्छन्ननिंदितां लक्ष्मीमारोग्यमतुलं यशः॥ गव्यदुग्धघृताक्ताभिर्जुहुयाद्दशी॥ सविंदान्तशतं सम्यक्स्वजन्मदिव
सशुधीः॥ आमयैः सकलैर्मुक्तो जीवेद्वर्षशतं सुधीः॥ कश्मरीसमिधः सपींषपोन्नं त्रिशतं पृथक्॥ जुहुयाद्ब्राह्मणानेनो भोजयेन्मधुरा
न्वितं॥ प्रीणयेद्धनधान्याद्यैरात्मनो गुरुमादरात्॥ अनामयमवाप्नोति दीर्घमायुः श्रिया सह॥ सघृतेन पयोनेन हुत्वा पर्वणि॥ राज्यश्रिय
मवाप्नोति षण्मासान्नात्र संशय॥ लाजैर्विंशुद्धैर्जुहुयात्कन्यार्थी सा वरान्स्वयं॥ क्षीरद्रुमसमिद्धोमाद्ब्राह्मणादीन्वसं नसेत्॥ स्नात्वा सह

Sanskrit University, Valmeeki Campus, Kathmandu

स्वप्रजपेदादित्याभिमुखोमनुं॥ आधिव्याधिविनिर्मुक्तोदीर्घमायुरवाप्नुयात्॥ अनेनमनुनासर्वंसाधयेदिष्टमात्मन॥ ॥श्रीयन्त्रसारे॥
आलिख्याष्टदलंपद्मंतारंतात्कर्णिकान्तरे॥ तस्योदरेलिखेत्साध्यंसाधकाभीष्टकर्मयुक्॥ द्वौद्वौस्वरौकेशरेषुदलेषुअवकाक्षरान्॥ चतु
रश्चतुरोवाह्येवेष्टितंव्यंजनाक्षरैः॥ मायारुढेन्त्यसाध्यवर्णादर्भितयावृतं॥ भूपुराश्रिषुठंवीजंदिक्षुवंवीजमेवच॥ लिखेदानुष्टुभंपत्रंगोपनीयंप्रय
त्नत॥ आयुरारोग्यसौभाग्यधर्मार्थसुखमोक्षदं॥ किमत्रबहुनोक्तेनकाक्षितार्थामरांघ्रिप॥ अस्यार्थः॥ ॥अष्टदलंपद्मंकृत्वातत्क
र्णिकायांसमाध्यंप्रणवंविलिख्यतद्वहिर्दलद्वयांतरालगतवीथ्यांककारादिक्षकारान्तैर्वर्णैः संवेष्ट्यवाह्यवीथ्यांमायारूढचतुष्कथेन्त्यवासा
ध्यनामाक्षरविदर्भितयासंवेष्ट्यतद्वहिश्चतुरस्रकोणेषुठंतस्यचतुर्दिक्षुवंइतिचलिखेदेतद्यन्त्रंभुक्तिफलदं॥ मावारुद्रचुक्रुधामानमोभिर्मी
दुष्टुतीवृषभमामहूतीउन्नोवीराँअर्पयभेषजेभिर्भिषक्तमंत्वाभिषज्ञांशृणोमि॥ ऋषिदेवतछंदांसित्वस्याञ्चवः गृत्समदोरुद्रस्त्रिष्टुप्॥
॥ ॥शारदातिलके॥ प्रणवाद्याव्याहृतयः सप्तस्युस्तत्पदादिका॥ चतुर्विंशत्यक्षरात्मागायत्रीशिरसान्विता॥ सर्ववेदोद्धृतः सारोमं
त्रोयंसमुदाहृतः ब्रह्मादेव्यादिगायत्रीपरमात्मासमीरिता॥ ऋष्याद्या॥ प्रणवस्यैतेमुनिभिः परिकीर्त्तिता॥ जमदग्निभरद्वाजभृगुगौत
मकश्यपा॥ वीश्वामित्रवशिष्ठाख्यौव्याहृतीनामृषिवदुः॥ गायत्र्युष्णिक्तथानुष्टुब्बृहतीपंक्तयः पुन॥ त्रिष्टुब्जगत्यौछंदांसिकथितानि
महर्षिभिः॥ सप्ताग्निरनिलः सूर्योवाक्पतिर्वरुणोवृषा॥ विश्वेदेवा॥ क्रमादासांदेवताः परिकीर्त्तिता॥ गायत्र्याम्मुनीराख्यातोविश्वामि

त्रोमहामुनि॥गायत्रीछन्दइत्युक्तंदेवतासवितास्मृतं॥शिरसोस्यमुनिर्ब्रह्माछंदोदेव्यादिकास्मृता॥गायत्रीपरमात्मास्यादेवताकथिता
बुधैः॥व्याहृतीसप्तभूराद्याःछन्दस्वासांसहुग्मके॥जठरेन्यस्यसर्वज्ञोगायत्र्यर्णांस्ततोन्यसेत्॥यत्नविगुध्वजेनाभौहृत्कंठभुजसंधिषु
आस्यनासाकपोलाक्षिकर्णभ्रूमस्तकेपुनः॥पार्श्वयोरन्तरपासाप्रागूर्द्ध्वदक्षेषुसाधकः॥पदानिदशविन्यस्यदेहस्थानेषुमंत्रवित्॥
शिरोभ्रूमध्यहृत्कंठहृन्नाभिगुह्यके॥जानुनोःपादयोर्मेतद्धिरःशिरसिन्यसेत्॥हृदयंब्रह्मणोप्रोक्तंवैष्णवेशिरसीरितं॥
सिखारुद्रायकवचमीश्वरायसमीरितं॥नेत्रसदाशिवाप्रोक्तंमस्त्रंसर्वात्मनेस्मृतं॥षडंगानिचमुक्तानियथास्थानंप्रविन्यसेत्॥मुक्ता
विद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटांतत्वात्मवर्णात्मिकां॥गायत्रींवरदाभयांकुशकशान्शुभ्रंकपा
लंगुणांशंखंचक्रमथारविंदयुगलंहस्तैर्वहंतींभजेत्॥सप्तव्याहृतिसंयुक्तांगायत्रींशिरसान्वितां॥त्रिरुच्चरणधियाप्राणान्धारयेद्ध
तमानसः॥प्राणायामोपमाख्यातःसमस्तदुरितापहः॥प्राणायामान्पुराकृत्वागायत्रींसध्ययाजयेत्॥विधायमण्डलंविद्वान्त्रिको
णोज्वलकर्णिकं॥अष्टपत्रांबुजंद्वंद्वचतुरस्रत्रयावृतं॥सौरपीठंयजेत्तत्रदीप्तादीनवशक्तिभिः॥मूलमंत्रेणक्लृप्तायांमूर्त्तौदे
वींप्रपूजयेत्॥त्रिकोणेषुसंपूज्याब्राह्म्याद्याःशक्तयोबहिः॥आदित्याद्याश्चसंपूज्याउषादिसहिताःक्रमात्॥ततःखड्गाद्यष्टपत्रे
केशरेषुयथाविधि॥ब्रह्मादिनींप्रभांपश्चात्नित्यांविश्वंभरांपुनः॥कांतिंदुर्गांसरस्वत्यौविश्वरूपांततःपरं॥विशालाक्षींगीतामीढां

व्यापिनीं विमलां यजेत् ॥ नमोपहारिणीं सूक्ष्मां विश्वयोनिं जयावहां ॥ पद्मालयां परां शोभां पद्मरूपां नमोर्चयत् ॥ ब्राह्म्याद्याश्चास्तरणावाह्ये पूजयेत्स्वोक्तलक्षणाः ॥ ततोर्चयेद्गृहान्बाह्ये शङ्खाद्यौ नायुधैः सह ॥ इत्थं सावरणां देवीं दशाभिपरिपूजयेत् ॥ धर्मार्थकाममोक्षाणां भोक्ता स्याद्विजसत्तम ॥ ॥ अथ प्रयोग ॥ तत्र प्रातः कृत्यादियोगपीठन्यासांते शिरसि ब्रह्मणे ऋषये नमः ॥ मुखे देवीगायत्री छंदसे नमः ॥ हृदये श्रीपरमात्मदेवतायै नमः ॥ पुनः शिरसि जमदग्निभरद्वाजभृगुगौतमकाश्यपविश्वामित्रवसिष्ठेभ्यो नमः ॥ मुखे गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुप्जगतीछंदेभ्यो नमः ॥ हृदये अग्निवायुसूर्यगुरुवरुणावृषविश्वदेवताभ्यो नमः ॥ पुनः शिरसि ब्राह्मणे ऋषये नमः मुखे गायत्री छंदसे · हृदये श्रीपरमात्मने देवतायै नमः ॥ इति विन्यस्य महाव्याहृतिभिः प्राणायामं त्रयं कृत्वा · शिरसि विश्वामित्राय ऋषये नमः ॥ मुखे गायत्री छंदसे नमः ॥ हृदये सवित्रे देवतायै · इति विन्यस्य · ॐ ब्रह्मणे हृदयाय नमः ॥ ॐ विष्णवे शिरसे रुद्राय शिखायै ईश्वराय कवचाय सदाशिवाय नेत्रा · सर्वात्मने अस्त्राय फट् ॥ इति षडंगं विधाय ॥ हृदि ॐ भूः मुखे ॐ भुवः · दक्षिणांसे ॐ स्वः · वामे ॐ · महः · दक्षोरौ ॐ जन वामे ॐ तपः जठरे ॐ सत्यं नमः ॥ पादांगुलीमूलयोः · ॐ तन्नमः गुल्फयोः · सं जान्वोः · वि ऊरुमूलयोः · तु · लिंगे र्व · नाभौ रे · हृदि नि · कराठे यं · करांगुलीमूलयोः · भं मणिबंधयोः ॥ गो · कूर्परे · दे · भुजमूलयोः वं · मुखस्य · नाशिकयोः धीं कपोलयोः मं · नेत्रयोः · हिं · कर्णयोः · धि भ्रुवोः · यो शिरसि यों चूडाध वामकर्णे प्रं · दक्षिणकर्णे चो मुखे द शिरसि पान्नमः ॥ शिरसि तन्नमः · भ्रूमध्ये सवितुः · नेत्रयोः · वरेण्यं · मु

खेभर्ग· करोदेवस्य· नामौधिपः ग्रध्येयः ज्ञानुनो· नःपादयो प्रचोदयात्॥ पुनः शिरसि ॐ मापोज्योतीर· सोमृतं ब्रह्म भूर्भुवस्सुवरों
नमः॥ इतिविन्यस्यध्यानाद्यात्मपूजांतेपूर्वोक्तंसौरपीठमभ्यर्च्यतत्रमूर्त्तिंगायत्र्यापरिकल्प्यतस्यांदेवीमावाह्यपुष्पांतैरुपचारैः संपूज्य
त्रिकोणस्याग्रकोणादिदक्षिणपनकोणत्रये ॐ ब्राह्म्यै· माहेश्वर्यै· ॐ वैष्णव्यै· इतिसंपूज्यकर्णिकायामेवत्रिकोणाद्वहिर्देव्याआदि
चतुर्दिक्षु ॐ आदित्यायनमः॥ एवंरये ॐ भानवे· ॐ भास्कराय॥ अग्न्यादिचतुःकोणेषु॥ ॐ उयायै· प्रप्रज्ञायै· प्रप्रभाः ससंध्यायै·
इतिसंपूज्यदलाग्रेषुकान्त्यै· दुर्गा· सरस्वत्यै· विश्वरूपा· विशाला· ईशायै· व्यापिन्यै· विमलायै इतिसंपूज्यदलमध्येषुब्राह्म्याद्यादला
ग्रेषुसोमाद्यष्टग्रहान्सौरप्रकरणोक्तांश्चसंपूज्यचतुरस्रवीथीद्वयेप्राग्वदीशादीन्वज्रादिंश्चसंपूज्यधूपदीपादिसर्वंप्राग्वत्कृत्वा
समापयेत्॥ तथा॥ व्याहृतित्रयसंयुक्तांगायत्रींदिक्षितोजपेत्॥ तल्लक्षंविधानेनभक्ष्याशीविजितेंद्रिय॥ क्षीरोदनतिलांदूर्वा
क्षीरोदनसमिद्वरान्॥ पृथक्सहस्रत्रितयंजुहुयान्मंत्रसिद्धये॥ तर्पणादिततः कृत्वागुरुंसंतोष्ययत्नत॥ प्रयोगानाचरेद्विद्वां
स्तत्पदंजुहापुरस्सरं॥ तत्वसंख्यसहस्राणिमंत्रविज्जुहुयात्तिले॥ सर्वपापविनिर्मुक्तोदीर्घमायुः सविंदति॥ आज्यपसाज्यहविष्या
केवलेनाथसर्पिषा॥ दूर्वात्रिकैस्तिलैर्मंत्रीजुहुत्रीसहस्रके॥ प्रतिद्रव्यमितिशेष॥ अरुणाब्जैस्त्रिमध्वक्तैर्जुहुयादयुतंनरः
महालक्ष्मीर्भवेत्तस्यषण्मासान्नात्रसंशयः॥ ब्रह्मश्रियेप्रजुहुयात्प्रसूनैर्ब्रह्मवृक्षजै॥ वहुनाकिमिहोक्तेनयथावत्साधुसाधि

ता ॥ द्विजन्मनमियं विद्यासिद्धा कामदुघा मता ॥ ॥ तथा यंत्रसारे ॥ आवीतव्याहृतीभिर्वसुदलकमले कर्णिकायां च तारं किंजल्केषु स्वरांश्च दलमनुगणाशोमंत्रवर्णान्लिखेच्च ॥ ॐ मापोज्योतिराद्यैर्वीहिरपि चतूर्नव्यंजनार्णौश्च यंत्रंगाय आमोक्षधर्मद्रविणासुखकरं भूपुराश्रियमाप: ॥ अस्यार्थ ॥ अष्टदलकमलं कृत्वा तत्कर्णिकायां ससाध्यं प्रणवं विलिख्य तद्दलेषु गायत्र्यर्णास्त्रिशस्त्रिशः प्रतिदल विलिख्य तद्बहिर्वृत्तं द्वयांतराले ककारादिक्षकारांतैरोमापोज्योतीरसामृतं ब्रह्मभूर्भुवस्सुवरोमित्यंतैरावेष्ट्य तद्बहिश्चतुरस्रं कृत्वा तत्कोणेषु भुवनेश्वरीबीजं लिखेदेतद्यंत्रमुक्तविधिना धृतं मुक्तिफलदं भवति ॥ शारदातिलके ॥ आग्नेयमभिधास्यामि मंत्रं सर्वार्थसाधकं ॥ सारसंग्रहे ॥ जातवेदपदं से सुनवाम सोम इत्यथा ॥ मरातीयतो निदहाति वेदः पदमीरयेत् ॥ स नः पर्षदति ततो दुर्गाणि विश्वपदं वदेत् ॥ नावेव तत न: सिंधुं दुरितात्यग्निरित्यपि ॥ त्रिष्टुप्मंत्रोयमाख्यात: सर्वशत्रुनिवर्हण: मंत्रोद्धार: सुगम ॥ सारदातिलके ॥ मारीचि ॥ काश्यप: प्रोक्तो मुनिरस्य महामनो ॥ त्रिष्टुप्छंदो देवतास्य जातवेदाग्निरीरित ॥ अंगुष्ठयुग्मतः जंघासु जानुनोरूरुयुग्मके ॥ कटिघनाभिहृदि पृष्ठस्तनयो: पार्श्वयोर्द्वयो ॥ पृष्ठत : स्कंधयोर्मध्ये बाहुमूलोपबाहुषु ॥ प्रकोर्परप्रकोष्ठेषु मणिबंधनलेषु च ॥ मुखनासाक्षिकर्णेषु मस्तमस्तिमूर्द्धनि ॥ संकरंठबाहुहृत्के ॥ क्रमेण विन्यसेद्वर्णान्मात्रिमंत्रसमुद्भवान् ॥ शिखाललाटनयनकर्णेषु रसनास्वथ ॥ सकरंठबाहुहृत्कुक्षिकटिगुह्योरुजानुषु ॥ जंघयोः पादयोर्न्यस्य सदान्मतमनो न्यधी ॥ विद्युद्दामसमप्रभा

॥शि॰च॥
॥४९३॥

मृगपतिधस्थितांभीषणांकन्याभिः करवाल्खेटविलसद्भुजाभिरासेवितं॥ हस्तैश्चक्रदरासिखेटविशिखापाशांकुशौ तर्जनीं बिभ्रा
णामनलाग्निकां शशिधरां दुर्गां त्रिनेत्रां स्मरेत्॥ दक्षाधूर्द्धयोराद्येन दाद्यधस्थयोरन्येन तदाद्यधस्थघोरपरेरन्याद्यथध्याने॥ मण्डलेसर्वतो
भद्रे पद्मेषट्कोणकर्णिके॥ विधिनावक्ष्यमाणेन पीठदेवीं प्रपूजयेत्॥ जयाख्यां विजयां भद्रां भद्रकालिमनंतरं॥ सुमुखीं दुर्मुखीं चैव पश्चा
द्व्याघ्रमुखीं पुनः॥ अथ सिंहमुखीं दुर्गां नवशक्तीः प्रपूजयेत्॥ आसनं सिंहमंत्रेण दद्यादुर्गेन साधकः॥ सिंहमंत्रः प्रागुणोप्रकरेण
प्रोक्तः तथा॥ मूर्त्तिं मूलेन संकल्प्य तस्यामावाह्य पूजयेत्॥ षडंगानि यथा पूर्वं केशरेषु च यत्नसुधीः॥ त्वादिपादापकोत्यन्तामूर्त्तयोर्च्चाव
हिः पुनः॥ जातवेदाः सप्तजिह्वो हव्यवाहनसंज्ञकः॥ अश्वोदरजसंज्ञोऽन्यः पुनर्वैश्वानराह्वयः॥ कौमारतेजाः स्यादिश्वमुखादेवमुखः स्मृ
तः॥ ततोभूसलिलाग्नीशमात्मनेत्रात्त्वमोग्निनावनुर्दिक्षु समभ्यर्च्य कोणेषु तत्कलाः पुनः॥ पूर्वादिदिक्षु संपूज्या जारणींध्याचरणींघाचर्णीं दे
वता॥ जगतापिनी वेदगर्भा दहनरूपिणी॥ सेंदुखण्डा शुभं हंत्री नभश्चारिण्यनंतरं॥ वागीश्वरी मदवहास्या मरुपा मनोजवा॥ मरु
द्वेगा रागत्रिसंज्ञानी पाप्रशावती॥ तोयात्मिकापुनर्नित्यादयावत्यपिहारिणी॥ निरस्त्रपा वेदमानातत्परा दमनप्रिया॥ समाराध्यानंदि
नीचपरारिपुविमर्दिनी॥ षष्ठी च दराडीनितिग्मा दुर्गागायत्र्यनंतरं॥ निरवद्या विशालाक्षी श्वासोद्वाहा च नादिनी॥ वेदना वह्निगर्भा च
सिंहवाहाह्वयात था॥ धूर्या दुर्विषहा पश्चाद्रिंसानापहारिणी॥ त्यक्तदोषा निसपत्ना चत्वारिंशच्चतुर्भुजा॥ लोकपालास्ततोभ्यर्च्य वज्राद्या

॥राम॥
॥४९३॥

शुधसपुनात् ॥ ॥अथप्रयोगः तत्रप्रातः कृत्यादियोगपीठन्यासान्ते मूलमंत्रेणप्राणायामत्रयं कृत्वाशिरसि काश्यपायऋष
ये मुखेत्रिष्टुप्छंदसे हृदयेजातवेदसेग्नयेदेवतायैइतिविन्यस्य ममसर्वाभीष्टसिद्ध्येविनियोग ॥ इतिकृताञ्जलिरुक्त्वाजातवेद
सेसुनवाम हृदयायनमः सोममरातीयतः शिरसेनिदहातिवेदः शिखायैसनः पर्षदतिकवचाय दुर्गाणिविश्वानावेवनेत्राय·सि
धुंदुरितात्यग्निः अस्त्राय इतिषडंगमंत्रान्तेगुष्ठादितलांतं करयोर्विन्यस्य· हृदयादिषडंगेष्वपिविन्यस्य दक्षपादांगुष्ठेजांनमः वामेतं·
दक्षगुल्फेवें· वामेवं· दक्षजंघायांसें वामेसुं दक्षजानुनिनं· वामेवां· दक्षोरौम ॥ वामेति· दक्षपार्श्वेदं· वामेहां· पृष्ठेति· दक्षस्कंधेवें· वामेदं
दक्षबाहुमूलेसं· वामेनंद ॥ क्षयाहुमूलेपं· वामेत्तं· दक्षप्रकोष्ठेति· वामदुः· दक्षमणिबंधेगां· वामेणि· दक्षकरतलेवि: वामेश्वा· मु
खेनां दक्षनासिवें· वामेवं· दक्षनेत्रेसि· वामेधुं ॥ दक्षकर्णेदुं· वामेरिं· ललाटेतां· ललाटस्योपरिभ्य ॥ मूर्ध्नित्यग्निं इतिविन्यस्य शिखाया
जातवेदसेनम ॥ ललाटेसुनवाम· दक्षिणनेत्रेसोमं· वामेअरातीयतः दक्षिणकर्णेनि· वामेनिदहाति· आस्येवेद ॥ अधरेशः ॥ रस
यानान ॥ कण्ठेपर्षतः· बाह्वोः अति: हृदिदुर्गाणि· कुक्षौविश्वा·गुह्येरवडरुद्वये· सिंधुजानुद्वयेदुरितात् ॥ जंघयोः अति: पादयोः अ
ग्नि ॥ नवइतिविन्यस्य ध्यानाद्यात्मपूजांतेकृत्वाउक्तसर्वतोभद्रमण्डलेकृत्वातत्कर्णिकायांषट्कोणं कृत्वा तत्रमंडूकादिपरतत्वांतं शक्ती
पीठमभ्यर्च्यकेशरेषुॐजयायै विजयायै· विद्यायै· मडकाल्यै· संमुखैयै· दुर्मुखैयै· सिंहमुखैयै· दुर्गायै· नमइसंपूज्य· ॐवज्रनखदं·

स्वायमहासिंहायहुंफट्॥ नमइतिपीठमंत्रेणपीठंसंपूज्यमूलमंत्रेणमूर्त्तींसंकल्प्यावाहनादिषडंगपूजांतमेषुदलेषुॐजातवेदसेनमः
एवंसप्तजिह्वायहव्यवाहनाय·अश्वोदरजाय·कौमारतेजसे·विश्वमुखाय·वेदमुखाय·इतिसंपूज्यपीठस्यचतुर्दिक्षुधरात्मनेनमः॥ स
लिलात्मने·अग्न्यात्मने·वाय्वात्मनेनत्वोरणेषु॥ निवृत्त्यै·प्रतिष्ठायै·विद्यायै·शांत्यै·इतिसंपूज्यवीथीचतुष्टये·स्वाग्रादिप्रादक्षिण्येन·ज
गतायै·तपन्यै·वेदगर्भायै·दहनरूपिण्यै·सिंदूरवर्णाशुभमहंत्र्यै·नमस्वारिण्यै·वागीश्वर्यै·मदवाहायै·सोमरूपायै·मनोजवायै·मरुद्वेगायै·
राज्यै·तीव्रकोपायै·यशोवत्यै·तोयात्मिकायै·नित्यायै·दयावत्यै·हारिणेपतिरस्कृपायै·वेदमात्रे·दमनप्रियायै·समाराध्यै·नंदित्यै·परा
यै·रिपुविमर्दिन्यै·प्रस्वेदरिण्यै·तिग्मायै·गायत्र्यै·निरवद्यायै·विशालाक्ष्यै·प्राशोद्यतायै·नादिन्यै·वेदनायै·सिंहवाहायै·धूपायै
दुर्विषहायै·तापहारिण्यै·त्यक्त्य·दोषायै·नि·सपत्नायैनमः·इतिप्रतिदिशमेकादशैकादशशक्तीःसंपूज्यतद्वहिर्लोकपालांस्तदस्त्रा
णिचसंपूज्य·धूपदीपादिसर्वंप्राग्वत्कृत्वासमापयेत्तथा॥ ॥मंत्रवर्णसहस्राणिजपन्मंत्रविशालधीः॥ तदंतेतिलसिद्धार्थवि
त्वमूलैःसमिद्वरैः॥क्षीरद्रुमाणामाज्येनहविषान्नेघृतान्विते।॥ चतुश्चत्वारिंशदाद्यचतुःशतसमन्वितं॥ चतुःसहस्रंजुहुयाद्दर्चितेह
व्यवाहने॥ दशभिर्द्रव्यैः·प्रतिद्रव्यंचतुश्चत्वारिंशदुत्तरचतुःशतसंख्यंहुत्वातिलद्रव्येणाहुतिचतुष्टयमधिकंजुहुयात्॥फेत्कारि
णीतंत्रे॥ ततःसंतर्प्यशालिलेकृत्वाचात्माभिषेचनं॥समाराध्यवराधरादेवीस्तोषयेज्जुहुमात्मनः॥इत्थंजयादिभिःसिद्धमंत्रैस्मीन्ता

धकोन्नमः॥ आग्नेयास्त्राधिकारीस्यात्तद्विधानमुदीर्यते॥ अग्नेयास्त्रमिति प्रोक्तं विलोमपठितो मनुं॥ पूर्वोक्तास्त्वनुत्याद्यामंत्रस्यास्यप्र
कीर्त्तिता॥ प्रतिलोमक्रमादस्य षडंगानि प्रकल्पयेत्॥ वर्णान्यासपदन्यासौ विदध्यात्प्रतिलोमतः॥ ध्यानभेदान्विजानीयाद्गुर्वादेशान्न चान्य
था॥ पूर्ववज्जपहोमादीन्कुर्यात्पूर्वसंख्यया॥ पंचगव्यसुपक्केन वरुणास्त्रस्य सिद्धये॥ अर्चनं पूर्ववत्कुर्याद्दक्षिणास्य॥ प्रतिलोमतः॥ स
र्वत्र देशिकः॥ कुर्याज्जायत्र्याद्विगुणाजपं॥ क्रूरकर्माणि कुर्वीत प्रतिलोमविधानतः॥ शान्तिकं पौष्टिकं कर्म कर्त्तव्यमनुलोमतः॥ प्रयोग
काले प्रजपेदष्टौ पादान्विलोमतः॥ साधितो जायते पश्चान्मंत्रोयं विधिनामुना॥ न्याद्यः पंचाक्षरः पादो ज्ञेयो ज्ञानेन्द्रियात्मकः॥ धुमायः
पंचवर्णात्मकः स्मृतः कर्मेन्द्रियात्मकः॥ श्चाद्यस्तृतीयः पंचार्णः पंचभूतमयः स्मृतः न्याद्यः सप्ताक्षरः पादश्चतुर्थो धातुरूपकः॥ दपूर्वः पंच
मः पादस्तन्मीरूपः षडक्षरः॥ ततो वर्णादिषड्वर्णोन्य॥ षट्कौशिकमयो मतः॥ सोपूर्वः पंचवर्णोन्यः शब्दादिजपईरितः॥ सेवर्णाद्यष्टमो
ज्ञेयः पंचार्णाव वचनादिकः॥ एवं तत्त्वसमायोगात्पादव्यूहनिरूदीरिता॥ तत्त्वन्यादाक्षरोत्पन्नासप्ताराध्यावह्निदेवता॥ प्रधानमूर्त्तिः प्रतिमा
स्वस्ववर्णोदितः प्रभा॥ प्रज्वलत्केशवदनाभीदंष्ट्रभयावहा॥ देवताइंद्रियोत्पन्ना उर्द्धदृष्टयईरिता॥ देवताभूतपादोत्थास्तिर्यग्वक्त्राप्र
कीर्त्तिता॥ धातुरूपाक्षरोत्पन्नाउभयाननशोभिता॥ तन्मात्राजाउर्द्धवदनाः कोणोत्थास्तिर्यगानना॥ एताः सर्वाः स्मृताः क्लीवा स्त्रीयार्थोऽप्र
वास्त्रिय॥ अधस्तिर्यङ्मुखोपेताईरितावर्णदेवता॥ आभिमुख्याः स्मृताः सौम्यपराङ्मुखोन्यकर्मणि॥ आभ्योसंख्यासमुत्पन्नादेवता

॥शि॰व॥
॥४९५॥

ज्वलितानना ॥ याभीर्मंत्री दहेद्धत्रोराज्यं स्वे गिरिकाननं ॥ अस्त्रं मनुष्य नक्षत्रे तारमेत विचक्षण ॥ आसुरे प्रयुंजीत देवतासु संहरेत् ॥
पूर्वोत्तरात्रयं पश्चा भरणार्द्रा च रोहिणी ॥ इमानि मानुषाणां तु नक्षत्राणि मनीषिणा ॥ ज्येष्ठा शतभिषं मूलं धनिष्ठाश्लेष कृत्तिका ॥ उपक्रमेत
नदासुरि क्षास्त्रं विसर्जयेत् ॥ भडास्त्रा हरणं कुर्याद् नयास्वत्यंतमुत्तमं ॥ उपक्रमो भौमवारे शनिवारे विसर्जनं ॥ प्रतिसंहरणं वारे गुरोः शु
क्रस्य वा भवेत् ॥ स्थिरे प्रराशि आरंभ श्चरे श्चस्या द्विसर्जनं ॥ अस्त्र संहरणं कुर्याद् उभयेषु विचक्षण ॥ कृष्णपक्षे नलेनास्त्रं विसृजे द्वसिताष्ट
न ॥ शुक्लपक्षे क्रमादस्त्र प्रनरात्मनि संहरेत् ॥ भानुनामोक्षसंहारौ कुर्यात्त्य हृदये सुधी ॥ पश्चिमाभिमुखो भूत्वा सर्वकर्माणि साधयेत् ॥ नक्ष
वृक्ष क्षशकलान्साध्याख्याकर्मसंयुतान् ॥ तन्नमंत्राक्षरोपेतान्मंत्री मंत्राणि संख्यया ॥ जुहुयाद विनेवमारयेद्रिपुमात्मन ॥ कृष्णाष्टमीस
मारभ्य यावत्कृष्णाचतुर्दशी ॥ धत्तूरविषविक्षोत्थभूरुहे तथा त्समिद्वरात् ॥ राजीतैलेन संलिप्ताः पृथक सप्त सहस्रकं ॥ जुहुयात्संयतो भूत्वा
रिपुर्यमपुरं व्रजेत् ॥ सप्तरात्रं प्रजुहुयान्सिद्धार्थस्नेहसंयुतै ॥ आईवस्त्रा विष्टिकाले मरीचैर्मनुनामुना ॥ ॥ निगृह्यते ज्वरेणारिः प्रलया
न्निसमेनस ॥ तालपत्रे समालिख्य शत्रु नाम यथाविधि ॥ आग्नेयास्त्रेण संवेष्ट्य कुंडमध्ये निखन्यतत् ॥ हुनेन्मरीचैकशतं ज्वराक्रांतः स
जायते ॥ तदा दाय क्षिपेत्तोये शीतले स वशो भवेत् ॥ पिष्टा पामार्गबीजानी मरीचं मधुसंयुतं ॥ अस्त्रहुत्वा लवणं तोये निक्षिप्य क्वाथयेन्नतः
त्रपष्ट्व क्षप्रतिकृते हृदये लवणं निसि ॥ किंचित्किंचित्क्षिपेत्तोयं दर्व्याकारस्वरोत्थया ॥ आग्नेयमनुवरं मंत्री सोचिरा ज्वलितो भवेत् ॥ कृ

॥रामः॥
॥४९५॥

थितेमसितांक्षिप्त्वाहन्याछत्रूनयत्नत ॥ तीक्ष्णादेहेनसंलिप्तांशत्रुप्रतिकृतिंनिशि ॥ तापयेदेथितेवह्नौप्रतिलोममनुजयेत ॥ ज्वरेणाबा
ध्यतेसद्योह्यमादस्मृतिर्भवेत ॥ सामुद्रेसलिलेहिंगुलीविषजीरकलोलिते ॥ क्वथितेपुत्तलींसाध्यनक्षत्रतरुनिर्मितां ॥ अधोवक्त्रांवि
निक्षिप्यघस्त्राविषतरुत्थया ॥ तच्छिरस्ताडनंकुर्याज्जपन्मन्त्रविलोमत: ॥ सप्ताहान्मरणंयातोशत्रुर्ज्वरविमोहित ॥ आदित्यरथनागेंद्र
स्तांचिंतनविषाहृतं ॥ नग्नतैलेनलिप्तांगदग्धभानुमरीचिभि ॥ अधोमुखनिजरिपुंध्यात्वाक्वथितवारिणा ॥ तर्पयेज्जानुमात्रोक्ताशत्रुर्मृत्यु
प्रियोभवेत ॥ बिभ्रतिंमुसलंशूलंध्यायन्कालघनप्रभां ॥ वायसबीजैर्निम्बस्यपत्रैर्मेषीघृतप्लुते ॥ हुत्वाविषयेछत्रून्मरीविवीससर्ष
पे ॥ कालांजननिभांदुर्गांशूलखङ्गकरांस्मरन् ॥ नक्षत्रवृक्षसंमुद्भुतेप्रणाकृत्स्नेहसंप्लुते: ॥ समिद्वरै:प्रजुहुयाद्वन्मान्मासेनवैरिणा
वुणाक्रुद्धहन्तानक ॥ सिंहारूढांप्रभावतींधावमानेरिपुप्रति ॥ शरान्कार्मुकनिर्मुक्तान्वह्निज्वालामुखाकुलान् मुंचंतींसंस्मरन्दुर्गां
तर्पयेदुष्णवारिणा ॥ भानुबिंबसमालोच्यरिपोरुच्चाटभवेत् ॥ अतिदुर्गामयोपष्टिगदाहस्ताविचिंतयेत ॥ महिषीघृतसंप्लुते ॥ पुरा
केजुहुयान्निंबविभीतकसमिद्वरै ॥ कोद्रवैर्रथशत्रोप्स्वसेनायास्तंभनंभवेत ॥ आत्तपाशांकुशारक्तांगारिणिदुर्गांमनुस्मरेत् ॥ लो·
णा:समधुरै:साध्यवृक्षकाष्ठैश्चितेनले ॥ जुहुयान्निशिसप्ताहान्मंत्रविद्वशयेद्ध्रुशं ॥ पाशांकुशधरांध्यायेत्सिद्ध्यैदुर्गांसमिद्वरै ॥ वे
तसेमधुरारिक्तैजुहुयात्सृष्टिसिद्धये ॥ कपालंत्रिशिखंपाशंमंकुशंबिभ्रतिंकरै ॥ जवाकुसुमसंकाशामग्निदुर्गांविचिंतयेत ॥ हु

त्वाल्लवणपुत्तल्यामधुरत्रययुक्ता ॥ आकर्षयेद्वांछितान्साध्यांमंत्रविन्नात्रविन्नात्रसंशय ॥ अतिदुर्गेपिमन्त्याघाषडंताविश्ववीविना ॥ सि
द्धाघासावकारांतासिंधुदुर्गीनिगद्यते ॥ दुर्वर्णानाथयारणाघाणानिदुर्गासमीरिता ॥ विश्वाद्यारणक्षरांतासाविश्वदुर्गासमीरिता ॥ सिद्धा
घासावतासिंधुदुर्गीनिगद्यते ॥ भ्रंनामम्त्यादिकामेनाम्नाग्निदुर्गाविदुर्बुधा ॥ अगरुस्थिण्डिलंकृत्वासुगंधीकुसुमादिभि ॥ देवीमभ्यर्चयन्त्री
मद्यागुक्तेनैववर्त्मना ॥ आहरेद्भ्रित्रिपुवलिंचरुणासर्वसिद्धय ॥ कृत्वारोगहरेद्दुष्टग्रहभूतानिनाशयेदयं ॥ यथावदग्निमाराध्यगंधेपुष्पैर्मनोह
रैः ॥ स्थित्वातस्याग्रतोमंत्रीरिपुमात्मवशंनयेत ॥ शाल्लीमुक्षात्मसंसाध्यशुद्धान्कुर्वीततंदुलान् ॥ जपित्वापंचगव्येषुसंस्कृतेहव्यवाहने च
रूपंजेजपंत्तंचमवतार्यपुनःसुधी ॥ अर्चयित्वाविशदधीर्देविमग्नौयथापुरा ॥ जुहुयान्मुरुणाबेनसाज्येनासहस्रकं ॥ पात्रेसंतापनंकु
र्वनसाध्यंतत्राशयेज्जुहु ॥ शिष्टंतन्निखनेद्वारिसंपातंप्रागरणतरो ॥ कृत्वारोगाविनश्यंतिसहभूतग्रहामयै ॥ परैरुत्पादिताकृत्यापुनस्ता
नेवभक्षयेत ॥ व्रीहिभिर्हविषाक्षीरैःपयोवृक्षसमिद्वरैः ॥ आज्यैर्मधुत्रयोपेतैरेतैर्दशशतंपृथक ॥ जुहुयात्सपरांभूमिसाधकोभवतिध्रुवं
भास्करेमेषराशिष्टेमंत्रज्ञोनुगुरोर्दिने ॥ नद्यासागरगामिन्यासततंपुष्कलांभसि ॥ उद्धृत्यादायसिकताःसंशोष्यपरिशोधयेत ॥ नस्यता
पंचगव्येषुसंस्कृतेहव्यवाहने ॥ भर्जयेमनुनासिक्तोद्व्यावुलतरुस्थयः ॥ सिंहमेषधनुष्कैकेकृष्णपक्षेष्टमीतिथौ ॥ विशाखाकृत्तिकामूलह
स्तोत्तरमघास्वथ ॥ रोहिण्यांश्रवणेवारेमंदवाक्पतिदेवते ॥ विहायान्येषुकुर्वीतशिकतास्थापनंसुधी ॥ गृहग्रामादिराष्ट्राणांरक्षार्थं

सिकताः शुभ्रा ॥ प्रस्थारकघटोन्मानामश्वादिष्ववटेष्विमा ॥ नवसु प्रक्षिपेज्जप्त्वास्तेषु संपूजयेत्क्रमात् ॥ मत्स्यादिदेवीमस्त्राणि कपालो
तानि देशिक ॥ चक्रं संखमसिं खेटं वाणांश्चापं त्रिशूलकं ॥ कपालं स्वस्वमंत्रेण संपूज्याते वलिं हरेत् ॥ विहिता यत्र रक्षयं वर्द्धते तत्र
संपद ॥ क्षुद्रग्रहमहारोगचोरभूतसरीसृपाः ॥ अमुना विलयं यांति विधिना नात्र संशयः ॥ सिकतानाविशुद्धानां विकारकुडवं सुधी
पंचगव्ययुतं पात्रे त्रुलवृक्षेणनिर्मिते ॥ निक्षिप्य विधिना यस्या पयेत्तत्र संपद ॥ दिने दिने प्रवर्द्धते कालवृक्षादिभिः सह ॥ महोत्या
ताविनस्यति कृत्याद्रोहमहाग्रहा ॥ चरुगव्याश्मनां कुर्यात्स्थापनं विधिनामुना ॥ गोमूत्रप्रस्थमात्रं स्याद्गोमयाभस्तदर्धकं ॥ आज्या
त्सप्तगुणक्षीरं गोमूत्रात्त्रिगुणा दधि ॥ गोमूत्रेण समं सर्पिः सर्ववासमनुच्यते ॥ गावः सु·कपिलश्वेतहिमधूम्रारुणप्रभा ॥ अभावेरा
दिताः सर्वाः सर्ववाकपिलोद्भवं ॥ एकोनपंचाशत्कोष्ठफलके खुस्रशाखिन ॥ विहाय कोणकोष्ठानि शन्तपाद्यजातवेदशं ॥ लिखित्वा
मध्यकोष्ठादि पूजयेत्तत्र देवतां ॥ कृत्वा होमं समपातं निखनेत्तु यथापुरा ॥ दद्याद्धविर्यथापूर्वं तस्यापूर्वोदितं फलं ॥ अस्यार्थ ॥ तत्र विलो
मपठितं इत्यग्निस्तना रिउखुसिंवचेनाथ्वा विनिर्गाडुतिषरिपनः सदः वेति ह्लादनी तोयनीराममसोमवानसुसेदवेतजा इति पठितं ॥ प्र
तिलोमक्रमादिति ॥ ग्निस्तना रिउखुसिहत ॥ वचेनाथ्वा विरिणांर्गाडुशिर ॥ तिदषरिपनः सशिखादर्वौनि ह्लादनिकव चेतोयनीराममसो
नेत्रं मवानसुसेदवेतजा अस्त्र ॥ वर्णान्यासपदन्यासो प्रतिलोमत इति ॥ दक्षपादांगुष्ठे ग्निः वामेभ्यं·दक्षगुल्फेता· वामेरिं·दक्षजंघा

याउः·वामायाधुं·दक्षजानुनिसि·वामेवं·दक्षौरौवें·वामेनां·दक्षकक्षांस्वा·वामायविं·लिंगेरिणीं·नाभौगौ·हृदिदुं॥ दक्षस्तनेनिं·वामेदं·द
क्षपार्श्वेष·वामेरिं·पृष्ठेय·दक्षस्कन्धेनं·वामेसः·दक्षबाहुमूलेदं·वामेवें दक्षबाहुमध्येति·वामेह्रीं·दक्षकूर्परेदं॥ वामेतिं·दक्षप्रकोष्ठे
नां·वामेतिं·दक्षमणिबन्धेति·वामेरां·दक्षकरतलेमः·वामेमः·मुखेसा·दक्षनासिमं·वामेवां·दक्षनेत्रेनं·वामेवा॥ दक्षनेत्रेनं·वामेसु
दक्षकर्णेसि·वामेदं·ललाटेवें·ललाटोर्द्धेनं·मूर्द्धिजानम॥ इति॥ शिखायां·अग्निनमः·ललाटेअतिदक्षनेत्रेदुरितावामेसिंधु·दक्षकर्णे
इव·वामेनावा·ओष्ठेविश्वा·अधरेदुर्गाणि·रसनायांअति·कण्ठेपरिषद्·बाहूः·नःहृदिसः·कुक्षौवेदः·करोदहाति·गुह्येनि·ऊर्व्वो·अ
रातीयतः·जानुनोःसोमं·जंघयोसुनवाम·पादयोः·जातवेदसेनमः॥ इतिपदन्यास॥ शक्तीनांप्रतिलोमनइतिः·सपत्नेत्यन्तदोषायै·
नायहारिण्यै·रिंसाद्रुविषहाधुर्या·सिंहवाहा·वह्निगर्भायै·वेदनादिन्यै·श्यामोद्वाहा·विशालाक्षी·निरवद्यायै·गायत्र्यै·दुर्गातिघ्ना·
दंदिन्यैः·षष्ठ्यै·रिपुमर्दिन्यै·परायै·नंदिन्यै·समाराध्या·दमनप्रियायै·वेदमात्रे·निराकृत्या·हारिण्यै·दयावत्यै·तोयात्मिकायशो
वन्त्यै·तीव्रकोपा·रात्र्यै·महद्दुर्गायैमनोजवा·सोमरूपा·मदवाहा·वागीश्वर्यै·नमस्कारिण्यै·शुभहन्त्यै·सेतु·स्वराट·दहनरूपि
ण्यै·वेदगर्भा·तपिन्यै·जगतायैनमइति॥ पूर्ववदिनिजपञ्चाङ्गं॥ पुरश्चरणांवर्णसहस्रसंख्यजपेदिति॥ पञ्चगव्यपञ्चपल्लवहरणपुरश्च
रणागहोमप्रयोगकालेआग्नेयास्त्रप्रयोगकाले·पाशबद्धंतुप्रतिलोमलिखितमन्त्रेणनदर्भासंख्ययावाद्धव्यं॥ न्यायप्रयपल्लक्षराणान

त्वरूपत्वमाह ॥ न्याय इत्यादिभिः ॥ न्यादिसप्ताक्षरोत्यन्तानां देवतानां ध्यानमाह ॥ प्रधानमूर्त्तिप्रतिमा इत्यादिभिः ॥ सौम्यक्रूरकर्मभेदेषु
ध्यानभेदानाह ॥ आभिमुख्य इत्यादिना ॥ अस्त्रप्रयोगादौ नक्षत्रादिकमाह ॥ अस्त्रमित्यादिभिः ॥ निग्रहप्रयोगानां स्वादिनक्षत्रवृक्षेत्यादि-
भिः ॥ नक्षत्रवृक्षात्मकप्रागेव मातंगेश्वरीप्रकरणे प्रोक्ता ॥ तत्र प्राक्प्रत्यगायता दक्षिणोत्तरायताश्चाष्टावष्टौ रेखा ॥ कृत्वा एकोनपंचा-
शत्कोष्ठयुतं चतुरस्रं मण्डलं पलाशवृक्षफलके कृत्वा तन्मध्यकोष्ठे साध्यं मायाबीजं विलिख्य तदधः कोष्ठमारभ्य प्रादक्षिण्येन निर्गम-
गत्या कोणकोष्ठचतुष्टयवर्जमन्येषु कोष्ठेषु मूलमंत्राक्षराण्येकैकशः समालिख्य तत्र देवीमावाह्य संपूज्य मूलमंत्रेण हुतशेषमधुतसंपात-
सिक्तं पूर्वोक्तविधिना निखातं प्राग्युक्तप्रकारेण कृतबलि तत्पूर्वोक्तफलदमिति ॥ तथा ॥ मध्ये मायामष्टकोष्ठेषु पादानष्टौ हृत्वा मातृकार्णैः प्र-
वीतं ॥ भूर्विवस्यं सर्वभूतामपघ्नं रक्षायुः श्रीकीर्तिदं मन्त्रमेतत् ॥ अयमर्थः ॥ नवकोष्ठयुतं चतुरस्रमण्डलं तन्मध्ये कोष्ठे साध्याढ्यां मायावि-
लिख्य तदधः कोष्ठमारभ्य प्रादक्षिण्येन मूलमंत्रस्य प्राग्युक्तानष्टौ पादान्विलिख्य तद्बहिर्वृत्तद्वयान्तराले मातृकार्णैः संवेष्ट्य तद्बहिश्चतुर-
स्रं कुर्यादेतदुक्तफलदं ॥ तथा ॥ आग्नेयास्त्रसञ्जानाति विसर्गादानकर्मणि ॥ यः पुमान्गुरुणा शिष्टस्तस्याधीतजरान्त्रयं ॥ तथा ॥ अथो-
दिनास्त्रं कृत्वास्त्रं वक्ष्ये शत्रुविमर्दनं ॥ अतिदुर्गामनुं प्राकृदिनास्त्रमन्त्रविन्नमा ॥ प्रतिलोममितं मंत्रं कृत्वास्त्रं परिपठ्यते ॥ इमं अतिदु-
र्गामंत्र ॥ सनु ॥ अतिदुर्गाणि विश्वाणां वेव सिंधुं दुरितात्यरि ॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेद ॥ स नः परिषद्ः इति प्रति-

लोमे इति षड्डिमनः सदोविति हृद्गनितोयतीरममसोमवानसुसेदवेतजाग्निस्पतारिदुखुंसिंववेनाश्वाविशीर्णाङ्गुतिश्रुइति ॥ दिनास्त्रस्य ष
डङ्गादिन्त्रति लोमादिनाविदु कृत्यास्त्रंस्पेनिशेष ॥ प्रतिलोमोदितान् षडंगानि आग्नेयास्त्रवदेव ॥ आदिपदेन वर्णन्यास वर्णशक्तिपूजा
सु प्रातिलोम्यं तत्रात्र मंत्राद्यक्षरादिमंत्रांताक्षरपर्यंतक्रमेणानु केवलस्य त्रिष्टुप् मंत्रस्य प्रातिलोम्य ॥ भानुविंवगतं शत्रुमधोक्रं विषाहतं
मूलादुत्थितया ग्रस्तं कुण्डल्या भावयन्सुधी ॥ मूलाधारे क्षिपेन्मन्त्रः प्रस्फुरत्कालपावके ॥ दिनत्रयाज्वराक्रांतो रिपुः प्राणान्विमुंचति
दिनास्त्रेण प्रविष्टाग्रस्वाधिस्थानगतं रिपुं ॥ पंचवायुसमिद्धेन वह्निना दग्धविग्रहं ॥ ध्यायन्मनुं जपेन्मन्त्रः समवेद्यमवल्लभम ॥ मणिपूरगतं
शत्रुमग्निनादीप्तविग्रहं ॥ ध्यायन्दिनास्त्रं प्रजपेन्मृत्युवशतां व्रजेत् ॥ अनाहतनाहितः शत्रुर्निर्दग्धो मन्त्रवह्निना ॥ पाशेन बध्वाशीघ्रेण व
घ्नतयमकिंकरै ॥ विशुद्धस्थानगो वैरि दिनवाणेन पीडितः । अधोमुखः स्मृतस्तूर्णं पराभुः स्याद्दिनत्रयात् ॥ आज्ञायां निहितं शत्रुं दह
ज्ञानाग्निमाधिया ॥ पुत्रमित्रकलत्रादीनपमृत्युमवाप्नुयात् ॥ नाभिमात्रोदके स्थित्वा ध्यायन्विवेदिनेशितुः ॥ वैरिणां दग्धसर्वांगमत्रम
ष्टोत्तरं शतं ॥ जपेत्सप्तदिनादर्वाग्यमलोकं स गच्छति ॥ आरंवारं समालभ्य सप्ताहं प्रजपेन्मनुं ॥ सूर्योदयं समारभ्य यावदस्तमयो भवे
त् ॥ सन्निपातज्वरादिष्टो यमयस्तो भवेदरि ॥ स्थित्वा दुर्गालये मंत्री त्रिरात्रं वर्जितासन ॥ दिनवाणेन विद्धांगं वैरिणं प्रतिचिंतयेत् ॥ ज
पेन्मनुमिमं शत्रुर्ज्वरिणो मरणं व्रजेत ॥ स्थित्वा दुर्गा जपेन्मन्त्रमजस्रं त्रिदिनं स्मरन् ॥ शूलप्रोतं निजरिपुं दिनास्त्रेण प्रपीडितं ॥ ज्वरेण मह

ताविशेजायतेसौयमातिथिः॥रविमण्डलगंशत्रुंदस्तंतड्रथपन्नगै॥विषाग्निदग्धसर्वांगंध्यायन्तुहेमनवारिणा॥तर्पयेद्दिनवारोनस्यादसो
यमवल्लभ॥रविविंवाग्रगतयाज्वालयाग्रस्तविग्रहं॥रिपुंध्यात्वाजपेन्मंत्रसःक्रीडयमांतिके॥ग्रहग्रस्तार्कविंवस्थंविद्धंमंत्रमयैःशरैः॥प्र
तिपश्यतिजंशत्रुंजपेदयुतमंत्रवित्॥रिपुंनयतिशीघ्रेणायमहंतोयमालयं॥प्रलयानलसंकाशाकालरात्रिरिवापरां॥शूलपाशधरांघो
रांसिंहस्कंधनिषेदुषीं॥सवितुर्मण्डलांतस्थांरक्तनेत्रत्रयोड्वे॥विस्फुलिंगैर्निर्दहंतींरिपुमाकुलविग्रहं॥स्फुरद्दंष्ट्राधरांनृत्यद्भ्रुकुटीवि
कृताननां॥तर्जयन्तींनिजंशत्रुंतर्जन्याभीमरूपया॥दंष्ट्रमयूखःजालेनद्योतयंतीदिगंपरं॥शूलेनवैरिणोवक्षोदारयंतींभयंकरीं॥ज
पेद्दिनत्रयंधीमान्मारयेद्रिपुमात्मन॥अस्त्रमंत्रकृतन्यासःप्रलयाग्निसमप्रभ॥रक्तवस्त्रधरांक्रुधांरक्तनेत्रत्रयान्वितां॥सिंहाधिरू
ढांधावंतीधावमानेरिपुंप्रति॥खड्गेनतच्छित्वाक्षणाद्योमस्थलगतां॥ध्यात्वादुर्गांजपेन्मंत्रंत्रिदिनवर्जितासन॥अनेनैवविधाने
नरिपुर्मृत्युप्रियोभवेत्॥कर्माण्येतानिकुर्वीतदिवसेनतुरात्रिषु॥ ॥अथरात्रिकृत्यं॥पश्चिमामुखलिंगस्यसजीवंमहिषंपुर नि
खातस्यशिरसिकुण्डंकृत्वात्रिकोणकं॥तस्मिन्समेधितेवह्नौयथावद्देशिकोत्तमः॥सत्रिकोणान्समेत्रार्णान्साध्यनामसमन्वितान्
अजरक्तेणसिक्तान्करसमिद्धरान्॥सहस्रंजुहुयाद्देवींध्यात्वासवितृमण्डले॥प्रलयाग्निसमांघोरांद्वात्रिशद्भुजशोभितां॥उद्यदायुध
सदीप्तांनृत्यतींसिंहमस्तके॥महाड्डुमहाभीमांज्वलत्केशांनदन्मुखीं॥रक्तार्द्रमांसवसनांघूर्णितोग्रत्रिलोचनां॥अनेनविधिनाश

त्तुर्महाज्वरनिपीडित॥ विमुंचति निजं देहं पुत्रमित्रादिभिः सह॥ उर्ध्वमुखांभसामंत्री लवयीत्वा भुजंगमे॥ भानुविंबगतां दुर्गां सहस्रादि
त्यसन्निभां॥ सहस्रपाणिचरणां सहस्राक्षिशिरोमुखीं॥ सहस्रनागवक्षांगीं त्रासयंतीं जगत्त्रयं॥ ध्यायन्नेनेन सर्पीस्येन तर्पयदुग्धवारि
णा॥ संयतः कालपाशेन वैरी मुंचेत्स्वजीवितं॥ मध्याह्ने कोष्ठुतप्रस्थानदंतीं नरसिंहवत॥ घोरसिंहासनासीनां महाभीषणदर्शनां॥ शूल
प्रोतां हि तां ध्यायन् जपेन्मंत्रमनन्यधीः॥ तर्पयेदुग्धतोयेन सर्पवक्त्रे दिनत्रयं॥ यमस्य भवनं गच्छेद्राजिनो त्र संशयः॥ अक्षवृक्षप्रतिकृति
प्रतिष्ठितसमीरणां॥ उच्चाटके विनिक्षिप्य विषाद्यै विनिनातत॥ अर्केन्दुनलसंकाशा खड्गखेटकधारिणीं॥ नयनत्रयनिर्गच्छद्वि
स्फुलिंगशताकुलां॥ सिंहस्थां सर्वभूषाढ्यां त्रैलोक्याभयदायिनीं॥ खड्गकृत्ता हि तां ध्यायन्न जपेदयुतं मनुं॥ विधानेनामुना शत्रुर्ग्रस्तो भ
वति मृत्युना॥ प्रकल्प्य दुर्गायतनं त्रिकोणं कुण्डमुत्तमं॥ तत्र संज्वलिते वह्नौ महिषीं शष्टुनाहृतां॥ पुत्तलीं मज्जरक्ताक्तां प्रतिष्ठितसमीर
णां॥ छित्वा छित्वा प्रजुहुदजरक्तान्वितां निशि॥ ध्यात्वा दुर्गां प्रनृत्यंतीं महिषोरस्थलांतले॥ शूलेन महिषस्यांगं भिंदंतीं घोरदर्शनां॥ अट्ट
हासैरजस्रान्थैं भीषयंतां सुरेविनां॥ प्रदीपानलसंकाशा प्रमन्नेत्रत्रयान्वितां॥ सदंष्ट्राधरसंभीन्नां दशभीमभुजांबुजां॥ खड्गखेटकयुक्ता
भिः कन्यकाभिः समावृतां॥ अनेन विधिना शत्रुः प्रयाती यमसान्निधिं॥ दिनाष्टमेवं कथितं शत्रुनिग्रहकारकं॥ कृत्वास्त्रदेशितान्कुर्यात्त्र
योगान्मंत्रवित्तम॥ आधारादुज्जतां देवीं कुंडलीं सर्परूपिणीं॥ नाडब्रह्मरंध्रमार्गेण गतां व्योमस्थलं ततः॥ मुखे न शत्रुमादाय निहतां स्व गृह

प्रतिः॥ ज्वलज्ज्वालानलोद्दीप्ताविचिंत्यप्रजपेन्मंत्रं॥ सप्तभिर्वीरसैः शत्रुर्मृत्युमाप्नोतिमोहितः॥ अंगारवारेचित्यग्नौसर्षपस्नेहलोलिते
सिद्धार्थकंडवंजप्तंजुहुयात्त्यक्षमात्रतः॥ हुत्वास्वज्वालयादग्धौरिपुर्यमपुरंव्रजेत्॥ चतुर्दश्यामर्द्धरात्रेचित्रास्थीन्यत्रसाधकः॥ व्रणतैल
विलिप्तानिचितानौजुहुयात्ततः॥ अनेनविधिनाशत्रुर्मृत्युमेष्यतिकातरः॥ तुषास्थिनिर्मितांशत्रोर्व्रणतैलपरिप्लुतां॥ प्रतिमास्थापि
तप्राणांतुजुहुयान्निशिसाधकः॥ धान्यतुषमनुष्यास्थिनिर्मितां॥ छित्वाछित्वाजरक्तेनसप्तशास्त्रियतेरिपुः॥ श्मशानवालुकाःस्पृष्ट्वा
साक्षतान्नियुतंजपेत्॥ विकिरेत्तास्तदागारेहुत्वास्वकथितंजलं॥ नदीपंपीनमविशन्तिहतिसकलान्जनान्॥ श्मशानांगारचतुर्दश्यां
प्रजप्तैःप्रतभस्मभि॥ महिषाज्येनलुलितैस्तन्मंत्राक्षरसंख्यया॥ निर्मायगुडिकास्ताःसम्यग्जप्तसमीररणा॥ चितिकाष्ठेक्षितेवह्नौजुहु
याद्दृढमानस॥ चतुर्दशीत्रयादर्वाक्शत्रुर्मृत्युवशोभवेत्॥ श्मश्मानभस्मसिद्धार्थान्पंचगव्येविनिक्षिपेत्॥ माहिषेस्मरन्देवीज्वाला
मीसदृशप्रभां॥ भर्जयन्तुपठन्मंत्रंविषकाष्ठेक्षितानले॥ दुर्गागारेप्रजुहुयाद्तेनायुतमंत्रवित्॥ पुनरादायतद्भस्मसेनायांवैरिणाःक्षि
पेत्॥ सासेनावहुधाभिन्नाज्वररोगविमोहिता॥ आयुधानिपरित्यज्यपुरुकालेपलायते॥ ग्रहग्रामादिषुक्षिप्तंकुर्यादुच्चाटक्षणात्॥
सप्तवारेषुकुलिकेदुर्गावेश्मसुसर्करा॥ सप्तमाहेन्द्रदिग्वर्जंगृहीत्वाप्रजपेन्मंत्रं॥ महीषीपंचगव्येनभर्जयेत्तांयथापुरा॥ भूयोजपित्वावि
किरेज्जहग्रामपुरेष्विमा॥ सदेशोनृपतिक्षिप्तंदग्धोमेत्रमवाग्निना॥ वृश्चदन्तीमर्कटीकांकरक्रोशानिकात्रयं॥ भौमवारस्यकुलिके

स

गृहीत्वाप्रजपेन्मंत्रं ॥ चतुर्दश्यांरिपोर्गेहे निखनेत्प्रजपन्मनुं ॥ सार्द्धपुत्रकलत्राद्यैरुत्सादोजायतेरिपोः ॥ एकैकं वाखनेन्मंत्रीमरणान्ततत्फ
लंभवेत् ॥ षष्ठ्यंगुष्ठकंपुत्तल्यांनिखनेद्रोदनान्विते ॥ स्पृष्ट्वाजीवंप्रजपेदस्त्रंकृश्मायम्यानिशार्द्दत ॥ शत्रुनामसमायुक्तंश्मशानेनिखनेद्दिमो
प्रणश्येत्तरिपुःशीघ्रंसकुटुम्बःसबांधवः ॥ कपालशकलान्मंत्रीकृत्वास्त्राक्षरसंख्यकान् ॥ स्पृष्ट्वातत्वाप्रजपेदस्त्रंप्राणस्थापनपूर्वक
कृश्मागारचतुर्दश्यांश्मशानेविषवृक्षके ॥ जुहुयादजरक्ताक्तान्कृत्यास्त्रज्वालयाहुत ॥ रिपुर्यमपुरंगच्छेन्महाज्वरविमोहितः ॥ अजरक्ते
नेसंपूर्णेकलशेनिक्षिपेद्दहि ॥ कपालेनविधायेनछादयेद्रक्तवाससा ॥ पूजयेद्रक्तपुष्पाद्यैःस्पृष्ट्वातमयुतंजपेत् ॥ भौमवारेनिशा
मध्येकारस्करसमेधिते ॥ श्मशानवह्नौजुहुयाज्जगछेद्यमपुरंरिपुः ॥ साध्यनक्षत्रवृक्षेणकृत्वाकुंभ - - - पेत् माहिषैःपंचगव्यस्तविदा
लेनतत्रक्षिपेत् ॥ जपपूजादिकंसर्वथापूर्वविधाहित ॥ कारस्करैधितेवह्नौकृत्वास्त्रेणासमेधिते ॥ अयुतंतुणातैलेनजुह्वातेतंघटंपुनः ॥ आ
मस्तकंसमुद्धृत्यजपेन्मंत्रमनधीः ॥ जुहुयाद्विधिनानेनत्रिदिनेम्रियतेरिपुः ॥ सुंदरेमहिषीवत्समेकरात्रमुपोषितं ॥ पाययेन्महिषीसर्पिः
प्रस्थमंत्रेणामंत्रितं ॥ कृशैरावद्धसर्वांगंस्थापितप्राणमंजसा ॥ कारस्करैधितेवह्नौप्रणातैलेनमंत्रवित् ॥ होमंकृत्वायुतंवत्संजुहुयाद्य
तमानसः ॥ एकेनदिवसेनारीर्गच्छेद्यमपुरंसुधी ॥ त्रिकोणकुण्डेनिहितेवह्नौमंत्रेणापीडिते ॥ अर्चितंगंधपुष्पाद्यैरयुतंजुहुयात्क्रमा
त् ॥ राजिभक्त्यानकातिलैस्सैलैःसप्तदिननत ॥ प्रसूतीसमयप्राप्तांमहिषींस्थापितांनलां ॥ पूजितांगंधपुष्पाद्यैःस्पृशन्कूर्चेनतांजपेत्

॥ राम ॥
॥ ५०० ॥

मस्तकाद्यांतिपर्यंतंधियावन्हमनुस्मरन् ॥ आज्यंहव्यहस्तपतितंजुहुयादेधितेनले ॥ एवंकृतेसमुत्पन्नाकृत्यादीप्तानहुताशनान् ॥ भक्षये
दचिराछत्रुमीश्वरेणापिरक्षितं ॥ पुनरन्योविशत्येषाकर्त्तारमपिकांक्षिणी ॥ एवंविधानिकर्माणियःकुर्यान्मंत्रवित्तमः ॥ सजपेदात्म
रक्षार्थंमंत्रान्मृत्युंजयादिकान् ॥ ॥ शारदातिलके ॥ गायत्रीत्रिष्टुबनुष्टुब्वर्णैःप्रोक्ताःशताक्षरः पूर्वोक्तास्ववनुन्याद्याः परंते
जोऽस्यदेवता ॥ हृत्त्रयोदशभिःप्रोक्तंरुद्रार्णैःशिरईरितं ॥ द्वाविंशत्याशिखाप्रोक्तानावह्निःकवचमतं ॥ स्यान्नेत्रंचदशभिर्नेत्रमस्त्रंस
प्तदशाक्षरैः ॥ वर्णन्यासादिकंसर्वंकुर्यात्पूर्वोक्तवन्मना ॥ सत्यमानविवर्जितंश्रुतिगिरामाद्यंजगत्कारणंव्याप्तस्थावरजंगमंमुनि
वरैर्ध्यातंनिरुद्धेन्द्रिये ॥ अर्काग्निंदुमयेशताक्षरमयुस्तारात्मकंसंततंनित्यानंदगुणालयंपरतनल्लदामहेतन्महः ॥ सौरपीठेयजेत्स
म्यग्वक्ष्यमानविधानतः ॥ आद्यामासक्तिमभ्यर्च्यत्वडंगैर्दिशिकोनमः ॥ गायत्रीशक्तिभिस्तत्रपूजयेदासतीःक्रमात् ॥ आवृत्ति
पंचमीप्रोक्तात्रिष्टुब्भूतशक्तिभि ॥ अनुष्टुप्शक्तिभिःप्रोक्तमावृत्तीनांचतुष्टयं ॥ इंद्राद्यैईसमीप्रोक्तावज्राद्यैस्ततपरामता ॥
अथप्रयोग ॥ तत्रःप्रातःकृत्यादियोगपीठन्यासांतेमूलमंत्रेणप्राणायामंकृत्वाशिरसिविश्वामित्रकाश्यपवशीष्ठेभ्यऋषिभ्योनमः
मुखेगायत्रीत्रिष्टुवनुष्टुछंदेभ्योनम ॥ हृ हृदयेपरतेजसेदेवतायेनमः इति ऋष्यादिकंविन्यस्यममसर्वाभीष्टसिद्धयेविनियोगइ
तिकृतांजलीरुक्त्वातमस्तत्सवितुर्वरेणंभर्गोदेवस्यहन्धीमहिधियोयोनमःप्रचोदयाच्छिर ॥ जातवेदसेसुनवामसोममरातीयतोनिद

हृदिवेद: ॥ शिखा सन: परिषडंनि दुर्गानि विश्वानो वेवसिंधु दुरितात्यग्नि: कवचं ॥ अवकं जामहे सुगंधं पुष्टिवर्द्धनं नेत्रत्रउर्वा
रुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्अस्त्रा ॥ एतैर्मंत्रैर्यथा विधि षडंगन्यासं कृत्वा पादांगुलिमूलयास्त्र नम: ॥ गुल्फयो: संजानुनो: विऊ
रुमूलयो· तुलिंगेर्व नाभौरे· हृदिणि· कण्ठेयं · करांगुलीमूलयो· भंमणिबंधयोर्गो: कुर्परयोर्दे· भुजमूलयोर्वं· मुखेस्य· नसो: धी: कपो
लयार्म· नेत्रयो: हि कर्णयो: धि: भ्रुवो· यो· शीरसियो· चूडाधनं· वामकर्णेप· दक्षकर्णेचो· मुखेदसिरसिपांनम: दक्षपादांगुष्ठेजा·
वामेदं· दक्षगुल्फेवे· वामेदं· दक्षजंघायांसे· वामायासु· जानुनिन· वामेवा· दक्षोरौम· वामेसौ: दक्षकघामं · वामायामं· लिंगेरे· ना
भौती· हृदिये· दक्षस्तनेनो· वामेनिं· दक्षपार्श्वेदं· वामेहा· पृष्ठेतिं· दक्षस्कंधेवे· वामेद· दक्षबाहुमूलेसं· वामेन: दक्षबाहुमध्येयं· वामो
रिं· दक्षकूर्परेवं· वामेदं · दक्षप्रकोष्ठेनिं· वामेदु· दक्षमणिबंधेगा· वामेणिं दक्षकरतलेविं· वामेस्वा· मुखेना· दक्षनसिवे· वामेवे·
दक्षनेत्रेसिं· वामेमुं· दक्षकर्णेहुं· वामेरिं· ललाटेनां· ललाटोपरिस्यं· मूर्द्धिश्री· मुखेत्र्यं· चूडाभवे· दक्षकर्णेकं· वामेयं· उसिजा· गलेमे·
मुखेहं· नाभौसुं· हृदिगं· पृष्ठेधिं· कुक्षौपुं· लिंगेष्टिं पायौवं· दक्षोरुमूलेर्द्ध· वामेन· दक्षोरौतुं वामेवी· दक्षजानुनिरुं· वामेकं· दक्षजा
नुष्ठेनेसिं· वामेवं· दक्षस्तनेवं· वामेधं· दक्षपार्श्वेना· वामेमृ· दक्षपादेभ्यो· वामेर्मु· दक्षपाणितलक्षिं· वामेयं· दक्षनसिमां· वामेमृ· शि
रसितात् ॥ भ्रुमध्येशवितु· नेत्रयोर्वरेण्यं· मुखेभर्गो· कण्ठेदेवस्य· हृदिधीमही· नाभौधियो · गुह्येय: जानुनोन: पादयो· प्रचोदयात्

शिखायां जातवेदसे ॥ ललाटे सुनवाम॰ दक्षनेत्रे सोमं॰ वामे अरातीयतः दक्षकर्णे नि॰ वामे नि॰ दहाति॰ घ्राणे वेद॰ अधरे स॰ रसनायां नः ॥ क
ण्ठे परिषद्॰ बाह्वोः॰ अति हृदि दुर्गाणि कुक्षौ विश्वा ॥ कटौ नावा॰ गुह्ये इव ऊरुद्वये सिंधुं ॥ जानुद्वये दुरिता॰ जंघयोः॰ अति॰ पादयोः अग्नि॰ शिरसि
त्र्यम्बकं ॥ भ्रूयुगे यजामहे॰ नेत्रयोः सुगंधिं मुखे पुष्टिवर्द्धनं गलयोः उर्वारुकं॰ हृदि इव॰ जठरे बंधनात्॰ गुह्ये मृत्यो॰ ऊरुद्वये मुक्षीय जानुनोः मा॰
पादयोः अमृतान्नमः ॥ इति विन्यस्य ध्यानाद्यात्मपूजांते प्रागुक्तसौरं पीठमभ्यर्च्य मूर्त्तिं कल्पनाद्यागपूजांतं गायत्रीप्रकरणोक्ताः प्रह्लादि
न्याद्याश्चतुर्विंशतिशक्तीरावरणाय स्थिताः तत्रोक्तप्रकारेणैवावरणत्रयेण संपूज्य तद्बहिरष्टदलद्वये प्रागनुष्टुभमंत्रश्चतुश्चत्वारिंश
द्दलेषु प्रागुक्ता जागताद्याः शक्तीस्त्रिष्टुभमंत्रप्रकरणोक्ताः संपूज्य तद्बहिरष्टदलद्वये प्रागनुष्टुभमंत्रप्रकरणोक्ता रमाद्या द्वात्रिंशच्छ
क्तीः प्रतिकमलमावरणद्वयक्रमेण दलमध्यदलाग्रेषु संपूज्य तद्बहिर्लोकेशाचीदि सर्वं प्राग्वत्कल्पयेदिति ॥ तथा ॥ लक्षमात्रं जपेदे
नमयुतं पायसांधसा ॥ जुहुयात् घृतसिक्तेन तर्पणादि ततश्चरेत् ॥ एवं सिद्धमनोर्मंत्री भवेद्भास्करसन्निभ ॥ सुधालयोद्भवैः स्वर्णैर्जुहु
यात्क्षीरसंयुतैः ॥ दीर्घमायुरमाप्नोति निराधिर्व्याधिवर्जित ॥ दूर्वाभिर्घृतसिक्ताभिस्तद्वत्फलमाप्नुयात् ॥ मधुरत्रयसंसिक्तैर्जुहुयादरु
णाम्बुजैः ॥ महालक्ष्मीमवाप्नोति षड्भिर्मासैर्वधावित् ॥ रक्तोत्पलैस्त्रिमध्वक्तैर्जुहुयात्सर्वसंपदे ॥ श्रीपशुने प्रजुहुयाद्रमायावसतिर्भवे
त् ॥ सहस्रं जुहुयान्नित्यं पायसेन तिले शुभे ॥ भानुसंख्याद्विजान्नित्यं भोजयेन्मधुरान्विते ॥ सर्वपापविनिर्मुक्तः सर्वरोगविवर्जित ॥ कृत्या॰

ड्रोहग्रहान्रोगान्जित्वादीर्घसञ्जीवती ॥ प्रातःस्नानरतोमंत्रीजपेन्नीत्यंशतंशतं ॥ भानुमालोकयन्नस्यकसञ्जीवेद्दूरंदोशतं ॥ नित्यम
शोत्तरशतंतिथ्रेपसकलाप्तये ॥ गायत्र्याश्चजपेन्मंत्रंसर्वपापविमुक्तये ॥ सर्वशत्रुविनाशायत्रिष्टुवायंजपेद्दिनां ॥ आनुष्टुवायंप्र
जपेदायुरारोग्यसिद्धये ॥ शताक्षरोमनुःप्रोक्तःसमस्तपुरुषार्थदः ॥ ॥ यंत्रसारे ॥ कर्णिकायांलिखेत्तारंव्याहृतीभिःसमावृतं
कोणेषुषट्सुपंचार्णंप्रणवाद्यंदलेष्वथ ॥ पूर्वार्द्धंभागेगायत्र्यात्रिष्टुवार्द्धंद्वितीयके ॥ अनुष्टुभस्त्वाद्यमर्द्धंतृतीयेचतुर्थके ॥ ॐह्रींठंवं
केसुंहंसोजुंसःसोहंठंनमः ॥ शिवायमोमालयसकंठंह्रींसुवाक्षरान् ॥ आलिख्यपंचमेत्रष्टुपरार्द्धंचषष्ठके ॥ त्रिष्टुभश्चापरार्द्धंचगाय
त्र्याश्चपरार्धके ॥ सप्तमेदलेनायोज्योतिरसोमृतं ॥ ब्रह्मभूर्भुवरित्यंतेस्वरोमितिदलेष्टमे ॥ आलिख्यमातृकार्णैर्घट्टत्रेनावेष्टनद्वहि
चिंतामणिलशत्कोणभूपुरंचसमालिखेत् ॥ शताक्षरमनोर्यंत्रमेतद्धारयन्नरः ॥ पुत्रारोग्यधराधान्यधनकोशस्यशालिनी ॥ ल
भातिवकुलांलक्ष्मीसजीवेद्दूरदोशतं ॥ नामादिपदेद्वालिख्यजप्त्वाचाष्टोत्तरंशतं ॥ हुत्वाघृतेनतावत्तुसिक्तंसंपातमेवच ॥ धूपोपि
तावज्जप्त्वाचपुरग्रामारादिषु ॥ स्थापितंयंत्रमेतत्तुगोसस्यारोग्यवृद्धिदं ॥ कुर्याज्वरक्षांतेनारिव्याघ्रादिभयतःसदा ॥ अस्यार्थंतत्रा
ष्टदलकमलगतषट्कोणमध्येससाध्यंतारंविलिनत्मम्रव्याहृतिभिरावेष्ट्यषट्कोणेषुप्रणवादिशिवपंचाक्षरस्यैकैकमक्षरमा
लिख्याद्यदलेषुगायत्र्यान्पूर्वार्द्धंद्वितीयदलेत्रिष्टुप्प्रथमार्द्धंतृतीयेअनुष्टुप्प्रथमार्द्धंचतुर्थे ॥ ॐह्रींठंवंकंसंहंसःजूंसःसोहंवं

ठं नमः शिखायमा पालयसंवेकं टं ह्रीं ॐ इति मंत्रं विलिख्य पंचमे अनुष्टुप्‌मंत्रस्यान्तरार्द्धं विलिख्य षष्ठे त्रिष्टुप्‌मंत्रस्यान्तरार्द्धं विलिख्य स
प्तमे गायत्र्यन्तरार्द्धं अष्टमे आपो मा यो ज्योति रसोमृतं ब्रह्म भूर्भुवस्वरोमिति विलिख्य न वहिर्वृत्तद्वयांतराले मातृकार्णावेष्टनं वहिश्चतुरस्रको
णेषु पूर्वोक्तचिंतामणिमंत्रं विलिख्योक्तविधिना धारणादुक्तफलसिद्धिर्भवतीति ॥ ॥ शारदातिलके ॥ ऋचो विधानं वारुण्या यथावद
भिधीयते ॥ ऋग्वेदे सामसुदिष्टाक्ता वास्या ग्रामणीषिभि ॥ ध्रुवासुत्वासुक्षितिसुक्षियंतो व्यस्मत्पाशं वरुणोमुमोचत् ॥ अघोवत्वाना अदि
ते रुपस्था यूयं पात स्वस्तिभिः सदा नः ॥ वसिष्ठोस्य मुनिः प्रोक्तः स्यात्त्रिष्टुप् छंद उदाहृता ॥ वरुणो देवता प्रोक्ता स्त वर्णैरंगकल्पना ॥ अष्ट
भिर्हृदयं प्रोक्तं सप्तभिः शिर ईरितं ॥ शिखा षड्वर्णकैः प्रोक्ता वस्वर्णैः कवचं मतं सप्तभिर्नेत्रमाख्यातमस्त्रं षड्भिरुदाहृतं ॥ साग्रेषु संधिषु पदे
गुदाध्वाधारणाभिषु ॥ कुक्षौ पृष्ठे हृदि कुचे गले वाहू युग संधिषु वक्त्रे कपोल नासाक्षि कर्णाभ्रूमध्य मस्तके शिः सर्वांगयोर्न्यसेन्मंत्रवर्णान्यथा
विधि ॥ वन्दुप्रभं पंकजसंनिषस्सं पाशांकुशाभीती वरं दधानं ॥ मुक्ताविभूषांचितसर्वगात्रं ध्यायेत्प्रसन्नं वरुणं विभूत्यै ॥ धर्मादिकल्पिते
पीठे वरुणं सम्यगर्चयेत् ॥ कृत्वांगपूजनं शेषं वासुकीं तक्षकं पुनः ॥ कर्कोटकं ततः पद्मं महापद्म मतः परं ॥ शंखपालाख्यकुलिकौ सम्यक
पत्रेषु पूजयेत् ॥ इंद्राद्यानायुधान्येषां पूजयेत्तदनंतरं ॥ ॥ अथ प्रयोगः ॥ तत्र प्रातः ॥ कृत्वा योगपीठन्यासांते मूलमंत्रेण प्राणायामं
त्रयं कृत्वा सिरसिष्ठाय ऋषये नमः ॥ मुखे त्रिष्टुप्छंदसे नमः हृदये वरुणाय देवतायै नमः इति विन्यस्य मम सर्वाभीष्टसिद्ध्ये विनियोग ॥ इ

॥शि॰ रं॥ तिरुतोजलिरुन्काङ्गुबाहुन्वाङ्गुक्षितिषु हृदयाय नम॥ क्षियंनोव्यस्मत्पाशंशिरसे वरुणोग्ममो नत् शिखा व्रवोवन्वानाव्रुदिते कवचा
॥५०३॥ उपस्थायप्रयंयातः नेत्राय स्वाहाभिःसदान अस्त्राय फट् इति मंत्रैः॥ षडंगन्यासं विधाय दक्षपादाग्रे ॐ नमः॥ वामे वां दक्षपादांगुलिमूले
सु॰ वामे न्वां दक्षगुल्फे रुं वामे क्षि दक्षजानुमिति॰ वामे षुं॰ दक्षोरुमूले क्षिं॰ वामे यं॰ गुह्ये तो॰ लिंगे व्य मूलाधारे स्मत्॰ नाभौ पा॰ कुक्षौ शं॰ एष्वं
हृदि रुं॰ कुचयोः गोंगालमु॰ दक्षकराग्रे मो॰ वामे वत्॰ दक्षकरांगुलि॰ मूले व्र॰ वामे वौं॰ दक्षमणिबंधे च॰ वामे न्वा॰ दक्षकफोणौ ना॰ वामे व्रु
दक्षबाहुमूले दं॰ वामे नं॰ मुखे रुं॰ दक्षकपोले यं॰ वामे स्थां॰ दक्षनासायां घृं वामनासायां॰ दक्षनेत्रे पां॰ वामे तं॰ दक्षकर्णे स्वं॰ वामे स्तिं॰ भ्रूमध्ये भिः॰
ललाटे स॰ शिरसि दां॰ सर्वांगे न॰ नम इति विन्यस्य ध्यानाद्यात्मपूजांतं मंडूकपरतत्त्वांतं पीठं संपूज्य वरुणपीठाय नम इति समस्तं पीठं संपूज्य पी
ठशक्तिरहिते तस्मिन्पीठे वरुणमावाह्य प्राणप्रतिष्ठांतं पाशांकुशाभयवरमुद्राः प्रदर्श्यासनाद्यग पूजांते दलेषु देवाग्रादि प्रादक्षिण्येन
ॐ शेषाय नमः वासुकये॰ तक्षकाय॰ कर्कोटकाय॰ पद्माय॰ महापद्माय॰ शंखपालाय॰ कुलिकाय॰ इति संपूज्य लोकेशार्चादिं सर्वं कु ॥राम॥
र्यात्॥ तथा॥ लक्षमेकं जपेन्मंत्रं पायसेन विधानतः। सर्पिःसिक्तेन जुहुयात् अपरादिततश्चरेत्॥ व्ररणमुक्तौ जपेन्मंत्रं प्रत्यहं साष्टकं शतं ॥५०३॥
जपेनानेन लभते महतीमव्ययां श्रियं॥ शिते शुक्रे कलैर्मंत्री जुहुयात् घृतसंप्लुतैः॥ चतुर्दिनं दशाडिनं व्ररणामहाश्रियै॥ समिद्भिर्वेतसो
त्थाभिः क्षीराक्ताभिर्दिनत्रयं॥ जुहुयाद्वृष्टिसंसिद्ध्यै मंत्रविद्विजितेन्द्रियः॥ अनेन विधिना मंत्री सूर्यशानभिषगाते॥ चतुःशतं घृतयुतं

पायसं कुर्याद्वशी ॥ ऋणनाशाय संपन्नेव श्यारोग्याभिवृद्धये ॥ भृगुवारे कृतो होमम्पायसेन ससर्पिषा ॥ महतीं संपदं कुर्यात्त्वाश्रयेत्त
कल्लापद ॥ शालिभिर्घृतसंसिक्तैः सरिदंतरितः सुधी ॥ अहं चतुः शतं हुत्वा स्तंभयेत्परसैनिकान् ॥ सायं च प्राङ्मुखो वह्निमाराध्य प्रजपेन्म
नुं ॥ चतुः शतं विमुच्येत मंत्री सर्वैरुपद्रवैः ॥ मंत्री प्रत्यङ्मुखो भूत्वा तर्पयेद्विमलैर्जलैः ॥ सर्वोपद्रवनाशाय समस्ताभ्युदयाय च ॥ बहुना किमि
होक्तेन मंत्रेणानेन साधकः ॥ साधयेत्सकलान्कामान् जपहोमादितत्परः ॥ ऋग्विधाने ॥ ध्रुवासुत्वासु क्षितिषु जपन् बद्धः प्रमुच्यते ॥ नि
ध्नन्राज्ञो जपन्नेषा विपाशः संप्रवर्तते ॥ अहोरात्रं स्थितश्चैवमश्वत्थादिविवेष्टिते ॥ अपः पाशास्फुरंत्यस्य दारुपाशास्तथैव च ॥ ॥
श्रीयंत्रसारे ॥ षट्कोणकर्णिकामध्ये तारं कोणेषु षट्स्वपि ॥ षडर्णमंत्र पत्रे च केशरेष्वजवरे लिखेत् ॥ पंच षड्वेद षट् पंच षट् चतु ष
ड्क्रमान्मनो ॥ ध्रुवा स्वाधा स्वाक्षराणि वहि ॥ परतः शोनच ॥ हल्लिख्या वेष्ट्य भूगेहकोणे च बीजमालिखेत् ॥ रचमोवनमेतत्तु यंत्रं
सर्वसमृद्धिदं ॥ सर्वरक्षाकरं वश्यशत्रुचोरविनाशनं ॥ विमंत्र बहुनोक्तेन वांछितार्थप्रदं नृणां ॥ अस्यार्थः ॥ तत्राष्टदलस्य षट्कोण
मध्ये साध्यं प्रवं विलिख्य षट्सु कोणेषु वरुणाय नमः ॥ इति मंत्रस्यैकैकमक्षरं विलिख्य केसरेषु द्वंद्वशः स्वरान्विलिख्याष्टद
लेषु ध्रुवास्वाद्यस्य मंत्रस्य वर्णान् पंच षट् चतुः षट् पंच· षट् चतु· षट् ॥ वर्णान्क्रमेण विभज्य विलिख्य वहिर्वृत्तद्वयोरंतराले ॥ परतः
शोणेनावेष्टयित्वा तद्वहिर्वृत्तवीथ्यां चकादिक्षांतेनावेष्ट्य तद्वहिश्चतुरस्रकोणेषु वंबीजं लिखेत् ॥ एतत्साधितं धृतमसुग्णफलदं भव

ति॥ परऋणासावीरधमत्कृतानिमाहंराजन्नन्यकृतेनभोजं॥ अव्युष्टाइन्नुभूयसीरुषासआनोजीवान्वरुणतासुशाधि॥ कूर्मोव
रुणास्त्रिष्टुप्परऋणा॥ अथोलवणमंत्रविधानमभिधीयते॥ ऋगाद्याकथितापूर्वंलवणांभसिपूर्विका॥ लवणादिर्द्वितीया
न्यादह्याद्यापरिकीर्तिता॥ सदग्ध्याद्याश्चतुर्थीस्याद्यानिपूर्वातुपंचमी॥ तास्त॥ लवणांभसितोद्भवोसिहृदयनव॥ लवणस्यपृथि
वीमातालवस्यवरुणः॥ पिता॥ लवणोहूयमानेतुकृतानिशाकुतोरतिः॥ लवणांदहतिपंचतिलवयांछिंदतिभिंदति॥ अमुकस्य
दहगात्राणिदहमांसंदहत्वचं॥ २॥ दहत्वगस्थिमज्जादिअ·स्थिभ्योमज्जिकांदहयदिवशतियोजनशतेनदीनावाशतांतरे॥ ३॥
सदग्ध्वानयमेशीघ्रमग्नेलवणस्यतेजसा॥ नगरेलोहप्राकारेकृष्णसर्पशतार्गले॥ ५॥ अत्रैववशमायातुलवणमंत्रपुरस्कृ
ता॥ ४॥ यातेरात्रिःशल्यविद्धस्यशूलाग्नारोपितस्यच॥ सातेरात्रिर्महारात्रिःसातेरात्रिर्महानिशानि॥ अगिरामुनिराख्यातश्छंदो
नुष्टुबुदाहृतं॥ अग्निराविर्भुनड्गोभद्रकालीचदेवता॥ चितिमंत्राक्षरैःकुर्यात्षडंगानिसमाहितः॥ पंचभिर्हृदयंप्रोक्तंत्रिभिर्व॰
र्णैःशिरःस्मृतं॥ पंचवर्णैःशिखाप्रोक्ताकवचंकरणाक्षरैः॥ पंचभिर्नेत्रमुद्दिष्टंयुगलेनास्त्रमीरितं॥ नारंचिरिद्वयंपश्चाच्चरणा
लितदनंतरं॥ महत्यदाघांताब्रूयादमुकमेततःपरं॥ वशमानयठठंचिटिमंत्रउदाहृतः॥ चतुर्विंन्यक्षरात्मासर्वकामफलप्रदः
ननकुंकुमसन्निभंत्रिनेत्रंरुचिराकल्पशतंभजामिवह्निं॥ स्रुवशक्तीवराभयानिदोर्भिर्दधतंरक्तासरोरुहेनिषण्णं॥ कारांकुरा

हाशुर्न्निमडवक्त्राहारावलीशोभिपयोधाढ्यां ॥ कपालपाशांकुशशूलहस्तांनीलांबरांयामवंतींनमामि ॥ कालांबुदाभामरिशं
खशूलखड्गहस्तानरुणेन्दुचूडां ॥ भीमांत्रिनेत्रांजितशत्रुवर्गांदुर्गांभजेदुर्गतिभंगदक्षां ॥ टंकंकपालंडमरुंत्रिशूलंसंबिभ्रतीचंद्र
कलावतंसा ॥ पिंगोर्द्ध्वकेशीशितभासदंष्ट्राभूयाद्विभूत्यैममभद्रकाली ॥ अयुतंचजपेत्तस्यगणुतंतद्दशाशतः ॥ हविषाघृतसि
क्तेनजुहुयाद्वर्चितेनले ॥ एवंकृतपुरश्चर्यः ॥ प्रयोगकुशलोभवेत् ॥ अथियामवतीध्येयावश्याकर्षणकर्मणोः ॥ स्मरेद्दुर्गांभद्रका
लींमन्त्रीमारणकर्मणि ॥ जानुप्रमाणेसलिलेस्थित्वानिशिजपेन्मनुं ॥ अनेनवद्धितःसाध्यःकिंकरोजायतेक्षणात् ॥ नाभिमात्रोद
केस्थित्वाजपेन्मन्त्रमनन्यधीः ॥ अष्टोत्तरसहस्रंयस्तस्यसाध्योवशोभवेत् ॥ अयुतंचजपेन्मन्त्रीकण्ठमात्राम्भसिस्थितः ॥ सप्तभि
र्दिवसैर्भूयावशयेद्विधिनामुना ॥ विलिख्यतालपत्रेजंसाध्यनाम्नाविदर्भितं ॥ निक्षिप्यक्षीरसमिश्रेजलेतत्क्वाथयेन्निशि ॥ वशेपा
भवतिसाध्योस्यनात्रकार्याविचारणा ॥ तालपत्रेलिखित्वेनभद्रकालीगृहेखनेत् ॥ वश्यायसर्वजंतूनाप्रयोगोयमुदाहृतः ॥ ता
रपत्रिसमालिख्यमंत्रसाध्यविर्भितं ॥ तापयेत्खादिरेवह्नौमासवश्योभवेन्नरः ॥ त्रिकोणांकुण्डमापाद्यसम्यक्शास्त्रोक्तलक्षणं
तस्मिन्होमंप्रकुर्वीतसंस्कृतेहव्यवाहने ॥ प्रक्षाल्यगव्यदुग्धेनसंशोध्यरवणासुधीः ॥ सुचूर्णितप्रजुहुयात्तप्राणान्नाशयेन्न
पात् ॥ दधिमध्वाज्यसंसिक्तैर्जुहुयात्सैंधवैस्तथा ॥ वशयेत्सकलान्देवान्चिरात्किमुपार्थिवान् ॥ विशुद्धलवणाप्रस्थविभ

कं पंचधा पृथक् ॥ एकैकमंशं जुहुयाद्दशपंचाहमादरात् ॥ यत्वनाम्नाखः रूपसादनेन विधिना विन ----------
धुरान्वितं ॥ ऊनपंचाशदाहुत्या वशं नयति वादिनं ॥ नित्यं गुडेन लोणेन हुत्वा शत्रून्वशं नयेत् ॥ मधुरत्रयसंयुक्तैर्लवणैः साधुचू
र्णितैः ॥ जुहुयाद्वशयेन्नारीं नरान्नरपतीनपि ॥ मंत्रं हृस्यादिनीयादि प्रजपन्यावदष्टमी ॥ पुत्तलीः पंच कुर्वीत सांगोपांगाः समाः शुभाः ॥
एकासाध्यकुमेरास्यादन्यापिष्टमता ॥ वह्निहस्तमृदास्यादन्यासिक्थमयी स्मृता ॥ लवणपातसंभूतं चूर्णितं परिशोभितं ॥ कुडवप्र
क्षये क्षीरदध्याज्य·मधुभिः क्रमात्गुडाज्यमधुभिः सम्यक् मिश्रितेनाम्बुना ततः ॥ कुर्वीत पुत्तलीं सौम्यां सर्वावयवशोभितां ॥ प्राण
मंत्रकृतं यंत्रमाहृहृदि विनिक्षिपेत् ॥ आसुप्राणान्प्रतिष्ठाप्य पूजयेत्कुसुमादिभिः ॥ पश्चात्कृत्वाष्टमीरात्रौ याममात्रे गते सति ॥ विधा
य मातृकान्यासं मंत्रन्यास·मतःपरं ॥ चिटिमंत्रसमुद्भूतांश्चतुर्विंशतिसंख्यकान् ॥ तारद्यान्विन्यसेद्वर्णान्स्थाने स्वे सुसमाहितः ॥ मू
र्ध्नि भाले दृशोः श्रुत्योर्नासास्ये चिबुकेष्वथ ॥ कंठे हस्तेन युग्मे च कुक्षौ नाभौ कटिद्वये मेढ्रपायौ प्रविन्यस्य शिष्टं वर्णचतुष्टयं ॥ ऊ
रुद्वये जानुयुग्मे जंघायुग्मे पदद्वये ॥ एवं विन्यस्य सर्वांगे रक्तमाल्यानुलेपनं ॥ रक्तवस्त्रधरं भूयः पुत्तलीं दारुणाकृतां ॥ प्रधोमुखी
खनेत्कुरेण पिसृजामासनादधः ॥ मृन्मयीं प्रतिमां पाददेशे न्यसेत्तथात्मनः ॥ मधूच्छिष्टमयीं वाग्निकुण्डस्योर्द्ध्वं प्रलंबयेत् ॥ लवणे
न कृतां पश्चात्पुत्तलीं संस्पृशन्जपेत् ॥ एकैकं च यथान्यायमष्टोत्तरसहस्रकं ॥ संहृत्य चिटिमंत्रार्णान्पुनस्तस्यास्तनौ न्यसेत्

अंगुष्ठसंधिप्रपदजंघाजानूरुपायुषु ॥ लिंगदेशेपिनाभौजठरेहृदयांबुजे ॥ स्तनद्वयेकंधरायांचिबुकेवदनेततः घ्राणयोःकर्णयोरक्षो
ललाटेमूर्द्धनीन्यसेत ॥ अग्निमादायसंदीप्यसाध्यनक्षत्रदारुभि ॥ तस्मिन्नभ्यर्च्यमेवोक्तदेवतारूप्यपात्रके ॥ कुलितराजिपुष्पाभिदत्वा
र्घप्रणामेत्सुधी ॥ मंत्रैरेतैःप्रयोगार्थैवंतेसंयतमानस ॥ त्वमनेनाप्यमित्रघ्नविशायारुव्यवाहनः हविषामंत्रजप्तेनतत्क्षोभवतयास
ह ॥ जातवेदोमहादेवतप्तजापूनदप्रभ ॥ स्वाहापतेविश्वभक्षलंवरादहशत्रुहन् ॥ इमेसर्वेरिसर्वाशिग्रस्तमुक्तंत्वयाजगत ॥ महा
हादेविनमोस्तुभ्यंवरदेकामदाभव ॥ नमामपिमहादेवीमहादेवीमहादेवस्यसुव्रते ॥ त्रियामेपुरुषंहत्वावश्मानयदेविमे ॥ दुर्गे
दुर्गादिरहितेदुर्गसरोधनार्गले ॥ भद्रकालीभवाभीष्टभद्रसिद्धिप्रदायिनी ॥ सपत्नान्मेहनदहशोषयतापयतापय ॥ शूलाग्निशि
किवज्राद्यैस्तान्कृत्वोत्कृत्यमारय ॥ महादेवीमहाकालिरक्षास्मान्नक्षत्रात्मिके ॥ साध्यंसंस्कृत्यनिर्भिद्यपुत्तलीसप्रधाततः ॥ अर्कश्व
कंसमुत्खायगुंजुहुयाद्दीपितेनले ॥ प्रथमोदक्षिणापादस्तत्करस्तदनंतरं ॥ शिरस्तृतीयमाख्यातंवामहस्तमतःपरं ॥ मध्याहृर्धपंचमः
स्यादधोसःषष्ठईरित ॥ सप्तमोवामपादस्यादेवंभागक्रमःस्मृत ॥ सप्तसप्तविभोवाप्रोक्तेष्वेषुयथाविधि ॥ कृत्यैवमर्चयित्वायित्वा
ग्निप्रणामदराद्व्रजतः ॥ यजमानोधनैःधान्यैःप्रीणयद्गुरुमात्मन ॥ अनेनविधिनामंत्रीवशयेत्ससुरासुरान् ॥ किंपुनर्मनुजानभू
पानमात्यान्सुरयोषित ॥ मारणेपूर्वसंप्रोक्तपुत्तलीनावनुस्यं ॥ निवेदयेद्यथापूर्वंसाधकेद्रोविधानवित ॥ अपरंवक्ष्यमानेन

विधानेप्रकल्पयेत् ॥ वराहपारावतवितिलसुपराणामथै ॥ तुरगकृत्रिंवसिद्धार्थसाध्यवामांघ्रिरेणाभि ॥ महिषीसत्वसंपिष्टेपूर्वो
क्तलक्षणान्विते ॥ विधायपुत्तलीसम्यक्प्राणस्थापनमाचरेत् ॥ जपपूजादिकंसर्वंकुर्यात्प्रागुक्तवर्त्मना: ॥ ततःपूर्वदिनेकृष्णरात्रौ
प्रज्वलितेनले ॥ दुर्गांवाभद्रकालींवासमाराध्ययथाविधि ॥ धारयन्निशितंशस्त्रंसव्यहस्तेनसाधक ॥ वामपादंसमारभ्यदक्षिणापघु
वसानिकं ॥ छित्वाछित्वाप्रजुहुयान्निराहारोजितेन्द्रिय ॥ कृष्णाष्टमींसमारभ्ययावत्कृष्णाचतुर्दशी ॥ अनेनैवविधानेनहोमंकुर्याद्विच
क्षणः ॥ त्रिसप्ताहप्रयोगेनमारयेद्रिपुमात्मन: ॥ कारस्करोथधात्रीस्यात्सेहुंडवरतरुःपुन ॥ जंबूखादिककृष्णाख्यौवंशपिप्पलसंज्ञकौ
नागरोहिणनामानौपलाशप्लक्षसंज्ञकौ ॥ आम्रपृविल्वार्जुनाख्याश्चिकंकतमहीरुहा: ॥ वकुलःसरलःसर्ज्जोवंजुलःपनमार्कके ॥ शमी
कदंवतिवाम्रमधूकाकृक्षशाखिनः ॥ आत्मरक्षादिकंसर्वंकुर्यान्मंत्रीयथापुरा ॥ अमुनामनुनासम्यगभीष्टफलसाधने ॥ सदृ
शोनास्तिमंत्रोन्यमत्यमेतन्नवान्यथा ॥ इतिसारदातिलके ॥ ॥ सुंदचार्यशिष्येनश्रीनिवासेनधीमता प्रणीतायामगात्व
चचत्वारिंशःप्रकाशक: ॥ ॥ इतिश्रीशिवार्चनचन्द्रिकायांपंचचत्वारिंशःप्रकाशक: ॥ श्रीयंत्रसारे ॥ कर्णिकायांलिखे
त्तारंक्रमात्पत्रेषुवाथसु ॥ पिशंगभृष्टिमंत्रस्यतृतीचीएवक्षराणिच ॥ रक्षोहणंवाजिनमित्यृचामातकयापिच ॥ अपातइत्यृचा
चैवभूपुरेणचवेष्टयेत् ॥ एतद्यंत्रंज्वरोन्मादग्रहपीडादिनाशनी ॥ इदमेवसमालिख्यवसनेगैरिदिभिः ॥ तेनप्राहृतदेहंचज्वरःसद्यो

विंभवति ॥ अयमर्थः ॥ अष्टदलकर्णिकायांससाध्यंतारंविलिख्याष्टसुदलेषुवक्ष्यमाणपिशंगभृष्टिमंत्रस्यत्रीणित्रीण्यक्षराणि।
विभज्यविलिख्यतद्बहिर्वृत्तचतुष्टयांतरालवीथीत्रयेप्रथमवीथ्यांरक्षोहणंवाजिनमित्यृचंतद्बहिर्वीथ्यांमातृकार्णांस्तद्बहिर्वीथ्याम
यातेअग्नेयशस्तन्वावसंवेष्ट्यतद्बहिश्चतुरस्रंकुर्यादेवंयंत्रमुक्तफलदंमंत्रस्तु ॥ पिशंगभृष्टिमंभृणंपिशाचिमिंद्रसंमृण ॥ सर्वंरक्षोनिवर्ह
य ॥ रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रथिष्ठमुपयामिशर्म ॥ शिशानोअग्निःक्रतुभिःसमिद्धःसनोदिवासरिषःपातुनक्त ॥ अयातअग्ने
समिधाविधेमप्रतीस्तोमंशस्यमानंगृभाय ॥ दहाशसोरक्षसःपाह्यस्मान्द्रुहोनिदोमित्रमहोअवद्यात् पिशंगभृष्टिमंत्रस्यशुनशेपऋ
षिर्गायत्रीछंदइंद्रोदेवता ॥ रक्षोहणमित्यस्यवायुर्ऋषिस्त्रिष्टुप्छंदअग्निर्देवतारक्षोघ्नंवा ॥ अयातेअग्नेइत्यस्यचःहृणाख्यपातइति
सूक्तस्यैवऋष्याद्याज्ञेयास्तेग्नेवक्ष्यंते ॥ तथा ॥ अष्टपत्रस्यपद्मस्यतारंपत्रेषुपत्राणीन्चतुरःक्रमात् ॥ मातृकार्णैःसमावेष्ट्य
क्षौंवीजंकुरुहादिषु ॥ आलिख्ययंत्रमेतत्तुधारयेद्योयथाविधि ॥ कृत्वाभिभवतिर्मृत्यासजीवेच्छरदांशतं ॥ अयमर्थ ॥ अष्टदल
कर्णिकायांससाध्यंप्रणवंविलिख्याष्टदलेषुयांकल्पयतींत्यृचोवर्णान्प्रतिदलंचतुरोविभज्यविलिख्यतद्बहिर्वृत्तद्वयांतरालेमा
तृकार्णैःसंवेष्ट्यबहिश्चतुरस्रकोणेषुक्षौमितिनृसिंहवीजंलिखेदेतदुक्तफलदंभवतिमंत्रस्तु ॥ याकल्पयतिनोरयःक्रूराकृत्यां
वधूमिव ॥ तांब्रह्मणापनिर्णुद्मःप्रत्यक्कर्तारमृच्छतु ॥ ब्रह्मा ॥ ऋषि ॥ अनुष्टुप्छंदःप्रत्यंगिरादेवता ॥ यथाकर्णिकायांसाध्यना

॥शा.ति.॥
॥५०८॥

मंतारं पत्रेषु षट्स्वपि॥ वृतंकृत्वाथ षमर्द्धदर्थं षीदं तमालिखेत्॥ नवाह्येष्टसु पत्रेषु ह्रस्वदेत्रान्याघवंक्रमात्॥ अर्द्धमर्द्धमास
द्विष्ठिरिष्यंतेषोडशस्वथ॥ पत्रेषर्वीम्याघवद्यादंतेवर्णायथाक्रमं॥ अर्द्धमर्द्धसमालिख्य वाह्येरक्षोहणायथा॥ विज्ञोनिषेन्द्रवा
भूयस्ततीयेचैववेष्टयेत्॥ मातृकार्णैः समावेष्ट्य भूपुरेण चवेष्टयेत्॥ स्वक्रादिषुभूघातुसम्यक्संयोज्यधारणात्॥ यंत्रमेतद्गुरो
मादज्वरकृत्यांगुपडवान्॥ नाशयेदथवावस्त्रेकुंकुमाद्यैर्विलिखेच॥ जप्यानंन्याहृनागंवज्वरः सद्योविमुंचति॥ अस्यार्थः॥ षट्दलकम
लकर्णिकायांससाध्यंतारंविलिख्य षट्दलेषु कृणुष्वपाजइत्यारभ्य — — — — षिदित्यंतस्यञ्ककनुष्टुयस्यार्द्धपदंविलिख्यतद्वा
ह्ये अष्टदलेषु उदग्नेतिष्ठेत्यादिस्तुदिनासासादष्ठिरित्यंतस्यानुष्टुयस्यार्द्धमर्द्धमालिख्यतद्वहिः षोडशदलेषुचर्वीमितेत्यादिमित्रमहे
त्रवत्यादित्यंतस्यक्गरुकस्यार्द्धमर्द्धंविलिख्यतद्वाह्ये त्रवनुष्टयांतरालत्रये प्रथमेरक्षोहणंवाजिनमित्याद्यापूर्वोक्तया द्वितीयेविज्ञो
षात्हदित्याद्यथा तृतीयेमातृकयाचसंवेष्ट्यतद्वहिश्चतुरस्रंकुर्यादेतदुक्तफलदंभवति॥ कृणुष्वपाजः प्रसितिंनपृथ्वींयाहिराजेवामवा
मिभेन॥ तृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः॥ तवभ्रमासआशुयापतंत्यनुस्पृशधृषताशोशुचानः॥ तपूंष्यग्नेजुह्वापतंगान
संदितोविसृजविष्वगुल्काः॥ प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोअस्याअदब्धः॥ योनोदूरेअघशंसोयोअंत्यग्नेमाकिष्टेव्यथिरादधर्षीत्॥ उदग्ने
तिष्ठप्रत्यातनुष्वन्यामित्रंओषधात्तिग्महेते योनोअराजिसंविधानवनीचानंदक्षतसनशुष्कं॥ ऊर्द्ध्वोभवप्रतिविध्याध्यस्मदविष्कृण

॥राम:॥
॥५०८॥

देव्यान्यग्ने॥अवस्थिरातनुहियातु॥जामिमजामिप्रमृणीहिशत्रून्॥सतेजानातिसुमतियविष्ठयईरतेब्रह्मणेगातुमैरत॥विश्वान्य
स्मैसुदिनानिरायोद्युम्नान्यर्योविदुरोअभिद्यौत॥सेदग्नेअस्तुसुभगः सुदानुर्यस्त्वानित्येनहविषायउक्थैः॥पिप्रीषतिस्वआयुषिदुरो
णेविश्वेदस्मैसुदिनांमासदिष्टिः॥अर्चामितेसुमतिंघोष्यर्वाक्संतेवावाताजरतामियंगीः॥स्वश्वास्त्वासुरथामर्जस्मेक्षत्राणिधारयेरनुद्यू
न्॥इहत्वाभूर्याचरेदुपत्मन्दोषावस्तर्दीदिवांसमनुद्यून्॥क्रीडंतस्त्वासुमनसः सपेमाभिद्युम्नातस्थिवांसोजनानां॥यस्त्वास्वश्वः सुहिर
ण्योअग्नउपयातिवसुमतारथेन॥तस्यत्राताभवतितस्यसखायस्तआतिथ्यमानुषग्जुजोषत्॥महोरुजामिबंधुतावचोभिस्तन्मापितु
र्गोतमादन्वियायत्वन्नोअस्यवचसश्चिकिद्धिहोतर्यविष्ठसुक्रतोदमूनाः॥अस्वप्नजस्तरणयःसुशेवाअतंद्रासोवृका॥अश्रमिष्ठाः॥ते
पायवः॥सध्र्यंचोनिषद्याग्नेतवनः॥पांत्वमूर॥येपायवोमामतेयंतेअग्नेपश्यंतोअंधंदुरितादरक्षन्रक्षतान्सुकृतोविश्ववेदादिप्संतइद्रि
पवोनाहदेभुः॥त्वयावयंसधन्यास्त्वोतास्तवप्रणीत्यश्यामवाजान्॥उभाशंसासूदयसत्यतातेनुष्ठुयाकृणुह्यह्रयाण॥अयातेअग्नेसमि
धाविधेमप्रतिष्टोमंशस्यमानंगृभाय॥दहाशसोरक्षसःपाह्यस्मान्द्रुहोनिदोमित्रमहोअवद्यात्॥विज्योतिषाबृहताभात्यग्निराविर्वि
श्वानिकृणुतेमहित्वा॥प्रादेवीर्मायाःसहतेदुरेवाःशिशीतेशृंगेरक्षसेविनिक्षे॥कृणुष्वपाजेतिपंचदशर्चस्यरक्षोघ्नस्यवामदेवऋषि
स्त्रिष्टुप्छंदःरक्षोघ्नदेवता॥वीज्योतिकुमारवृषिस्त्रिष्टुप्छंदः॥अग्निर्देवता॥तथा॥कर्णिकायांलिखेद्वारंमनोःपत्रेषुचाष्टसु॥पंचषट्

पंचषट्पंचरसभूताषड्वर्णीकान् ॥ वयंतरभिमातृकयाभूपुरेण च वेष्टयेत् ॥ इन्द्रश्रेष्ठेति मंत्रस्य यंत्रं सर्वसमृद्धिदं ॥ आयुरारोग्यसौ
भाग्यधनधान्यसुतप्रदं ॥ सर्वरक्षाकरं वश्यं सुदिनत्वयशस्करं किमंत्र बहुनोक्तेन वांछितार्थप्रदं परं ॥ अयमर्थ ॥ ॥ अष्टदलम
ध्ये ससाध्यं प्रणवं विलिख्याष्टपत्रेषु ॥ पंचषट्पंचषट्पंचषट् इति क्रमेण इन्द्रश्रेष्ठानीत्यचो वर्णान्विभज्य विलिख्य तद्बहिर्वृत्तद्वयां
तरालयोः प्रथमे वयंतरभिक्रान्तृचावक्ष्यमाणया द्वितीये मातृकया संवेष्ट्य तद्बहिः श्वेनुरसं कुर्यादेतदुक्तफलदं निंद्यविशानिषे
हिविंनिंदक्षस्य सुगत्वमस्येपोपरपीराणमरिषितन्नास्वाध्यानं वाचः सुदिनत्वबहूना ॥ इन्द्रेष्ठानि मंत्रस्य शुभगऋषि त्रिष्टुप्छंदः इन्द्रो दे
वता ॥ एतस्यैव यंत्रान्तरमाह ॥ प्रणवभासुरमध्येमथो बहिर्वसुदलेष्वरसंयुतकेशरे ॥ अयुजि पंसुदाननशो प्रविलिख्य च ततः क्र
मशोर्णकान् ॥ अवि वृत्तखलु कादिभिरक्षैरेन्द्ररणिगेहयुगाक्षिगमन्मथ ॥ षडाननशः षट्षट्संख्यया ॥ धनधसशुभगत्वमनो
ज्ञतनामधुवाम्बररत्नवरश्रियं ॥ सुदिनतां च ततोति परन्नरणां वलनिसूदनयंत्रमिदं धन ॥ अस्यार्थ ॥ प्रायुक्तयंत्रे केशरेषु युगाः स्वरा
न्विलिख्य कादिक्षान्तैरेव वेष्टयेत् ॥ अत्र पूर्वयंत्रोक्तक्रमेव दष्टनं नास्ति ॥ अष्टकोणेषु कामबीजं लिखेत् ॥ बामो लंकारभूषणमिष्ट
भोजनस्वष्टजनदर्शनप्राप्तिः सुदिनत्वं ॥ तथा विलिख्य कर्णिकान्तरे क्रं वदलाष्टके मनोः ॥ षडंगुर्वेदषट्शरजयीं स्वरेंद्रियाक्षरान्
लिखेच्च मातृकाक्षरैर्धरापुरेणावृतं ॥ वयंतरभिरित्यृचः सुयंत्रमेदिष्टदं ॥ विशिष्टरत्नगोधरासुवर्णधान्यशालिनी ॥ वितीर्यसंपदं

परंरिपुक्षयं च यच्छति ॥ अस्यार्थः ॥ अष्टदलकमलकर्णिकायां ससाध्यं प्रणवं विलिख्य तद्दलेषु वयंतरश्भिरित्यचो वर्णान् ॥ षट्षट्चतुःषट्पंचचतुस्सप्तपंचक्रमेण विभज्य विलिख्य तद्बहिर्वृत्तद्वयांतराले मातृकार्णैणावेष्ट्य बहिश्चतुरस्रं कुर्यादेतद्युक्तफलदं स्मृतं ॥ वयंतरश्भिः पुरुहूतसख्यैः शत्रोः शत्रोस्त्तरश्भिरस्याम ॥ घ्नतो वृत्राणभयानि भूरराया मदेम वृहता न्वोता इति ॥ वयंतरश्भिरितिमंत्रस्य भरद्वाजर्षिस्त्रिष्टुप्छंद इंद्रो देवता कामिके ॥ स्वीयंत्रस्य जीवः स्यान्मध्यबीजाद्धो न्यसेत् ॥ हंसः सोहमिति प्राणमैशान्यादिक्रमाद्विखेत् ॥ अथैरेखावकाशेषु प्रतिष्ठां प्राणदां लिखेत् ॥ ॥ तत्रांतरेपि ॥ परमक्षान्नयोः सह्रौं ह्रीं आयंत्रस्यस्य हृदयं बिंदुयुतं ल्लेखसमंततं ॥ हंसः सोहं प्राणजीवौ यंत्रेनेखद्बुधः ॥ इति ॥ ॥ श्रीयंत्रसारे ॥ आलिख्याभीप्सीते यंत्रे जीवं तत्कर्णिकांतरे तस्या समिति दिक्षुवेना सोहं हंसार्णकान्बहिः ॥ प्राणप्रतिष्ठामंत्रं च गायत्रीमंत्रं यंत्रयोः यथावकाशं विलिखेत्स्वगुरूक्तेन वर्त्मना ॥ ॥ सारसंग्रहे गुडकीकृत्य यंत्रं तुलाक्षागेहं च पाहतं ॥ कृत्वा प्रतिष्ठितप्राणं सिक्तं संपातसर्पिषा ॥ विन्यस्य कलशे यंत्र स्थापिते विधिवद्गुरुः ॥ तत्रावाह्य यजेत्सम्यक्पूजयेद्यंत्रदेवताः ॥ तत्कुंभोदकसिक्ताय वित्तरे यंत्रमादरात् ॥ गृहीत्वा गुरुणा दत्तं यंत्रं भक्त्या प्रसन्नधीः ॥ विभयादुक्तविधिना विभवेत्सः सर्वसिद्धये ॥ चंदनागुरुकर्पूरकस्तूरीरोचनान्विताः ॥ मदः करीभवो लाक्षारसः कुंकुमसंयुतः ॥ यंत्रनेखनद्रव्याणि क्रूरेष्वष्टविषाणं च ॥ लवणोषणमहावृक्षहधूमाग्निसंयुतं ॥ श्मशानागारनिम्वोत्थनिर्यासो विषमीरितं ॥ उषणांउषर ॥ महावृक्षप्रसस्त

॥शि·च॥
॥५०९॥

वः अग्निः चित्रकं ॥ त्रिलोहतूर्णपत्राणि क्षौमनालदलानि च ॥ तत्तत्कल्पादिनासूर्यस्याधिकरणानि चेति ॥ अथैतत्प्रयोगः ॥ त
त्र सुदिने शुभे मुहूर्ते चंद्रताराद्यनुकूले साधकः कृतनित्यः श्रीगुरुं प्रणम्य विघ्नेश्वरं ॥ समभ्यर्च्य पूर्वोक्तवारेशाद्यतिथीशनक्षत्रशा
न्तं पूर्वस्वाभिमतं यंत्रविर्णाविन्यासमंत्रेण विरच्य तन्मध्ये लेख्यवीजं विपुलतरोदरं विलिख्य तस्योदरे शमिति जीववीजं विलिख्य त
द्वीजं साध्यनामाक्षरैरावेष्ट्य पूर्वादिलिखितवीजाद्वहिः ॥ तद्दक्षवामपार्श्वयोः ॥ इई इति स्वरद्वयं विलिख्य तत्पुरतः ह्रु इति जिह्वावीजं
विलिख्य तस्य प्रागादिदिक्षु सोहं हंसः इति प्रादिरण्येकैकमक्षरं विलिख्य तदनु यथास्थानं साधककर्मादि तत्कल्पोक्तं सर्वं विलि
ख्य सर्वान्ते प्राणप्रतिष्ठामंत्रं मंत्रगायत्रीं यंत्रगायत्रीं च यथावकाशं लिखेत् ॥ तत्र प्राणप्रतिष्ठामंत्रः प्रागेवोक्तस्तत्प्रतिष्ठाविधिस्त्व
ग्रे लिख्यते ॥ मंत्रगायत्री तत्कल्पे – – – यंत्रगायत्री तु ॥ ॐ यंत्रराजाय विद्मदेहे वरप्रदाय धीमहि तन्नो यंत्रः प्रचोदयात् ॥ इति इत्थं
यंत्रं विलिख्य गुटिकीकृत्य लाक्षालोहत्रयवेष्टितं कृत्वा तस्याप्यस्वासनप्रजादिन्यासजालं विधाय यंत्रस्य यंत्रलिखितमंत्रगणस्य
साध्यस्य च पृथक् पृथक् प्राणप्रतिष्ठां तत्तद्योगपीठपूर्वकं यंत्राधिदेवतामावाह्य सांगां सावरणां संपूज्य तद्यंत्रं स्पृशन् मूलविद्या
देवताध्यानपूर्वकं लक्षाद्ययुतावधि कार्यस्य गौरवलाघवं विविच्य जपित्वा कुंडादावग्निसंस्कृत्य गोघृतेन ॥ युतादिसहस्रांतं यंत्रे
हुतशेषं ध्रुवलग्नं संपातयन् हुत्वा तद्यंत्रं सर्वतोभद्रमंडले वा दीक्षोक्तविधिना कुंभस्थाप्य यंत्रदेवां सांगां सावरणां संपूज्य तेन जले

॥राम॥
॥५०९॥

नाभिषिक्ताय यंत्रं दद्यात् ॥ सोपि प्रणामपूर्वकं यंत्रमादायाचार्यंतोषं कृत्वा सुसंहृष्टो विश्वासपूर्वकं धारयेत्तेन सर्वाभीष्टसिद्धयो भवंतीति शिवं ॥ ॥ अथोक्तानां काम्यहोमकर्मणां तत्रोक्तप्रकारेणाग्निचक्रमपिज्ञाय कृतानां नैस्फल्यं प्रत्यवायश्च भवंतीति श्रुतेस्तत्परिक्षाज्ञानस्यावश्यकत्वात्तच्चक्रपरिक्षानकारः प्रकाश्यते ॥ ॥ तत्र श्रीरुद्रयामले ॥ अथ वक्ष्ये महादेवि होमकर्मसु सिद्धिदं ॥ अग्निचक्रं वरारोहे सर्वतंत्रेषु गोपितं ॥ नवग्रहमयो वह्निस्तत्र वह्निमया ग्रहाः ॥ वह्नौ हुते हविर्देवि ग्रहाणां प्रविशेन्मुखं ॥ तृप्यंति देवताः सर्वास्तेषु तेष्वपि पार्वति ॥ फलं वापि प्रयच्छंति सर्वदेवमयो ग्रहाः ॥ अतस्तेषां स्थितिं वह्नौ ज्ञात्वा होमं समाचरेत् ॥ शांतिके पौष्टिके चैवाक्रूरेष्वपि च कर्मसु ॥ तेषां स्थितिक्रमं वक्ष्ये नक्षत्रेषु यथास्थिताः ॥ सूर्यो बुधो भृगुश्चैव शनिश्चंद्रो महीसुतः ॥ जीवो राहुश्च केतुश्च नवैते देवि खेचराः ॥ त्रीणि त्रीणि च ऋक्षाणि विभादीनि दापयेत् ॥ सूर्यभाच्चंडभयावजणायेच्च महेश्वरी ॥ सूर्यादीनां फलं देवि श्रृणु वक्ष्ये यथाक्रमं ॥ आदित्ये तु भवेच्छोको बुधे चैव धनागमः ॥ शुक्रे लाभं विजादीनाच्छनौ पीडन संशयः ॥ चंद्रे लाभो महादेवि भौमे चैव तु वेधनं ॥ गुरुणा च धनप्राप्ती राहौ रानीस्तथैव च ॥ केतुना जायते मृत्युः फलमेवं महेश्वरी ॥ एवं ज्ञात्वा महेशानि होमकर्म समाचरेत् ॥ सौम्यग्रहमुखे यस्मिन्दिने पतति चाहुतिः ॥ आरंभसौम्यहोमस्य दिने तस्मिन्विधीयते ॥ क्रूरहोमस्तथा देवि क्रूरग्रहमुखे भवेत् ॥ इति ज्ञात्वा महादेवि काम्यहोमं समाचरेत् ॥ अन्यथा क्रियमाणे तु नैष्फल्यं चात्मनाशनमिति ॥ ॥ अथ बलया

॥शि·च॥
॥५१०॥

मले ॥ अथ वह्नेः स्थितिं वक्ष्ये होमकर्मसु सिद्धये ॥ स्वर्गलोके च पाताले भूमौतिति हव्यवात् ॥ तत्प्रकारमहं वक्ष्ये साधकानां हि
ताय च ॥ धृतिश्रुतिविचारंश्च सप्तद्वीपंचतुर्युगं ॥ एकीकृत्य हरेद्भागं त्रिभिःशेषेणपावक ॥ एकेन सति स्वर्गे द्वये पाताल एव च ॥
शून्ये च मर्त्यलोके स्यादेवं वसति पावकः ॥ उत्पातः स्वर्गलोकस्थे पातालस्थे धनक्षयः मर्त्यलोकस्थिते वह्नौ होमोभीष्टफलप्रदः
इत्थं विज्ञाय मंत्रज्ञो होमकर्म समालभेत् ॥ इति तिथयः प्रतिपदादिहोमारंभदिनपर्यंता ॥ वाराः सूर्यवारादिहोमारंभवारांता अ
न्यत्सुगमं ॥ ॥ अथ चोक्तानां यन्त्राणां प्राणप्रतिष्ठाविधिमंतरेण यथोक्तफलाभावात्प्रतिष्ठाविधेस्तन्मंत्रसिद्धेरावश्यकत्वा
त्सिद्धेश्च साधनमूलत्वात्साधनविधिर्वक्ष्यते ॥ ॥ तत्र प्राणप्रतिष्ठासध्यानादिकं प्रागेव नित्यपूजाप्रकरणे लिखितं ॥ अत्र तु तदु
पासनाविलिख्यते ॥ तत्र प्रातःकृत्यादियोगपीठन्यासे विशेषः पीठमंत्रस्थाने ह्रीं सर्वशक्तिकमलासनाय नमः इति शक्तिपीठमंत्रवि
न्यस्य प्राणप्रतिष्ठामंत्रस्य ऋष्याद्यपरिवलमंत्रयोगपीठपूजानंतं कृते कृत्वा योगपीठपूजायां च शैवशक्तिर्विहाय तत्स्थाने जयायै
नमः ॥ विजयायै· अजिताः अपराजिता· नित्याविलासिन्यै· दोग्ध्र्यै अघोरायैः मंगलायै इति संपूज्य ह्रीं सर्वशक्तिकमलासनाय न
मः इति पीठमंत्रेण मूर्तिं संकल्प्य तत्रावाहनादिपुष्पोपचारान्ते षट्कोणेषु देव्यग्रे देवीदक्षिणवामकोणेषु ब्रह्मणे· विष्णवे रुद्राय
दक्षिणाग्रदेवीपृष्ठवामाग्रेषु सरस्वत्यैः लक्ष्म्यैः गौर्यै षट्कोणसंधिषु प्राग्वदंगानि संपूज्याष्टसुपत्रेषु देव्यग्रादिप्रादक्षिण्येन प्रा

॥रामः॥
॥५१०॥

क्तात्रास्यायाः सम्पूज्य पावकीं जिह्वादिपूजादि सर्वं समापयेदिति ॥ तथा ॥ लक्षमेकं जपेन्मंत्रं जुहुयात्तद्दशांशतः ॥ साज्येन चरुणा पश्चा
त्तर्पणादि समाचरेदिति ॥ अत्र नित्यहुनेन्मंत्री जपात्किंशुकसंभवैः ॥ पुष्पैः रक्तोत्पलैर्वापि मूलेन च वाहुतिं ॥ हुत्वा वीजत्रयेणाथ
हुनेदकैकशः क्रमात् ॥ यदिदं सान्तवर्णोत्थाः प्राणाहूत्यो न वस्मृताः ॥ मृतावैवस्वतानेवजीवत्प्राणस्ततथा ॥ आकर्षणी च वग्रसना मु
महाविस्फुलिङ्गिनी ॥ क्षेत्रज्ञहारिणी चेति संप्रोक्तास्ता यथाक्रमं ॥ तज्जवर्णादिनानाम्नानासांचैवहुनेत्क्रमात् ॥ यंत्र्यमतायै स्वाहा
इत्यादिप्रयोगः ॥ ॥ ध्यानवक्ष्ये प्रयोगेषु यथाध्येया महेश्वरी ॥ गत्वा साध्यं हृदं वध्वा पाशवीजेन सुंदरि ॥ शक्तिवीजेन तद्भक्तिं गृ
हीत्वांकुशवीजतः ॥ प्राणमाकृष्य साध्यस्य चानयंतीं सदा स्मरेत् ॥ निशीथसमये साध्यं सुप्तं तस्य हृदंवुजे ॥ दलेषु वायुवह्नीन्द्रवरुणा
नासुरेश्वरी ॥ ईशराक्षससोमेषु दक्षिणोकरिणिकान्तरे ॥ पादीनहंससमायुक्तान् मृगाकारान्नुस्मरेत् ॥ शिरानंतुसमुद्भूतनंतुसव
द्धविग्रहात् ॥ एवमात्महृदंभोजे भृङ्गीरूपान्वियास्मरेत् ॥ आत्महृत्पद्मगां भृङ्गीं प्रस्थाप्य श्वासवर्त्मना ॥ एकैकां साध्यमाहृत्पद्मगाने
कैकमानयेत् ॥ पुनस्तांस्थापयेत्क्रूरे स्वचित्तेनरकर्मसु ॥ तंनु हृद्दं प्रकुर्वीत वह्नीवीजेन पार्वति ॥ आकृष्यासाध्यहृद्भृङ्गान्स्तम्भयेद्भूमी
विजतः ॥ एवमेकादशावृत्तिः कुर्यात्सर्वेषु कर्मसु ॥ वश्याकर्षणयोर्योदीनरुणान्संस्मरेच्छिवे ॥ मोहविद्वेषयो धूम्रान्कृष्णान्मारण
कर्मणि ॥ पीतान्संस्तंभने देवी प्राणाकर्मणकर्मवित् ॥ आकृष्टान्साध्यहृत्प्राणान्स्थापयेदात्मनो हृदि ॥ क्रूरकर्मसुपुनस्तांतेषांस्थानसमीरितं

॥ ॥ प्राणान्साध्यसेमेह्वानात्मनस्तुभुजंगमान् ॥ सस्मरेदेवदेवेशि सदाक्रूरेषुकर्मसु ॥ इत्थंप्रयोगकुशलो मनुनानेनसुंदरि वशयेत्सकलान्देवान्किंपुनःपार्थिवान्जनान् ॥ वाय्वग्निशक्रवरुणशिवराक्षससोमगान् ॥ दक्षिणानांहिरेवघादीन्हंतापशुवपार्वति ॥ दलेषुविंदुसंयुक्तान्क्षकारंकर्णिकांतरा ॥ विलिख्यतस्यमध्येतुहंसइत्यक्षरद्वयं ॥ साध्यनामसमोपेतंविलिखेद्गिरिसंभवेन ॥ वेष्टयेच्चतुरस्रेणयंत्रंप्राणमनोरिदं ॥ क्रूरकर्मसुसंप्रोक्तंड्वैरवविष्यादिभि ॥ कृत्वापुत्तलिकांसाध्यनखकेशसमन्वितं ॥ प्रादशांगुलमानेनस्पष्टांगीमतिमंजुलां ॥ तस्यास्तुहृदयेदेविप्राणयंत्रंविलिःक्षिपेत् ॥ लिखितंशववस्त्रेचसकरींवरवर्णिनि ॥ प्राणासंस्थापयेत्तस्यांसाध्यस्यप्रोक्तरूपतः ॥ छित्वातांतुऊयादाचोसाध्यस्मृताचित्वाचितानले ॥ सप्तरात्रप्रयोगेनमारयेद्रिपुमात्मनइति ॥ सकीटंसजीवंस्थापितप्राणमितियावत् ॥ श्येनाग्निलोणपिंडंनिधन्नूरजस्तथा ॥ रहवृमंचिवडकंविषाएकमुदाहृतमित्युत्तमित्युक्तानि श्येनःश्येनाविष्ठाग्निःचित्रकंलोणपिए हृतिमलवरणमल्लवणमन्यत्तुगमं ॥ अथारिमंत्रपरीत्यागविधि ॥ ॥ अथश्रीरुद्रयामले ॥ अरिमंत्रपरित्यागविधिंवक्ष्येमहेश्वरी ॥ यज्ज्ञात्वामोचयेद्धीप्रशत्रुमंत्रभयाकुल ॥ अज्ञानाद्यत्रकृत्वाप्तमरिमंत्रंमहेश्वरि जत्वामृतमहादुःखंप्राप्नुवंतिहितत्कृतं ॥ ततस्तत्क्षपयेद्येनविधिनाद्यवदामिते ॥ शुचिःसमाहितोभूत्वाप्रारभ्येत्प्रवरेदिने अशेषदुःखनाशायदेशिकप्रवरंविधिं ॥ तत्रादौरम्यभवनेकुंभदीक्षामत ॥ मण्डलेस्थापयेद्देवीपूरयेत्तकुंभैर्जलैः ॥ विलोममंत्रपाठेनतत्रावा

शेषदेवतां॥हुत्वाविलोममंत्रेणघृतेनमहेश्वरि॥अष्टोत्तरंसहस्रंवाशतंवाप्यष्टोत्तरंप्रिये॥तत्तर्पणेनमनुनातथातेतर्पयेत्प्रभुं॥
ततोजपान्तेस्थानेदेवताभ्योवलिंहरेत॥विदिक्षुदिक्षुचतथाधश्चोर्द्धमनुवित्तमः॥आपाहीन्द्रसुराधीशशतमन्योशचीपते॥नम
स्तुभ्यंगृहाणेमंपुष्पधूपादिकंवलिं॥आपाहितेजसानाथहव्यवाहचसप्रभ॥गृहाणपुष्पधूपादिमयाभक्त्यानिवेदितं॥एहियश्रि
मदिक्पालवलिमेनप्रयोजितं॥प्रेतनाथत्वमायाहिमित्राजनसमप्रुते॥वलिंदत्तंगृहीत्वेमंप्रीतोवरदोभवेत्॥नमस्तेरक्षसांनाथ
निर्ऋतेत्वमिहागत॥गृहाणवलिपूजादि— —नाथनमोस्तुते॥भक्त्यानिवेदितांपूजांगृहीत्वाप्रीतिमाप्नुहि॥प्रभंजनप्राणपतेत्वमे
हिसपरिच्छद॥मयाप्रयुक्तंविधिवद्गृहाणवलिमादरात्॥कुवेरतारकाधीशवागेद्धतंसुरोपमो॥पुष्पधूपादिभिःप्रीतोभवेतांवरदोम
म॥ईशत्वमेहिभगवन्सर्वविद्याश्रयप्रभो॥पूजितःपुष्पधूपाद्यैःप्रीतोभवतिभूतये॥आपाहिसर्वलोकानांनाथब्रह्मसमर्चनां॥
गृहाणसर्वविघ्नान्यतिवर्त्तयनमोस्तुते॥आगच्छवरदाव्यक्तविहन्ताविश्वस्यनायक॥पूजितःपरयाभक्त्याभवत्वंसुखदोममं॥ततः
सपरिवारांश्चपूजयेन्मंत्रदेवतां॥आनुकल्पमनालोच्यमयातरलबुद्धिना॥यदुपात्तंचप्रभावमरिमंत्रस्वरूपकं॥तेनमेमनसःक्षो
भमशेषविनिवर्त्तय॥पापंप्रतिहतंमेस्तुभूयाच्छ्रेयसनातनं॥ततोनुममकल्याणंपावनीभक्तिरेवच॥इतिसंप्रार्थ्यमंत्रेशंमंत्रयंत्रेऽ
विलोमत॥विलिख्यामलकर्पूरचंदनेनसमर्चयेत्॥कलशोपरिसंस्थाप्यभक्त्यापरमयायुत॥तथैवंचदेविमतिमान्ध्यानिजसिर

स्यथा ॥ स्नायात्पूजितकुंभस्थजलैर्मंत्रमयैः शिवै ॥ पुनश्चान्येन तोयेन कुंभमापूर्य संयतः ॥ तन्मध्ये मंत्रयंत्रं च विनिक्षिप्याथ प्रपूजये
त ॥ तं कुंभं निम्नगातीरे शुद्धे वान्यजलाशये ॥ विसृजेदथ विप्रांश्च यथाशक्त्या प्रभोजयेत् ॥ इत्थं कृतविधानस्य रिपुमंत्रोद्भवारुजं
विनश्यति न संदेहः ॥ क्रमाच्चित्तप्रसन्नता ॥ जायते तीव्रसंपन्नो वर्द्धते तत्कालक्रमात् ॥ ॥ अथ मुद्रा ॥ तालत्वकुमुद्राकुंभमुद्राग्नि
प्राकारमुद्राऋष्यादिन्यासमुद्राषडंगमुद्राऋष्यादिन्यासमुद्राषडंगमुद्रागालिनीमुद्राधेनुमुद्राशंखमुद्रायोगिनीमुद्रामत्स्यमुद्रा
आवाहनादिनवमुद्रागारोशसप्तमुद्रासंहारमुद्रासप्तनवतिवेतिवेत्यपाशमुद्रागदामुद्राशूलमुद्राअशनिमुद्राखड्गमुद्रास्त्रमुद्रा
॥ ॥ अथैतासां लक्षणानि ॥ तत्रश्रीतंत्रराजे ॥ कनिष्ठानामयोः पृष्ठे स्यादंगुष्ठस्तु तर्जनी कुटिलाक्रंतुमध्यस्था मुद्रा सांकु
शाभिधा ॥ ॥ नारदपंचरात्रे ॥ दशांगुष्ठं परांगुष्ठे क्षिप्त्वा हस्तद्वयेन तु ॥ सावकाशं त्वेकमुष्टिं कुर्यात्कुंभस्य मुद्रिका ॥ ॥ प्रयो
गसारे ॥ त्रिपुष्कलायोहरौ कृत्वा व्यत्यस्तावभितो नयेत् ॥ अथ मुद्रेयमाख्याता वह्निप्राकारलक्षणा ॥ ॥ नारदपंचरात्रे ॥ मंत्राभि
मृष्टयोः पाण्योः पह्ववेगानि विन्यसेत् ॥ अंगुष्ठेनाचरेन्न्यासमन्यांगुलिसमाश्रयत् ॥ अंगुष्ठविषयं न्यासं तर्जनी शिरसे वहिः इति
अंगुष्ठमर्जमंगुल्यश्चतश्चो हृदि मूर्द्धनी ॥ शिखां मुष्टिरेव स्यादंगुष्ठकृतनालिका ॥ सर्वांगुलयश्चानामेः पाण्योः कवचंबंधने ॥ तर्जनीम
ध्यमानामाश्रेष्ठा नेत्रत्रये क्रमात् ॥ अंगुष्ठतर्जन्यग्राभ्यां हस्तयोरतिशब्दयोदिति ॥ वतस्तः प्रसारिताः प्रसारिततले नैव पाणिना हृदयं

शिरः॥ इति वचनात्॥ आनाभेस्कंधात् ॥ तथाभूताभ्यां पाणिभ्यां वर्मस्कंधादिनाभिगामिति वचनात् ॥ एवमंगानांतु शेषागमेषडंग
मुद्राविशेषउक्तः॥ तथा॥ कृतमुष्टिपादौ हस्तौ कृत्वांगुष्ठौ हृदि न्यसेत्॥ हृन्मुद्रेयं समाख्याता शिरोमुद्रा प्रकीर्त्यते॥ ललाटाग्रे
समाधाय कृतमुष्टिपुटौ करौ॥ कुर्याद्दृढ्प्रसक्ताग्रे तर्जन्यो ज्येष्ठ वाह्यतः॥ करौ शिखायां संयोज्य कृतमुष्टिपुटाकृती॥ ज्येष्ठावध॥ प्र
क्ताग्रौ कनिष्ठे तु ईतस्तथा॥ कुर्यात्सयेशिखामुद्रा सर्वोपद्रवनाशिनी॥ कृत्वांगुष्ठौ प्रसक्ताग्रौ तर्जन्यौ च त्रिकोणवत्॥ मूर्ध्नि पश्चा
न्मुखं कृत्वा नमयेदुभयपार्श्वत॥ करौ हृदंते मुद्रेयं कवचस्याभयप्रदा॥ कृत्वा नेत्रोन्मुखहस्तं सक्तांगुष्ठकनिष्ठकं॥ प्रसार्य मध्यमा
किंचिन्नमयेदितरांगुली॥ नेत्रमुद्रेयमुद्दिष्टा रक्षोभूतार्तिभंजनी॥ परस्परं तलं द्वंद्वं पुनरास्फोटयेद्दृढं॥ तर्जन्या शब्दयेत्ताभ्यां
ज्येष्ठाग्रे वलिताग्रयेति॥ ताभ्यां कराभ्यां॥ मंत्रतंत्रप्रकाशे॥ कनिष्ठांगुष्ठकौ सक्तौ करयोरितरेतरं॥ तर्जनीमध्यमानामाः संह
ताअग्रवर्जिता॥ मुद्रैषा गालिनी प्रोक्ता शंखस्यापरिता इति॥ संहताः परस्परसंयुक्ताः॥ अग्रवर्जिता अकुटिला॥ ॥ लक्षणा
सग्रहे॥ वामांगुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना॥ कृत्वोत्तानं तथा मुष्टिमंगुष्ठं तु प्रसारयेत्॥ वामांगुल्यस्तथा श्लिष्टाः संयुक्ताः सं
प्रसारिताः॥ दक्षिणांगुष्ठसंस्पृष्टा मुद्रेयं शंखसंज्ञिका॥ तथा॥ मिथः॥ कनिष्ठके बध्वा तर्जनीभ्यामनामिके॥ अनामिकोर्द्ध
संश्लिष्ट दीर्घमध्यमयोरधः॥ अंगुष्ठाग्रद्वयं न्यस्य योनिमुद्रेयमीरिता॥ अधोमुखे वा हस्तेना हृशं दक्षहस्तकं॥ विन्यस्यां

॥शि·चं॥
॥५१३॥

ग्रह्यगुष्ठंतु पार्श्वयोः संप्रहार्यं च ॥ दर्शयेदर्घपात्रेतु मत्स्यमुद्रेयमीरिता ॥ अथावाहनादिमुद्रा ॥ ॥ लक्षणसंग्रहे ॥ हस्ताभ्यामं
जलिं बध्वानामीनामूलपर्वणो ॥ अंगुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहनी स्मृता ॥ अधोमुखीत्वियं चेत्स्यात्स्थापनीति निगद्यते ॥ उच्छ्रितांगुष्ठ
मुष्टास्तु संयोगात्संनिधापनी । अंतः प्रवेशितांगुष्ठा सैव संरोधिनी मता ॥ उत्तानमुष्टियुगला संमुखीकरणी भवेत् ॥ देवस्यांगेषडंगानां
न्यासः स्यात्सकलीकृतिः ॥ सकलीकरणस्वरूपंतु सिद्धान्तशेखरे ॥ अप्यभिन्नस्वभावानां पदभिन्नप्रयोजने ॥ अंगानामंगिनासार्द्धं सक
लीकरणं विदपि ॥ तथा ॥ ॥ सव्यहस्तकृतामुष्टिर्दीर्घाधोमुखतर्जनी ॥ अवगुंठनमुद्रेयमभितो भ्रामिता मता ॥ अन्योन्याभि
मुखी श्लिष्टानामिकायुता ॥ तथैव तर्जनीमध्याधेनुमुद्रेयमीरिता अमृतीकरणं कुर्यात्तया साधकसत्तमः ॥ अन्योन्य ॥ ग्रथितांगुष्ठप्र
सारितकरांगुली ॥ महामुद्रेयमुत्ता परमीकरणोप्रिये ॥ प्रयोजयदिमामुद्रां देवताह्वानकर्मणि ॥ अथ गणेशमुद्रालक्षणसंग्रहे ॥ ततो
गणेशमुद्रानामुच्यंते लक्षणान्यथा ॥ मुत्तानोर्द्धमुखीमध्या सरला बद्धमुष्टिका ॥ दंतमुद्रासमाख्याता सर्वागमविशारदे ॥ वाममुष्टेस्त
तर्जन्या दक्षमुष्टेस्तु तर्जनी ॥ संयोज्यांगुष्ठकायाभ्यां तर्जन्यग्रे स्वकेक्षिपेत् ॥ एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्तिता ॥ ऋज्वीं च मध्यमां कृ
त्वा तर्जनीमध्यपर्वणि ॥ संयोज्यांकुंचयेत्किंचिन्मुद्रैषांकुशसंज्ञका ॥ तर्जनीमध्यमासंधीनिर्गतांगुष्ठमुष्टिना ॥ अधोमुखा दीर्घरूपा म
ध्यमविघ्नमुद्रिका ॥ तले तलंतु करयोस्तिर्यक्स्तु चोर्ध्वांगुली ॥ संहिता प्रसृता कुर्यान्मुद्रेयं पर्शुसंज्ञका ॥ ऊर्द्धास्यं दक्षिणं हस्तमानम्रविर

॥रामः॥
॥५१३॥

५५

लोंगुलिं ॥ किंचिन्निम्नतलं कुर्यान्मुद्रैषाल्लडुकाभिधा ॥ उत्तानवामुष्टिस्थबीजपूरकया मता ॥ दंतपाशांकुशाविघ्नपरशुल्लडुकसंज्ञका
बीजपूरहूया चेति गणेशस्य प्रिया मता ॥ शाक्तेयीनां च मुद्राणां कथंते लक्षणानि तु ॥ पाशांकुशवराभीतिखड्गचर्मधनुःशरा ॥ मौशली
मुद्रिका दौर्गी मुद्राशक्तिप्रिया मता ॥ लक्ष्मीमुद्रा वर्तते लक्ष्म्या वाग्वादिन्यास्तु पूजने ॥ अक्षमाला तथा व्याख्या वीणा पुस्तकमुद्रिका ॥
मातंगीन्यास्तु वीणाख्या मुद्रा वाणिप्रिया भवेत् ॥ योनिमुद्रा तु सर्वासां शक्तीनां प्रीतिदा मता ॥ पाशांकुशाख्ये प्रोक्ते वै कथ्यंते न्या यथा
क्रमं ॥ उत्तानं दक्षिणं हस्तं कृत्वाधो नामयेद्धनै ॥ संहतांगुलिकं मुद्रा वराख्या परिकीर्तिता ॥ परस्तु खवामहस्तं उछ्रितांगुलिकं भवेत् ॥
अभयस्य तु मुद्रैषा कथितां चाभयप्रदा ॥ कनिष्ठानामिके बध्वा स्वांगुष्ठेनैव दक्षते ॥ श्लिष्टांगुली तु प्रसृते संयुते खड्गमुद्रिका ॥ वामह
स्तं तथा तिर्यक् कृत्वा चैव प्रसार्य च ॥ आकुंचितगतिं कुर्याच्चर्ममुद्रेयमीरिता ॥ वामस्य मध्यमाग्रं तु तर्जन्यग्रे नियोजयेत् ॥ अनामिकां क
निष्ठां च तस्यांगुष्ठे पीडयेत् ॥ दर्शयेद्वामके स्कंधे धनुर्मुद्रेयमीरिता ॥ दक्षमुष्टेस्तु तर्जन्या दीर्घया वाममुद्रिका ॥ मुष्टिं कृत्वा कराभ्यां च वा
मस्योपरि दक्षिणं ॥ कृत्वा शिरसि संयोज्य दुर्गामुद्रेयमीरिता ॥ चक्रमुद्रां तथा बध्वा मध्यमे द्वे प्रसार्य च ॥ कनिष्ठिके तथानीय तदग्रेंगुष्ठ
कौ क्षिपेत् ॥ लक्ष्मीमुद्रा तथा ह्येषा सर्वसंपत्प्रदायिनी ॥ दक्षिणांगुष्ठतर्जन्यावग्रलग्नपरांगुली ॥ प्रसार्यं दर्शयेदेषा मुद्रा स्यादक्षमा
लिका ॥ एषैव संहतो नानाव्याख्या मुद्रा समीरिता ॥ वीणावादनवद्धस्तौ कृत्वा संचालयेत्ततः ॥ वीणामुद्रेयमाख्याता सरस्वत्याः प्रियं

करी॥ वाममुष्टिं स्वाभिखं कुर्यात्पुस्तकमुद्रिका॥ ॥अथ वैष्णवमुद्रास्तत्रैव॥ एकोनविंशतिर्मुद्रा विष्णोरुक्ता मनीषिभिः॥ शंखचक्रगदापद्मवेणुश्रीवत्सकौस्तुभा॥ नवमाला तथा ज्ञानमुद्रा विल्वाहृया तथा॥ गारुडाख्या तथा मुद्रा विष्णोः प्रीतिविवर्धनी नारसिंही च वाराही हयग्रीवी धनुस्तथा॥ वाणमुद्राश्चपर्शुश्च जगन्मोहिनिका तथा॥ काममुद्रा तथाख्याता नासां लक्षणमुच्यते॥ वामांगुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना॥ कृत्वोत्तानां तथा मुष्टिमंगुष्ठं तु प्रसारयेत्॥ वामांगुष्ठस्तथाश्लिष्टा सपुत्रकाः सप्रसारिता॥ दक्षिणांगुष्ठसंस्पृष्टा मुद्रेषा शंखसंज्ञिका॥ विपर्यस्ते तले कृत्वा वामदक्षिणहस्तयोः॥ अंगुष्ठौ खयेच्चैव कनिष्ठानामिकांतरे॥ चक्रमुद्रेयमुद्दिष्टा सर्वसिद्धिकरी शुभा॥ हस्तौ तु सरलौ कृत्वा सलग्नौ संप्रसारितौ॥ अंगुल्यौ मध्यमे भूयः सलग्ने तु प्रसारिते॥ गदामुद्रेयमाख्याता विष्णोः संतोषकारिणी (हस्तौ तु संमुखौ कृत्वा संहतावुन्नतौ॥ अंगुल्यौ मध्यमे भूयः सलग्ने तु प्रसारिते॥ गदामुद्रेयमाख्याता विष्णोः संतोषकारिणी) ॥हस्तौ तु संमुखौ कृत्वा संहतावुन्नतांगुली॥ तलांतमिति तांगुष्ठौ मुद्रैषा पद्मसंज्ञिता॥ श्रोष्ठे वामकेऽंगुष्ठे लग्नन्यस्तकनिष्ठिक॥ दक्षिणांगुष्ठसंलग्नात्तत्कनिष्ठाप्रसारिता॥ तर्जनी मध्यमानामा निश्लिन्तं कोच्चचालिता॥ वेणमुद्रा भवेदेषा सुगुप्ता प्रेयसी हरेत्॥ अन्योन्यपृष्ठकरयोर्मध्यमानामिकांगुली॥ अंगुष्ठेन तु वध्नीयात्कनिष्ठामूलमाश्रिते॥ तर्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससंज्ञका॥ अनामापृष्ठमध्यस्थान्दक्षिणस्य कनिष्ठिकाम्॥ कनिष्ठयान्यया वतर्जन्या दक्षया तथा॥ वामानामाश्च मावध्नीयाद्दक्षांगुष्ठस्य मूलके॥ अंगुष्ठमध्यमे वामे

संयोज्य सरला परा ॥ वनस्थाप्यग्रसेलग्नमुद्राकौरूक्षभसंज्ञका ॥ स्पृशेत्कराठादिपादांतं तर्जन्यांगुष्ठनिस्पृया ॥ करद्वयेनमालावन्मुद्रेयंव
नमालिका तर्जन्यंगुष्ठेनवेष्टयेत ॥ दक्षांगुष्ठेनतंचैवतदीयाभिर्निपीयच ॥ अंगुलीभिर्वामहस्तांगुलीभिस्तांश्चपीडयेत ॥ गाढंहृदिक्षि
पेदेषाविल्वाख्यामुद्रिकामता ॥ हस्तौतुविमुखौकृत्वाग्रंथयित्वाकनिष्ठिके ॥ मिथस्तर्जनिकेश्लिष्टेश्लिष्टावंगुष्ठकौतथा ॥ मध्यमानामि
कादंतुद्वौपक्षाविवचालयेत ॥ एषागरुडमुद्रास्याद्विष्णोःप्रीतिविवर्द्धनी ॥ जानुमध्येकरौकृत्वाचिवुकाश्रौसमावुभौ ॥ हस्तौचभूमिसंल
ग्नौकंपमानःपुनःपुन ॥ मुखंचविवृतंकुर्याल्लेलिहानांचजिह्वकां ॥ नारसिंहीभवेदेषामुद्रातत्प्रीतिवर्द्धनी ॥ अंगुष्ठाभ्यांचकरयोरथा
क्रम्यकनिष्ठिके ॥ अधोमुखीचसर्वाभिर्मुद्रेयंनृहरेर्मता ॥ दक्षोपरिकरंवामंकृत्वोत्तानमधःसुधी नामयेदितिप्रोक्तामुद्रावाराहसं
ज्ञका ॥ दक्षहस्तंचोर्द्ध्वमुखंवामहस्तमधोमुखं ॥ अंगुल्यग्रंतसंयुक्तंमुद्रावाराहसंज्ञका ॥ वामहस्तनलेकृत्वादक्षांगुलिरधोमुखी ॥ संरो
प्यमध्यमानासामुन्नम्याधोविकुंचयत ॥ हयग्रीवप्रियामुद्रातन्मूर्त्तेरनुकारिणी धनुर्वाणपर्शुमुद्राःप्रागेवोक्ताः ॥ ॥ मूर्द्धिस्वांगुष्ठ
मुष्टीयंमुद्रात्रैलोक्यमोहिनी ॥ हस्तौतुसंमुखौकृत्वाप्रसृतांगुलकौतथा ॥ तर्जन्यौमध्यमापृष्ठेअंगुष्ठौमध्यमास्थितौ ॥ काममुदितासर्व
देवप्रियंकरी ॥ अथसौरदामुद्रा ॥ नारायणीये ॥ पद्माकारौकरौ ॥ कृत्वाप्रविश्लिष्टेतुमध्यमे ॥ अंगुल्यौधारयेत्तस्मिन्बिंबमुद्रेतिसोच्य
ते ॥ दर्शयेदग्रतःपद्मेबिंबमुद्रेतिचोच्यते ॥ ॥ अथसैवमुद्राः ॥ तत्रशिवरहस्ये ॥ शैवीनामयमुद्रानांदक्षाणांषण्मुखप्राण ॥ महा

देवप्रियानांतु कथ्यंते लक्षणानि ॥ उद्धितं दक्षिणांगुष्ठं वामांगुष्ठेन रुन्धयेत् ॥ वामांगुलीर्दक्षिणाभिरंगुलिभिश्च वंधयेत् ॥ लिंगमुद्रा
समाख्याता शिवसान्निध्यकारिणी मिथः कनिष्ठिके वध्वा तर्जनीभ्यामनामिके ॥ अनामिकोर्द्धसंश्लिष्टदीर्घमध्यमयोरध ॥ अंगुष्ठा
ग्रद्वयंन्यस्येद्योनिमुद्रेयमीरिता ॥ अंगुष्ठेन कनिष्ठांतु वध्वा शिष्टांगुलित्रयं ॥ प्रसारयेत्त्रिशूलाख्या मुद्रैषा परिकीर्त्तिता ॥ अंगुष्ठतर्जन्य
ग्रंथयित्वांगुलित्रयं ॥ प्रसारयेदक्षमालामुद्रेयग्रहकीर्त्तिता ॥ अथ । कृतो दक्षहस्तः प्रसृतो वरमुद्रिका ॥ ऊर्द्धकृतो वामहस्तः प्रसृतो
भयमुद्रिका ॥ मिलितानामिकांगुष्ठमध्यमायाणि योजयेत् ॥ शेषांगुलीउद्धिताये मृगमुद्रा समीरिता ॥ पंचांगुल्या दक्षिणास्तु मिलिता
ऊर्द्धमुत्थिता ॥ खट्वांगमुद्रा षट्क शिवस्यापि प्रियामता ॥ पात्रवद्वामहस्तं च कृत्वांके वामके तथा ॥ विधायोद्धितवत्कुर्यान्मुद्रा का
पालिनीमता ॥ मुष्टिं च शिथिलां वध्वा ईषदुद्धितमध्यमां ॥ दक्षिणामूर्द्धमुन्नस्य कर्णदेशे प्रचालयेत् ॥ एषा मुद्रा डमरुका सर्वविघ्नवि
नाशिनी ॥ लिंगयोनित्रिशूलाक्षमालेष्टाक्षमालेषाभीमृगात्मिका ॥ खट्वांगा च कपालाख्या डमरुः शिवतोषदा ॥ लक्षणासंग्रहे आ
सने पद्ममुखं ॥ मुद्रैषांकुशलपद्मालपद्मेत देवोर्द्धपुनपुन ॥ पूजास्यात्वागते वार्यमुद्रा वांजलिरुच्यते ॥ अनायांगुष्ठयोर्योगात्सेवा
क्तापाद्यमुष्टिका ॥ उत्तानं दक्षहस्तं तु कृत्वा निम्नतलं सुधी ॥ कनिष्ठहीनां संयुक्ताश्चेत्स्वांगुल्यउन्नता ॥ मुद्रैषाचमने प्रोक्ताधोमु
खी सात्वनामया ॥ स्पृष्टांगुष्ठं भवेन्मुद्रा मधुपर्के वरानने ॥ अधोमुखी दक्षहस्तस्तु नामाष्टिकनिष्ठया ॥ विमुक्ता स्नानमुद्रैषा गदिता

परमेश्वरि ॥ उत्तानं दक्षिणं हस्तं कृत्वा तन्मध्यमां पुने ॥ अङ्गुष्ठेन स्पृशेदेषा मुद्रा वस्त्रस्य कीर्त्तिता ॥ एषैवानामिकास्पर्शान्मुद्रा भूषणसंज्ञका कनिष्ठास्पर्शनो ह्येषा उपवीतस्य मुद्रिका ॥ ज्येष्ठाग्रेण कनिष्ठाग्रस्पृशेद्गंधस्य मुद्रिका ॥ अधोमुखं करं कृत्वा तर्जन्यग्रेण योजयेत् ॥ अंगुष्ठाग्रं तु मध्येयं पुष्पाख्या परमेश्वरि ॥ धूपमुद्रेयमाख्याता सर्वदेवप्रियंकरी ॥ ज्येष्ठाग्रेण स्पृशेद्यं मध्यमायाः मुखाश्रितं ॥ दीपमुद्रेयमुदिता सर्वदेवप्रिया शिवे ॥ अनामाग्रस्पृशेद्देवि ज्येष्ठाग्रेणानुदेशिक ॥ नैवेद्यमुद्रा गदिता देवानां तृप्तिदायिनी ॥ ॥ नारदपंचरात्रे ॥ ग्रासमुद्रां सव्यहस्ते प्रफुल्लकमलाकृतिं दर्शयेन्नं च वायूनामन्यहस्ते न दर्शयेत् ॥ कनिष्ठानामिके सम्यगंगुष्ठाग्रेण योजयेत् ॥ प्राणमुद्रा समाख्याता प्रथमं दर्शयेदिमां ॥ योजयेत्तर्जनीं मध्यामपानस्याथ मुद्रिका ॥ मध्यमानामिके तद्वद्व्यानमुद्रा प्रकीर्त्तिता ॥ तर्जनीमध्यमानामास्तद्वन्मुद्रा तुरीयका ॥ सर्वाभिरंगुलिभिश्च पंचमी मुद्रिका मता ॥ स्वकीयैर्मनुभिर्युक्ता पंचमुद्रा प्रकीर्त्तिता ॥ प्राणसज्ञस्तथापानो व्यानोदानमनुस्तत ॥ समानो ङेयुताः सर्वे प्रणवाद्या द्विठांतिका पंचमुद्रा भवतिह क्रमेणैवं समीरिता ॥ ॥ लक्षणसंग्रहे ॥ मणिवंधस्थितौ कृत्वा प्रसृतांगुलिकाकरौ ॥ कनिष्ठांगुष्ठयुगले मिलित्वांतः प्रसारयेत् ॥ सप्तजिह्वाख्यमुद्रेयं प्रिया वैश्वानरस्य हि ॥ कुलार्णवे ॥ सर्वाभिरंगुलीभिश्च दद्याद्भूतबलिं प्रिये ॥ पश्चवाहिन्यां ॥ वृद्धाभ्यामंगुलीं बध्वा तर्जन्योर्दशवत्सृजे ॥ अग्रे वामं ततः पृष्ठे दक्षमाकर्मेष्ठने ॥ नाराचमुद्रा संप्रोक्ता योज्या बलिवि

सर्जने ॥ ॥ लक्षणासंग्रहे ॥ अधोमुखेवाहनस्तुमुद्रास्यदक्षहस्तकं ॥ क्षिप्ताङ्गुलीरंगुलिभिःसंयोज्यपरिवर्तयेत् ॥ एषासंहारमुद्राह्विसर्जनविधौमता ॥ तथा ॥ उद्धीस्यवामतर्जन्यामधावक्रांपरांन्यसेत् ॥ तिर्यङ्मुखीभवेदेषाशनिरुद्धारिमर्दिनि इति ॥ अंगुष्ठावुन्नतौमुष्टौःकृत्वासंलग्नयोर्द्वयो ॥ तावेवाभिमुखौकुर्यान्मुडैषाकालकर्णिका ॥ दक्षिणानिविडामुष्टिर्नाशिकापिततर्जनी ॥ मुद्राविस्मयसंज्ञास्याद्विस्मयावेशकारिणी ॥ सुषिरश्चीकृतांगुष्ठादक्षिणानादमुद्रिका ॥ तर्जन्यंगुष्ठयोगाद्यताविष्णुमुद्रिका ॥ ॥ अथजपकालविहितासनानि ॥ ॥ तत्रगोरक्षसंहितायां ॥ जानुर्वोरंतरेसम्यक्कृत्वापादतलेशुभे ॥ ऋजुकायःसमासीनस्वस्तिकंःतदुदीरितं ॥ गुल्फौचवृषणस्यादसीवण्याःपार्श्वयोक्षिपेत् ॥ पार्श्वपादौचपाणिभ्यांदृढंबध्वासुनिश्चल ॥ सिधासनंभवेदेतत्सर्वव्याधिविषापहं ॥ एकपादमथैकस्मिन्विन्यस्योरुणिसंस्थितं ॥ इतरेस्मिंस्तथाचोरौवीरासनमुदारितं ॥ वामपादमुपादायदक्षिणोरौप्रविन्यसेत् ॥ तथैवदक्षिणंपादंसव्यस्योपरिविन्यसेत् ॥ पद्मासनंदेवेदेतत्सर्वेषामपिपूजितं ॥ स्वस्तिकंपद्मकंवीरंसिद्धंचेतिचतुष्टयं ॥ जपेप्रशस्तमन्येषांप्रसंगादेवकीर्तनमिति ॥ गौतमीयतंत्रे प्राङ्मुखोदङ्मुखोवापिस्वस्तिकासनमास्थितं ॥ रात्रौतुदङ्मुखोवाभूत्वाप्रयतमानसः ॥ स्वस्तिकासनमासीनःपद्मासनमथापिवेतिस्वयमेवोभयविधानात् ॥ ॥ इतिगदितमशेषंशंकरोपासनायांयजनजपहुतादौशास्त्रदृष्टंविधानं ॥ गुरुचरण

॥ राम ॥
॥२१६॥

सरोजाराधनाद्रम्यमेतत्कृतंसहस्रैर्गोपनियंहितस्मात् ॥ श्रीनिकेतनदुग्धाब्धेः श्रीनिवासेंदुरुत्थितः ॥ प्रसारितातेनभुवि श्रीशि
वार्चनचंद्रिक ॥ श्रीनिवासस्यपूर्णेन्दोः प्रसिताशिवचंडिका ॥ तत्साधकचकोराणामस्तुसंतुष्टयेसदा ॥ अज्ञानादथवालस्यादत्रदोषः क्वचि
द्भवेत् ॥ संतः संवीक्ष्यसम्यक्तंशोधयंतुकृपान्विताः ॥ अज्ञैर्नज्ञायतेदोषः प्राज्ञास्तंशिक्षयंतिच ॥ अतोनारोपयंत्येवप्राज्ञास्तंयथकतृषु ॥ स
न्तस्त्यक्ष्यतिदोषांश्चसमासाद्यगुणात्मक ॥ कंटकद्रुमसंकीर्णेष्वरण्येष्विवचंदनं ॥ खलाः खलुविचिन्वंतिदोषलेशंगुणार्णवे ॥ फ
लिताम्रवनेकाकाः पिचुमंदफलंयथा ॥ चत्वारोत्रकृताग्रंथामयाह्यागमदर्शने ॥ निदेशाद्दिशिकेंद्रस्यमंत्रप्रदप्रवृत्तये ॥ तत्राद्यः
पारिजाताख्योभैरवार्चापत्तदिकः ॥ अन्योरत्नाकराख्यः स्यात् श्रीसौभाग्यपदादिकः ॥ तृतीयः कल्पवल्ल्याख्यः सपर्याक्रमपूर्वकः ॥ चतु
र्थस्याभिधानंतुश्रीशिवार्चनचंद्रिका ॥ तेष्वाद्येभैरवार्चोक्ता श्रीविद्याद्वितीयके ॥ तृतीयेसप्रशस्त्याख्यमालामंत्रनवार्णयोः ॥ विधि
र्विरच्यतः सम्यक्तपर्यायांसुविस्तरः ॥ पंचायतनमंत्राणांचतुर्थेविस्तरः कृत ॥ संसारसागरंघोरंचतुर्भिर्हृतियेनरः ॥ अभ्यर्च्यदेवता
स्तेषांपोतास्तेमयाकृताः ॥ एतेष्वेकंसमारुह्यतल्लोकद्वीपमेत्यच ॥ नचभुक्त्वाखिलान्भोगान्मुक्तिरत्नमवाप्नुयात् ॥ ॥ सुंदराचार्य
शिष्येणश्रीनिवासेनधीमता ॥ षट्चत्वारिंशदागमत्प्रणीतातायांप्रकाशकः ॥ ॥ इतिश्रीसुंदराचार्यचरणारविंदद्वंद्वानेवासि
नाश्रीश्रीनिवासभट्टेनविरचितायांश्रीशिवार्चनचंद्रिकायांषट्चत्वारिंशः प्रकाशकः संपूर्णंशुभमस्तु